A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1919-20 TO 1921-22

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

MAHĀMAHŌPĀDHYĀYA S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume IV—Part I. Sanskrit C

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1927

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1919-20 TO 1921-22.

VOLUME IV.

PART I—SANSKRIT—C.

R. No. **3635.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 342. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇabhāratī Kappiyar Svāmigaḷ, Mūppilsthānam, Naḍuvil-Maṭham, Trichur, Cochin State.

बृहदारण्यकोपनिषद्भाष्यवार्त्तिकव्याख्या —न्यायतत्त्वविवरणम्.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAVĀRTTIKA-VYĀKHYĀ : NYĀYATATTVAVIVARAṆAM.

Bound in two volumes.

Same work as that described under R. No. 3227 ante, wherein see for the beginning. By Nṛsiṁhaprajña.

Complete.

End:

एवमन्यदित्युपासनं विद्याप्रकरणफलितं बुद्धिशुद्धिद्वारेण ब्रह्मविद्योत्पत्तिफलकमेवेत्याह—ब्रह्मविद्याधिकारेऽस्मिन्निति । ननु यदि गोदोहनादिवत् ब्रह्मविद्योत्पत्तिफलमेव सत्तदभ्युदयसाधनं भव(ति) . . . . षु स्यादिति नेत्याह—एवं सर्वमुपासनमिति । आदित्यविधानमात्रे दृष्टान्त इत्यर्थः । बृहद्विचारः शिशुब्राह्मणं च यथाभाष्यं स्फुटार्थम् ॥

Colophon:

इति चतुर्थस्य द्वितीयं ब्राह्मणम् ॥

न्यायतत्त्वविवरणं समाप्तम् ॥

R. No. 3636.

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 167. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Foll. 156*b*, 165*b* and 166 are left blank.

भावप्रकाशनम्.

BHĀVAPRAKĀŚANAM.

A work in Sanskrit poetics : by Śāradātanaya, pupil of Divākara and son of Bhaṭṭagōpāla who was the son of Kṛṣṇa and grandson of Lakṣmaṇa (author of Vēdabhūṣaṇa) who lived in the village Māṭharapūjā.

Complete in ten Adhikāras dealing with the following subjects :—

१. भावनिर्णयः.
२. स्वस्वरूपाभिव्यक्तिनिर्णयः.
३. रसभेदतत्स्वरूपनिर्णयः.
४. शृङ्गारालम्बननायकनायिकादि - स्वरूपनिर्णयः.
५. नायकनायिकाभेदतदवस्थाश्रय- रसभावदृष्टिविकारादिवर्ण- नम्.
६. शब्दार्थसम्बन्धतद्भेदप्रकारनि- र्णयः.
७. नाट्येतिवृत्तशरीरलक्षणाभिधा- नम्.
८. दशरूपकलक्षणम्.
९. नृत्यभेदस्वरूपप्रकारनिर्णयः.
१०. नाट्यप्रयोगभेदप्रकारनिर्णयः.

Beginning :

प्रच्योतन्मदमन्थरभ्रमरिकाझङ्कारगीतिक्रम-
स्फूर्जद्बृंहितवादनव्यतिकरं भावोल्लसत्प्रक्रियम् ।
नृत्यन्नस्तु सुखाय वः करिमुखः पुण्योपचारैश्चिरा-
दानन्दी नटभावितैरिव यथा भावैस्त्वसामाजिकः ॥

वन्दे बृन्दावनचरं गोविन्दं गोपिकापतिम् ।
गाः पालयन्तं गायन्तं वेणुना षड्जनादिना ॥

* * * *

आर्यावर्ताह्वये देशे स्फीतो जनपदो महान् ।
मेरूत्तर इति ख्यातस्तस्य दक्षिणभागतः ॥

ग्रामो माठरपूजाख्यो द्विजसाहस्रसम्मितः ।
तत्र लक्ष्मणनामासीद्विप्रः काश्यपवंशजः ॥

त्रिंशता क्रतुभिर्विष्णुं तोषयामास वेदवित् ।
वेदानां भाष्यमकरोन्नाम्ना यो वेदभूषणम् ॥

तस्य श्रीकृष्णनामासीत्पुत्रः कृष्ण इवापरः ।
वेदानधीत्य सकलान् शास्त्राण्यप्यखिलानि च ॥

पुत्रार्थं स महादेवं वाराणस्यामतोषयत् ।
तस्यासीद्भट्टगोपालो नाम्ना सूनुस्सुलोचनः ॥

अष्टादशसु विद्यासु बहुशश्च कृतश्रमः ।
उपास्य शारदां देवीं पुत्रं लेभे गुणोत्तरम् ॥

तमाह्वयत्पिता प्रीतः शारदातनयाख्यया ।
अधीतवेदवेदाङ्गो वर्धमानः पितुर्गृहे ॥

कदाचिच्छारदां देवीमुपासितुमुपाययौ ।
उपास्य स वसंस्तस्याश्चैत्रयात्रामहोत्सवे ॥

आसीनां नर्तनागारे तां देवीं प्रेक्षकैस्सह ।
प्रणम्य तैरनुज्ञातः तस्याः पार्श्वमुपाविशत् ॥

त्रिंशत्प्रकारभिन्नानि रूपकाणि पृथक् पृथक् ।
नटैः प्रपूज्यमानानि भावाभिनयकोविदैः ॥

दृष्ट्वा स देवीं वरदां नाट्यवेदमयाचत ।
नाट्यशालापतिः कश्चित् दिवाकर इति द्विजः ॥

तयैव नाट्यवेदस्य नियुक्तोऽध्यापने तदा ।
प्रातस्ताऽपि सदाशिवस्य शिवयोर्गौर्या मतं वासुकेः
वाग्देव्या अपि नारदस्य च गुरोः कुम्भोद्भवव्यासयोः ।
शिष्याणां भरतस्य यानि च मतान्यप्याप्य तान्यञ्जसा
सूनोरप्युत नाट्यवेदमखिलं सम्यक् समध्यापयत् ॥

शारदातनयो देव्यास्तानधीत्य च सन्निधौ ।
आदाय सारमेतेभ्यो हितार्थं नाट्यवेदिनाम् ॥

भावप्रकाशनं नाम प्रबन्धमकरोत्तदा ।
एतस्मिन् प्रथमं भावस्तस्य भेदास्ततः परम् ॥

*   *   *   *

Colophon:

इति शारदातनयविरचिते भावप्रकाशने भावनिर्णयो नाम प्रथमोऽधिकारः ॥

End:

सन्ति चैकशतं शिष्या भरतस्य महामुनेः ॥
तेषां मतैरभिन्नोऽपि भिन्नवत्प्रतिभाति सः ।
न स्वातन्त्र्यात्र मौक्त्या(ग्ध्या)च्च तो(सोऽप्यर्थो निहितः क्वचित् ॥
भट्टाभिनवगुप्तार्यपादप्रोक्तेन वर्त्मना ।
अयं प्रबन्धः कथितश्शारदायाः प्रसादतः ॥
यः कश्चिदवगन्ता चेत्प्रबन्धस्यास्य तत्त्वतः ।
स माननीयो भवति राजभिर्भावकोविदैः ॥

Colophon:

इति शारदातनयविरचिते भावप्रकाशने नाट्यप्रयोगभेदप्रकारविशेषनिर्णयो नाम दशमोऽधिकारः ॥

सोऽव्यादादिनगो ? भुजङ्गललितत्रासाञ्चिताख्यैर्जन(ग)न्-
म्नर्गध्वंसनपालनाय करणैस्तत्तत्क्रियारतानतै(स्थानगैः) ।
यः कल्पान्तमहातमीयवनिता(का)मध्यान्तरन्तर्हितः
स्वात्मन्येव जगद्विचित्रचरितं पश्यन्मुदा नृत्यति ॥

Colophon:

इति भावप्रकाशस्समाप्तः ॥

R. No. 3637.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1921–22 from a MS. of His Holiness Tamarapalli Svāmigaḷ, Trikkekāṭ-mana, Tirur, South Malabar.

(*a*) पञ्चीकरणविवरणम्.

PAÑCĪKARAṆAVIVARAṆAM.

Foll. 1a—6a.

Same work as that described under No. 4637 of the D.C.S. MSS., Vol. IX. By Ānandajñāna, disciple of Śuddhānanda.

Complete.

(b) पञ्चीकरणविवरणव्याख्या—तत्त्वचन्द्रिका.

PAÑCĪKARAṆAVIVARAṆAVYĀKHYĀ: TATTVACANDRIKĀ.

Foll. 6b—19a.

A commentary on the work described under subdivision (a) of this number: by an unknown author who salutes Śrīkṛṣṇatīrtha, Jagannāthāśrama and others.

Complete.

Beginning:

यन्नामरूपजगदुद्भवसम्प्रतिष्ठा-
संरोधकारणमनिर्वचनीयशक्ति ।
सच्चित्सुखाद्य(द्व)यवपुंज(पुर्ज)गतो हिताय
रामाभिधामुपगतं भुवि तं नमामि ॥

यत्पांसुधूसरितमस्तकमस्तवा(पा)पमज्ञानलक्षणमहाग्रहयक्षभूताः ।
मुक्त्वाश्रमं ययुरजस्रमतीव रम्यं श्रीकृष्णतीर्थगुरुपादयुगं नमामि ॥

जगन्नाथाश्रमाद्या ये गुरवो मे कृपालवः ।
तानहं विधिवन्नत्वा करवै तत्त्वचन्द्रिकाम् ॥

श्रीमच्छङ्करभगवत्पूज्यपादविरचितं पञ्चीकरणाख्यं प्रकरणमतिसङ्क्षिप्तमनेकार्थसङ्ग्रहगम्भीरमतिविमलमर्थतः प्रकटीचिकीर्षुरानन्दगिर्याचार्यः स्वचिकीर्षितस्याविघ्नपरिसमाप्तये विशिष्टशिष्टाचारपरिप्राप्तमिष्टदेवतालक्षणं मङ्गलमाचरन् शास्त्रस्य विषयप्रयोजने दर्शयति—पदबोधादिति । अयमक्षरार्थः । परमात्मने नम इत्यन्वयः । तस्याप्रसिद्धिं वारयति—तस्मा इति । सर्वनाम्नः प्रसिद्धार्थवाचित्वात्प्रसिद्धिश्च एष सर्वेश्वर इत्यादिश्रुतिभ्यस्तच्छब्दनिर्दिष्टस्य परमात्मनस्स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति ।

End:

ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते मङ्गलमाचरणीयमिति शिष्टाचारमनुरुन्धान इष्टदेवतां प्रणमति—षड्विधमिति ।

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इति लिङ्गविधानम् । सदेव सोम्येदमग्र आसीदित्यादिप्रतिषेधो नेह नानास्ति किञ्चनेत्यादि ॥

पञ्चीकृतेर्विवरणमर्थतः प्रकटीकृतम् ।
यथाश्रुतं यथाबुद्धि तेन तुष्येदुमापतिः ॥

सीतासुवर्णलतिकापरिवीतगात्रं प्रेमारसार्द्रवरणं सुखसन्फलाढ्य(म्) ।
कीर्तिप्रसूनपरिपालितसर्वलोकं रामाभिधं जगति कल्पतरुं नमामि ॥

Colophon:

इति श्रीमत्पञ्चीकरणविवरणटीका तत्त्वचन्द्रिका नाम समाप्ता ॥

Fol. 19*b* gives the names of the owner of the original MS. Fol. 20 is left blank.

Transcribed in 1920–21 from a MS. of Periyatirumāḻigai Śrīnivāsācāriyar, Alwartirunagari, Tinnevelly district.

(*c*) रामामृतम्.

RĀMĀMṚTAM.

Foll. 21*a*—33*b*. Fol. 34*b* gives the colophon of this work Fol. 34*a* is left blank.

A poem narrating the story of Śrī-Rāma: by Vakulabhūṣaṇa who lived in the town Kurukāpura (Alwartirunagari), Tinnevelly district.

Complete.

Beginning:

अयोध्यानगरे सौधैर्भव्ये भर्मादिनिर्मितैः ।
वसन् दशरथो राजा पृथिवीं पर्यपालयत् ॥
बहून् संवत्सरान् राज्यं प्रशासत्प्रमदागणान् ।
कौसल्याप्रमुखान् कान्तानन्वभूदसमो नृपः ॥

* * * *

पुनर्वसुदिने रामः पुष्यर्क्षे भरतस्सुधीः ।
आश्लेषे लक्ष्मणः श्रीमान् शत्रुघ्नश्चाप्यवातरत ॥

* * * *

Colophon:

इति वकुलाभरणकविविरचिते रामामृते प्रथम आस्वादः ॥

End:

श्रृङ्गारेण विदेहराजतनयां सर्वां प्रजां पालनात्
दानेनायमकिञ्चनान् गुणनिधिस्सन्तोषयन् सन्ततम् ।
शत्रूनद्भुततेजसा प्रशमयन् कीर्त्या धरित्रीं शुचिं
कुर्वन्नर्यमवंशमौक्तिकमणिः श्रीराघवो राजते ॥

श्रीरामचन्द्राद्भुतवृत्तदीपं रामामृतं काव्यमिदं पठन्तः ।
दारांश्च वेतण्डसुतादिरूपां भजन्ति बोधं च सुखेन लक्ष्मीम् ॥

कुरुकापुरवास्तव्यो वकुलाभरणः कविः ।
श्रीरामप्रीतये चक्रे कैङ्कर्यं वाचिकं शुभम् ॥

Colophon:

इति श्रीरामामृतं सम्पूर्णम् ॥

Transcribed in 1920–21 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Ernakulam, Cochin State

(*d*) वेदान्तसारसर्वस्वम्.

VĒDĀNTASĀRASARVASVAM.

Foll. 35*a* – 39*a*. Foll. 39*b*—40*b* are left blank.

A treatise explaining the essential principles of the Advaita-Vēdānta: by Mādhavasarasvatī, disciple of Vidyēndravana.

Complete.

Beginning:

वेदान्तविज्ञानसुनिश्चितार्थैर्योगीश्वरैर्ध्येयमजं विशुद्धम् ।
उमानुमाभ्यामधिगम्यमानं वन्दे महेशं सदनुग्रहेशम् ॥

विद्येन्द्रवननामानं श्रीगुरुं प्रणमाम्यहम् ।
विनेयभृङ्गसंलीढपादपङ्केरुहाश्रयम् ॥

पदवाक्यप्रमाणज्ञा(ज्ञो) माधवाख्यसरस्वती ।
वेदान्तसारसर्वस्वं कुरुते बुद्धिशुद्धये ॥

वेदा ऋगादयो ज्ञेयास्तदन्तस्तच्छिरो मतम् ।
तस्य सारो महावाक्यं तत्त्वमस्यादिरूपकम् ॥

सर्वस्वं तेन यद्बोध्यं ब्रह्मात्मैक्यं परं पदम् ।
तस्य सर्वं स्वमित्येवं व्युत्पत्त्या त्वभिधीयते ॥

End :

एवं वेदान्तसिद्धान्तसङ्ग्रहो लेशतः कृतः ।
गुरुशास्त्रोक्तमार्गेण वर्ततां सत्सु सर्वदा ॥
तं वन्द्यं गुरुमद्वयं सदमलानन्दं जगद्व्यापिनं
भक्तानामनुचिन्तितार्थकरणे चिन्तामणिं देहिनाम् ।
नित्यं निष्कलमेकमेव मनसा वाचा शरीरेण च
श्रीमन्माधवशारदाख्ययतिमेवाहं भजे सन्ततम् ॥

* * * *

पारप्रयाणसुहृदस्सकलागमानां पापाम्बुराशिपरिशोषविधौ धुरीणाः ।
पायात्सुराधिहरणे भजतां प्रवीणाः पादारविन्दतलपांसुकणा गुरूणाम् ॥

Transcribed in 1920–21 from a MS. of M.R.Ry. Tirunārāyaṇa Raja Avargal, Kottakal, Malabar district.

(*e*) त्रिपुरी.

TRIPURĪ.

Foll. 41*a*—43*a*. Foll. 43*b* and 44 are left blank.

This is the text, a commentary on which is described under R. No. 3380, subdivision (*d*) ante. By Śaṅkarācārya.

Same work as that described under No. 2300, Vol II of the India Office Library Catalogue.

Complete.

Beginning :

शब्दस्पर्शरूपरसगन्धादयो विषयाः पञ्च पृथिव्यादयश्च परमात्मनस्समुत्पन्नाः । पृथिव्यापस्तेजो वायुराकाशमिन्द्रियाणि । अहङ्कारो बुद्धिर्महान व्यक्तम् । तत्र पृथिवी धारणे, आपः पिण्डीकरणे क्लेदने च, तेजः प्रकाशने पचने च, वायुर्व्यूहने, आकाशमवकाशदाने ।

End :

प्रकृतेरन्नमिति सिद्धं नत्वात्मन इति, जाग्रत्स्वप्नसुषुप्तेषु । एक एवात्मा जागरिते वैश्वानरः, स्वप्ने तैजसः, सुषुप्ते प्राज्ञः, स एव निर्विशेषस्तुरीयः ।

परमात्मा सोऽहमिति । यतो पायो(वाचो) निवर्तते(न्ते) । अप्राप्य मनसा सहैवेति ॥

Colophon:

इति त्रिपुरी समाप्ता ॥

Transcribed in 1921-22 from a MS. of M.R.Ry. Vāsudēvasōmayājippāḍ, Viḻayūr, Pattambi, Malabar district.

(*f*) गजेन्द्रमोक्षः.

GAJĒNDRAMŌKṢAḤ.

Foll. 45—56*a*. Fol. 56*b* is left blank.

A poem describing the Puranic story of the release of the Elephant-King by Lord Viṣṇu from the grip of a crocodile: by Vāsudēva.

Apparently complete.

Beginning:

कल्याणं कुरुताद्वो भूतानामधिपतिः स करुणाब्धिः ।
रक्षार्थं सुजनानां सन्निदधत् पुरुवने पुण्ये ॥
शक्त्योभयरूपस्सन् यत् किल नाथः स भुवनचक्रस्य ।
चक्रिणि मातरि जनयाम्बभूव जगदवनजनितरसम् ॥
यस्य च भाजकरूपं प्रसादतो विश्ववित्तविमलयशाः ।
यमयामास सुमेधाः कथासुधा वासुदेवकविः ॥ त्रयं सामन्येनार्या ।

* * * *

भक्त्या प्रणम्य देवं हरिं गुरुं श्रीगुरुप्रसादेन ।
वृत्तैर्गजेन्द्रमोक्षं ब्रूमस्तं शृणुत वृत्तज्ञाः ॥ मुखचपला ।
येषां न मत्सरोत्थं चेतसि सद्वृत्तवासनावन्तः ।
ते शोधयन्त्विदमन्तस्स्खलेन्न को वृत्ततो नेह ॥ जघनचपला ।

इदमार्याप्रकरणम्—

श्रीमानशेषसद्गुणपात्रं शास्त्रार्थसारावित् सुकृती ।
पाण्ड्येषु नीवृति बभाविन्द्रद्युम्नो नराधिपः पूर्वम् ॥ गीतिः ।

End:

अथ पाण्ड्यपार्तिं सविधे स्थितं प्रणयबाष्पतरङ्गितलोचनम् ।
अतिभक्तिभरेण समाकुलं हरिरुवाच कराम्बुरुहा स्पृशन् ॥ हरिणप्लुता ।
नृपतिलक भवान् विधेर्बलादहह महत् खलु दुःखमन्वभूत् ।
अपगतविपदद्य कल्पसे विमलमते सुचिरं सुखाय मे ॥ अपरवक्त्रम् ।

अनिशमृजुतया भजन्ति ये मामनितरभक्ति भजस्व धर्मभाजः ।
निशमय नृवराचिरादहं तानखिलभयादवमोचयामि सत्यम् ॥ पुष्पिताग्रा ॥

R. No. 3638.

Paper. 10⅝ × 9⅜ inches. Foli. 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Kṛṣṇacakravarti Ācārya, Ketandapatti, North Arcot district.

तत्त्वदीपिका.

TATTVADĪPIKĀ.

A treatise purporting to establish that Nārāyaṇa alone is fit to be styled as the Supreme Brahman; by Śrīnivāsācārya, son of Dēśikācārya. Complete.

Beginning:

(श्रि)यः पातिं जगत्सृष्टे(ष्टि)स्थितिसंहारकारणम् ।
प्रपद्ये भक्तरक्षार्थमवतीर्णं परं हरिम् ॥

यद्यपि भगवान् नारायणः पुरुषोत्तमः परं ब्रह्म परंज्योतिः परतत्त्वं परमात्मादिशब्दैः गीयते सकलजगत्कारणं स ह रक्षणायाजोऽपि जायते मुक्तप्राप्यश्चेति सत्सम्प्रदायः, तथापि शिवादय एव कासु चिद्याख्यासु परत्वेन प्रतीयन्ते । एते जगत्कारणतया मुमुक्षुभिः ध्येया इति केषां चिन्मन्दमतीनां विप्रतिपत्तिर्जाता । अतस्तद्व्युदासाय प्रवृत्तोऽयं ग्रन्थ इति प्रयोजनवानेवायमारम्भः ।

End:

एवं निखिलजगदुदयविभवलयलीलो भगवान् नारायण एव पर इति ॥

Colophon:

(देशि)कार्यसूनु(नो)ः श्रीनिवासाचार्यस्य कृतिषु तत्त्वदीपिका समाप्ता ॥

R. No. 3639.

Paper. 10⅝ × 9⅜ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Kṛṣṇacakravarti Ācārya, Ketandapatti, North Arcot district.

Fol. 148 is left blank.

टुप्टीकाव्याख्यानम्—वार्त्तिकाभरणम्.

ṬUPṬĪKĀVYĀKHYĀNAM; VĀRTTIKĀBHARAṆAM.

A commentary on Kumārila's Ṭupṭīkā which forms the Adhyāyas 4—12 of the Śābarabhāṣyavyākhyā.

The commentator Vēṅkaṭēśvaradīkṣita and his preceptor and elder brother Yajñanārāyaṇadīkṣita were the sons of Gōvindadīkṣita.

Contains the first Pāda complete and the third Pāda incomplete in the ninth Adhyāya.

Beginning:

(यज्ञकर्म प्रधान)न्तद्धि चोदनाभूतस्य द्रव्येषु संस्कारः तत्प्रयुक्तस्तदर्थत्वात् । इह खलु भगवानाचार्यस्स्वयमुपजीव्यानन्तरमुपजीवकं निरूपणीयमिति मन्वान उपजीव्यं निरूपितमिति पृच्छाति—ननु चेति । अथ उपजीव्योपजीवकभावलक्षणसङ्गत्यभावेऽपि अन्या सङ्गतिरिष्यतामिति चेत्स्यादेतत् । एवं यद्युपजीव्योपजीवकभावसङ्गतये उपजीव्यनिरूपणप्राथम्यं विवक्षितमस्यां न त्वेवमस्ति । अपि तु इह सिद्ध्ये तन्निरूपणप्राथम्यं विवक्षितम् ।

* * * *

ननु प्रास्मै पशव इति प्रयोगेऽपि आमे . . . . व्यक्तीनां पुंलिङ्गत्वात्ताभिरव सम्बन्धः स्यात् न तु मेषीव्यक्त्या, तस्यास्स्त्रीलिङ्गत्वात् इत्यत आह—अस्मिन्निति । स्यादेतदेवं यदि प्रकरणोपस्थाप्यव्यक्तिगतं लिङ्गमस्मैशब्दाभिधेयं स्यात् । इह तु पशु(शब्द) आकृत्यधिकरणन्यायेन न व्यक्तितो निष्कृष्य पशुत्वमेवाभिदधाति ।

* * * *

इदानीं त्वल्पशः प्रकृत्यूहः । प्रायेण तु वचनोहो विचार्यत इत्यभिप्रायेण प्रतिज्ञा उपपन्नेत्याह—यथेति । यथा प्रकृत्यूहस्सिध्यति । तथा प्रथमे पादे विचिन्तितमित्यर्थः । प्रथमे पादे प्रायेण प्रकृत्यूहः चिन्तितः इत्युक्त्वास्मिन्पादेऽस्मिन्नधिकरणे प्रतिनिध्यधिकरण एव चिन्त्यते नान्यत्रेत्यल्पशः प्रकृत्यूहाश्चिन्त्यत इति गम्यते । इदानीमिति । प्रायेणेत्यनुषज्यते ।

End:

सर्वासामपि त्व(ऋ)चां प्रत्येकप्रयत्नसाध्यत्वप्रकाशनार्थमेकवैकघेत्यभ्यासलक्षण ऊहः कर्तव्यः । मेधय(पति)त्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्य(च)न्यायनिगदत्वात्सर्वत्रा(त्रैव)विकारः स्यात् । अद्रिगुप्रैष एव द्विवचनान्ततया श्रूयते.

R. No. **3640.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 254. Lines, 20 in a page. Grantha. Good

Transcribed in 1921-22 from a MS. of M.R.Ry. N. Kṛṣṇacakravarti Ācārya, Ketandapatti, North Arcot district.

टुप्टीकाव्याख्यानम् - वार्त्तिकाभरणम्.

ṬUPṬĪKĀVYĀKHYĀNAM : VĀRTTIKĀBHARAṆAM.

Same work as that described under R. No. 3639 ante, wherein see for the beginning.

Contains the tenth Adhyāya only without the beginning.

Colophon:

इति श्रीमदद्वैतविद्याचार्यसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य साग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिश्रीयज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशद्यस्य साग्निचित्याप्तवाजपेययाजिश्रीवेङ्कटेश्वरदीक्षितस्य कृतिषु टुप्टीकाव्याख्याने वार्त्तिकाभरणे दशमस्याध्यायस्य प्रथमः पादः ॥

End:

तस्मान्नैवं सिद्धान्तः । किं तु प्रकारान्तरेणैव सिद्धान्तो वर्ण्यते— पुरोडाशद्वये . . . . . . योपलक्षितः काल उपांशुयाजाङ्गम् । सर्वत्र चोपलक्षणापायो(येऽ)पि उपलक्ष्यमवतिष्ठते । यथा शङ्खवेलायामागन्तव्यमित्यादौ । तेन कर्माङ्गभूतकालस्यैकपुरोडाशायामपि सद्भावादेकपुरोडाशायामुपांशुयाजनस्य बाध इति ॥

Colophon:

इति श्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य साग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिश्रीयज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशद्यस्य साग्निचित्याप्तवाजपेययाजिश्रीवेङ्कटेश्वरदीक्षितस्य कृतिषु टुप्टीकाव्याख्याने वार्त्तिकाभरणे दशमस्याध्यायस्याष्टमः पादः ॥ अध्यायश्च समाप्तः ॥

R. No. **3641.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Periyatirumāḷigai Śrīnivāsācārya, Alwartirunagari, Tinnevelly district.

Fol. 36 is left blank.

बोधायनापरप्रयोगः.

BŌDHĀYANĀPARAPRAYŌGAḤ.

Similar to work described under R. No. 3399 ante.
Complete.

Beginning:

मृतेऽहनीति । मृतमासतिथौ आब्दिककर्म कुर्यादित्युच्यते ।

अथ निषेधमाह—

यस्य भद्रा तिथीनां स्यात् भानुभौमशनैश्चरैः ।
त्रिपाद्दक्षैश्च संयोगं(गात्) स(त्रि)योगस्स(स्त्रि)पुष्करः ॥
एव्वृक्षतिथिवारेषु द्विसंयोगो द्विपुष्करः ।
द्विपुष्करेषु चन्द्राष्टमदिनेऽपि वा (?) ॥
वैनाशिके तदंशे वा श्राद्धं श्रेष्ठं न जन्मसु ।
दिनानि समदोषाणि दैवाद्विघ्नोद्भवे सति ॥

* * * *

यथाचारमभिश्रवणमुच्छिष्टापिण्डं दक्षिणादिकमपरेऽहनि तिलोदकं च । अथ सूत्रम्—अपि वा सङ्कल्पविधानेन च नित्यं तु कारयेत् । नित्या उपासते श्राद्धानि हवींषि च गामत्रकुर्यादिति बोधायनः ।

End:

श्राद्धे पाकपरिक्रियादिति न्यायेन च सूतकादौ प्राप्तेऽपि पत्न्यां रजस्वलायां सूतिकायामपि पाकानन्तरमवश्यं सपिण्डीकरणं कुर्यात् । प्रेतपत्नी रजस्वला चेत् न कार्यं पाकानन्तरमवश्यं कर्तव्यमिति गौतमवाक्येन प्रयोगकाराः ॥

Colophon:

इति बोधायनापरप्रयोगः ॥

R. No. **3642.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kīḻnattam village, Tinnevelly district.

Fol. 18*b* is left blank.

(*a*) निपातवादार्थः.

NIPĀTAVĀDĀRTHAḤ.

Foll. 1*a*—7*b*.

Same work as that described under No. 4258 of the D.C.S. MSS., Vol VIII.

Complete.

(*b*) सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Foll. 8*a*—11*b*.

Similar to the work described under No. 4325 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

गादाध्यां सामान्यनिरुक्तौ मूलोक्तलक्षणानां दुष्टलक्षणत्वे दोषेष्वतिव्याप्तिः । अथ च प्रथमलक्षणे समूहालम्बनविषयोदासीनघटादिवारणाय यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयनिवेशावश्यकतया बाधादिप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वात् बाधितहेतावव्याप्तिरपि ।

End:

साक्षात्कारीयविशेषणविशेष्यविषयितानां सर्वासामेव विनिगमनाविरहेण कारणतावच्छेदकतया परामर्शीयविषयतानां साक्षात्कारे प्रकारतया भासमानानां साक्षात्कारकारणतावच्छेदकत्वमस्ति . . . . . .

(*c*) उपसर्गद्योतकताविचारः.

UPASARGADYŌTAKATĀVICĀRAḤ.

Foll. 12*a*—14*b*.

Same work as that described under R. No. 1369(*a*) ante, without colophon. By Paṭṭābhirāma.

Complete.

(*d*) कर्मधारयविचारः.

KARMADHĀRAYAVICĀRAḤ.

Foll. 14*b*—16*a*.

Same work as that described under R. No. 1369(*b*) ante, without colophon. By Paṭṭābhirāma.

Complete.

(*e*) गदाधरीयव्याख्या — कृष्णभट्टीया.

GADĀDHARĪYAVYĀKHYĀ: KṚṢṆABHAṬṬĪYĀ.

Foll. 16*a*—18*a*. Fol. 18*b* is left blank.

Same work as that described under No. 4073 of the D.C.S. MSS., Vol. VIII. By Kṛṣṇabhaṭṭa.

Contains the Siṁhavyāghrī incomplete.

R. No. **3643.**

Paper. $10\frac{3}{8} \times 9\frac{3}{4}$ inches. Foll. 264. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. acquired through M.R.Ry. C. Gōpālācāriyar, Chingleput.

Bound in two volumes.

मीमांसानयविवेकः.

MĪMĀṀSĀNAYAVIVĒKAḤ.

Same work as that described under No. 4557 of the D.C.S. MSS., Vol IX, and R. No. 1786 ante. By Bhavanāthamiśra.

Contains the Adhyāyas four to eight complete.

R. No. **3644.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 192. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sādhumala-Vādhyār Tirumalai Ayyangar, Srivilliputtur, Ramnad district.

(*a*) सदनुष्ठानदर्पणः.

SADANUṢṬHĀNADARPAṆAḤ.

Foll. 1*a*—180*b*.

A work dealing with the differences in the conduct and duties of the two sects of Śrī-Vaiṣṇavas.

Contains the eighth Pratiphalana only.

Beginning:

प्रपन्नसन्न्यासिनां श्रीवैष्णवगृहस्थवन्दनानुष्ठानमुपपन्नम् । वचनाच्छिष्टाचाराच्च । सर्वे वैष्णवा यतिनः गृहस्थानां वन्दनं कुर्वन्त्येव । सर्वेषां वैष्णवयतीनां गृहस्थाशिष्यत्वात् । मुनित्रयं गोपालदेशिकशिष्यभूतं, केशवा-

र्यशिष्या आदिवण्शठकोपजीयाख्यादयः मठीयाः, ब्रह्मतन्त्रस्वतन्त्रयतिरपि वेदान्ताचार्यशिष्यः । परन्तु सर्वगृहस्थवन्दनं कुर्वन्ति नवेत्यत्रैव विशयः । स त्वकिञ्चित्करः एकत्र वन्दनसिद्धौ तुल्यन्यायेन सर्वेषां वन्दनीयत्वसिद्धेः । सन्न्यासिनां गृहस्थवन्दननिषेधः गुरुव्यतिरिक्तविषयः ।

End:

प्रपन्नसन्न्यासिनां ब्रह्मज्ञश्रीभाष्यकाराद्यभिमानविषयगृहस्थादिवन्दनमुपपद्यत इति नानुपपत्तिः । अतः प्रपन्नसन्न्यासिभिर्विशेषशास्त्रोक्तश्रीवैष्णवजन्ममाहात्म्यात् क्रियमाणं श्रीवैष्णवगृहस्थाद्युद्देश्यकवन्दनमुपपन्नमेव ॥

Colophon:

इति सदनुष्ठानदर्पणे सन्न्यासिकर्तृकगृहस्थादिप्रणामविषयो नामाष्टमं प्रतिफलनम् ॥

(*b*) आर्तिसप्ततिः.

ĀRTISAPTATIḤ.

Foll. 181*a*—185*a*.

Seventy stanzas entreating Gōdā, who is the incarnation of the goddess Earth, to protect the supplicant from difficulties and troubles: by Varada.

Complete.

Beginning:

गोदादेवि नमोऽस्तु ते पुरवरे श्रीधन्विनव्याभिधे
रत्नस्तम्भनिकाय्यगोपुरसुहामाराः(?) प्रतोलीयुते ।
सञ्जातं तुलसीवने जनिमतां सन्त्राणनायाद्य मां
दीनं त्वं किमुपेक्षसेऽहह महोदारेऽम्ब रङ्गप्रिये ॥

End:

श्रीमत्यै गोदायैरङ्गे शास पार्श्वललितायै ।
वरदाख्यदासः(न्तु(त्तु)त पदजलजनुषे सुमङ्गलं भूयात् ॥

Colophon:

इत्यार्तिसप्ततिः वर्हतीश(सुदर्शन)वरददासविज्ञप्तिः सम्पूर्णा ॥

(*c*) गोसखपञ्चविंशतिः.

GŌSAKHAPAÑCAVIMŚATIḤ.

Foll. 185*a*—187*b*.

Twenty-five stanzas in praise of Gōsakha, i.e., Kṛṣṇa, who is no other than Lord Viṣṇu : by Sudarśanavaradadāsa.

Complete.

Beginning :

मार्कण्डेयकवेरजाखगपतिप्रह्लादसंसेवितं
सेवे गोसखमम्बुजाक्षममलं कारुण्यवारां निधिम् ।
भूमौ चेतनरक्षणार्थमजरो योऽवातरच्छ्रीपतिः
स्वच्छाम्भोभरदर्शपुष्करिणिकातीरे सुरम्यो हरिः ॥

End :

गोसखमम्भोजलोचनं नौमि पीतवाससम् ।
हृदयाब्जनिकेतनं प्रभुं पिञ्छाचूडं सुन्दराङ्गकम् ॥

* * * *

शठमथनवरवरमुनिमुखकलितनुतिवचनविषयमिह वरये ।
पशुसखमहिपतिशयमुपरिचरवसुनरवतीविनुतपति(द)कमलम् ॥

रक्ताब्जनायकीं तां करुणारूपा[ं] भजेऽजमुग्धाङ्गीम् ।
अर्थिसखकल्पवल्लीं गोसखदयितां सभूषणां देवीम् ॥

निस्समाभ्याधिको लोके जीयादाचन्द्रतारकम् ।
कृष्णो रक्ताब्जनायिकानाथो भक्तेष्टदोऽधिकम् ॥

Colophon :

सुदर्शनवरददासकृतगोसखपञ्चविंशतिः ॥

(*d*) गोविन्दराजस्तुतिः.

GŌVINDARĀJASTUTIḤ.

Foll. 187*b*—188*b*.

A eulogy on Gōvindarāja, who is no other than Viṣṇu : by Sudarśanavaradanārāyaṇa.

Complete.

Beginning :

सेवे गोविन्दराजं सुरनरमुनिभिस्सेव्यमानाङ्घ्रिपद्मं
लक्ष्मीभूम्यां लसन्तं मणिमयमकुटोद्भासमानाननाब्जम् ।

बिभ्राणं शङ्खचक्रे शशिरविलसिते हस्तपद्मद्वयाभ्यां
प्रत्नं . . . . वरगु[रि]णजलधिं मेघसच्छायकायम् ॥

End:

रङ्गाधिपं रविकुलीनन्नृपैस्सुपूज्यं भोगीन्द्रभोगशयनीयतले शयानम् ।
ज्ञानप्रदं तनुभृतां वरदं वरेण्यं श्रीनाथमादरमहं सततं भजामि ॥

Colophon:

इति सुदर्शनवरदनारायणदासकृता गोविन्दराजस्स्तुतिस्समाप्ता ॥

Fol. 188*b* and 189*a* contain the Śrīdēvīmaṅgalāśāsana. Fol. 189*b* contains two stanzas in Tamil in praise of Viṣṇu. Fol. 190*a* is left blank. Foll. 190*b*—192*b* contain a few stanzas in praise of Gōdā and Viṣṇu.

R. No. **3645.**

Paper. 10⅝ × 9⅜ inches. Foll. 432. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. acquired through M.R.Ry. Gōpīnātha-Nanda-Śarma, Head-Pandit, Raja's College, Parlakimedi.

Foll. 43 and 432 are left blank.

Bound in two volumes.

नामलिङ्गानुशासनम्, सव्याख्यानम्.

NĀMALIṄGĀNUŚĀSANAM WITH COMMENTARY.

A commentary on Amarasiṁha's Nāmaliṅgānuśāsana, which work has been described under No. 1620 of the D.C.S. MSS, Vol. III: by Nārāyaṇavidyāvinōda, son of Vāṇēśvara and grandson of Jaṭādhara.

This commentary is called Śabdārthasandīpikā.

Complete.

Beginning:

यस्य ज्ञानदयासिन्धोः (. . .) स श्रियै चामृताय च ॥

यस्यावश्यं भवन्ती त्रिजगदुदयनावस्थितिव्यावयन्ती
मूर्तिर्नित्या त्रयी यं भगवत इतरा कुर्वती कल्पसङ्गे ।
ब्रह्मा विष्णुस्त्रिणेत्रस्त्रिगुणगातिमती या तु कल्पावसाने
सम्मीलत्येव यस्मिन्नपि भवतुतरामर्थसिद्ध्यै तदेव ॥

पूर्वग्रामिकुले कलानिधिनिभश्छत्री सुमेरुः स्थितो
भ्राता तस्य जटाधरो द्विजवरो वाणेश्वरस्तत्सुतः ।
तत्पुत्रः प्रथितोऽभवत् कविवरो नारायणो नामतः
तेनेयं क्रियते हिताय सुधियां शब्दार्थसन्दीपिका ॥

सन्ति यद्यपि भूयांसश्शब्दलक्षणचक्षुषः ।
तथापि चामराभ्यासविशेषायैव शिष्यते ॥
प्रायो हि मत्सरधियः कवयः पृथिव्यां
सन्ति क्वचित्क्वचिदपि प्रियसाधुवादाः ।
एकं भिया प्रणमिकर्म करोमि नित्यं
मध्ये द्वयोरपरमादरवार्तयैव ॥

शास्त्रान्तरेषु सत्स्वपि सकलशास्त्रज्ञेयमिह सङ्क्षेपेणैवाभिहितमिति नाम-लिङ्गानुशासनमभिदधदमरसिंहः परहितव्यपदेशेनेष्टदेवतां नमस्कुर्वन्नपि प्रथमं श्लोकमेकं चकार---यस्येति । हे धीराः! यस्य ज्ञानदयासिन्धोः ज्ञानं च दया च ज्ञानदये संसारस्य तत्त्वावबोधो ज्ञानं, समस्तविषयपरिज्ञानं वा ज्ञानं परदुःखप्रहरणेच्छा दया ताभ्यां सिन्धुरिव सिन्धुः हेतुचिह्नगोत्रादे-रिति तृतीया तृती[य]या इति योगविभागात्समासः । कृता कर्तृकरणयो-र्बहुलमिति बहुलवचनाद्वा । षष्ठीसमासो वा । विपुलाशयत्वादिताद्धर्म्येण रूपकः किंविधस्य सर्वसम्पूर्णत्वाद(गा)धस्यानधिगम्यस्य ज्ञानस्य एवं-भूतस्य यस्य गुणाः मैत्रीदयाशीलक्षमाशान्त्यार्जवादयोऽणिमादयो वा अनघाः अपापाः पापरहिता इत्यर्थः ।

* * * *

Colophon:

इति श्रीनारायणविद्याविनोदाचार्यविरचितायाममरकोशव्याख्यायां पाताल-वर्गः समाप्तः ॥

End:

तयप्प्रत्ययान्तम्. तयप्प्रत्ययान्तं च स्त्रीनपुंसकयोः । वर्णानां चतु-ष्टयी वर्णानां चतुष्टयम् । वेदानां त्रयी वेदानां त्रयम् । क्वचिद्वाच्य-लिङ्गम् यथा---त्रय(य्य)स्त्रियः, तयी (त्रयो लोकाः, त्रयाणि त्रीणि) जगन्ति । स्वार्थे ठण् (अण्) तिस्रो विद्याः (त्रैविद्यं) चातुर्वैद्यं, गायत्री, गायत्रम्, आनुष्टुभे(भी)आनुष्टुभम् । केप्रमाणाद्याः अजहल्लिङ्गवचना इति केचित् यथा---वेदाः प्रमाणम्, प्रमाणमियं ब्राह्मणी इति ज्ञेयम् ॥

Colophon:

इति विद्याविनोदाचार्यकृतायाममरकोशटीकायां तृतीयः काण्डस्समाप्तः ॥ समाप्तश्चायं ग्रन्थः ॥

R. No. **3646.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Yajñeśvaradīkṣitar, New Kalpathi, Palghat.

Fol. 43*a* gives the name of the owner of the original MS. Foll. 43*b*—44*b* are left blank.

नक्षत्रप्रद्युम्नम्.

NAKṢATRAPRADYUMNAM.

Similar to the work described under R. No. 371(*i*) ante.

Wants the beginning and the end.

Beginning:

शुक्लाम्बरधरं (. . .) विघ्नोपशान्तये ॥

. . . . धानु(न)पुरप्रवेशे

भैषज्यमन्त्रगृहहर्म्यपुरप्रतिष्ठा ।

यात्राभिषेकमखतीक्ष्ण (सु) जातकर्म-

मौञ्जीव्रतादिशुभकार्यमथाश्विनेषु ॥

अश्विनी कृष्णवर्णम्, द्र(दस्र)तारा, अश्वमुखाक(ा)रः पुमान्. अश्वयोनिः, देवगणमतिथिदेवता, वैश्यजातिः, चतुष्पात्रिमुखं मन्दकलोचनं, क्षिप्रं, बाह्यं, समतारा, पट्टणस्थानम्, वायुमण्डलमश(र)णिवृक्षं पक्षि भेरुण्डम् ।

* * * *

यात्राश्राद्धभैषज्येत्यादिशुभकार्येषु प्रशस्तम् । अश्विनीनक्षत्रजातस्य गुणाः---स्थूलशरीरः, दीर्घहस्तः, सूक्ष्मनखः, विशालाक्षस्सुरूपः, सुभरणः, राजपूज्यः, भूषणप्रियः, दुर्जनः, सुखी, सर्वासिलुब्धः, चञ्चलः, स्थिरारम्भः, कटिप्रदेशे मत्स्याङ्कितः ।

End:

पञ्चदिनेषु पञ्च मासा वा अपमृत्युः, द्वितीयवर्षमध्ये ज्वराग्निभयम्, दशवर्षे पञ्चदशवर्षे चतुष्पा(दा)दिशस्त्रभयमथवा ज्वरभयं, चत्वारिंशद्वर्षे वा अपमृत्युः, षष्ठवर्षे महाकण्टकं, ग्रहप्राबल्यात्क्रूरतरादिना(नारोगा) भवन्ति, दुर्बलत्वाप्य(त्वस्या)पि दर्शनमस्मिन् परिहरति चतुरशीतिवर्षाणि परमायुः.

R. No. 3647.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Cirumukku Vāsudēvasōmayājippāḍ, Valiyur, Pattambi, Malabar district.

Fol. 80 is left blank.

प्रकरणपञ्चिकाव्याख्या—न्यायसिद्धिः.

PRAKARAṆAPAÑCIKĀVYĀKHYĀ: NYĀYASIDDHIḤ.

A commentary on Śālikanātha's Prakaraṇapañcikā which is a treatise on the Pūrvamīmāṁsā in accordance with the Prābhākara school.

Contains the Prakaraṇas—2nd Nītipatha, 3rd Jātinirṇaya and 4th Nayavīthī complete, and breaks off in the course of the Anumāna-paricchēda of the 5th Prakaraṇa, i.e., Pramāṇapārāyaṇa.

Beginning:

अत्र शब्दमात्रस्यार्थासंस्पर्शितया शब्दविशेषावगम्यकार्यात्मा वेदार्थ इति प्रतिज्ञा नोपपद्यते इति केचिदाक्षेपं कुर्वन्ति, तदाक्षेपसमाधानार्थमिदं प्रकरणमिति वदन् सम्प्रदायं प्रयोजनं च दर्शयति—अर्थासंस्पर्शितेति । श्रोतृबुद्धिसमाधानार्थमारभ्यमाणस्य प्रकरणस्य सम्प्रदायप्रतिपाद्यप्रयोजनानि दर्शयति—अर्थासंस्पर्शिता . . . . . . प्रयोजनं निराकरणप्रका . . . प्रभाकरगुरोरिति सम्प्रदायो दर्शितः ।

* * * *

Colophon:

इति न्यायसिद्धौ नीतिपथस्समाप्तः ॥

ननु प्रमाणज्येष्ठं प्रत्यक्षमन्यसंप्रयोगोऽन्यविषयं दृष्टं यथा शुक्ताविदं रजतमिति । ततश्च सम्भवद्व्यभिचारीणि प्रमाणानीति चोदनाप्रामाण्यप्रतिज्ञा हेतुतस्समर्थनीयेतीमामाशङ्कामपनेतुं सर्वज्ञानानां यथार्थत्वं प्रतिपादनीयमिति मत्वारभ्यमाणस्य प्रकरणस्य सम्प्रदायप्रतिपाद्यप्रयोजनानि कथयति—यथार्थं सर्वमेवेदमिति ।

* * * *

एवं प्रत्यक्षस्य व्यभिचाराभावाच्चोदनाप्रामाण्यप्रतिज्ञायां निमित्तपरीक्षा न कर्तव्येति । इदानीं प्रकरणकर्तुः प्रकरणस्य च संज्ञां प्रकरणप्रयोजनं चैकेन श्लोकेनाह—शालिकनाथेनेति ।

Colophon:

इति न्यायसिद्धौ जातिनिर्णयः समाप्तः ॥

End :

अर्थसारूप्यस्य प्रमाणत्वं तत एवार्थप्रतीतिसिद्धेरिति कथमेतस्यार्थाकार-ज्ञानस्य कारणत्वमुच्यत प्रत्युपेक्ष्यत प्रत्यर्थः ॥

Colophon:

इति (प्रमाणपारायणे) प्रत्यक्षपरिच्छेदस्समाप्तः ॥

चोदनाप्रामाण्यप्रतिज्ञायां निमित्तपरीक्षा कर्तव्येत्यस्यार्थस्य सर्वप्रमाणेष्व-व्यभिचारिषु सिद्धिरिति सर्वेषां लक्षणतो व्यवस्थितत्वेनाऽव्यभिचारित्व . . . . तत्र प्रत्यक्षापेक्षत्वेनेतरे प्रमाणानां प्रत्यक्षस्य प्रथमं लक्षणं विषयं चोक्त्वा बहूनामभिमतत्वेनानन्तरमनुमानलक्षणमवयवदूषणानि च सङ्ग्रह्य श्लोकेन दर्शयति—ज्ञातसम्बन्ध(नियम)स्येति । अत्रानुमानमिति लक्ष्यनिर्देशः ।

* * * *

एवमन्वर्थसंज्ञासिद्धमनुमानस्वरूपं लोकप्रसिद्धमुद्दिश्य तदाभासविवेचनार्थं लक्षणमुच्यते । तत्र प्रमाता ज्ञातसम्बन्ध एकदेश्यथवोच्यते । इति परोक्तं मा भूदिति स्व.

R. No. **3648.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. S. Gōpālācāriyār, Villiyambakkam, Chingleput district.

प्रद्युम्नचरितम्.

PRADYUMNACARITAM.

A poem in 14 Sargas containing the story of Pradyumna, who is no other than Manmatha born as the son of Lord Kṛṣṇa, after having been burnt by Śiva: by Mahāsēnācārya alias Pappaḍaguru, disciple of Cārukīrti. A reference may be made to No. 12494 of the D.C.S. MSS., Vol. XXI, wherein a brief summary of the story of Pradyumna is given.

Complete.

Beginning :

श्रीमन्तमानम्य जिनेन्द्रनेमिं ध्यानाग्निदग्धाखिलघातिकक्षम् ।
व्यापारयामास न यत्र बाणान् जगद्विजेता मकरध्वजोऽपि ॥
बाल्येऽपि यस्याप्रतिमं सुरेन्द्रो विलोक्य रूपं पुनरीक्षते स्म ।
चक्षुस्सहस्रं युगपद्विधाय नत्वा च तं वीरज(जि)नं विरागम् ॥

जिनेन्द्रवक्त्राम्बुजराजहंसीं प्रणम्य शुक्लामथ भारतीं च ।
उपेन्द्रसूनोश्चरितं प्रवक्ष्ये यथागमं पावनमात्मशक्त्या ॥
कवीन्द्रसीमानमितैर्यदुक्तं गणेश्वराद्यैरतिविस्तरेण ।
तत्पादपद्मद्वयभक्तिशक्त्या सङ्क्षिप्य तद्वक्तुमयं श्रमो नः ॥
द्वीपोऽथ जम्बूपपदोऽस्ति मध्ये द्वीपान्तराणामिह पार्थिवानाम् ।
यो वाहिनीनाथवृतस्सुवृत्तो नित्यं जिगीषुप्रतिमश्चकास्ति ॥

*   *   *   *

तत्रास्ति चामीकरचारुहर्म्या श्रीसङ्गता स्वर्नगरीव रम्या ।
हरेः परं द्वारवतीति नाम्ना पुरी परीतानिमिषालयेन ॥
तत्राभवद्भूपतिरिन्दुकान्तो वंशे यदूनां मणिवत्सुवृत्तः ।
उपेन्द्रनामा नमितारिवर्गः प्रसाधिताशेषदिगन्तलक्ष्मीः ॥

*   *   *   *

Colophon :

इति श्रीसिन्धुराजसत्क(वि)महामहत्तमश्रीपप्पडगुरोः पण्डितश्रीमहासेनाचार्य(स्य) कृते(तौ) प्रद्युम्नचरिते प्रथमः सर्गः ॥

End :

राज्यं प्राज्यमुदस्य निर्मलतमं तप्त्वा तपो दुश्चरं
ध्यानाग्नौ सकलाश्च कर्मसमिधो हुत्वा वयः केवलम् ।
यावज्ज्ञेयविसर्पिविश्वकरणग्रामातिगं निश्चलं
देयाद्वः पदमव्ययस्स भगवान् सर्वोऽनिरुद्धो विभुः ॥

Colophon :

इति श्रीसिन्धुराजसत्क(वि)महामहत्तमश्रीपप्पडगुरोः पण्डितश्रीमहासेनाचार्य(स्य)कृते(तौ) प्रद्युम्नचरिते चतुर्दशः सर्गः ॥

नेमिनाथस्य सत्तीर्थे योऽभवदर्धचक्रिकः ? ।
तस्यासीद्रुक्मिणी जाया धरित्रीव क्षमागुणा ॥
तयोर्मदनस्सञ्जातः धार्मिकों गुणवत्सलः ? ।
जातमात्रेण गृहीतश्शत्रुणा जन्मवैरिणा ? ॥

*   *   *   *

त(स्मा)ज्जातामिदं काव्यं श्रावितं विबुधैस्सदा ।
जिनदासेन लिखितं तत्काव्यं करकौशलात् ॥
सन्मतिं जिनमानम्य सन्मतीसुखहेतवे ।
भक्त्या सरस्वतीं देवीं नुत्वा च गुरुपण्डितम् ॥

चारुकीर्तिमुनीन्द्रस्य सच्छात्रोऽप्यल्पधीयुतः ।
अल्पज्ञेन कृतं ग्रन्थं विबुधैश्शोध्यतामिदम् ॥

Colophon:

इति प्रद्युम्नचरितं सम्पूर्णम् ॥

R. No. **3649.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 216. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paraśivam Vādhyān-Nambūdiri, Ācipuram, Kottakkal post, South Malabar district.

Fol. 216*b* is left blank.

ऋग्वेदभाष्यम्.

ṚGVĒDABHĀṢYAM.

A commentary on the Ṛgvēda, which work has been described under No. 1 of the D.C.S. MSS., Vol. 1; by Skandasvāmin, son of Bhartṛdhruva.

Contains the Adyāyas two to eight complete in the first Manndala, but wants the beginning.

Beginning:

वृत्रस्यैव शरीरे वज्रं क्षिप्तवानित्य . . . . . या अभवत् उच्यते। उत्तरा उपरि वर्तनी वृत्रस्योपरि निकुठिता प्रलम्बितबाहुः . . . सूत इति सूर्माद्रा (ता) अधरा(रः) अधोवर्त्ती बाहुजङ्घान्तरस्थायी पुत्र आसीत् । एवं द्रा(दा)नुर्दानवीवृत्र)माका(ता)शये स्थितवती सहवत्सा धेनुः वत्ससहितेव धेनुः अतिः अतिष्ठन्तीनामनवस्थायिनीनां चलानामनिवेशनानां निविश्यते क्षीयते यस्मिन् नदीनदादौ ।

* * * *

गृह्णाति वृष्ट्यादिना स्थितिमप्येषां करोतीत्यर्थः । . . .

Colophon:

. . . . मृगर्थागमसंहतिम् ।
भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथास्मृति ॥

इति भर्तृध्रुवपुत्रस्य स्कन्दस्वामिनः कृतावृग्वेदभाष्ये द्वितीयोऽध्यायः ॥

End:

अस्मभ्यं दत्वास्मान् भजेत्यर्थः । भज्यमानाश्च वयं मंहिष्ठा मंहतीति दानकर्मा अतिशयेन दातारः सोमस्येत्यर्थः । . . . . सह च मदितारः सह सोमस्य पातार इत्यर्थः । स्याम नित्यं भवेमेत्याशास्महे ॥

Colophon:

इति ऋग्वेदभाष्ये अष्टमोऽध्यायः ॥

R. No. **3650.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Varikkassēri-mana, Vaniamcolam post, Malabar district.

Foll. 61*b* and 62 are left blank.

कौषीतकब्राह्मणव्याख्या—सदर्थविमर्शिनी.

KAUṢĪTAKABRĀHMAṆAVYĀKHYĀ : SADARTHA-VIMARŚINĪ.

A commentary on the Kauṣītakabrāhmaṇa. The commentator, whose name is not given, salutes one Suyajñamuni.

Contains the Adhyāyas one and two complete and breaks off in the third Adhyāya.

Beginning:

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
प्रत्यक्षाभि(दि)प्रमाणैन(र)नसि(धि)गतमभीष्टानभीष्टार्थलब्धि-
प्रध्वंसोपायमुच्चावचमवगमयन्नर्कवत्सर्वपुंसाम् ।
स्वप्रामाण्यैकभूषो रचयितृपुरुषाभावनिर्धूतदोषो
मानानामुत्तमोऽसौ जगति विजयते वैदिकश्शब्दराशिः ॥
श्रुतिकमलविकासबालभानुः श्रितजनकामितदानकामधेनुः ।
मयि निरवधिभक्तिनम्रमूर्ध्नि स्फुरतु गुरोः करुणाकटाक्षपातः ॥
समुदितगुणदोषक्षीरपाथोविवेक-
प्रकटितपटिमानः प्राप्तसत्पक्षपाताः ।
द्विजपरिषदि मुख्यं श्लाघ्यकान् बिभ्रतस्ते
मयि गुरुकरुणार्द्रास्सन्तु विद्वन्मरालाः ॥

श्रीमत्कौषीतकमुनिमहः पूर्वपृथ्वीधराग्रा-
दुद्यत्सु(त्सू)ज्ज्ञासितसुकृतिहृद्व्योमसान्द्रान्धकारः ।
विद्वत्पद्माकरसुखकरैरुल्लसद्गोसहस्रै-
राम्नायात्मा दिनकृदनिशं प्रीतये कल्पतां नः ॥

अपौरुषेयत्वं(त्ववि)भूषणा य(यं)श्रुत्यङ्गना युक्तिसखीसनाथा ।
वयं(रं)वृणीते स्म मुनिव(नीश्व)रं तं प्रणौमि कौषीतकनामधेयम् ॥

यद्ग्रन्थसूत्रसन्दृब्धा श्रुत्यत्र(न्त) कुसुमावलिः ।
विश्वमामोदयत्युच्चैस्तं सुयज्ञमुनिं स्तुमः ॥

सरन्तस्सन्ति ये सन्तः सरण्या तत्प्रणीतया ।
अहन्तारहितस्सर्वानहं ताननिशं भजे ॥

सर्वज्ञाचार्यपादाम्बुजसततसमाराधनध्वस्तमोह-
स्थेमा सोमार्धचूडामणिविपुलकृपालब्धचेतोविकासः ।
कुर्वे कौषीतकब्राह्मणविवृतिमहं केवलं बुद्धिशुद्ध्यै
विद्वांसस्तत्परास्तत्परगुणसुखिनस्सन्तु सन्तोषवन्तः ॥

व्याख्यातारो हि पूर्वेऽप्यखिलमकथयन्नैव वेदार्थमुच्चैः
दुर्ज्ञानत्वेन किं तु स्वविदितमुपदेशाध्वना वा स्वतो वा ।
सत्येवं नापवाद्योऽप्यहमपि लघुधीः स्वप्रतीतार्थवादी
मत्तोऽप्यज्ञो जनो यो जगति स च भवेदत्र योग्योऽधिकारी ॥

इह तावदग्निहोत्रादीनि सहस्रसंवत्सरपर्यन्तानि सकलान्यपि वेदविहितानि कर्मजातान्याहवनीयगार्हपत्यान्वाहार्यपचनसंज्ञिताग्नित्रयसाध्यानि समधिगतानि । आहवनीये जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिशास्त्रात्, आहवनीये प्रदानमित्याद्यापस्तम्बसूत्राच्च । श्रौतं वैतानिकाग्निष्विति याज्ञवल्क्यस्मरणाच्चाग्न्याधेयलक्षणं क्रियोत्पन्नत्वनिबन्धना चैषामाहवनीयादिसंज्ञा नार्थान्तरनिबन्धना ।

* * * *

कांचिदाख्यायिकामुपक्रमते—अस्मिन् वै सतनुः प्रीतो भवतीति । अस्मिन् लोक इति ।

* * * *

Colophon:

इतीं व्याक्रियाद्याद्यखण्डस्य हृद्या मयाकारि कौषीतकब्राह्मणेऽस्मिन् ।
इयं चेद्बताहो न विद्वज्जनेभ्यः स्वदेत स्वदेतैव सप्तार्चिषे सा ॥

विष्णुविलासव्याख्या—विष्णुप्रिया.

VIṢṆUVILĀSAVYĀKHYĀ: VIṢṆUPRIYĀ.

A commentary on the Viṣṇuvilāsa, which work has been described under R. No. 3442 ante.

Contains the Sargas one to six only.

Beginning :

श्रीमद्विष्णुविलासाख्यकाव्यस्यानतिविस्तरम् ।
इदं विष्णुप्रियाख्यानं व्याख्यानं लिख्यते मया ॥

चकास्तीति । चूर्णीसरितः शुभे तटे यस्य जयन्तमङ्गलं निकेतनं चकास्ति । नारसिंहं वपुरास्थितः स हरिः नश्चेतसि प्रकाशतामित्यन्वयः । चूर्णीसंज्ञायाः सरितो नद्याः शुभे पुण्ये तटे तीरप्रदेशे यस्य हरेर्जयन्तमङ्गलमिति प्रसिद्धं निकेतनं क्षेत्रं चकास्ति शोभते । स तादृशं नारसिंहं नरसिंहसम्बन्धि वपुश्शरीरमास्थितोऽङ्गीकुर्वन् । सनातनः शाश्वतोऽनाद्यन्त इत्यर्थः ।

* * * *

Colophon :

इति विष्णुविलासव्याख्यायां विष्णुप्रियाख्यायां प्रथमस्सर्गस्समाप्तः ॥

End :

स तादृशो जनहितानां लम्भकः प्रतिपादकश्शम्भुशिष्यः । स खलु तथा प्रसिद्धः परशुरामो वो युष्माकं श्रेयसेऽभ्युदयाय श्रेयः प्रवर्धयितुं जायतां सम्भवत्विति कविराशास्त इति समस्तं मङ्गलम् ॥

Colophon :

इति श्रीविष्णुविलासव्याख्यायां विष्णुप्रियाख्यायां षष्ठस्सर्गस्समाप्तः ॥

अम्बरतटिनीनिलयं कम्बुकशाकलितपाणिकमलयुगम् ।
अम्बुजलोचनमाराद्म्बरचरवन्दितं वन्दे ॥

R. No. **3652.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. C. Vāsudēvasōmayājippāḍ, Valiyur, Pattambi, Malabar district.

Foll. *5a*, *33b*—*35a*, *39a*, *40b*, *41a*, *42b* and *50b* are left blank.

अग्निष्टोमकारिका.

AGNIṢṬŌMAKĀRIKĀ.

Similar to the work described under R. No. 634(c) ante.
Complete.

Beginning :

एकस्सन् बहुधा विप्रैः कल्पितोऽध्वरकर्मणि ।
यस्स गीर्वाणवदनो वाक्सिद्धिं विदधातु नः ॥

जनयन्तु सदा सन्तो वचसां पाठवं मम ।
तान् नमस्कृत्य सङ्क्षेपाद्वक्ष्येऽहं पद्यकारिकाम् ॥

अग्निष्टोमं मया मूलं नाधिगम्यैव सङ्ग्रहात् ।
अविस्मृत्यै मद्विधानां विलिख्ये च क्रियाक्रमम् ॥

शब्दविद्भिर्नैव दृश्यं श्रुतिविद्भिस्तथैव च ।
अपहासभयाद्दोष्यं वैकल्याच्छब्दवृत्तयोः ॥

आदावासाद्य पात्राणि नानादारुमयानि च ।
मृन्मयानि समिद्बर्हिर्वस्त्राणि पशवो घृतम् ॥

* * * *

विप्रान् प्रदक्षिणीकृत्य नमस्कृत्य प्रसाद्य च ।
अभिवाद्य गुरून्मुख्यान् पाणावालम्ब्य याचयेत् ॥

रक्षार्थं प्रथमं प्रार्थ्य याजकान् यजनाय च ।
अध्वर्युपञ्चब्रह्मत्वहौत्रमौद्गात्रमप्यथ ॥

सदस्यं वरयेदेतान् मन्त्रवत्कल्पवर्त्मना ।
यजमानः सहर्त्विग्भिर्बोधायनविधानतः ॥

End :

अन्येष्वायतनेष्वग्नीन्यजमानोऽवधारयेत् ।
ब्राह्मणान् भोजयेत्पश्चाद्यजमानः स्वशक्तितः ॥

अग्निष्टोमक्रिया कल्प्या श्लोकवत्प्रोक्षणाय च ।
कारिका नाम लिखिता भवदासेन पुस्तके ॥

नमोऽस्तु वेदवादिभ्यो याजकेभ्यो नमो नमः ।
क्षन्तुमर्हन्ति विद्वांसः तेभ्यो नित्यं नमो नमः ॥
शिवद्विरात्रं, पूर्वांशौ चेन्य(त्य)पात्रे त्रिदिनमतिदिने सङ्गवेन व्यनीते ।

Colophon:

अग्निष्टोमकारिका समाप्ता ॥

R. No. **3653.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī and Telugu. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyatt Valiya-acchan, Cennamangalam, Parur post, Cochin State.

(*a*) श्रीकृष्णचरितम्.

ŚRĪKṚṢṆACARITAM.

Foll. 1*a*—9*b*. Fol. 10 is left blank.

A treatise describing the birth of Lord Kṛṣṇa and the incidents which took place during His boyhood. This work is also called Bālagōpālalīlāmuktāsara.

Breaks off in the third Aṁśa.

Beginning:

जय गोपाल जगन्निवास गोपीजनलोलाम्बुदनील दिव्यबाल ।
जय वक्राम्बुजमध्यवर्त्तर्हि(र्तिन्) सस्मितशिञ्जानविभूषणाखिलाङ्ग ॥
जय गोपिकारमण जगतीतलाभरण
जय दीनजनशरण दितिसंहरण ।
जय भूरितरकरुण दलिताखिलावरण
जय समीरितकरुणदिव्यावतरण ॥

* * * *

अस्ति प्रसिद्धा मधुरेति भूम्यां पुरी मनोज्ञा यदुभूपतीनाम् ।
राजा महान् माधुरशूरसेनान् ररक्ष तामास्थित उग्रसेनः ॥

* * * *

Colophon:

इति बालगोपाललीलामुक्तासरे प्रथमोंऽशस्समाप्तः ॥

End :

सुतविहीनविदूर हरे निजसुलभपयोदधिचोर एहि ॥

Colophon :

इति बालगोपाललीलामुक्तासरे द्वितीयोंऽशस्समाप्तः ॥

अथ तदानीं सर्वर्तुमनोहरे बृन्दावनान्तरे गोगोप(पी)गोपैस्सह विहर्तु-कामेन स्वभक्तचकोरसोमेन स्वात्मन्यध्यस्तानेककोटिब्रह्माण्डजालेन राजगोपालेन मनसि नियन्त्रितास्सदसि सङ्गताः श्रीरामकृष्णसहवासशमितपावकोपतापाः नन्दोपनन्दादिनिखिलगोपाः ।

* * * *

सहलयनटनगीते सहशविरहिताय सरसहृदय भवते सकलमुनिजनहिताय अनुगृह्णीष्व —इत्थं स नाकपत्नीभिः प्रतिलब्धेन्द्रियप्राणः.

Transcribed in 1921-22 from a MS. of the Principal of the Maharaja's College, Vizianagram.

(*b*) नृसिंहस्तुतिः.

NṚSIṀHASTUTIḤ.

Foll. 11*a*—12*b*.

A eulogy addressed to Narasiṁha: by Trivikramasārvabhauma

Complete.

Beginning :

प्रलयरविकरालाकाररुक्चक्रवालं
विरल यदुरोत्रोरोचिताणेवाला(?) ।
प्रतिभयमतकोपात्युत्कटोच्चाट्टहासिन्
दह(दह)नृ(नर)सिंहासह्यवीर्याहितं मे ॥

End :

लिकुचातिलकसूनुः सद्धितार्थानुसार्थी
नरहरिनुतिमेकां(तां) शत्रुसंहारहेतुम् ।
अकृत सकलपापध्वंसिनीं यः पठेत्तां
व्रजति नृहरिलोकं कामलोभादिमुक्तः ॥

Colophon :

इति श्रीत्रिविक्रमसार्वभौमकृतौ नृसिंहस्तुतिः सम्पूर्णा ॥

(c) जगदीशशतकम्.

JAGADĪŚAŚATAKAM.

Foll. 13a—19a. Foll. 19b and 20 are left blank.

A centum of stanzas in praise of Jagadīśa (Kṛṣṇa): by Raghurājasiṁharāju, patronized by Kṛṣṇacandra, Raja Bahadur.

Complete.

Beginning:

यद्भासा स विभाति विश्वमखिलं सार्केन्दुतारागणं
यत्किञ्चिद्भ्रुकुटीकटाक्षकलया नाशोद्भवौ पालनम् ।
यत्पादाम्बुजधूलिधार . . . . यत्नं सुराः
तं नीलाचलवासिनं यदुपतिं वन्दे जगद्वन्दितम् ॥

* * * *

जात्या तु गोपकुलजाः परधर्महीना
गोपाश्च गोपवनितास्तुलसीवने तैः ।
चिक्रीड रासपरिमण्डलमण्डितो यो
वन्दे प्रभुं पतितपावननामधेयम् ॥
त्वं सर्वदिव्यगणवृन्दसमन्वितोऽसि
तैस्सर्वगर्हितगुणैर्वलितस्तथा त्वम् ।
लज्जावनं तवकरे मम सर्वथास्ति
मामुद्धरस्व कृपया जगदीशकृत्ये ॥

End:

त्वदाधारस्त्वद्बलोऽहं त्वमेव शरणं मम ।
जगन्नाथ दयासिन्धो रघुराजे दयां कुरु ॥
जगदीशस्य शतकं रघुराजकृतं शुभम् ।
पठतां शृण्वतां शश्वज्जगदीशः प्रसीदतु ॥
रामेन्दुखण्डविधुभिर्मितेऽब्दे तैर्ये उत्तमे ।
शनावमायां शतकं जगदीशाय निर्मितम् ॥

Colophon:

इति श्रीसिद्धिश्रीबान्धवेशमहाराजाधिराजश्रीमहाराजश्रीराजाबहदुद(दर्) श्रीकृष्णचन्द्रकृपापात्राधिकारिश्रीरघुराजसिंहराजुदेवविरचितं जगदीशशतकं सम्पूर्णम् ॥

R. No. 3654.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 8. Lines, 20 in page. Dēvanāgarī, Grantha and Malayalam. Good.

Transcribed in 1921-22 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) बलातैलविधानम्.

BALĀTAILAVIDHĀNAM.

Foll. 1*a* - 3*b*.

On the preparation of a medical oil from the roots of the shrub Balā.

Complete.

Beginning :

आयुर्वेदस्य कर्तारमात्रेयं भिषजां वरम् ।
सुखासीनं महात्मानं हुताग्निं वेदपारगम् ॥
शिष्यश्रेष्ठस्समागम्य प्राञ्जलिः प्रियदर्शनः ।
अग्निवेशोऽब्रवीद्वाक्यं महायोगपरायणः ॥
द्वादशैकं सहस्राणां ग्रन्थं व्याख्यातवान् भवान् ।
वातरोगविनाशाय बलातैलं पठन्नपि ॥
आवर्तनविधिर्नोक्ता(क्तो) भवता करुणात्मना ।
तदहं श्रोतुमिच्छामि लोकानां हितकाम्यया ॥

End :

शुण्ठीगलूचीयुक्तैश्च पूतीशय्याकपल्लवैः ।
ससिन्धूत्थगुलं वाक्यं विरेकार्थं प्रशस्यते ॥
महिषीविड्रसे याममेकं पक्त्वा विशोषयेत् ।
अन्तर्गताङ्कुरं त्यक्त्वा चतुर्यामं सुखाम्बुनि ॥
विनिक्षिप्य विशोष्याथ क्षीरेऽप्येवं विनिक्षिपेत् ।
नालिकेरजले तद्वदेवं शेफालशोधना ॥

Colophon :

इति बलातैलविधानं समाप्तम् ॥

Fol. 4 is left blank.

Transcribed in 1921-22 from a MS. of M.R.Ry. Koteri Nīlakaṇṭha Nambūdri, Tirkkaṇḍiyūr, Tirur, Malabar district.

(*b*) सामुद्रिकलक्षणम्.

SĀMUDRIKALAKṢAṆAM.

Foll. 5*a*—7*b*. Fol. 8 is left blank.

Similar to the work described under No. 1248 ante.

Complete.

Beginning:

आदिदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शनम् ।
सामुद्रिकं प्रवक्ष्यामि शुभदं पुरुषस्त्रियाम् ॥
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ॥
जघन्या नवतिः प्रोक्ता मध्यमं तु दशाङ्गुलम् ।
अष्टोत्तरशतं यस्य रूपमुत्तमलक्षणम् ॥
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरतं(क्तं) त्रिगम्भीरं त्रिविस्तीर्णं प्रशस्यते ॥

End:

न धर्मपर एव स्यान्न चार्थपर एव वा ।
न कामपर एव स्यात्सर्वान् सेवेत सर्वदा ॥
धर्मः पूर्वो धनं मध्ये जघन्ये काममाचरेत् ।
अहन्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥
कामं पूर्वे धनं मध्ये जघन्ये धर्ममाचरेत् ।
वयस्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥

R. No. **3655.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kīlnattam, Tinnevelly district.

(*a*) पक्षतावादः.

PAKṢATĀVĀDAḤ.

Foll. 1*a*—15*a*.

Similar to the work described under No. 4259 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

पक्षतायां साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतेत्यत्रावच्छिन्नत्वस्य स्वरूपसम्बन्धविशेषरूपत्वे तादृशनिश्चयत्वघटकसमुदायवृत्त्यवच्छेदकत्व-

निवेशे महानसीयवह्नित्वावच्छिन्नसाध्यके महानसीयवह्निमान् वह्निसामान्यवा-न्वेति संशयस्य पक्षतात्वानुपपत्तिः ॥

End :

बाधनिश्चयत्वव्यापकप्रतिबन्धकतायां साध्यतावच्छेदकाविशिष्टाविषयकानि-श्चयत्वाव्यापकत्वनिवेशान्नोक्तसंशयस्य पक्षतात्वापत्तिः ॥

Foll. 15*b* and 16 contain the Upādhinirvacana portion.

(*b*) सव्यभिचारपत्रम्.
SAVYABHICĀRAPATRAM.

Foll. 17*a*—26*b*.

A critical pamphlet on the Savyabhicāra. Similar to the work described under No. 4315 of the D.C.S. MSS., Vol. VIII.

Complete.

Beginning :

सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकानिश्चयसा-मान्यं स्वसमानकालीनहेतुमत्ताज्ञानसमानधर्मितावच्छेदककानुमितिसामान्यवि-रोधि, तादृशविशिष्टत्वं स व्यभिचारत्वम्। अत्रासम्भववारणाय कालीनान्तम्।

End :

स्ववैशिष्ट्यम्—स्वावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्न-प्रकारतानिरूपकत्वसहितसाध्यव्याप्यहेतुविषयकत्वसम्बन्धेनेति सर्वमनाकुलम्.

Foll. 26*b*—33*a* contain the Dōṣalakṣaṇavicāra with notes. Foll. 33*b* and 34 are left blank.

R. No. 3656.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 42. Lines, $20\frac{1}{4}$ in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu-Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

धातुकाव्यम्, सव्याख्यानम्.
DHĀTUKĀVYAM WITH COMMENTARY.

Same text as that described under No. 11538 of the D.C.S. MSS., Vol. XX. It is stated that Nārāyaṇa supplemented the poem written by Vāsudēva. The commentary is by Rāmapāṇivāda.

Contains the first Sarga complete and the second incomplete.

Beginning :

. . . . ।
निर्ममे येन सर्वस्वं परस्मै ब्रह्मणे नमः ॥

श्रीनारायणकविना रचिता (तं यद्)धातुकाव्यमतिभव्यम् ।
क्रियते तस्य विवरणं किमपि मया (राम)पाणिपा(वा)देन ॥

अथ महाकविरादौ तावद्वस्तुनिर्देशप्रकारेण स्वचिकीर्षितं प्रतिजानीते—
उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात् ॥

प्राक् पूर्वं वासुदेवेन वासुदेवनाम्ना कविना पाणिनिसूत्राणामष्टाध्या-(यीगता)नां सूत्राणां मण्डलं समुदायः उदाहृतमुदाहरणरूपकाव्यात्मना ।

End :

तुहिर् दुहिर् उहिर अर्दने—तुहिधातोस्तुहिनं, दुहिधातोर्दोहः, उहिधातोः प्रपूर्वात् प्रोहिष्यन्निति रूपम् । अर्ह पूजायाम्—अत्र सप्त धातवः ॥

Colophon :

इति श्रीनारायणभट्टपादमहाकविविरचिते धातुकाव्ये प्रथमस्सर्गः ॥

श्रीनारायणनामकोपरिनवग्रामस्वधामाधिप-
क्षोणीदेवकविप्रकाण्डकलितं यद्धातुकाव्यं शुभम् ।
व्याख्या तस्य तु पाणिपा(वा)दकलिता सङ्क्षेपरूपैव या
तस्यां प्राथमिको निकामगुरुतादुर्गोऽपि सर्गो गतः ॥
प्रद्योतनस्योदयमाप्य गोपाः श्वेतांशुकोन्मेदुरचारुवेषाः ।
अखिन्नरुग्घोटकरुद्ध्यमानमार्गा जवेनालुठिता निरीयुः ॥

इतः परमात्मनेपदिनः । गोपाः प्रद्योतनस्योदयमाप्य जवेन निरीयुः इत्यन्वयः । गोपा नन्दगोपादयः । प्रद्योतनस्य सूर्यस्योदयमाप्य प्राप्य

* * * *

सम्पद्वर्धनाय प्रस्थितवानिति सकलमवदातम् । मङ्गलम् । स्तन्भु विश्वासे, वृतु वर्तने, वृधु वृद्धौ, शृधु शब्दकुत्सायाम्, स्यन्दू प्रस्रवणे, कृपू सामर्थ्ये । वृत् द्युतादिर्वृतादिश्च वृत्तः । अत्र सप्त धातवः ।

R. No. 3657.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Veṅgu Śāstrigaḷ, Kaḻakkāḍu, Tinnevelly district.

Fol. 52*b* is left blank.

स्तेयारण्यमाहात्म्यम्.

STĒYĀRAṆYAMĀHĀTMYAM.

On the greatness and religious sanctity of the holy place Kallakkāḍu, situated at a distance of about ten miles from the Sermadevi railway station in the Tinnevelly district.

Contains the Adhyāyas 1—16 complete.

Beginning:

विघ्नौघध्वान्तसप्ताश्वं वियद्देहैस्सुपूजितम् ।
विश्वेश्वरस्य तनयं विघ्नराजमहं भजे ॥
लाभे मार्गे सुविद्यानां यस्यां भक्तिर(चञ्चला) ।
तां वन्दे भारतीं भक्त्या सर्वलोकैकमातरम् ॥

* * * *

सूतः—

ताम्रपर्णीनदीतीरे देशे पुण्यजनाकुले ।
योजनद्वयमात्रे तु पुण्ये श्यामानदीतटे ॥
स्तेयारण्यस्य मध्ये तु श्रीमत्पुष्करिणीतटे ।
पुण्यं पुरहरेशस्य क्षेत्रं सर्वाघनाशनम् ॥
क्षेत्राणामुत्तमं न्यूनमित्युक्तं भवताधुना ।
विस्तार्य तत् समाचक्ष्व भुक्तिमुक्तिफलप्रदम् ॥

* * * *

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे पञ्चमखण्डे क्षेत्रवैभवमालिकायां षष्ठांशे स्तेयाटवीमाहात्म्यं नाम प्रथमोऽध्यायः ॥

End:

विधूतपापास्तत्काले ययुश्चोराटवीं प्रति ।
स्नात्वा श्यामापगातोये पुष्करिण्यां तथैव च ॥

दृष्ट्वा पुरहरेशानं तत्रोषित्वा दिनत्रयम् ।
श्यामापगां प्रशंसन्तः तथा पुष्करिणीमपि ॥

* * * *

तत्र स्थिता मुनिवराः स्वान्तःकरणसंमते ।
आहृत्याहृत्य सम्भारान् सत्रं पूर्ववदासत ॥

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे पञ्चमखण्डे स्थानवैभवमालिकायां षष्ठांशे स्तेयारण्यमाहात्म्यं नाम षोडशोऽध्यायः ॥

R. No. 3658.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 160. Lines, 20 in a page. Grantha Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Śiṣṭa Yōgānanda Śāstrigāru, Repalle, Godavari district.

भागवतव्याख्या—प्रतिपदार्थप्रकाशिका.

BHĀGAVATAVYĀKHYĀ: PRATIPADĀRTHAPRAKĀŚIKĀ.

Same work as that described under R. No. 1721 ante. By Dēvulapalli Śōbhanādrisūri.

Contains the Adhyāyas 1—19 only.

Colophon:

इति श्रीभागवतव्याख्यायां प्रतिपदार्थप्रकाशिकाख्यायां देवुलपल्लिशोभनाद्रिसूरिविरचितायां दशमस्कन्धे प्रथमोऽध्यायः ॥

R. No. 3659.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. acquired through M.R.Ry. Tātadēśika Tātācāriyar, Villiyambakkam, Chingleput district.

Fol. 50 is left blank.

मीमांसामकरन्दः.

MĪMĀṀSĀMAKARANDAḤ.

An explanatory amplification of the Mīmāṁsāsūtras: by Vēṅkaṭādhvarin, son of Raghunāthadīkṣita and grandson of Appayācārya of Vādihaṁsāmbuda family.

For the beginning see under No. 4461 of the D.C.S. MSS., Vol. IX.

Contains the first Pāda of the eighth Adhyāya complete, the second Pāda of the same Adhyāya incomplete and a portion of the second Pāda in the ninth Adhyāya.

End:

स्तोभस्यैके द्रव्यान्तरेऽभिव्यक्ति(निवृत्ति)मृग्वत् । ऋगक्षराभिव्यक्ति-(णां निवृत्ति)रूपोपकारसम्पादकत्वात् साम्नातिदेशेऽपि स्तोभानां तदसम्पाद-कत्वान्नातिदेशः स्यादित्युत्थितेस्सङ्गतिः । सामस्वतिदिश्यमानेषु स्तोभाना-मप्युत्तरयोरतिदेशोऽस्ति न वेति चिन्त्यते ।

* * * *

ननु व्रीहीन् प्रोक्षति व्रीहीनवहन्तीत्यादिविहितस्य प्रोक्षणादेर्व्रीहिस्वरूप-प्रयुक्ततया नीवारेषु च तदभावात् कथं प्रोक्षणादिप्रवृत्तिरिति चेन्न—धर्माणां स्वरूपप्रयुक्तत्वे वैयर्थ्यापत्त्या.

R. No. 3660.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 340. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. K. A. Lakṣmaṇa Śāstrigaḷ, Kalpathi, Palghat.

Fol. 340 is left blank.

यामलदानपद्धतिः
YĀMALADĀNAPADDHATIḤ.

On details connected with the gifts to be made to Brahmans, as a sort of expiation for the commission of sinful acts. The procedure is laid down in the Rudaryāmala.

Complete.

Beginning:

हरिं हरं विधातारं नत्वा गणपतिं गुरुम् ।
दानानां यामलोक्तानां रचयाम्याशु पद्धतिम् ॥

आदौ फलगुप्तदानरचना—

एतद्दानं चिकीर्षुस्तु(स्त्री)वा पुरुषो वा ग्रहणादिपुण्यकालेषु देवालया-दिपुण्यदेशेषु गोमयानुलेपनरङ्गवल्ल्यादिरचितभूभागोपरि श्वेतवस्त्रं प्रसार्य तस्मिन् पृथुतरं कूश्माण्डं निधाय तन्मध्ये सहस्रनिष्कान् पञ्चशतनिष्कान् सार्धद्वि-

शतनिष्कान् यथासम्भवनिष्कान् वा विधाय एवं रचयित्वा दानसङ्कल्पं कुर्यात् । एवङ्गुणेत्यादि—ममेह जन्मनि जन्मान्तरेषु सम्भावितब्रह्महत्यादिसमस्तपापक्षयार्थम् ।

* * * *

सन्तानप्रतिबन्धनिवृत्तिद्वारायुष्मत्पुत्रपौत्रपरम्पराप्राप्त्यर्थं श्रीगोपालकृष्णप्रीत्यर्थं रुद्रयामलोक्तप्रकारेण फलगुप्तदानं करिष्ये ।

End:

अत्राहिताग्न्यभावे साग्निकदानप्रतिग्रहसम्मतिवचनम्—

आहिताग्नेरभावे स्याद्ब्राह्मणः साग्निकः परः ।
दाने प्रतिग्रहे चैव आहिताग्निवदुत्तमः ॥

तन्मुखं नावलोकयेत् ॥

Colophon:

इति यामलग्रन्थस्सम्पूर्णः ।

R. No. **3661.**

Paper. $10\frac{5}{8} \times 3\frac{3}{4}$ inches. Foll. 280. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 280 is left blank.

विष्णुतत्त्वनिर्णयटीकाविवृतिः— वाक्यार्थदीपिका.

VIṢṆUTATTVANIRṆAYAṬĪKĀVIVṚTIḤ: VĀKYĀRTHADĪPIKĀ.

A commentary on Jayatīrtha's Viṣṇutattvanirṇayaṭīkā, which work has been de-cribed under No. 4843 of the D.C.S. MSS., Vol. X: by Śrīnivāsa, disciple of Yadupati. At the beginning of the work the commentator salutes Vyāsa, Ānandatīrtha, Jayīndra, Raghūttama, Vēdēśa and Yādavācārya, the preceptor of the commentator.

Contains the Paricchēdas one to three complete.

Beginning:

श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम् ।
श्रीव्यासं मध्वसंसेव्यं समस्ताभीष्टदं भजे ॥
श्रीमदानन्दतीर्थार्यचरणावाश्रयेऽनिशम् ।
रुद्रादिसर्वविबुधैः संसेव्याविष्टदौ सताम् ॥

श्रीनिवासेन रचिता नाम्ना(म्ना) वाक्यार्थदीपिका ।
व्यासपादार्पिता भूयात् सतां व्याख्योपकारिणी ॥
जयरामवचांसि क्व क्व चाहं मन्दबुद्धिमान् ।
तथाप्यस्मद्गुरुवरानुग्रहः किं न साधयेत् ॥

Colophon:

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्विष्णुतत्त्वनिर्णयटीकाविवृतौ वाक्यार्थदीपिकायां तृतीयः परिच्छेदः ॥

R. No. **3662.**

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 43. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Valiya Raja, Kottakkal, Malabar district.

Fol. 43 is left blank.

शब्दकौस्तुभटिप्पणी.

ŚABDAKAUSTUBHAṬIPPAṆĪ.

Same work as that described under R. No. 1316 ante.

Contains the Navāhnika portion only, which wants the beginning and the end.

R. No. **3663.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kīḻnattam, Tinnevelly district.

(*a*) प्रतिबन्धकत्ववादार्थः.

PRATIBANDHAKATVAVĀDĀRTHAḤ

Foll. 1*a*—9*b*.

A controversial discussion investigating the meaning of the expression 'Pratibandhakatva' and incidentally denying the existence of Śakti, which is considered by the Mīmāṁsakas as one of the Padārthas: by Kṛṣṇa Tātācārya of Tirupputkuḻi.

Complete.

Beginning:

धर्मं कार्यानुकूलं विघटयति तरां तत्तदेतद्विरोधी-
त्येतत्सिद्धान्तसारं प्रशमयतुमना यन्महादेव ऊचे ।

बाधज्ञानस्य न स्यादनुमितिरिपुतेत्येतदत्यन्तदूष्यं
मन्यन्ते ये तु तेषां निरसनकुतुकी कृष्णनामा सुधीन्द्रः ॥

कार्यानुकूलधर्मविघटकत्वस्य प्रतिबन्धकपदार्थत्वे बाधज्ञानस्यानुमितिप्रतिबन्धकत्वानुपपत्तिरित्याचख्यौ महादेवः । अनुमित्यनुकूलात्ममनस्संयोगादिनिष्ठशक्तिविघटकतया बाधज्ञानस्यानुमितिप्रतिबन्धकत्वोपपत्तेरिदमसङ्गतमेवेत्याचक्षते मञ्जूषाकृतः । अत्रेदं विचार्यते—किमिदमनुकूलत्वं नाम? जनकजनकतावच्छेदकसाधारणः प्रयोजकत्वापरपर्यायः स्वरूपसम्बन्धविशेष इति चेत् ।

End:

तत्र च मण्यभावत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य मण्यभावात्मकत्वेन तत्प्रतियोगित्वस्य मण्यभावाभावे विद्यमानत्वादिति चेदत्र ब्रूमः—कारणतावच्छेदकाभावत्वनिरूपितप्रतियोगित्वं प्रतिबन्धकत्वमिति निष्कर्षः ॥

(b) अन्वयव्यभिचारवादार्थः.
ANVAYAVYABHICĀRAVĀDĀRTHAḤ.

Foll. 9b—18b.

A discussion of the meaning of Anvayavyabhicāra, i.e., the existence of cause without its effect: by Kṛṣṇa Tātācārya of Tirupputkuḻi.

Complete.

Beginning:

अन्वयव्यभिचारोऽसौ विबुधैरपरिष्कृतः ।
कृष्णाभिधानसुधिया प्रकटीक्रियते तराम् ॥

कारणसत्त्वेऽपि कार्यानुत्पत्तिरन्वयव्यभिचार इत्याचक्षते । स्वसमानाधिकरणाभावप्रतियोगिकार्यकत्वं तदर्थः । भवति च कपालाकाशसंयोगसत्त्वेऽपि कपालद्वयसंयोगशून्यकाले घटानुत्पादात् ।

End:

कार्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदककार्यतावच्छेदकत्वमन्वयव्यभिचारः फलित इति सर्वमतिरमणीयम् ॥

(c) विशेषवादार्थः.

VIŚĒṢAVĀDĀRTHAḤ.

Foll. 18b—38a.

An explanation of the characteristics of the fifth Padārtha called Viśēṣa in accordance with the Nyāya philosophy: by Kṛṣṇa who supports the views of Mahādēva.

Complete.

Beginning:

रघुकुलजलधौ जातं संश्रितसन्त्राणमाश्रये कंचित् ।
अधिकोन्नतेरपि यतो विनतैरग्र्यं फलं करग्राह्यम् ॥
महादेवप्रोक्ते सहृदयबुधानां सुरुचिरे
विशेषाणां लक्ष्मण्यभिदधुरसाङ्गत्यमिह ये ।
वचोभङ्गीं तेषां दृढघटितदोषां प्रकटयन्
सुधीः कृष्णाभिख्यो रचयति मुदं सर्वविदुषाम् ॥

स्वत एव व्यावृत्तत्वं च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसमानजातीय-भेदानुमित्यविषयत्वम् । साजात्यं च पदार्थविभाजकोपाधिरूपेण । तेन घटादेः तादात्म्येन व्यावृत्तत्वेऽपि विशेषस्य गुणशून्यत्वेन इतरभेदानुमितिविषयत्वेऽपि द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेऽपि न क्षतिरित्याह— महादेवः ।

End:

अत्र च घटो गुणभिन्नः इत्याद्यनुमितिमादाय स्वपदेन घटं सङ्गृह्य गुणादावतिप्रसङ्गपरिहाराय स्वविशेष्यकत्वपदफलितस्ववृत्तित्वोपादानमिति दिक् ॥

(d) प्रमात्वचिह्नविवृतिः.

PRAMĀTVACIHNAVIVṚTIḤ.

Foll. 38a—45a.

An explanation of the characteristics of valid cognition.

Complete.

Beginning:

रघुवीरपदाम्भोजं स्मृत्वा श्रीशैलकृष्णनामासौ ।
रचयन्विदुषां तोषं तनुते विवृतिं प्रमात्वचिह्नस्य ॥

तद्वति तत्प्रकारकानुभवो यथार्थानुभव इति सङ्ग्रहकारः । अत्र तद्वत्ता प्रकारतासम्बन्धेन तत्सम्बन्धित्वम् । शुक्त्यादेरपि कालिकसम्बन्धेन रजतत्ववत्त्वेऽपि इदं रजतमिति भ्रमे नातिव्याप्तिः नवा तादात्म्यत्वस्याधेयत्वानियामकत्वेऽपि तत्संसर्गकप्रमायामव्याप्तिः ।

अत्र केचित्—तद्वतीत्यत्र सप्तम्यर्थो विशेष्यत्वमाश्रयतासम्बन्धेनानुभवान्वयिन्या(यीत्या)चख्युः । तन्मन्दम्—रजतरङ्गयोरिमे रङ्गरजते इति ज्ञाने इदं रजतत्ववति रजतत्वप्रकारकमिति व्यवहारप्रसङ्गात् ।

End:

जलत्वेन जलावगाहि जलं गन्धवदिति ज्ञानसाधारणतया गन्धप्रकारतायाः तद्व्यापकतावच्छेदकत्वानुपपत्तेरित्यपास्तम् ।

श्रीशैलकृष्णनाम्ना रचितामेतां प्रमात्वचिह्नस्य ।
विवृतिं हृदये धीराः कलयन्तु विचारदत्तकुतुका ये ॥

(*e*) अनुपलब्धिवादार्थः.

ANUPALABDHIVĀDĀRTHAḤ.

Foll. 45*b*—51*b*. Fol. 52 is left blank.

A discussion on a point of difference between the Naiyāyikas and the Mīmāṁsakas, about Anupalbdhi being a distinct Pramāṇa.

Wants the beginning and the end.

Beginning:

विशेषणतासम्बन्धेन वृत्तिमतामभावादीनां प्रत्यक्षे विशेषणताप्रत्यासत्तेः हेतुत्वम् । विशेषणता च क्वचिदिन्द्रियसम्बन्धानुयोगिका क्वचिदिन्द्रियानुयोगिकैव प्रत्यक्षे हेतुः ।

* * * *

यत्र यस्य प्रतियोगिनो योग्यानुपलब्धिः तत्र तद्विशेषितस्यैव तदभावस्य प्रत्यक्षोदयात् परमाण्वादौ पृथिवीत्वादेरनुपलम्भो न योग्यः । यत्राधिकरणे यमापादकीकृत्य तदुपलम्भः आपादयितुं शक्यते, तदधिकरणनिष्ठस्य विशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकतत्प्रकारकोपलम्भाभावस्य प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपपारिभाषिकयोग्यताया आवश्यकत्वात् ।

End:

स्थूलजलादेरपि तादृशव्यापकत्वाभावापत्तिरिति वाच्यम्; तत्तत्प्रतियोगितावच्छेदकभेदविशिष्टतथाविधावच्छेदकताव्यापकत्वस्यैव निवेशनीयत्वात्.

R. No. 3664.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Yajñēśvaradīkṣitar, New Kalpathi, Palghat.

Fol. 143*b* gives the name of the owner of the original MS. Fol. 144 is left blank.

शिवतत्त्वसारसङ्ग्रहचन्द्रिका.

ŚIVATATTVASĀRASAṄGRAHACANDRIKĀ.

A collection of authoritative stanzas taken from various sources, purporting that devotion towards Śiva will enable the devotee to obtain salvation: by Gurumūrti of Śrīdhara family of Gautamagōtra and disciple of Bōdhānanda. The author lived in the village Pañcanada (Tiruvadi), situated on the banks of the river Cauvery in the Cōla country.

Incomplete.

Beginning:

गुरुं प्रणम्य प्रथमं गणाधिपं महेश्वरं श्रीपरदेवतां च ।
मुदे महाशाम्भवपुङ्गवानां निबन्धमेतं रचयामि रम्यम् ॥
शिवैक्यताप्रापकहेतुभूतं श्राव्यं समस्तागमसारभूतम् ।
शैवप्रकाशाख्यमिमं निबन्धं विलोक्य मर्त्यास्सुखिनो भवन्तु ॥
येषां दृढा भक्तिरिहास्ति शास्त्रे विन्दन्ति सम्यक् सकलं रहस्यम् ।
प्राग्जन्मपुण्याद्विमला मनीषा ते निन्दका नास्य भवन्ति लोकाः ॥

श्रीचोलदेशे कावेर्यास्तटे पञ्चनदस्थले ।
श्रीधरान्वयजातेन नाम्ना श्रीगुरुमूर्तिना ॥
श्रीमद्गौतमगोत्रेण शिवपादावलम्बिना ।
श्रीमद्बोधानन्दगुरोः कृपया लिखितं मया ॥
स्मृत्यागमपुराणानां श्लोकान् सङ्गृह्य यत्नतः ।
मुक्तिदा शिवतत्त्वैकसारसङ्ग्रहचन्द्रिका ॥
सुधाधिक्कारिणी पापहारिणी भवतारिणी ।
शृण्वतां पठतां पुंसां शिवभक्तिप्रदायिनी ॥

* * * *

सूतः—

तस्मादेव मुनीश्वराः प्रतिदिनं शैवानि भक्त्या परं
श्रेयःप्राप्तिपथानि कर्णपुटकैर्युक्तैः पुराणान्यहो ।

पंचयान्येव विमुक्तये नरवरैर्भक्तैरयत्नेन ते
मुक्तिं यान्ति शिवेन साकमपि वा सायुज्यमन्ये श्रियम् ॥

Colophon :

श्रीशिवरहस्यादिसर्वपुराणागमतन्त्रसङ्ग्रहे शिवतत्त्वसारसङ्ग्रहचन्द्रिकायां पुराणश्रवणमाहात्म्यं नाम प्रथमोऽध्यायः ॥

End :

ग्रामं शिवाय यो दद्यात्स मुक्तो भवति ध्रुवम् ।
देशदानेन चानन्त्यं न शक्यं तत्र कीर्तितुम् ॥
भूमिप्रदो वसेत्स्वर्गे यावत्कालस्य सङ्ख्यया ।
तस्माच्छतगुणं कालं तद्धर्ता नरके वसेत् ॥
विंशत्यष्टौ त्रयः कोट्यो नरकाणां सुदारुणाः ।
क्रमेण तासु पच्यन्ते देवब्रह्मस्वहारिणः ॥
योऽन्यदत्तां स्वदत्तां वा हरेद्भूमिं नराधमः ।
स पच्यतेऽक्षयं कालं नरकेषु क्रमेण सः ॥
देवब्रह्मपरद्रोहं तस्मात्सन्त्यज्य शङ्करम् ।
ये पूजयन्ति सततं ते यान्ति परमं पदम् ॥

R. No. **3665.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 76. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sādhu-Malai-Vādhyār Tirumalai Ayyaṅgār, Nāṭakaśālai street, Srivilliputtur, Ramnad district.

(*a*) प्रपत्त्यधिकारिविशेषणत्वनिष्कर्षः.

PRAPATTYADHIKĀRIVIŚEṢAṆATVANIṢKARṢAḤ.

Fol. 1*a*.

Herein it is stated that the Caramaślōka in the Gītā does not enjoin the performance of Prapatti as the means of salvation, but as a qualifying adjunct in one desirous of obtaining it.

Complete.

Beginning :

अग्निविद्यादितुल्यत्वात्प्रपत्तिः परतो विधेः ।
विधेयान्तरसत्त्वादप्यधिकारिविशेषणम् ॥

सर्वत्र सिद्धमेव स्यादधिकारिविशेषणम् ।
क्वचिद्विध्यन्तरैस्सिद्धं क्वचिच्च स्वत एव तत् ॥
तत्राद्यमग्निविद्यादि द्वितीयं कामनादिकम् ।
अग्निविद्योपनीतिश्च दीक्षा श्रीस्सत्रसंश्रया ॥

End:

अतो भक्तिपदे तस्या नोपायत्वं क्वचिद्भवेत् ।
न वा प्रपत्तिबद्धक्तेरधिकारत्वसम्भवः ॥
इत्येव ग्रन्थयास्स्पष्टं मीमांसादीपिकाख्ययोः ।
न मया किञ्चिदद्यात्र वक्तव्यमवशिष्यते ॥

Colophon:

इति प्रपत्तेरधिकारिविशेषणत्वनिष्कर्षः ॥

(b) चरमश्लोकसिद्धतात्पर्यटिप्पणी.

CARAMAŚLŌKASIDDHATĀTPARYAṬIPPAṆĪ.

Foll. 2a—58a.

A treatise giving out the purport of the Caramaślōka: by Yatirājadāsa of Śrīśaila family, who, in the beginning of the work, salutes Yatirāja, Lōkācārya and Varavaramuni.

Complete.

Beginning:

स्मृत्वा यतीन्द्रलोकार्यौ नत्वा वरवरं मुनिम् ।
करोमि चरमश्लोकसिद्धतात्पर्यटिप्पणीम् ॥

तत्र तावत्सत्सम्प्रदायपरम्पराप्राप्तोऽयमर्थः— सर्वधर्मपरित्यागपूर्वकं भगवन्तमेव शरणं गतस्य स एव भगवान् साधनमिति सिद्धोपायपरश्चरमश्लोक इति । अत्र कस्य चिच्छान्दसस्य पैशाचम्—नायं श्लोकस्सिद्धोपायं प्रतिपादयति प्रवृत्तिनिवृत्त्यन्वयविरहिणश्शास्त्रस्य प्रतिपादनापूर्त्या नैराकाङ्क्ष्यायोगात् । तथा च वार्त्तिकम्—

यावत्खलु प्रमातॄणां प्रवर्तननिवर्तने ।
शब्दा न कुर्वते तावन्न निराकाङ्क्षबोधनम् ॥ इति ।

End:

तस्माच्चरमश्लोकपूर्वार्धं स्वरूपयाथात्म्यज्ञानप्राप्तयोस्साधनान्तरत्यागभगवदेकशरणवरणयोः भगवदभिमतत्वज्ञापनमुखेन शोकनिवर्तनपरं, तदुत्तरार्धं च

चेतनसंरक्षणे भगवत एव प्राप्तिप्रदर्शनेन शोकनिवृत्तिपरमिति सिद्धपरतयैवायं श्लोकः पुरुषार्थपर्यवसायीति सर्वं समञ्जसम् ॥

Colophon:

श्रीशैलयतिराजाख्यदासस्य कृतिरुज्ज्वला ।
वर्धतां चरमश्लोकसिद्धतात्पर्यटिप्पणी ॥

Fol. 58*b* contains the name of the owner of the original MS. Foll. 59*a*—60*b* contain a small portion of this work. Foll. 61*a*—64*b* contain a portion of Śrīvacanabhūṣaṇārthavicāra.

(*c*) ஒண்ணியசன்மவிளக்கம்.

ONṆIYAJANMAVIḶAKKAM.

Foll. 65*a*—76*a*. Fol. 76*b* is left blank.

See the Tamil Part of this Triennial Catalogue. By Lōkācarya. Complete.

R. No. **3666.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. K. V. Paramēśvara-Vādhyān Nambūdiri, Āccipuram, Kottakkal, South Malabar district.

Foll. 78*b* is left blank.

रुक्मिणीकल्याणम्.

RUKMIṆĪKALYĀṆAM.

A poem describing the story of the marriage of Rukmiṇī with Śrī-Kṛṣṇa: by Vidyācakravartin, the well-known commentator on the Kāvyaprakāśa and Alaṅkārasarvasva. The whole of the first Sarga contains the genealogy of the King Ballāla of Dvārasamudra in the Mysore State. The work contains many interesting historical points.

Contains the Sargas 1—16 complete.

Beginning:

. . . पादेष्वनुशासनेषु कलासु सिद्धस्य नु(दु)रासदस्य ।
अर्थस्य सूक्ष्मस्य कवीन्द्रसूक्तिरेकैव साक्षादिह कामधेनुः ॥
वाद्यैर्विचित्राभिनयाभिरामैर्गीतोत्तरैः स्फीतरसप्रवाहैः ।
निर्मथ्य वेदांश्चतुरः प्रणीतं नाट्यागमं पञ्चमवेदमाहुः ॥

* * * *

वंशे यदोर्होसलनामधेयः पुरा किलासीत्प्रवरो नृपाणाम् ।
अद्यापि न म्लानिमुपैति कर्णे लोकस्य यत्कीर्तिमयोऽवतंसः ॥

* * * *

तेजस्विनोऽपि स्वत एव पूर्वान् परांश्च ये(यो)होसलभूमिपालान् ।
मध्येमणी हारमणीनिवाग्र्यैस्तेजोभिरुद्द्योतयति(ते)सुकामम् ॥
विद्यासु नाम्ना भुवनत्रयेऽपि यश्चक्रवर्तीत्युपगीतकीर्तिः ।
आस्थान(वि)द्वत्प्रवरस्स तस्य राज्ञ प्रशस्तिं प्रथयाम्बभूव ॥
अयत्नसंसिद्धकुलानुयायिविद्यापदा(वता)मुग्रतरैस्तपोभिः ।
उमापतेर्दक्षिणतो मुखाद्यसा(स्ता)क्षात्प्रपेदे वरतत्त्वदीक्षाम् ॥
निरग्निहोत्राः परिमन्दवाचो न केचन ब्रह्मविचारशून्याः ।
आसन्ननैसर्गिकसिद्धविद्या द्विजाः कुले यस्य तपोभिरिद्धैः ॥
तस्योक्तिभिस्सिद्धसरित्प्रवाहस्फीताभिरुन्मीलितदोःप्रतापः ।
वल्लालभूपस्तनये नृसिंहे ससागरं भूवलयं न्यधत्त ॥
. . . (नै)पुण्य(ण)भूमिभागमजेयमालोक्य बलैरनल्पैः ।
यः प्राप्य दुर्वारभुजप्रतापश्चोलं च पाण्ड्यं च रणे जिगाय ॥

* * * *

त्रि(श्री)वैद्यनाथः किल चक्रवर्तिसुतस्तदास्थानमहासमुद्रम् ।
मरीचिभिश्चन्द्र इवामलाभिरहर्निशं वर्धयति स्म वाग्भिः ॥

* * * *

श्रीसोमभूमीपतिरुग्रवीर्ये तस्य(स्तस्या)महिष्यास्तनये नृसिंहे ।
व्यपेतरागो वयसोऽवसाने निवेशयामास धुरं धरण्याः ॥

* * * *

श्रीबिज्जलाम्बावरजस्य पाण्ड्यपृथ्वीपतेः पश्चिमसिन्धुभर्तुः ।
स पद्मर्मां नाम सुतां सुरूपां जग्राह पाणौ नरसिंहभूपः ॥
मुहुर्नमन्त्या परिलालनेऽपि तन्व्या नृपः पाणिगृहीतया सः ।
धर्मानुबद्धं समुपाससाद कामं यथार्थं च कृपाणयष्ट्याम् ॥
तस्याभवत्संसदि वासुदेवो यथार्थनामाधिपतिर्बुधानाम् ।
यस्मै चतुर्वेदिगुरुस्सुतां स्वामदत्त लक्ष्मीमिव पद्ममार्या(र्व्यां)म् ॥
दुर्वादिनस्तर्कशतैर्जयन्तं चेतो नयन्तं रसपारवश्यम् ।
पृथ्वीपतिः प्रीतिमवाप्य पाण्ड्यस्त्वं वल्लभोऽसीति यमाजुहाव ॥

* * * *

नृसिंहभूपोऽथ कुलप्रदीपे वल्लालदेवे तनये नयज्ञे ।
पराक्रमस्यैकनिधावुदारे समर्पयामास महीं महात्मा ॥

* * * *

विदूरदेशोऽप्यनयत्प्रसादं यन्निर्मदः केरलभूमिपालः ॥
शौर्योष्मणा यस्य निपीतसारं धैर्याम्बुधिं स्वं विपुलं निरीक्ष्य ।
अनाश्वसन्नम्बुधिमल्पसारं दत्ते करं कोङ्कणराजवर्गः ॥

* * * *

श्रीवल्लभाख्यस्य सुतोऽतिरात्रयज्वा महादेवसमाह्वयोऽभूत् ।
वल्लालपृथ्वीपतिरभ्यगच्छद्यस्माच्चतस्रोऽपि नृपालविद्याः ॥

* * * *

तेनोपनीयावरजो विनीतः प्रसिद्धनामा कविचक्रवर्ती ।
वल्लालभूपस्य मनोऽभिरामैर्वाचां विलासैरतिवल्लभोऽभूत् ॥
उन्मूलितस्थापितभूमिपालदेशेषु पद्यैरुपवर्ण्य गीताः ।
. . . . . महाशिलासु वल्लालभूपस्य भुजप्रतापाः ॥
उदाहृतित्वेन नयैर्निबध्य काव्यप्रकाशादिषु लक्षणेषु ।
निवेशिता येन जगत्समक्षं ख्यातिं गता होसलराजगाथाः ॥
वेदान्तयोगागमसङ्ग्रहीत्रा प्रकीर्णकस्याहितदर्पणेन ।
व्याख्याय येनोपचितानि लोके काव्यप्रकाशादिनिबन्धनानि ॥
यच्छत्रभद्रासनचामराद्यैः स्फीतैर्महाराजपदैर्भुनक्ति ।
सभासु राज्ञां च विपश्चितां च साहित्यराज्यं कविचक्रवर्ती ॥
सोऽहं प्रवृद्धामुपभुज्य लक्ष्मीं प्रसूय पुत्राननुरूपशीलान् ।
विचार्य चात्मानमबाह्यकामो विष्णुं भजे वाक्कलुषापनुत्त्यै ॥
पराशरव्यासशुकोपदिष्टं यथावदालम्ब्य कथाशरीरम् ।
व्यावर्ण्यते भीष्मसुताविवाहः फलान्तमारभ्य हरेः प्रसूतिम् ॥

* * * *

Colophon:

इति श्रीविद्याचक्रवर्तिनः कृतौ रुक्मिणीकल्याणे महाकाव्ये कविकाव्यवंशानुचरितोपवर्णनं नाम प्रथमस्सर्गस्समाप्तः ॥

द्वापरान्ते भुवो भारमवतारयितुं हरे(रि)ः ।
इयेषाभ्यर्थितो धात्रा क्षात्रं जन्म यदोः कुले ॥

End:

सादरातिशयजातकौतुकां बालमिवमवबोध्य तं प्रियाम् ।
उत्सुकोत्सुकतयानुसंस्मरन् शैशवे स्वचरितान्यवर्णयत् ॥
स्वे परे कृतधियो जवाशया योषितः परिजनाश्चराः स्थिराः ।
विष्णुलोकसुखमेत्य निन्यिरे रुक्मिणीपतिसलोकसम्पदम् ॥
क्षपितनिखिलभारामित्थमुत्सिक्तदैत्य-
क्षितिपतिदमनेनावाप्तवर्णव्यवस्थाम् ।
भुवमशिषदशेषां रुक्मिणीतन्त्रधर्मा
गुरुजनपरतन्त्रो मर्त्यरूपो मुकुन्दः ॥

Colophon:

इति श्रीविद्याचक्रवर्तिनः कृतौ महाकाव्य रुक्मिणीकल्याणे षोडशः सर्गस्समाप्तः ॥

R. No. **3667.**

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Jīyar-Maṭham, Tirukkuruṅguḍi, Tinnevelly district.

Foll. 35*b* and 36 are left blank.

(*a*) यतिराजशतकम्.

YATIRĀJAŚATAKAM.

Foll. 1*a*—10*b*.

One hundred eulogistic stanzas addressed to Śrī-Rāmānujācārya, also known as Yatirāja: by Alaśiṅgabhaṭṭa alias Narasiṁha, son of Yōgānandārya.

Complete.

Beginning:

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
कल्याणं नस्तनोतु प्रचुरतरनिजालोकपूर्णाखिलेशः
प्रोद्दृप्यद्यातुधानप्रमुखशलभहृद्धेतियुक्तः प्रदोषे ।
पूज्यः प्राज्यश्रियाढ्यो विमलशुभदशान्ताश्रितोऽन्तस्तमोभित्
प्रह्लादारोपितोऽयं यदुगिरिशिखरे श्रीनृसिंहाख्यदीपः ॥

* * * *

श्यामाभोज्ज्वलशक्रनीलविलसद्दामाञ्चितोरस्स्थिता
रामा यस्य विभाति साम्बुदतटिद्दामा स डिल्लीशितुः ।
जामाता यदुशैलवासरसिको रामादिभिः पूजितः
श्रीमान् संयमिसार्वभौमतनयः क्षेमाय बोभूयताम् ॥

* * * *

श्रीमद्वैकुण्ठसेनापरिबृढशठजिन्नाथपाथोरुहाक्षा
रामश्रीयामुनाद्या अपि गुरुचरणास्तोषमुन्मेषयन्तु ।
येऽमी सत्त्वाभिरामा अपि विततमस्फूर्तिविभ्राजमाना
दोषाश्लेषप्रमुक्ता अपि दधति विधोः पादसेवां हि नित्यम् ॥
शय्या काचिन्मुरारेः कलयतु कुशलं दिव्यभोगाभिरामा
सौमित्रिस्सौख्यदायी भवति धरणिजाकान्तसेवानुरक्तः ।
रेवत्याः प्राणकान्तस्समवतु सततं धेनुकप्राणहारी
श्रीमान् योगीश्वरोऽयं रचयतु नितरां सम्पदुज्जृम्भणं नः ॥

श्रीमत्संयमिसार्वभौमचरणद्वन्द्वाब्जपुष्पन्धयः
श्रीमौञ्ज्यायनवंशमौक्तिकमणिस्सच्छास्त्रपारङ्गतः ।
यद्वद्रीश्वरपूजनैकनिरतो वात्सल्यवारां निधिः
मालिन्यं मम मानसं शमयतु श्रीरङ्गराजो गुरुः ॥

अपादाक्रान्तविबुधलोको वा कुप्रतिग्रहे ।
अनासक्तो बलिद्वेष्ट(ष)रहितो वामनो गुरुः ॥

वेदान्ताचार्यवर्यो वृषभगिरिपतेर्दिव्यघण्टावतारः
श्रीमत्सौम्योपाचि(य)न्ता भुजगपरिबृढीयावतारश्च जीयात् ।
यत्प्रोक्ता भाष्यकर्तुर्विशदयति गुणान् सप्ततिर्विंशतिर्मे
याभ्यां वेदान्तयुग्माह्वयमणियुगलं दत्तमस्मद्गुरुभ्यः ॥
जीयाच्छ्रीरङ्गराजान्वयकलशपयोराशिराकासुधांशुः
यद्वद्रीशाङ्घ्रिपाथोरुहपरिचरणप्राप्तसौजन्यलक्ष्मीः ।
त्रातश्रीपञ्चरात्रस्तुहिनरुचिकचग्राहिकीर्तिप्रवृत्तिः
योगानन्दार्यभट्टश्शुभगुणजलधिर्विद्वदग्रेसरोऽयम् ॥

तत्सूनुरलशिङ्गाख्यदासोऽयं मुग्धधीरपि ।
स्तोतुं पद्यशतेन त्वां यतते यतिपुङ्गव ॥

दीक्षाचार्याः पञ्च शाण्डिल्यमुख्यास्साक्षाच्छेषं त्वामिह स्तोतुमिच्छोः ।
प्रेक्षावाद्भिः श्लाघनीयां गिरं मे द्राक्षामृद्वीं सादरास्ते दिशन्तु ॥

हे रामानुजयोगिवर्य भवतस्स्तोत्रं चिकीर्षन्नहं
श्रीनारायणसंयमीश्वरगुरूत्तंसं मुहुश्चिन्तये ।
यस्तोताद्रियतीश्वरामृतनिधेराहृत्य भाष्याह्वयं
पीयूषं घनवैभवो यदुगिरेर्मूर्ध्नर्चभ्यवर्षन्मुदा ॥

*　　*　　*　　*

स्वस्मिन् संयमिसार्वभौम भवतश्श्लाघ्यैर्गुणैर्भूषिता
विद्वाद्भिः परिगृह्यते स्वयमियं नीचापि वाचा मम ।
जातीचम्पकमल्लिकासरसिजश्रेष्ठैस्सुमैर्योजितां
निस्सारामपि किं विमुञ्चति सुराधीशोऽपि मोचात्वचम् ॥

End :

इति किल कविशार्दूलो योगानन्दार्यनन्दनो नृहरेः ।
दासोऽळशिङ्गभट्टश्चक्रे स्तोत्रं यतिक्ष्माभर्तुः ॥

यतिसार्वभौमपदयोस्समर्पिता शुभदास्तु पद्यशतरत्नमालिका ।
यदुभूधरेन्द्रपदपद्मपूजनप्रवणाग्रगेन नरसिंहसूरिणा ॥

शालिवाहशकाब्दानां सार्धसप्तशते गते ।
सहस्रे नन्दने वर्षे कन्याराशिगते रवौ ॥
स्वतातपादजन्मर्क्षे श्रविष्ठाख्ये शुभे दिने ।
अशेषविदुषां गोष्ठीमध्ये सम्पत्सुताग्रतः ॥
श्रीभाष्यकारपादाब्जनुतिरेषा समर्पिता ।

(*b*) यतिराजशतकव्याख्या.

YATIRĀJAŚATAKAVYĀKHYĀ.

Foll. 10*b*—35*a*.

A commentary on the work described above: by the same author as that of the text.

Complete.

Beginning :

योगानन्दप्रभुं नत्वा योगानन्दार्यसूनुना ।
व्याख्यास्यतेऽळशिङ्गेन स्वकृतिर्यतिराट्स्तुतिः ॥

आदौ तावत्कविः प्रारिप्सितस्य यतिराजस्तोत्रस्य निर्विघ्नपरिसमाप्त्यर्थं स्वेष्टदेवतानमस्काररूपं मङ्गलं निबध्नाति—श्रीमदिति । श्रीमत् लक्ष्मीयुतमित्यर्थः । अत्र मत्(तुप्)प्रत्ययस्य नित्ययोगार्थकत्वात् निरन्तरं निजवक्षस्स्थलरममाणयोगलक्ष्मीविशिष्टता सूच्यते ।

End :

एवं जय जय जलजाक्षदिव्यतल्पेत्यारभ्य जीयाच्छ्रीयादवाचल इत्यन्तं श्लोकशतेन भाष्यकारं स्तुत्वोत्तरमङ्गलमाह—मङ्गलमित्यादिभिः पञ्चभिश्श्लोकैः। उक्तं स्तोत्रं कविः स्वनाम्ना मुद्रयति—इतीति । स्फुटोऽर्थः ॥

Colophon :

इति श्रीयोगानन्दार्यभट्टाचार्यतनयस्य अळशिङ्गभट्टाचार्यस्य कृतिषु यतिराजशतकव्याख्या सम्पूर्णा ॥

R. No. 3668.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 207. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Fol. 207 is left blank.

भागवतम्, सदर्थप्रकाशिकासहितम्.

BHĀGAVATAM WITH SADARTHAPRAKĀŚIKĀ.

A commentary on the Bhāgavata, which work has been described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I: by Śaṅkara, who wrote this at the request of his pupil Pāliyēśa. The commentaries Amṛtataraṅgiṇī and Kṛṣṇapadī are quoted and incorporated in this commentary.

Contains the Skandha 11 complete.

Beginning :

परपदमधिरोढुं प्रार्थितः पद्ममुख्यै-
र्धरणिभरनिरासश्रान्तिभारादिवैकः ।
रहसि निजरहस्यं प्रोच्य सख्ये निविष्ट-
स्सहसितमुखपद्मस्त्रायतां नो मुकुन्दः ॥

निजशिष्यपालियेशप्रार्थनया शङ्कराख्यशिवविप्रः ।
भागवतैकादशगाः प्राक्तनविवृतीस्समुच्चिनोम्यद्य ॥
प्रवृत्तितः परानन्दकृष्णक्रीडानुवर्णिता ।
तन्निवृत्त्या परानन्दपदारोहोऽनुवर्ण्यते ॥

एवं तावद्दशमस्कन्धे भूभारावतरणाय निजविभूषितयदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्णस्य तदुचितप्रवृत्तिविडम्बनेन तच्छ्रवणस्मरणादिपराणामपरेषामानन्दकारणं क्रीडा निरूपिता । अथेदानीमपरिमितयोगमायावैभवस्य भक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थं भूतलमवतारितानां चाधिकारिणां सुरांशानां मौसलापदेशेन तत्तदधिकारपदप्रापणपूर्वकं च ब्रह्माद्यनुग्रहाय निजपदारोहो निरूप्यते ।

* * * *

तस्य च यथामति व्याख्यानमारभ्यते । तत्र मौसल्यप्रसङ्गार्थं—पूर्वस्कन्धार्थमनुवदाति श्लोकद्वयेन—

कृत्वा दैत्यवधं कृष्णस्सरामो यदुभिर्वृतः ।
भुवोऽवातारयद्भारं जविष्ठं जनयन्कलिम् ॥ इति ।

श्रीकृष्णस्सरामो रामेण सहितो यदुभिर्यादवैर्वृतः परिवृतश्च सन् ।

* * * *

Colophon:

इत्येकादशस्कन्धे सदर्थप्रकाशिकायां व्याख्यायां प्रथमोऽध्याय. ॥

End:

कृष्णपद्यां तु ऊक्तभक्तिज्ञानयोगयोः कर्मयोगस्य च साक्षात्पारम्पर्याभ्यां निश्श्रेयसफलत्वमुपसंहरति—एवमिति— इत्यवतारिका कृता । उपतिष्ठन्तीति पाठः । मत्स्थानं ममेश्वरस्याविर्भावतिरोभावस्थानं विन्दन्ति यत्परमं ब्रह्म विदुः । अत एव क्षेमं मायातत्कार्यरूपानर्थनिवृत्तिं च विन्दन्ति लभन्ते— इति भेदः । इति कृष्णपदी ।

Colophon:

इत्येकादशसदर्थप्रकाशिकायां विंशोऽध्यायः ॥

अस्मिन् श्रीभागवतस्यैकादशस्कन्धे सदर्थप्रकाशिका, अमृततरङ्गिणी, कृष्णपदीति व्याख्यात्रयं सदर्थान् सम्यक् प्रकाशयति ।

R. No. **3669.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācārya Kīḻnattam village, Tinnevelly district.

Foll. 35 and 36 are left blank.

शतकोटिखण्डनमण्डनम्.

ŚATAKŌṬIKHAṆḌAṆAMAṆḌANAM.

A treatise refuting the views of the Śatakōṭi by supporting the views contained in the Śatakōṭikhaṇḍana : by Gōpāla Tātācārya, son of Kṛṣṇa Tātācārya.

Complete.

Beginning:

श्रीकृष्णाभिधतातपादचरणाम्भोजं स्मरन् तत्कृत-
ग्रन्थोक्ते शतकोटिदूषणगणे कैश्चित्समुद्भावितम् ।
दोषाभासमलघ्नकं सरभसं सन्दर्शयन् पण्डित-
व्रातस्याधिकमोदमद्य तनुते गोपालतातस्सुधीः ॥

विशिष्टपक्षग्रहत्वाव्यापकविशिष्टसाध्यग्रहत्वाव्यापकपक्षसाध्यवैशिष्ट्य-ग्रहत्वव्यापकतद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्व (. . .) सत्प्रति-पक्षत्वम् ।

* * * *

तज्ज्ञानीयजनकतायां बाधप्रतिबन्धकताव्याप्यत्वविरहेण सम्भवादिति अस-त्तातपादाः ॥

End:

प्रतिबन्धकतायां तन्निवेश्य तन्निबन्धनाव्याप्त्यादिवारणाय विशेषणा-न्तरोपादानं प्रक्षालनाद्धीति न्यायेन अयुक्तमेवेत्यलं पल्लवितेन ॥

R. No. **3670.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Fol. 38 is left blank.

दशरूपकम्, सव्याख्यानम्.

DAŚARŪPAKAM WITH COMMENTARY.

Similar to the work described under No. 12888 of the D.C.S. MSS., Vol. XXII. By Bahurūpamiśra. This commentary is called Dīpikā.

Contains the first Prakāśa complete and the second Prakāśa incomplete.

Beginning:

अथ प्रारिप्सितस्य प्रकरणस्याविघ्नसमाप्त्यादिसिद्धये विघ्नाधिराजं नमस्करोति निखिलबुध . . लामणिमञ्जराजाधिराजवन्दितचरणयुगलो ग्रन्थकृद्धनञ्जयः—

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
यदाभोगघनध्वानो नलिकण्ठस्य ताण्डवे ॥

यथा घनं न(नस्य) मेघस्य ध्वानो नीलकण्ठस्य मयूरस्य ताण्डवे पुष्करायते तथा नीलकण्ठस्य परमेश्वरस्य ताण्डवे उद्धतनृत्ते म . भोगेन यदपरिपूर्णं यो . . . घनध्वानो निबिडध्वनिः यत्कण्ठः पुष्करायते मृदङ्गबदाचरि(तः) तस्मै नम इति । अत्र खण्डश्लेषाक्षिप्यमाणोपमा छायालङ्कारः । अथ रूपकाणां प्रकरणप्रतिपाद्यतां सूचयन्नाट्यवेदप्रयोगा(क्ता)रं भरतमभिमतदैवतं च विष्णुं नमस्करोति—

दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमस्सर्वविदे तस्मै विष्णवे भरताय च ॥

एकत्र मत्स्यादीनां दशानां रूपाणामनुकारेण प्रतिमारूपेणान्यत्र नाटकादीनां दशरूपाणां रसान्तरात्मनां भावका अध्य(ध्येता)रो रसिकाश्चेति श्रोतृजनप्रोत्साहनाय प्रकरणविशेषस्य सरस्वतीप्रसादलब्धत्वं महाफलत्वं चाह ।

* * * *

End:

प्रज्ञामयेन नेत्रेण रसं द्रष्टुं य इच्छति ।
तत्कृते बहुरूपेण रचिता रूपदीपिका ॥

Colophon:

इति महोपाध्यायबहुरूपमित्र(श्र)विरचितायां दशरूपटीकायां वस्तुविचारो नाम प्रथमः प्रकाशः ॥

End :

एवमन्यदप्यु(प्यु)दाहर्तव्यम् । अथ लाटी—

मृदुपदसमाससुभगा युक्तैर्व्यक्तैर्नचातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥

भोजराजेन त्वनति.

R. No. **3671.**

Paper. 10¾ × 9¼ inches. Foll. 122. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sādhu Malai-Vādhyār Tirumalai Ayyangār, Nāṭakaśālai street, Srivilliputtur, Ramnad district.

(*a*) मन्त्रार्थकठिनपददीपिका.
MANTRĀRTHAKAṬHINAPADADĪPIKĀ.

Foll. 1*a*—34*a*.

A treatise explaining the meaning of some of the difficult words contained in the Rahasyatraya, i.e., Aṣṭākṣara, Dvaya and Caramaślōka. The author, whose name is not given, salutes Varada, son of Varaprada of Kauśikagōtra and disciple of Śuddhasattva.

Complete.

Beginning :

श्रीकौशिकान्वयवरप्रदवर्यसूनुं तत्पादयुग्मसरसीरुहराजहंसम् ।
श्रीशुद्धसत्त्वगुरुलब्धसमस्तबोधं श्रीमद्वरप्रदगुरुं शरणं प्रपद्ये ॥

*   *   *   *

अत्र प्रथमविशेषणचतुष्टयस्य प्राप्यत्वोपयोगित्वं द्वयोत्तरखण्डप्रतिपाद्यार्थप्रतिपादकत्वमित्यादिप्रयोजनं बोध्यम् । सर्वेश्वरम् इति विशेष्यस्य नारायणपदार्थप्रतिपादनं चेतनरक्षणे स्वयं समुद्युक्तत्वमित्यादिकं बोध्यम् । आकुलचित्तः अतिव्याकुलचित्तः अत्यन्तव्याकुलचित्तः ।

*   *   *   *

शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम् ।
तदेकोपायता याच्ञा प्रपत्तिश्शरणागतिः ॥

इत्यादिना शारणागतेरेव प्रपत्तित्वं सिद्धान्तिनामिष्टम् ।

Colophon :

इति तिरुमन्त्रप्रकरणम् ॥

End:

अच्युत इत्यत्र न च्युतः अच्युतः प्रपन्नं न च्यावयतीत्यच्युत इति व्युत्पत्तिद्वयेन विशेषणद्वयं बोध्यम् । आक्रन्ददित्यत्र क्रदि आह्वाने रोदने च इति धातोः आह्वाने पञ्चधा नामग्रहणात् रोदने पञ्चधा नामग्रहणात् दशविधत्वं बोध्यम् ॥

Colophon :

मन्त्रार्थकठिनपददीपिका समाप्ता ॥

(*b*) लुप्तचतुर्थीविचारः.

LUPTACATURTHĪVICĀRAḤ.

Foll. 34*b* -37*a*.

An investigation of the elliptical nature of the dative termination in the Praṇava (ओम्): by Tiruvāliyaṇṇan of Śuddhasattva family.

Complete.

Beginning :

तत्र तावद्भवभयाभितप्तजनभागधेयभावितावताराभ्य मभिनीतगुरुशिष्यभावाभ्यामनश्वरतरतापसवराभ्यां श्रीमन्नरनारायणाभ्यामेव भगवन्मायाविभूत्यभिभूयमानसकलजीवसमुज्जीवन-

* * * *

कामैरुपादेयं नान्यदिति सज्जनसमाजेषु साम्प्रदायिको घण्टाघोषः श्रूयते ।

End :

तद्धर्मपुरस्कारेणैव शेषत्वज्ञानस्य कैङ्कर्यप्रार्थनाप्रयोजकत्वेन तादृशशेषत्वज्ञानं चतुर्थीं विना नोपपद्यत एवेति चतुर्थीकल्पनस्यैव न्याय्यत्वादिति दिक् ॥

Colophon :

शुद्धसत्त्वं तिरुवालियण्णन्कृतलुप्तचतुर्थीविचारस्सम्पूर्णः ॥

Fol. 37*a* gives the Tattvatrayavivaraṇa.

(*c*) कैवल्यस्थाननिर्णयः.

KAIVALYASTHĀNANIRṆAYAḤ.

Foll. 37*b*—38*b*.

States that Kaivalya is a place of bliss and self-realization on the way to Vaikuṇṭha, after crossing the river Virajā.

Complete.

Beginning:

आत्मानुभवकामस्तु भगवतो भोग्यत्वं परित्यज्य स्वात्मानुभवप्रतिबन्धक प्रकृतिध्वंसोपयोगितया पावनत्वमात्रमनुसन्धाय तेनैव निरस्तसमस्तप्रतिबन्धकः परमपदप्रवेशपूर्वकमात्मगतातिशयितानुकूल्यविशेषमुपासनानुगुणमनुभवन् ।

* * * *

विरजोत्तरणानन्तरं परमाकाशशब्दवाच्ये दिव्यजनपददिव्यनगरव्यतिरिक्ते प्रदेशे केवलानामवस्थानं, न तु दिव्यजनपददिव्यनगरप्रदेश इत्यभ्युपगमात् - एवं च प्रकृतिमण्डलादूर्ध्वं श्रीवैकुण्ठादर्वाक् परमाकाशशब्दवाच्यदेश-विशेषः केवलानामवस्थानमिति प्रतिपादितं भवति ।

End:

सुस्थिरं स्थानं कैवल्यार्थिनां प्राप्यतया प्रतिपाद्यानन्तरमेकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये "तेषां तत्परमं स्थानं यद्वै" पश्यन्ति सूरयः । इति भगवच्चरणार्थिनां नित्यसूरिनिषेवणीयं श्रीवैकुण्ठादिशब्दवाच्यं परमं स्थानं प्राप्यतया भगवता पराशरेणाप्युक्तम् ॥

Colophon:

सम्पूर्णम् ॥

गतास्वथ कलेः करमतङ्गजनभश्श्रुतिसमासु (४०८२) विषुनामशरदि
प्रभौघवति मेषमुपगच्छति विभायुतसुदर्शनवरप्रदगुरुः ।
कृतिं निरमिमीत सदनुष्ठितिलसन्मुकुरनामसहितां जगति यो
यतीश्वरवचोऽर्थविशदीकृतिपटुप्रथियुतं शरणमेमि तमहम् ॥

Foll. 39*a*—42*a* contain the Sakalapramāṇatātparya (in Tamil). Foll. 42*b*—44*a* give the Rahasyatrayavivaraṇa Fol. 44 contains Praṇavanirvacana. Foll. 44*b*—46*a* give the Rahasyatrayamīmāṁsā-bhāṣyakaṭhinapadadīpikā.

(*d*) सद्दर्शनसुदर्शनम्.

SADDARŚANASUDARŚANAM.

Foll. 46*a*—91*b*.

A treatise vindicating the religious observances of the Teṅgalai sect of Śrī-Vaiṣṇavas, which are indicated upon in the Viśvaguṇādarśa of Vēṅkaṭādhvarin. The work Viśvaguṇādarśa has been described under

R. No. 1067 ante. The author, whose name is not given, salutes Vēṅkaṭa-lakṣmaṇārya, Śaṭhamathana, Yatīndra, Lōkārya and Varavaramuni.

Incomplete.

Beginning :

श्रीवाधूलरमाप्रवालरुचिरस्त्वक्सैन्यनाथांशज-
श्रीगुर्विन्द्रमहार्यलब्धनिजसत्सत्तं श्रिताभीष्टदम् ।
श्रीरामानुजमुख्यदेशिकलसत्कैङ्कर्यसंस्थापकं
श्रीमद्वेङ्कटलक्ष्मणार्ययमिनं तं सद्गुणं भावये ॥

श्रीमच्चक्रोज्ज्वलं यद्भुजयुगयुगलं यच्छ्रिया स्वर्णवर्णः
यन्नाम द्वादशाद्यं भवति बहुमुखं दिव्यनाम्नां सहस्रम् ।
यो वैद्यः प्राप तापज्वरहरणविधौ ध्यानकृच्छ्रेयसां यो
यस्सद्वंशेऽभिमानी शठमथनमुनेस्सोऽवतात्केशवो नः ॥

* * * *

नत्वा यतीन्द्रलोकार्यौ स्मृत्वा वरवरं मुनिम् ।
करोमि महतां प्रीत्यै सद्दर्शनसुदर्शनम् ॥
क्वाहमत्यन्तदुर्दृष्टिः क्व सतां तत्सुदर्शनम् ।
स्वयमेव यतीन्द्रोऽयं पूरयेन्मदुपक्रमम् ॥
जन्तुरत्यन्तहीनोऽपि महतां पदमर्हति ।
अङ्कितश्शङ्खचक्राभ्यां सव्यदक्षिणपक्षयोः ॥
श्रीहस्तिशैलेशमहोत्सवार्थमत्रागतं दिव्यमकर्मवश्यम् ।
प्रदक्षिणार्थं करिशैलसूरेर्गन्धर्वयुग्मं गगने चचार ॥
दिव्यगान्धर्वनिपुणौ द्राविडब्रह्मगायिनौ ।
श्रीवैकुण्ठपतेरेतौ सव्यादक्षिणपक्षगौ ॥

सव्यो भक्तस्सद्गुणानन्दशीलस्स्निग्धस्वान्तःपक्षपातानभिज्ञः ।
सारासारौ शिक्षयन्वृत्तिदक्षस्सादौ पक्षे दक्षिणः पक्षपाती ॥

तत्र तावदेतौ भक्तप्रपन्नाविव विष्णुपदैकगती नरनारायणाविव सद्वृत्त-चारिणौ शङ्खचक्राविव(क्रे इव) साधुपक्षपातिनौ परब्रह्मपक्षसंश्रयौ

* * * *

गान्धर्ववेदधरौ गन्धर्ववरौ ।

End :

साक्षाल्लक्ष्मीः पवनतनयस्यान्तरङ्गस्य विष्णो-
र्दूरास्सर्वेन्द्रियगविकृतेर्वानरस्याथ जात्या ।

अत्यन्तापद्यापि च वपुषस्स्पर्शनं नानुमेने
दुष्टाम्बष्ठैरहह वनितासङ्गतिं मन्वतेऽमी ॥

(e) रहस्यत्रयविवरणकारिका.
RAHASYATRAYAVIVARAṆAKĀRIKĀ.

Foll. 92*a*—93*a*.

Same work as that described under R. No. 94(*a*) ante. By Aḻagiya-maṇavaḷa-Jīyar.

Wants the beginning; otherwise complete.

(*f*) रहस्यत्रयार्थविचारः.
RAHASYATRAYĀRTHAVICĀRAḤ.

Foll. 93*a*—94*b*.

Similar to the work described under R. No. 94(*a*) of the Tamil part ante. By Nārāyaṇamuni.

Complete.

Beginning:

आचार्योदीरितानर्थान् रहस्यत्रयगोचरान् ।
मुमुक्षूणां सदा भोग्यान् सङ्कलय्यानुसन्दधे ॥
कारणं सर्वजगतां रक्षकः कमलापतिः ।
शेषी तस्यैव शेषोऽहं देहेन्द्रियविलक्षणः ॥

End:

शठारिचरणाम्भोजसेवानिर्मलचेतसा ।
नारायणाख्यमुनिना रहस्यार्थोऽयमीरितः ॥

Foll. 94*b*—108*b* give the Tirumantrārtha-Arumpadam.

(*g*) रहस्यत्रयमीमांसाभाष्यकठिनपददीपिका.
RAHASYATRAYAMĪMĀṀSĀBHĀṢYAKAṬHINAPADA-DĪPIKĀ.

Foll. 109*a*—121*b*. Fol. 122*a* gives the name of the owner of the original MS. Fol. 122*b* is left blank.

A commentary on the difficult words in the Rahasyatrayamīmāṁsā-bāṣya, described under No. 5340 of the D.C.S. MSS., Vol. XI.

Incomplete.

Beginning :

विशिष्टाद्वैतवदिति । विशिष्टं च विशिष्टं च विशिष्टे द्वयोर्भावः द्विता द्वितैव द्वैतं द्वैतस्याभावः अद्वैतमभेद इत्यर्थः । विशिष्टयोरद्वैतं विशिष्टाद्वैतम् । तत्त्वमसि श्वेतकेतो इत्यत्र तत्पदवाच्यसार्वज्ञ्यादिकल्याणगुणविशेषणविशिष्टब्रह्मणः त्वम्पदवाच्यदेवादिशरीराविशिष्टजीवभूतश्वेतकेतुशरीरिकब्रह्मणश्चाभेदः । यथा—नीलो गन्धवान् घट इत्यत्र नीलवत्त्वगन्धवत्त्वरूपविशेषणभेदेऽपि घटत्वेन विशिष्टाभेदः । तद्वदिति विशिष्टाद्वैतशब्दार्थः प्रतिपाद्यत इति बोध्यम् ।

End :

मकारेण कर्तृत्वभोक्तृत्वोत्तम्भनेन प्रकारान्तरेण च स्वशेषत्वशङ्काया उदितत्वाच्छब्दतः सर्वप्रकारेण स्वशेषत्वनिरासः क्रियते नमश्शब्देन । अत उभयपदसार्थक्यमिति.

R. No. 3672.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī, Good.

Transcribed in 1921 22 from a MS. of M.R.Ry. K. V. Paramēśvara-Vādhyān Nambūdirippāḍ, Āccipuram, Kottakkal, Malabar district.

Fol. 34*b* is left blank.

काव्यप्रकाशटिप्पणी.
KĀVYAPRAKĀŚAṬIPPAṆĪ.

A brief commentary on the Kāvyaprakāśa, which work has been described under No. 12816 of the D.C.S. MSS., Vol. XXII. The name Kāvyaprakāśasaṁbandhavāda is given in the heading of the MS.

Incomplete.

Beginning :

प्रसीदतु तथा देवं यथा व्याकृतिषु स्फुटम् ।
साधुत्वतारतम्यस्य भवेद्बोद्धा बुधो जनः ॥

नियतिकृतनियमरहितामित्यादि । अत्र कोऽर्थः ? किं काव्यं जयतीति उत सरस्वती जयतीति ? । ननु भारती कवेर्जयतीत्यत्र कथमन्वयः कवेर्भारती जयतीति वा भारती जयतीति वा । अथार्थे विचारिते किमिदमन्वयान्वेषणं युक्तम् ? युक्तमर्थावधारणार्थत्वात् । एकत्र सन्देहे निश्चिते नान्येन तदपसरणं कर्तव्यं निश्चितं च तत् यत् झटिति प्रतिभासते झटिति प्रति-

भासमानं प्रसिद्धं तच्च व्यवहारपरम्परया परिचीयमानत्वात् प्रमाणाप्रमाणे न च निर्णयो युक्तः ।

End:

किं च वस्त्वलङ्कारव्यङ्ग्यगतं माधुर्यं वर्णा न व्यञ्जन्तीति खल्वभ्युपगतम्; तथा रसव्यङ्ग्यगतमपि माधुर्यं वर्णा न व्यञ्जन्तीत्यभ्युपगन्तव्यम् । वास्तवत्वात्तत्रोपपत्तिरुक्ता । पुनस्सप्तमे विसन्धिदोषस्य, तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः ।

* * * *

वृषस्सप्तमो धातुः स च शुक्लम्.

Foll. 23*a*—31*b* contain discussions on the propriety of certain expressions found in the Kāvyas. Foll. 32*a*—34 contain a small portion of Kāśikāvṛtti. Fol. 34*b* is left blank.

R. No. 3673.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 40. Lines, 20 in a page. Grantha and Malayalam. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Unikantha Menon, Tarakkal Vāriyam, Vallapula post, via Pattambi.

अध्यात्मरामायणटिप्पणी.

ADHYĀTMARĀMĀYAṆAṬIPPAṆĪ.

A short commentary on the difficult words in the Adhyātmarāmāyaṇa, which work has been described under No. 2154 of the D.C.S. MSS., Vol. IV, Part I.

This commentary is called Prabōdhinī. The commentator, whose name is not given, salutes Śāmbhavānandana, and his preceptor Vidyānanda and Rāmānanda, preceptor of the commentator.

Complete in seven Kāṇḍas.

Beginning:

यो विघ्नहत्यै मरुदादिभिस्सदा सम्पूज्यते कार्यसमूहकस्य ।
सुरासुरासेवितपादपङ्कजो नमामि(म्यहं) तं वरदं गजाननम् ॥
शाम्भवानन्दनं वन्दे सर्वविद्यानिधिं परम् ।
विद्यानन्दस्य तं शिष्यं वेदव्यासमिव स्थितम् ॥
वन्दे गुरुं महात्मानं रामानन्दमतः परम् ।

* * * *

अध्यात्मरामवृत्तस्य टीकेयं सर्वसम्मता ।
प्रबोधिनीति विख्यातां यां कुर्मस्ताण्डवेश्वराः ॥

शिवमुखान्निस्सृतेऽध्यात्मसंज्ञके रामायणे यानि पदानि कठिनतया वर्तन्ते, तेषां पदानामर्थो लिख्यते—

श्रीमहादेवः अध्यात्मसंज्ञकस्येष्टदैवं श्रीरामं स्तौति—यः वृत्ती(पृथ्वी)-त्यादिना श्लोकद्वयेन । चिन्मयः ज्ञानस्वरूपः । रविकुले सूर्यवंशे । अव्ययः न व्येतीत्यव्ययः ।

End :

अत्रिपुत्रस्य दुर्वाससः । अनन्तशक्तिमनन्ताश्शक्तयो यस्य सः । परेशं पराया मायाया ईशं नियन्तारं प्राक्तनं पूर्वं विद्यमानं पर्वसु पञ्चपर्वस्वित्यर्थः । कृष्णाष्टमीचतुर्दशीसङ्क्रान्तिर्दर्शपूर्णिमा(मे) ॥

Colophon :

उत्तरे नवमस्सर्गः ॥
उत्तरकाण्डस्समाप्तः ॥

Foll. 39*b* and 40*a* contain the Bagalāmukhīmantradhyānanyāsa. Fol. 40*b* is left blank.

R. No. 3674.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 38. Lines, 20 in a page. *Dēvanāgarī.* Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

कविकल्पद्रुमव्याख्या—काव्यकामधेनुः.

KAVIKALPADRUMAVYĀKHYĀ : KĀVYAKĀMADHĒNUḤ.

Similar to the commentary described under No. 1518 of the D.C.S. MSS., Vol. III. By Bōpadēva son of Kēśava and pupil of Vidvadghanēśa.

Complete.

Beginning :

येनापि यद्विकरणैराख्यातैर्धातुलोहितैः ।
प्रकाशैस्सम्प्रकाश्यन्ते क्रियास्तं नौमि गोपतिम् ॥

अ(क)विकल्पद्रुमं धातुपाठं विवरितुं मया ।
धातुवृत्तिः काव्यकामधेनुर्नाम विधीयते ॥
तत्र प्रयोगो धातूनामित्क्रमादिफलार्थका(क.): ।
शषिपौ ध्वनितां तुल्यप्रयोगानां सभेदकाः (?) ॥

तत्रादौ ग्रन्थकृदुचितेष्टदेवतामादित्यमुपास्ते—
शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ॥

तमिति तच्छब्दः प्रतिसमाधिसमयासमसम्मदसमर्पकत्वेनानुभूतस्य प्रतिपादनाद्यच्छब्दं नापेक्षते यथा—सेयं ममाङ्गेषु सुधारसच्छटा इत्यादौ । अथ पूर्वाचार्यान् जयवादेन धिनोति—इन्द्रश्चन्द्र इत्यादि । अत्र ग्रन्थे स्वरूपं निरूपयति—मतानि तेषामित्यादि । अदाद्याधक्रमादन्तादिमक्रमः—अत् आद्यो येषां धातूनां ते अदाद्यास्ते आद्या यस्मिन् स तथोक्तः ।

End:

इहेदानीं धातून्निर्धार्योपसंहरति—
इति स्फीतास्सप्तदशशत्या षट्कोनषष्टिधा ।
धातुस्कन्धैर्बुधैस्सेव्यः कविकल्पद्रुमः फलन् ॥

सप्तदशानां शतानां समाहारः सप्तदशशती षट्कोनषष्ट्या अधिका षड्नषष्ट्या थावस्कन्धा धातुस्कन्धास्तैः फलन् प्रतिस्कन्धं प्रयोगरूपाणि फलानि यथेष्टमर्पयन् ॥

अथ ग्रन्थकृदात्मानं ख्यापयति—
विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
तेन वेदपदस्थेन बोप्पदेवद्विजेन यः ॥
सम्पादयन्तीमङ्कादौ कार्तस्वरलसन्निभिम् ।
श्रयध्वं विबुधाः काव्यकामधेनुमतन्द्रिताः ॥
व्युत्पादयन्तु शब्दज्ञाः स्वैः स्वैः सूत्रैरुदाहृताः ।
सर्वव्याकरणार्हीयां नास्यां तान्यखिलं ह्ययम् ॥

Colophon:

इति श्रीपण्डितबोप्पदेवविरचिता काव्यकामधेनुर्नाम धातुवृत्तिस्समाप्ता ॥

R. No. 3675.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 116. Lines, 20 in a page. Grantha and Tamil. Good

Transcribed in 1921-22 from a MS. of M.R.Ry. Mēlavādhyār Tirumalai Ayyaṅgār, Alwartirunagari, Tinnevelly district.

Foll. 115*b* and 116 are left blank.

शिष्टभूषणम्.

ŚIṢṬABHŪṢAṆAM.

A treatise explaining away certain portions of the Viśvaguṇādarśa, ordinarily held to be unfavourable to the Teṅgalai sect of Śrī-Vaiṣṇavas: by Rāmānujācārya of Elayavilli family of Bhūtapurī (Sriperumbudur).

Contains the Paricchēdas one and two complete and the third incomplete.

Beginning:

बालधन्व्यभिजातेन श्रीभूतपुरवासिना ।
श्रीमद्रामानुजार्येण तन्यते शिष्टभूषणम् ॥
स्थालीपुलाकन्यायेन सतां सर्वार्थसिद्धये ।
क्वचिद्विश्वगुणादर्शे वाणीभावं विभावये ॥

* * * *

पञ्चमहायज्ञानां विद्याङ्गत्वमाश्रमाङ्गत्वं चेति आकारद्वयमस्ति । तत्रोपासकानां विद्याङ्गत्वाकारः, अमुमुक्षूणामाश्रमाङ्गत्वाकारः । अत्र विद्याङ्गत्वाकारः सर्वापेक्षा च यज्ञादिश्रुतेरितिसूत्रभाषितः, आश्रमाङ्गत्वाकारः विहितत्वाच्चाश्रमेतिसूत्रभाषितः ।

* * * *

Colophon:

बालधन्व्यभिजातेन श्रीभूतपुरवासिना ।
श्रीमद्रामानुजार्येण रचिते शिष्टभूषणे ॥
भक्तिप्रभावः प्रथमः परिच्छेदस्समापितः ।

End:

प्रपन्ननिषिद्धं पादहीनदीपशिखाकारादिपुण्ड्रधारणं ते कुर्वन्ति ॥

Colophon:

श्रीमद्रामानुजार्येण रचिते शिष्टभूषणे ।
परिच्छेदो द्वितीयोऽयं समाप्तः परिदृश्यताम् ॥

प्रपन्नानां तापादिपञ्चसंस्कारकर्त्राचार्येण तत्समय एव प्रपत्तिः कारयितव्या वचनाच्च, शिष्टाचाराच्च । तथा हि नारायणसंहितायाम्—

यथा हि पाणिग्रहणरक्षाबन्धादिपूर्वकम् ।
एकस्मिन्नेव युगपन्मुहूर्ते क्रियते रमे ॥
शरणागतिरप्येवं हेतितापादिपूर्वकम् ।
एकस्मिन्नेव काले वै कुर्याच्छिष्यस्य देशिकः ॥

*　　*　　*　　*

इह अत्र कुरुकायां चेतः चित्तं कृन्तति पाटयत्येव.

R. No. 3676.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 128. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

हरिवंशः, सटीकः.

HARIVAMŚAḤ WITH COMMENTARY.

A commentary on the Harivaṁśa, which work has been described under Nos. 1968--1973 of the D.C.S. MSS., Vol. IV, Part I. This commentary is called Mitākṣarā.

Contains the Adhyāyas 1—26 in the Puṣkaraprādurbhāva portion only.

Beginning:

नत्वा नारायणं देवं वेदव्यासं मुनिं गुरून् ।
कुर्वेऽहं पुष्करप्रादुर्भावटीकां मिताक्षराम् ॥

भविष्यन्निरूपणानन्तरं पुष्करप्रादुर्भावकथां निरूपयितुकामस्तद्बीजभूतं जनमेजयप्रश्नमवतारयति—

प्रभावं पद्मनाभस्य स्वपतस्सागराम्भसि ।
पुष्करे वै यथोद्भूता देवारसर्षिगणाः पुरा ॥
एतदाख्याहि निखिलं योगं योगविदां पते ।

इति हि सार्धेन पुष्करे भगवन्नाभीकमले पुरा यथा देवास्सर्षिगणा उद्भूता एतद्रूपं निखिलं पद्मनाभस्य योगमाख्याहीत्यन्वयः । ईदृशस्य पद्म-

नाभस्य सागराम्भसि स्वपतः कीदृशं योगं प्रभावं प्रभवत्यस्मादिति प्रभावः तं प्रभावं सृष्टिकारकमित्यर्थः ।

* * * *

Colophon:

इति पुष्करप्रादुर्भावटीकायां मिताक्षरायां प्रथमोऽध्यायः ॥

End:

श्रावयेद्यस्तु विप्रेभ्यः शुचिः प्रयतमानसः । इति ।
अधीत्य सर्वमध्यात्मं देवलोके महीयते ॥ इति ।

Colophon:

इति श्रीहरिवंशे पुष्करप्रादुर्भावे षड्विंशोऽध्यायः ॥

इमां पुष्करप्रादुर्भावरूपां यः श्रावयेत् । किं कृत्वा सर्वमिदमध्यात्मरूपमाख्यानमधीत्य स्मृत्वा । इकू स्मरणे इतिधातुः । अध्यात्मरूपां कथां स्मृत्वा यश्श्रावयेत्, स देवलोके महीयत इति सम्बन्धः । सार्धश्लोकः ॥

पुष्करव्याख्यया देवः पूजितः पुष्करेक्षणः ।
पद्मिनीपत्रवत्कुर्यादलेपं मां जले स्थितम् ॥

Colophon:

इति श्रीपुष्करटीकायां मिताक्षराख्यायां व्याख्यायां षड्विंशोऽध्यायः ॥

The scribe adds—

गम्भीरं पुष्कराख्यानं टीकासम्मिलितं लघु ।
गोविन्दो लब्धधीः काले श्रीगुरुप्रीतयेऽलिखत् ॥

R. No. 3677.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Raja's Library, Khallikote, Ganjam district.

भक्तिवैजयन्तीस्तोत्रम्.

BHAKTIVAIJAYANTĪSTŌTRAM.

A eulogy in 120 stanzas addressed to Lord Śrī-Kṛṣṇa by way of worshipping Him: by Jīvadēvācārya, son of Trilōcanācārya.

Complete.

Beginning:

श्रीकृष्णाय नमः समस्तहृदयाम्भोजावदातत्विषे
भक्तौघस्मयमानमानसवते दैत्यावलीविद्विषे ।

गोपीपल्लविकाय नायकगुणग्रामप्रणालीजुषे
लीलावैभविकाय कायसुषुमानीलाम्बुजश्रीजुषे ॥

End:

हे सौमत्य जितं त्वया भगवता पाण्डित्यकृत्यं कृतं
वादित्वप्रतिपादितं तदशुभं तत्त्वे कवित्वस्थितम् ।
मार्गान् दुर्गमकण्ठकातिविकटान् भूयः कृताधोगतीन्
यन्मुक्त्वा हरिराश्रितः सुमनसां स्वर्गापवर्गप्रदः ॥
श्रीजीवः कविडिण्डिमो नृपगुरुष्षड्दर्शनीपण्डितो
भक्तिप्रस्थितदेशिकोऽखिलकलालङ्काररत्नाकरः ।
विंशत्यूर्ध्वशतीमितैर्व्यरचयत्पद्यैः क्रमाद्गुम्भितैः
श्रीकृष्णस्य समर्चनाविधिकृते श्रीवैजयन्तीं शुभाम् ॥
श्रीनीलाचलवासिनो भगवतो मोक्षैकचिन्तामणेः
लीलाविग्रहशालिनः श्रुतिशिरोराजिष्णुचूडामणेः ।
श्रीमज्जीवककवीश्वरेण चरणाम्भोजातयोरर्पिता
सम्मृष्टा गुणशालिनी विजयतां श्रीवैजयन्ती चिरम् ॥

Colophon:

इति श्रीमत्कविराजराजगुरुत्रिलोचनाचार्यतनयश्रीमद्भक्तिप्रस्थानप्रणय-नाभिनवबादरायणश्रीनारायणचरणपारायणकविडिण्डिमवाहिनीपतिगजराजराज-श्रीजीवदेवाचार्यविरचिता भक्तिवैजयन्ती सम्पूर्णा ॥

R. No. **3678**.

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 152. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. A. Lakṣmaṇa Śāstrigaḷ, Kalpathi, Palghat.

Fol. 152*b* is left blank.

तर्कसङ्ग्रहव्याख्या.

TARKASAṄGRAHAVYĀKHYĀ.

Similar to the work described under R. No. 2379 ante.

Contains the Pratyakṣa, Anumāna and Upamāna only.

Beginning :

अन्नम्भट्टाख्यः कश्चिद्विद्वान् तर्कसङ्ग्रहाख्यग्रन्थं चिकीर्षुः चिकीर्षितग्रन्थपरिसमाप्तिप्रतिबन्धकदुरितनिवारणाय मङ्गलं कृत्वा मङ्गलप्रतिपादकश्लोकमाह—निधायेत्यादिना । तर्कसङ्ग्रहः मया क्रियते । तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः द्रव्यादिपदार्थाः तेषां सङ्ग्रहः शब्दसङ्क्षेपेण स्वरूपकथनं धान्येन धनवानित्यादौ यथा वा तृतीयाया अभेदार्थकता तद्वत्सङ्क्षेपेणेत्यत्रापि तृतीयाया अभेदोऽर्थः । तेषामित्यत्र षष्ठ्या विशेष्यत्वं स्वरूपस्य कथनं स्वरूपस्येत्यत्र षष्ठ्याः प्रकारत्वमर्थः । एवञ्च शब्दसङ्क्षेपाभिन्नपदार्थविशेष्यकस्वनिष्ठधर्मप्रकारकज्ञानजनक इत्यर्थः ।

End :

एवञ्च गोसादृश्यज्ञानात्मकातिदेशवाक्यार्थस्मरणं करणं, गोभिन्नवस्तुविशेष्यकसास्नादिमत्त्वरूपगोसादृश्यप्रकारकप्रत्यक्षं व्यापारः, गवयो गवयपदवाच्य इत्याकारक उपमित्यात्मकज्ञानं फलमिति बोध्यम् ॥ उपमानं व्याख्यातं निरूपितम् ॥

Colophon :

इत्युपमानपरिच्छेदः समाप्तः ॥

R. No. **3679.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of His Holiness Nārāyaṇabhāratī Kappiyar Svāmigal, Muppil Sthānam, Naḍuvil Maṭham, Trichur, Cochin State.

श्रुतिसारसमुद्धरणम्, सम्बन्धोक्तिसाहितम्.

ŚRUTISĀRASAMUDDHARAṆAM WITH SAMBANDHŌKTI.

Similar to the work described under R. No. 2518 ante.

Incomplete.

Beginning :

विलसच्चितिबलतस्स्फुरद(खिलः) स्वकतमसा
परिनिर्मितविपुलद्वयविहितस्वकमहिमा ।
व्यवहारिकवपुषा विधिवचनादिकविषयो
मम मानसनिलयो हरिरवताज्जगदखिलम् ॥

प्रणम्य वासुदेवाख्यं परं ज्योतिरनुत्तमम् ।
सम्बन्धोक्तिं करिष्यामि तोटकश्लोकगामिनीम् ॥

तत्र त्रैलोक्यनाथहरिमित्याद्यश्लोकेनेष्टदेवतानमस्कारव्याजेन प्रारिप्सितप्रकरणस्य विषयसम्बन्धप्रयोजनानि सूचयति । ननु प्रकरणं नाम शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितमिति तल्लक्षणैरुच्यते ।

* * * *

तस्मादेकान्ततः प्रसिद्ध्यभावात् ब्रह्मणो विषयत्वोपपत्तिः, अप्रसिद्ध्यभावाच्च सम्बन्धोपपत्तिः, विषयसम्बन्धोपपत्तौ च प्रयोजनोपपत्तिरिति । तदेतदाह—

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं
शक्तेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं
वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥

End :

इदानीमवयवग्रन्थस्य व्याख्यानमारभ्यते—बहुनाभिहितेनेत्यादिना श्लोकद्वयेन । त्वंपदार्थं परिशोधयति—

बहुनाभिहितेन किमु क्रियते शृणु सङ्ग्रहमत्र वदामि तव ।
त्वयि जागरितप्रभृतित्रितयं परिकल्पितमित्यसदेव सदा ॥
परिकल्पितमित्यसदित्युदितं यत(मन) इत्यपि(भि)शब्दितमागमतः ।
उपपत्तिभिरेव च सिद्धमतो (भवतोऽ)न्यदशेषमभूतमिति ॥

यद्बाह्यमित्यनेन तत्पदार्थं शोधयति.

R. No. **3680.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. S. Ayyā Śāstrigal, Chennamangalam, Parur Post, via Shoranur.

साङ्ख्यतत्त्वकौमुदीविवरणम्.

SĀṄKHYATATTVAKAUMUDĪVIVARAṆAM.

A commentary on Vācaspatimiśra's Sāṅkhyatattvakaumudī, which work has been described under R. No. 2050(*a*) ante; by Śrībōdhabhāratī, disciple of Bōdhāraṇyaśrīpāda.

Complete.

Beginning:

यत्प्रसादादजं नित्यमात्मानमशरीरिणम् ।
विजज्ञौ तान् गुरून् भक्त्या नमामि करुणाकरान् ॥

श्रीमत्साङ्ख्यसप्ततिं व्याचिख्यासुर्भगवान् वाचस्पतिः प्रारिप्सितस्य ग्रन्थस्याप्रतिबन्धेन परिसमाप्तिप्रत्यर्थिनो व्युदासार्थं शिष्टाचारपरिपालनाय च प्रधानस्य पुंभोगापवर्गार्थप्रवृत्तिलक्षणशास्त्रतात्पर्यकथनपूर्वकं प्रधानं पुरुषांश्च नमस्यति—अजामेकामित्यादिश्लोकेन । न जायत इत्यजा, मूलप्रकृतिः तां नमाम इत्युत्तरेणान्वयः । ननु तस्यास्सद्भावे प्रमाणाभावान्निर्विषयत्वं नमस्कारस्येति चेत्तत्राह—बह्वीः प्रजाः सृजमानामिति ।

End:

समुदायाच्चेत्यत्र च गुणानां शेषवृत्तिरङ्गाङ्गित्ववृत्तिः । अकर्तृभावश्चेत्यत्राकर्तृत्वं पुरुषस्य चूलिकार्था इत्येतद्विपर्ययाशक्तितुष्टिसिद्धाख्य इत्यारभ्य विपर्ययादयः पदार्था इति षष्टिः पदार्थाः कथिता इहेत्यर्थः ।

क्व श्रीवाचस्पतेस्सूक्तिः क्वच मन्दस्य मे मतिः ।
कायिक(कावद्य)मेतच्च यत्तच्छोध्यं सुबुद्धिभिः ॥

Colophon:

इति श्रीबोधारण्यश्रीपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीबोधभारतीश्रीपादकृता साङ्ख्यतत्त्वकौमुदीविवरणं(णी) समाप्ता ॥

R. No. **3681.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 126. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. R. Sāmbaśiva Śāstrigaḷ, Lalitāmbikāmaṭham, Siddhamalli, Tinnevelly district.

(*a*) तन्त्रशिखामणिः.

TANTRAŚIKHĀMAṆIḤ.

Foll. 1*a*–124*b*.

Same work as that described under Nos. 4417 and 4418 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita

Contains the Adhyāyas 11 and 12 complete.

The scribe adds—

चन्द्रचूडपदपद्मयुग्मसद्मासनासरसमानसोऽप्यसौ ।
व्यालिखत्किल सलीलमेवमित्यत्र सन्तु समुदा बुधोत्तमाः ॥

सर्पालङ्कृतकन्दर्पदर्पाहङ्कृतिशासितुः ।
दक्पातिस(त)दया(यो ऽ)यन्तु सोऽप्पाशास्त्रीदमालिखत् ॥

Fol. 125*a* contains eulogistic stanzas addressed to Śālivāṭīśvara and the name of the owner of the original MS.

(*b*) शिवदण्डकम्.

ŚIVADAṆḌAKAM.

Foll. 125*a*—126*b*.

A eulogy addressed to God Śiva, in the Daṇḍaka metre.

Complete.

Beginning:

गीर्वाणौघकिरीटकोटिविलसच्चञ्चन्मणीधोरणी-
निर्यत्सूर्यकराधिकद्युतिभवन्नीरञ्ज(राज)नाराधने ।
लज्जाम्भःपतिताम्बुजे शिखरिजे पादाम्बुजे ते भजे
मातः कान्तिमती(र्ति)प्रपन्नमिह मां वीक्षस्व दाक्षिण्यतः ॥

जय जय नट सेन्द्रधीरातिगम्भीरदीक्षघ ? साक्षात्तपःपुञ्जरूपात्र लक्ष्मीकटाक्षेषु सद्यो विपक्षान् प्रतिक्षेप्तुमुत्क्षेप्तुमुच्चैस्तराक्षुद्रदाक्ष्यस्य साक्षाद्विवर्तेषु साधु ।

End:

विशिष्य प्रहृष्यन् तथासद्विधानेकविद्वत्समूहस्तुतिस्तोमसंस्तूयमानः त्वमेवात्र लोकोत्तरश्रीविलासस्सलीलं नृपालावतंसो जगत्यां विजेजी(गी)यसे ॥

R. No. 3682.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. T. Paramēśvara-Vādhyān Naṁbūdiri, Accipura, Kottakkal post, Malabar district.

Foll. 83*b*—84 are left blank.

ऐतरेयब्राह्मणव्याख्या—षाड्गुरवी—सुखप्रदा.

AITARĒYABRĀHMAṆAVYĀKHYĀ: ṢĀḌGURAVĪ-SUKHA-PRADĀ.

A commentary on the Aitarēyabrāhmaṇa: by Ṣaḍguru, who wrote it in the year 4354 Kaliyuga corresponding approximately to 1252–1253 A.D. The commentary is called Sukhapradā and purports to bring out the meaning which is not given in the prior commentaries. By Govindasvāmin and Kṛṣṇa.

Contains the Adhyāyas one to ten only, but wants the beginning.

Beginning :

. . . . महाव्रतं चोपनिषद्द्वयं च ॥
माहाव्रतं सूत्रमासां तृतीयां चत्वारिंशं ब्राह्मणं वै चतुर्थी ।
सूत्रं पञ्चम्यत्र षष्ठी तु गृह्यं शाकल्यं स्यात्संहिता सप्तमीति ॥
इत्येतद्ध सप्तविद्यामृताख्यं दत्तं स्वय गुरुभिष्षड्भिरेतैः ।

* * * *

प्रणीतभारतामृतः पराशरात्मजो मुनिः ।
वरप्रदस्स्मिताननः शिवाभि(दि)योगिनामकः ॥
इमे हि षट् प्रपान्तु मां सदा नमामि तानहम् ।
इमे हि मामयूयुजन् यथाश्रुतं वदेदिति ॥
तदैतरेयकं महत्प्रवर्त्यते यथामति ।
यथाश्रुतं यथास्मृतं महात्मनां प्रसादतः ॥
महिदासैतरेयर्षिसन्दृष्टं ब्राह्मणं तु यत् ।
अग्निर्वा इति हारभ्य स्तृणुते स्तृणुतेऽन्तिकम् ॥
चत्वारिंशाख्यमध्यायाः चत्वारिंशदिहेति धण् ? ।
प्रतायते तस्य वृत्तिः नाम्ना चैषा सुखप्रदा ॥
गोविन्दस्वामिकृष्णादिभाष्याद्दष्टार्थभाषिणी ।
नास्या वृत्तेरर्थवत्त्वमनुक्तार्थोपवर्णनात् ॥

* * * *

अत्रैतरेयर्षिमहेतिहासं पुराणवेदोदितमाहुरार्याः ।
आसीद्विप्रो याज्ञवल्क्यो द्विभार्यः तस्य द्वितीयामितरेति चाहुः ॥
स ज्येष्ठयाकृष्टचित्तः प्रियां तामुक्त्वा द्वितीयामितरेति होचे ।

* * * *

कथा चैषा महिदासैतरेयी श्रुता प्रोक्ता संस्मृता पूजिता च ।
श्रद्धान्वितैरास्तिकैः सर्वसिद्ध्यै प्रकल्पेतेत्येवमाहुर्महान्तः ॥

प्रथमं तावद्दीक्षणीयां ज्योतिष्टोमाङ्गभूतामिष्टिं विधातुं तद्देवते अग्नाविष्णू स्तौति—अग्निर्वै देवानामवमः । प्रथममुखमित्यर्थः । यदिन्द्राग्नी अवमस्यां पृथिव्यामिति यथा वक्ष्यति च अग्निर्वै देवानां मुखं सहृदयतम इति मन्त्रश्च भवति ।

End:

विद्युतमेव तत्कल्पयति तत्त्र विद्युतमय्येति स एवं विद्वानेतन्मयो देवतामयो भवति भवति ॥

एवं ज्ञानोपसम्पन्नो यष्टा होता च . . . ।
. . . . वसन्तादिविद्युदन्तमयो भवन् ॥
एतान्प्राप्नोति वै देवान् देवतान्वायिसौख्यवान् ।
मयडर्थः सुखप्राप्तिः द्विरुक्त्यर्थस्समापनम् ॥

Colophon:

इत्यैतरेयब्राह्मणव्याख्याने षाड्गुरवाये दशमोऽध्यायः समाप्तः ॥

(अध्याये)प्रथमे खण्डसङ्ख्या स्यादेकसप्ततिः ।
आध्यायिकाः षट् पञ्च षट् नव चत्वार एव च ॥
दशाष्टौ च षडष्टौ च नवेत्येवं समीरिताः ।
गुरुगाधा(था)च मुख्येति कलिशुद्धदिने सति । (१९६७३२३).
वृत्तिष्षाड्गुरवी जाता ब्राह्मणस्य सुखप्रदा ॥

* * * *

एषा षाड्गुरवी व्याख्या विख्यातोदारकीर्त्तिना ।
रविणा लिखिता मित्रवाह्वम्याद्दशमेऽग्रिमे ॥

Colophon:

इत्यैतरेयब्राह्मणव्याख्या दशमाध्यायान्ता समाप्ता ॥

R. No. 3683.

Paper. 10⅝ × 9⅜ inches. Foll 86 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Ernakulam, Cochin State.

Foll. 85*b*—86 are left blank.

युधिष्ठिरविजयव्याख्या—विजयदर्शिका.

YUDHIṢṬHIRAVIJAYAVYĀKHYĀ : VIJAYADARŚIKĀ.

Same work as that described under R. No. 3007 ante, wherein see for the end. By Acyuta.

Breaks off in the sixth Āśvāsa (ending with the words तापतत्परा सन्तापं कुर्वतीत्यर्थः । संस्वा).

Beginning:

देयादीशानसूनुर्नो मङ्गलानि गणाधिपः ।
यस्य प्रसादवार्युक्ताः फलस्यारम्भ . . . ॥
. . . . तां परमेश्वरीम् ॥
वासुदेवकविना कृतस्तु यः काव्यबन्ध इयमस्य सत्क्रिया ।
कामिनीव रसभावदर्शिका व्याक्रियाच्युतकृता विराजते ॥
युधिष्ठिरस्य विजयं दर्शयेदिति दर्शिका ।
असा . . . . . . काव्यलक्षणमीक्षके ॥
वासुदेवकवेः काव्यं कथा पार्थस्य कथ्यते ।
व्याख्यातारो वयं किं तत् सतां . मनो हरेत् ॥

* * * *

प्रशमितेत्यादिना प्रातिलोम्येन वानुलोम्येन वा सर्वथा परमेश्वरानुस्मरणवतां देहिनां मदमायाप्रशमादिलक्षणः सुखकरः परिपाको जायत इति वस्तु ध्वन्यते । प्रदिशत्वित्यादावाशीर्नामालङ्कारः । आशीर्नामाभिलषितवस्तुन्याशंसनं यथा पातु वः ।

* * * *

Colophon:

इत्यच्युतविरचितायां दर्शिकायां प्रथमाश्वासः ॥

R. No. **3684.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācārya, Kīḻnattam village, Tinnevelly district.

Foll. 31 and 32 are left blank.

वादकल्पकः.

VĀDAKALPAKAḤ.

A discussion bearing upon the purpose of the expression Viśiṣṭadvayāghaṭitatattva in the second Lakṣaṇa of the Sāmānyanirukti: by Śrīkṛṣṇa Tātācārya.

Complete.

Beginning:

रघुवीरपदद्वन्द्वचिन्तासन्तुष्टचेतसा ।
श्रीकृष्णतातसुधिया क्रियते वादकल्पकः ॥

चानुविदधानः शास्त्रस्याविघ्नेन परिसमाप्तिप्रचयार्थं स्वशिष्यशिवाप्त्यर्थं चेष्टदेवतानमस्कारं करोति—रागादीत्यादिना । तस्मै अपूर्ववैद्याय नमः इत्यन्वयः । तस्मै इति पदेन "सर्वनाम प्रसिद्धार्थम्" इति वचनात् प्रमाणतः प्रसिद्धस्यैवापूर्ववैद्यस्य नमस्कार्यता । तस्मात् प्रमाणसिद्धार्थेन परेण भवितव्यम् ।

* * * *

सूत्रस्थानशरीरनिदानचिकित्सितकल्पोत्तरैः षड्भिः स्थानैरनेन प्रकारेणाध्यायानां विंशत्यधिकं शतं प्रोक्तम् ॥

Colophon:

इति प्रथमोऽध्यायः समाप्तः ॥

Colophon:

इति पञ्चमोऽध्यायस्समाप्तः ॥

द्रवद्रव्यं च तोयादि नित्यसेव्यं निरूपितम् ।
इदानीं द्रवसंस्कार्यमन्नं निर्णी(र्णे)तुमीहते ॥
शूकधान्यादिभेदेन सप्तभेदेन सम्प्रति ।
शूकशिम्बिजभेदेन द्विधा धान्यमपि स्मृतम् ॥
बहूपयोगतस्तत्र पूर्वं शूकं तु कथ्यते ।

End:

नीलकण्ठं नमस्कृत्य पार्वतीपतिमादरात् ।
अष्टाङ्गहृदयव्याख्यां करोमि ललिताभिधाम् ॥
व्याख्यानं पाठ्यसंज्ञं तु कैरल्या भाषयान्वितम् ।
दृश्यते वस्तिपर्यन्तं बालानां सुखबोधकम् ॥
अदर्शनात् परमतो विचार्य सुचिरं धिया ।
मान्तर्धाद्वाहृदस्योक्तिरिति मत्वेदमुच्यते ॥
सुन्दर्यादिष्ववैशद्यादर्थानामल्पचेतसाम् ।
विस्तरादर्थगाम्भीर्याद्व्याख्यां कर्तुं यतामहे ॥
हृद्येन्दुपाठ्यव्याख्यानमतभेदप्रदर्शिनीम् ।
समालम्ब्य गभीरार्थां व्याख्यां हृदयबोधिकाम् ॥

नस्यादिवस्तिपर्यन्तं सूत्रस्थानं यथामति ।
व्याख्यास्ये नीलकण्ठस्य प्रसादात्पाठ्यमार्गतः ॥
शब्दशुद्धिविहीनोऽस्य शब्दस्यार्थप्रकाशिकाम् ।
व्याख्यां करोमि शिष्यस्य बोधे यावत्सुखं भवेत् ॥

* * * *

Colophon:

इति कण्टकिफलान्दोलिकालयविख्यातश्रीनारायणशर्मसूनुना वयस्कर-विशिष्टागारनामान्तरशोभिना अवलावनालयविश्रुतश्रीनीलकण्ठशर्मणोऽन्ते-वासिना शङ्करशर्मणा विरचितायां ललिताख्यायामष्टाङ्गहृदयव्याख्यायां विंशोऽध्यायः समाप्तः ॥

* * * *

मूर्धतैलं कर्तृ कचानां शतनादिभिस्सम्बन्धः । तेन कचशननं कच-सितत्वं कचपिञ्जरत्वमिति । कचशतनं केशच्युतिः, कचसितत्वं पलितभावः, कचपिञ्जरत्वं ताम्रकेशत्वं, परिपुटनं खण्डनं, कचानामेव शिरसो मूर्धसमीर-रोगान् वातरोगान् शिरस्युद्भूतान् वातविकारानित्यर्थः । एतान् जयति इन्द्रियाणां चक्षुरादीनां प्रसादं प्रसन्नतां स्वरस्य हन्वोः मूर्ध्नश्च बलं दार्ढ्यं जनयति ॥

Colophon:

इति कण्टकिफलान्दोलिकालयविश्रुतश्रीनारायणशर्मसूनुना वयस्करागार-नामान्तरशोभिना जोङ्कैकदेशव्याघ्रपत्तनविख्यातश्रीनीलकण्ठशर्मणोऽन्ते-वासिना शङ्करशर्मणा विरचितायां ललिताख्यायामष्टाङ्गहृदयव्याख्यायां द्वाविंशोऽध्यायः समाप्तः ॥

R. No. **3686.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. A. Karuṇākara Menon Avargal, B.A., B.L., High Court Vakil, Calicut.

Foll. 33*b* and 34 are left blank.

काव्यप्रकाशव्याख्या.

KĀVYAPRAKĀŚAVYĀKHYĀ.

Same work as that described under R. No. 3672 ante.
Contains the Ullāsas one three and four incomplete.

R. No. **3687**.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 55. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Tarakkal Uṇikaṇṭha Menon, Karakkal-vāriyam, Vallapulla post.

Fol. 55 is left blank.

चम्पुरामायणव्याख्यानम्.
CAMPURĀMĀYAṆAVYĀKHYĀNAM.

A commentary on the Campurāmāyaṇa, which work has been described under No. 12746 of the D.C.S. MSS., Vol. XXI. The commentator, whose name is given as Karuṇākara, says that he wrote this work at the instance of king Vikrama of Calicut and mentions Acyuta and Kṛṣṇa (the preceptors of the commentator), Bhōjarāja, Kālidāsa, and the ancient works Rāmāyaṇa and Sarasvatīkaṇṭhābharaṇa.

Contains the Bālakāṇḍa only.

Date of transcription—Sunday, the 4th day of the solar month Siṁha in the Kollam year 1339.

Name of the scribe—Uṇṇikuñjan of Cerumukkil-vāriyam.

Beginning:

कपोलतटनिस्सरत्सुरभिदानवारापगा-
तरङ्गततिमज्जनैर्विरजसो द्विरेफाङ्गनाः ।
स्तुवन्ति यमिहादरादुचितझाङ्कृयाभाषया
निहन्तु शिवनन्दनो निखिलमन्तरायं स नः ॥

* * * *

यद्वैदुषीकलितसङ्गमशास्त्रसारसम्भूतसूक्तिवरभागवतान्तरात्मा ।
विद्वज्जनोऽनवरतोज्वलमत्र मोदं धत्तेऽच्युतोऽयमिह मे गुरुराविरस्तु ॥
हरिहरगिरिनाथपादकल्पद्रुमतलसेवनगन्धचित्तवृत्तिः ।
मम हृदयसरोजसम्पुटस्थः स्फुटयतु सद्गुरुरीप्सितानि कृष्णः ॥
श्रीकुक्कुटक्रोडपुरीमहेन्द्रः श्रीकेरलोर्वीतलपूर्णचन्द्रः ।
भूलोकपालस्सुगुणैरुपेन्द्रः श्रीविक्रमो दीव्यति कीर्तिसान्द्रः ॥

* * * *

सोऽयं राजशिखामणिर्निजयशस्सङ्कीर्तनप्रौढता-
जिज्ञासाकुलमानसः शुभदिने स्वामात्यवर्गैस्सह ।
श्रीमद्वैष्णवलोकमण्डनमणिं सम्मानयन् वाञ्छितै-
स्सम्पूर्णैः करुणाकरं निजगुरुं किंचिद्वचोऽवोचत ॥
श्रीकालिदासकविशेखरवाक्सुधाद्रिसद्भोजराजकृतचम्पुरसायनस्य ।
आवासभूमिमधुना रसनां मदीयामुत्तेजयाखिलरसास्वदनानुभूत्यै ॥
इत्थं नरेन्द्रवचनामृतपानतृप्तचित्तो भवन्नहमिहादरणीयशीलः ।
श्रीभोजराजकृतचम्पुमहाप्रबन्धभावप्रबोधनकृते सुचिरं यतेत(य) ॥

* * * *

शृङ्गारादिरसास्वादपरमानन्दभाजनम् ।
धियाद्रियेऽहं रसनां भोजचम्पूप्रकाशिकाम् ॥

इह खलु राजाधिराजपरमेश्वरः श्रीभोजः कविवीरशेखरेण श्रीकालिदासेन सह चरमकालावश्यचिन्तनीयं परमपुरुषार्थप्रधानमेकविंशतिवारावर्तनसमुपस्थितैकविंशतिरूपाभिप्रायसुभगं श्रीमद्रामायणं लोकोपकारार्थं सङ्क्षिप्य सकलव्याकरणसमुद्धृतसारांशसुन्दरस्वनिर्मितसरस्वतीकण्ठाभरणनिर्णीतसाधुशब्दोदाहरणतया गद्यपद्यात्मकचम्पूरूपेण कमपि प्रबन्धं चिकीर्षुस्तस्य प्रबन्धस्य विषयप्रयोजनादिकं सूचयन् काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यपरतां मन्वानश्च सन् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्—इत्यालङ्कारिकवचनप्रामाण्यानुसारेण ग्रन्थादावाशीराद्यन्यतमयोगस्यावश्यकत्वेनाशीरादिषु आशिष एव प्राधान्यात्स्वाभिमतार्थसाधनधुरीणस्य श्रीमहागणपतेः पादारविन्दविषयामाशिषं सकलवृत्ततिलकायमानवसन्ततिलकेन प्रवृत्तेन प्रयुङ्क्ते—लक्ष्मीमिति । हैरम्बं हे महेश्वरसमीपे रम्बते तिष्ठतीति हेरम्बो गणपतिः हेरम्बस्येदं हैरम्बं तस्येदमित्यण् । अङ्घ्रिद्वयं पदयुगं वो युष्माकं लक्ष्मीं पुरुषार्थसम्पत्तिं नितरामतिशयेन तनोतु विस्तारयतु—इति क्रियाकारकसम्बन्धः ।

End:

अथवा त्रयीदृष्ट्या त्रय्यां पुरत्रये दृष्टिर्दर्शनं यस्यास्तया विद्यया बालया त्रिपुरसुन्दर्या इत्यर्थः । दर्भपत्राग्रधीः सुधीर्दक्षिणामूर्तिरिवेति दिक् ।

अत्र श्रीरामस्य पृथक्कृत्य वर्णनाद्वक्ष्यमाणकाण्डप्रतिपाद्यमानयौवराज्याभिषेकः प्राप्तावसर इति प्रतीयते ।

Colophon:

इति चम्पुरामायणव्याख्याने बालकाण्डः समाप्तः ॥

हरिहरगिरिलीनान्(नाथात्) पार्वतीप्राणनाथा-
सत(विर)तभजनतुष्टान्(त्) प्राप्तविद्योदयो यः ।
अकृत सुकृतशाली चम्पुरामायणेऽस्मिन्
विवृतिमतिमनोज्ञां वैष्णवः कृष्णशिष्यः ॥
अपरिचयादज्ञा(ना)च्चपलधिया यद्यदत्र दुर्लिखितम् ।
तत्तत्करुणाम्बुनिधे मातः क्षन्तव्यमखिलवागधिपे ॥

The scribe adds—

सहस्राधिकविंशत्यामेकोने वत्सरे रवौ ।
श्रावणे मासि सम्प्राप्ते लिपिः पूर्णेनवासरे ॥

R. No. **3688.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Foll. 57*b* and 58 are left blank.

रघुवीरविलासः.
RAGHUVĪRAVILĀSAḤ.

A poem narrating the story of Rāma. The story begins from the reign of Daśaratha and breaks off with the coronation of Rāma after the vanquishment of Rāvaṇa in the 12th Sarga. By Lakṣmaṇakavi, son of Dāmōdaradīkṣita of Bhāradvājagōtra.

Beginning:

मौलिस्खगुत्थैर्मरुतां मरन्दैः पादेऽन्तरङ्गे करुणारसेन ।
गङ्गातरङ्गैरपि मूर्ध्नि शीतं पायान्महो नो वनिताधभागम् ॥
नमोऽस्तु तस्मै प्रथमं कवीनामाद्याय योऽजायत मर्त्यलोके ।
विधातु(तृ)र्लोकादवतीर्य वाण्या विहर्तुमिच्छोः प्रथमावलम्बः ॥
जीयात्कवीन्द्रेषु स कालिदासो धिन्वन्ति चेतांसि सतां यदीयाः ।
कालीमुखाम्भोजवितीर्णदिव्यवीटीरसामोदभृतः प्रबन्धाः ॥

पूरस्त्ययोध्येति भुवि प्रसिद्धा राज्ञां प्रतिष्ठा रविवंशजानाम् ।
यस्या ध्वजक्षौमततिर्द्युसिन्धोः पुपोष तीरे सितपक्षलक्ष्मीम् ॥

* * * *

तामावसत्पङ्क्तिरथो नरेन्द्रो गोप्ता भुवस्सागरमेखलायाः ।
आह्लादनाद्यं विबुधाः प्रजानां सुधांशुमुन्मुक्तकलङ्कमाहुः ॥

* * * *

Colophon :

इति भारद्वाजकुलजलधिचन्द्रेण सकलविद्याकूलङ्कषप्रज्ञश्रीदामोदरदीक्षितवरनन्दनेन लक्ष्मणकविना कृते रघुवीरविलासे प्रथमस्सर्गः ॥

End :

कुन्दस्मेरं व्योमयानं प्रभावैस्स्कन्दप्रख्यस्सर्वमारोप्य सैन्यम् ।
वन्दिस्तोमस्तूयमानापदानो नन्दिग्रामं रामभद्रः प्रपेदे ॥

Colophon :

इति रघुवीरविलासे एकादशस्सर्गः ॥

पितुर्नियोगं परिपाल्य सम्यक् प्राप्याश्रमं भ्रातुरमोघसत्त्वः ।
तेनाधिकप्रार्थनयाध्य(र्थ्य)मानं(णं) साम्राज्यमङ्गीकु(रु)ते स्म रामः ॥

* * * *

इत्थं निहत्यायमरण्यवासव्याजेन रक्षोगणमाप्तराज्यः ।
क्षोणीं ररक्षावरजैस्त्रिसङ्ख्यैर्दिवं दिगीशैरिव देवराजः ॥
कृत्वासपत्नां वसुधां समन्तात्संवर्धयामास गुणामृतौघैः ।
सिञ्चन्मुहुर्धर्मतरून् सवीरस्त्रिवर्ग . . . . ॥

R. No. **3689.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Foll. 29*b* and 30 are left blank.

महाविद्यादशश्लोकी, वादिवल्लभाव्याख्यासहिता.

MAHĀVIDYĀDAŚAŚLŌKĪ WITH THE COMMENTARY VĀDIVALLABHĀ.

Same work as that described under R. No. 3211(*g*) ante. By Nityaprajña alias Puruṣōttama.

Complete.

R. No. **3690.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Kunnūr-mana, Ottapalam, Malabar district.

Foll. 53*b* and 54 are left blank.

छान्दोग्योपनिषद्भाष्यटिप्पणम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAṬIPPAṆAM.

A commentary on Śaṅkarācārya's Chāndōgyōpaniṣadbhāṣya, which work has been described under No. 464 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Beginning:

सद्रूपं ब्रह्म निर्धेतं(हेतु) श्वेतकेतुं यदन्वयात् ? ।
तदहं सत्स्वभावत्वाज्ज्ञाता शुद्धोऽभयः प्रभुः ॥

छन्दोगानामुपनिषद्वेदं व्याचिख्यासुर्भगवान्भाष्यकारो व्याचिख्यासितग्रन्थस्वरूपं व्याख्यारम्भेऽवान्तरप्रयोजनं च दर्शयति—ओमित्येतादिति । शारीरके यद्यपि विवृता छान्दोग्योपनिषद्विस्तरेण भूयस्सु प्रदेशेषु, तथापि न पाठक्रमेणेति ततो विशेषमाह—ऋजुविवरणमिति । द्राविडं विवरणं पाठक्रमेण विवृतामिति बहुग्रन्थम् ।

* * * *

Colophon:

इति शाङ्करच्छान्दोग्योपनिषद्भाष्यटिप्पणे प्रथमोऽध्यायः ॥

प्रकरणं परिसमाप्य विद्वदनुष्ठितस्य कर्मणस्साफल्यमाविद्वत्सन्तोषार्थमाहेति कथयति—यथेहेत्यादिना ।

End:

वासुदेवोऽस्मि सर्वज्ञस्सर्वात्मा सर्वभावनः ।
नित्यबोधोऽद्वयस्सत्यस्सूक्ष्मश्शुद्धोऽभयः प्रभुः ॥

छान्दोग्यभाष्यमधिकृत्य सदद्वितीयवस्तूपपादनपरं विदुषां हिताय ।
सट्टिप्पणं मञ्जु नरेन्द्रपुरीयतीशश्चक्रे सुबोधामिति कोमलवाक्यजातैः ॥

Colophon :

इति छान्दोग्योपनिषद्भाष्यटिप्पणे अष्टमोऽध्यायः ॥

R. No. **3691.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. V. Subrahmaṇya Śāstri, Head Pandit, Sanskrit school, Tirukkurungudi, Tinnevelly district.

(*a*) अनुमितिवादः.
ANUMITIVĀDAḤ.

Foll. 1*a*—16*b*.

A tract on the Nyāya system of philosophy proving that Anumāna is a distinct Pramāṇa.

Complete.

Beginning :

लिङ्गपरामर्शानन्तरं विलक्षणानुमित्यात्मप्रमित्युदयात्तत्करणतया तस्य विलक्षणप्रमाणान्तरत्वात् स एव चानुमानमित्यभिधीयते । अथ वह्निव्याप्य-धूमवान् पर्वत इत्यादिपरामर्शानन्तरं तदात्मकविशेषदर्शनमूलकपर्वतो वह्नि-मान् इत्याकारकप्रत्यक्षनिर्णयादेव वह्न्यादिगोचरप्रवृत्त्याद्युपपत्तेः अनुमित्यात्म-कविलक्षणप्रमितेरेवासिद्ध्या कुतो लिङ्गपरामर्शस्य प्रमाणान्तरता ।

End :

तस्मादनुमितेः प्रत्यक्षत्वे विरुद्धत्वं निष्प्रत्यूहमेवेति सिद्धमनुमानस्य पृथक् प्रामाण्यमिति समासः ॥

Colophon :

इत्यनुमितिवादः ॥

(*b*) सामग्रीवादः.
SĀMAGRĪVĀDAḤ.

Foll. 17*a*—34*b*.

Same work as that described under R. No. 2142 ante, wherein see for the beginning.

Complete.

End:

जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनोयोगस्य हेतुतायाः क्लृप्तत्वादिति, तदा क्लृप्तकारणभावेन स्पार्शनानुत्पत्तेः । अनिर्वाहेऽवश्यं स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमेवेति दिक् ॥

Colophon:

इति सामग्रीप्रतिबध्यप्रतिबन्धकभावविचारः समाप्तः ॥

The scribe adds—

चन्द्रशेखरेणालेखि.

R. No. **3692.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī, Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. C. Vāsudēvasōmayājippāḍ, Valiyūr, Pattambi, Malabar district.

Fol. 8 gives the name of the original MS.

श‍ृङ्गारसुधाकरः.

ŚṚṄGĀRASUDHĀKARAḤ.

A drama of the Bhāṇa kind, written by the son of the younger sister of king Kulaśēkhararāmavarman on the occasion of the vernal festival of God Padmanābha, worshipped at Trivandrum. The author, whose name is not given, is also said to be the pupil of Śaṅkaranārāyaṇa and Raghunāthatīrtha.

Wants the beginning and the end.

Beginning:

विरचितसरसतर . . . लयसंवाहनकन्दलितन . . . अङ्कुरितविश्वैकमोहनमीनकेतनका . . न कामदानसन्तानस्य सकलभुवनतिलकायमानस्यानन्दूरपुरवरकृतसान्निध्यस्य भगवतः श्रीपद्मनाभस्य चैत्रमहोत्सवकोलाहलावलोकनकुतूहलतया निखिलहरिन्मण्डलसमाहिण्डितैस्सकलकलापण्डितैः सामाजिकैः । पारि—भाव कथमिव ।

* * * *

सामन्तराजराजिराराजन्मकुटतटखचितहरिन्मणिविसृत्वरदीप्तिच्छटावर्षदेदीप्यमानचरणकन्दलस्य तस्य श्रीकुलशेखररामवर्मनामधेयस्य महाराजस्यानन्तरजासम्भवेन तदीयदयालवतोतुष्यमाणहृदयेन श्रीमच्छङ्करनारायणगुरुचरणपरि-

चरणप्राप्तविद्यावैशद्येन श्रीमद्रघुनाथसुतीर्थाभिवादनजागरूकेण काव्यनाटकावलोकनशौण्डैस्सवयस्कैर्वयस्यैरभ्यर्थितेन शृङ्गारसुधाकरं नाम भाणं विरचितम् ।

End:

मृदुलशाद्वलिनी ह्वनस्थलीपरिमलानुसृतालिभिराञ्चिता ।
विकचपुष्पचयैरयते तरां वरतनोरतनोर्महतस्सताम् ॥
(उत्तरतो विलोक्य सहासं) बहुचन्द्रिकाभिरामे.

R. No. **3693.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Palīyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Fol. 28 is left blank.

भाणः.

BHĀṆAḤ.

A Bhāṇa describing the love between Kalyāṇavarman and Kēralasundarī, the second daughter of Kalāvatī. At the end of the work king Ravivarman is mentioned.

Complete.

Beginning:

(नान्द्यन्ते ततः प्रविशति सूत्रधारः) सूत्रधारः—

मुहुर्मात्रा पुंसः प्रसभविधुतस्याप्यनुपदं
वितन्वाना चित्ते कुसुमशरसाम्राज्यविभवम् ।
सरोजश्रीसारग्रहणनिपुणानेत्रयुगलात्
गलन्ती वामाक्ष्या नवसलिलधारा विजयते ॥

अये किंनुखल्वद्य सरसयौवनप्रायजनसमाकुलस्य वसन्तोत्सवस्य सम्भिभावयिषया समागतानां सकलकलाविलासिनीहृदयङ्गमानां सामाजिकानामावर्जनाय प्रवर्त(मा)ने मयि समाकर्ण्यते । अवधेहि तावत् ।

* * * *

एषा कलावतीद्वितीयदुहितुः सकलललनाकुलमौलिभूषायाः केरलसुन्दर्यास्ताम्बूलकरङ्क(ण्ड)वाहिनी कुवलयवती पलिकाहस्ता इतोमुखमागच्छति ।

* * * *

कान्तः कल्याणवर्मा सकलगुणमणिश्रेणिरत्नाकरो यः
तस्मिन्नत्यन्तकौतूहलि मम मयि च श्रीमतस्तस्य चेतः ।
कादाचित्कश्च सम्प्रत्यजनि घटितयोर्नौ वसन्तोत्सवेऽस्मिन्
संयोगस्तस्य तावत् द्रढिमनि न वरं भाव एकः प्रमाणम् ॥

End:

इदमप्यपरमनवरतमाशास्महे—

भुजामध्यं यावत्सुभगयति रूपं मधुरिपोः
कुचाभोगानम्रः कुसुमशरसाम्राज्यमहिमा ।
विपन्मुक्त[ा]ः (सं)पद्वितपरितोषां वसुमती-
मुदन्वत्पर्यन्तामवतु रविवर्मा विमलधीः ॥

Colophon:

समाप्तोऽयं भाणः ॥

R. No. **3694.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS of M.R.Ry. K. A. Lakṣmaṇa Śāstrigaḷ, Kalpathi, Palghat.

Foll. 19 and 20 are left blank.

तटातकापरिणयः, सव्याख्यः.

TAṬĀTAKĀPARIṆAYAḤ WITH COMMENTARY.

A commentary on the Taṭātakāparīṇaya, which is a poem describing the marriage of Taṭātakā (Mīnākṣī, born as the daughter of king Pāṇḍya) with Sundarēśa, worshipped at the Śaiva shrine, in Madura.

Wants the beginning and the end.

Beginning:

भवेत् । इति एवं मत्वा स्वः स्वर्गमित्यर्थः; स्वरव्ययं स्वर्गनाक . . . . . . इत्यमरः । अविशत् विवेश प्रापेत्यर्थः । कैलासमापन्नानां पुनर्निवृत्त्यभावात् सुन्दरेशमानिशं भजन्नपि कैलासमगत्वा कालान्तरभाविस्वछभासमुद्रस्नानसमये स्वस्य चागन्तव्यात् ।

* * * *

(मू.)—

स्वर्याते पितरि यथाश्रुतं कुमारी शौर्याब्धावतनुत सादरं जनन्या ।
आचार्यैरवगतवेदशास्त्रतत्त्वैरादिष्टा गृहपतिभिर्निवापकृत्यम् ॥

(व्या.)—

स्वरिति । शौर्याब्धौ पराक्रमाम्भोधौ पितरि जनके स्वः स्वर्गं याते गते सति कुमारी पुत्री तटातकेत्यर्थः ।

End:

प्रस्थोदग्रागमाग्रप्रविकचसुमनोव्रातनिर्यद्रजोभिः
दुस्स्थोल्लासैकतानैरमितपरिमलैस्सान्द्रपर्यन्तभागे ।
तस्थौ पृथ्वीन्द्रपुत्री प्रमदभरकरे तत्र कार्तस्वराद्रौ
तीर्थैर्मित्रै पूता च प्रहरणखरयासौ च सत्रा स्वधाभ्या ॥

प्रस्थेति । असौ पृथ्वीन्द्रपुत्री भूपतिकन्यका अमितपरिमलैः अमितः अपरिमितः परिमलो गन्धो येषां तैः ।

* * * *

स्वोपमात्रा सार्धं तस्थौ—इत्यनेनातिरमणीयकनकाचले सचिवादिभिरन्विता-वसदिति भावः । स्रग्धरावृत्तमेतत्—म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्.

R. No. **3695.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paramēśvara-Vādhyān Nambūdiri, Accipura, Kottakal post, Malabar district.

(*a*) भट्टिकाव्यव्याख्याविमर्शः.
BHAṬṬIKĀVYAVYĀKHYĀVIMARŚAḤ.

Foll. 1*a*—20*b*.

A criticism on the commentary on the Bhaṭṭikāvya called Jaya-maṅgalā:

Wants the beginning and the end.

Beginning:

न हि त(य)त्र कुत्रचिदा(द)विद्वदङ्गनाबालं प्रसिद्धार्थं प्रसन्नवदिति प्रसन्नतालक्षणमुक्तम् । न च अथ दुकूलसुवल्ककूशा (संवल्कदुकूलकुथा)-

दिभिरित्यनुप्रासश्लोकात्पूर्वमनन्तरं वा, सरूपवर्णविन्यासमनुप्रासं प्रचक्षत इत्यनुप्रासलक्षणमुक्तम् । नच रणपण्डितोऽग्र्येत्यादियमकश्लोके, तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परं वर्णानां यः पुनर्वादो यमकं तन्निरूप्यते इति यमकलक्षणमुक्तम् ।

*　　*　　*　　*

नन्विह सो इति पदच्छेदेऽनन्तरपदं ध्यैष्ट इति स्यात् । तन्न युक्तम्—तथाविधस्य पदस्याभावात् । सत्यं किन्तु यथा सन्धिविकारान्तं पदं, तथा सन्धिविकारादिकमपि पदं भवितुमर्हति । तथा हि सो अध्यैष्ट इत्यत्रैङः पदान्तादतीति पूर्वरूपत्वम् । तत्र पूर्वरूपमोकारः ।

End :

अत्र चक्रवर्त्याह—तिमिरांशुकमिव तिमिरसदृशमंशुकं चेति लोचने . . वमुक्तं तिमिरं चांशुकाश्च सूक्ष्माश्चांशवस्तिमिरांशुकं रश्मिशबलीकृतं तमःपटलं तिमिरांशुकं नीलजालिका नीलांशुकमिति.

(*b*) शिक्षावचनानि.

ŚIKṢĀVACANĀNI.

Foll. 21*a*—22*a*. Fol. 22*b* is left blank.

A few authoritative extracts from certain treatises on Vēdic phonetics.

Incomplete.

Beginning :

नव सन्ति शिक्षाः पाणिनीयशिक्षा, कोहलेयशिक्षा, आपिशलाशिक्षा इत्यादयः । तत्र पाणिनीयशिक्षायामन्ते चतुष्पञ्चश्लोकाः सन्ति । तेषु कश्चिदयं येनाक्षरसमाम्नायमिति श्लोकः ।

End :

यजुर्वेदिनां प्रणवः अर्धाधिकद्विमात्रः । ऋग्वेदिनां चतुर्मात्रः । पराशरस्य चतुर्मात्रः । तदुक्तम्—पराशरश्चतुर्मात्रमाहाध्यात्मार्थतत्त्ववित्.

R. No. 3696.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sādhu-Mēlavādhyār Tirumalai Ayyaṅgār, Srivilliputtur, Ramnad district.

पुरुषसूक्तचरमार्थनिष्कर्षः.

PURUṢASŪKTACARAMĀRTHANIṢKARṢAḤ.

A treatise giving the real meaning of the last three **Mantras** in the Puruṣasūkta: by Rāmānujācārya alias Lakṣmaṇācārya, son and disciple of Śuddhasattvācārya of Kauśikagōtra.

Complete.

Beginning:

श्रीमत्पुरुषसूक्तोक्तं प्राप्य सीमाप्रपञ्चनम् ।
शुद्धसत्त्वार्यदासेन लक्ष्मणाख्येन लिख्यते ॥
कौशिकश्रीशुद्धसत्त्वदेशिकेन्द्रसुतः सुधीः[1] ।
वेदाहमितिमन्त्रार्थं[2] वेदयामि सतां मुदे ॥

वेदाहमित्यादि । अस्मिन् मन्त्रत्रये ब्रह्मविदां शारीरकचतुर्थाध्यायोक्तरीत्या ब्रह्मविद्यारूपपरमपुरुषार्थशालित्वममृतत्वं चानुपोषेत्सूक्तमुत्तरपूर्वाघाश्लेषविनाशरूपाभ्यर्हितफलयोगित्वं भोगमात्रसाम्यशब्दितसायुज्यपर्यन्तफलप्राप्तिमूलभूतसालोक्यलक्षणनिरतिशयप्रयोजनभागित्वं च प्रतिपाद्य तन्मुखेन ब्रह्मवित्प्रशंसा प्रपञ्चयते । तत्र प्रथमे मन्त्रे प्रथमेनार्धर्चेन

* * * *

ब्रह्मविदः स्वस्वरूपानुसन्धानमुखेन प्रतिपाद्यते । अहमेतं महान्तमादित्यवर्णं तमसस्तु पारे स्थितं पुरुषं वेदेत्यन्वयः ।

End:

भगवन्माहात्म्यस्यापि तन्त्रेण प्रतिपादनात् ब्रह्मवित्प्रशंसाया न महाप्रकरणविरोध इत्यनुसन्धेयमिति दिक् ॥

Colophon:

इति श्रीमत्कुशिककुलतिलकश्रीशुद्धसत्त्वगुरुचरणतनूजरत्नस्य तत्प्रसादलब्धसकलविद्यावैशद्यस्य रामानुजदासस्य कृतिषु श्रीपुरुषसूक्तचरमार्थनिष्कर्षः समाप्तः ॥

श्रीमन्महापुरुषभक्तजनप्रभावं
मूर्ध्नाहतं पुरुषसूक्तमनुत्रयेण ।
श्रीशुद्धसत्त्वगुरुसूनुकृतप्रपञ्चं
सन्तो विमृश्य कलयन्तु परं प्रसादम् ॥

---

[1] देशिकानुग्रहादहम्—इति पाठान्तरम्.

[2] मित्यादिमन्त्रान्—इति पाठान्तरम्.

R. No. **3697.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 17. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Mēlavādhyār Tirumalai Ayyaṅgār, Srivilliputtur, Ramnad district.

Foll. 16*b* and 17 are left blank.

वेदपादरामायणम्.

VĒDAPĀDARĀMĀYAṆAM.

Same work as that described under R. No. 555 ante, but one additional stanza is found in the beginning and is given below By Kandāḍai Rāmānujācārya, son of Varadārya of Vādhūlagōtra.

Complete.

श्रीभूनीलापतिर्देवः श्रेयो भूयो ददातु नः ।
यः श्रीरङ्गं समध्यास्ते शतं धामानि सप्त च ॥

R. No. **3698.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Rāmakr̥ṣṇa Śāstrigaḷ, Ottapalam, Malabar district.

Fol. 22*b* is left blank.

तन्त्रसारावलिः.

TANTRASĀRĀVALIḤ.

A treatise on medicine dealing with the properties, uses and purification of various substances and with the preparation of medicines of different kinds : by Bhairavānanda.

Contains the Paṭalas 4—17 complete, 18th incomplete.

Beginning :

बीजं श्रुतीनां सुखदं मुनीनां जीवं जडानां महदादिकानाम् ।
आग्नेयमस्त्रं भववादकानां (यदा)हुस्ता(रेवा)मलमाश्रयामि ॥
दे(दै)वमासुरमार्षं च गान्धर्वं चापि मानुषः(म्) ।
तिस्त्रः कोट्यः शतं पञ्च त्रिंशद्विंशतिसंयुतम् ॥

* * *

तासां नामानि वक्ष्यामि बोद्धुमर्हति सादरम् ।
कटुगन्धारुणा तन्वी नीलपुष्पा शिफान्विता ॥

मृतसञ्जीविनी प्रोक्ता सर्वसञ्जीवनक्षमा ।
कण्डूलीका जडवती नीला सामिषगन्धिनी ॥

* * * *

इति चतुर्थः पटलः ॥

End:

सप्ताष्टदिवसाद्देवि पद्मरागप्रभं भवेत् ।
तत् शुद्धं सर्वकार्येषु योजयेत्सिद्धिमाप्नुयात् ॥

Colophon:

इति भैरवानन्दविरचिते तन्त्रसारावलीखण्डे सप्तदशः पटलः ॥

शिव उवाच—

कल्याणि ते कल्यजनैकलभ्ये विद्या न विन्ध्या (अवन्ध्या)विविधा मयोक्ताः।
तथापि तं(ता)सामवसः(शः) किलैते योगोऽपि योगादसुभिः किमार्गैः(?) ॥

* * * *

तथैव शुद्धं हरितालवर्यमादाय कल्याणि गलप्रदीपे ।
संसिच्य कालीपयसार्कतप्तं भूयोऽपि भूयः परिभाव्यमानम् ॥
तथ्यातुलीये (?) विकलय्य कल्के मूषान्तरङ्गे विहिताभिधाने ।
चूर्णेत.

R. No. 3699.

Paper. 10⅝ × 9⅜ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Plantol Śaṅkaran Mūssu, Vilayur post, Cochin State.

Fol. 58*b* is left blank.

अष्टाङ्गहृदयव्याख्या—दीपिका.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ: DĪPIKĀ.

Similar to the commentary described under R. No. 3266 ante. By Hāṭakāṅga.

Contains the Adhyāyas one to ten in the Sūtrasthāna, but wants the beginning.

Beginning:

. . . . दिव्यदि(द)शो महर्षयः . . . षिका ऋषिपुत्र .
इङ्गिता . . . . दिकमपि पार . . वोऽङ्गीकर्तुमतिनिर्मलमेधस-
स्तेषामेव हितानि क्षमाण्याह—मयि तु न त्वस्मात् . . . . . .

* * * *

प्रमाणमेतत्पठन् सङ्ग्रहबोधसक्त इत्यादिवचस्तस्य कार्येस्यायं सङ्क्षेपस्सङ्ग्रह-करणादनन्तरमेव मन्दमध्यमबुद्धिव्यवहारार्थमष्टाङ्गहृदयं व्याख्यास्यामः । . . . . . लोकप्रकारं प्रति प्रयासस्तन्त्रकृतोऽस्य करुणामिहं(ष)तः ।

* * *

Colophon:

इति हाटकाङ्गविरचितायामष्टाङ्गहृदयदीपिकायां प्रथमोऽध्यायः ॥

End:

आम्रस्य रसानुरूप उपयोग इत्यतो दोषरसविकल्पज्ञानं वैद्यस्य चिकित्सायामङ्गं भवति । तथा चागमः—

क्वचिदेकरसः कल्प्यः संयुक्ताश्च रसाः क्वचित् ।
दोषौषधादीन् सन्दिश्य भिषजा सिद्धिमिच्छता ॥
यस्स्याद्रसविकल्पज्ञः स्याच्च दोषविकल्पवित् ।
न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिषु ॥ इति ।
तस्माद्दोषभेषजवशात् उपयोज्या इत्युक्तम् ॥

Colophon:

इति हाटा(टका)ङ्गविरचितायामष्टाङ्गहृदयदीपिकायां दशमोऽध्यायस्समाप्तः ॥

R. No. **3700.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇan Valiya Tamburān, Alvañjēri, Malabar district.

विष्णुसहस्रनामभाष्यार्थकारिका.

VIṢṆUSAHASRANĀMABHĀṢYĀRTHAKĀRIKĀ.

A treatise in verses explaining briefly the meaning of Śaṅkara's Viṣṇusahasranāmabhāṣya: by some ascetic who mentions Śaṅkarācārya and Sarvēśvaratīrtha, the preceptor of the author of the work. This work is also called Nāmakārikāsahasra.

Complete.

Name of the scribe—Subrahmaṇya.

Beginning :

यत्पादाम्बु निपीय शुद्धमतयस्सन्त्यज्य सर्वक्रियाः
सत्यज्ञानसुखात्मकं परमहं ब्रह्मास्मि नान्यत्ततः ।
निश्चित्येति दुरन्तसंसृतिमहासिन्धून् तरन्ति प्रजाः
तं सर्वेश्वरतीर्थराजममृतप्राप्त्यै सदोपास्महे ॥
विष्णोर्नामसहस्रस्य भाष्ये योऽर्थः प्रकीर्तितः ।
सङ्गृह्यते स सर्वोऽर्थ एकैकश्लोकतोऽधुना ॥
विश्वं विश्वस्य हेतुर्वा ब्रह्मोङ्कारश्च वा जगत् ।
तत्सृष्ट्वा तत्प्रविष्टो वा विश्वस्यास्मिन् लयेन वा ॥
विष्णुर्व्यापनशीलत्वात्स्वकान्तिव्याप्तितोऽथ वा ।
रोदस्योः क्रमणाद्वापि यद्वा सृष्ट्वा प्रवेशनात् ॥

* * * *

Colophon :

इति श्रीमन्नामकारिकासहस्रे प्रथमं शतकं समाप्तम् ॥

End :

अत एवायमक्षोभ्यो ह्यशक्यक्षोभणः परैः ।
प्रपन्नाभयदानाख्यव्रतदार्ढ्यादपीतरे ॥
एतावन्त्येवायुधानि विद्यन्तेऽस्य न केवलम् ।
किन्तु सर्वाणि सन्तीति सर्वप्रहरणायुधः ॥
नमो महाभारतकृन्मुनिभ्यो नमोऽस्तु तच्छङ्करभाष्यकृद्भ्यः ।
नमोऽस्तु सर्वेश्वरतीर्थवर्यगुरुभ्य ईशस्य च सम्भवेभ्यः ॥

Colophon:

इति श्रीनामकारिकासहस्रे दशमं शतकं समाप्तम् ॥

The scribe adds—

यतिना रचितां नीतां सुब्रह्मण्येन केरलात् ।
श्रीनामकारिकामेतां सुब्रह्मण्याह्वयोऽलिखत् ॥
सुब्रह्मण्यसमानीतां यतिना केनचित्कृताम् ।
श्रीनामकारिकामेतां सुब्रह्मण्य(ह्व)योऽलिखत् ॥

इति श्रीनामकारिकासहस्रं समाप्तम् ॥

R. No. 3701.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 204. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kudala post, Ganjam district.

Fol. 203 gives the contents of this work. Fol. 204 is left blank.

शुद्धिवचोमुक्तागुच्छकः.
ŚUDDHIVACŌMUKTĀGUCCHAKAḤ.

A treatise in Dharmaśāstra dealing with the following subjects:—

१. आशौचप्रकरणम्.
२. आपद्धर्मप्रकरणम्.
३. प्रायश्चित्तप्रकरणम्.
४. स्वजातिशौचप्रकरणम्.
५. अङ्गाशौचप्रकरणम्.
६. सपिण्डाशौचप्रकरणम्.
७. बालाद्याशौचप्रकरणम्.
८. स्त्र्याशौचप्रकरणम्.
९. वर्णसन्निपाताशौचप्रकरणम्.
१०. असपिण्डाशौचप्रकरणम्.
११. सद्यश्शौचादिप्रकरणम्.
१२. प्रेतनिर्हरणादिदहनविधिप्रकरणम्.
१३. अस्थिसञ्चयनादिदशाहविधिप्रकरणम्.
१४. प्रेतप्रथमसंवत्सरनियमप्रकरणम्.

By Māṇikyadēvapaṇḍitācāryāgnicit.
Complete.

Beginning:

गृहस्थाश्रमिणां नित्यनैमित्तिकधर्मा उक्ताः । अभिषेकादिगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माश्चोक्ताः । अधुना तदधिकारसङ्कोचहेतुभूताशौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते । आशौचप्रतिपादनेन कालस्था(स्ना)नाद्यपनोद्यः पिण्डोदकदानादिविधिरध्ययनादिपर्युदासस्य निमित्तभूतः कश्चनातिशयः कथ्यते ।

* * * *

Colophon:

इति पण्डिताचार्याग्निचिन्माणिक्यदेवग्रथिते शुद्धिवचोमुक्तागुच्छके स्वजातिशौचप्रकरणम् ॥

End:

यथाह—शङ्खः

पितर्युपरते पुत्रो मातुश्श्राद्धान्निवर्तते ।

मातर्यपि च वृत्तायां पितृश्राद्धादृते समाः ॥

ऋते समाः सांवत्सरिकमन्तरेण । एतदुभयत्र सम्बध्यते ॥

Colophon:

इति पण्डिताचार्याग्निचिन्माणिक्यदेवग्रथिते शुद्धिवचोमुक्तागुच्छके प्रेत-प्रथमसंवत्सरनियमाः ।

समाप्तोऽयं ग्रन्थः ॥

R. No. 3702.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 180. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śrīnivāsa Ayyaṅgār, Lakṣamarattōppu, Alwartirunagari, Tinnevelly district.

विष्वक्सेनसंहिता.

VIṢVAKSĒNASAṀHITĀ.

A portion of the Pāñcarātrasaṁhitā dealing with the following subjects:—

१. भूपरीक्षा.
२. मण्टपादिलक्षणम्.
३. दारुसङ्ग्रहणम्.
४. शिलाग्रहणम्.
५. शूलस्थापनविधिः.
६. मृत्संस्कारविधिः.
७. स्वप्नाध्यायः.
८. इष्टकालक्षणादिविधिः.
९. बालालयविधिः.
१०. प्रतिमालक्षणम्.
११. मूर्तिभेदलक्षणम्.
१२. मन्त्रोद्धारकथनम्.
१३. ऋषिच्छन्दोन्यासादिकथनम्.
१४. चरुपाकविधिः.
१५. मूलमन्त्रहोमक्रमः.
१६. प्रतिष्ठालक्षणम्.
१७. जङ्गमस्थापनविधिः.
१८. देवीस्थापनविधिः.
१९. अङ्गन्यासादिलक्षणम्.
२०. परमात्मादिमूर्तिपूजाभेदकथनम्.
२१. मत्स्यादिनामार्चनफलम्.
२२. स्नपनविधिः.
२३. पुष्पारामाद्यङ्गपूजाविधिः.
२४. जलगन्धादिसंस्कारविधिः.
२५. पालिकाघटिकाशरावलक्षणम्.
२६. ध्वजोत्थापनविधिः.
२७. उत्सवविधिः.

२८. अमावास्योत्सवविधिः.
२९. श्रीरामजन्मोत्सवविधिः.
३०. श्रीकृष्णजयन्तीकृत्यम्.
३१. यन्त्रताडनोत्सवः.
३२. हेतिराजलक्षणम्.
३३. द्रव्यशुद्धिविधिः.
३४. प्रासादलक्षणम्.
३५. परिवारलक्षणम्; महापीठप्रतिष्ठा.
३६. पुण्याहजीर्णोद्धारप्रोक्षणम्.
३७. दीक्षाशकुनविस्तारः.
३८. प्रायश्चित्तप्रोक्षणम्.
३९. प्रायश्चित्तविधिः.

Contains the Adhyāyas 1—39.

Beginning:

अथातस्सम्प्रवक्ष्यामि भूपरीक्षाविधिं परम् ।
संशोधयेत्ततो भूमिं प्रागुदक्प्रवणां शुभाम् ॥

* * * *

ब्राह्मणैश्च(णानां) सिता भूमिः रक्ता(च) क्षत्रियस्य तु
वैश्यस्य पीतका भूमिः कृष्णा शूद्रस्य . . . ॥
कुम्भस्य पूर्वदिग्देशे कुण्डं च चतुरश्रकम् ।
वृत्तं वा शिल्पिना कुर्यात् स्थण्डिले वा समाचरेत् ॥

* * * *

Colophon:

इति श्रीपाञ्चरात्रे विष्वक्सेनसंहितायां भूपरीक्षाविधिर्नाम प्रथमोऽध्यायः ॥

End:

स्नापयेन्मुनिशार्दूल पूर्वोक्तेन विधानतः ।
ब्राह्मणान् भोजयेत्तत्र यथा वित्तानुसारतः ॥

Colophon:

इति श्रीपाञ्चरात्रे विष्वक्सेनसंहितायामेकोनचत्वारिंशोऽध्यायः ॥

उपायापायसंयोगे निष्ठया हीयतेऽनया ।
अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् ॥
प्रायश्चित्तिरियं सात्र यत्पुनश्शरणं व्रजेत् ।
उपायानामुपायत्वस्वीकारेऽप्येतदेव हि ॥

R. No. 3703.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 334. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paramēśvaran-Vādhyān Nambūdiri, Achipuram, Kottakkal, Malabar district.

Bound in two volumes.

Fol. 334 is left blank.

ऋक्संहिताव्याख्या— ऋगर्थदीपिका.

ṚKSAMHITĀVYĀKHYĀ : ṚGARTHADĪPIKĀ.

Same work as that described under R. No. 3076 ante, wherein see for the beginning. By Mādhava, son of Sundarī and Vēṅkaṭācarya.

Contains the Aṣṭakas five to eight complete.

End:

देवा भागं यज्ञियं यथेतरं सञ्जानाना उपासते प्रश्नाः तथा यूयमपि कुरुध्वमिति समानो मन्त्रः । . . . . (अ)स्माकं समानं चित्तं चानुसन्धानां . . . सह भवत्वेषां युष्माकमिति समानं मन्त्रं समानं मन्त्रमभ्युच्चारयामि युष्माकं येन सङ्गताः स्यात तथानेन समानेन हविषा युष्माकं जुहोमीति ॥

व्याख्यदष्टममध्यायमष्टमस्याष्टकस्य सः ।
तीरमाश्रित्य निवसन् कावेर्या दक्षिणं सुखम् ॥ इति ।

Colophon:

इति वेङ्कटार्यसूनुना माधवाचार्येण कृतमृग्वेदभाष्यं समाप्तम् ॥

R. No. 3704.

Paper. $10\frac{3}{8} \times 9\frac{3}{8}$ inches. Foll. 25. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vāsudēvasōmayājippāḍ, Vilayūr, Pattambi, Malabar district.

Fol. 25*b* is left blank.

मीमांसाभाष्यपरिशिष्टम्.

MĪMĀṀSĀBHĀṢYAPARIŚIṢṬAM.

A supplement to Prabhākara's commentary on the Mīmāṁsābhāṣya of Śabarasvāmin : by Śālikanātha.

Contains the first Pāda of the first Adhyāya only.

R. No. 3636.

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 167. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Foll. 156*b*, 165*b* and 166 are left blank.

भावप्रकाशनम्.

BHĀVAPRAKĀŚANAM.

A work in Sanskrit poetics: by Śāradātanaya, pupil of Divākara and son of Bhaṭṭagōpāla who was the son of Kṛṣṇa and grandson of Lakṣmaṇa (author of Vēdabhūṣaṇa) who lived in the village Māṭharapūjā.

Complete in ten Adhikāras dealing with the following subjects:—

१. भावनिर्णयः.
२. स्वस्वरूपाभिव्यक्तिनिर्णयः.
३. रसभेदतत्स्वरूपनिर्णयः.
४. शृङ्गारालम्बननायकनायिकादि - स्वरूपनिर्णयः.
५. नायकनायिकाभेदतदवस्थाश्रय-रसभावदृष्टिविकारादिवर्णनम्.
६. शब्दार्थसम्बन्धतद्भेदप्रकारनिर्णयः.
७. नाट्येतिवृत्तशरीरलक्षणाभिधानम्.
८. दशरूपकलक्षणम्.
९. नृत्यभेदस्वरूपप्रकारनिर्णयः.
१०. नाट्यप्रयोगभेदप्रकारनिर्णयः.

Beginning:

प्रच्योतन्मदमन्थरभ्रमरिकाझङ्कारगीतिक्रम-
स्फूर्जद्बृंहितवादनव्यतिकरं भावोल्लसत्प्रक्रियम् ।
नृत्यन्नस्तु सुखाय वः करिमुखः पुण्योपचारैश्चिरा-
दानन्दी नटभावितैरिव यथा भावैस्सभासामाजिकः ॥

वन्दे बृन्दावनचरं गोविन्दं गोपिकापतिम् ।
गाः पालयन्तं गायन्तं वेणुना षड्जनादिना ॥

* * * *

आर्यावर्ताह्वये देशे स्फीतो जनपदो महान् ।
मेरूत्तर इति ख्यातस्तस्य दक्षिणभागतः ॥

ग्रामो माठरपूजाख्यो द्विजसाहस्रसम्मितः ।
तत्र लक्ष्मणनामासीद्विप्रः काश्यपवंशजः ॥

त्रिंशता क्रतुभिर्विष्णुं तोषयामास वेदवित् ।
वेदानां भाष्यमकरोन्नाम्ना यो वेदभूषणम् ॥

तस्य श्रीकृष्णनामासीत्पुत्रः कृष्ण इवापरः ।
वेदानधीत्य सकलान् शास्त्राण्यप्यखिलानि च ॥

पुत्रार्थं स महादेवं वाराणस्यामतोषयत् ।
तस्यासीद्भट्टगोपालो नाम्ना सूनुस्सुलोचनः ॥

अष्टादशसु विद्यासु बहुशश्च कृतश्रम' ।
उपास्य शारदां देवीं पुत्रं लेभे गुणोत्तरम् ॥

तमाह्वयत्पिता प्रीतः शारदातनयाख्यया ।
अधीतवेदवेदाङ्गो वर्धमानः पितुर्गृहे ॥

कदाचिच्छारदां देवीमुपासितुमुपाययौ ।
उपास्य स वसंस्तस्याश्चैत्रयात्रामहोत्सवे ॥

आसीनां नर्तनागारे तां देवीं प्रेक्षकैस्सह ।
प्रणम्य तैरनुज्ञातः तस्याः पार्श्वमुपाविशत् ॥

त्रिंशत्प्रकारभिन्नानि रूपकाणि पृथक् पृथक् ।
नटैः प्रपूज्यमानानि भावाभिनयकोविदैः ॥

दृष्ट्वा स देवीं वरदां नाट्यवेदमयाचत ।
नाट्यशालापतिः कश्चित् दिवाकर इति द्विजः ॥

तयैव नाट्यवेदस्य नियुक्तोऽध्यापने तदा ।
प्रातस्साऽपि सदाशिवस्य शिवयोर्गौर्या मतं वासुकेः
वाग्देव्या अपि नारदस्य च गुरोः कुम्भोद्भवव्यासयोः ।
शिष्याणां भरतस्य यानि च मतान्यप्याप्य तान्यञ्जसा
सूनोरप्युत नाट्यवेदमखिलं सम्यक् समध्यापयत् ॥

शारदातनयो देव्यास्तानधीत्य च सन्निधौ ।
आदाय सारमेतेभ्यो हितार्थं नाट्यवेदिनाम् ॥

भावप्रकाशनं नाम प्रबन्धमकरोत्तदा ।
एतस्मिन् प्रथमं भावस्तस्य भेदास्ततः परम् ॥

* * * *

Colophon:

इति शारदातनयविरचिते भावप्रकाशने भावनिर्णयो नाम प्रथमोऽधिकारः ॥

End:

सन्ति चैकशतं शिष्या भरतस्य महामुनेः ॥
तेषां मतैरभिन्नोऽपि भिन्नवत्प्रतिभाति सः ।
न स्वातन्त्र्यान्न मौक्त्या(ग्ध्या)च्च तो(सो)ऽप्यर्थो निहितः क्वचित् ॥
भट्टाभिनवगुप्तार्यपादप्रोक्तेन वर्त्मना ।
अयं प्रबन्धः कथितश्शारदायाः प्रसादतः ॥
यः कश्चिदवगन्ता चेत्प्रबन्धस्यास्य तत्त्वतः ।
स माननीयो भवति राजभिर्भावकोविदैः ॥

Colophon:

इति शारदातनयविरचिते भावप्रकाशने नाट्यप्रयोगभेदप्रकारविशेषनिर्णयो नाम दशमोऽधिकारः ॥

सोऽव्यादादिनगो ? भुजङ्गलिततत्रासाञ्चिताख्यैर्जन(ग)न-
स्सर्गध्वंसनपालनाय करणैस्तत्तत्क्रियारतान्तै(स्थानगैः) ।
यः कल्पान्तमहातमीयवनिता(का)मध्यान्तरन्तर्हितः
स्वात्मन्येव जगद्विचित्रचरितं पश्यन्मुदा नृत्यति ॥

Colophon:

इति भावप्रकाशस्समाप्तः ॥

R. No. **3637.**

Paper. 10⅝ × 9⅜ inches. Foll. 56. Lines, 20 in a page. Dēvanāgari and Grantha. Good.

Transcribed in 1921–22 from a MS. of His Holiness Tamarapalli Svāmigaḷ, Trikkekāṭ-mana, Tirur, South Malabar.

(*a*) पञ्चीकरणविवरणम्.

PAÑCĪKARAṆAVIVARAṆAM.

Foll. 1*a*—6*a*.

Same work as that described under No. 4637 of the D.C.S. MSS., Vol. IX. By Ānandajñāna, disciple of Śuddhānanda.

Complete.

(*b*) पञ्चीकरणविवरणव्याख्या—तत्त्वचन्द्रिका.

PAÑCĪKARAṆAVIVARAṆAVYĀKHYĀ: TATTVACANDRIKĀ.

Foll. 6*b*—19*a*.

A commentary on the work described under subdivision (*a*) of this number: by an unknown author who salutes Śrīkṛṣṇatīrtha, Jagannāthāśrama and others.

Complete.

Beginning:

यन्नामरूपजगदुद्भवसम्प्रतिष्ठा-
संरोधकारणमनिर्वचनीयशक्ति ।
सच्चित्सुखाद्य(द्व)यवपुंज(पुर्ज)गतो हिताय
रामाभिधामुपगतं भुवि तं नमामि ॥
यत्पांसुधूसरितमस्तकमस्तवा(पा)पमज्ञानलक्षणमहाग्रहयक्षभूताः ।
मुक्त्वाश्रमं ययुरजस्रमतीव रम्यं श्रीकृष्णतीर्थगुरुपादयुगं नमामि ॥
जगन्नाथाश्रमाद्या ये गुरवो मे कृपालवः ।
तानहं विधिवन्नत्वा करवै तत्त्वचन्द्रिकाम् ॥

श्रीमच्छङ्करभगवत्पूज्यपादविरचितं पञ्चीकरणाख्यं प्रकरणमतिसङ्क्षिप्तमनेकार्थसङ्ग्रहगम्भीरमतिविमलमर्थतः प्रकटीचिकीर्षुरानन्दगिर्याचार्यः स्वचिकीर्षितस्याविघ्नपरिसमाप्तये विशिष्टशिष्टाचारपरिप्राप्तमिष्टदेवतालक्षणं मङ्गलमाचरन् शास्त्रस्य विषयप्रयोजने दर्शयति—यदबोधादिति । अयमक्षरार्थः । परमात्मने नम इत्यन्वयः । तस्याप्रसिद्धिं वारयति—तस्मा इति । सर्वनाम्नः प्रसिद्धार्थवाचित्वात्प्रसिद्धिश्च एष सर्वेश्वर इत्यादिश्रुतिभ्यस्तच्छब्दनिर्दिष्टस्य परमात्मनस्स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति ।

End:

ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते मङ्गलमाचरणीयमिति शिष्टाचारमनुरुन्धान इष्टदेवतां प्रणमति—षड्विधमिति ।

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इति लिङ्गविधानम् । सदेव सोम्येदमग्र आसीदित्यादिप्रतिषेधो नेह नानास्ति किञ्चनेत्यादि ॥

पञ्चीकृतेर्विवरणमर्थतः प्रकटीकृतम् ।
यथाश्रुतं यथाबुद्धि तेन तुष्येदुमापतिः ॥
सीतासुवर्णलतिकापरिवीतगात्रं प्रेमारसार्द्रवरणं सुखसत्फलाढ्य(म्) ।
कीर्तिप्रसूनपरिपालितसर्वलोकं रामाभिधं जगति कल्पतरुं नमामि ॥

Colophon:

इति श्रीमत्पञ्चीकरणविवरणटीका तत्त्वचन्द्रिका नाम समाप्ता ॥

Fol. 19*b* gives the names of the owner of the original MS. Fol. 20 is left blank.

Transcribed in 1920–21 from a MS. of Periyatirumāḻigai Śrīnivāsācāriyar, Alwartirunagari, Tinnevelly district.

(*c*) रामामृतम्.
RĀMĀMṚTAM.

Foll. 21*a*—33*b*. Fol. 34*b* gives the colophon of this work Fol. 34*a* is left blank.

A poem narrating the story of Śrī-Rāma: by Vakulabhūṣaṇa who lived in the town Kurukāpura (Alwartirunagari), Tinnevelly district.

Complete.

Beginning:

अयोध्यानगरे सौधैर्भव्ये भर्मादिनिर्मितैः ।
वसन् दशरथो राजा पृथिवीं पर्यपालयत् ॥
बहून् संवत्सरान् राज्यं प्रशासत्प्रमदागणान् ।
कौसल्याप्रमुखान् कान्तानन्वभूदसमो नृपः ॥

* * * *

पुनर्वसुदिने रामः पुष्यर्क्षे भरतस्सुधीः ।
आश्लेषे लक्ष्मणः श्रीमान् शत्रुघ्नश्चाप्यवातरत् ॥

* * * *

Colophon:

इति वकुलाभरणकविविरचिते रामामृते प्रथम आस्वादः ॥

End:

शृङ्गारेण विदेहराजतनयां सर्वां प्रजां पालनात्
दानेनायमकिञ्चनान् गुणनिधिस्सन्तोषयन् सन्ततम् ।
शत्रूनद्भुततेजसा प्रशमयन् कीर्त्या धरित्रीं शुचिं
कुर्वन्नर्यमवंशमौक्तिकमणिः श्रीराघवो राजते ॥

श्रीरामचन्द्राद्भुतवृत्तदीपं रामामृतं काव्यमिदं पठन्तः ।
दारांश्च वेतण्डसुतादिरूपां भजन्ति बोधं च सुखेन लक्ष्मीम् ॥

कुरुकापुरवास्तव्यो वकुलाभरणः कविः ।
श्रीरामप्रीतये चक्रे कैङ्कर्यं वाचिकं शुभम् ॥

Colophon:

इति श्रीरामामृतं सम्पूर्णम् ॥

Transcribed in 1920–21 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Ernakulam, Cochin State

(*d*) वेदान्तसारसर्वस्वम्.
VĒDĀNTASĀRASARVASVAM.

Foll. 35*a*–39*a*. Foll. 39*b*—40*b* are left blank.

A treatise explaining the essential principles of the Advaita-Vēdānta: by Mādhavasarasvatī, disciple of Vidyēndravana.

Complete.

Beginning:

वेदान्तविज्ञानसुनिश्चितार्थैर्योगीश्वरैर्ध्येयमजं विशुद्धम् ।
उमानुमाभ्यामधिगम्यमानं वन्दे महेशं सदनुग्रहेशम् ॥

विद्येन्द्रवननामानं श्रीगुरुं प्रणमाम्यहम् ।
विनेयभृङ्गसंलीढपादपङ्केरुहाश्रयम् ॥

पदवाक्यप्रमाणज्ञा(ज्ञो) माधवाख्यसरस्वती ।
वेदान्तसारसर्वस्वं कुरुते बुद्धिशुद्धये ॥

वेदा ऋगादयो ज्ञेयास्तदन्तस्तच्छिरो मतम् ।
तस्य सारो महावाक्यं तत्त्वमस्यादिरूपकम् ॥

सर्वस्वं तेन यद्बोध्यं ब्रह्मात्मैक्यं परं पदम् ।
तस्य सर्वं स्वमित्येवं व्युत्पत्त्या त्वभिधीयते ॥

End:

एवं वेदान्तसिद्धान्तसङ्ग्रहो लेशतः कृतः ।
गुरुशास्त्रोक्तमार्गेण वर्ततां सत्सु सर्वदा ॥

तं वन्दे गुरुमद्वयं सदमलानन्दं जगद्व्यापिनं
भक्तानामनुचिन्तितार्थकरणे चिन्तामणिं देहिनाम् ।
नित्यं निष्कलमेकमेव मनसा वाचा शरीरेण च
श्रीमन्माधवशारदाख्ययतिमेवाहं भजे सन्ततम् ॥

* * * *

पारप्रयाणसुहृदस्सकलागमानां पापाम्बुराशिपरिशोषविधौ धुरीणाः ।
पायात्सुराधिहरणे भजतां प्रवीणाः पादारविन्दतलपांसुकणा गुरूणाम् ॥

Transcribed in 1920-21 from a MS. of M.R.Ry. Tirunārāyaṇa Raja Avargal, Kottakal, Malabar district.

(*e*) त्रिपुरी.

TRIPURĪ.

Foll. 41*a*—43*a*. Foll. 43*b* and 44 are left blank.

This is the text, a commentary on which is described under R. No. 3380, subdivision (*d*) ante. By Śaṅkarācārya.

Same work as that described under No. 2300, Vol II of the India Office Library Catalogue.

Complete.

Beginning:

शब्दस्पर्शरूपरसगन्धादयो विषयाः पञ्च पृथिव्यादयश्च परमात्मनस्समुत्पन्नाः । पृथिव्यापस्तेजो वायुराकाशमिन्द्रियाणि । अहङ्कारो बुद्धिर्महानव्यक्तम् । तत्र पृथिवी धारणे, आपः पिण्डीकरणे क्लेदने च, तेजः प्रकाशने पचने च, वायुर्व्यूहने, आकाशमवकाशदाने ।

End:

प्रकृतेरन्नामिति सिद्धं नत्वात्मन इति, जाग्रत्स्वप्नसुषुप्तेषु । एक एवात्मा जागरिते वैश्वानरः, स्वप्ने तैजसः, सुषुप्ते प्राज्ञः, स एव निर्विशेषस्तुरीयः ।

परमात्मा सोऽहमिति । यतो पायो(वाचो) निवर्तते(न्ते) । अप्राप्य मनसा सहैवेति ॥

Colophon:

इति त्रिपुरी समाप्ता ॥

Transcribed in 1921-22 from a MS. of M.R.Ry. Vāsudēvasōmayājippāḍ, Viḻayūr, Pattambi, Malabar district.

(*f*) गजेन्द्रमोक्षः.

GAJĒNDRAMŌKṢAḤ.

Foll. 45—56*a*. Fol. 56*b* is left blank.

A poem describing the Puranic story of the release of the Elephant-King by Lord Viṣṇu from the grip of a crocodile: by Vāsudēva.

Apparently complete.

Beginning:

कल्याणं कुरुताद्वो भूतानामधिपतिः स करुणाब्धिः ।
रक्षार्थं सुजनानां सन्निदधत् पुरुवने पुण्ये ॥
शक्त्योभयरूपस्सन् यत् किल नाथः स भुवनचक्रस्य ।
चक्रिणि मातरि जनयाम्बभूव जगदवनजनितरसम् ॥
यस्य च भाजकरूपं प्रसादतो विश्ववित्तविमलयशाः ;
यमयामास सुमेधाः कथासुधा वासुदेवकविः ॥ त्रयं सामन्येनार्या ।

* * * *

भक्त्या प्रणम्य देवं हरिं गुरुं श्रीगुरुप्रसादेन ।
वृत्तैर्गजेन्द्रमोक्षं ब्रूमस्तं शृणुत वृत्तज्ञाः ॥ मुखचपला ।
येषां न मत्सरोत्थं चेतसि सद्वृत्तवासनावन्तः ।
ते शोधयन्त्विदमन्तस्स्खलेन्न को वृत्ततो नेह ॥ जघनचपला ।

इदमार्याप्रकरणम्—

श्रीमानशेषसद्गुणपात्रं शास्त्रार्थसारावित् सुकृती ।
पाण्ड्येषु नीवृति बभाविन्द्रद्युम्नो नराधिपः पूर्वम् ॥ गीतिः ।

End:

अथ पाण्ड्यपतिं सविधे स्थितं प्रणयबाष्पतरङ्गितलोचनम् ।
अतिभक्तिभरेण समाकुलं हरिरुवाच कराम्बुरुहा स्पृशन् ॥ हरिणप्लुता ।
नृपतिलक भवान् विधेर्बलादहह महत् खलु दुःखमन्वभूत् ।
अपगतविपदद्य कल्पसे विमलमते सुचिरं सुखाय मे ॥ अपरवक्त्रम् ।

अनिशमृजुतया भजन्ति ये मामनितरभक्ति भजस्व धर्मभाजः ।
निशमय नृवराचिरादहं तानखिलभयादवमोचयामि सत्यम् ॥ पुष्पिताग्रा ।

R. No. **3638.**

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Kṛṣṇacakravarti Ācārya, Ketandapatti, North Arcot district.

तत्त्वदीपिका.

TATTVADĪPIKĀ.

A treatise purporting to establish that Nārāyaṇa alone is fit to be styled as the Supreme Brahman; by Śrīnivāsācārya, son of Dēśikācārya.

Complete.

Beginning:

(श्रि)यः पतिं जगत्सृष्टे(ष्टि)स्थितिसंहारकारणम् ।
प्रपद्ये भक्तरक्षार्थमवतीर्णं परं हरिम् ॥

यद्यपि भगवान् नारायणः पुरुषोत्तमः परं ब्रह्म परंज्योतिः परतत्त्वं परमात्मादिशब्दैः गीयते सकलजगत्कारणं स ह रक्षणायाजोऽपि जायते मुक्तप्राप्यश्चेति सत्सम्प्रदायः, तथापि शिवादय एव कासु चिद्याख्यासु परत्वेन प्रतीयन्ते । एते जगत्कारणतया मुमुक्षुभिः ध्येया इति केषां चिन्मन्दमतीनां विप्रतिपत्तिर्जाता । अतस्तद्व्युदासाय प्रवृत्तोऽयं ग्रन्थ इति प्रयोजनवानेवायमारम्भः ।

End:

एवं निखिलजगदुदयविभवलयलीलो भगवान् नारायण एव पर इति ॥

Colophon:

(देशि)कार्यसूनु(नो)ः श्रीनिवासाचार्यस्य कृतिषु तत्त्वदीपिका समाप्ता ॥

R. No. **3639.**

Paper. $10\frac{3}{8} \times 9\frac{3}{8}$ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Kṛṣṇacakravarti Ācārya, Ketandapatti, North Arcot district.

Fol. 148 is left blank.

टुप्टीकाव्याख्यानम्—वार्त्तिकाभरणम्.

ṬUPṬĪKĀVYĀKHYĀNAM; VĀRTTIKĀBHARAṆAM.

A commentary on Kumārila's Ṭupṭīkā which forms the Adhyāyas 4—12 of the Śābarabhāṣyavyākhyā.

The commentator Vēṅkaṭēśvaradīkṣita and his preceptor and elder brother Yajñanārāyaṇadīkṣita were the sons of Gōvindadīkṣita.

Contains the first Pāda complete and the third Pāda incomplete in the ninth Adhyāya.

Beginning:

(यज्ञकर्म प्रधान)न्तद्धि चोदनाभूतस्य द्रव्येषु संस्कारः तत्प्रयुक्तस्तदर्थत्वात् । इह खलु भगवानाचार्यस्स्वयमुपजीव्यानन्तरमुपजीवकं निरूपणीयमिति मन्वान उपजीव्यं निरूपितमिति पृच्छति—ननु चेति । अथ उपजीव्योपजीवकभावलक्षणसङ्गत्यभावेऽपि अन्या सङ्गतिरिष्यतामिति चेत्स्यादेतत् । एवं यद्युपजीव्योपजीवकभावसङ्गतये उपजीव्यनिरूपणप्राथम्यं विवक्षितमस्यां न त्वेवमस्ति । अपि तु इह सिद्धये तन्निरूपणप्राथम्यं विवक्षितम् ।

* * * *

ननु प्रास्मै पशव इति प्रयोगेऽपि आमे . . . . व्यक्तीनां पुंलिङ्गत्वात्ताभिरव सम्बन्धः स्यात् न तु मेषीव्यक्त्या, तस्यास्स्त्रीलिङ्गत्वात् इत्यत आह—अस्मिन्निति । स्यादेतदेवं यदि प्रकरणोपस्थाप्यव्यक्तिगतं लिङ्गमस्मैशब्दाभिधेयं स्यात् । इह तु पशु(शब्द) आकृत्यधिकरणन्यायेन न व्यक्तितो निष्कृष्य पशुत्वमेवाभिदधाति ।

* * * *

इदानीं त्वल्पशः प्रकृत्यूहः । प्रायेण तु वचनोहो विचार्यत इत्यभिप्रायेण प्रतिज्ञा उपपन्नेत्याह—यथेति । यथा प्रकृत्यूहस्सिध्यति । तथा प्रथमे पादे विचिन्तितमित्यर्थः । प्रथमे पादे प्रायेण प्रकृत्यूहः चिन्तितः इत्युक्त्वास्मिन्पादेऽस्मिन्नधिकरणे प्रतिनिध्यधिकरण एव चिन्त्यते नान्यत्रेत्यल्पशः प्रकृत्यूहाश्चिन्त्यत इति गम्यते । इदानीमिति । प्रायेणेत्यनुषज्यते ।

End:

सर्वासामपि त्व(ऋ)चां प्रत्येकप्रयत्नसाध्यत्वप्रकाशनार्थमेकधैकधेत्यभ्यासलक्षण ऊहः कर्तव्यः । मेधप(पति)त्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्य(च)न्यायनिगदत्वात्सर्वत्रा(त्रैव)विकारः स्यात् । अद्रिगुप्रैष एव द्विवचनान्ततया श्रूयते.

R. No. **3640.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 254. Lines, 20 in a page. Grantha. Good

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Kṛṣṇacakravarti Ācārya, Ketandapatti, North Arcot district.

टुप्टीकाव्याख्यानम् - वार्त्तिकाभरणम्.

ṬUPṬĪKĀVYĀKHYĀNAM : VĀRTTIKĀBHARAṆAM.

Same work as that described under R. No. 3639 ante, wherein see for the beginning.

Contains the tenth Adhyāya only without the beginning.

Colophon:

इति श्रीमदद्वैतविद्याचार्यसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य साग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिश्रीयज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशद्यस्य साग्निचित्याप्तवाजपेययाजिश्रीवेङ्कटेश्वरदीक्षितस्य कृतिषु टुप्टीकाव्याख्याने वार्त्तिकाभरणे दशमस्याध्यायस्य प्रथमः पादः ॥

End:

तस्मान्नैवं सिद्धान्तः । किं तु प्रकारान्तरेणैव सिद्धान्तो वर्ण्यते— पुरोडाशद्वये . . . . . . योपलक्षितः काल उपांशुयाजाङ्गम् । सर्वत्र चोपलक्षणापायो(येऽ)पि उपलक्ष्यमवतिष्ठते । यथा शङ्खवेलायामागन्तव्यमित्यादौ । तेन कर्माङ्गभूतकालस्यैकपुरोडाशायामपि सद्भावादेकपुरोडाशायामुपांशुयाजनस्य बाध इति ॥

Colophon:

इति श्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य साग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिश्रीयज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशद्यस्य साग्निचित्याप्तवाजपेययाजिश्रीवेङ्कटेश्वरदीक्षितस्य कृतिषु टुप्टीकाव्याख्याने वार्त्तिकाभरणे दशमस्याध्यायस्याष्टमः पादः ॥ अध्यायश्च समाप्तः ॥

R. No. **3641.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Periyatirumāḷigai Śrīnivāsācārya, Alwartirunagari, Tinnevelly district.

Fol. 36 is left blank.

बोधायनापरप्रयोगः.

BŌDHĀYANĀPARAPRAYŌGAḤ.

Similar to work described under R. No. 3399 ante.
Complete.

Beginning :

मृतेऽहनीति । मृतमासतिथौ आब्दिककर्म कुर्यादित्युच्यते ।

अथ निषेधमाह—

यस्य भद्रा तिथीनां स्यात् भानुभौमशनैश्चरैः ।
त्रिपादृक्षैश्च संयोगं(गात्) स(त्रि)योगस्स(स्त्रि)पुष्करः ॥
एव्वृक्षतिथिवारेषु द्विसंयोगो द्विपुष्करः ।
द्विपुष्करेषु चन्द्राष्टमदिनेऽपि वा (?) ॥
वैनाशिके तदंशे वा श्राद्धं श्रेष्ठं न जन्मसु ।
दिनानि समदोषाणि दैवाद्विश्वोद्भवे सति ॥

* * * *

यथाचारमभिश्रवणमुच्छिष्टापिण्डं दक्षिणादिकमपरेऽहनि तिलोदकं च । अथ सूत्रम्—अपि वा सङ्कल्पविधानेन च नित्यं तु कारयेत् । नित्या उपासते श्राद्धानि हवींषि च गामत्रकुर्यादिति बोधायनः ।

End :

श्राद्धे पाकपरिक्रियादिति न्यायेन च सूतकादौ प्राप्तेऽपि पत्न्यां रजस्वलायां सूतिकायामपि पाकानन्तरमवश्यं सपिण्डीकरणं कुर्यात् । प्रेतपत्नी रजस्वला चेत् न कार्यं पाकानन्तरमवश्यं कर्तव्यमिति गौतमवाक्येन प्रयोगकाराः ॥

Colophon :

इति बोधायनापरप्रयोगः ॥

R. No. **3642.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kīḻnattam village, Tinnevelly district.

Fol. 18*b* is left blank.

(*a*) निपातवादार्थः.

NIPĀTAVĀDĀRTHAḤ.

Foll. 1*a*—7*b*.

Same work as that described under No. 4258 of the D.C.S. MSS., Vol VIII.

Complete.

(*b*) सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Foll. 8*a*—11*b*.

Similar to the work described under No. 4325 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

गादाधर्यां सामान्यनिरुक्तौ मूलोक्तलक्षणानां दुष्टलक्षणत्वे दोषेष्वतिव्याप्तिः । अथ च प्रथमलक्षणे समूहालम्बनविषयोदासीनघटादिवारणाय यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयनिवेशावश्यकतया बाधादिप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वात् बाधितहेतावव्याप्तिरपि ।

End:

साक्षात्कारीयविशेषणविशेष्यविषयितानां सर्वासामेव विनिगमनाविरहेण कारणतावच्छेदकतया परामर्शीयविषयतानां साक्षात्कारे प्रकारतया भासमानानां साक्षात्कारकारणतावच्छेदकत्वमस्ति . . . . . .

(*c*) उपसर्गद्योतकताविचारः.

UPASARGADYŌTAKATĀVICĀRAḤ.

Foll. 12*a*—14*b*.

Same work as that described under R. No. 1369(*a*) ante, without colophon. By Paṭṭābhirāma.

Complete.

(*d*) कर्मधारयविचारः.

KARMADHĀRAYAVICĀRAḤ.

Foll. 14*b*—16*a*.

Same work as that described under R. No. 1369(*b*) ante, without colophon. By Paṭṭābhirāma.

Complete.

(*e*) गदाधरीयव्याख्या — कृष्णभट्टीया.

GADĀDHARĪYAVYĀKHYĀ : KṚṢṆABHAṬṬĪYĀ.

Foll. 16*a*—18*a*. Fol. 18*b* is left blank.

Same work as that described under No. 4073 of the D.C.S. MSS., Vol. VIII. By Kṛṣṇabhaṭṭa.

Contains the Siṁhavyāghrī incomplete.

R. No. **3643.**

Paper. 10⅜ × 9¾ inches. Foll. 264. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. acquired through M.R.Ry. C. Gōpālācāriyar, Chingleput.

Bound in two volumes.

मीमांसानयविवेकः.

MĪMĀṀSĀNAYAVIVĒKAḤ.

Same work as that described under No. 4557 of the D.C.S. MSS., Vol IX, and R. No. 1786 ante. By Bhavanāthamiśra.

Contains the Adhyāyas four to eight complete.

R. No. **3644.**

Paper. 10⅝ × 9⅜ inches. Foll. 192. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sādhumala-Vādhyār Tirumalai Ayyangar, Srivilliputtur, Ramnad district.

(*a*) सदनुष्ठानदर्पणः.

SADANUṢṬHĀNADARPAṆAḤ.

Foll. 1*a*—180*b*.

A work dealing with the differences in the conduct and duties of the two sects of Śrī-Vaiṣṇavas.

Contains the eighth Pratiphalana only.

Beginning :

प्रपन्नसन्न्यासिनां श्रीवैष्णवगृहस्थवन्दनानुष्ठानमुपपन्नम् । वचनाच्छिष्टाचाराच्च । सर्वे वैष्णवा यतिनः गृहस्थानां वन्दनं कुर्वन्त्येव । सर्वेषां वैष्णवयतीनां गृहस्थशिष्यत्वात् । मुनित्रयं गोपालदेशिकशिष्यभूतं, केशवा-

र्यशिष्या आदिवण्शठकोपजीयाख्यादयः मठीयाः, ब्रह्मतन्त्रस्वतन्त्रयतिरपि वेदान्ताचार्यशिष्यः । परन्तु सर्वगृहस्थवन्दनं कुर्वन्ति नवेत्यत्रैव विशयः । स त्वकिञ्चित्करः एकत्र वन्दनसिद्धौ तुल्यन्यायेन सर्वेषां वन्दनीयत्वसिद्धेः । सन्न्यासिनां गृहस्थवन्दननिषेधः गुरुव्यतिरिक्तविषयः ।

End:

प्रपन्नसन्न्यासिनां ब्रह्मज्ञश्रीभाष्यकाराद्यभिमानविषयगृहस्थादिवन्दनमुपपद्यत इति नानुपपत्तिः । अतः प्रपन्नसन्न्यासिभिर्विशेषशास्त्रोक्तश्रीवैष्णवजन्ममाहात्म्यात् क्रियमाणं श्रीवैष्णवगृहस्थाद्युद्देश्यकवन्दनमुपपन्नमेव ॥

Colophon:

इति सदनुष्ठानदर्पणे सन्न्यासिकर्तृकगृहस्थादिप्रणामविषयो नामाष्टमं प्रतिफलनम् ॥

(*b*) आर्तिसप्ततिः.

ĀRTISAPTATIḤ.

Foll. 181*a*—185*a*.

Seventy stanzas entreating Gōdā, who is the incarnation of the goddess Earth, to protect the supplicant from difficulties and troubles: by Varada.

Complete.

Beginning:

गोदादेवि नमोऽस्तु ते पुरवरे श्रीधन्विनव्याभिधे
रत्नस्तम्भनिकाय्यगोपुरसुहामाराः(?) प्रतोलीयुते ।
सञ्जातं तुलसीवने जनिमतां सन्त्राणनायाद्य मां
दीनं त्वं किमुपेक्षसेऽहह महोदारेऽम्ब रङ्गप्रिये ॥

End:

श्रीमत्यै गोदायैरङ्ग शास पार्श्वलालितायै ।
वरदाख्यदास:न्तु(स्तु)त पदजलजनुषे सुमङ्गलं भूयात् ॥

Colophon:

इत्यार्तिसप्ततिः वर्हतीश(सुदर्शन)वरददासविज्ञप्तिः सम्पूर्णा ॥

(*c*) गोसखपञ्चविंशतिः.

GŌSAKHAPAÑCAVIṀŚATIḤ.

Foll. 185*a*—187*b*.

Twenty-five stanzas in praise of Gōsakha, i.e., Kṛṣṇa, who is no other than Lord Viṣṇu: by Sudarśanavaradadāsa.

Complete.

Beginning:

मार्कण्डेयकवेरजाखगपतिप्रह्लादसंसेवितं
सेवे गोसखमम्बुजाक्षममलं कारुण्यवारां निधिम् ।
भूमौ चेतनरक्षणार्थमजरो योऽवातरच्छ्रीपतिः
स्वच्छाम्भोभरदर्शपुष्करिणिकातीरे सुरम्यो हरिः ॥

End:

गोसखमम्भोजलोचनं नौमि पीतवाससम् ।
हृदयाब्जनिकेतनं प्रभुं पिञ्छाचूडं सुन्दराङ्गकम् ॥

* * * *

शठमथनवरवरमुनिमुखकलितनुतिवचनविषयमिह वरये ।
पशुसखमहिपतिशयमुपरिचरवसुनरवतीविनुतपाति(द)कमलम् ॥

रक्ताब्जनायकीं तां करुणारूपा[हं] भजेऽजमुग्धाङ्गीम् ।
अर्थिसखकल्पवल्लीं गोसखदयितां सभूषणां देवीम् ॥

निस्समाभ्यधिको लोके जीयादाचन्द्रतारकम् ।
कृष्णो रक्ताब्जनायिकानाथो भक्तेष्टदोऽधिकम् ॥

Colophon:

सुदर्शनवरददासकृतगोसखपञ्चविंशतिः ॥

(*d*) गोविन्दराजस्तुतिः.
GŌVINDARĀJASTUTIḤ.

Foll. 187*b*—188*b*.

A eulogy on Gōvindarāja, who is no other than Viṣṇu: by Sudarśanavaradanārāyaṇa.

Complete.

Beginning:

सेवे गोविन्दराजं सुरनरमुनिभिस्सेव्यमानाङ्घ्रिपद्मं
लक्ष्मीभूम्यां लसन्तं मणिमयमकुटोद्भासमानाननाब्जम् ।

बिभ्राणं शङ्खचक्रे शशिरविलसिते हस्तपद्मद्वयाभ्यां
प्रत्नं . . . . वरगु[रि]णजलधिं मेघसच्छायकायम् ॥

End:

रङ्गाधिपं रविकुलीननृपैस्सुपूज्यं भोगीन्द्रभोगशयनीयतले शयानम् ।
ज्ञानप्रदं तनुभृतां वरदं वरेण्यं श्रीनाथमादरमहं सततं भजामि ॥

Colophon:

इति सुदर्शनवरदनारायणदासकृता गोविन्दराजस्स्तुतिस्समाप्ता ॥

Fol. 188*b* and 189*a* contain the Śrīdēvīmaṅgalāśāsana. Fol. 189*b* contains two stanzas in Tamil in praise of Viṣṇu. Fol. 190*a* is left blank. Foll. 190*b*—192*b* contain a few stanzas in praise of Gōdā and Viṣṇu.

R. No. **3645.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 432. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. acquired through M.R.Ry. Gōpīnātha-Nanda-Śarma, Head-Pandit, Raja's College, Parlakimedi.

Foll. 43 and 432 are left blank.

Bound in two volumes.

नामलिङ्गानुशासनम्, सव्याख्यानम्.

NĀMALIṄGĀNUŚĀSANAM WITH COMMENTARY.

A commentary on Amarasiṁha's Nāmaliṅgānuśāsana, which work has been described under No. 1620 of the D.C.S. MSS, Vol. III: by Nārāyaṇavidyāvinōda, son of Vāṇēśvara and grandson of Jaṭādhara.

This commentary is called Śabdārthasandīpikā.

Complete.

Beginning:

यस्य ज्ञानदयासिन्धोः (. . .) स श्रियै चामृताय च ॥

यस्यावश्यं भवन्ती त्रिजगदुदयनावस्थितिव्यावयन्ती
मूर्तिर्नित्या त्रयी यं भगवत इतरा कुर्वती कल्पसङ्गे ।
ब्रह्मा विष्णुस्त्रिणेत्रस्त्रिगुणगतिमती या तु कल्पावसाने
सम्मीलत्येव यस्मिन्नपि भवतुतरामर्थसिद्ध्यै तदेव ॥

पूर्वग्रामिकुले कलानिधिनिभश्छत्री सुमेरुः स्थितो
भ्राता तस्य जटाधरो द्विजवरो वाणेश्वरस्तत्सुतः ।
तत्पुत्रः प्रथितोऽभवत् कविवरो नारायणो नामतः
तेनेयं क्रियते हिताय सुधियां शब्दार्थसन्दीपिका ॥

सन्ति यद्यपि भूयांसश्शब्दलक्षणचक्षुषः ।
तथापि चामराभ्यासविशेषायैव शिष्यते ॥
प्रायो हि मत्सरधियः कवयः पृथिव्यां
सन्ति क्वचित्क्वचिदपि प्रियसाधुवादाः ।
एकं भिया प्रणमिकर्म करोमि नित्यं
मध्ये द्वयोरपरमादरवार्तयैव ॥

शास्त्रान्तरेषु सत्स्वपि सकलशास्त्रज्ञेयमिह सङ्क्षेपेणैवाभिहितमिति नामलिङ्गानुशासनमभिदधदमरसिंहः परहितव्यपदेशेनेष्टदेवतां नमस्कुर्वन्नपि प्रथमं श्लोकमेकं चकार -- यस्येति । हे धीराः! यस्य ज्ञानदयासिन्धोः ज्ञानं च दया च ज्ञानदये संसारस्य तत्त्वावबोधो ज्ञानं, समस्तविषयपरिज्ञानं वा ज्ञानं परदुःखप्रहरणेच्छा दया ताभ्यां सिन्धुरिव सिन्धुः हेतुचिह्नगोत्रादेरिति तृतीया तृती[य]या इति योगविभागात्समासः । कृता कर्तृकरणयोर्बहुलमिति बहुलवचनाद्वा । षष्ठीसमासो वा । विपुलाशयत्वादिताद्धर्म्येण रूपकः किंविधस्य सर्वसम्पूर्णत्वाद(गा)धस्यानधिगम्यस्य ज्ञानस्य एवंभूतस्य यस्य गुणाः मैत्रीदयाशीलक्षमाशान्त्यार्जवादयोऽणिमादयो वा अनघाः अपापाः पापरहिता इत्यर्थः ।

* * * *

Colophon:

इति श्रीनारायणविद्याविनोदाचार्यविरचितायाममरकोशव्याख्यायां पातालवर्गः समाप्तः ॥

End:

तयप्प्रत्ययान्तम्. तयप्प्रत्ययान्तं च स्त्रीनपुंसकयोः । वर्णानां चतुष्टयी वर्णानां चतुष्टयम् । वेदानां त्रयी वेदानां त्रयम् । क्वचिद्वाच्यलिङ्गम् यथा---त्रय(य्य)स्त्रियः, तयी (त्रयो लोकाः, त्रयाणि त्रीणि) जगन्ति । स्वार्थे ठण् (अण्) तिस्रो विद्याः (त्रैविद्यं) चातुर्वैद्यं, गायत्री, गायत्रम्, आनुष्टुभे(भी)आनुष्टुभम् । केऽप्रमाणाद्याः अजहल्लिङ्गवचना इति केचित् यथा---वेदाः प्रमाणम्, प्रमाणमियं ब्राह्मणी इति ज्ञेयम् ॥

Colophon:

इति विद्याविनोदाचार्यकृतायाममरकोशटीकायां तृतीयः काण्डस्समाप्तः ॥
समाप्तश्चायं ग्रन्थः ॥

R. No. **3646.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Yajñēśvaradīkṣitar, New Kalpathi, Palghat.

Fol. 43*a* gives the name of the owner of the original MS. Foll. 43*b*—44*b* are left blank.

नक्षत्रप्रद्युम्नम्.

NAKṢATRAPRADYUMNAM.

Similar to the work described under R. No. 371(*i*) ante.

Wants the beginning and the end.

Beginning :

शुक्लाम्बरधरं (. . .) विघ्नोपशान्तये ॥

. . . . धानु(न)पुरप्रवेशे

भैषज्यमन्त्रगृहहर्म्यपुरप्रतिष्ठा ।

यात्राभिषेकमखतीक्ष्ण (सु) जातकर्म-

मौञ्जीव्रतादिशुभकार्यमथाश्विनेषु ॥

अश्विनी कृष्णवर्णम्, द्र(दस्र)तारा, अश्वमुखाक(ा)रः पुमान्, अश्वयोनिः, देवगणमतिथिदेवता, वैश्यजातिः, चतुष्पात्रिमुखं मन्दकलोचनं, क्षिप्रं, बाह्यं, समतारा, पट्टणस्थानम्, वायुमण्डलमश(र)णिवृक्षं पक्षि भेरुण्डम् ।

* * * *

यात्राश्राद्धभैषज्येत्यादिशुभकार्येषु प्रशस्तम् । अश्विनीनक्षत्रजातस्य गुणाः—स्थूलशरीरः, दीर्घहस्तः, सूक्ष्मनखः, विशालाक्षस्सुरूपः, सुभरणः, राजपूज्यः, भूषणप्रियः, दुर्जनः, सुखी, सर्वासिद्धलब्धः, चञ्चलः, स्थिरारम्भः, कटिप्रदेशे मत्स्याङ्कितः ।

End :

पञ्चदिनेषु पञ्च मासा वा अपमृत्युः, द्वितीयवर्षमध्ये ज्वराग्निभयम्, दशवर्षे पञ्चदशवर्षे चतुष्पा(दा)दिशस्त्रभयमथवा ज्वरभयं, चत्वारिंशद्वर्षे वा अपमृत्युः, षष्ठवर्षे महाकण्टकं, ग्रहप्राबल्यात्क्रूरतरादिना(नारोगा) भवन्ति, दुर्बलत्वाप्य(त्वस्या)पि दर्शनमस्मिन् परिहरति चतुरशीतिवर्षाणि परमायुः.

R. No. 3647.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Cirumukku Vāsudēvasōmayājippāḍ, Valiyur, Pattambi, Malabar district.

Fol. 80 is left blank.

प्रकरणपञ्चिकाव्याख्या—न्यायसिद्धिः.

PRAKARAṆAPAÑCIKĀVYĀKHYĀ: NYĀYASIDDHIḤ.

A commentary on Śālikanātha's Prakaraṇapañcikā which is a treatise on the Pūrvamīmāṁsā in accordance with the Prābhākara school.

Contains the Prakaraṇas—2nd Nītipatha, 3rd Jātinirṇaya and 4th Nayavīthī complete, and breaks off in the course of the Anumānaparicchēda of the 5th Prakaraṇa, i.e., Pramāṇapārāyaṇa.

Beginning:

अत्र शब्दमात्रस्यार्थासंस्पर्शितया शब्दविशेषावगम्यकार्यात्मा वेदार्थ इति प्रतिज्ञा नोपपद्यते इति केचिदाक्षेपं कुर्वन्ति, तदाक्षेपसमाधानार्थमिदं प्रकरणमिति वदन् सम्प्रदायं प्रयोजनं च दर्शयति—अर्थासंस्पर्शितेति । श्रोतृबुद्धिसमाधानार्थमारभ्यमाणस्य प्रकरणस्य सम्प्रदायप्रतिपाद्यप्रयोजनानि दर्शयति—अर्थासंस्पर्शिता . . . . . . प्रयोजनं निराकरणप्रका . . . प्रभाकरगुरोरिति सम्प्रदायो दर्शितः ।

* * * *

Colophon:

इति न्यायसिद्धौ नीतिपथस्समाप्तः ॥

ननु प्रमाणज्येष्ठं प्रत्यक्षमन्यसंप्रयोगोऽन्यविषयं दृष्टं यथा शुक्ताविदं रजतमिति । ततश्च सम्भवद्व्यभिचारीणि प्रमाणानीति चोदनाप्रामाण्यप्रतिज्ञा हेतुतस्समर्थनीयेतीमामाशङ्कामपनेतुं सर्वज्ञानानां यथार्थत्वं प्रतिपादनीयमिति मत्वारभ्यमाणस्य प्रकरणस्य सम्प्रदायप्रतिपाद्यप्रयोजनानि कथयति—यथार्थं सर्वमेवेदमिति ।

* * * *

एवं प्रत्यक्षस्य व्यभिचाराभावाच्चोदनाप्रामाण्यप्रतिज्ञायां निमित्तपरीक्षा न कर्तव्येति । इदानीं प्रकरणकर्तुः प्रकरणस्य च संज्ञां प्रकरणप्रयोजनं चैकेन श्लोकेनाह—शालिकनाथेनेति ।

Colophon:

इति न्यायसिद्धौ जातिनिर्णयः समाप्तः ॥

End :

अर्थसारूप्यस्य प्रमाणत्वं तत एवार्थप्रतीतिसिद्धेरिति कथमेतस्यार्थाकारज्ञानस्य कारणत्वमुच्यत प्रत्युपेक्ष्यत प्रत्यर्थः ॥

Colophon:

इति (प्रमाणपारायणे) प्रत्यक्षपरिच्छेदस्समाप्तः ॥

चोदनाप्रामाण्यप्रतिज्ञायां निमित्तपरीक्षा कर्तव्येत्यस्यार्थस्य सर्वप्रमाणेष्वव्यभिचारिषु सिद्धिरिति सर्वेषां लक्षणतो व्यवस्थितत्वेनाव्यभिचारित्व . . . . तत्र प्रत्यक्षापेक्षत्वेनेतरे प्रमाणानां प्रत्यक्षस्य प्रथमं लक्षणं विषयं चोक्त्वा बहूनामभिमतत्वेनानन्तरमनुमानलक्षणमवयवदूषणानि च सङ्गृह्य श्लोकेन दर्शयति—ज्ञातसम्बन्ध(नियम)स्येति । अत्रानुमानमिति लक्ष्यनिर्देशः ।

* * * *

एवमन्वर्थसंज्ञासिद्धमनुमानस्वरूपं लोकप्रसिद्धमुद्दिश्य तदाभासविवेचनार्थं लक्षणमुच्यते । तत्र प्रमाता ज्ञातसम्बन्ध एकदेश्यथवोच्यते । इति परोक्तं मा भूदिति स्व.

R. No. **3648.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. S. Gōpālācāriyār, Villiyambakkam, Chingleput district.

प्रद्युम्नचरितम्.

PRADYUMNACARITAM.

A poem in 14 Sargas containing the story of Pradyumna, who is no other than Manmatha born as the son of Lord Kṛṣṇa, after having been burnt by Śiva : by Mahāsēnācārya alias Pappaḍaguru, disciple of Cārukīrti. A reference may be made to No. 12494 of the D.C.S. MSS., Vol. XXI, wherein a brief summary of the story of Pradyumna is given.

Complete.

Beginning :

श्रीमन्तमानम्य जिनेन्द्रनेमिं ध्यानाग्निदग्धाखिलघातिकक्षम् ।
व्यापारयामास न यत्र बाणान् जगद्विजेता मकरध्वजोऽपि ॥
बाल्येऽपि यस्याप्रतिमं सुरेन्द्रो विलोक्य रूपं पुनरीक्षते स्म ।
चक्षुस्सहस्रं युगपद्विधाय नत्वा च तं वीरज(जि)नं विरागम् ॥

जिनेन्द्रवक्त्राम्बुजराजहंसीं प्रणम्य शुक्लामथ भारतीं च ।
उपेन्द्रसूनोश्चरितं प्रवक्ष्ये यथागमं पावनमात्मशक्त्या ॥
कवीन्द्रसीमानमितैर्यदुक्तं गणेश्वराद्यैरतिविस्तरेण ।
तत्पादपद्मद्वयभक्तिशक्त्या सङ्क्षिप्य तद्वक्तुमयं श्रमो नः ॥
द्वीपोऽथ जम्बूपपदोऽस्ति मध्ये द्वीपान्तराणामिह पार्थिवानाम् ।
यो वाहिनीनाथवृतस्सुवृत्तो नित्यं जिगीषुप्रतिमश्चकास्ति ॥

* * * *

तत्रास्ति चामीकरचारुहर्म्या श्रीसङ्गता स्वर्नगरीव रम्या ।
हरेः परं द्वारवतीति नाम्ना पुरी परीतानिमिषालयेन ॥
तत्राभवद्भूपतिरिन्दुकान्तो वंशे यदूनां मणिवत्सुवृत्तः ।
उपेन्द्रनामा नमितारिवर्गः प्रसाधिताशेषदिगन्तलक्ष्मीः ॥

* * * *

Colophon:

इति श्रीसिन्धुराजसत्क(वि)महामहत्तमश्रीपप्पडगुरोः पण्डितश्रीमहासेनाचार्य(स्य) कृते(तौ) प्रद्युम्नचरिते प्रथमः सर्गः ॥

End:

राज्यं प्राज्यमुदस्य निर्मलतमं तप्त्वा तपो दुश्चरं
ध्यानाग्नौ सकलाश्च कर्मसमिधो हुत्वा वयः केवलम् ।
यावज्ज्ञेयविसर्पविश्वकरणग्रामातिगं निश्चलं
देयाद्वः पदमव्ययस्स भगवान् सर्वोऽनिरुद्धो विभुः ॥

Colophon:

इति श्रीसिन्धुराजसत्क(वि)महामहत्तमश्रीपप्पडगुरोः पण्डितश्रीमहासेनाचार्य(स्य)कृते(तौ) प्रद्युम्नचरिते चतुर्दशः सर्गः ॥

नेमिनाथस्य सत्तीर्थे योऽभवदर्धचक्रिकः? ।
तस्यासीद्रुक्मिणी जाया धरित्रीव क्षमागुणा ॥
तयोर्मदनरसञ्जातः धार्मिको गुणवत्सलः? ।
जातमात्रेण गृहीतश्शत्रुणा जन्मवैरिणा? ॥

* * * *

त(स्मा)ज्जातमिदं काव्यं श्रावितं विबुधैस्सदा ।
जिनदासेन लिखितं तत्काव्यं करकौशलात् ॥
सन्मतिं जिनमानम्य सन्मतीसुखहेतवे ।
भक्त्या सरस्वतीं देवीं नुत्वा च गुरुपण्डितम् ॥

चारुकीर्तिमुनीन्द्रस्य सच्छात्रोऽप्यल्पधीयुतः ।
अल्पज्ञेन कृतं ग्रन्थं विबुधैश्शोध्यतामिदम् ॥

Colophon:

इति प्रद्युम्नचरितं सम्पूर्णम् ॥

R. No. **3649.**

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 216. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. K. V. Paraśivam Vādhyān-Nambūdiri, Ācipuram, Kottakkal post, South Malabar district.

Fol. 216*b* is left blank.

ऋग्वेदभाष्यम्.

ṚGVĒDABHĀṢYAM.

A commentary on the Ṛgvēda, which work has been described under No. 1 of the D.C.S. MSS., Vol. I; by Skandasvāmin, son of Bhartṛdhruva.

Contains the Adyāyas two to eight complete in the first Manndala, but wants the beginning.

Beginning:

वृत्रस्यैव शरीरे वज्रं क्षिप्तवानित्य . . . . . या अभवत् उच्यते। उत्तरा उपरि वर्तनी वृत्रस्योपरि निकुठिता प्रलम्बितबाहुः . . . सूत इति सूर्मोद्रा (ता) अधरा(रः) अधोवर्त्ती बाहुजङ्घान्तरस्थायी पुत्र आसीत् । एवं द्रा(दा)नुर्दानव(वृत्र)माका(ता)शये स्थितवती सहवत्सा धेनुः वत्ससहितेव धेनुः। अतिः अतिष्ठन्तीनामनवस्थायिनीनां चलानामनिवेशनानां निविश्यते क्षीयते यस्मिन् नदीनदादौ ।

* * * *

गृह्णाति वृष्ट्यादिना स्थितिमप्येषां करोतीत्यर्थः । . . .

Colophon:

. . . . मृगर्थागमसंहतिम् ।
भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथास्मृति ॥

इति भर्तृध्रुवपुत्रस्य स्कन्दस्वामिनः कृतावृग्वेदभाष्ये द्वितीयोऽध्यायः ॥

End:

अस्मभ्यं दत्वास्मान् भजेत्यर्थः । भज्यमानाश्च वयं मंहिष्ठा मंहतीति दानकर्मा अतिशयेन दातारः सोमस्येत्यर्थः । . . . . सह च मदितारः सह सोमस्य पातार इत्यर्थः । स्याम नित्यं भवेमेत्याशास्महे ॥

Colophon:

इति ऋग्वेदभाष्ये अष्टमोऽध्यायः ॥

R. No. **3650.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1921–22 from a MS. of M.R Ry. Nārāyaṇa Nambūdirippāḍ, Varikkassēri-mana, Vaniamcolam post, Malabar district.

Foll. 61*b* and 62 are left blank.

कौषीतकब्राह्मणव्याख्या — सदर्थविमर्शिनी.

KAUṢĪTAKABRĀHMAṆAVYĀKHYĀ : SADARTHA-VIMARŚINĪ.

A commentary on the Kauṣītakabrāhmaṇa. The commentator, whose name is not given, salutes one Suyajñamuni.

Contains the Adhyāyas one and two complete and breaks off in the third Adhyāya.

Beginning:

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
प्रत्यक्षाभि(दि)प्रमाणैन(र)नसि(धि)गतमभीष्टानभीष्टार्थलब्धि-
प्रध्वंसोपायमुच्चावचमवगमयन्नर्कवत्सर्वपुंसाम् ।
स्वप्रामाण्यैकभूषो रचयितृपुरुषाभावनिर्धूतदोषो
मानानामुत्तमोऽसौ जगति विजयते वैदिकश्शब्दराशिः ॥
श्रुतिकमलविकासबालभानुः श्रितजनकामितदानकामधेनुः ।
मयि निरवधिभक्तिनम्रमूर्ध्नि स्फुरतु गुरोः करुणाकटाक्षपातः ॥
समुदितगुणदोषक्षीरपाथोविवेक-
प्रकटितपटिमानः प्राप्तसत्पक्षपाताः ।
द्विजपरिषदि मुख्यं श्लाघ्यकान् बिभ्रतस्ते
मयि गुरुकरुणार्द्रास्सन्तु विद्वन्मरालाः ॥

श्रीमत्कौषीतकमुनिमहः पूर्वपृथ्वीधराग्रा
दुद्यत्सु(त्सू)ज्ञासितसुकृतिहृद्व्योमसान्द्रान्धकारः ।
विद्वत्पद्माकरसुखकरैरुल्लसद्गोसहस्रै-
राम्नायात्मा दिनकृदनिशं प्रीतये कल्पतां नः ॥

अपौरुषेयत्वं(त्ववि)भूषणा य(यं)श्रुत्यङ्गना युक्तिसखीसनाथा ।
वयं(रं)वृणीते स्म मुनिव(नीश्व)रं तं प्रणौमि कौषीतकनामधेयम् ॥

यद्ग्रन्थसूत्रसन्दृब्धा श्रुत्यत्र(न्त) कुसुमावलिः ।
विश्वमामोदयत्युच्चैस्तं सुयज्ञमुनिं स्तुमः ॥

सरन्तस्सन्ति ये सन्तः सरण्या तत्प्रणीतया ।
अहन्तारहितस्सर्वानहं ताननिशं भजे ॥

सर्वज्ञाचार्यपादाम्बुजसततसमाराधनध्वस्तमोह-
स्थेमा सोमार्धचूडामणिविपुलकृपालब्धचेतोविकासः ।
कुर्वे कौषीतकब्राह्मणविवृतिमहं केवलं बुद्धिशुद्ध्यै
विद्वांसस्तत्परास्तत्परगुणसुखिनस्सन्तु सन्तोषवन्तः ॥

व्याख्यातारो हि पूर्वेऽप्यखिलमकथयन्नेव वेदार्थमुच्चैः
दुर्ज्ञानत्वेन किं तु स्वविदितमुपदेशाध्वना वा स्वतो वा ।
सत्येवं नापवाच्योऽप्यहमपि लघुधीः स्वप्रतीतार्थवादी
मत्तोऽप्यज्ञो जनो यो जगति स च भवेदत्र योग्योऽधिकारी ॥

इह तावदग्निहोत्रादीनि सहस्रसंवत्सरपर्यन्तानि सकलान्यपि वेदविहितानि कर्मजालान्याहवनीयगार्हपत्यान्वाहार्यपचनसंज्ञिताग्नित्रयसाध्यानि समधिगतानि । आहवनीये जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिशास्त्रात्, आहवनीये प्रदानमित्याद्यापस्तम्बसूत्राच्च । श्रौतं वैतानिकाग्निष्विति याज्ञवल्क्यस्मरणाच्चाग्न्याधेयलक्षणं क्रियोत्पन्नत्वनिबन्धना चैषामाहवनीयादिसंज्ञा नार्थान्तरनिबन्धना ।

* * * *

कांचिदाख्यायिकामुपक्रमते—अस्मिन् वै सतनुः प्रीतो भवतीति । अस्मिन् लोक इति ।

* * * *

Colophon:

इति व्याक्रियाद्याद्यखण्डस्य हृद्या मयाकारि कौषीतकब्राह्मणेऽस्मिन् ।
इयं चेद्गताहो न विद्वज्जनेभ्यः स्वदेत स्वदेतैव सप्तार्चिषे सा ॥

* * * *

परत्र चामृतत्वप्राप्तये सम्पद्यते। असन्देहार्थ एवकारः। अभ्यासोऽध्याय-परिसमाप्त्यर्थः ॥

Colophon:

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मूर्च्छालमोहाम्बुधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
आधाने पुनराहितिं च कथयन् कौषीतकिब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय आद्यो गतः ॥

End:

कृतस्य कर्मणस्समृद्धिसिद्ध्यर्थं सर्वैरप्याशासितव्यमेव । अभ्यासोऽध्याय-परिसमाप्त्यर्थः ॥

Colophon:

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेश्श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायः कथिताग्निहोत्रिकविधिः कौषीतकब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय आसीद्गतः ॥
यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान्नः पुष्णातु पुरुषोत्तमः ॥
इत्थं द्वितीय मु(उ)क्तः स्फुटमध्यायोऽग्निहोत्रविध्यन्तः ।
अथ (च) तृतीये क्रमतः प्रदर्श्यते दर्शपूर्णमासविधिः ॥

तत्र दर्शपूर्णमासौ तावद्विधित्सुस्तदङ्गभूतं ततः पूर्वं कर्तव्यमुपवासाख्यं कर्म विधत्ते—यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्ति तस्मादुपवसति ।

* * * *

कीर्तयति प्रतिष्ठे वै द्यावापृथिवी प्रतिष्ठित्या एवेति । षष्ठी द्वितीयार्था प्रति-तिष्ठन्त्यनयोः प्राणिन इति प्रतिष्ठे।

R. No. **3651.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Kilakodil Eluttachan, Kaniyampuram, Ottapalam post.

Fol. 62 is left blank.

विष्णुविलासव्याख्या—विष्णुप्रिया.

VIṢṆUVILĀSAVYĀKHYĀ: VIṢṆUPRIYĀ.

A commentary on the Viṣṇuvilāsa, which work has been described under R. No. 3442 ante.

Contains the Sargas one to six only.

Beginning:

श्रीमद्विष्णुविलासाख्यकाव्यस्यानतिविस्तरम् ।
इदं विष्णुप्रियाख्यानं व्याख्यानं लिख्यते मया ॥

चकास्तीति । चूर्णीसरितः शुभे तटे यस्य जयन्तमङ्गलं निकेतनं चकास्ति । नारसिंहं वपुरास्थितः स हरिः नश्चेतसि प्रकाशतामित्यन्वयः । चूर्णीसंज्ञायाः सरितो नद्याः शुभे पुण्ये तटे तीरप्रदेशे यस्य हरेर्जयन्तमङ्गलमिति प्रसिद्धं निकेतनं क्षेत्रं चकास्ति शोभते । स तादृशं नारसिंहं नरसिंहसम्बन्धि वपुश्शरीरमास्थितोऽङ्गीकुर्वन् । सनातनः शाश्वतोऽनाद्यन्त इत्यर्थः ।

* * * *

Colophon:

इति विष्णुविलासव्याख्यायां विष्णुप्रियाख्यायां प्रथमस्सर्गस्समाप्तः ॥

End:

स तादृशो जनहितानां लम्भकः प्रतिपादकश्शम्भुशिष्यः । स खलु तथा प्रसिद्धः परशुरामो वो युष्माकं श्रेयसेऽभ्युदयाय श्रेयः प्रवर्धयितुं जायतां सम्भवत्विति कविराशास्त इति समस्तं मङ्गलम् ॥

Colophon:

इति श्रीविष्णुविलासव्याख्यायां विष्णुप्रियाख्यायां षष्ठस्सर्गस्समाप्तः ॥

अम्बरतटिनीनिलयं कम्बुकशाकलितपाणिकमलयुगम् ।
अम्बुजलोचनमारादम्बरचरवन्दितं वन्दे ॥

R. No. **3652.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. C. Vāsudēvasōmayājippād, Valiyur, Pattambi, Malabar district.

Foll. *5a*, *33b*—*35a*, *39a*, *40b*, *41a*, *42b* and *50b* are left blank.

अग्निष्टोमकारिका.

AGNIṢṬŌMAKĀRIKĀ.

Similar to the work described under R. No. 634(*c*) ante.

Complete.

Beginning :

एकस्सन् बहुधा विप्रैः कल्पितोऽध्वरकर्मणि ।
यस्स गीर्वाणवदनो वाक्छ्रियं विदधातु नः ॥

जनयन्तु सदा सन्तो वचसां पाटवं मम ।
तान् नमस्कृत्य सङ्क्षेपाद्वक्ष्येऽहं पद्यकारिकाम् ॥

अग्निष्टोमं मया मूलं नाधिगम्यैव सङ्ग्रहात् ।
अविस्मृत्यै मद्विधानां विलिख्ये च क्रियाक्रमम् ॥

शब्दविद्भिर्नैव दृश्यं श्रुतिविद्भिस्तथैव च ।
अपहासभयाद्गोप्यं वैकल्याच्छब्दवृत्तयोः ॥

आदावासाद्य पात्राणि नानादारुमयानि च ।
मृन्मयानि समिद्बर्हिर्वस्त्राणि पशवो घृतम् ॥

* * * *

विप्रान् प्रदक्षिणीकृत्य नमस्कृत्य प्रसाद्य च ।
अभिवाद्य गुरून्मुख्यान् पाणावालम्ब्य याचयेत् ॥

रक्षार्थं प्रथमं प्रार्थ्य याजकान् यजनाय च ।
अध्वर्युपञ्च ब्रह्मत्वहौत्रमौद्गात्रमप्यथ ॥

सदस्यं वरयेदेतान् मन्त्रवत्कल्पवर्त्मना ।
यजमानः सहर्त्विग्भिर्बोधायनाविधानतः ॥

End :

अन्येष्वायतनेष्वग्नीन्यजमानोऽवधारयेत् ।
ब्राह्मणान् भोजयेत्पश्चाद्यजमानः स्वशक्तितः ॥

अग्निष्टोमक्रिया कल्प्या श्लोकवत्प्रोक्षणाय च ।
कारिका नाम लिखिता भवदासेन पुस्तके ॥

नमोऽस्तु वेदवादिभ्यो याजकेभ्यो नमो नमः ।
क्षन्तुमर्हन्ति विद्वांसः तेभ्यो नित्यं नमो नमः ॥
शिवद्विरात्रं, पूर्वांशौ चेन्य(त्य)पात्रे त्रिदिनमतिदिने सङ्घेन व्यनीते ।

Colophon:

अग्निष्टोमकारिका समाप्ता ॥

R. No. **3653.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgari and Telugu. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyatt Valiya-acchan, Cennamangalam, Parur post, Cochin State.

(*a*) श्रीकृष्णचरितम्.

ŚRĪKṚṢṆACARITAM.

Foll. 1*a*—9*b*. Fol. 10 is left blank.

A treatise describing the birth of Lord Kṛṣṇa and the incidents which took place during His boyhood. This work is also called Bālagōpālalīlāmuktāsara.

Breaks off in the third Aṁśa.

Beginning:

जय गोपाल जगन्निवास गोपीजनलोलाम्बुदनील दिव्यबाल ।
जय वक्त्राम्बुजमध्यवर्त्तर्हि(र्तिन्) सस्मितशिञ्जानविभूषणाखिलाङ्ग ॥
जय गोपिकारमण जगतीतलाभरण
जय दीनजनशरण दितिसंहरण ।
जय भूरितरकरुण दलिताखिलावरण
जय समीरितकरुणदिव्यावतरण ॥

* * * *

अस्ति प्रसिद्धा मधुरेति भूम्यां पुरी मनोज्ञा यदुभूपतीनाम् ।
राजा महान् माधुरशूरसेनान् ररक्ष तामास्थित उग्रसेनः ॥

* * * *

Colophon:

इति बालगोपाललीलामुक्तासारे प्रथमोंऽशस्समाप्तः ॥

End :

सुर्तीविहीनविदूर हरे निजसुलभपयोदधिचोर एहि ॥

Colophon :

इति बालगोपाललीलामुक्तासरे द्वितीयोऽशस्समाप्तः ॥

अथ तदानीं सर्वर्तुमनोहरे बृन्दावनान्तरे गोगोप(पी)गोपैस्सह विहर्तु-कामेन स्वभक्तचकोरसोमेन स्वात्मन्यध्यस्तानेककोटिब्रह्माण्डजालेन राजगोपालेन मनसि नियन्त्रितास्सदसि सङ्गताः श्रीरामकृष्णसहवासशमितपावकोपतापाः नन्दोपनन्दादिनिखिलगोपाः ।

* * * *

सहलयनटनगीते सदृशविरहिताय सरसहृदय भवते सकलमुनिजनहिताय अनुगृह्णीष्व —इत्थं स नाकपत्नीभिः प्रतिलब्धेन्द्रियप्राणः.

Transcribed in 1921-22 from a MS. of the Principal of the Maharaja's College, Vizianagram.

(*b*) नृसिंहस्तुतिः.

NṚSIṀHASTUTIḤ.

Foll. 11*a*—12*b*.

A eulogy addressed to Narasiṁha : by Trivikramasārvabhauma

Complete.

Beginning :

प्रलयरविकरालाकाररुक्चक्रवालं
विरल यदुरोत्रोरोचितार्णवाला(?) ।
प्रतिभयमतकोपात्युत्कटोच्चाट्टहासिन्
दह(दह)नृ(नर)सिंहासह्यवीर्याहितं मे ॥

End :

लिकुचतिलकसूनुः सद्धितार्थानुसार्थी
नरहरिनुतिमेकां(तां) शत्रुसंहारहेतुम् ।
अकृत सकलपापध्वंसिनीं यः पठेत्तां
व्रजति नृहरिलोकं कामलोभादिमुक्तः ॥

Colophon :

इति श्रीत्रिविक्रमसार्वभौमकृतौ नृसिंहस्तुतिः सम्पूर्णा ॥

(*c*) जगदीशशतकम्.

JAGADĪŚAŚATAKAM.

Foll. 13*a*—19*a*. Foll. 19*b* and 20 are left blank.

A centum of stanzas in praise of Jagadīśa (Kṛṣṇa) : by Raghurāja-siṁharāju, patronized by Kṛṣṇacandra, Raja Bahadur.

Complete.

Beginning :

यद्भासा स विभाति विश्वमखिलं सार्केन्दुतारागणं
यत्किञ्चिद्भ्रुकुटीकटाक्षकलया नाशोद्भवौ पालनम् ।
यत्पादाम्बुजधूलिधार . . .. यत्नं सुराः
तं नीलाचलवासिनं यदुपतिं वन्दे जगद्वन्दितम् ॥

* * * *

जात्या तु गोपकुलजाः परधर्महीना
गोपाश्च गोपवनितास्तुलसीवने तैः ।
चिक्रीड रासपरिमण्डलमण्डितो यो
वन्दे प्रभुं पतितपावननामधेयम् ॥
त्वं सर्वदिव्यगणबृन्दसमन्वितोऽसि
तैस्सर्वगर्हितगुणैर्वलितस्तथा त्वम् ।
लज्जावनं तवकरे मम सर्वथास्ति
मामुद्धरस्व कृपया जगदीशकृत्ये ॥

End :

त्वदाधारस्त्वद्बलोऽहं त्वमेव शरणं मम ।
जगन्नाथ दयासिन्धो रघुराजे दयां कुरु ॥
जगदीशस्य शतकं रघुराजकृतं शुभम् ।
पठतां शृण्वतां शश्वज्जगदीशः प्रसीदतु ॥
रामेन्दुखण्डविधुभिर्मितेऽब्दे तैर्ये उत्तमे ।
शनावमायां शतकं जगदीशाय निर्मितम् ॥

Colophon:

इति श्रीसिद्धिश्रीबान्धवेशमहाराजाधिराजश्रीमहाराजश्रीराजाबहदुद(दर्) श्रीकृष्णचन्द्रकृपापात्राधिकारिश्रीरघुराजसिंहराजुदेवविरचितं जगदीशशतकं सम्पूर्णम् ॥

R. No. **3654.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 8. Lines, 20 in page. Dēvanāgarī, Grantha and Malayalam. Good.

Transcribed in 1921–22 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) बलातैलविधानम्.
BALĀTAILAVIDHĀNAM.

Foll. 1*a* – 3*b*.

On the preparation of a medical oil from the roots of the shrub Balā.

Complete.

Beginning:

आयुर्वेदस्य कर्तारमात्रेयं भिषजां वरम् ।
सुखासीनं महात्मानं हुताग्निं वेदपारगम् ॥
शिष्यश्रेष्ठस्समागम्य प्राञ्जलिः प्रियदर्शनः ।
अग्निवेशोऽब्रवीद्वाक्यं महायोगपरायणः ॥
द्वादशैकं सहस्राणां ग्रन्थं व्याख्यातवान् भवान् ।
वातरोगविनाशाय बलातैलं पठन्नपि ॥
आवर्तनविधिर्नोक्ता(क्तो) भवता करुणात्मना ।
तदहं श्रोतुमिच्छामि लोकानां हितकाम्यया ॥

End:

शुण्ठीगलूचीयुक्तैश्च पूतीशय्याकपल्लवैः ।
ससिन्धूत्थगुलं वाक्यं विरेकार्थं प्रशस्यते ॥
महिषीविड्रसे याममेकं पक्त्वा विशोषयेत् ।
अन्तर्गताङ्कुरं त्यक्त्वा चतुर्यामं सुखाम्बुनि ॥
विनिक्षिप्य विशोष्याथ क्षीरेऽप्येवं विनिक्षिपेत् ।
नालिकेरजले तद्वदेवं शेफालशोधना ॥

Colophon:

इति बलातैलविधानं समाप्तम् ॥

Fol. 4 is left blank.

Transcribed in 1921–22 from a MS. of M.R.Ry. Koteri Nīlakaṇṭha Nambūdri, Tirkkaṇḍiyūr, Tirur, Malabar district.

(*b*) सामुद्रिकलक्षणम्.
SĀMUDRIKALAKṢAṆAM.

Foll. *5a*—*7b*. Fol. 8 is left blank.

Similar to the work described under No. 1248 ante.

Complete.

Beginning:

आदिदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शनम् ।
सामुद्रिकं प्रवक्ष्यामि शुभदं पुरुषस्त्रियाम् ॥
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ॥
जघन्या नवतिः प्रोक्ता मध्यमं तु दशाङ्गुलम् ।
अष्टोत्तरशतं यस्य रूपमुत्तमलक्षणम् ॥
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरत्तं(क्तं) त्रिगम्भीरं त्रिविस्तीर्णं प्रशस्यते ॥

End:

न धर्मपर एव स्यान्न चार्थपर एव वा ।
न कामपर एव स्यात्सर्वान् सेवेत सर्वदा ॥
धर्मः पूर्वो धनं मध्ये जघन्ये काममाचरेत् ।
अहन्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥
कामं पूर्वं धनं मध्ये जघन्ये धर्ममाचरेत् ।
वयस्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥

R. No. **3655.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kīḻnattam, Tinnevelly district.

(*a*) पक्षतावादः.

PAKṢATĀVĀDAḤ.

Foll. 1*a*—15*a*.

Similar to the work described under No. 4259 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

पक्षतायां साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतेत्यत्रावच्छिन्नत्वस्य स्वरूपसम्बन्धविशेषरूपत्वे तादृशनिश्चयत्वघटकसमुदायवृत्त्यवच्छेदकत्व-

निवेशे महानसीयवह्नित्वावच्छिन्नसाध्यके महानसीयवह्निमान् वह्निसामान्यवा-न्वेति संशयस्य पक्षतात्वानुपपत्तिः ॥

End :

बाधनिश्चयत्वव्यापकप्रतिबन्धकतायां साध्यतावच्छेदकाविशिष्टाविषयकानि-श्चयत्वाव्यापकत्वनिवेशान्नोक्तसंशयस्य पक्षतात्वापत्तिः ॥

Foll. 15*b* and 16 contain the Upādhinirvacana portion.

(*b*) सव्यभिचारपत्रम्.

SAVYABHICĀRAPATRAM.

Foll. 17*a*—26*b*.

A critical pamphlet on the Savyabhicāra. Similar to the work described under No. 4315 of the D.C.S. MSS., Vol. VIII.

Complete.

Beginning:

सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकानिश्चयसा-मान्यं स्वसमानकालीनहेतुमत्ताज्ञानसमानधर्मितावच्छेदककानुमितिसामान्यवि-रोधि, तादृशविशिष्टत्वं स व्यभिचारत्वम् । अत्रासम्भववारणाय कालीनान्तम् ।

End :

स्ववैशिष्ट्यम्—स्वावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्न-प्रकारतानिरूपकत्वसहितसाध्यव्याप्यहेतुविषयकत्वसम्बन्धेनेति सर्वमनाकुलम्.

Foll. 26*b*—33*a* contain the Dōṣalakṣaṇavicāra with notes. Foll. 33*b* and 34 are left blank.

R. No. 3656.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 42. Lines, $20\frac{1}{4}$ in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu-Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

धातुकाव्यम्, सव्याख्यानम्.

DHĀTUKĀVYAM WITH COMMENTARY.

Same text as that described under No. 11538 of the D.C.S. MSS., Vol. XX. It is stated that Nārāyaṇa supplemented the poem written by Vāsudēva. The commentary is by Rāmapāṇivāda.

Contains the first Sarga complete and the second incomplete.

Beginning :

. . . . |
निर्ममे येन सर्वस्वं परस्मै ब्रह्मणे नमः ॥
श्रीनारायणकविना रचिता (तं यद्)धातुकाव्यमतिभव्यम् ।
क्रियते तस्य विवरणं किमपि मया (राम)पाणिपा(वा)देन ॥

अथ महाकविरादौ तावद्वस्तुनिर्देशप्रकारेण स्वचिकीर्षितं प्रतिजानीते—
उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात् ॥

प्राक् पूर्वं वासुदेवेन वासुदेवनाम्ना कविना पाणिनिसूत्राणामष्टाध्या-(यीगता)नां सूत्राणां मण्डलं समुदायः उदाहृतमुदाहरणरूपकाव्यात्मना ।

End :

तुहिर् दुहिर् उहिर अर्दने—तुहिधातोस्तुहिनं, दुहिधातोर्दोहः, उहिधातोः प्रपूर्वात् प्रोहिष्यन्निति रूपम् । अर्ह पूजायाम्—अत्र सप्त धातवः ॥

Colophon :

इति श्रीनारायणभट्टपादमहाकविविरचिते धातुकाव्ये प्रथमस्सर्गः ॥

श्रीनारायणनामकोपरिनवग्रामस्वधामाधिप-
क्षोणीदेवकविप्रकाण्डकलितं यद्धातुकाव्यं शुभम् ।
व्याख्या तस्य तु पाणिपा(वा)दकलिता सङ्क्षेपरूपैव या
तस्यां प्राथमिको निकामगुरुतादुर्गोऽपि सर्गो गतः ॥
प्रद्योतनस्योदयमाप्य गोपाः श्वेतांशुकोन्मेदुरचारुवेषाः ।
अखिन्नरुग्घोटकरुट्यमानमार्गा जवेनाल्लुठिता निरीयुः ॥

इतः परमात्मनेपदिनः । गोपाः प्रद्योतनस्योदयमाप्य जवेन निरीयुः इत्यन्वयः । गोपा नन्दगोपादयः । प्रद्योतनस्य सूर्यस्योदयमाप्य प्राप्य

* * * *

सम्पद्वर्धनाय प्रस्थितवानिति सकलमवदातम् । मङ्गलम् । स्तन्भु विश्वासे, वृतु वर्तने, वृधु वृद्धौ, शृधु शब्दकुत्सायाम्, स्यन्दू प्रस्रवणे, कृपू सामर्थ्ये । वृत् द्युतादिर्वृतादिश्च वृत्तः । अत्र सप्त धातवः ।

R. No. 3657.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Veṅgu Śāstrigaḻ, Kaḻḻakkāḍu, Tinnevelly district.

Fol. 52*b* is left blank.

स्तेयारण्यमाहात्म्यम्.

STĒYĀRAṆYAMĀHĀTMYAM.

On the greatness and religious sanctity of the holy place Kaḻḻakkāḍu, situated at a distance of about ten miles from the Sermadevi railway station in the Tinnevelly district.

Contains the Adhyāyas 1—16 complete.

Beginning:

विघ्नौघध्वान्तसम्राश्वं वियद्गहैस्सुपूजितम् ।
विश्वेश्वरस्य तनयं विघ्नराजमहं भजे ॥
लाभे मार्गं सुविद्यानां यस्यां भक्तिर(चञ्चला) ।
तां वन्दे भारतीं भक्त्या सर्वलोकैकमातरम् ॥

* * * *

सूतः—

ताम्रपर्णीनदीतीरे देशे पुण्यजनाकुले ।
योजनद्वयमात्रे तु पुण्ये श्यामानदीतटे ॥
स्तेयारण्यस्य मध्ये तु श्रीमत्पुष्करिणीतटे ।
पुण्यं पुरहरेशस्य क्षेत्रं सर्वाघनाशनम् ॥
क्षेत्राणामुत्तमं न्यूनमित्युक्तं भवताधुना ।
विस्तार्य तत् समाचक्ष्व भुक्तिमुक्तिफलप्रदम् ॥

* * *

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे पञ्चमखण्डे क्षेत्रवैभवमालिकायां षष्ठांशे स्तेयाटवीमाहात्म्यं नाम प्रथमोऽध्यायः ॥

End:

विधूतपापास्तत्काले ययुश्चोराटवीं प्रति ।
स्नात्वा श्यामापगातोये पुष्करिण्यां तथैव च ॥

दृष्ट्वा पुरहरेशानं तत्रोषित्वा दिनत्रयम् ।
श्यामापगां प्रशंसन्तः तथा पुष्करिणीमपि ॥
* * * *
तत्र स्थिता मुनिवराः स्वान्तःकरणसंमते ।
आहत्याहृत्य सम्भारान् सत्रं पूर्ववदासत ॥

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे पञ्चमखण्डे स्थानवैभवमालिकायां षष्ठांशे स्तेयारण्यमाहात्म्यं नाम षोडशोऽध्यायः ॥

R. No. 3658.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 160. Lines, 20 in a page. Grantha Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śiṣṭa Yōgānanda Śāstrigāru, Repalle, Godavari district.

भागवतव्याख्या—प्रतिपदार्थप्रकाशिका.

BHĀGAVATAVYĀKHYĀ: PRATIPADĀRTHAPRAKĀŚIKĀ.

Same work as that described under R. No. 1721 ante. By Dēvulapalli Śōbhanādrisūri.

Contains the Adhyāyas 1—19 only.

Colophon:

इति श्रीभागवतव्याख्यायां प्रतिपदार्थप्रकाशिकाख्यायां देवुलपल्लिशोभनाद्रिसूरिविरचितायां दशमस्कन्धे प्रथमोऽध्यायः ॥

R. No. 3659.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. acquired through M.R.Ry. Tātadēśika Tātācāriyar, Villiyambakkam, Chingleput district.

Fol. 50 is left blank.

मीमांसामकरन्दः.

MĪMĀṀSĀMAKARANDAḤ.

An explanatory amplification of the Mīmāṁsāsūtras: by Vēṅkaṭādhvarin, son of Raghunāthadīkṣita and grandson of Appayācārya of Vādihaṁsāṁbuda family.

For the beginning see under No. 4461 of the D.C.S. MSS., Vol. IX.

Contains the first Pāda of the eighth Adhyāya complete, the second Pāda of the same Adhyāya incomplete and a portion of the second Pāda in the ninth Adhyāya.

End:

स्तोभस्यैके द्रव्यान्तरेऽभिव्यक्ति(निवृत्ति)मृग्वत् । ऋगक्षराभिव्यक्ति-(णां निवृत्ति)रूपोपकारसम्पादकत्वात् साम्नातिदेशेऽपि स्तोभानां तदसम्पाद-कत्वान्नातिदेशः स्यादित्युत्थितेस्सङ्गतिः । सामस्वतिदिश्यमानेषु स्तोभाना-मप्युत्तरयोरतिदेशोऽस्ति न वेति चिन्त्यते ।

* * * *

ननु व्रीहीन् प्रोक्षति व्रीहीनवहन्तीत्यादिविहितस्य प्रोक्षणादेर्व्रीहिस्वरूप-प्रयुक्ततया नीवारेषु च तदभावात् कथं प्रोक्षणादिप्रवृत्तिरिति चेन्न—धर्माणां स्वरूपप्रयुक्तत्वे वैयर्थ्यापत्त्या.

R. No. **3660.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 340. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. K. A. Lakṣmaṇa Śāstrigaḷ, Kalpathi, Palghat.

Fol. 340 is left blank.

यामलदानपद्धतिः

YĀMALADĀNAPADDHATIḤ.

On details connected with the gifts to be made to Brahmans, as a sort of expiation for the commission of sinful acts. The procedure is laid down in the Rudaryāmala.

Complete.

Beginning:

हरिं हरं विधातारं नत्वा गणपतिं गुरुम् ।
दानानां यामलोक्तानां रचयाम्याशु पद्धतिम् ॥

आदौ फलगुप्तदानरचना—

एतद्दानं चिकीर्षुस्तु(स्त्री)वा पुरुषो वा ग्रहणादिपुण्यकालेषु देवालया-दिपुण्यदेशेषु गोमयानुलेपनरङ्गवल्ल्यादिरचितभूभागोपरि श्वेतवस्त्रं प्रसार्य तस्मिन् पृथुतरं कूश्माण्डं निधाय तन्मध्ये सहस्रनिष्कान् पञ्चशतनिष्कान् सार्धद्वि-

शतनिष्कान् यथासम्भवनिष्कान् वा विधाय एवं रचयित्वा दानसङ्कल्पं कुर्यात् । एवङ्गुणेत्यादि—ममेह जन्मनि जन्मान्तरेषु सम्भावितब्रह्महत्यादिसमस्तपापक्षयार्थम् ।

* * * *

सन्तानप्रतिबन्धनिवृत्तिद्वारायुष्मत्पुत्रपौत्रपरम्पराप्राप्त्यर्थं श्रीगोपालकृष्णप्रीत्यर्थं रुद्रयामलोक्तप्रकारेण फलगुप्तदानं करिष्ये ।

End :

अत्राहिताग्न्यभावे साग्निकदानप्रतिग्रहसम्मतिवचनम्—

आहिताग्नेरभावे स्याद्ब्राह्मणः साग्निकः परः ।
दाने प्रतिग्रहे चैव आहिताग्निवदुत्तमः ॥

तन्मुखं नावलोकयेत् ॥

Colophon :

इति यामलग्रन्थस्सम्पूर्णः ।

R. No. **3661.**

Paper. $10\frac{5}{8} \times 3\frac{3}{4}$ inches. Foll. 280. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 280 is left blank.

विष्णुतत्त्वनिर्णयटीकाविवृतिः— वाक्यार्थदीपिका.

VIṢṆUTATTVANIRṆAYAṬĪKĀVIVṚTIḤ : VĀKYĀRTHA-DĪPIKĀ.

A commentary on Jayatīrtha's Viṣṇutattvanirṇayaṭīkā, which work has been described under No. 4843 of the D.C.S. MSS., Vol. X : by Śrīnivāsa, disciple of Yadupati. At the beginning of the work the commentator salutes Vyāsa, Ānandatīrtha, Jayīndra, Raghūttama, Vēdēśa and Yādavācārya, the preceptor of the commentator.

Contains the Paricchēdas one to three complete.

Beginning :

श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम् ।
श्रीव्यासं मध्वसंसेव्यं समस्ताभीष्टदं भजे ॥
श्रीमदानन्दतीर्थार्यचरणावाश्रयेऽनिशम् ।
रुद्रादिसर्वविबुधैः संसेव्याविष्टदौ सताम् ॥

श्रुतिक्षीराब्धिमामन्थ्य धीमन्दरमहीभृता ।
प्राप्ता न्यायसुधा येन तं जयीन्द्रगुरुं भजे ॥
रघूत्तममुनीन् वन्दे तच्छिष्यानमलात्मकान् ।
छान्दोग्यभाष्यस्य टीकाकर्तॄन् वेदेशयोगिनः ॥
वेदेशमुनिसत्पादसेवासम्प्राप्तवै ।वान् ।
यादवार्यान् वरसुधाटीकाकारान् वयं नुमः ॥
यैरहं शुकवत्सम्यक् शिक्षितोऽस्मि कृपालुभिः ।
तान् वन्दे यादवाचार्यान् सदा विद्यागुरून् मम ॥
अथैतत्कृपया श्रीनिवासेन विदुषा हरेः ।
तत्त्वनिर्णयटीकाया व्याख्यानं क्रियते मया ॥
बुधैरपि सुदुर्बोधे ग्रन्थे यन्मम साहसम् ।
तत्पारयन्तु निपुणाः गुरुपादरजःकणाः ॥

सर्वज्ञकल्पाः टीकाकारा जयतीर्थश्रीमच्चरणाः स्वचिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं स्वेष्टदेवतानमनरूपं मङ्गलं कृत्वा शिष्यशिक्षार्थं ग्रन्थादावुपनिबध्नन्ति—विश्वस्येति । उत्तमपुरुषप्रयोगबलादहमिति कर्ता लभ्यते । अह रमावल्लभं वन्द इति क्रियाकारकयोजना । ग्रन्थस्य वाङ्मनसव्यापार-रूपत्वात् रमाया वाङ्मनसदेवतात्वादवश्यं सा वन्दनीया सा च न पृथग्व-न्दनीया ।

Colophon:

इति श्रीमद्यदुपत्याचार्यपूज्यचरणाराधकेन श्रीनिवासेन विरचितायां विष्णु-तत्त्वनिर्णयटीकाविवृतौ वाक्यार्थदीपिकायां प्रथमः परिच्छेदः ॥

End:

तथा चास्य ग्रन्थस्य भक्तिपरवशेन मया कृतत्वं विचार्य सूरयोऽत्र न दोषान् विचारयेयुः । तद्भक्त्या तत्कारुण्यसरणिप्रपन्नोऽहमपि यत्किञ्चिदिदं महतां मान्य एवास्मीत्याशयः—इत्यशेषमतिमङ्गलम् ॥

यस्तत्त्वदेवान् सम्प्रेर्य कारयामास सत्कृति(म्) ।
पूर्वं तत्स्वानन्दतीर्थहृद्धितं व्यासमा . ते ॥
श्रीयादवार्यसत्पादसेवकेन यथामति ।
तत्त्वनिर्णयटीकाया विवृतिस्तदनुग्रहात् ॥

श्रीनिवासेन रचिता नात्मा(म्ना) वाक्यार्थदीपिका ।
व्यासपादार्पिता भूयात् सतां व्याख्योपकारिणी ॥
जयरामवचांसि क्व क्व चाहं मन्दबुद्धिमान् ।
तथाप्यस्मद्गुरुवरानुग्रहः किं न साधयेत् ॥

Colophon:

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्विष्णुतत्त्वनिर्णयटीकाविवृतौ वाक्यार्थदीपिकायां तृतीयः परिच्छेदः ॥

R. No. 3662.

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 43. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Valiya Raja, Kottakkal, Malabar district.

Fol. 43 is left blank.

शब्दकौस्तुभटिप्पणी.

ŚABDAKAUSTUBHAṬIPPAṆĪ.

Same work as that described under R. No. 1316 ante.

Contains the Navāhnika portion only, which wants the beginning and the end.

R. No. 3663.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kiḻnattam, Tinnevelly district.

(*a*) प्रतिबन्धकत्ववादार्थः.

PRATIBANDHAKATVAVĀDĀRTHAḤ

Foll. 1*a*—9*b*.

A controversial discussion investigating the meaning of the expression 'Pratibandhakatva' and incidentally denying the existence of Śakti, which is considered by the Mīmāṁsakas as one of the Padārthas; by Kṛṣṇa Tātācārya of Tirupputkuḻi.

Complete.

Beginning:

धर्मं कार्यानुकूलं विघटयति तरां तत्तदेतद्विरोधी-
त्येतत्सिद्धान्तसारं प्रशमयतुमना यन्महादेव ऊचे ।

बाधज्ञानस्य न स्यादनुमितिरिपुतेत्येतदत्यन्तदूष्यं
मन्यन्ते ये तु तेषां निरसनकुतुकी कृष्णनामा सुधीन्द्रः ॥

कार्यानुकूलधर्मविघटकत्वस्य प्रतिबन्धकपदार्थत्वे बाधज्ञानस्यानुमितिप्रतिबन्धकत्वानुपपत्तिरित्याचख्यौ महादेवः । अनुमित्यनुकूलात्ममनस्संयोगादिनिष्ठशक्तिविघटकतया बाधज्ञानस्यानुमितिप्रतिबन्धकत्वोपपत्तेरिदमसङ्गतमेवेत्याचक्षते मञ्जूषाकृतः । अत्रेदं विचार्यते—किमिदमनुकूलत्वं नाम ? जनकजनकतावच्छेदकसाधारणः प्रयोजकत्वापरपर्यायः स्वरूपसम्बन्धविशेष इति चेत् ।

End:

तत्र च मण्यभावत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य मण्यभावात्मकत्वेन तत्प्रतियोगित्वस्य मण्यभावाभावे विद्यमानत्वादिति चेदत्र ब्रूमः—कारणतावच्छेदकाभावत्वनिरूपितप्रतियोगित्वं प्रतिबन्धकत्वमिति निष्कर्षः ॥

(*b*) अन्वयव्यभिचारवादार्थः.
ANVAYAVYABHICĀRAVĀDĀRTHAḤ.

Foll. 9*b*—18*b*.

A discussion of the meaning of Anvayavyabhicāra, i.e., the existence of cause without its effect: by Kṛṣṇa Tātācārya of Tirupputkuḻi.

Complete.

Beginning:

अन्वयव्यभिचारोऽसौ विबुधैरपरिष्कृतः ।
कृष्णाभिधानसुधिया प्रकटीक्रियते तराम् ॥

कारणसत्त्वेऽपि कार्यानुत्पत्तिरन्वयव्यभिचार इत्याचक्षते । स्वसमानाधिकरणाभावप्रतियोगिकार्यकत्वं तदर्थः । भवति च कपालाकाशसंयोगसत्त्वेऽपि कपालद्वयसंयोगशून्यकाले घटानुत्पादात् ।

End:

कार्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदककार्यतावच्छेदकत्वमन्वयव्यभिचारः फलित इति सर्वमतिरमणीयम् ॥

(*c*) विशेषवादार्थः.

VIŚĒṢAVĀDĀRTHAḤ.

Foll. 18*b*—38*a*.

An explanation of the characteristics of the fifth Padārtha called Viśēṣa in accordance with the Nyāya philosophy: by Kṛṣṇa who supports the views of Mahādēva.

Complete.

Beginning:

रघुकुलजलधौ जातं संश्रितसन्त्राणमाश्रये कंचित् ।
अधिकोन्नतेरपि यतो विनतैरग्र्यं फलं करग्राह्यम् ॥
महादेवप्रोक्ते सहृदयबुधानां सुरुचिरे
विशेषाणां लक्ष्मण्यभिदधुरसाङ्गत्यमिह ये ।
वचोभङ्गीं तेषां दृढघटितदोषां प्रकटयन्
सुधीः कृष्णाभिख्यो रचयति मुदं सर्वविदुषाम् ॥

स्वत एव व्यावृत्तत्वं च स्वाभिन्नलिङ्गजन्यस्वविशेष्यकस्वसमानजातीय-भेदानुमित्यविषयत्वम् । साजात्यं च पदार्थविभाजकोपाधिरूपेण । तेन घटादेः तादात्म्येन व्यावृत्तत्वेऽपि विशेषस्य गुणशून्यत्वेन इतरभेदानुमितिविषयत्वेऽपि द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेऽपि न क्षतिरित्याह—महादेवः ।

End:

अत्र च घटो गुणभिन्नः इत्याद्यनुमितिमादाय स्वपदेन घटं सङ्गृह्य गुणादावतिप्रसङ्गपरिहाराय स्वविशेष्यकत्वपदफलितस्ववृत्तित्वोपादानमिति दिक् ॥

(*d*) प्रमात्वचिह्नविवृतिः.

PRAMĀTVACIHNAVIVṚTIḤ.

Foll. 38*a*—45*a*.

An explanation of the characteristics of valid cognition.

Complete.

Beginning:

रघुवीरपदाम्भोजं स्मृत्वा श्रीशैलकृष्णनामासौ ।
रचयन्विदुषां तोषं तनुते विवृतिं प्रमात्वचिह्नस्य ॥

तद्वति तत्प्रकारकानुभवो यथार्थानुभव इति सङ्ग्रहकारः । अत्र तद्वत्ता प्रकारतासम्बन्धेन तत्सम्बन्धित्वम् । शुक्त्यादेरपि कालिकसम्बन्धेन रजतत्ववत्त्वेऽपि इदं रजतमिति भ्रमे नातिव्याप्तिः नवा तादात्म्यत्वस्याधेयत्वानियामकत्वेऽपि तत्संसर्गकप्रमायामव्याप्तिः ।

अत्र केचित्—तद्वतीत्यत्र सप्तम्यर्थो विशेष्यत्वमाश्रयतासम्बन्धेनानुभवान्वयिन्या(यीत्या)चख्युः । तन्मन्दम्—रजतरङ्गयोरिमे रङ्गरजते इति ज्ञाने इदं रजतत्ववति रजतत्वप्रकारकमिति व्यवहारप्रसङ्गात् ।

End:

जलत्वेन जलावगाहि जलं गन्धवदिति ज्ञानसाधारणतया गन्धप्रकारतायाः तद्व्यापकतावच्छेदकत्वानुपपत्तेरित्यपास्तम् ।

श्रीशैलकृष्णनाम्ना रचितामेतां प्रमात्वचिह्नस्य ।
विवृतिं हृदये धीराः कलयन्तु विचारदत्तकुतुका ये ॥

(*e*) अनुपलब्धिवादार्थः.
ANUPALABDHIVĀDĀRTHAḤ.

Foll. 45*b*—51*b*. Fol. 52 is left blank.

A discussion on a point of difference between the Naiyāyikas and the Mīmāṁsakas, about Anupalbdhi being a distinct Pramāṇa.

Wants the beginning and the end.

Beginning:

विशेषणतासम्बन्धेन वृत्तिमतामभावादीनां प्रत्यक्षे विशेषणताप्रत्यासत्तेः हेतुत्वम् । विशेषणता च क्वचिदिन्द्रियसम्बन्धानुयोगिका क्वचिदिन्द्रियानुयोगिकैव प्रत्यक्षे हेतुः ।

* * * *

यत्र यस्य प्रतियोगिनो योग्यानुपलब्धिः तत्र तद्विशेषितस्यैव तदभावस्य प्रत्यक्षोदयात् परमाण्वादौ पृथिवीत्वादेरनुपलम्भो न योग्यः । यत्राधिकरणे यमापादकीकृत्य तदुपलम्भः आपादयितुं शक्यते, तदधिकरणनिष्ठस्य विशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकतत्प्रकारकोपलम्भाभावस्य प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपपारिभाषिकयोग्यताया आवश्यकत्वात् ।

End:

स्थूलजलादेरपि तादृशव्यापकत्वाभावापत्तिरिति वाच्यम्; तत्तत्प्रतियोगितावच्छेदकभेदविशिष्टतथाविधावच्छेदकताव्यापकत्वस्यैव निवेशनीयत्वात्.

R. No. 3664.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Yajñēśvaradīkṣitar, New Kalpathi, Palghat.

Fol. 143b gives the name of the owner of the original MS. Fol. 144 is left blank.

शिवतत्त्वसारसङ्ग्रहचन्द्रिका.

ŚIVATATTVASĀRASAṄGRAHACANDRIKĀ.

A collection of authoritative stanzas taken from various sources, purporting that devotion towards Śiva will enable the devotee to obtain salvation: by Gurumūrti of Śrīdhara family of Gautamagōtra and disciple of Bōdhānanda. The author lived in the village Pañcanada (Tiruvadi), situated on the banks of the river Cauvery in the Cōla country.

Incomplete.

Beginning:

गुरुं प्रणम्य प्रथमं गणाधिपं महेश्वरं श्रीपरदेवतां च ।
मुदे महाशाम्भवपुङ्गवानां निबन्धमेतं रचयामि रम्यम् ॥
शिवैक्यताप्रापकहेतुभूतं श्राव्यं समस्तागमसारभूतम् ।
शैवप्रकाशाख्यमिमं निबन्धं विलोक्य मर्त्यास्सुखिनो भवन्तु ॥
येषां दृढा भक्तिरिहास्ति शास्त्रे विन्दन्ति सम्यक् सकलं रहस्यम् ।
प्राग्जन्मपुण्याद्विमला मनीषा ते निन्दका नास्य भवन्ति लोकाः ॥

श्रीचोलदेशे कावेर्यास्तटे पञ्चनदस्थले ।
श्रीधरान्वयजातेन नाम्ना श्रीगुरुमूर्तिना ॥
श्रीमद्गौतमगोत्रेण शिवपादावलम्बिना ।
श्रीमद्बोधानन्दगुरोः कृपया लिखितं मया ॥
स्मृत्यागमपुराणानां श्लोकान् सङ्गृह्य यत्नतः ।
मुक्तिदा शिवतत्त्वैकसारसङ्ग्रहचन्द्रिका ॥
सुधाधिक्कारिणी पापहारिणी भवतारिणी ।
शृण्वतां पठतां पुंसां शिवभक्तिप्रदायिनी ॥

* * * *

सूतः—

तस्मादेव मुनीश्वराः प्रतिदिनं शैवानि भक्त्या परं
श्रेयःप्राप्तिपथानि कर्णपुटकैर्युक्तैः पुराणान्यहो ।

पंयान्येव विमुक्तये नरवरैर्भक्तैरयत्नेन ते
मुक्तिं यान्ति शिवेन साकमपि वा सायुज्यमन्ये श्रियम् ॥

Colophon :

श्रीशिवरहस्यादिसर्वपुराणागमतन्त्रसङ्ग्रहे शिवतत्त्वसारसङ्ग्रहचन्द्रिकायां पुराणश्रवणमाहात्म्यं नाम प्रथमोऽध्यायः ॥

End:

ग्रामं शिवाय यो दद्यात्स मुक्तो भवति ध्रुवम् ।
देशदानेन चानन्त्यं न शक्यं तत्र कीर्तितुम् ॥
भूमिप्रदो वसेत्स्वर्गे यावत्कालस्य सङ्ख्यया ।
तस्माच्छतगुणं कालं तद्धर्ता नरके वसेत् ॥
विंशत्यष्टौ त्रयः कोट्यो नरकाणां सुदारुणाः ।
क्रमेण तासु पच्यन्ते देवब्रह्मस्वहारिणः ॥
योऽन्यदत्तां स्वदत्तां वा हरेद्भूमिं नराधमः ।
स पच्यतेऽक्षयं कालं नरकेषु क्रमेण सः ॥
देवब्रह्मपरद्रोहं तस्मात्सन्त्यज्य शङ्करम् ।
ये पूजयन्ति सततं ते यान्ति परमं पदम् ॥

R. No. 3665.

Paper. 10⅝ × 9⅜ inches. Foll. 76. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sādhu-Malai-Vādhyār Tirumalai Ayyaṅgār, Nāṭakaśālai street, Srivilliputtur, Ramnad district.

(*a*) प्रपत्त्यधिकारिविशेषणत्वनिष्कर्षः.
PRAPATTYADHIKĀRIVIŚEṢAṆATVANIṢKARṢAḤ.

Fol. 1*a*.

Herein it is stated that the Caramaślōka in the Gītā does not enjoin the performance of Prapatti as the means of salvation, but as a qualifying adjunct in one desirous of obtaining it.

Complete.

Beginning :

अग्निविद्यादितुल्यत्वात्प्रपत्तिः परतो विधेः ।
विधेयान्तरसत्त्वादप्यधिकारिविशेषणम् ॥

सर्वत्र सिद्धमेव स्यादधिकारिविशेषणम् ।
क्वचिद्विध्यन्तरैस्सिद्धं क्वचिच्च स्वत एव तत् ॥
तत्राद्यमग्निविद्यादि द्वितीयं कामनादिकम् ।
अग्निविद्योपनीतिश्च दीक्षा श्रीस्सत्रसंश्रया ॥

End:

अतो भक्तिपदे तस्या नोपायत्वं क्वचिद्भवेत् ।
न वा प्रपत्तिवद्भक्तेरधिकारत्वसम्भवः ॥
इत्येव ग्रन्थयास्स्पष्टं मीमांसादीपिकाख्ययोः ।
न मया किञ्चिदद्यात्र वक्तव्यमवशिष्यते ॥

Colophon:

इति प्रपत्तेरधिकारिविशेषणत्वनिष्कर्षः ॥

(*b*) चरमश्लोकसिद्धतात्पर्यटिप्पणी.

CARAMAŚLŌKASIDDHATĀTPARYAṬIPPAṆĪ.

Foll. 2*a*—58*a*.

A treatise giving out the purport of the Caramaślōka: by Yatirāja-dāsa of Śrīśaila family, who, in the beginning of the work, salutes Yatirāja, Lōkācārya and Varavaramuni.

Complete.

Beginning:

स्मृत्वा यतीन्द्रलोकार्यौ नत्वा वरवरं मुनिम् ।
करोमि चरमश्लोकसिद्धतात्पर्यटिप्पणीम् ॥

तत्र तावत्सत्सम्प्रदायपरम्पराप्राप्तोऽयमर्थः— सर्वधर्मपरित्यागपूर्वकं भगवन्तमेव शरणं गतस्य स एव भगवान् साधनमिति सिद्धोपायपरश्चरमश्लोक इति । अत्र कस्य चिच्छान्दसस्य पैशाचम्—नायं श्लोकस्सिद्धोपायं प्रतिपादयति प्रवृत्तिनिवृत्त्यन्वयविरहिणश्शास्त्रस्य प्रतिपादनापूर्त्या नैराकाङ्क्ष्यायोगात् । तथा च वार्तिकम्—

यावत्खलु प्रमातॄणां प्रवर्तननिवर्तने ।
शब्दा न कुर्वते तावन्न निराकाङ्क्षबोधनम् ॥ इति ।

End:

तस्माच्चरमश्लोकपूर्वार्धं स्वरूपयाथात्म्यज्ञानप्राप्तयोस्साधनान्तरत्यागभगवदेकशरणवरणयोः भगवदभिमतत्वज्ञापनमुखेन शोकनिवर्तनपरं, तदुत्तरार्धं च

चेतनसंरक्षणे भगवत एव प्राप्तिप्रदर्शनेन शोकनिवृत्तिपरमिति सिद्धपरतयैवायं श्लोकः पुरुषार्थपर्यवसायीति सर्वं समञ्जसम् ॥

Colophon:

श्रीशैलयतिराजाख्यदासस्य कृतिरुज्ज्वला ।
वर्धतां चरमश्लोकसिद्धतात्पर्यटिप्पणी ॥

Fol. 58*b* contains the name of the owner of the original MS. Foll. 59*a*—60*b* contain a small portion of this work. Foll. 61*a*—64*b* contain a portion of Śrīvacanabhūṣaṇārthavicāra.

(*c*) ஒண்ணியசன்மவிளக்கம்.
OṆṆIYAJANMAVIḶAKKAM.

Foll. 65*a*—76*a*. Fol. 76*b* is left blank.

See the Tamil Part of this Triennial Catalogue. By Lōkācārya. Complete.

R. No. **3666.**

Paper. 10⅝ × 9⅜ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. K. V. Paramēśvara-Vādhyān Nambūdiri, Āccipuram, Kottakkal, South Malabar district.

Foll. 78*b* is left blank.

रुक्मिणीकल्याणम्.
RUKMIṆĪKALYĀṆAM.

A poem describing the story of the marriage of Rukmiṇī with Śrī-Kṛṣṇa: by Vidyācakravartin, the well-known commentator on the Kāvyaprakāśa and Alaṅkārasarvasva. The whole of the first Sarga contains the genealogy of the King Ballāla of Dvārasamudra in the Mysore State. The work contains many interesting historical points.

Contains the Sargas 1—16 complete.

Beginning:

. . . पादेष्वनुशासनेषु कलासु सिद्धस्य नु(दु)रासदस्य ।
अर्थस्य सूक्ष्मस्य कवीन्द्रसूक्तिरेकैव साक्षादिह कामधेनुः ॥
वाद्यैर्विचित्राभिनयाभिरामैर्गीतोत्तरैः स्फीतरसप्रवाहैः ।
निर्मथ्य वेदांश्चतुरः प्रणीतं नाट्यागमं पञ्चमवेदमाहुः ॥

* * * *

वंशे यदोर्होसलनामधेयः पुरा किलासीत्प्रवरो नृपाणाम् ।
अद्यापि न म्लानिमुपैति कर्णे लोकस्य यत्कीर्तिमयोऽवतंसः ॥

* * * *

तेजस्विनोऽपि स्वत एव पूर्वान् परांश्च ये(यो)होसलभूमिपालान् ।
मध्येमणी हारमणीनिवाग्र्यैस्तेजोभिरुद्द्योतयति(ते)सुकामम् ॥
विद्यासु नाम्ना भुवनत्रयेऽपि यश्चक्रवर्तीत्युपगीतकीर्तिः ।
आस्थान(वि)द्वत्प्रवरस्स तस्य राज्ञ प्रशस्तिं प्रथयाम्बभूव ॥
अयत्नसंसिद्धकुलानुयायिविद्यापदा(वता)मुग्रतरैस्तपोभिः ।
उमापतेर्दक्षिणतो मुखाद्यसा(स्ता)क्षात्प्रपेदे वरतत्त्वदीक्षाम् ॥
निरग्निहोत्राः परिमन्दवाचो न केचन ब्रह्मविचारशून्याः ।
आसन्ननैसर्गिकसिद्धविद्या द्विजाः कुले यस्य तपोभिरिद्धैः ॥
तस्योक्तिभिस्सिद्धसरित्प्रवाहस्फीताभिरुन्मीलितदोःप्रतापः ।
बल्लालभूपस्तनये नृसिंहे ससागरं भूवलयं न्यधत्त ॥
. . . (नै)पुण्य(ण)भूमिभागमजेयमालोक्य बलैरनल्पैः ।
यः प्राप्य दुर्वारभुजप्रतापश्चोलं च पाण्ड्यं च रणे जिगाय ॥

* * * *

त्रि(श्री)वैद्यनाथः किल चक्रवर्तिसुतस्तदास्थानमहासमुद्रम् ।
मरीचिभिश्चन्द्र इवामलाभिरहर्निशं वर्धयति स्म वाग्भिः ॥

* * * *

श्रीसोमभूमीपतिरुग्रवीर्ये तस्य(स्वस्या)महिष्यास्तनये नृसिंहे ।
व्यपेतरागो वयसोऽवसाने निवेशयामास धुरं धरण्याः ॥

* * * *

श्रीबिज्जलाम्बावरजस्य पाण्ड्यपृथ्वीपतेः पश्चिमसिन्धुभर्तुः ।
स पद्ममां नाम सुतां सुरूपां जग्राह पाणौ नरसिंहभूपः ॥
मुहुर्नमन्त्या परिलालनेऽपि तन्व्या नृपः पाणिगृहीतया सः ।
धर्मानुबद्धं समुपाससाद कामं यथार्थं च कृपाणयष्ट्याम् ॥
तस्याभवत्संसदि वासुदेवो यथार्थनामाधिपतिर्बुधानाम् ।
यस्मै चतुर्वेदिगुरुस्सुतां स्वामदत्त लक्ष्मामव पट्टमार्यां(र्ख्यां)म ॥
दुर्वादिनस्तर्कशतैर्जयन्तं चेतो नयन्तं रसपारवश्यम् ।
पृथ्वीपतिः प्रीतिमवाप्य पाण्ड्यस्तं वल्लभोऽसीति यमाजुहाव ॥

* * * *

नृसिंहभूपोऽथ कुलप्रदीपे वल्लालदेवे तनये नयज्ञे ।
पराक्रमस्यैकनिधावुदारे समर्पयामास महीं महात्मा ॥

* * * *

विदूरदेशोऽप्यनयत्प्रसादं यन्निर्मदः केरलभूमिपालः ॥
शौर्योष्मणा यस्य निपीतसारं धैर्याम्बुधिं स्वं विपुलं निरीक्ष्य ।
अनाश्वसन्नम्बुधिमल्पसारं दत्ते करं कोङ्कणराजवर्गः ॥

* * * *

श्रीवल्लभाख्यस्य सुतोऽतिरात्रयज्वा महादेवसमाह्वयोऽभूत् ।
बल्लालपृथ्वीपतिरभ्यगच्छद्यस्माचतस्रोऽपि नृपालविद्याः ॥

* * * *

तेनोपनीयावरजो विनीतः प्रसिद्धनामा कविचक्रवर्ती ।
वल्लालभूपस्य मनोऽभिरामैर्वाचां विलासैरतिवल्लभोऽभूत् ॥
उन्मूलितस्थापितभूमिपालदेशेषु पद्यैरुपवर्ण्य गीताः ।
. . . . . महाशिलासु वल्लालभूपस्य भुजप्रतापाः ॥
उदाहृतित्वेन नयैर्निबध्य काव्यप्रकाशादिषु लक्षणेषु ।
निवेशिता येन जगत्समक्षं ख्यातिं गता होसलराजगाथाः ॥
वेदान्तयोगागमसङ्ग्रहीत्रा प्रकीर्णकस्याहितदर्पणेन ।
व्याख्याय येनोपचितानि लोके काव्यप्रकाशादिनिबन्धनानि ॥
यच्छत्रभद्रासनचामराद्यैः स्फीतैर्महाराजपदैर्भुनक्ति ।
सभासु राज्ञां च विपश्चितां च साहित्यराज्यं कविचक्रवर्ती ॥
सोऽहं प्रवृद्धामुपभुज्य लक्ष्मीं प्रसूय पुत्राननुरूपशीलान् ।
विचार्य चात्मानमबाह्यकामो विष्णुं भजे वाक्कलुषापनुत्त्यै ॥
पराशरव्यासशुकोपदिष्टं यथावदालम्ब्य कथाशरीरम् ।
व्यावर्ण्यते भीष्मसुताविवाहः फलान्तमारभ्य हरेः प्रसूतिम् ॥

* * * *

Colophon:

इति श्रीविद्याचक्रवर्तिनः कृतौ रुक्मिणीकल्याणे महाकाव्ये कवि-काव्यवंशानुचरितोपवर्णनं नाम प्रथमस्सर्गस्समाप्तः ॥

द्वापरान्ते भुवो भारमवतारयितुं हरे(रि)ः ।
इयेषाभ्यर्थितो धात्रा क्षात्रं जन्म यदोः कुले ॥

End:

सादरातिशयजातकौतुकां बालमित्रमवबोध्य तं प्रियाम् ।
उत्सुकोत्सुकतयानुसंस्मरन् शैशवे स्वचरितान्यवर्णयत् ॥
स्वे परे कृतधियो जवाशया योषितः परिजनाश्वराः स्थिराः ।
विष्णुलोकसुखमेत्य निन्यिरे रुक्मिणीपतिसलोकसम्पदम् ॥
क्षपितनिखिलभारामित्थमुत्सिक्तदैत्य-
क्षितिपतिदमनेनावाप्तवर्णव्यवस्थाम् ।
भुवमशिषदशेषां रुक्मिणीतन्त्रधर्मो
गुरुजनपरतन्त्रो मर्त्यरूपो मुकुन्दः ॥

Colophon:

इति श्रीविद्याचक्रवर्तिनः कृतौ महाकाव्य रुक्मिणीकल्याणे षोडशः सर्गस्समाप्तः ॥

R. No. 3667.

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Jīyar-Maṭham, Tirukkuruṅguḍi, Tinnevelly district.

Foll. 35*b* and 36 are left blank.

(*a*) यतिराजशतकम्.

YATIRĀJAŚATAKAM.

Foll. 1*a*—10*b*.

One hundred eulogistic stanzas addressed to Śrī-Rāmānujācārya, also known as Yatirāja: by Aḻaśiṅgabhaṭṭa alias Narasiṁha, son of Yōgānandārya.

Complete.

Beginning:

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
कल्याणं नस्तनोतु प्रचुरतरनिजालोकपूर्णाखिलेशः
प्रोद्दृप्यद्यातुधानप्रमुखशलभहृद्धेतियुक्तः प्रदोषे ।
पूज्यः प्राज्यश्रियाढ्यो विमलशुभदशान्ताश्रितोऽन्तस्तमोभित्
प्रह्लादारोपितोऽयं यदुगिरिशिखरे श्रीनृसिंहाख्यदीपः ॥

* * * *

श्यामाभोज्ज्वलशक्रनीलविलसद्दामाश्रितोरस्स्थिता
रामा यस्य विभाति साम्बुदतटिद्दामा स डिल्लीशितुः ।
जामाता यदुशैलवासरसिको रामादिभिः पूजितः
श्रीमान् संयमिसार्वभौमतनयः क्षेमाय बोभूयताम् ॥

* * * *

श्रीमद्वैकुण्ठसेनापरिबृढशठजिन्नाथपाथोरुहाक्षा
रामश्रीयामुनाद्या अपि गुरुचरणास्तोषमुन्मेषयन्तु ।
येऽमी सत्त्वाभिरामा अपि विततमरस्फूर्तिविभ्राजमाना
दोषाश्लेषप्रमुक्ता अपि दधति विधोः पादसेवां हि नित्यम् ॥
शय्या काचिन्मुरारेः कलयतु कुशलं दिव्यभोगाभिरामा
सौमित्रिस्सौख्यदायी भवति धरणिजाकान्तसेवानुरक्तः ।
रेवत्याः प्राणकान्तस्समवतु सततं धेनुकप्राणहारी
श्रीमान् योगीश्वरोऽयं रचयतु नितरां सम्पदुज्जृम्भणं नः ॥
श्रीमत्संयमिसार्वभौमचरणद्वन्द्वाब्जपुष्पन्धयः
श्रीमौञ्जचायनवंशमौक्तिकमणिस्सच्छास्त्रपारङ्गतः ।
यद्वद्रीश्वरपूजनैकनिरतो वात्सल्यवारां निधिः
मालिन्यं मम मानसं शमयतु श्रीरङ्गराजो गुरुः ॥
अपादाक्रान्तविबुधलोको वा कुप्रतिग्रहे ।
अनासक्तो बलिद्वेष्ट(ष)रहितो वामनो गुरुः ॥
वेदान्ताचार्यवर्यो वृषभगिरिपतेर्दिव्यघण्टावतारः
श्रीमत्सौम्योपाचि(य)न्ता भुजगपरिबृढीयावतारश्च जीयात् ।
यत्प्रोक्ता भाष्यकर्तुर्विशदयति गुणान् सप्ततिर्विंशतिर्मे
याभ्यां वेदान्तयुग्माह्वयमणियुगलं दत्तमस्मद्गुरुभ्यः ॥
जीयाच्छ्रीरङ्गराजान्वयकलशपयोराशिराकासुधांशुः
यद्वद्रीशाङ्घ्रिपाथोरुहपरिचरणप्राप्तसौजन्यलक्ष्मीः ।
त्रातश्रीपञ्चरात्रस्तुहिनरुचिकचग्राहिकीर्तिप्रवृत्तिः
योगानन्दार्यभट्टश्शुभगुणजलधिर्विद्वदग्रेसरोऽयम् ॥

तत्सूनुरलशिङ्गाख्यदासोऽयं मुग्धधीरपि ।
स्तोतुं पद्यशतेन त्वां यतते यतिपुङ्गव ॥
दीक्षाचार्याः पञ्च शाण्डिल्यमुख्यास्साक्षाच्छेषं त्वामिह स्तोतुमिच्छोः ।
प्रेक्षावद्भिः श्लाघनीयां गिरं मे द्राक्षामृद्वीं सादरास्ते दिशन्तु ॥
हे रामानुजयोगिवर्य भवतस्स्तोत्रं चिकीर्षन्नहं
श्रीनारायणसंयमीश्वरगुरूत्तंसं मुहुश्चिन्तये ।
यस्तोताद्रियतीश्वरामृतनिधेराहृत्य भाष्याह्वयं
पीयूषं घनवैभवो यदुगिरेर्मूर्ध्न्यभ्यवर्षन्मुदा ॥
*　　*　　*　　*
स्वस्मिन् संयमिसार्वभौम भवतश्श्लाघ्यैर्गुणैर्भूषिता
विद्वद्भिः परिगृह्यते स्वयमियं नीचापि वाचा मम ।
जातीचम्पकमल्लिकासरसिजश्रेष्ठैस्सुमैर्योजितां
निस्सारामपि किं विमुञ्चति सुराधीशोऽपि मोचात्वचम् ॥

End :

इति किल कविशार्दूलो योगानन्दार्यनन्दनो नृहरेः ।
दासोऽळशिङ्गभट्टश्चक्रे स्तोत्रं यतिक्षमाभर्तुः ॥
यतिसार्वभौमपदयोस्समर्पिता शुभदास्तु पद्यशतरत्नमालिका ।
यदुभूधरेन्द्रपदपद्मपूजनप्रवणाग्रगेन नरसिंहसूरिणा ॥
शालिवाहशकाब्दानां सार्धसप्तशते गते ।
सहस्रे नन्दने वर्षे कन्याराशिगते रवौ ॥
स्वतातपादजन्मर्क्षे श्रविष्ठाख्ये शुभे दिने ।
अशेषविदुषां गोष्ठीमध्ये सम्पत्सुताग्रतः ॥
श्रीभाष्यकारपादाब्जनुतिरेषा समर्पिता ।

(*b*) यतिराजशतकव्याख्या.

YATIRĀJAŚATAKAVYĀKHYĀ.

Foll. 10*b*—35*a*.

A commentary on the work described above: by the same author as that of the text.

Complete.

Beginning :

योगानन्दप्रभुं नत्वा योगानन्दार्यसूनुना ।
व्याख्यास्यतेऽळशिङ्केन स्वकृतिर्यतिराट्स्तुतिः ॥

आदौ तावत्कविः प्रारिप्सितस्य यतिराजस्तोत्रस्य निर्विघ्नपरिसमाप्त्यर्थं स्वेष्टदेवतानमस्काररूपं मङ्गलं निबध्नाति—श्रीमदिति । श्रीमत् लक्ष्मीयुतमित्यर्थः । अत्र मतु(तुप्)प्रत्ययस्य नित्ययोगार्थकत्वात् निरन्तरं निजवक्षस्स्थलरममाणयोगलक्ष्मीविशिष्टता सूच्यते ।

End :

एवं जय जय जलजाक्षदिव्यतल्पेत्यारभ्य जीयाच्छ्रीयादवाचल इत्यन्तं श्लोकशतेन भाष्यकारं स्तुत्वोत्तरमङ्गलमाह—मङ्गलमित्यादिभिः पञ्चभिश्श्लोकैः। उक्तं स्तोत्रं कविः स्वनाम्ना मुद्रयति—इतीति । स्फुटोऽर्थः ॥

Colophon :

इति श्रीयोगानन्दार्यभट्टाचार्यतनयस्य अळशिङ्गभट्टाचार्यस्य कृतिषु यतिराजशतकव्याख्या सम्पूर्णा ॥

R. No. **3668.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 207. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Fol. 207 is left blank.

भागवतम्, सदर्थप्रकाशिकासहितम्.

BHĀGAVATAM WITH SADARTHAPRAKĀŚIKĀ.

A commentary on the Bhāgavata, which work has been described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I : by Śaṅkara, who wrote this at the request of his pupil Pāliyēśa. The commentaries Amṛtataraṅgiṇī and Kṛṣṇapadī are quoted and incorporated in this commentary.

Contains the Skandha 11 complete.

Beginning :

परपदमधिरोढुं प्रार्थितः पाद्ममुख्यै-
र्धरणिभरनिरासश्रान्तिभारादिवैकः ।
रहसि निजरहस्यं प्रोच्य सख्ये निविष्ट-
स्सहसितमुखपद्मस्त्रायतां नो मुकुन्दः ॥

निजशिष्यपालियेशप्रार्थनया शङ्कराख्यशिवविप्रः ।
भागवतैकादशगाः प्राक्तनाविवृतीस्समुच्चिनोम्यद्य ॥
प्रवृत्तितः परानन्दकृष्णक्रीडानुवर्णिता ।
तन्निवृत्त्या परानन्दपदारोहोऽनुवर्ण्यते ॥

एवं तावद्दशमस्कन्धे भूभारावतरणाय निजविभूषितयदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्णस्य तदुचितप्रवृत्तिविडम्बनेन तच्छ्रवणस्मरणादिपराणामपरेषामानन्दकारणं क्रीडा निरूपिता । अथेदानीमपरिमितयोगमायावैभवस्य भक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थं भूतलमवतारितानां चाधिकारिणां सुरांशानां मौसलापदेशेन तत्तदधिकारपदप्रापणपूर्वकं च ब्रह्माद्यनुग्रहाय निजपदारोहो निरूप्यते ।

* * * *

तस्य च यथामति व्याख्यानमारभ्यते । तत्र मौसल्यप्रसङ्गार्थं—पूर्वस्कन्धार्थमनुवदति श्लोकद्वयेन—

कृत्वा दैत्यवधं कृष्णस्सरामो यदुभिर्वृतः ।
भुवोऽवातारयद्भारं जविष्ठं जनयन्कालिम् ॥ इति ।

श्रीकृष्णस्सरामो रामेण सहितो यदुभिर्यादवैर्वृतः परिवृतश्च सन् ।

* * * *

Colophon:

इत्येकादशस्कन्धे सदर्थप्रकाशिकायां व्याख्यायां प्रथमोऽध्याय. ॥

End:

कृष्णपद्यां तु ऊक्तभक्तिज्ञानयोगयोः कर्मयोगस्य च साक्षात्पारम्पर्याभ्यां निश्श्रेयसफलत्वमुपसंहरति—एवमिति— इत्यवतारिका कृता । उपतिष्ठन्तीति पाठः । मत्स्थानं ममेश्वरस्याविर्भावतिरोभावस्थानं विन्दन्ति यत्परमं ब्रह्म विदुः । अत एव क्षेमं मायातत्कार्यरूपानर्थनिवृत्तिं च विन्दन्ति लभन्ते—इति भेदः । इति कृष्णपदी ।

Colophon:

इत्येकादशसदर्थप्रकाशिकायां विंशोऽध्यायः ॥

अस्मिन् श्रीभागवतस्यैकादशस्कन्धे सदर्थप्रकाशिका, अमृततरङ्गिणी, कृष्णपदीति व्याख्यात्रयं सदर्थान् सम्यक् प्रकाशयति ।'

R. No. 3669.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācārya Kīḻnattam village, Tinnevelly district.

Foll. 35 and 36 are left blank.

शतकोटिखण्डनमण्डनम्.

SATAKŌṬIKHAṆḌAṆAMAṆḌANAM.

A treatise refuting the views of the Śatakōṭi by supporting the views contained in the Śatakōṭikhaṇḍana : by Gōpāla Tātācārya, son of Kṛṣṇa Tātācārya.

Complete.

Beginning:

श्रीकृष्णाभिधतातपादचरणाम्भोजं स्मरन् तत्कृत-
ग्रन्थोक्ते शतकोटिदूषणगणे कैश्चित्समुद्भावितम् ।
दोषाभासमलघ्नकं सरभसं सन्दर्शयन् पण्डित-
व्रातस्याधिकमोदमद्य तनुते गोपालतातस्सुधीः ॥

विशिष्टपक्षग्रहत्वाव्यापकविशिष्टसाध्यग्रहत्वाव्यापकपक्षसाध्यवैशिष्ट्य-ग्रहत्वव्यापकतद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्व (. . .) सत्प्रति-पक्षत्वम् ।

* * * *

तज्ज्ञानीयजनकतायां बाधप्रतिबन्धकताव्याप्यत्वविरहेण सम्भवादिति अस्म-त्तातपादाः ॥

End:

प्रतिबन्धकतायां तन्निवेश्य तन्निबन्धनाव्याप्त्यादिवारणाय विशेषणा-न्तरोपादानं प्रक्षालनाद्धीति न्यायेन अयुक्तमेवेत्यलं पल्लवितेन ॥

R. No. 3670.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Fol. 38 is left blank.

दशरूपकम्, सव्याख्यानम्.

DAŚARŪPAKAM WITH COMMENTARY.

Similar to the work described under No. 12888 of the D.C.S. MSS., Vol. XXII. By Bahurūpamiśra. This commentary is called Dīpikā.

Contains the first Prakāśa complete and the second Prakāśa incomplete.

Beginning:

अथ प्रारिप्सितस्य प्रकरणस्याविघ्नसमाप्त्यादिसिद्धये विघ्नाधिराजं नमस्करोति निखिलबुध . . लामणिर्मञ्जराजाधिराजवन्दितचरणयुगलो ग्रन्थकृद्धनञ्जयः—

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
यदाभोगघनध्वानो नलिकण्ठस्य ताण्डवे ॥

यथा घनं न(नस्य) मेघस्य ध्वानो नीलकण्ठस्य मयूरस्य ताण्डवे पुष्करायते तथा नीलकण्ठस्य परमेश्वरस्य ताण्डवे उद्धतनृत्ते म . भोगेन यदपरिपूर्णं यो . . . घनध्वानो निबिडध्वनिः यत्कण्ठः पुष्करायते मृदङ्गवदाचरि(तः) तस्मै नम इति । अत्र खण्डश्लेषाक्षिप्यमाणोपमा छायालङ्कारः । अथ रूपकाणां प्रकरणप्रतिपाद्यतां सूचयन्नाट्यवेदप्रयोगा(क्ता)रं भरतमभिमतदैवतं च विष्णुं नमस्करोति—

दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमस्सर्वविदे तस्मै विष्णवे भरताय च ॥

एकत्र मत्स्यादीनां दशानां रूपाणामनुकारेण प्रतिमारूपेणान्यत्र नाटकादीनां दशरूपाणां रसान्तरात्मनां भावका अध्य(ध्येता)रो रसिकाश्चेति श्रोतृजनप्रोत्साहनाय प्रकरणविशेषस्य सरस्वतीप्रसादलब्धत्वं महाफलत्वं चाह ।

* * * *

End:

प्रज्ञामयेन नेत्रेण रसं द्रष्टुं य इच्छति ।
तत्कृते बहुरूपेण रचिता रूपदीपिका ॥

Colophon:

इति महोपाध्यायबहुरूपमित्र(श्र)विरचितायां दशरूपटीकायां वस्तुविचारो नाम प्रथमः प्रकाशः ॥

End :

एवमन्यदप्यु(प्यु)दाहर्तव्यम् । अथ लाटी—

मृदुपदसमाससुभगा युक्तैर्व्यक्तैर्नचातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥

भोजराजेन त्वनति.

R. No. 3671.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 122. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sādhu Malai-Vādhyār Tirumalai Ayyaṅgār, Nāṭakaśālai street, Srivilliputtur, Ramnad district.

(*a*) मन्त्रार्थकठिनपददीपिका.
MANTRĀRTHAKAṬHINAPADADĪPIKĀ.

Foll. 1*a*—34*a*.

A treatise explaining the meaning of some of the difficult words contained in the Rahasyatraya, i.e., Aṣṭākṣara, Dvaya and Caramaślōka. The author, whose name is not given, salutes Varada, son of Varaprada of Kauśikagōtra and disciple of Śuddhasattva.

Complete.

Beginning :

श्रीकौशिकान्वयवरप्रदवर्यसूनुं तत्पादयुग्मसरसीरुहराजहंसम् ।
श्रीशुद्धसत्त्वगुरुलब्धसमस्तबोधं श्रीमद्वरप्रदगुरुं शरणं प्रपद्ये ॥

* * * *

अत्र प्रथमविशेषणचतुष्टयस्य प्राप्यत्वोपयोगित्वं द्वयोत्तरखण्डप्रतिपाद्यार्थप्रतिपादकत्वमित्यादिप्रयोजनं बोध्यम् । सर्वेश्वरम् इति विशेष्यस्य नारायणपदार्थप्रतिपादनं चेतनरक्षणे स्वयं समुद्युक्तत्वमित्यादिकं बोध्यम् । आकुलचित्तः अतिव्याकुलचित्तः अत्यन्तव्याकुलचित्तः ।

* * * *

शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम् ।
तदेकोपायता याच्ञा प्रपत्तिश्शरणागतिः ॥

इत्यादिना शरणागतेरेव प्रपत्तित्वं सिद्धान्तिनामिष्टम् ।

Colophon :

इति तिरुमन्त्रप्रकरणम् ॥

End:

अच्युत इत्यत्र न च्युतः अच्युतः प्रपन्नं न च्यावयतीत्यच्युत इति व्युत्पत्तिद्वयेन विशेषणद्वयं बोध्यम् । आक्रन्द दित्यत्र क्रदि आह्वाने रोदने च इति धातोः आह्वाने पञ्चधा नामग्रहणात् रोदने पञ्चधा नामग्रहणात् दशविधत्वं बोध्यम् ॥

Colophon :

मन्त्रार्थकठिनपददीपिका समाप्ता ॥

(*b*) लुप्तचतुर्थीविचारः.

LUPTACATURTHĪVICĀRAḤ.

Foll. 34*b* –37*a*.

An investigation of the elliptical nature of the dative termination in the Praṇava (ओम्): by Tiruvāliyaṇṇan of Śuddhasattva family.

Complete.

Beginning :

तत्र तावद्भवभयाभितप्तजनभागधेयभावितावताराभ्य मभिनीतगुरुशिष्यभावाभ्यामनश्वरतरतापसवराभ्यां श्रीमन्नरनारायणाभ्यामेव भगवन्मायाविभूत्यभिभूयमानसकलजीवसमुज्जीवन-

* * * *

कामैरुपादेयं नान्यदिति सज्जनसमाजेषु साम्प्रदायिको घण्टाघोषः श्रूयते ।

End :

तद्धर्मपुरस्कारेणैव शेषत्वज्ञानस्य कैङ्कर्यप्रार्थनाप्रयोजकत्वेन तादृशशेषत्वज्ञानं चतुर्थीं विना नोपपद्यत एवेति चतुर्थीकल्पनस्यैव न्याय्यत्वादिति दिक् ॥

Colophon :

शुद्धसत्त्वं तिरुवालियण्णन्कृतलुप्तचतुर्थीविचारस्सम्पूर्णः ॥

Fol. 37*a* gives the Tattvatrayavivaraṇa.

(*c*) कैवल्यस्थाननिर्णयः.

KAIVALYASTHĀNANIRṆAYAḤ.

Foll. 37*b*—38*b*.

States that Kaivalya is a place of bliss and self-realization on the way to Vaikuṇṭha, after crossing the river Virajā.

Complete.

Beginning:

आत्मानुभवकामस्तु भगवतो भोग्यत्वं परित्यज्य स्वात्मानुभवप्रतिबन्धक प्रकृतिध्वंसोपयोगितया पावनत्वमात्रमनुसन्धाय तेनैव निरस्तसमस्तप्रतिबन्धकः परमपदप्रवेशपूर्वकमात्मगतातिशयितानुकूल्यविशेषमुपासनानुगुणमनुभवन् ।

* * * *

विरजोत्तरणानन्तरं परमाकाशशब्दवाच्ये दिव्यजनपददिव्यनगरव्यतिरिक्ते प्रदेशे केवलानामवस्थानं, न तु दिव्यजनपददिव्यनगरप्रदेश इत्यभ्युपगमात् - एवं च प्रकृतिमण्डलादूर्ध्वं श्रीवैकुण्ठादर्वाक् परमाकाशशब्दवाच्यदेश-विशेषः केवलानामवस्थानमिति प्रतिपादितं भवति ।

End:

सुस्थिरं स्थानं कैवल्यार्थिनां प्राप्यतया प्रतिपाद्यानन्तरमेकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये "तेषां तत्परमं स्थानं यद्वै" पश्यन्ति सूरयः । इति भगवच्चरणार्थिनां नित्यसूरिनिषेवणीयं श्रीवैकुण्ठादिशब्दवाच्यं परमं स्थानं प्राप्यतया भगवता पराशरेणाप्युक्तम् ॥

Colophon:

सम्पूर्णम् ॥

गतास्वथ कलेः करमतङ्गजनभश्श्रुतिसमासु (४०८२) विषुनामशरदि प्रभौघवति मेषमुपगच्छति विभायुतसुदर्शनवरप्रदगुरुः ।

कृतिं निरमिमीत सदनुष्ठितिलसन्मुकुरनामसहितां जगति यो यतीश्वरवचोऽर्थविशदीकृतिपटुप्रधियुतं शरणमेमि तमहम् ॥

Foll. 39*a*—42*a* contain the Sakalapramāṇatātparya (in Tamil). Foll. 42*b*—44*a* give the Rahasyatrayavivaraṇa Fol. 44 contains Praṇavanirvacana. Foll. 44*b*—46*a* give the Rahasyatrayamīmāṁsā-bhāṣyakaṭhinapadadīpikā.

(*d*) सद्दर्शनसुदर्शनम्.

SADDARŚANASUDARŚANAM.

Foll. 46*a*—91*b*.

A treatise vindicating the religious observances of the Teṅgalai sect of Śrī-Vaiṣṇavas, which are indicated upon in the Viśvaguṇādarśa of Veṅkaṭādhvarin. The work Viśvaguṇādarśa has been described under

R. No. 1067 ante. The author, whose name is not given, salutes Vēṅkaṭalakṣmaṇārya, Śaṭhamathana, Yatīndra, Lōkārya and Varavaramuni.

Incomplete.

Beginning:

श्रीवाधूलरमाप्रवालरुचिरस्रक्सैन्यनाथांशज-
श्रीगुर्विन्द्रमहार्यलब्धनिजसत्तत्त्वं श्रिताभीष्टदम् ।
श्रीरामानुजमुख्यदेशिकलसत्कैङ्कर्यसंस्थापकं
श्रीमद्वेङ्कटलक्ष्मणार्ययमिनं तं सद्गुणं भावये ॥

श्रीमच्चक्रोज्ज्वलं यद्भुजयुगयुगलं यश्श्रिया स्वर्णवर्णः
यन्नाम द्वादशाद्यं भवति बहुमुखं दिव्यनाम्नां सहस्रम् ।
यो वैद्यः प्राप तापज्वरहरणविधौ ध्यानकृच्छ्रेयसां यो
यस्सद्वंशेऽभिमानी शठमथनमुनेस्सोऽवतात्केशवो नः ॥

* * * *

नत्वा यतीन्द्रलोकार्यौ स्मृत्वा वरवरं मुनिम् ।
करोमि महतां प्रीत्यै सद्दर्शनसुदर्शनम् ॥

क्वाहमत्यन्तदुर्दृष्टिः क्व सतां तत्सुदर्शनम् ।
स्वयमेव यतीन्द्रोऽयं पूरयेन्मदुपक्रमम् ॥

जन्तुरत्यन्तहीनोऽपि महतां पदमर्हति ।
अङ्कितश्शङ्खचक्राभ्यां सव्यदक्षिणपक्षयोः ॥

श्रीहस्तिशैलेशमहोत्सवार्थमत्रागतं दिव्यमकर्मवश्यम् ।
प्रदक्षिणार्थं करिशैलसूरेर्गन्धर्वयुग्मं गगने चचार ॥

दिव्यगान्धर्वनिपुणौ द्राविडब्रह्मगायिनौ ।
श्रीवैकुण्ठपतेरेतौ सव्यादक्षिणपक्षगौ ॥

सव्यो भक्तस्सद्गुणानन्दशीलस्स्निग्धस्वान्तःपक्षपातानभिज्ञः ।
सारासारौ शिक्षयन्वृत्तिदक्षस्सादौ पक्षे दक्षिणः पक्षपाती ॥

तत्र तावदेतौ भक्तप्रपन्नाविव विष्णुपदैकगती नरनारायणाविव सद्वृत्तचारिणौ शङ्खचक्राविव(क्रे इव) साधुपक्षपातिनौ परब्रह्मपक्षसंश्रयौ

* * * *

गान्धर्ववेदधरौ गन्धर्ववरौ ।

End:

साक्षाल्लक्ष्मीः पवनतनयस्यान्तरङ्गस्य विष्णो-
र्दूरास्सर्वेन्द्रियगविकृतेर्वानरस्याथ जात्या ।

अत्यन्तापद्यापि च वपुषस्स्पर्शनं नानुमेने
दुष्टाम्बष्ठैरहह वनितासङ्गतिं मन्वतेऽमी ॥

(*e*) रहस्यत्रयविवरणकारिका.

RAHASYATRAYAVIVARAṆAKĀRIKĀ.

Foll. 92*a*—93*a*.

Same work as that described under R. No. 94(*a*) ante. By Aḻagiya-maṇavaḷa-Jīyar.

Wants the beginning; otherwise complete.

(*f*) रहस्यत्रयार्थविचारः.

RAHASYATRAYĀRTHAVICĀRAḤ.

Foll. 93*a*—94*b*.

Similar to the work described under R. No. 94(*a*) of the Tamil part ante. By Nārāyaṇamuni.

Complete.

Beginning:

आचार्योदीरितानर्थान् रहस्यत्रयगोचरान् ।
मुमुक्षूणां सदा भोग्यान् सङ्कलय्यानुसन्दधे ॥
कारणं सर्वजगतां रक्षकः कमलापतिः ।
शेषी तस्यैव शेषोऽहं देहेन्द्रियविलक्षणः ॥

End:

शठारिचरणाम्भोजसेवानिर्मलचेतसा ।
नारायणाख्यमुनिना रहस्यार्थोऽयमीरितः ॥

Foll. 94*b*—108*b* give the Tirumantrārtha-Arumpadam.

(*g*) रहस्यत्रयमीमांसाभाष्यकठिनपददीपिका.

RAHASYATRAYAMĪMĀṂSABHĀṢYAKAṬHINAPADA-DĪPIKĀ.

Foll. 109*a*—121*b*. Fol. 122*a* gives the name of the owner of the original MS. Fol. 122*b* is left blank.

A commentary on the difficult words in the Rahasyatrayamīmāṁsā-bāṣya, described under No. 5340 of the D.C.S. MSS., Vol. XI.

Incomplete.

Beginning:

विशिष्टाद्वैतवदिति । विशिष्टं च विशिष्टं च विशिष्टे द्वयोर्भावः द्विता द्वितैव द्वैतं द्वैतस्याभावः अद्वैतमभेद इत्यर्थः । विशिष्टयोरद्वैतं विशिष्टाद्वैतम् । तत्त्वमसि श्वेतकेतो इत्यत्र तत्पदवाच्यसार्वज्ञ्यादिकल्याणगुणविशेषणविशिष्टब्रह्मणः त्वम्पदवाच्यदेवादिशरीरविशिष्टजीवभूतश्वेतकेतुशरीरकब्रह्मणश्चाभेदः । यथा—नीलो गन्धवान् घट इत्यत्र नीलवत्त्वगन्धवत्त्वरूपविशेषणभेदेऽपि घटत्वेन विशिष्टाभेदः । तद्वदिति विशिष्टाद्वैतशब्दार्थः प्रतिपाद्यत इति बोध्यम् ।

End:

मकारेण कर्तृत्वभोक्तृत्वोत्तम्भनेन प्रकारान्तरेण च सशेषत्वशङ्काया उदितत्वाच्छब्दतः सर्वप्रकारेण सशेषत्वनिरासः क्रियते नमश्शब्देन । अत उभयपदसार्थक्यमिति.

R. No. 3672.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921 22 from a MS. of M.R.Ry. K. V. Paramēśvara-Vādhyān Nambūdirippāḍ, Āccipuram, Kottakkal, Malabar district.

Fol. 34*b* is left blank.

काव्यप्रकाशटिप्पणी.

KĀVYAPRAKĀŚAṬIPPAṆĪ.

A brief commentary on the Kāvyaprakāśa, which work has been described under No. 12816 of the D.C.S. MSS., Vol. XXII. The name Kāvyaprakāśasaṁbandhavāda is given in the heading of the MS.

Incomplete.

Beginning:

प्रसीदतु तथा दैवं यथा व्याकृतिषु स्फुटम् ।
साधुत्वतारतम्यस्य भवेद्बोद्धा बुधो जनः ॥

नियतिकृतनियमरहितामित्यादि । अत्र कोऽर्थः ? किं काव्यं जयतीति उत सरस्वती जयतीति ? । ननु भारती कवेर्जयतीत्यत्र कथमन्वयः कवेर्भारती जयतीति वा भारती जयतीति वा । अथार्थे विचारिते किमिदमन्वयान्वेषणं युक्तम् ? युक्तमर्थावधारणार्थत्वात् । एकत्र सन्देहे निश्चिते नान्येन तदपसरणं कर्तव्यं निश्चितं च तत् यत् झटिति प्रतिभासते झटिति प्रति-

भासमानं प्रसिद्धं तच्च व्यवहारपरम्परया परिचीयमानत्वात् प्रमाणाप्रमाणे न च निर्णयो युक्तः ।

End :

किं च वस्त्वलङ्कारव्यङ्ग्यगतं माधुर्यं वर्णा न व्यञ्जन्तीति खल्वभ्युपगतम्; तथा रसव्यङ्ग्यगतमपि माधुर्यं वर्णा न व्यञ्जन्तीत्यभ्युपगन्तव्यम् । वास्तवत्वात्तत्रोपपत्तिरुक्ता । पुनस्सप्तमे विसन्धिदोषस्य, तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः ।

* * * *

वृषस्सप्तमो धातुः स च शुक्लम्.

Foll. 23*a*—31*b* contain discussions on the propriety of certain expressions found in the Kāvyas. Foll. 32*a*—34 contain a small portion of Kāśikāvṛtti. Fol. 34*b* is left blank.

R. No. **3673.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 40. Lines, 20 in a page. Grantha and Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Uṇikaṇṭha Menon, Tarakkal Vāriyam, Vallapula post, via Pattambi.

अध्यात्मरामायणटिप्पणी.

ADHYĀTMARĀMĀYAṆAṬIPPAṆĪ.

A short commentary on the difficult words in the Adhyātmarāmāyaṇa, which work has been described under No. 2154 of the D.C.S. MSS., Vol. IV, Part I.

This commentary is called Prabōdhinī. The commentator, whose name is not given, salutes Śāmbhavānandana, and his preceptor Vidyānanda and Rāmānanda, preceptor of the commentator.

Complete in seven Kāṇḍas.

Beginning :

यो विघ्नहत्यै मरुदादिभिस्सदा सम्पूज्यते कार्यसमूहकस्य ।
सुरासुरासेवितपादपङ्कजो नमामि(म्यहं) तं वरदं गजाननम् ॥
शाम्भवानन्दनं वन्दे सर्वविद्यानिधिं परम् ।
विद्यानन्दस्य तं शिष्यं वेदव्यासमिव स्थितम् ॥
वन्दे गुरुं महात्मानं रामानन्दमतः परम् ।

* * * *

अध्यात्मरामवृत्तस्य टीकेयं सर्वसम्मता ।
प्रबोधिनीति विख्यातां यां कुर्मस्ताण्डवेश्वराः ॥

शिवमुखान्निस्सृतेऽध्यात्मसंज्ञके रामायणे यानि पदानि कठिनतया वर्तन्ते, तेषां पदानामर्थो लिख्यते—

श्रीमहादेवः अध्यात्मसंज्ञकस्येष्टदैवं श्रीरामं स्तौति—यः वृत्ती(पृथ्वी)-त्यादिना श्लोकद्वयेन । चिन्मयः ज्ञानस्वरूपः । रविकुले सूर्यवंशे । अव्ययः न व्येतीत्यव्ययः ।

End :

अत्रिपुत्रस्य दुर्वाससः । अनन्तशक्तिमनन्ताश्शक्तयो यस्य सः । परेशं पराया मायाया ईशं नियन्तारं प्राक्तनं पूर्वं विद्यमानं पर्वसु पञ्चपर्वस्वित्यर्थः । कृष्णाष्टमीचतुर्दशीसङ्क्रान्तिर्दर्शपूर्णिमा(मे) ॥

Colophon :

उत्तरे नवमस्सर्गः ॥
उत्तरकाण्डस्समाप्तः ॥

Foll. 39*b* and 40*a* contain the Bagalāmukhīmantradhyānanyāsa. Fol. 40*b* is left blank.

R. No. 3674.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

कविकल्पद्रुमव्याख्या—काव्यकामधेनुः.
KAVIKALPADRUMAVYĀKHYĀ : KĀVYAKĀMADHĒNUḤ.

Similar to the commentary described under No. 1518 of the D.C.S. MSS., Vol. III. By Bōpadēva son of Kēśava and pupil of Vidvadghanēśa.

Complete.

Beginning :

येनापि यद्विकरणैराख्यातैर्धातुलोहितैः ।
प्रकाशैस्सम्प्रकाश्यन्ते क्रियास्तं नौमि गोपातिम् ॥

अ(क)विकल्पद्रुमं धातुपाठं विवरितुं मया ।
धातुवृत्तिः काव्यकामधेनुर्नाम विधीयते ॥
तत्र प्रयोगो धातूनामित्क्रमादिफलार्थका(क.): ।
शप्तिपौ ध्वनितां तुल्यप्रयोगानां सभेदकाः (?) ॥

तत्रादौ ग्रन्थकृदुचितेष्टदेवतामादित्यमुपास्ते—
शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ॥

तमिति तच्छब्दः प्रतिसमाधिसमयासमसम्मदसमर्पकत्वेनानुभूतस्य प्रतिपादनाद्यच्छब्दं नापेक्षते यथा—सेयं ममाङ्गेषु सुधारसच्छटा इत्यादौ । अथ पूर्वाचार्यान् जयवादेन धिनोति—इन्द्रश्चन्द्र इत्यादि । अत्र ग्रन्थे स्वरूपं निरूपयति—मतानि तेषामित्यादि । अदाद्याद्यक्रमादन्तादिमक्रमः—अत् आद्यो येषां धातूनां ते अदाद्यास्ते आद्या यस्मिन् स तथोक्तः ।

End:

इहेदानीं धातून्निर्धार्योपसंहरति—
इति स्फीतास्सप्तदशशत्या षड्ढोनषष्टिधा ।
धातुस्कन्धैर्बुधैस्सेव्यः कविकल्पद्रुमः फलन् ॥

सप्तदशानां शतानां समाहारः सप्तदशशती षड्ढोनषष्ट्या अधिका षडूनषष्ट्या यावस्कन्धा धातुस्कन्धास्तैः फलन् प्रतिस्कन्धं प्रयोगरूपाणि फलानि यथेष्टमर्पयन् ॥

अथ ग्रन्थकृदात्मानं ख्यापयति—
विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
तेन वेदपदस्थेन बोप्पदेवद्विजेन यः ॥
सम्पादयन्तीमङ्कादौ कार्तस्वरलसन्निधिम् ।
श्रयध्वं विबुधाः काव्यकामधेनुमतन्द्रिताः ॥
व्युत्पादयन्तु शब्दज्ञाः स्वैः स्वैः सूत्रैरुदाहृताः ।
सर्वव्याकरणार्हायां नास्यां तान्यखिलं ह्ययम् ॥

Colophon:

इति श्रीपण्डितबोप्पदेवविरचिता काव्यकामधेनुर्नाम धातुवृत्तिस्समाप्ता ॥

R. No. **3675.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 116. Lines, 20 in a page. Grantha and Tamil. Good

Transcribed in 1921-22 from a MS. of M.R.Ry. Mēlavādhyār Tirumalai Ayyaṅgār, Alwartirunagari, Tinnevelly district.

Foll. 115*b* and 116 are left blank.

शिष्टभूषणम्.

ŚIṢṬABHŪṢAṆAM.

A treatise explaining away certain portions of the Viśvaguṇādarśa, ordinarily held to be unfavourable to the Teṅgalai sect of Śrī-Vaiṣṇavas: by Rāmānujācārya of Elayavilli family of Bhūtapurī (Sriperumbudur).

Contains the Paricchēdas one and two complete and the third incomplete.

Beginning:

बालधन्व्यभिजातेन श्रीभूतपुरवासिना ।
श्रीमद्रामानुजार्येण तन्यते शिष्टभूषणम् ॥
स्थालीपुलाकन्यायेन सतां सर्वार्थसिद्धये ।
क्वचिद्विश्वगुणादर्शे वाणीभावं विभावये ॥

* * * *

पञ्चमहायज्ञानां विद्याङ्गत्वमाश्रमाङ्गत्वं चेति आकारद्वयमस्ति । तत्रोपासकानां विद्याङ्गत्वाकारः, अमुमुक्षूणामाश्रमाङ्गत्वाकारः । अत्र विद्याङ्गत्वाकारः सर्वापेक्षा च यज्ञादिश्रुतेरितिसूत्रभाषितः, आश्रमाङ्गत्वाकारः विहितत्वाच्चाश्रमेतिसूत्रभाषितः ।

* * * *

Colophon:

बालधन्व्यभिजातेन श्रीभूतपुरवासिना ।
श्रीमद्रामानुजार्येण रचिते शिष्टभूषणे ॥
भक्तिप्रभावः प्रथमः परिच्छेदस्समापितः ।

End:

प्रपन्ननिषिद्धं पादहीनदीपशिखाकारादिपुण्ड्रधारणं ते कुर्वन्ति ॥

Colophon:

श्रीमद्रामानुजार्येण रचिते शिष्टभूषणे ।
परिच्छेदो द्वितीयोऽयं समाप्तः परिदृश्यताम् ॥

प्रपन्नानां तापादिपञ्चसंस्कारकर्त्राचार्येण तत्समय एव प्रपत्तिः कारयितव्या वचनाच्च, शिष्टाचाराच्च । तथा हि नारायणसंहितायाम्—

यथा हि पाणिग्रहणरक्षाबन्धादिपूर्वकम् ।
एकस्मिन्नेव युगपन्मुहूर्ते क्रियते रमे ॥
शरणागतिरप्येवं हेतितापादिपूर्वकम् ।
एकस्मिन्नेव काले वै कुर्याच्छिष्यस्य देशिकः ॥

* * * *

इह अत्र कुरुकायां चेतः चित्तं कृन्तति पाटयत्येव.

R. No. 3676.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 128. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

हरिवंशः, सटीकः.
HARIVAMŚAḤ WITH COMMENTARY.

A commentary on the Harivaṁśa, which work has been described under Nos. 1968—1973 of the D.C.S. MSS., Vol. IV, Part I. This commentary is called Mitākṣarā.

Contains the Adhyāyas 1—26 in the Puṣkaraprādurbhāva portion only.

Beginning :

नत्वा नारायणं देवं वेदव्यासं मुनिं गुरून् ।
कुर्वेऽहं पुष्करप्रादुर्भावटीकां मिताक्षराम् ॥

भविष्यन्निरूपणानन्तरं पुष्करप्रादुर्भावकथां निरूपयितुकामस्तद्बीजभूतं जनमेजयप्रश्नमवतारयति—

प्रभावं पद्मनाभस्य स्वपतस्सागराम्भसि ।
पुष्करे वै यथोद्भूता देवास्सर्षिगणाः पुरा ॥
एतदाख्याहि निखिलं योगं योगविदां पते ।

इति हि सार्धेन पुष्करे भगवन्नाभीकमले पुरा यथा देवास्सर्षिगणा उद्भूता एतद्रूपं निखिलं पद्मनाभस्य योगमाख्याहीत्यन्वयः । ईदृशस्य पद्म-

नाभस्य सागराम्भसि स्वपतः कीदृशं योगं प्रभावं प्रभवत्यस्मादिति प्रभावः तं प्रभावं सृष्टिकारकमित्यर्थः ।

* * * *

Colophon :

इति पुष्करप्रादुर्भावटीकायां मिताक्षरायां प्रथमोऽध्यायः ॥

End :

श्रावयेद्यस्तु विप्रेभ्यः शुचिः प्रयतमानसः । इति ।
अधीत्य सर्वमध्यात्मं देवलोके महीयते ॥ इति ।

Colophon :

इति श्रीहरिवंशे पुष्करप्रादुर्भावे षड्विंशोऽध्यायः ॥

इमां पुष्करप्रादुर्भावरूपां यः श्रावयेत् । किं कृत्वा सर्वमिदमध्यात्मरूपमाख्यानमधीत्य स्मृत्वा । इङ् स्मरणे इतिधातुः । अध्यात्मरूपां कथां स्मृत्वा यश्श्रावयेत्, स देवलोके महीयत इति सम्बन्धः । सार्धश्लोकः ॥

पुष्करव्याख्यया देवः पूजितः पुष्करेक्षणः ।
पद्मिनीपत्रवत्कुर्यादलेपं मां जले स्थितम् ॥

Colophon :

इति श्रीपुष्करटीकायां मिताक्षराख्यायां व्याख्यायां षड्विंशोऽध्यायः ॥

The scribe adds—

गम्भीरं पुष्कराख्यानं टीकासम्मिलितं लघु ।
गोविन्दो लब्धधीः काले श्रीगुरुप्रीतयेऽलिखत् ॥

R. No. 3677.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Raja's Library, Khallikote, Ganjam district.

भक्तिवैजयन्तीस्तोत्रम्.

BHAKTIVAIJAYANTĪSTŌTRAM.

A eulogy in 120 stanzas addressed to Lord Śrī-Kṛṣṇa by way of worshipping Him : by Jīvadēvācārya, son of Trilōcanācārya.

Complete.

Beginning :

श्रीकृष्णाय नमः समस्तहृदयाम्भोजावदातत्विषे
भक्तौघस्सयमानमानसवते दैत्यावलीविद्विषे ।

गोपीपल्लविकाय नायकगुणग्रामप्रणालीजुषे
लीलावैभविकाय कायसुषुमानीलाम्बुजश्रीजुषे ॥

End:

हे सौमत्य जितं त्वया भगवता पाण्डित्यकृत्यं कृतं
वादित्वप्रतिपादितं तदशुभं तत्त्वे कवित्वस्थितम् ।
मार्गान् दुर्गमकण्ठकातिविकटान् भूयः कृताधोगतीन्
यन्मुक्त्वा हरिराश्रितः सुमनसां स्वर्गापवर्गप्रदः ॥
श्रीजीवः कविडिण्डिमो नृपगुरुष्षड्दर्शनीपण्डितो
भक्तिप्रस्थितदेशिकोऽखिलकलालङ्कारत्नाकरः ।
विंशत्यूर्ध्वशतीमितैर्व्यरचयत्पद्यैः क्रमादुम्भितैः
श्रीकृष्णस्य समर्चनाविधिकृते श्रीवैजयन्तीं शुभाम् ॥
श्रीनीलाचलवासिनो भगवतो मोक्षैकचिन्तामणेः
लीलाविग्रहशालिनः श्रुतिशिरोराजिष्णुचूडामणेः ।
श्रीमज्जीवकवीश्वरेण चरणाम्भोजातयोरर्पिता
सम्मृष्टा गुणशालिनी विजयतां श्रीवैजयन्ती चिरम् ॥

Colophon:

इति श्रीमत्कविराजराजगुरुत्रिलोचनाचार्यतनयश्रीमद्भक्तिप्रस्थानप्रणयनाभिनवबादरायणश्रीनारायणचरणपारायणकविडिण्डिमवाहिनीपतिगजराजराज-श्रीजीवदेवाचार्यविरचिता भक्तिवैजयन्ती सम्पूर्णा ॥

R. No. **3678**.

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 152. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. A. Lakṣmaṇa Śāstrigaḷ, Kalpathi, Palghat.

Fol. 152*b* is left blank.

तर्कसङ्ग्रहव्याख्या.

TARKASAṄGRAHAVYĀKHYĀ.

Similar to the work described under R. No. 2379 ante.

Contains the Pratyakṣa, Anumāna and Upamāna only.

Beginning :

अन्नम्भट्टाख्यः कश्चिद्विद्वान् तर्कसङ्ग्रहाख्यग्रन्थं चिकीर्षुः चिकीर्षितग्रन्थपरिसमाप्तिप्रतिबन्धकदुरितनिवारणाय मङ्गलं कृत्वा मङ्गलप्रतिपादकश्लोकमाह—निधायेत्यादिना । तर्कसङ्ग्रहः मया क्रियते । तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः द्रव्यादिपदार्थाः तेषां सङ्ग्रहः शब्दसङ्क्षेपेण स्वरूपकथनं धान्येन धनवानित्यादौ यथा वा तृतीयाया अभेदार्थकता तद्वत्सङ्क्षेपेणेत्यत्रापि तृतीयाया अभेदोऽर्थः । तेषामित्यत्र षष्ठ्या विशेष्यत्वं स्वरूपस्य कथनं स्वरूपस्येत्यत्र षष्ठ्याः प्रकारत्वमर्थः । एवञ्च शब्दसङ्क्षेपाभिन्नपदार्थविशेष्यकस्वनिष्ठधर्मप्रकारकज्ञानजनक इत्यर्थः ।

End :

एवञ्च गोसादृश्यज्ञानात्मकातिदेशवाक्यार्थस्मरणं करणं, गोभिन्नवस्तुविशेष्यकसास्नादिमत्त्वरूपगोसादृश्यप्रकारकप्रत्यक्षं व्यापारः, गवयो गवयपदवाच्य इत्याकारक उपमित्यात्मकज्ञानं फलमिति बोध्यम् ॥ उपमानं व्याख्यातं निरूपितम् ॥

Colophon :

इत्युपमानपरिच्छेदः समाप्तः ॥

R. No. **3679.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of His Holiness Nārāyaṇabhāratī Kappiyar Svāmigal, Muppil Sthānam, Naduvil Maṭham, Trichur, Cochin State.

श्रुतिसारसमुद्धरणम्, सम्बन्धोक्तिसहितम्.

ŚRUTISĀRASAMUDDHARAṆAM WITH SAMBANDHŌKTI.

Similar to the work described under R. No. 2518 ante.

Incomplete.

Beginning :

विलसच्चितिवलतस्स्फुरद(खिलः) स्वकतमसा
परिनिर्मितविपुलद्वयविहितस्वकमहिमा ।
व्यवहारिकवपुषा विधिवचनादिकविषयो
मम मानसनिलयो हरिरवताज्जगदखिलम् ॥

प्रणम्य वासुदेवाख्यं परं ज्योतिरनुत्तमम् ।
सम्बन्धोक्तिं करिष्यामि तोटकश्लोकगामिनीम् ॥

तत्र त्रैलोक्यनाथहरिमित्याद्यश्लोकेनेष्टदेवतानमस्कारव्याजेन प्रारिप्सितप्रकरणस्य विषयसम्बन्धप्रयोजनानि सूचयति । ननु प्रकरणं नाम शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितमिति तल्लक्षणैरुच्यते ।

* * * *

तस्मादेकान्ततः प्रसिद्ध्यभावात् ब्रह्मणो विषयत्वोपपत्तिः, अप्रसिद्ध्यभावाच्च सम्बन्धोपपत्तिः, विषयसम्बन्धोपपत्तौ च प्रयोजनोपपत्तिरिति । तदेतदाह—

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं
शक्तेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं
वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥

End :

इदानीमवयवग्रन्थस्य व्याख्यानमारभ्यते—बहुनाभिहितेनेत्यादिना श्लोकद्वयेन । त्वंपदार्थं परिशोधयति—

बहुनाभिहितेन किमु क्रियते शृणु सङ्ग्रहमत्र वदामि तव ।
त्वयि जागरितप्रभृतित्रितयं परिकल्पितमित्यसदेव सदा ॥
परिकल्पितमित्यसदित्युदितं यत(मन) इत्यपि(भि)शब्दितमागमतः ।
उपपत्तिभिरेव च सिद्धमतो (भवतोऽ)न्यदशेषमभूतमिति ॥

यद्बाह्यमित्यनेन तत्पदार्थं शोधयति.

R. No. **3680.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. S. Ayyā Śāstrigal, Chennamangalam, Parur Post, via Shoranur.

साङ्ख्यतत्त्वकौमुदीविवरणम्.

SĀṄKHYATATTVAKAUMUDĪVIVARAṆAM.

A commentary on Vācaspatimiśra's Sāṅkhyatattvakaumudī, which work has been described under R. No. 2050(*a*) ante; by Śrībōdhabhāratī, disciple of Bōdhāraṇyaśrīpāda.

Complete.

Beginning :

यत्प्रसादादजं नित्यमात्मानमशरीरिणम् ।
विजज्ञौ तान् गुरून् भक्त्या नमामि करुणाकरान् ॥

श्रीमत्साङ्ख्यसप्ततिं व्याचिख्यासुर्भगवान् वाचस्पतिः प्रारिप्सितस्य ग्रन्थस्याप्रतिबन्धेन परिसमाप्तिप्रत्यर्थिनो व्युदासार्थं शिष्टाचारपरिपालनाय च प्रधानस्य पुंभोगापवर्गार्थप्रवृत्तिलक्षणशास्त्रतात्पर्यकथनपूर्वकं प्रधानं पुरुषांश्च नमस्यति—अजामेकामित्यादिश्लोकेन । न जायत इत्यजा, मूलप्रकृतिः तां नमाम इत्युत्तरेणान्वयः । ननु तस्यास्सद्भावे प्रमाणाभावान्निर्विषयत्वं नमस्कारस्येति चेत्तत्राह—बह्वीः प्रजाः सृजमानामिति ।

End :

समुदायाच्चेत्यत्र च गुणानां शेषवृत्तिरङ्गाङ्गित्ववृत्तिः । अकर्तृभावश्चेत्यत्राकर्तृत्वं पुरुषस्य चूलिकार्थाः इत्येतद्विपर्ययाशक्तितुष्टिसिद्ध्याख्य इत्यारभ्य विपर्ययादयः पदार्था इति षष्टिः पदार्थाः कथिता इहेत्यर्थः ।

क्क श्रीवाचस्पतेस्सूक्तिः क्वच मन्दस्य मे मतिः ।
कायिक(कावद्य)मेतच्च यत्तच्छोध्यं सुबुद्धिभिः ॥

Colophon :

इति श्रीबोधारण्यश्रीपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीबोधभारतीश्रीपादकृता साङ्ख्यतत्त्वकौमुदीविवरणं(णी) समाप्ता ॥

R. No. **3681.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 126. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. R. Sāmbaśiva Śāstrigal, Lalitāmbikāmaṭham, Siddhamalli, Tinnevelly district.

(*a*) तन्त्रशिखामणिः.

TANTRAŚIKHĀMAṆIḤ.

Foll. 1*a* – 124*b*.

Same work as that described under Nos. 4417 and 4418 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita

Contains the Adhyāyas 11 and 12 complete.

The scribe adds—

चन्द्रचूडपदपद्मयुग्मसद्मासनासरसमानसोऽप्यसौ ।
व्यालिखत्किल सलीलमेवमित्यत्र सन्तु समुदा बुधोत्तमाः ॥

सर्पालङ्कृतकन्दर्पदर्पाहङ्कृतिशासितुः ।
दृक्पातिस(त)दया(यो)न्तु सोऽप्पाशास्त्रीदमालिखत् ॥

Fol. 125*a* contains eulogistic stanzas addressed to Śālivāṭīśvara and the name of the owner of the original MS.

(*b*) शिवदण्डकम्.

ŚIVADAṆḌAKAM.

Foll. 125*a*—126*b*.

A eulogy addressed to God Śiva, in the Daṇḍaka metre.

Complete.

Beginning:

गीर्वाणौघकिरीटकोटिविलसच्चञ्चन्मणीघोरणी-
निर्यत्सूर्यकराधिकद्युतिभवन्नीरज(राज)नाराधने ।
लज्जाम्भःपतिताम्बुजे शिखरिजे पादाम्बुजे ते भजे
मातः कान्तिमती(र्ति)प्रपन्नमिह मां वीक्षस्व दाक्षिण्यतः ॥

जय जय नट सेन्द्रधीरातिगम्भीरदीक्षघ? साक्षात्तपःपुञ्जरूपात्र लक्ष्मीकटाक्षेषु सद्यो विपक्षान् प्रतिक्षेप्तुमुत्क्षेप्तुमुच्चैस्तराक्षुद्रदाक्ष्यस्य साक्षाद्विवर्तेषु साधु ।

End:

विशिष्य प्रहृष्यन् तथास्मद्विधानेकविद्वत्समूहस्तुतिस्तोमसंस्तूयमानः त्वमेवात्र लोकोत्तरश्रीविलासस्सलीलं नृपालावतंसो जगत्यां विजेजी(गी)यसे ॥

R. No. 3682.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. T. Paramēśvara-Vādhyān Nambūdiri, Accipura, Kottakkal post, Malabar district.

Foll. 83*b*—84 are left blank.

ऐतरेयब्राह्मणव्याख्या—षाड्गुरवी—सुखप्रदा.

AITARĒYABRĀHMAṆAVYĀKHYĀ: ṢĀḌGURAVĪ-SUKHAPRADĀ.

A commentary on the Aitarēyabrāhmaṇa: by Ṣaḍguru, who wrote it in the year 4354 Kaliyuga corresponding approximately to 1252–1253 A.D. The commentary is called Sukhapradā and purports to bring out the meaning which is not given in the prior commentaries. By Govindasvāmin and Kṛṣṇa.

Contains the Adhyāyas one to ten only, but wants the beginning.

Beginning :

. . . . महाव्रतं चोपनिषद्द्वयं च ॥
माहाव्रतं सूत्रमासां तृतीयां चत्वारिंशं ब्राह्मणं वै चतुर्थी ।
सूत्रं पञ्चम्यत्र षष्ठी तु गृह्यं शाकल्यं स्यात्संहिता सप्तमीति ॥
इत्येतद्वै सप्तविद्यामृताख्यं दत्तं स्वय गुरुभिष्षड्भिरेतैः ।

* * * *

प्रणीतभारतामृतः पराशरात्मजो मुनिः ।
वरप्रदस्स्मितानन: शिवाभि(दि)योगिनामकः ॥
इमे हि षट् प्रपान्तु मां सदा नमामि तानहम् ।
इमे हि मामयूयुजन् यथाश्रुतं वदेदिति ॥
तदैतरेयकं महत्प्रवर्त्यते यथामति ।
यथाश्रुतं यथास्मृतं महात्मनां प्रसादतः ॥
महिदासैतरेयर्षिसन्दृष्टं ब्राह्मणं तु यत् ।
अग्निर्वा इति हारभ्य स्तृणुते स्तृणुतेऽन्तिकम् ॥
चत्वारिंशाख्यमध्यायाः चत्वारिंशदिहेति धण् ? ।
प्रतायते तस्य वृत्तिः नाम्ना चैषा सुखप्रदा ॥
गोविन्दस्वामिकृष्णादिभाष्याद्दष्टार्थभाषिणी ।
नास्या वृत्तेरर्थवत्त्वमनुक्तार्थोपवर्णनात् ॥

* * * *

अत्रैतरेयर्षिमहेतिहासं पुराणवेदोदितमाहुरार्याः ।
आसीद्विप्रो याज्ञवल्क्यो द्विभार्यः तस्य द्वितीयामितरेति चाहुः ॥
स ज्येष्ठयाकृष्टचित्तः प्रियां तामुक्त्वा द्वितीयामितरेति होचे ।

* * * *

कथा चैषा महिदासैतरेयी श्रुता प्रोक्ता संस्मृता पूजिता च ।
श्रद्धान्वितैरास्तिकैः सर्वसिद्ध्यै प्रकल्पेतेत्येवमाहुर्महान्तः ॥

प्रथमं तावद्दीक्षणीयां ज्योतिष्टोमाङ्गभूतामिष्टिं विधातुं तद्देवते अग्नाविष्णू स्तौति—अग्निर्वै देवानामवमः । प्रथममुखमित्यर्थः । यदिन्द्राग्नी अवमस्यां पृथिव्यामिति यथा वक्ष्यति च अग्निर्वै देवानां मुखं सहृदयतम इति मन्त्रश्च भवति ।

End:

विद्युतमेव तत्कल्पयति तत्तत्र विद्युतमभ्येति स एवं विद्वानेतन्मयो देवतामयो भवति भवति ॥

एवं ज्ञानोपसम्पन्नो यष्टा होता च . . . ।
. . . . वसन्तादिविद्युदन्तमयो भवन् ॥
एतान्प्राप्नोति वै देवान् देवतान्वायिसाख्यवान् ।
मयडर्थः सुखप्राप्तिः द्विरुक्त्यर्थस्समापनम् ॥

Colophon:

इत्यैतरेयब्राह्मणव्याख्याने षाड्गुरवाये दशमोऽध्यायः समाप्तः ॥

(अध्याये)प्रथमे खण्डसङ्ख्या स्यादेकसप्ततिः ।
आध्यायिकाः षट् पञ्च षट् नव चत्वार एव च ॥
दशाष्टौ च षडष्टौ च नवेत्येवं समीरिताः ।
गुरुगाधा(था)च मुख्येति कलिशुद्धदिने सति । (१६६७३२३).
वृत्तिष्षाड्गुरवी जाता ब्राह्मणस्य सुखप्रदा ॥

* * * *

एषा षाड्गुरवी व्याख्या विख्यातोदारकीर्तिना ।
रविणा लिखिता मित्रवाछभ्याद्दशमेऽग्रिमे ॥

Colophon:

इत्यैतरेयब्राह्मणव्याख्या दशमाध्यायान्ता समाप्ता ॥

R. No. **3683.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll 86 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Ernakulam, Cochin State.

Foll. 85*b*—86 are left blank.

युधिष्ठिरविजयव्याख्या—विजयदर्शिका.

YUDHIṢṬHIRAVIJAYAVYĀKHYĀ: VIJAYADARŚIKĀ.

Same work as that described under R. No. 3007 ante, wherein see for the end. By Acyuta.

Breaks off in the sixth Āśvāsa (ending with the words तापतत्परा सन्तापं कुर्वतीत्यर्थः । संस्वा).

Beginning:

देयादीशानसूनुर्नो मङ्गलानि गणाधिपः ।
यस्य प्रसादवायुक्ताः फलस्यारम्भ . . . ॥
. . . . तां परमेश्वरीम् ॥

वासुदेवकविना कृतस्तु यः काव्यबन्ध इयमस्य सत्क्रिया ।
कामिनीव रसभावदर्शिका व्याक्रियाच्युतकृता विराजते ॥

युधिष्ठिरस्य विजयं दर्शयेदिति दर्शिका ।
असा . . . . . . काव्यलक्षणमीक्षके ॥
वासुदेवकवेः काव्यं कथा पार्थस्य कथ्यते ।
व्याख्यातारो वयं किं तत् सतां . मनो हरेत् ॥

* * * *

प्रशमितेत्यादिना प्रातिलोम्येन वानुलोम्येन वा सर्वथा परमेश्वरानुस्मरणवतां देहिनां मदमायाप्रशमादिलक्षणः सुखकरः परिपाको जायत इति वस्तु ध्वन्यते । प्रदिशत्वित्यादावाशीर्नामालङ्कारः । आशीर्नामाभिलषितवस्तुन्याशंसनं यथा पातु वः ।

* * * *

Colophon:

इत्यच्युतविरचितायां दर्शिकायां प्रथमाश्वासः ॥

R. No. **3684.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācārya, Kīlnattam village, Tinnevelly district.

Foll. 31 and 32 are left blank.

वादकल्पकः.

VĀDAKALPAKAḤ.

A discussion bearing upon the purpose of the expression Viśiṣṭadvayāghaṭitattva in the second Lakṣaṇa of the Sāmānyanirukti: by Śrīkṛṣṇa Tātācārya.

Complete.

Beginning:

रघुवीरपदद्वन्द्वचिन्तासन्तुष्टचेतसा ।
श्रीकृष्णतातसुधिया क्रियते वादकल्पकः ॥

अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्न-निरूपकताकविषयिताव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपावच्छिन्नत्वं दोषसामान्यलक्षणम् । ननु यत्त्वतत्त्वाननुगमात् यत्पदेन वह्न्यभाववद्ध्रदत्वादेरुपादाने तद्रूपावच्छिन्नत्वस्य ह्रदवृत्तिवह्न्यभावादावभावात् अव्याप्तिरिति चेदत्र केचित्—पक्षतावच्छेदकविशिष्टधर्मवत्त्वं दोषत्वम् । वैशिष्ट्यं च—स्वविशिष्टप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तित्वसम्बन्धेन ।

End:

तथाच तादृशनिश्चयविशिष्टत्वेन तादृशनिश्चयस्यापि प्रतिबन्धकत्वात् विशेष्यदलसत्त्वनिर्वाहः । अतो विशिष्टद्वयाघटितत्वमेवादरणीयमिति ॥

टिप्पणी—पक्षताग्रन्थान्ते दर्शितनिश्चयप्रतिबन्धकतामते ॥ टि ॥

Colophon:

इत्थं विशिष्टयुग्माघटितत्वं सम्यगित्युपापादि ।
श्रीकृष्णतातसुधिया रघुवरचरणद्वयैकसक्तधिया ॥

R. No. **3685.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śaṅkara Mūssu, Plantol, Valiyur post, Pattambi.

Foll. 53*b*, 54 and 72 are left blank.

अष्टाङ्गहृदयव्याख्या—ललिता.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ: LALITĀ.

A commentary on the Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII; by Śaṅkara, son of Nārāyaṇaśarman and disciple of Nīlakaṇṭha. It is stated that this commentary was written as the prior commentaries, Sundarī, etc., were found difficult and not clear. Hṛdyā, Indu, Pāṭhyā and Hṛdayabōdhikā are also referred to.

Contains the Adhyāyas 1—5 complete, 6th incomplete and 20—22 complete.

Beginning:

इह तावदयं तन्त्रकारो लोकहिताय शास्त्रमारिप्सुः सदाचारमाचरन् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति प्रबन्धमुखस्थितिलक्षणं

चानुविदधानः शास्त्रस्याविघ्नेन परिसमाप्तिप्रचयार्थं स्वशिष्यशिवाप्त्यर्थं चेष्टदेवतानमस्कारं करोति—रागादीत्यादिना । तस्मै अपूर्ववैद्याय नमः इत्यन्वयः । तस्मै इति पदेन "सर्वनाम प्रसिद्धार्थम्" इति वचनात् प्रमाणतः प्रसिद्धस्यैवापूर्ववैद्यस्य नमस्कार्यता । तस्मात् प्रमाणसिद्धार्थेन परेण भवितव्यम् ।

* * * *

सूत्रस्थानशरीरनिदानचिकित्सितकल्पोत्तरैः षड्भिः स्थानैरनेन प्रकारेणाध्यायानां विंशत्यधिकं शतं प्रोक्तम् ॥

Colophon:

इति प्रथमोऽध्यायः समाप्तः ॥

Colophon:

इति पञ्चमोऽध्यायस्समाप्तः ॥

द्रवद्रव्यं च तोयादि नित्यसेव्यं निरूपितम् ।
इदानीं द्रवसंस्कार्यमन्नं निर्णी(र्णे)तुमीहते ॥
शूकधान्यादिभेदेन सप्तभेदेन सम्प्रति ।
शूकशिम्बिजभेदेन द्विधा धान्यमपि स्मृतम् ॥
बहूपयोगतस्तत्र पूर्वं शूकं तु कथ्यते ।

End:

नीलकण्ठं नमस्कृत्य पार्वतीपतिमादरात् ।
अष्टाङ्गहृदयव्याख्यां करोमि ललिताभिधाम् ॥
व्याख्यानं पाठ्यसंज्ञं तु कैरल्या भाषयान्वितम् ।
दृश्यते वस्तिपर्यन्तं बालानां सुखबोधकम् ॥
अदर्शनात् परमतो विचार्य सुचिरं धिया ।
मान्तर्धाद्वाहटस्योक्तिरिति मत्वेदमुच्यते ॥
सुन्दर्यादिष्ववैशद्यादर्थानामल्पचेतसाम् ।
विस्तरादर्थगाम्भीर्याद्व्याख्यां कर्तुं यतामहे ॥
हृद्येन्दुपाठ्यव्याख्यानमतभेदप्रदर्शिनीम् ।
समालम्ब्य गभीरार्थां व्याख्यां हृदयबोधिकाम् ॥

नस्यादिवस्तिपर्यन्तं सूत्रस्थानं यथामति ।
व्याख्यास्ये नीलकण्ठस्य प्रसादात्पाठ्यमार्गतः ॥
शब्दशुद्धिविहीनोऽस्य शब्दस्यार्थप्रकाशिकाम् ।
व्याख्यां करोमि शिष्यस्य बोधे यावत्सुखं भवेत् ॥

* * * *

Colophon:

इति कण्ठकिफलान्दोलिकालयविख्यातश्रीनारायणशर्मसूनुना वयस्करबिशिष्टागारनामान्तरशोभिना अवलावनालयविश्रुतश्रीनीलकण्ठशर्मणोऽन्तेवासिना शङ्करशर्मणा विरचिताया ललिताख्यायामष्टाङ्गहृदयव्याख्यायां विंशोऽध्यायः समाप्तः ॥

* * * *

मूर्धतैलं कर्तृ कचानां शतनादिभिस्सम्बन्धः । तेन कचशतनं कचसितत्वं कचपिञ्जरत्वमिति । कचशतनं केशच्युतिः, कचसितत्वं पलितभावः, कचपिञ्जरत्वं ताम्रकेशत्वं, परिपुटनं खण्डनं, कचानामेव शिरसो मूर्धसमीररोगान् वातरोगान् शिरस्युद्भूतान् वातविकारानित्यर्थः । एतान् जयति इन्द्रियाणां चक्षुरादीनां प्रसादं प्रसन्नतां स्वरस्य हन्वोः मूर्ध्नश्च बलं दार्ढ्यं जनयति ॥

Colophon:

इति कण्ठकिफलान्दोलिकालयविश्रुतश्रीनारायणशर्मसूनुना वयस्करागारनामान्तरशोभिना जोङ्कैकदेशव्यात्रपत्तनविख्यातश्रीनीलकण्ठशर्मणोऽन्तेवासिना शङ्करशर्मणा विरचितायां ललिताख्यायामष्टाङ्गहृदयव्याख्यायां द्वाविंशोऽध्यायः समाप्तः ॥

R. No. 3686.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. A. Karuṇākara Menon Avargal, B.A., B.L., High Court Vakil, Calicut.

Foll. 33*b* and 34 are left blank.

काव्यप्रकाशव्याख्या.

KĀVYAPRAKĀŚAVYĀKHYĀ.

Same work as that described under R. No. 3672 ante.
Contains the Ullāsas one three and four incomplete.

R. No. **3687**.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 55. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Tarakkal Uṇikaṇṭha Menon, Karakkal-vāriyam, Vallapulla post.

Fol. 55 is left blank.

चम्पुरामायणव्याख्यानम्.
CAMPURĀMĀYAṆAVYĀKHYĀNAM.

A commentary on the Campurāmāyaṇa, which work has been described under No. 12746 of the D.C.S. MSS., Vol. XXI. The commentator, whose name is given as Karuṇākara, says that he wrote this work at the instance of king Vikrama of Calicut and mentions Acyuta and Kṛṣṇa (the preceptors of the commentator), Bhōjarāja, Kālidāsa, and the ancient works Rāmāyaṇa and Sarasvatīkaṇṭhābharaṇa.

Contains the Bālakāṇḍa only.

Date of transcription—Sunday, the 4th day of the solar month Siṁha in the Kollam year 1339.

Name of the scribe—Uṇṇikuñjan of Cerumukkil-vāriyam.

Beginning:

कपोलतटनिस्सरत्सुरभिदानवारापगा-
तरङ्गततिमज्जनैर्विरजसो द्विरेफाङ्गनाः ।
स्तुवन्ति यमिहादरादुचितझाङ्क्रियाभाषया
निहन्तु शिवनन्दनो निखिलमन्तरायं स नः ॥

* * * *

यद्वैदुषीकलितसङ्गमशास्त्रसारसम्भूतसूक्तिवरभागवतान्तरात्मा ।
विद्वज्जनोऽनवरतोज्ज्वलमत्र मोदं धत्तेऽच्युतोऽयमिह मे गुरुराविरस्तु ॥

हरिहरगिरिनाथपादकल्पद्रुमतलसेवनगन्धचित्तवृत्तिः ।
मम हृदयसरोजसम्पुटस्थः स्फुटयतु सद्गुरुरीप्सितानि कृष्णः ॥

श्रीकुक्कुटक्रोडपुरीमहेन्द्रः श्रीकेरलोर्वीतलपूर्णचन्द्रः ।
भूलोकपालस्सुगुणैरुपेन्द्रः श्रीविक्रमो दीव्यति कीर्तिसान्द्रः ॥

* * * *

सोऽयं राजशिखामणिर्निजयशस्सङ्कीर्तनप्रौढता-
जिज्ञासाकुलमानसः शुभदिने स्वामात्यवर्गैस्सह ।
श्रीमद्वैष्णवलोकमण्डनमणिं सम्मानयन् वाञ्छितै-
स्सम्पूर्णैः करुणाकरं निजगुरुं किंचिद्वचोऽवोचत ॥
श्रीकालिदासकविशेखरवाक्सुधाद्रिसद्भोजराजकृतचम्पुरसायनस्य ।
आवासभूमिमधुना रसनां मदीयामुत्तेजयाखिलरसास्वदनानुभूत्यै ॥
इत्थं नरेन्द्रवचनामृतपानतृप्तचित्तो भवन्नहमिहादरणीयशीलः ।
श्रीभोजराजकृतचम्पुमहाप्रबन्धभावप्रबोधनकृते सुचिरं यतेत(य) ॥

* * * *

शृङ्गारादिरसास्वादपरमानन्दभाजनम् ।
धियाद्रियेऽहं रसनां भोजचम्पूप्रकाशिकाम् ॥

इह खलु राजाधिराजपरमेश्वरः श्रीभोजः कविवीरशेखरेण श्रीकालिदासेन सह चरमकालावश्यचिन्तनीयं परमपुरुषार्थप्रधानमेकविंशतिवारावर्तनसमुपस्थितैकविंशतिरूपाभिप्रायसुभगं श्रीमद्रामायणं लोकोपकारार्थं सङ्क्षिप्य सकलव्याकरणसमुद्धृतसारांशसुन्दरस्वनिर्मितसरस्वतीकण्ठाभरणनिर्णीतसाधुशब्दोदाहरणतया गद्यपद्यात्मकचम्पूरूपेण कमपि प्रबन्धं चिकीर्षुस्तस्य प्रबन्धस्य विषयप्रयोजनादिकं सूचयन् काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यपरतां मन्वानश्च सन् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्—इत्यालङ्कारिकवचनप्रामाण्यानुसारेण ग्रन्थादावाशीराद्यन्यतमयोगस्यावश्यकत्वेनाशीरादिषु आशिष एव प्राधान्यात्स्वाभिमतार्थसाधनधुरीणस्य श्रीमहागणपतेः पादारविन्दविषयामाशिषं सकलवृत्ततिलकायमानवसन्ततिलकेन प्रवृत्तेन प्रयुङ्क्ते—लक्ष्मीमिति । हैरम्बं हे महेश्वरसमीपे रम्बते तिष्ठतीति हेरम्बो गणपतिः हेरम्बस्येदं हैरम्बं तस्येदमित्यण् । अङ्घ्रिद्वयं पदयुगं वो युष्माकं लक्ष्मीं पुरुषार्थसम्पत्तिं नितरामतिशयेन तनोतु विस्तारयतु—इति क्रियाकारकसम्बन्धः ।

End:

अथवा त्रयीदृष्ट्या त्रय्यां पुरत्रये दृष्टिर्दर्शनं यस्यास्तया विधया बालया त्रिपुरसुन्दर्या इत्यर्थः । दर्भपत्त्राग्रधीः सुधीर्दक्षिणामूर्तिरिवेति दिक् ।

अत्र श्रीरामस्य पृथक्कृत्य वर्णनाद्वक्ष्यमाणकाण्डप्रतिपाद्यमानयौवराज्याभिषेकः प्राप्तावसर इति प्रतीयते ।

Colophon:

इति चम्पुरामायणव्याख्याने बालकाण्डः समाप्तः ॥

हरिहरगिरिलीनान्(नाथात्) पार्वतीप्राणनाथा
सत(विर)तभजनतुष्टान्(त्) प्राप्तविद्योदयो यः ।
अकृत सुकृतशाली चम्पुरामायणेऽस्मिन्
विवृतिमतिमनोज्ञां वैष्णवः कृष्णशिष्यः ॥
अपरिचयादज्ञा(ना)च्चपलधिया यद्यदत्र दुर्लिखितम् ।
तत्तत्करुणाम्बुनिधे मातः क्षन्तव्यमखिलवागधिपे ॥

The scribe adds—

सहस्राधिकविंशत्यामेकोने वत्सरे रवौ ।
श्रावणे मासि सम्प्राप्ते लिपिः पूर्णेनवासरे ॥

R. No. **3688.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Foll. 57*b* and 58 are left blank.

रघुवीरविलासः.
RAGHUVĪRAVILĀSAḤ.

A poem narrating the story of Rāma. The story begins from the reign of Daśaratha and breaks off with the coronation of Rāma after the vanquishment of Rāvaṇa in the 12th Sarga. By Lakṣmaṇakavi, son of Dāmōdaradīkṣita of Bhāradvājagōtra.

Beginning:

मौलिस्रगुत्थैर्मरुतां मरन्दैः पादेऽन्तरङ्गे करुणारसेन ।
गङ्गातरङ्गैरपि मूर्ध्नि शीतं पायान्महो नो वनितार्धभागम् ॥
नमोऽस्तु तस्मै प्रथमं कवीनामाद्याय योऽजायत मर्त्यलोके ।
विधातु(तृ)लोकादवतीर्य वाण्या विहर्तुमिच्छोः प्रथमावलम्बः ॥
जीयात्कवीन्द्रेषु स कालिदासो धिन्वन्ति चेतांसि सतां यदीयाः ।
कालीमुखाम्भोजवितीर्णदिव्यवीटीरसामोदभृतः प्रबन्धाः ॥

पूरस्त्ययोध्येति भुवि प्रसिद्धा राज्ञां प्रतिष्ठा रविवंशजानाम् ।
यस्या ध्वजक्षौमततिर्घुसिन्धोः पुपोष तीरे सितपक्षलक्ष्मीम् ॥

* * * *

तामावसत्पङ्क्तिरथो नरेन्द्रो गोप्ता भुवस्सागरमेखलायाः ।
आह्लादनाद्यं विबुधाः प्रजानां सुधांशुमुन्मुक्तकलङ्कमाहुः ॥

* * * *

Colophon :

इति भारद्वाजकुलजलधिचन्द्रेण सकलविद्याकूलङ्कषप्रज्ञश्रीदामोदर-दीक्षितवरनन्दनेन लक्ष्मणकविना कृते रघुवीरविलासे प्रथमस्सर्गः ॥

End :

कुन्दस्मेरं व्योमयानं प्रभावैस्स्कन्दप्रख्यस्सर्वमारोप्य सैन्यम् ।
वन्दिस्तोमस्तूयमानापदानो नन्दिग्रामं रामभद्रः प्रपेदे ॥

Colophon :

इति रघुवीरविलासे एकादशस्सर्गः ॥

पितुर्नियोगं परिपाल्य सम्यक् प्राप्याश्रमं भ्रातुरमोघसत्त्वः ।
तेनाधिकप्रार्थनयाध्र्य(र्थ्य)मानं(णं) साम्राज्यमङ्गीकु(रु)ते स्म रामः ॥

* * * *

इत्थं निहत्यायमरण्यवासव्याजेन रक्षोगणमाप्तराज्यः ।
क्षोणीं ररक्षावरजैस्त्रिसङ्ख्यैर्दिवं दिगीशैरिव देवराजः ॥
कृत्वासपत्नां वसुधां समन्तात्संवर्धयामास गुणामृतौघैः ।
सिञ्चन्मुहुर्धर्मतरून् सवीरास्त्रिवर्ग . . . . ॥

R. No. 3689.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Foll. 29*b* and 30 are left blank.

महाविद्यादशश्लोकी, वादिवल्लभाव्याख्यासहिता.

MAHĀVIDYĀDAŚAŚLŌKĪ WITH THE COMMENTARY VĀDIVALLABHĀ.

Same work as that described under R. No. 3211(*g*) ante. By Nityaprajña alias Puruṣōttama.

Complete.

R. No. **3690**.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Kunnūr-mana, Ottapalam, Malabar district.

Foll. 53*b* and 54 are left blank.

छान्दोग्योपनिषद्भाष्यटिप्पणम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAṬIPPAṆAM.

A commentary on Śaṅkarācārya's Chāndōgyōpaniṣadbhāṣya, which work has been described under No. 464 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Beginning:

सद्रूपं ब्रह्म निर्दिष्टं(हेतु) श्वेतकेतुं यदन्वयात् ? ।
तदहं सत्स्वभावत्वाज्ज्ञाता शुद्धोऽभयः प्रभुः ॥

छन्दोगानामुपनिषद्वेदं व्याचिख्यासुर्भगवान्भाष्यकारो व्याचिख्यासितग्रन्थस्वरूपं व्याख्यारम्भेऽवान्तरप्रयोजनं च दर्शयति—ओमित्येतादिति । शारीरके यद्यपि विवृता छान्दोग्योपनिषद्विस्तरेण भूयस्सु प्रदेशेषु, तथापि न पाठक्रमेणेति ततो विशेषमाह—ऋजुविवरणमिति । द्राविडं विवरणं पाठक्रमेण विवृतामिति बहुग्रन्थम् ।

* * * *

Colophon:

इति शाङ्करच्छान्दोग्योपनिषद्भाष्यटिप्पणे प्रथमोऽध्यायः ॥

प्रकरणं परिसमाप्य विद्वदनुष्ठितस्य कर्मणस्साफल्यमविद्वत्सन्तोषार्थमाहेति कथयति—यथेहेत्यादिना ।

End:

वासुदेवोऽस्मि सर्वज्ञस्सर्वात्मा सर्वभावनः ।
नित्यबोधोऽद्वयस्सत्यस्सूक्ष्मश्शुद्धोऽभयः प्रभुः ॥

छान्दोग्यभाष्यमधिकृत्य सदद्वितीयवस्तूपपादनपरं विदुषां हिताय ।
सट्टिप्पणं मञ्जु नरेन्द्रपुरीयतीशश्चक्रे सुबोधामिति कोमलवाक्यजातैः ॥

Colophon :

इति छान्दोग्योपनिषद्भाष्यटिप्पणे अष्टमोऽध्यायः ॥

R. No. **3691.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. V. Subrahmaṇya Śāstri, Head Pandit, Sanskrit school, Tirukkurungudi, Tinnevelly district.

(*a*) अनुमितिवादः.

ANUMITIVĀDAḤ.

Foll. 1*a*—16*b*.

A tract on the Nyāya system of philosophy proving that Anumāna is a distinct Pramāṇa.

Complete.

Beginning :

लिङ्गपरामर्शानन्तरं विलक्षणानुमित्यात्मप्रमित्युदयात्तत्करणतया तस्य विलक्षणप्रमाणान्तरत्वात् स एव चानुमानमित्यभिधीयते । अथ वह्निव्याप्य-धूमवान् पर्वत इत्यादिपरामर्शानन्तरं तदात्मकविशेषदर्शनमूलकपर्वतो वह्नि-मान् इत्याकारकप्रत्यक्षनिर्णयादेव वह्न्यादिगोचरप्रवृत्त्याद्युपपत्तेः अनुमित्यात्म-कविलक्षणप्रमितेरेवासिद्ध्या कुतो लिङ्गपरामर्शस्य प्रमाणान्तरता ।

End :

तस्मादनुमितेः प्रत्यक्षत्वे विरुद्धत्वं निष्प्रत्यूहमेवेति सिद्धमनुमानस्य पृथक् प्रामाण्यमिति समासः ॥

Colophon :

इत्यनुमितिवादः ॥

(*b*) सामग्रीवादः.

SĀMAGRĪVĀDAḤ.

Foll. 17*a*—34*b*.

Same work as that described under R. No. 2142 ante, wherein see for the beginning.

Complete.

End :

जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनोयोगस्य हेतुतायाः क्लृप्तत्वादिति, तदा क्लृप्तकारणभावेन स्पार्शनानुत्पत्तेः । अनिर्वाहेऽवश्यं स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमेवेति दिक् ॥

Colophon :

इति सामग्रीप्रतिबध्यप्रतिबन्धकभावविचारः समाप्तः ॥

The scribe adds—

चन्द्रशेखरेणालेखि.

R. No. **3692.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī, Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. C. Vāsudēvasōmayājippāḍ, Valiyūr, Pattambi, Malabar district.

Fol. 8 gives the name of the original MS.

शृङ्गारसुधाकरः.

ŚṚṄGĀRASUDHĀKARAḤ.

A drama of the Bhāṇa kind, written by the son of the younger sister of king Kulaśēkhararāmavarman on the occasion of the vernal festival of God Padmanābha, worshipped at Trivandrum. The author, whose name is not given, is also said to be the pupil of Śaṅkaranārāyaṇa and Raghunāthatīrtha.

Wants the beginning and the end.

Beginning :

विरचितसरसतर . . . लयसंवाहनकन्दलितन . . . अङ्कुरितविश्वैकमोहनमीनकेतनका . . न कामदानसन्तानस्य सकलभुवनतिलकायमानस्यानन्दूरपुरवरकृतसान्निध्यस्य भगवतः श्रीपद्मनाभस्य चैत्रमहोत्सवकोलाहलावलोकनकुतूहलतया निखिलहरिन्मण्डलसमाहिण्डितैस्सकलकलापण्डितैः सामाजिकैः । पारि—भाव कथमिव ।

* * * *

सामन्तराजराजिराराजन्मकुटतटखचितहरिन्मणिविसत्वरदीप्तिच्छटावर्षदेदीप्यमानचरणकन्दलस्य तस्य श्रीकुलशेखररामवर्मनामधेयस्य महाराजस्यानन्तरजासम्भवेन तदीयदयालवतोतुष्यमाणहृदयेन श्रीमच्छङ्करनारायणगुरुचरणपरि-

चरणप्राप्तविद्यावैशद्येन श्रीमद्रघुनाथसुतीर्थाभिवादनजागरूकेण काव्यनाटकावलोकनशौण्डैस्सवयस्कैर्वयस्यैरभ्यर्थितेन शृङ्गारसुधाकरं नाम भाणं विरचितम् ।

End:

मृदुलशाद्वलिनी हवनस्थलीपरिमलानुसृतालिभिरञ्चिता ।
विकचपुष्पचयैरयते तरां वरतनोरतनोर्महतप्तताम् ॥
(उत्तरतो विलोक्य सहासं) बहुचन्द्रिकाभिरामे.

R. No. **3693.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Palīyattu Valiya Acchan, Chennamangalam, Parur post, via Shoranur.

Fol. 28 is left blank.

भाणः.

BHĀṆAḤ.

A Bhāṇa describing the love between Kalyāṇavarman and Kēralasundarī, the second daughter of Kalāvatī. At the end of the work king Ravivarman is mentioned.

Complete.

Beginning:

(नान्द्यन्ते ततः प्रविशति सूत्रधारः) सूत्रधारः—
मुहुर्मात्रा पुंसः प्रसभविधुतस्याप्यनुपदं
वितन्वाना चित्ते कुसुमशरसाम्राज्यविभवम् ।
सरोजश्रीसारग्रहणनिपुणानेत्रयुगलात्
गलन्ती वामाक्ष्या नवसलिलधारा विजयते ॥

अये किंनुखल्वद्य सरसयौवनप्रायजनसमाकुलस्य वसन्तोत्सवस्य सम्बिभावयिषया समागतानां सकलकलाविलासिनीहृदयङ्गमानां सामाजिकानामावर्जनाय प्रवर्त(मा)ने मयि समाकर्ण्यते । अवधेहि तावत् ।

* * * *

एषा कलावतीद्वितीयदुहितुः सकलललनाकुलमौलिभूषायाः केरलसुन्दर्यास्ताम्बूलकरङ्क(ण्ड)वाहिनी कुवलयवती पलिकाहस्ता इतोमुखमागच्छति ।

* * * *

कान्तः कल्याणवर्मा सकलगुणमणिश्रेणिरत्नाकरो यः
तस्मिन्नत्यन्तकौतूहलि मम मयि च श्रीमतस्तस्य चेतः ।
कादाचित्कश्च सम्प्रत्यजनि घटितयोर्नौ वसन्तोत्सवेऽस्मिन्
संयोगस्तस्य तावत् द्रढिमनि न वरं भाव एकः प्रमाणम् ॥

End:

इदमप्यपरमनवरतमाशास्महे—

भुजामध्यं यावत्सुभगयति रूपं मधुरिपोः
कुचाभोगानम्रः कुसुमशरसाम्राज्यमहिमा ।
विपन्मुक्त[ा]ः (सं)पद्वितततपरितोषां वसुमती-
मुदन्वत्पर्यन्तामवतु रविवर्मा विमलधीः ॥

Colophon:

समाप्तोऽयं भाणः ॥

R. No. **3694.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS of M.R.Ry. K. A. Lakṣmaṇa Śāstrigaḷ, Kalpathi, Palghat.

Foll. 19 and 20 are left blank.

तटातकापरिणयः, सव्याख्यः.

TAṬĀTAKĀPARIṆAYAḤ WITH COMMENTARY.

A commentary on the Taṭātakāparīṇaya, which is a poem describing the marriage of Taṭātakā (Mīnākṣī, born as the daughter of king Pāṇḍya) with Sundarēśa, worshipped at the Śaiva shrine, in Madura.

Wants the beginning and the end.

Beginning:

भवेत् । इति एवं मत्वा स्वः स्वर्गमित्यर्थः; स्वरव्ययं स्वर्गनाक . . . . . . इत्यमरः । अविशत् विवेश प्रापेत्यर्थः । कैलासमापन्नानां पुनर्निवृत्त्यभावात् सुन्दरेशमनिशं भजन्नपि कैलासमगत्वा कालान्तरभाविस्व-वक्षभासमुद्रस्नानसमये स्वस्य चागन्तव्यात् ।

* * * *

(मू.)—

स्वर्याते पितरि यथाश्रुतं कुमारी शौर्याब्धावतनुत सादरं जनन्या ।

आचार्यैरवगतवेदशास्त्रतत्त्वैरादिष्टा गृहपतिभिर्निवापकृत्यम् ॥

(व्या.)—

स्वरिति । शौर्याब्धौ पराक्रमाम्भोधौ पितरि जनके स्वः स्वर्गं याते गते सति कुमारी पुत्री तटातकेत्यर्थः ।

End:

प्रस्थोदग्रागमाग्रप्रविकचसुमनोव्रातनिर्यद्रजोभिः

दुस्स्थोल्लासैकतानैरमितपरिमलैस्सान्द्रपर्यन्तभागे ।

तस्थौ पृथ्वीन्द्रपुत्री प्रमदभरकरे तत्र कार्तस्वराद्रौ

तीर्थैर्मित्रैः पूता च प्रहरणवरयासौ च सत्रा स्वधात्र्या ॥

प्रस्थेति । असौ पृथ्वीन्द्रपुत्री भूपतिकन्यका अमितपरिमलैः अमितः अपरिमितः परिमलो गन्धो येषां तैः ।

* * * *

स्वोपमात्रा सार्धं तस्थौ—इत्यनेनातिरमणीयकनकाचले सचिवादिभिरन्विता-वसदिति भावः । स्रग्धरावृत्तमेतत्—म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्.

R. No. **3695.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paramēśvara-Vādhyān Nambūdiri, Accipura, Kottakal post, Malabar district.

(*a*) भट्टिकाव्यव्याख्याविमर्शः.

BHAṬṬIKĀVYAVYĀKHYĀVIMARŚAḤ.

Foll. 1*a*—20*b*.

A criticism on the commentary on the Bhaṭṭikāvya called Jaya-maṅgalā:

Wants the beginning and the end.

Beginning:

न हि त(य)त्र कुत्रचिदा(द)विद्वदङ्गनाबालं प्रसिद्धार्थं प्रसन्नवदिति प्रसन्नतालक्षणमुक्तम् । न च अथ दुकूलसुवल्ककूशा (संवल्कदुकूलकुथा)-

दिभिरित्यनुप्रासश्लोकात्पूर्वमनन्तरं वा, सरूपवर्णविन्यासमनुप्रासं प्रचक्षत इत्यनुप्रासलक्षणमुक्तम् । नच रणपण्डितोऽग्र्येत्यादियमकश्लोके, तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परं वर्णानां यः पुनर्वादो यमकं तन्निरूप्यते इति यमकलक्षणमुक्तम् ।

* * * *

नन्विह सो इति पदच्छेदेऽनन्तरपदं ध्यैष्ट इति स्यात् । तन्न युक्तम्—तथाविधस्य पदस्याभावात् । सत्यं किन्तु यथा सन्धिविकारान्तं पदं, तथा सन्धिविकारादिकमपि पदं भवितुमर्हति । तथा हि सो अध्यैष्ट इत्यत्रैङः पदान्तादतीति पूर्वरूपत्वम् । तत्र पूर्वरूपमोकारः ।

End:

अत्र चक्रवर्त्याह—तिमिरांशुकमिव तिमिरसदृशमंशुकं चेति लोचने . . वमुक्तं तिमिरं चांशुकाश्च सूक्ष्माश्चांशवस्तिमिरांशुकं रश्मिशबलीकृतं तमःपटलं तिमिरांशुकं नीलजालिका नीलांशुकमिति.

(*b*) शिक्षावचनानि.

ŚIKṢĀVACANĀNI.

Foll. 21*a*—22*a*. Fol. 22*b* is left blank.

A few authoritative extracts from certain treatises on Vēdic phonetics.

Incomplete.

Beginning:

नव सन्ति शिक्षाः पाणिनीयशिक्षा, कोहलेयशिक्षा, आपिशलशिक्षा इत्यादयः । तत्र पाणिनीयशिक्षायामन्ते चतुष्पञ्चश्लोकाः सन्ति । तेषु कश्चिदयं येनाक्षरसमाम्नायमिति श्लोकः ।

End:

यजुर्वेदिनां प्रणवः अर्धाधिकद्विमात्रः । ऋग्वेदिनां चतुर्मात्रः । पराशरस्य चतुर्मात्रः । तदुक्तम्—पराशरश्चतुर्मात्रमाहाध्यात्मार्थतत्त्ववित्.

R. No. **3696.**

Paper. 10⅝ × 9⅜ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sādhu-Mēlavādhyār Tirumalai Ayyaṅgār, Srivilliputtur, Ramnad district.

पुरुषसूक्तचरमार्थनिष्कर्षः.

PURUṢASŪKTACARAMĀRTHANIṢKARṢAḤ.

A treatise giving the real meaning of the last three **Mantras** in the Puruṣasūkta : by Rāmānujācārya alias Lakṣmaṇācārya, son and disciple of Śuddhasattvācārya of Kauśikagōtra.

Complete.

Beginning:

श्रीमत्पुरुषसूक्तोक्तं प्राप्य सीमाप्रपञ्चनम् ।
शुद्धसत्त्वार्यदासेन लक्ष्मणाख्येन लिख्यते ॥
कौशिकश्रीशुद्धसत्त्वदेशिकेन्द्रसुतः सुधीः[1] ।
वेदाहमितिमन्त्रार्थं[2] वेदयामि सतां मुदे ॥

वेदाहमित्यादि । अस्मिन् मन्त्रत्रये ब्रह्मविदां शारीरकचतुर्थाध्यायोक्तरीत्या ब्रह्मविद्यारूपपरमपुरुषार्थशालित्वममृतत्वं चानुपोषेत्सूक्तमुत्तरपूर्वाघाश्लेषविनाशरूपाभ्यर्हितफलयोगित्वं भोगमात्रसाम्यशब्दितसायुज्यपर्यन्तफलप्राप्तिमूलभूतसालोक्यलक्षणनिरतिशयप्रयोजनभागित्वं च प्रतिपाद्य तन्मुखेन ब्रह्मवित्प्रशंसा प्रपञ्चयते । तत्र प्रथमे मन्त्रे प्रथमेनार्धर्चेन

* * * *

ब्रह्मविदः स्वस्वरूपानुसन्धानमुखेन प्रतिपाद्यते । अहमेतं महान्तमादित्यवर्णं तमसस्तु पारे स्थितं पुरुषं वेदेत्यन्वयः ।

End:

भगवन्माहात्म्यस्यापि तन्त्रेण प्रतिपादनात् ब्रह्मवित्प्रशंसाया न महाप्रकरणविरोध इत्यनुसन्धेयमिति दिक् ॥

Colophon:

इति श्रीमत्कुशिककुलतिलकश्रीशुद्धसत्त्वगुरुचरणतनूजरत्नस्य तत्प्रसादलब्धसकलविद्यावैशद्यस्य रामानुजदासस्य कृतिषु श्रीपुरुषसूक्तचरमार्थनिष्कर्षः समाप्तः ॥

श्रीमन्महापुरुषभक्तजनप्रभावं
मूर्ध्नाहतं पुरुषसूक्तमनुत्रयेण ।
श्रीशुद्धसत्त्वगुरुसूनुकृतप्रपञ्चं
सन्तो विमृश्य कलयन्तु परं प्रसादम् ॥

---

[1] देशिकानुग्रहादहम्—इति पाठान्तरम्.

[2] मित्यादिमन्त्रान्—इति पाठान्तरम्.

R. No. **3697.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 17. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Mēlavādhyār Tirumalai Ayyangār, Srivilliputtur, Ramnad district.

Foll. 16*b* and 17 are left blank.

वेदपादरामायणम्.

VĒDAPĀDARĀMĀYAṆAM.

Same work as that described under R. No. 555 ante, but one additional stanza is found in the beginning and is given below By Kandāḍai Rāmānujācārya, son of Varadārya of Vādhūlagōtra.

Complete.

श्रीभूनीलापतिर्देवः श्रेयो भूयो ददातु नः ।
यः श्रीरङ्गं समध्यास्ते शतं धामानि सप्त च ॥

R. No. **3698.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Rāmakṛṣṇa Śāstrigal, Ottapalam, Malabar district.

Fol. 22*b* is left blank.

तन्त्रसारावलिः.

TANTRASĀRĀVALIḤ.

A treatise on medicine dealing with the properties, uses and purification of various substances and with the preparation of medicines of different kinds: by Bhairavānanda.

Contains the Paṭalas 4—17 complete, 18th incomplete.

Beginning:

बीजं श्रुतीनां सुखदं मुनीनां जीवं जडानां महदादिकानाम् ।
आग्नेयमस्त्रं भववादकानां (यदा)हुत्वा(रेवा)मलमाश्रयामि ॥
दे(दै)वमासुरमार्षं च गान्धर्वं चापि मानुषः(म्) ।
तिस्रः कोट्यः शतं पञ्च त्रिंशद्विंशतिसंयुतम् ॥

* * *

तासां नामानि वक्ष्यामि बोद्धुमर्हति सादरम् ।
कटुगन्धारुणा तन्वी नीलपुष्पा शिफान्विता ॥

* * * *

प्रमाणमेतत्पठन् सङ्ग्रहबोधसक्त इत्यादिवचस्तस्य कार्यस्यायं सङ्क्षेपस्सङ्ग्रह-करणादनन्तरमेव मन्दमध्यमबुद्धिव्यवहारार्थमष्टाङ्गहृदयं व्याख्यास्यामः ।

. . . . . लोकप्रकारं प्रति प्रयासस्तन्त्रकृतोऽस्य करुणामिहं(ष)तः ।

* * *

Colophon:

इति हाटकाङ्गविरचितायामष्टाङ्गहृदयदीपिकायां प्रथमोऽध्यायः ॥

End:

आम्रस्य रसानुरूप उपयोग इत्यतो दोषरसविकल्पज्ञानं वैद्यस्य चिकित्सायामङ्गं भवति । तथा चागमः—

क्वचिदेकरसः कल्प्यः संयुक्ताश्च रसाः क्वचित् ।
दोषौषधादीन् सन्दिश्य भिषजा सिद्धिमिच्छत ॥
यस्स्याद्रसविकल्पज्ञः स्याच्च दोषविकल्पवित् ।
न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिषु ॥ इति ।
तस्माद्दोषभेषजवशात् उपयोज्या इत्युक्तम् ॥

Colophon:

इति हाटा(टका)ङ्गविरचितायामष्टाङ्गहृदयदीपिकायां दशमोऽध्याय-स्समाप्तः ॥

R. No. **3700.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇan Valiya Tamburān, Alvañjēri, Malabar district.

विष्णुसहस्रनामभाष्यार्थकारिका.

VIṢṆUSAHASRANĀMABHĀṢYĀRTHAKĀRIKĀ.

A treatise in verses explaining briefly the meaning of Śaṅkara's Viṣṇusahasranāmabhāṣya: by some ascetic who mentions Śaṅkarācārya and Sarvēśvaratīrtha, the preceptor of the author of the work. This work is also called Nāmakārikāsahasra.

Complete.

Name of the scribe—Subrahmaṇya.

Beginning :

यत्पादाम्बु निपीय शुद्धमतयस्सन्त्यज्य सर्वक्रियाः
सत्यज्ञानसुखात्मकं परमहं ब्रह्मास्मि नान्यत्ततः ।
निश्चित्येति दुरन्तसंसृतिमहासिन्धून् तरन्ति प्रजाः
तं सर्वेश्वरतीर्थराजममृतप्राप्त्यै सदोपास्महे ॥
विष्णोर्नामसहस्रस्य भाष्ये योऽर्थः प्रकीर्तितः ।
सङ्गृह्यते स सर्वोऽर्थ एकैकश्लोकतोऽधुना ॥
विश्वं विश्वस्य हेतुर्वा ब्रह्मोङ्कारश्च वा जगत् ।
तत्सृष्ट्वा तत्प्रविष्टो वा विश्वस्यास्मिन् लयेन वा ॥
विष्णुर्व्यापनशीलत्वात्स्वकान्तिव्याप्तितोऽथ वा ।
रोदस्योः क्रमणाद्वापि यद्वा सृष्ट्वा प्रवेशनात् ॥

* * * *

Colophon :

इति श्रीमन्नामकारिकासहस्रे प्रथमं शतकं समाप्तम् ॥

End :

अत एवायमक्षोभ्यो ह्यशक्यक्षोभणः परैः ।
प्रपन्नाभयदानाख्यव्रतदार्ढ्यादपीतरे ॥
एतावन्त्येवायुधानि विद्यन्तेऽस्य न केवलम् ।
किन्तु सर्वाणि सन्तीति सर्वप्रहरणायुधः ॥
नमो महाभारतकृन्मुनिभ्यो नमोऽस्तु तच्छङ्करभाष्यकृद्भ्यः ।
नमोऽस्तु सर्वेश्वरतीर्थवर्यगुरुभ्य ईशस्य च सम्भवेभ्यः ॥

Colophon :

इति श्रीनामकारिकासहस्रे दशमं शतकं समाप्तम् ॥

The scribe adds—

यतिना रचितां नीतां सुब्रह्मण्येन केरलात् ।
श्रीनामकारिकामेतां सुब्रह्मण्याह्वयोऽलिखत् ॥
सुब्रह्मण्यसमानीतां यतिना केनचित्कृताम् ।
श्रीनामकारिकामेतां सुब्रह्मण्य(ह्व)योऽलिखत् ॥
इति श्रीनामकारिकासहस्रं समाप्तम् ॥

R. No. 3701.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 204. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Harihararājaguru, Chochinajagannathapuram, Kudala post, Ganjam district.

Fol. 203 gives the contents of this work. Fol. 204 is left blank.

शुद्धिवचोमुक्तागुच्छकः.
ŚUDDHIVACŌMUKTĀGUCCHAKAḤ.

A treatise in Dharmaśāstra dealing with the following subjects:—

१. आशौचप्रकरणम्.
२. आपद्धर्मप्रकरणम्.
३. प्रायश्चित्तप्रकरणम्.
४. स्वजातिशौचप्रकरणम्.
५. अङ्गाशौचप्रकरणम्.
६. सपिण्डाशौचप्रकरणम्.
७. बालाद्याशौचप्रकरणम्.
८. स्वचाशौचप्रकरणम्.
९. वर्णसन्निपाताशौचप्रकरणम्.
१०. असपिण्डाशौचप्रकरणम्.
११. सद्यश्शौचादिप्रकरणम्.
१२. प्रेतनिर्हरणादिदहनविधिप्रकरणम्.
१३. अस्थिसञ्चयनादिदशाहविधिप्रकरणम्.
१४. प्रेतप्रथमसंवत्सरनियमप्रकरणम्.

By Māṇikyadēvapaṇḍitācāryāgnicit.
Complete.

Beginning:

गृहस्थाश्रमिणां नित्यनैमित्तिकधर्मा उक्ताः । अभिषेकादिगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माश्चोक्ताः । अधुना तदधिकारसङ्कोचहेतुभूताशौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते । आशौचप्रतिपादनेन कालस्था(स्वा)-नाद्यपनोद्यः पिण्डोदकदानादिविधिरध्ययनादिपर्युदासस्य निमित्तभूतः कश्चनातिशयः कथ्यते ।

* * * *

Colophon:

इति पण्डिताचार्याग्निचिन्माणिक्यदेवग्रथिते शुद्धिवचोमुक्तागुच्छके स्वजातिशौचप्रकरणम् ॥

End:

यथाह—शङ्खः

पितर्युपरते पुत्रो मातुश्श्राद्धान्निवर्तते ।

मातर्यपि च वृत्तायां पितृश्राद्धादृते समाः ॥

ऋते समाः सांवत्सरिकमन्तरेण । एतदुभयत्र सम्बध्यते ॥

Colophon:

इति पण्डिताचार्याग्निचिन्माणिक्यदेवग्रथिते शुद्धिवचोमुक्तागुच्छके प्रेतप्रथमसंवत्सरनियमाः ।

समाप्तोऽयं ग्रन्थः ॥

R. No. 3702.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 180. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śrīnivāsa Ayyaṅgār, Lakṣamarattōppu, Alwartirunagari, Tinnevelly district.

विष्वक्सेनसंहिता.

VIṢVAKSĒNASAMHITĀ.

A portion of the Pāñcarātrasamhitā dealing with the following subjects:—

१. भूपरीक्षा.
२. मण्टपादिलक्षणम्.
३. दारुसङ्ग्रहणम्.
४. शिलाग्रहणम्.
५. शूलस्थापनविधिः.
६. मृत्संस्कारविधिः.
७. स्वप्नाध्यायः.
८. इष्टकालक्षणादिविधिः.
९. बालालयविधिः.
१०. प्रतिमालक्षणम्.
११. मूर्तिभेदलक्षणम्.
१२. मन्त्रोद्धारकथनम्.
१३. ऋषिच्छन्दोन्यासादिकथनम्.
१४. चरुपाकविधिः.
१५. मूलमन्त्रहोमक्रमः.
१६. प्रतिष्ठालक्षणम्.
१७. जङ्गमस्थापनविधिः.
१८. देवीस्थापनविधिः.
१९. अङ्गन्यासादिलक्षणम्.
२०. परमात्मादिमूर्तिपूजाभेदकथनम्.
२१. मत्स्यादिनामार्चनफलम्.
२२. स्नपनविधिः.
२३. पुष्पारामाद्यङ्गपूजाविधिः.
२४. जलगन्धादिसंस्कारविधिः.
२५. पालिकाघटिकाशरावलक्षणम्.
२६. ध्वजोत्थापनविधिः.
२७. उत्सवविधिः.

२८. अमावास्योत्सवविधिः.
२९. श्रीरामजन्मोत्सवविधिः.
३०. श्रीकृष्णजयन्तीकृत्यम्.
३१. यन्त्रताडनोत्सवः.
३२. हेतिराजलक्षणम्.
३३. द्रव्यशुद्धिविधिः.
३४. प्रासादलक्षणम्.
३५. परिवारलक्षणम्; महापीठप्रतिष्ठा.
३६. पुण्याहजीर्णोद्धारप्रोक्षणम्.
३७. दीक्षाशकुनविस्तारः.
३८. प्रायश्चित्तप्रोक्षणम्.
३९. प्रायश्चित्तविधिः.

Contains the Adhyāyas 1—39.

Beginning:

अथातस्सम्प्रवक्ष्यामि भूपरीक्षाविधिं परम् ।
संशोधयेत्ततो भूमिं प्रागुदक्प्रवणां शुभाम् ॥

* * * *

ब्राह्मणैश्च(णानां) सिता भूमिः रक्ता(च) क्षत्रियस्य तु
वैश्यस्य पीतका भूमिः कृष्णा शूद्रस्य . . . ॥
कुम्भस्य पूर्वदिग्देशे कुण्डं च चतुरश्रकम् ।
वृत्तं वा शिल्पिना कुर्यात् स्थण्डिले वा समाचरेत् ॥

* * * *

Colophon:

इति श्रीपाञ्चरात्रे विष्वक्सेनसंहितायां भूपरीक्षाविधिर्नाम प्रथमोऽध्यायः ॥

End:

स्नापयेन्मुनिशार्दूल पूर्वोक्तेन विधानतः ।
ब्राह्मणान् भोजयेत्तत्र यथा वित्तानुसारतः ॥

Colophon:

इति श्रीपाञ्चरात्रे विष्वक्सेनसंहितायामेकोनचत्वारिंशोऽध्यायः ॥

उपायापायसंयोगे निष्ठया हीयतेऽनया ।
अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् ॥
प्रायश्चित्तिरियं सात्र यत्पुनश्शरणं व्रजेत् ।
उपायानामुपायत्वस्वीकारेऽप्येतदेवहि ॥

R. No. 3703.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 334. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paramēśvaran-Vādhyān Nambūdiri, Achipuram, Kottakkal, Malabar district.

Bound in two volumes.

Fol. 334 is left blank.

ऋक्संहिताव्याख्या— ऋगर्थदीपिका.

ṚKSAṀHITĀVYĀKHYĀ : ṚGARTHADĪPIKĀ.

Same work as that described under R. No. 3076 ante, wherein see for the beginning. By Mādhava, son of Sundarī and Vēṅkaṭācārya.

Contains the Aṣṭakas five to eight complete.

End:

देवा भागं यज्ञियं यथेतरं सञ्जानाना उपासते प्रश्नाः तथा यूयमपि कुरुध्वमिति समानो मन्त्रः । . . . . (अ)स्माकं समानं चित्तं चानुसन्धानां . . . सह भवत्वेषां युष्माकमिति समानं मन्त्रं समानं मन्त्रमभ्युच्चारयामि युष्माकं येन सङ्गताः स्यात तथानेन समानेन हविषा युष्माकं जुहोमीति ॥

व्याख्यदष्टममध्यायमष्टमस्याष्टकस्य सः ।
तीरमाश्रित्य निवसन् कावेर्या दक्षिणं सुखम् ॥ इति ।

Colophon :

इति वेङ्कटार्यसूनुना माधवाचार्येण कृतमृग्वेदभाष्यं समाप्तम् ॥

R. No. 3704.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 25. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vāsudēvasōmayājippāḍ, Vilayūr, Pattambi, Malabar district.

Fol. 25*b* is left blank.

मीमांसाभाष्यपरिशिष्टम्.

MĪMĀṀSĀBHĀṢYAPARIŚIṢṬAM.

A supplement to Prabhākara's commentary on the Mīmāṁsābhāṣya of Śabarasvāmin : by Śālikanātha.

Contains the first Pāda of the first Adhyāya only.

Beginning :

हरते सर्वविघ्नानि कर्मसिद्धिविधायिने ।
तुभ्यमभ्यासवत्ये(षा स्यान्मे) गणपते नतिः ॥
प्रभाकरेण गुरुणा व्याख्यातार्थस्य भूयसः ।
मीमांसाभाष्यजातस्य परिशिष्टं विभज्यते ॥

अथातो धर्मजिज्ञासा । अध्ययनविधेराचार्यकरणविधिसिद्धिमात्रप्रयोजनत्वेन अविवक्षितार्थतया स्वाध्यायाध्ययनस्य न वेदाध्ययनानन्तरा तद्धेतुका वेदार्थजिज्ञासावकल्पत इति न लौकिकार्थतयाथात इति पदद्वयमवकल्पत इति पारिभाषिकोऽस्यार्थ आश्रयणीयः ।

* * * *

यदा तु सर्वपदानामयं प्रकारस्तदाथातशब्दयोरप्येषैव गतिरित्युक्तं भवति । सूत्रकाराभिप्रायेणापि पदानामीदृश एवार्थोऽवगम्यत इत्याह—एवामित्यादि।

End :

यत्तु न कस्यचिदपीत्युक्तं, तत्स्वातन्त्र्यमभ्युपगम्य परं स्वतन्त्रा एव न त्वात्मानुमानं तेभ्य इति भवति चान्यैरुपलब्ध इति सन्तानान्तरवर्तिना तावदन्यो नोपलब्धः इच्छा न दृष्टा ।

इदं शालिकनाथेन भाष्यतत्त्वार्थवेदिना ।
परिशिष्टार्थबोधाय परिशिष्टं प्रवर्तितम् ॥
गणनेऽक्षरचुञ्चूनामभितिष्ठन् कनिष्ठिकाम् ।
नारायणो लिखितवान्परिशिष्टं महाग्रहात् ॥

कर्मैके तत्र दर्शनात् ।

* * * *

कथमाशङ्का । तस्मादिति परमप्रकृतमुपसंहरति ॥

Colophon :

प्रथमस्याध्यायस्य प्रथमः पादः ॥

R. No. **3705.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Ganjam district.

Fol. 52*a* contains the name of the owner of the original MS.

श्रीनिवासरथविजयनाटिका.

ŚRĪNIVĀSARATHAVIJAYANĀṬIKĀ.

A drama in four Acts describing the good qualities of Śrīnivāsaratha, a Brahman king who ruled in the Oriya country: by Narasiṁhadīkṣita, who was a court poet of king Śrīnivāsaratha. The genealogy of the author and of the king are given in detail in the work. The poet's contemporaries in the same court are also given herein.

Complete.

Beginning:

जेता कैरवबान्धवस्य नरवरोऽस्याधस्सुरेन्द्रद्विष-
न्मौलिभ्राजितपद्मरागविलसद्भाः पल्लवश्रेणयः ।
इत्यालोच्य चकार शम्भुसचिवैर्यस्याभिषेकं शिव-
. . . . . स्तृतीयचरणः क्रामन्नभोमण्डलम् ॥

* * * *

नाद्यन्ते सूत्रधारः—अलमतिविस्तरेण अग्रतोऽवलोक्य सानन्दम्—अहो अतिरमणीयोऽयं वर्षासमयः । यत्र हि

जातीवल्लिमहोपगूहनकथातम्भावनाभावितः
चञ्चच्चारुघनावलीनवजलासारैकलिम्पत्तनुः ।
शङ्कातङ्कितकान्तपान्थदयिताप्राणप्रयाणोच्चल-
त्पापोत्पन्नभिया शनैर्मरुदसौ क्षोणीबुधैराशुगः ॥

* * * *

सूत्र—क्षणं विमृश्य स्मृतिमाभिनीय मारिष!

श्रीश्रीनिवासविजयाद्भुतनाटिकेयं
सद्गद्यपद्यनिरवद्यकथैकहृद्या ।
रङ्गप्रसङ्गमधुरा रचनाविशेष-
रम्या प्रवीणभरता भवताभिनेया ॥

पारि—ससुखं भाव एतादृक्प्रबन्धनिर्माणनिर्मितकीर्तिभरः कोऽयं कविः?

सूत्रधारः—सप्रणयकोपम्—आः पाप! किमिदमपि न ज्ञायते शृणु रे शृणु—अस्ति किल भार्गवीनदीपश्चिमतीरे वामदेववाजपेयिनिर्मितं वामदेवपुरं नाम ब्राह्मणायतनम् । तत्र च—

* * * *

वीरश्रीपुरुषोत्तमक्षितिपतेर्लब्ध्वा तुलापूरुषं
दानं कोटिसुवर्णभारभरितं तद्दक्षिणायाः कृते ।
दत्तं हन्त चिरन्तशासनमिदं स्वेनैव नाम्नाकरोत्
सोऽयं सम्प्रति कथ्यते नु भवता श्रीवामदेवः कृती ॥

सूत्र—अथ किम् । पारि—ततस्ततः । सूत्रधारः—तस्य च वामदेववाजपेयिनो नवपुत्राणां मध्ये सर्वेश्वरवाजपेयीति प्रसिद्धः पुत्रो बभूव । पारि—बाढं मयापि श्रुत एवायमर्थः ततस्ततः । सूत्र—तस्य च पञ्चपुत्राणामग्रणीः लण्डुवाजपेयीति प्रसिद्धो दुर्गेश्वरवाजपेयीति पुत्रः समजनि । तस्यापि पुत्रयोर्द्वयोरग्रजस्सकलनिरवद्यविद्याविद्योतमानान्तःकरणो देवानन्दवाजपेयीति पुत्रोऽजनिष्ट । पारि—ततस्ततः । सूत्र—तस्य च चतुःपुत्राणां मध्ये मध्यमद्वयावरजः शैशवाराधितवीतिहोत्रः नानापुण्यनिवहनिर्माणनिर्मलमानसो भूतलाखण्डकीर्तिराश्चर्यगुणसागरो हलधरमिश्र इति तनुजन्मा समुल्लास । तत्पुत्रो नरसिंहदीक्षितः कविरयम् । यस्येयं वाचोयुक्तिः—

अन्येषां कविता प्रकृष्टविदुषां तावन्मुदे जायते
यावच्छ्रीनरसिंहदीक्षितकवेर्नैव श्रुता भारती ।
तावन्मत्तयति प्रभूतरसिकान् ग्राम्यापि काम्या सभा
यावद्भावविलाससारसरणिः पौराङ्गना नेक्षिता ॥

* * * *

किं चायमध्यात्मविद्याप्रीणितमानसस्तद्भूयिष्ठां नाटिकां निर्माय तदभिनयदर्शनोत्सुक आस्ते । ततः—

सकलकविमुखालीपङ्कजम्लानिचन्द्रः
कविरपि नरसिंहः संसदालोकसौख्या ।
गजपतिरपि दाता नाटिकालोकनोत्क-
स्त्वमपि मधुरनृत्यस्तच्चयैवाभिनेया ॥

* * * *

मुकुन्ददेवो गजराजिनाथो राजा बली रञ्जनलब्धवर्णः ।
सङ्गीतविद्याघटितस्वमूर्तिर्विभाति भूमौ रणलब्धकीर्तिः ॥

* * * *

Colophon:

इति श्रीनरसिंहदीक्षितविरचितायां श्रीनिवासविजयनाटिकायामभिप्राय-सूचनं नाम प्रथमोऽङ्कः ॥

* * * *

श्रीश्रीनिवासरथ! त्वं जयसि । नरसिंहदीक्षितकविः—ब्राह्मणाः! सत्यमेतत् ;

तथाहि—

नेत्रदन्तिशरचन्द्रशकाब्दे(१५८२) कोऽपि भाति खुरुधानगरीशः ।
भूपतिश्शिशुमुकुन्द उदग्रः सद्यशोगुणसमूह उदग्रः ॥

अपि च—

तस्य च प्रकृतिमित्रमुदारः कोद(स)लाधिपतिराम इहास्ते ।
गाढपुण्यचयकम्पितभूपः साधुताधूतयशोगततापः ॥

अथ च—

तस्य सद्गुरुरखण्डधरायां श्रीनिवास इति विश्रुत एषः ।
पण्डितः क्षितिपसङ्गतपूजस्तोषिताखिलतपस्विसमाजः ॥

End:

वटुः—किञ्चिदग्रेसरीभूय इत इत आगच्छन्तु महाभागाः ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीनरसिंहदीक्षितविरचितायां श्रीश्रीनिवासरथविजयनाटिकायामभि-प्रेतार्थसूचनं नाम तृतीयोऽङ्कः समाप्तः ॥

* * * *

क्षितितलविलसद्भूसुरवंशावतंसेन श्रीश्रीनिवासरथेन सोऽहमादिष्टः । यथा—सखे मम देवार्चानन्तरं श्रीपण्डितरायभट्टाचार्यो गृहीत्वा गर्भागारं प्रति त्वया शीघ्रमागन्तव्यमिति चिन्तयति । नेपथ्ये—

सभागतास्सम्प्रति पण्डिता जना विचित्रवाक्यामृतशुद्धबुद्धयः ।
निरञ्जनध्याननिरस्तकिल्बिषाः श्रीश्रीनिवासेक्षणलोलमानसाः ॥

अपि च—

नानाविशुद्धमतजल्पनवावदूका
अद्वैतमार्गपरिपालनजागरूकाः ।

तत्त्वप्रमोदपरिशोधितसर्वशोका-
रतातागताः क्षितिमणे गुणवृद्धलोकाः ॥

* * * *

ततः प्रविशति श्रीनिवासरथः ।

पण्डितरायेश्वररायधनञ्जयमिश्ररामभिश्रहरिमिश्रकपिलीदासनरसिंहदीक्षित-नरसिंहदासादयः सभ्दाश्च सर्वे यथोचितमान्यं विधाय यथोचितासने समुप-विशन्ति । श्रीनि—

स्वभ्यस्ता भूरिविद्या यदि किल भवतां तद्वशादेव भूमा-
वप्रत्यक्षं न किञ्चित्तदिह गुणवतो हन्त सम्बोध्य वच्मि ।
भक्तेर्मुक्तिः प्रसाध्या कथमिव भविता वेदवेदान्तसारैः
ज्ञात्वा दृष्टान्तसिद्धैरिह मतिजडता यापनीया भवद्भिः ॥

* * * *

तथाप्येवमस्तु (भरतवाक्यम्)—

गाढं भूमितलं प्रशास्तु सकलं श्रीमन्मुकुन्दाभिध-
क्ष्मापालो धरणीसुरा मम हितास्सम्पत्तिमन्तो भुवि ।
भूयासुस्तव पादपद्मयुगले भक्तिस्सदास्तां च मे
जीयासुर्नरसिंहदीक्षितकवेर्वाचोऽपि यावत्क्षिति ॥

विष्णु—सर्वे एवमस्त्विति निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीनरसिंहदीक्षितविरचितायां श्रीश्रीनिवासरथविजयनाटिकायां जीवन्मुक्तिप्रतिपादनं नाम चतुर्थोऽङ्कस्समाप्तः ॥

इति श्रीश्रीनिवासरथविजयनाटिका समाप्ता ॥

R. No. 3706.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 65. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Rāmaliṅga Śāstrigal, Kalladakuricchi, Tinnevelly district.

Fol. 65*b* contains the name of the owner of the original MS.

सर्वप्रत्ययमाला.

SARVAPRATYAYAMĀLĀ.

An easy treatise in verse on all sorts of grammatical terminations, suffixes and prefixes; by Śaṅkarācārya, younger brother of Śaṅkarārya.

Deals with the following subjects:—

१. सप्तविभक्त्यर्थदर्शनम्.
२. शतृशानचोर्मालाकथनम्.
३. क्त्वाल्यप् तुमुन्दर्शनम्.
४. निष्ठामालाप्रदर्शनम्.
५. कृत्यादिसूत्रकथनम्.
६. तृच्प्रत्ययादिप्रकीर्णमाला.
७. तद्धितवर्णनम्.
८. स्त्रीप्रत्ययान्तकथनम्.
९. तिङन्तपरिभाषा.
१०. लुण्मालाकथनम्.
११. लङ्मालाकथनम्.

Breaks off in the 11th Adhyāya.

Date of transcription—The 27th day of the solar month Vṛścika in the year Pārthiva. Name of the scribe—Brahmadēśam Gurusvāmi Śāstrin, Ambasamudram, Tinnevelly district.

Beginning:

शिवात्मजमविघ्नाय सुरासुरसुपूजितम् ।
सर्वक्रियादौ सम्यगर्च्य वन्दे गणपतिं प्रभुम् ॥
गोविन्दं गोपगोपीनां नन्दनं नन्दनन्दनम् ।
वन्दे बृन्दारकैर्वन्द्यमिन्दिरानन्दकारणम् ॥
प्रत्ययग्रथितैश्शब्दैः पर्यायैस्सर्वधातुजैः ।
शङ्करार्यानुजो मालां शङ्करार्यः करोम्यहम् ॥
क्रियाक्रमोक्तशब्दानां पर्यायपदविस्तृता ।
सर्वप्रत्ययमालेयं बालशिक्षार्थमुद्धृता ॥
दशाध्यायस्थभूवादिसर्वधातुक्रियाक्रमम् ।
श्लोकाष्टकेन वक्ष्यामि शतात्प्राक् सकलाः क्रियाः ॥
क्रियापदप्रपञ्चोऽत्र क्रमयुक्ते कृते सति ।
सर्वस्येष्टपदं द्रष्टुमप्रयत्नेन शक्यते ॥

* * *

एवं सप्तविभक्त्यर्था विस्तरेण प्रदर्शिताः ।
कृदन्तास्तद्धितान्ताश्च समासाश्चाव्ययानि च ॥

स्त्रीप्रत्ययान्तशब्दाश्च सुबन्ताः पञ्चधा मताः ॥

Colophon:

इति श्रीशङ्कराचार्यविरचितायां सर्वप्रत्ययमालायां सप्तविभक्त्यर्थदर्शनं नाम प्रथमोऽध्यायः ॥

End:

सहते क्षमते दुःखं मृषते च तितिक्षते ।
णिचि मर्षयति क्लेशं क्षमते क्षमयत्यथ ॥
जीवति प्राण(णि)ति प्राणान्धरतिध्री (ध्रि)यते ततः ।
जिजीविषति सन्यत्र प्राणिनी(णि)षति सर्वदा ॥

Colophon:

इति शङ्कराचार्यविरचितायां सर्वप्रत्ययमालायां लण्माला नाम दशमोऽध्यायः ॥

अभवत्प्रादुरभवदाविरासीदविद्यत ।
उदपद्यत पुत्रोऽसा(स्या)वातरत्समपद्यत ॥

* * * *

आम्नायतापठ्यत च समशेत व्यतर्कयत् ।
व्यचिकित्सतान्वयुङ्क्तापृच्छद्गुरुरपृच्छत ॥
अन्वयुज्यत पर्यन्वयुज्यतासावचिन्तयत् ।
अध्यायदध्यायत चातर्कयच्च नि(न्य)रूपयत् ॥

R. No. **3707.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Harihararājaguru, Chochinajagannathapuram, Kudala post, Ganjam district.

(*a*) वैष्णवामृतम्.

VAIṢṆAVĀMṚTAM.

Foll. 1*a*—7*b*. Fol. 8 is left blank.

On the religious conduct and life of the Vaiṣṇavas, as revealed to Arjuna by Lord Kṛṣṇa.

Complete.

Beginning:

एकदा नैमिशारण्ये केशवेन सहार्जुनः ।
पप्रच्छ श्रद्धया पार्थो वैष्णवानां यथाक्रमम् ॥

अर्जुन उवाच—

वैष्णवानां गतिं कृष्ण कथयस्व महाप्रभो ।
तद्गतिं श्रोतुमिच्छामि यद्गतिर्लोकदुर्लभा ॥

[अर्जुन उवाच]—

कां गतिं वैष्णवा यान्ति किं कुर्वन्ति सनातन ।
किं ध्यायन्ति कमर्चन्ति प्रणमन्ति च किं प्रभो ॥

श्रीभगवानुवाच—

मद्गतिं वैष्णवा यान्ति प्रणमन्ति च मां सदा ।
मां ध्यायन्ति सदा पार्थ मामर्चन्ति पुनः पुनः ॥
कुर्वन्ति मम कर्माणि वदन्ति मद्गुणो बलम् (?) ।
मम नामानि पुण्यानि गायन्ति च पुनः पुनः ॥

End:

श्रीविष्णोर्नाममाहात्म्यं यः पठेच्छ्रद्धया नरः ।
स याति परमं स्थानं विष्णुना सह मोदते ॥

(*b*) राधारसमञ्जरी.
RĀDHĀRASAMAÑJARĪ.

Foll. 9*a*—11*b*. Fol. 12*a* gives the owner's name of the original MS. Fol. 12*b* is left blank.

Same work as that described under R. Nos 3053(*a*-75) and 3177(*a*) ante. By Śrīkṛṣṇacaitanyadēva. This is also called Nikuñjavihārastōtra.

Incomplete.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sādhu-Mēlavādhyār Tirumalai Ayyaṅgār, Srivilliputtur, Ramnad district.

(*c*) चरमश्लोकत्यागशब्दार्थटिप्पणी.
CARAMAŚLŌKATYĀGAŚABDĀRTHAṬIPPAṆĪ.

Foll. 13*a*—63*a*. Fol. 63*b* gives the owner's name of the original MS. Fol. 64 is left blank.

An investigation of the meaning of the expression परित्यज्य in the Caramaślōka of the Bhagavadgītā: by Lakṣmaṇamuni alias Śrīnivāsadāsa of Śrīśaila and a resident of sriperumbudur.

This work is divided into :

१. अशक्त्यादिसिद्धत्यागानुवादभङ्गः,
२. कार्पण्यादिपञ्चकविधिवादभङ्गः,
३. स्वरूपत्यागदूषणभङ्गः,
४. दिव्यसूक्तिविरोधभङ्गः.

Complete.

Beginning :

नत्वा यतीन्द्रलोकार्यौ स्मृत्वा वरवरं मुनिम् ।
करोमि चरमश्लोक(त्याग)शब्दार्थटिप्पणीम् ॥

तत्र तावत्सत्सम्प्रदायपरम्पराप्राप्तोऽयमर्थः सिद्धोपायाधिकाराङ्गतया सवासनसर्वधर्मस्वरूपत्यागश्चरमश्लोकप्रथमपादे विधीयत इति । अत्र केचित्--

प्रपत्त्यधिकारानुवादपरः, कार्पण्यविधानपरः, नैरपेक्ष्यानुसन्धानविधानपरः, अशक्त्यादभे(द)निषेधपरः, अशक्यप्रीत्याशानिषेधपरः, ब्रह्मास्त्रन्यायसूचनपरश्चेति षोढा तद्योजनां वर्णयन्ति । अत्र हि--

अशक्याद्यश्रुतेः पार्थे तद्बाधाद्विध्यनन्वयात् ।
विवक्षावैपरीत्यादप्याद्यः कल्पोऽसमञ्जसः ॥

* * * *

Colophon :

इति श्रीशैललक्ष्मणमुनिविरचिते त्यागशब्दार्थटिप्पणे अशक्त्यादिसिद्धत्यागानुवा(द)भङ्गो नाम प्रथमो वादः ॥

End :

श्रीवेदान्ताचार्याणामपि तत्रैव तात्पर्यपर्यवसानात् । तथा सत्येव सकलप्रमाणसम्प्रदायोपपत्तेश्च चरमश्लोके स्वरूपत्याग एव त्यजिधात्वर्थ इति सर्वं समञ्जसम् ॥

श्रीशैललक्ष्मणमुनेः श्रीभूतपुरवासिनः ।
कृतिः प्रवर्धतामेषा त्यागशब्दार्थटिप्पणी ॥

Colophon :

इति श्रीनिवासदासविरचितत्यागशब्दार्थटिप्पण्यां दिव्यसूक्तिविरोधभङ्गो नाम तुरीयो वादस्समाप्तः ॥

टिप्पणी समाप्ता ॥

R. No. **3708.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vaidya Vāriyar, East gate, Tiruppanattura, Cochin State.

Fol. 36*b* is left blank.

अष्टाङ्गहृदयव्याख्या—पाठ्या.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ : PĀṬHYĀ.

A commentary on the Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII.

Contains the Adhyāyas 1—12 only in the Sūtrasthāna.

Beginning:

सर्वज्ञसंज्ञितं वन्दे सर्वसिद्धान्तकारणम् ।
दिगम्बरतया ख्यातं शाश्वतं सुमहन्महः ॥

उपोद्घातः पदं चैव पदार्थः पदविग्रहः ।
चालना प्रत्यवस्था च षोढा व्याख्यानलक्षणम् ॥

रागादिरोगान् जयानेत्यनेनात्रोपायलक्षणः सम्बन्धः । इदं तन्त्रमुपायमुपेयमायुः हेतुलिङ्गौषधाख्यं स्कन्धत्रयमत्रार्थः । एवं धातुसाम्याख्येन प्रयोजनेन प्रयोजनवादिदं तन्त्रम् । प्रतिपाद्यप्रतिपादकभावलक्षणस्सम्बन्धः । हेतुलिङ्गौषधाख्येन स्कन्धत्रयेणाभिधेयवच्च ।

* * * *

Colophon:

इति प्रथमोऽध्यायः समाप्तः ॥

End:

एकक्षयद्वन्द्ववृध्या त्रयः, द्वन्द्वक्षयैकवृध्या च त्रयः । वातः क्षीणः पित्तश्लेष्माणौ वृद्धौ (१) पित्तं क्षीणं वातश्लेष्माणौ वृद्धौ (२) श्लेष्मा क्षीणः वातपित्ते वृद्धे (३) वातो वृद्धः पित्तश्लेष्माणौ वृद्धौ (४) श्लेष्मा वृद्धः वातपित्ते क्षीणे (५)। भेदा द्विषष्टिर्निर्दिष्टा इति पञ्चाशद्द्वादश च (६२) द्विषष्टिः स्वास्थ्यकारणं समसन्निपातः ॥

Colophon:

इति द्वादशोऽध्यायः ॥

R. No. 3709.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Rāmagōvinda Śāstrigāru, Narasapuram, Kistna district.

(*a*) जागदीशसिद्धान्तलक्षणविवेचनम्.

JĀGADĪŚASIDDHĀNTALAKṢAṆAVIVĒCANAM.

Foll. 1*a*—45*b*. Fol. 46 is left blank.

Same work as that described under R. No. 1587 ante, wherein see for the beginning.

Incomplete.

End :

तथा च तादृशाभाववत्त्वावच्छिन्नानुयोगिताकपर्याप्तिकधर्मो घटीयविशेषाभावकूटवृत्ति[त]यावत्त्वतदवच्छिन्नाधिकरणतावान् निर्घटदेशः । तत्र घटसामान्याभावोऽस्तीति । एवं संयोग . . . .

Transcribed in 1921–22 from a MS. of M.R Ry. Nārāyaṇa Paṭṭēri, Trichur, Cochin State.

(*b*) देवीस्तुतिः, सव्याख्या.

DĒVĪSTUTIḤ WITH COMMENTARY.

Foll 47*a*—53*a*. Foll. 53*b* and 54 are left blank.

A commentary on the Dēvīstuti, which is a eulogy addressed to goddess Durgā or Dēvī.

Apparently complete.

Beginning :

स्थूलां मूले तदन्तश्चतुरधिकदलां बिन्दुरूपां हराख्या-
माख्यारेखाग्रयोगव्रतपवनपयोजन्मरामाभिरामाम् ।
शुक्लप्राचुर्यसंस्थामृतकमलभरां भारतीजन्मभूमिं
स्वान्तःप्रध्वंसि तेजः प्रसरपरधुरां नौमि शैलेन्द्रकन्याम् ॥

* * * *

शिव आनन्दमयः प्रलयकालनुन्ना सा प्रकृतिः परमात्मनिलीना यदा शिवस्तस्मिन्नानन्दमयवाचकः ।

सर्वेषां शकनाच्चापि देवान् शक्तान् करोति या ।
सर्वेषां यत्फलं सैव शक्तिरत्राभिधीयते ॥

End :

परमश्वरस्वरूपिणी पद्ममुद्राङ्कयन्त्रिणी ।
स्वरूपिणी त्रिखण्डा च सकलाधारस्वरूपिणी ॥
योनिमुद्रां च स्मरेत् । कं कचपुटेनाकृष्य ।
अकलं शिवमित्याहुः कला शक्तिः प्रकीर्तिता ।
कौलेतेजोविकारस्स्यादिति त्रितयनिश्चयम् ॥

R. No. **3710.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Siṣṭula Hariyanna Śāstrulugāru, Ullipālam, Repalli taluk.

(*a*) राघवयादवीयम्.
RĀGHAVAYĀDAVĪYAM.

Foll. 1*a*—10*a*. Fol. 10*b* is left blank.

A poem narrating at the same time the story contained in the first six Kāṇḍas of the Rāmāyaṇa and the story in the tenth Skandha of the Bhāgavata, each stanza being so composed as to be capable of interpreted in two different ways; by Sōmēśvarapaṇḍita of Gautama-gōtra, disciple of Gōvinda and son of Kṛṣṇasūri of Viñjimūri family.

Contains the Sargas one and two complete.

Beginning :

श्रीमानघान्तो हिमभानुवंशवनीवसन्तस्सदयस्सरामः ।
कृष्णो विदेहात्मजयान्वितोऽर्हान् नेता कृतिं मे सफलीकरोतु ॥
जयत्यजस्त्रं परमोदकेच्छो विनायको यः परमाञ्जनेयः ।
क्षमां दधानः सशिवः स्वशक्त्या नन्दी स पायादतिमात्रमस्मान् ॥

* * * *

व्यासं कणादं कपिलं च शास्त्रैस्तैः पाणिनिं जैमिनिमक्षपादम् ।
बुधा द्विवेदीकुलचन्द्र यं त्वां वदन्ति गोविन्दगुरो नमस्ते ॥
निर्मातुमर्थद्वययुक्तमेकं पद्यं ह्यशक्यं कविना सुखेन ।
अहो कृतिं श्लेषमयीं विधातुकामस्य मे साहसमास कीदृक् ॥
प्रवर्तते रामकथान्तरे यो रसः ततः कृष्णकथान्तरेऽन्यः ।
एवंविधास्ते बहुशोऽत्र यत्तत्काव्यस्य निर्माणमशक्यमस्य ॥

तथापि रामस्य कृपावलम्बात्कृष्णस्य चाश्चर्यकरं कवीनाम् ।
श्लिष्टं करिष्याम्यहमाशु काव्यं श्राव्यं सतां राघवयादवीयम् ॥
कथाश्च रामायणकाण्डषट्के वसन्ति या भागवतस्य दिव्याः ।
स्कन्धे विचित्रा दशमे च तासां कुर्यामहं सङ्घटनां क्रमेण ॥
शब्दानहं भारविकालिदासमाघादिकाव्यप्रहितान् प्रयोक्ष्ये ।
एकाक्षरांश्चामरकोशनिष्ठान् ध्रुवं न चैकाक्षरकोशनिष्ठान् ॥

* * * *

स्वानां बुधानां सुहृदां च पित्रोः गुरोः कृपां प्राप्य कृतानतिस्सन् ।
श्लिष्टैरशेषैः सहितं विधातुमुपक्रमे राघवयादवीयम् ॥
साकेतनामा सहितार्यसङ्घा नानामहाभूरिवितानशाला ।
पुरीवरा द्यौरिव भात्ययोध्याभिष्या(ख्या)न्तरामा मधुरा धरायाम् ॥

* * * *

अत्यन्तं सकलतमा(मो)हरन् प्रपश्यन्
सत्सङ्गं गुरुसहितं कला दधानः ।
आकाशे विधुरिव गोपराजगेहे
श्रीकृष्णः स्म सपदि राजते सरामः ॥

Colophon:

इति श्रीविज्ञिमूरिकृष्णसूरिसूनोः गौतमसगोत्रस्य रामकृष्णभक्तस्य सोमेशस्य कृतौ राघवयादवीये श्रीपदलक्षणे वृत्तलक्षणसूचके श्लेषमहाकाव्ये प्रथमस्सर्गः ॥

End:

समुदि सति परस्मिन् ब्रह्मणाष्टान् पदार्थान्
गतवति तदनुज्ञामेत्य क्लृप्तप्रणामः ।
वसुधिगुरुगृहं श्रीमान्ययौ स्वं सुमित्रा-
त्मजयुगलसकान्तः सद्म हित्वा स रामः ॥

Colophon:

इति श्रीविज्ञिमूरिकृष्णसूरिसूनोः रामकृष्णभक्तस्य सोमेश्वरस्य कृतौ राघवयादवीये श्रीपदलक्षणे वृत्तलक्षणसूचके श्लेषमहाकाव्ये तृ(द्वि)तीयः सर्गस्समाप्तः ॥

(*b*) राघवयादवीयव्याख्यानम्.

RĀGHAVAYĀDAVĪYAVYĀKHYĀNAM.

Foll. 11*a*—69*b*. Fol. 70 is left blank.

A commentary on the previous work.

Contains the first Sarga complete and the second incomplete.

Beginning :

नानालङ्कृतिपाकरीतिरसवृत्त्यत्युज्ज्वलं सद्गुणं
श्लाघ्याष्टादशवर्णनं सुमतिभिश्श्राव्यं च भव्यप्रदम् ।
काव्यं यादवराघवीयमतुलं गम्भीरभावोदयं
व्याख्यातुं प्रयतामहे बुधजनानन्दं विधातुं वयम् ॥
सद्रीतिस्सरसा लसन्मृदुपदा सद्वृत्तिरुच्चैर्गुणा
निर्दोषा सदलङ्कृतीर्गतवती शय्यां परामाश्रिता ।
सद्वर्णा तनुते मु(दं) . नवती श्लिष्टोक्तिभिस्संमता
श्रीसोमेश्वरपण्डितस्य कविता कान्तेव यूनः कवेः ॥

* * * *

इह खलु तत्रभवान् सोमेश्वरनामा महाकविः राघवयादवीयनामककाव्यकरणनैपुण्याविष्करणद्वारेण परमपुरुषार्थसाधनीभूतश्रीरामकृष्णकथामनुसन्दधानः प्रारिप्सितस्य काव्यस्य निरन्तरायपरिसमाप्तिं सम्प्रदायाविच्छेदं च कामयमानः ।

* * * *

इष्टदेवताप्रार्थनारूपामाशिषमाचरति—(श्रीमानिति) । आदितः श्रीशब्दप्रयोगात् वर्णगणादिशुद्धेरभ्युच्चयः ॥ तदुक्तम्—देवतावाचकाश्शब्दा (. .) लिपितो गुणतोऽपि वा ॥ श्रीः शोभा अस्यास्तीति श्रीमान्; नित्ययोगे मतुप् । जगत्प्रकाशकशोभ इति भावः । इति ।

* * * *

श्लेषमहाकाव्य इति । महच्छब्देन लक्षणसम्पत्तिः सूचिता । राघवयादवीय इति काव्यवर्ण्यकथनम् । प्रथमस्सर्गः समाप्त इति शेषः ॥

End :

अहीनवधूजनः अहिराजवधूजनः तथा उक्तरसन् परमत्यन्तमन्तं रम्यं वसतियोग्यमिति भावः । रमणकं तदाख्यं स्थानविशेषं पश्यन् अनुदमगात् अतियोग्यमिदं रमणकं विहाय स्थानान्तरं गमिष्यामीति तदानीं चिखेदेति भावः । श्रीराम एव.

R. No. **3711.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

(*a*) भगवदज्जुकव्याख्या—दिङ्मात्रदर्शिनी.
BHAGAVADAJJUKAVYĀKHYĀ: DIṄMĀTRADARŚINĪ.

Foll. 1*a*—28*b*.

A commentary on Baudhāyana's Bhagavadajjuka, which work has been described under No. 12571 of the D.C.S. MSS., Vol. XXI.

Apparently complete.

Beginning :

बौधायनकविरचिते विख्याते भगवदज्जुकाभिहिते ।
अभिनेयेऽतिगभीरे विशदानधुना करोमि गूढार्थान् ॥

तत्र तावदष्टपदीरूपां सुरवरमुकुटशब्दाभिव्यञ्जितचन्द्राभिधेयामाशीर्वचनात्मिकां नान्दीं करोति—त्वामित्यादिना । रुद्रस्य पादः त्वां पातु इति सम्बन्धः । रुद्रस्य परमेश्वरस्य पादः अभिमतफलसम्पादनप्रवीणोऽवयवः त्वामर्थात्सभापतिं जातावेकवचनं वा सामाजिकानित्यर्थः ।

End :

अतः शीघ्रमेवेतो गत्वास्माभिरिदानीं सन्ध्यावन्दनादिकं कर्तव्यमिति भावः ॥

इति प्रहसनाभिख्ये पूर्णा नाट्यनिबन्धने ।
हास्यगूहिततत्त्वार्थे टीका दिङ्मात्रदर्शिनी ।
बुधजनमानसे न कियतीमपि मे विवृतिः
मुदमतिरिक्तमोहरभसोपचिता कुरुते ।
तदपि कृशाशयावशकुशीलवमात्रहिता
यदि तु भविष्यतीयमियता सफलैव कृतिः ॥
यश्चासौ भवभूतिसूक्तिजलधेरर्थौघयादोगण-
प्रक्षोभोत्थितभीतिभञ्जनकरीं व्याख्यातरीं निर्ममे ।

तेनेयं विषमेऽतिवृत्तगहने बौधायनीये पुनः
नाल्थे गर्भितशास्त्रजृम्भितवचोगम्भीरगुम्भे कृता ॥
भोगे रोगभयं सुखे क्षयभयं वित्ते नृपालाद्भयं
माने दैन्यभयं जये रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयं यतो भुवि नृणां वैराग्यमेवाभयम् ॥

Transcribed in 1921-22 from a MS. of M.R.Ry. Kōṭiri Nīlakaṇṭha Nambūdiri Annara, Tirukkaṇḍiyūr, Tirur, South Malabar.

(*b*) चकोरसन्देशः.

CAKŌRASANDĒŚAḤ.

Foll. 29*a*—38*b*.

A love message sent through a Cakōra bird and written after the manner of the Mēghasandēśa of Kālidāsa.

Complete.

Beginning :

कश्चित्कामी कुहचिदनिशं क्षत्रवीरः प्रियाभ्यां
बद्धप्रेमा तदनुसरणायासमर्थोऽन्तरात्मा ।
स्मारं स्मारं विलसितरतान्याशये पेशलाङ्ग्या
मन्दश्शोच्यामभजत दशां मन्मथाविष्टचेताः ॥

* * * *

चेतोयोनेर्विशिखशिखिना दह्यमानाङ्गमेनं
दीनात्मानं तदधरसुधापाननिध्याननं माम् ।
नैवान्यासां सुखयति सखे सङ्गमो ह्यङ्गनानां
ज्योत्स्नासादादपरमुत किं रोचते ते चकोर ॥

* * * *

Colophon :

इति चकोरसन्देशे पूर्वभागस्समाप्तः ॥

End :

उर्वीदेवाः कृतवसतयः कुर्वते केरलीया
यस्मिन्वेदाध्ययनमनिशं चोदिता भार्गवेण ।

नो विद्यन्ते ननु निवसतामापदो यत्र नणां
यद्वा माठक्षितिपयशसां भाजनं व्याहरन्ति ॥

* * * *

इत्यादीनि प्रकट(य) मम प्रार्थितानि प्रियाया
इत्युक्तोऽहं तव च तरुणि प्रोक्तवानस्मि सर्वम् ।
प्रत्याख्याहि द्रुतमिति भवत्युक्तवत्याशु तस्याः
कान्ता भूयान्ननु करुणया मानसं मानदायाः ॥
वामापाङ्ग्या निगदितवती वाचमप्यन्यथैव
भूयास्त्वं मे भवतु सकृदप्याशयस्य प्रसादः ।
देशानिष्टान् सह दयितया सञ्चरन्नस्मदीय-
प्राणत्राणप्रभवसुकृतं प्राप्य कामं रमस्व ॥

Colophon:

इति चकोरसन्देशस्समाप्तः ॥

R. No. **3712.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

(*a*) **महाविद्यादशश्लोकी, सटीका.**

MAHĀVIDYĀDAŚAŚLŌKĪ WITH COMMENTARY.

Foll. 1*a*—20*b*.

The text is the same as that described under R. No. 3211(*c*) ante. The commentary, which is different, is by Narasiṁha, pupil of Padmanābha.

Complete.

Beginning:

उल्लासं नरसिंहषोडशकलापूर्णेन्दुवाग्ज्योत्स्नया
संप्राप्नोति कुलार्कपण्डितमहाविद्याख्यवल्ली शुभा ।
सा न(नोऽ)मोघफलप्रदातिचबहुभि(न्नमू)ला दृढा
विप्रैस्सभ्रमरा सदा प्रकरणैर्दीर्घैश्च पर्वान्विता ॥
दुःखाब्धेः परमा(पा)रका(ता)रणपरं शम्भुं च पारं परं
वाग्देवीं च परां परावरमयीं पङ्क्तिं गुरूणां पदाम् ।

नत्वा वादिमदापहारजननी विद्वज्जनोल्लासिनी
टीका चारु कुलार्कपण्डितकृतेः प्रौढ्या मया रच्यते ॥

ननु महाविद्या नाम प्रमाणानां साधनदूषणानर्हत्वेनानुपयोगित्वाद्युत्पादनमनुपपन्नमिति चेत्; अत्रोच्यते—न कासाञ्चिदप्रामाण्ये प्रमाणता सर्वासां स्यात्। यथा चैतत्तथोर्ध्वं प्रतिपाद्यते।

* * * *

विपक्षपक्षतत्तुल्यान् सह साध्याविरोधिना।
पक्षयित्वा प्रवर्तन्ते महाविद्याश्चतुर्विधाः ॥ तत्र
विपक्षं पक्षयित्वैव प्रवर्तेते उभावपि।
विधातुं ते महाविद्ये श्लोकद्वयमिदं कृतम् ॥
अपक्षसाध्यवद्वृत्ति विपक्षान्वयि यन्न तत्।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम् ॥ इति।

शब्दः अनित्यः कृतकत्वाद्घटवदित्यत्रानुमाने ये विपक्षादयः तेऽत्र विपक्षशब्देन ग्रहीतव्याः न तु प्रकृतानुमाने ये विपक्षादयस्त इति। अन्यथा केवलान्वयित्वेन विपक्षाभावाद्विपक्षसाधनमनुपपन्नं स्यात्। उत्तरग्रन्थविरोधश्चेत्यादि।

End:

पक्षस्यैव प्रमेयत्वादन्वितत्वं प्रसाध्यते।
व्याख्याता गुरुभिः पूर्वं यादृशी तादृशी मया ॥
व्याख्यातेयं दशश्लोकी श्रीकुलार्कार्यनिर्मिता।
तेनात्र दोषलेशोऽपि शङ्कितुं नैव शक्यते ॥

* * * *

पुण्यं यज्जनितं मया बहुतरं जन्मान्तरे जायते
तस्मात्तार्किकपद्मनाभगुरवस्स्वर्गे स्थितिं प्राप्नुयुः।
यत्पापं यदि विद्यते मम फलं भूयान्न तेषां मदो?
धातारं करुणानिधिं परगुरुं बद्धाञ्जलिः प्रार्थये ॥
श्रीपद्मनाभाङ्घ्रिसरोजयुग्मे यद्यस्ति भूयो मम भक्तियोगः।
तत्रैव शम्भुः परलोकसिद्धिं कामप्रचारः(स) ममादधातु ॥

श्रीपद्मनाभैः कथितस्य मध्ये तावत्स्मृतत्वेन तथैव भूयात् ।
यावत्समीचीनमिहास्ति किंचिद्यद्यस्ति दुष्टं तु ममैव दोषः ॥

Colophon:

समाप्तेयं दशश्लोकीटीका सद्विदिता परा ।
श्रीपद्मनाभशिष्येण नरसिंहेन निर्मिता ॥
महाविद्याङ्कश्लोकाङ्कश्च । समाप्ता चेयं टीका ॥

(*b*) दशश्लोकी, सोदाहरणा.

DAŚAŚLŌKĪ WITH ILLUSTRATIONS.

Foll. 20*b*—21*b*. Fol. 22 is left blank.

This work contains illustrations in addition to the ten verses contained in R. No. 3211(*c*) ante. By Kulārkapaṇḍita. Compare also R. No. 3712(*a*) ante. These ten verses set forth sixteen Kēvalānvayin types of syllogisms, with particular reference to the Nyāya polemic tending to maintain the non-eternity of sound.

Complete.

Colophon:

इति तार्किकचक्रवन्दितचरणानां कुलार्कपण्डितानां कृतिरियमिति ॥

Transcribed in 1921-22 from a MS. of M.R.Ry. K. V. Paramēśvaravadhyān Nambūdiri, Achipuram, Kottakkal post, South Malabar.

(*c*) शैशिरी-शिक्षा.

ŚAIŚIRĪ-ŚIKṢĀ.

Foll. 23*a*—24*a*. Fol. 24*b* is left blank.

A treatise on phonetics and pronunciation. It is attributed to Śaiśira.

Complete.

Beginning:

गजाननाय कीशाय भक्तविघ्नप्रणाशिने ।
नमो गणेशरूपाय विष्णवे दशबाहवे ॥
जगत्सम्भूतिसंरक्षसंहारैकविनोदिने ।
नमो भगवते तस्मै चिदानन्दाय विष्णवे ॥
मुद्गलो गालवो गार्ग्यशाकल्यशैशिरी(रा)स्तथा ।
पञ्च शौनकशिष्यास्ते शाखाभेदप्रवर्तकाः ॥

शैशिरस्य तु शिष्यस्य(श्च) शाकटायन एव च ॥
सर्वज्ञं सर्वकर्तारमाचार्यं तु प्रणम्य च ।
शैशिरोऽहं प्रवक्ष्यामि शाखाया लक्षणं विधिः ।
त्रिषष्टिर्वा चतुष्षष्टिर्वर्णास्सम्भवतो(श्शम्भुमते) मताः ॥

End:

अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते ।
ह्रस्वान्तं तं विजानीयाद्यस्संस्थे चिन्निदर्शनम् ॥

Colophon:

इति शैशिरी-शिक्षा समाप्ता ॥

R. No. 3713.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Sudarśanācārya, Kil̲nattam, Tinnevelly district.

(*a*) अवच्छेदकतासम्बन्धवादः.

AVACCHĒDAKATĀSAMBANDHAVĀDAḤ.

Foll. 1*a*—4*b*.

A critical discussion of the effect of introducing the relation of Avacchēdakatā in the general definition of Hētvābhāsa.

Contains the Kakṣyās one to eight complete, but wants the beginning and the end.

Beginning:

अव्याप्त्यादिकमेवोद्भावनीयं न तु गौरवमित्येवंविधसमयबन्धसहितायां विशिष्टद्वयाघटितत्वमवच्छेदकतासम्बन्धेन प्रतिबन्धकताविशिष्टान्यत्वं वा सम्यगिति विप्रतिपत्तौ प्रथमा कक्ष्या—अवच्छेदकतासम्बन्धेन प्रतिबन्धकताविशिष्टान्यत्वनिवेशनमेव समीचीनं न तु विशिष्टद्वयाघटितत्वनिवेशनं, तथा सति विशिष्टद्वयाघटितत्वकल्पे ह्रदो वह्निमान् वह्न्यभाववज्जलवद्वृत्तिजलाभावादित्यत्र वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदे अव्याप्तिः ।

End:

यत्तु विशिष्टद्वयाघटितत्वकल्पे अभाववद्व्यापके इत्यादिबाधाव्याप्तिरिति तन्न—विशेष्यदलघटकप्रतिबन्धकताघटितविशिष्टद्वयाघटितत्वस्यैवोपादेयत्वात्.

(b) अवच्छेदकतासरः.
AVACCHĒDAKATĀSARAḤ.

Foll. 5a—21a. Foll. 21b and 22 are left blank.

Similar to the work described above. By Mahāmahōpādhyāya Tiruppuṭkuḷi Śrī-Kṛṣṇa Tātācārya.

Beginning :

रघुवीरपदद्वन्द्वचिन्तासन्तुष्टमानसः ।
श्रीकृष्णतातो रचयत्यवच्छेदकतासरम् ॥

यां दोषचिह्नेऽनतिरिक्तवृत्तिरूपामवच्छेदकतामवोचन् ।
स्वरूपसम्बन्धविशेषरूपां तामद्य सम्यक्प्रतिपादयामः ॥

अनाहार्यज्ञानवृत्तित्वविशिष्टयद्रूपावच्छिन्ननिरूपकताकविषयितात्वव्यापकं प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धविशेषरूपावच्छेदकत्वं तद्रूपावच्छिन्नत्वं दोषत्वमिति कल्पे पाषाणमयत्ववत्पर्वतेऽतिव्याप्तिः, प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशे च प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षे सत्प्रतिपक्षेऽव्याप्तिः ।

End :

स्वविशिष्टप्रतिबन्धकतानिरूपितत्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वउभयसम्बन्धान्तर्गतस्ववैशिष्ट्यस्य स्वव्याप्यत्वरूपतया दोषविरहात् । शेषं विशिष्टद्वयाघटितत्वविचारदर्शितरीत्यावसेयमिति दिक्.

R. No. **3714.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Śrīmān Divākaradhyāna Paṭnāyak, Sergada, Ganjam district.

गीतगोविन्दव्याख्या— बालबोधिनी.
GĪTAGŌVINDAVYĀKHYĀ : BĀLABŌDHINĪ.

A commentary on Jayadēva's Gītagōvinda, which work has been described under No. 11937 of the D.C.S. MSS., Vol. XX.

Complete.

Beginning:

श्रीचैतन्यकृपाशीधुकणोन्मत्तेन केनचित् ।
टीका सङ्गृह्यते गीतगोविन्दस्य समासतः ॥

स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः ।
क्रमेणोपक्रमादेषा प्रथ्यते बालबोधिनी ॥
अत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः ।
विवृतिर्न कृता या तु ज्ञेया ग्रन्थान्तरे बुधैः ॥
वक्तव्यो बालबोधिन्यां शब्दार्थः शब्दवेदिभिः ।
भावार्थदीपिकायां च भावो भावार्थलोलुपैः ॥

अथ श्रीराधामाधवयोर्विजनकेलिवर्णनमयं श्रीगीतगोविन्दाख्यं प्रबन्धं निबध्नंस्तत्र च तयोस्सर्वोत्तमतां निश्चिन्वानः श्रीमान् जयदेवनामा कविराजस्तमालवनीतमःपुञ्जकुञ्जसदनात् बहिः स्थितयोस्तत्र प्रवेशाय गदितश्रीराधिकासखीवचनमनुस्मरन् तदेव मङ्गलमाचरति, तद्वर्णमयत्वात्प्रबन्धोऽयं मङ्गलरूप इति च ज्ञापयति—मेघैरिति । श्रीराधामाधवयोः केलयः जयन्ति सर्वोत्कर्षेण वर्तन्ते ।

* * * *

Colophon:

इति बालबोधिन्यां प्रथमस्सर्गः ॥

End:

अतः सर्गोऽयं समृद्धिमदाख्यसम्भोगरसानन्दितः पीताम्बरः प्रियाधीनत्वेन स तद्वर्णवसनप्रियः श्रीकृष्णो यत्र स इति सर्गः ॥

Colophon:

इति बालबोधिन्यां गीतगोविन्दे(न्दव्याख्याने) द्वादशस्सर्गः ॥

The scribe adds—

श्रीगोविन्दपदाम्भोजयुगलाचलभाषितम् ।
लिलेख गीतगोविन्दं गोविन्दानन्दमान्दिरम् ॥
गोपीगोकुलगोपगोपनविधौ गोवर्धनः प्रोद्धृतः
येन श्रीयमुनावनोत्थदमुनाः पीतश्च विश्वात्मजा ।

श्रीकृष्णेन फणीश्वरश्च दमितोऽनाथाश्रयस्सोऽधुना
दीनानां शरणार्थिनां शरणदः कस्मान्मुकुंदो न नः ॥

Colophon :

इति श्रीगीतगोविन्दव्याख्या बालबोधिनी समाप्ता ॥

R. No. **3715.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 60. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. A. Varadarāja Ayyangār, Village Munsif, Anantakrishnapuram, Tinnevelly district.

Fol. 60 is left blank.

रहस्यत्रयकारिका, सव्याख्या.

RAHASYATRAYAKĀRIKĀ WITH COMMENTARY.

This commentary is similar to that described under No. 5219 of the D.C.S. MSS., Vol. XI.

Complete.

Beginning :

श्रीमान् वेङ्कटनाथार्यः (. . .) सन्निधत्तां सदा हृदि ॥ प्रारिप्सितस्य श्रीमद्रहस्यत्रयसाराख्यदिव्यप्रबन्धस्याविघ्नपरिसमाप्त्यर्थं शिष्यप्रशिष्यादिपरम्परया प्रवचनाभिवृद्धिसिद्ध्यर्थं च गुरुपङ्क्तिपूर्वकं परमगुरुभूतलक्ष्मीनारायणचरणशरणवरणमनु श्रीमान् देशिकेन्द्रः ।

गुरुभ्यस्तद्गुरुभ्यश्च (. . .) दम्पती जगतां पती ॥ इति ।

आभगवत्तः (. . .) रहस्यत्रयसारोऽयम् (. . .) कर्मब्रह्मात्मके (. . .) करान्—मुमुक्षूणामुपनिषदामुपादेयत्वमितरस्यानुपादेयत्वं चोपदिशति ।

असारमल्पसारं च सारं सारतरं त्यजेत् ।
भजेत्सारतमं शास्त्रं रत्नाकर इवामृतम् ॥

* * * *

उत्तराधिकारे स्वयंप्रकाशं शुद्धसत्त्वं बद्धचेतनानां कथं न भासत इत्यत्राह—

(मू.)—

धियस्स्वयंप्रकाशत्वं मुक्तौ स्वाभाविकं यथा ।
बद्धे कदाचित्संरुद्धं तथात्रापि नियम्यते ॥

धियः धर्मभूतज्ञानस्य मुक्तौ मुक्तिदशायां स्वाभाविकं स्वभावप्रयुक्तं कदाप्यसंरुद्धम् ।

End:

अकिञ्चनसर्वशरण्यभूतलक्ष्मीनारायणस्वरूपरूपाद्यभिज्ञतमश्रीमद्वकुळभूषण-श्रीपराशरव्यासादीनां श्रीमद्यामुनश्रीमद्रामानुजादीनां च सम्मतः इष्टतमः अयं दिव्यप्रबन्धः । श्रीवेङ्कटेशघण्टावतारभूतश्रीमन्निगमान्तमहादेशिकरूपविपश्चित्तमेन समगृह्यत सम्यक् संशयविपर्ययराहित्येन निर्बाध[क]तया च सङ्गृहीत इत्यर्थः ॥ कवितार्किकसिंहाय (. . .) वेदान्तगुरवे नमः ॥

The scribe adds—

तारणनामसंवत्सरे तुलाकृष्णत्रयोदश्यां.

Colophon:

कारिकाव्याख्यानंसमाप्तम् ॥

अनन्तकृष्णपुरवास्तव्यस्य वरदराजदासस्य पुस्तकमिदम् ॥

R. No. **3716.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 60. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Yajñeśvaradīkṣitar, Kalpathi, Palghat.

बोधायनश्रौतप्रायश्चित्तदीपिका.

BŌDHĀYANAŚRAUTAPRĀYAŚCITTADĪPIKĀ.

An explanatary treatise on the performance of the expiatory ceremonies in connexion with the sacrificial rites intended for the followers of Bōdhāyana school.

The work has been written in accordance with the views of Bhavasvāmin.

Incomplete.

Beginning:

अथ बोधायनश्रौतप्रायश्चित्तदीपिका प्रारभ्यते —

सार्तवदाज्यसंस्कारः ।

नत्वा बोधायनाचार्यं तेनोक्तश्रौतकर्मणाम् ।
विध्यतिक्रमणे प्रायश्चित्तदीपः प्रकाश्यते ॥

श्रौतबोधायनोक्तानि प्रायश्चित्तानि यानि तु ।
व्याख्यातानि यथापद्यं तथा गोपालसूरिणा ॥
व्यासोक्तानि प्रकीर्णानि तैरुक्तानि तु यानि च ।
भवस्वामिमताच्चेषां विस्तरान्निर्णयं ब्रुवे ॥

पञ्चप्रकरणनिरूपणम्—
पञ्च प्रकरणान्यत्र तेऽन्याधानाग्निहोत्रके ।
दर्शाद्याश्र(ग्र)यणाद्येव सोमश्चेति यथाक्रमम् ॥

अथातो मन्त्रगणाम्नातानि । अथशब्द आनन्तर्ये कर्माभिधानानन्तरं प्रायश्चित्तमभिधीयते । मन्त्रगणाम्नातानि । अथातश्शब्दो हेत्वर्थः । यस्मात्कर्मणो वैगुण्ये सति प्रायश्चित्ते कृते कर्म सगुणं भवति । अथ प्रायश्चित्तानि व्याख्यास्यामः । विहितानामकरणेऽविहितानां करणे वा प्रायश्चित्तं विधीयते । मन्त्रगणाम्नातानि कानि चिन्मन्त्रेण गम्यन्ते, कानिचित् गणेन । ब्रह्म प्रतिष्ठा मनस इत्येवमादीनां प्रायश्चित्तत्वं मन्त्रसामर्थ्यादवगम्यते ।

End :

मिन्दाहुत्या च प्रायश्चित्तं हुत्वात्मीयेन बीजेन पुनर्हविरुत्पाद्य स्वस्थाने प्रचरेत् । बीजान्तरेण प्रवृत्तमपि हविश्श्रपयित्वासाद्य सम्प्रतिपन्नदेवतात्वेन पुनरुत्पादितेन हविषा सह प्रचरेत् । निर्वापानन्तरं वा यत्र स्मरेत् । तदानीमेव वा विभज्याभिमृश्यामुष्मै स्वाहेति जुहुयात् । यद्वो देवा अतिपादयानि वाचयित्वा(त्वं) नो अग्ने स त्वं नो अग्ने.

R. No. **3717.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. **Foll.** 90. **Lines,** 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Śrīmān Bṛndāvana Ratho, Sergada, Ganjam district.

भारतामृतम्.

BHĀRATĀMṚTAM.

Same work as that described under R. No. 3200 ante, wherein see for the end. By Kavicandrarāya alias Divākara, son of Vaidyēśvara and Guṇavatī of Bhāradvājagōtra and Vājasanēyaśākhā. The author, who had a brother named Madhusūdana (the author of Dhūrtacaritabhāṇa), lived in the court of Kṛṣṇarāya of Viziyanagar and learnt Sāhitaya from his paternal uncle Nārāyaṇa.

Contains the Sargas 1—20 complete.

Beginning :

प्रणेतुमाम्नायविधीननेकधा दधार यः सत्यवतीतनूजताम् ।
प्रदर्शिताद्वैतपथो विरज्यतां स रज्यतां मय्यनुकम्पया हरिः ॥

महानयं यद्यपि दुस्तरः परैः कवीश्वरैः कौरवकीर्तिसागरः ।
तथापि पाराशरपादचिन्तनातरीमुरीकृत्य तरीतुमुत्सहे ॥

* * * *

सुधांशुवंशे कति नाम नावनीभुजो भुजोपार्जितभूतयोऽभवन् ।
तथापि तान् कृत्स्नतया दुरालपानपास्य कांश्चित्प्रथितोदयान् ब्रुवे ॥

विभूषणं भूवलयस्य भूतिमानभूदभूतप्रथमो महीपतिः ।
समस्तविद्यासदनं पुरूरवा नवावतारः पुरुषोत्तमस्य यः ॥

* * * *

यं प्रासूत पतिव्रता गुणवती मुक्ताविमुक्तात्मनः
श्रीवैद्येश्वरतो विभूषितभरद्वाजान्वयादात्मजम् ।
काव्ये तस्य दिवाकरस्य कृतिनो बालाधरस्वादुनि
श्राव्ये भव्यपदोऽयमादिगदितः सर्गस्समाप्तोऽभवत् ॥

* * * *

यं प्रासूत पतिव्रता गुणवती मुक्ताविमुक्तात्मनः
श्रीवैद्येश्वरतो विभूषितभरद्वाजान्वयादात्मजम् ।
तस्य श्रीकविचन्द्ररायपदवीभाजो रसाम्भोनिधौ
सर्गस्सम्प्रति भारतामृतमहाकाव्ये द्वितीयोऽगमत् ॥

* * * *

काव्ये तस्य पितृव्यतः कविनृपात्साहित्यशिक्षाभृतः
श्रीनारायणनामतो रसमयः सर्गस्तुरीयो गतः ॥

* * * *

कर्णाटाधिपकृष्णरायसदसि ख्यातस्य विद्वत्तया
सर्गस्तस्य*कृते निबन्धतिलके षष्ठोऽपि निष्ठां गतः ॥

* * *

यद्भ्राता मधुसूदनो मधुरया कं नाम नानन्दय
द्वाचा तत्कविकर्मणीह दशमस्सर्गस्समाप्तिं गतः ॥

* * * *

भाणोऽभण्यत येन धूर्तचरितं चेतश्चमत्कारकृ-
त्काव्ये तस्य समाप्ततामुपगतस्सर्गोऽयमेकादशः ॥

* * * *

यो देव्यास्स्तुतिमद्रिराजदुहितुः श्लोकैश्शतेनाकरो-
त्तत्काव्ये शुचिना रसेन सुभगस्सर्गोऽगमद्द्वादशः ॥

* * * *

जातो वाजसनेयिनामपि कुले योऽनेकविद्यावतां
काव्ये तस्य चतुर्दशो रसमयः सर्गस्समग्रो गतः ॥

R. No. **3718.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vallabha Valiya Raja, Aiyarnali-kōvilakam, Manakutai post, Malabar district.

शौरिकथाव्याख्या—अन्वयबोधिका.

ŚAURIKATHĀVYĀKHYĀ: ANVAYABŌDHIKĀ.

A commentary on the Śaurikathā of Vāsudēva, son of Ravi, which work has been described under R. No. 1852(*b*) ante: by Nityāmṛtayati.

The text is also called Śaurikathōdaya.

Complete.

Beginning:

जगज्जन्मादिलिङ्गेन तत्परागममस्तकैः ।
गम्यते लक्षणावृत्त्या यत्तत्तेजोऽजमस्म्यहम् ॥
अव्युत्पन्नोपकाराय नाम्नैषान्वयबोधिका ।
श्रीमच्छौरिकथाव्याख्या शौरिभक्त्या वितन्महे ॥

यमकग्रन्थं चिकीर्षुः कश्चिद्विप्रः चिकीर्षिताविघ्नपरिसमाप्त्यादिप्रयोजनसिद्ध्ये तदनुरूपं कृष्णाख्यां परां देवतां नमस्करोति—अवनतमित्यादिना । अवनतदेवम् अवनताः कृतप्रणामा देवा यस्येति विग्रहः । देववन्द्यमित्यर्थः ।

देहं शरीरं परमस्य उत्कृष्टस्य, पर(रा)मा श्रीर्यस्येति वा विग्रहः । श्रीपते-रित्यर्थः ।

* * * *

Colophon:

इति शौरिकथाव्याख्यायां नित्यामृतयतिकृतायामन्वयबोधिकायां प्रथम आश्वासः ॥

End:

नरकध्वंसिनी दुर्गतिविनाशिनी नरकद्वेषिणः कृष्णस्य यं रविसूनुामता प्राप्ता यमिता यमकीकृता रविसूनुना रविरिति ग्रन्थकर्तुः पितुस्संज्ञा तस्य सूनुना पुत्रेण यं मुक्तये भक्तिः इता तेन रविसूनुना नरकद्वेषिणः कथा यमिता—इत्यन्वयः ।

Colophon:

इति नित्यामृत(यति)कृतायां शौरिकथाव्याख्यायामन्वयबोधिकायां षष्ठ आश्वासः ॥

शौरिकथाव्याख्यानं समाप्तम् ॥

R. No. 3719.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Raja of Chirakkal, Azhikkal post, Malabar district.

Foll. 63*b* and 64 are left blank.

क्रियागोपनरामायणम्, सटीकम्.

KRIYĀGŌPANARĀMĀYAṆAM WITH COMMENTARY.

Same work as that described under R. No. 7 ante, wherein see for the beginning. By Kṛṣṇakavi, son of Raghunāthadīkṣita. This work is also called Candrakalāvilāsa.

Contains from the 4th Sarga of the Bālakāṇḍa up to the end of the 14th Sarga of the Yuddhakāṇḍa complete.

End:

भवान्नारायणस्सीतादेवीयं कमलालया ।
इति व्याख्याततत्त्वेन वेधसा मैथिलीपतिः ॥

अवेदि(देवि) स्तुतः । अवेदि(देवि), अवोदि(देवि)षाताम् , अवेदि(देवि)-षत; दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु स्तुतिरत्र विवक्षिता, कर्मणि लुङ् । भवान् नारायणः इयं सीता कमलालया--इति व्याख्याततत्त्वेन प्रकाशितयाथार्थ्येन वेधसा विरिञ्चेन अवेदि(देवि) स्तुतः । गुणिनिष्ठगुणाभिधानं स्तुतिः ॥

पुत्रोऽहं रघुनाथदीक्षितगुरोः श्रीकृष्णनामा कविः
काव्यं चन्द्रकलाविलासमतुलं सद्भाग्यराज्यावहम् ।
तस्मिन् भव्यकलाविलासमगदं श्रीरामचर्यां शुभा-
मध्यार्यं च समाप्य मङ्गलशतैरानन्दमत्यद्भुतम् ॥

Colophon:

इति क्रियागोपनरामायणे चतुर्दशस्सर्गः ॥

The scribe adds—

विरोधिकृन्नामकहायने रवौ कन्यां गते मङ्गलयुक्तषष्ठ्याम् ।
विलिखिता रामकथा क्रियातिगादेवीदिदं वेङ्कटसूरिणातं(णेयम्)॥

इति.

R. No. 3720.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimukku-mana, Pudukkad post, Cochin State.

बोधायनद्वैधसूत्रवृत्तिः.
BŌDHĀYANADVAIDHASŪTRAVṚTTIḤ.

Foll. 2*a*—71*a*. Fol. 1*a* gives the name of this work. Foll. 1*b*, 71*b* and 72 are left blank.

A short commentary on the Dvaidhasūtras of Bōdhāyana, which give directions for the performances of various kinds of Vēdic rites.

Wants the beginning; otherwise complete.

Beginning:

यथा पर्वसन्धौ यागो भवति तथोपपाद्यः । पूर्वेद्युर्वा तदहरेव वाथो यदहरपूरी पूर्णचन्द्रो भवति न दृश्यते वा तदहरुपवसथ इति । णत्वस्य लक्ष्म चिन्त्यम् ।

* * * *

एवं पौर्णमास्यामथामावास्यायां कथमिति स ह्स्माह--आचार्यो दृश्यमान इति . . . . षः प्रथमः कल्पः ।

* * * *

Colophon:

इति (बोधायन) द्वैधसूत्रवृत्तौ दशमः ॥

अथातश्चातुर्मास्यानीत्यादि । यावज्जीवप्रयुक्तान्येवेति नियमः ।

End:

यथा पदे जुहोतीति तस्मादेतान्येवेति । अत्रोपपत्तिर्नोक्ता । तत्र शास्त्रान्तरीयं द्रष्टव्यम् । एवं च सति यत्र(वा)प्युपपत्त्याभास उक्तः तत्रापि न सर्वस्य वाचनिकत्वादिति ॥

Colophon:

इति बोधायनद्वैधसूत्रवृत्तौ दशमोऽध्यायः ॥

द्वैधसूत्रवृत्तिस्समाप्ता ॥

R. No. 3721.

Paper. 10⅝ × 9⅜ inches. Foll. 132. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Ganjam district.

अनर्घराघवव्याख्यानम्—श्रीनिधिः.

ANARGHARĀGHAVAVYĀKHYĀNAM : ŚRĪNIDHIḤ.

A commentary on the Anargharāghava of Murāri, which work has been described under R. No. 132(*b*) ante : by Śrīnidhi, son of Gaṅgādāsakavīndra and Kōyarī and grandson of Vāsudēvakavi and Śānti. It is stated that Gaṅgādāsa had two friends called Paramānandakhāni and Bhavānandarāya, who was the well-known minister of Bengal.

Complete.

Beginning:

परिन्यस्तं हस्तं कुचमनुदधानं मुरभिदं
तरुण्या रुक्मिण्या रुचिरतरकार्तस्वररुचः ।
रतारम्भे कुम्भे कनकमय आरोपितमति-
स्फुटच्छायं सायं किसलयमिवाम्रं प्रणमत ॥

* * * *

यस्याभूत्सुगृहीतनामकतया श्रीवासुदेवः कविः
तातः ख्यातयशास्समस्तभुवने सत्कोविदत्वेन च ।
माता सूक्तिसुधासमुद्रलहरी माता सतीशेखर-
श्शान्तिर्मूर्तिमतीव शान्तचरिता शान्तिर्नृचिन्तामणिः ॥
यस्याङ्गनामङ्गलपूर्णकुम्भस्सम्भाविता शम्भुवधूरिवाभूत् ।
श्रीकोयरी सप्तकुमारमाता माता सदुक्तेः पतिदेवताका ॥
विद्याभ्यासे सततनिरता धार्मिकाः कृत्यशीला
दान्ताः शान्ताः परमकवयः कोविदाः कामरूपाः ।
सङ्गीतेषु प्रथितयशसो भ्रातरो भ्रातृपुत्राः
पुत्राः पौत्राः कृतविनियमा यस्य सर्वे बभूवुः ॥
यस्याभूतां जगदुपकृतिख्यातकीर्ती सुमूर्ती
स्फायन्नीती वितरणरतानल्पशक्ती सखायौ ।
एको लोकप्रथितपरमानन्दखानिस्तथान्यो
गौडोर्वीन्द्रप्रथितसचिवः श्रीभवानन्दरायः ।
तस्य श्रीकविराजशेखरमणेस्सूनुस्सुबन्धूदितः
श्रीमच्छ्रीनिधिरल्पधीर्वितनुयां टीकां मुरारेरिमाम् ॥
यच्चापल्यमिदं मदीयमनघास्तन्मर्षणीयं प्रभु-
श्रीश्रीरामकथानकं मुखरयत्यज्ञं च विज्ञं च यत् ॥

क्षन्तव्यमेव मम मन्दधियो दुरुक्तं यद्यत्किलात्र करुणार्द्रमनोभिरेतत् ।
टीका विलोक्य बहुलाः पितुरप्यधीत्य तत्तद्विशेषमपि यच्छुकवद्ब्रवीमि ॥

नवीनेयं टीका न बहुजनदृष्टाभिलिखिता
किलेत्यस्मन्नामापनयति च पद्यान्यपि च यः ।
स्वनाम्नेमां प्रख्यापयति च समापो(प्नो)ति पिशुनः
स्ववंश्यैर्निर्वंश्यः सततमधनोऽन्धश्च भविता ॥

निर्विघ्नेन प्रारिप्सितग्रन्थपरिसमाप्तिकामः परममङ्गलतया भगवन्तं श्री-वासुदेवं नमस्यन्नान्दीं निबध्नाति—"अर्थस्य प्रतिपाद्यस्य तीर्थं प्रस्तावनोच्यते । प्रस्तावनायास्तु मुखे नान्दी कार्या शुभावहा ॥" निष्प्रत्यूहमित्यादिद्वयम् । एतच्च पद्यद्वयानन्तरं नान्द्यन्ते सूत्रधार इति ग्रन्थकारव्यवहा-

राद्युक्तमेव । कौमोदकीलक्ष्मणो भगवतः ते लोचने उपास्महे पूजाप्रणामादिना भावयामः ।

* * * *

किमर्थं निष्प्रत्यूहं प्रत्यूहस्य विघ्नस्याभावाय अव्ययं विभक्तीत्यादिनार्थाभावेऽव्ययीभावः । निर्मक्षिकत्वात्(वत्) । अन(ना)व्ययीभावादिति चतुर्थ्या अम् ।

* * * *

योषिद्रत्नसतीशिरोमणिमहीमाहेश्वरीकोयरी-
कुक्षावर्तकदर्भगर्भशिखरप्रख्याततीक्ष्णात्मनः ।
गङ्गादासकवीन्द्रशेखरमणेर्यो जज्ञिवाञ्छ्रीनिधिः
तस्यास्यां कृतिनः कृताविदमगादाद्याङ्कसङ्कीर्तनम् ॥

Colophon :

इति प्रथमाङ्कव्याख्या समाप्ता ॥

End :

यश एव रसायनमस्तु जराविध्वंसि क्षौद्रं यज्जराव्याधिविध्वंसि तद्रसायनमिष्यते— इति वैद्यके । तस्य स्यन्दः क्षरणं प्रकाशो वा श्रुतिशष्कुली श्रवणपुटः । बलयितः अविच्छिन्नः ॥

योषिद्रत्नसतीशिरोमणिमहीमाहेश्वरीकोयरी-
कुक्षाद्ध(व)र्तकदर्भगर्भशिखरप्रख्याततीक्ष्णात्मनः ।
गङ्गादासकवीन्द्रशेखरमणेर्यो जज्ञिवान् श्रीनिधिः
तस्यास्यां कृतिनः कृताविदमगान्मुन्यङ्कसङ्कीर्तनम् ॥
श्रीवासुदेवसुतभारततन्त्रकर्तृ-
सौभ्रात्रवित्तकविशेखरमिश्रसूनोः ।
श्रीश्रीनिधेः खयुगवेदविधूदितेऽब्दे (१४४०)
हीरावतीकवितुरस्य कृतिस्समाप्ता ॥
विश्वासत्रिपुरारिदत्तभवतः प्रख्यातकीर्तेरियं
टीका सन्ततवाञ्छितार्थरसदा सत्पुत्रपौत्रीणताम् ।
यातु श्रीरिव तावकीनभृतकैरत्यन्तमाकाङ्क्षिता
किं चैनामवलक्ष्य सम्प्रति गुरोः कार्यं परं पोषणम् ॥

यावद्भूवारितेजःपवनवियदहोरात्रमाशात्मचेतः
तावत्ते सम्पदुच्चैर्व्रजतु नयवतः पुत्रपौत्रीणभावम् ।
किं च स्वच्छेन्दुकुन्दामलकुमुदमुदो हारि बिभ्रद्वपुर्वो
देवः पायादपायादपि भरतु भवानीपतिर्भूतिमुच्चैः ॥

Colophon:

समाप्तोऽयं ग्रन्थः ॥

इति अनर्घराघवव्याख्या श्रीनिधिसमाख्या समाप्ता ॥

R. No. **3722.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 38 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

चन्द्रिकाजनमेजयम्.

CANDRIKĀJANAMĒJAYAM.

Foll. 34*b* and 37*a*—38*b* are left blank.

A drama describing the story of the marriage between Candrikā and Janamējaya: by Padmanābha.

Wants the beginning and breaks off in the fifth Act.

Beginning:

वैष्णवभूमिश्रमः नारायणाख्यो द्विजः . . . . ।
आचार्यो भूसुरेन्द्रः पटुतरधिषणो दीर्घवृत्त्यन्व(वा)ये ॥
. . . . समाशेषशास्त्रार्थचुन्चुः ॥

* * * *

श्रूयताम्— अमुष्य खलु पद्मनाभनामधेयस्य कवेः स्यात् । . . . .

* * * *

प्रस्तावना । ततः प्रविशति रथारूढो राजा जनमेजयस्सूतश्च ।

राजा . . . . वशेषितनिजकरणीयतया सम्प्रति चरितार्थोऽस्मि। तथा हि . . . . . . प्रकृतयो वर्णाश्रमालम्बिनो धर्मास्सम्यगं . . . . साधिता श्रूशुषा ।

* * * *

सिन्धुराजः—सूत! आयुष्मन् किमुच्यते ?

युष्मत्कार्मुकमण्डलात्प्रसृमरैराशाक(ग)तैराशुगै·
श्छिन्नभ्रष्टभुजोरुजानुशिरसां राज्ञां गणे पातिते

मुष्ट्या पीडितकार्मुको दृढमतिस्तूणीमुखात्सायका-
नाकर्षन् कृतवानभिक्रममसावायुष्मतः संमुखम् ॥

* * * *

सर्वे परिक्रामन्ति । निष्क्रान्तास्सर्वे ॥

Colophon:

प्रथमोऽङ्कः ॥

End:

(नेपथ्ये) विजयतां देवः । प्रत्यासन्नः खलु देवीसनाथस्य दवस्य पुरप्रवेशमङ्गलोत्सवः । उपस्थिता चेयं प्रसाधनसामग्री ।

राजा—प्रिये एहि तावत् पुरप्रवेशाय सज्जीभवावः ॥

निष्क्रान्तास्सर्वे ॥

Colophon:

चतुर्थोऽङ्कः ॥

ततः प्रविशति काञ्चुकीयः ।

काञ्चु—अहो नु खलु नवावरोधविशेषशालिनो महाराजजनमेजयस्य पुरप्रवेशमङ्गलोत्सवजनितप्रहर्षनिर्भरचेतसां पौरजानपदानामयमारभ्यमाणाविविधदेवतामहोत्सवाम्रेडितो वसन्तोत्सवः कुतूहलमपि कुतूहलयति सम्भ्रममपि सम्भ्रमयति प्रमोदमपि प्रमोदयति ।

* * *

वर्तु – रे रे नरपतिकीट

सङ्ग्रामे सुररक्षसां कुलिशभृत् कुम्भीन्द्रकुम्भस्थली
. नि . . . . . जानुलेपसुभगंमन्यं यदेतत्पुरा ।
अद्य त्वां निहनिष्यता . . . . . .

R. No. 3723.

Paper. $10\frac{3}{8} \times 9\frac{3}{8}$ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Dēvulapalli Rāmasubrahmaṇya Śāstrigāru, Repalle, Kistna district.

Fol. 42*b* is left blank.

वासवदत्ताव्याख्यानम् — दर्पणम्.

VĀSAVADATTĀVYĀKHYĀNAM : DARPAṆAM.

Same work as that described under No. 12419 of the D.C.S. MSS., Vol. XXI. By Timmayasūri.

Complete, but wants the colophon.

R. No. 3724.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 128. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. A. Śaṅkara Śāstrigal, Principal, Sanskrit College, Kalladakuricchi, Tinnevelly district.

Fol. 128*b* is left blank.

ब्रह्मसूत्रतात्पर्यार्थप्रकाशिका.

BRAHMASŪTRATĀTPARYÂRTHAPRAKĀŚIKĀ.

A short commentary explaining the meaning and purport of the Brahmasūtras of Bādarāyaṇa in accordance with the Advaita school of Vēdānta: by Subrahmaṇyāgnicinmakhīndra. The work is also called Śārīraka mīmāṁsāsūtra-Siddhāntakaumudī.

Complete.

Beginning:

यदज्ञानसमुत्पन्ना भूतभौतिकसृष्टयः ।
वन्दे सर्वज्ञमीशानं सच्चिदानन्दविग्रहम् ॥

इह खलु त्रैवर्णिकैरध्येतव्यो वेदः पूर्वोत्तरकाण्डभेदेन द्विविधः— कर्मकाण्डो ज्ञानकाण्डश्चेति । तत्र कर्मकाण्डस्थितवाक्यानां सन्दिग्धानां निर्णयाय परमेश्वरप्रेरितो जैमिनिस्सूत्राण्यथातो धर्मजिज्ञासेत्यादीनि द्वादशाध्यायात्मकानि प्रणीतवान् ।

* * * *

प्रार्थितश्शङ्करभगवत्पादाचार्यरूपेणावतीर्य सूत्रभाष्यव्याजेन वेदान्तार्थान् प्रकटीचकार ।

* * * *

अधिकरणार्थसङ्ग्रहो विद्यारण्याचार्यैरधिकरणरत्नमालायां प्रदर्शितः । विस्तरेण सूत्रार्थस्तु भाष्यकारादिभिः प्रदर्शितः । अथापि मन्दबुद्ध्यनुग्रहाय सूत्रतात्पर्यार्थप्रकाशिकायामस्यां सूत्रसिद्धान्ततात्पर्यसङ्ग्रहमात्रं क्रियते । तत्रादौ भगवान् शास्त्रारम्भप्रयोजनत्वेनानुबन्धचतुष्टयनिरूपणार्थमथातो ब्रह्मजिज्ञासेति सूत्रितवान् । अथ, अतः, ब्रह्मजिज्ञासा—इति त्रीणि पदानि ।

अतः = कायिकवाचिकमानसिकत्रिविधश्रौतस्मार्तकर्मजन्यब्रह्मलोकपर्यन्तस्वर्गादिफलस्य श्रुत्या युक्त्या चानित्यत्वावगमाद्धेतोः, अथ = साधनचतुष्टयसम्पत्त्यनन्तरं मुमुक्षुणा ब्रह्मजिज्ञासा कर्तव्या ।

End:

सम्यग्दर्शिनां नित्यसिद्धनिर्विशेषब्रह्मस्वरूपप्राप्त्या अनावृत्तिस्स्वतस्सिद्धैवेति स्थितम् । अनावृत्तिश्शब्दादिति सूत्राभ्यासश्शास्त्रपरिसमाप्तिं दर्शयति ॥

Colophon:

इति श्रीमच्छारीरकमीमांसासूत्रसिद्धान्तकौमुद्यां चतुर्थाध्यायस्य चतुर्थः पादः ॥

इति सुब्रह्मण्याग्निचिन्मरवीन्द्रेण कृतायां ब्रह्मसूत्रतात्पर्यार्थप्रकाशिकायां चतुर्थोऽध्यायस्समाप्तः ॥

R. No. **3725.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 110. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

न्यायभाष्यम्—वात्स्यायनीयम्.

NYĀYABHĀṢYAM: VĀTSYĀYANĪYAM.

A commentary by Vātsyāyana on the Nyāyasūtras of Gautama. Complete.

Beginning:

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम् । प्रमाणमन्तरेण नार्थप्रति(पत्तिः) नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् । प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमीप्सति वा जिहासति वा । तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते । सामर्थ्यं पुनः अस्याः फलेनाभिसम्बन्धः । समीहमानः तमर्थमाप्नोति वा जहाति वेति । अर्थस्तु सुखं सुखहेतुर्दुःखं दुःखहेतुश्च । सोऽयं प्राणभृन्मात्रस्य व्यवहारः । प्रमाणेनार्थमुपलभ्यमानं समर्थमीप्सन् जिहासन् वा समीहमानस्तमर्थमाप्नोति जहाति वेति सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः ।

* * * *

Colophon:

इति वात्स्यायनीये न्यायभाष्ये प्रथमोऽध्यायः समाप्तः ॥

End:

हेत्वाभासाश्च यथोक्ताः ।

हेत्वाभासाश्च निग्रहस्थानानि । किंपुनर्लक्षणान्तरयोगात् हेत्वाभासान्निग्रहस्थानमापद्यते यथा प्रमाणानि प्रमेयत्वमित्यत आह—यथोक्तहेत्वाभासलक्षणेनैव निग्रहस्थानभाव इति । त इमे प्रमाणादय उद्दिष्टा लक्षिताः परीक्षिताश्चेति ॥

Colophon:

इति वात्स्यायनीये न्यायभाष्ये पञ्चमोऽध्यायः समाप्तः ॥

समाप्तं चेदं न्यायभाष्यम् ॥

इत्येव षोडशपदार्थनिबन्धनेन निश्श्रेयसस्य मुनिना निरदेशि पन्थाः ।
अन्यस्तु सन्नपि पदार्थगणोपयोगिमार्गो वियोगविरहादिह नोपदिष्टः ॥

R. No. **3726.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 106. Lines, 20 in a page. Telugu. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Pudipeddi Śrīrama Śāstrulugāru, S. S. Pāṭhaśālā, Jami, Singavarapukota.

मार्कण्डेयपुराणम्.

MĀRKAṆḌĒYAPURĀṆAM.

This forms the further portion of the Mārkaṇḍēyapurāṇa, which work has been described under No. 2255 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 1—25 and breaks off in the course of the 26th Adhyāya in the Uttarabhāga.

Beginning:

सूत उवाच—

चित्रकेतुर्महाराजस्सर्वशास्त्रार्थपारगः ।
सूर्यवंशसमुद्भूतो नीतिशास्त्रविशारदः ॥

गजायुतबलः श्रीमान् प्रजापालनतत्परः ।
ब्रह्मवेदे क्षत्रवेदे चतुरः परमोत्कटः ॥

* * * *

आसीद्‌योध्यानगरे सर्वसम्पत्समृद्धिमान् ।
तं द्रष्टुमागतो ज्ञानी मार्कण्डेयो महामुनिः ॥
सर्वशास्त्रार्थवेत्ता च सर्ववेदार्थपारगः ।
आगतं मुनिशार्दूलं मार्कण्डेयमहामुनिम् ॥

* * * *

Colophon:

इति श्रीमार्कण्डेयपुराणे उत्तरभागे चित्रकेतुचरित्रे प्रथमोऽध्यायः ॥

End:

लक्षसंवत्सरादूर्ध्वं कल्किरूपो जनार्दनः ।
भविष्यति न सन्देहो देवदेवसुपूजितः ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे उत्तरभागे मार्कण्डेयचित्रकेतुसंवादे नागार्जुन-वर्णनं नाम पञ्चविंशोऽध्यायः ॥

चित्रकेतुः—

मार्कण्डेयमहायोगी ज्ञानविद्याविशारदः ।
जनार्दनांशसम्भूतकतैः(लेः) प्रादुर्भवं वरम् ॥

* * * *

कृष्ण विष्णो गदापाणे शार्ङ्गचक्रादिचिह्नित ।
गोविन्द पुण्डरीकाक्ष गोपालाय नमो नमः ॥

R. No. **3727.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Sudarśanācāriyar, Kīḻnattam village, Tinnevelly district.

Foll. 21*b* and 22 are left blank.

सत्प्रतिपक्षविचारः.

SATPRATIPAKṢAVICĀRAḤ.

Similar to the work described under No. 4311 of the D.C.S. MSS., Vol. VIII. By Kṛṣṇa Tātārya.

Complete.

Beginning:

रघुवरचरणद्वन्द्वध्यानरसास्वादनित्यसन्तुष्टः ।
सत्प्रतिपक्षविचारं कुरुते श्रीकृष्णतातयाचार्यः ॥

सत्प्रतिपक्षलक्षणे प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकावछिन्नप्रकारतेत्यादिक्रमेण निवेशः कृतः । अत्र सत्य-न्तदले विशेष्यदले च यत्किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितयत्किंचिद्धर्मा-वच्छिन्नप्रकारतेत्यादिक्रमेण ह्रदो वह्निमानित्यादौ जलाभावव्याप्यवत्पर्वतेऽ-तिव्याप्तिः ।

End:

प्रतिबन्धकतापदविवक्षितप्रातियोगिताविशेषतत्तत्प्रतिबन्धकताभेदस्याक्षत-त्वात् । तादृशप्रतियोगिताघटितविशिष्टद्वयाघटितत्वस्याक्षतत्वाच्च ॥

Colophon:

इति सत्प्रतिपक्षविचारस्समाप्तः ॥

R. No. **3728.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Harihararājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

Foll. 75*b* and 76*a* are left blank. Fol. 76*b* gives the colophon of this work.

शब्दार्थरत्नम्.

ŚABDĀRTHARATNAM.

A treatise in grammar based on the Mañjūṣā, Śabdēnduśēkhara, Śabdakaustubha and Bhūṣaṇa: by Tārānātha, son of Kālidāsa of Vatsa family.

Complete.

Beginning:

अभिवन्द्य जगद्वन्द्यां देवीं वाचामधीश्वरीम् ।
शब्दार्थरत्नं क्रियते श्रीतारानाथशर्मणा ॥
साधुशब्दार्थबोधाय प्रवृत्ता ये महर्षयः ।
तद्वाक्यमवलम्ब्यैव शब्दार्थोऽत्र निरूप्यते ॥

वैयाकरणसिद्धान्तो दुर्बोधो ग्रन्थगौरवात् ।
अल्पायासेन तद्बोधसाधनाय ममोद्यमः ॥
सुधियो वङ्गदेशीया न्यायादरपराहताः ।
तत्प्रदर्शितया रीत्या शब्दार्थज्ञानतत्पराः ॥
तद्बोधनाय यतते मञ्जूषाद्यनुसारतः ।
वात्स्यवंशावतंसश्रीकालिदासविदः सुतः ॥
शब्देन्दुशेखरे प्रोक्तं यच्चोक्तं शब्दकौस्तुभे ।
भूषणादौ च यत्प्रोक्तं तन्मूलं लिख्यतेऽखिलम् ॥

End :

नराणां नृषु वा विप्रः श्रेष्ठ इत्यादौ नरपदं विप्रादीतरनरबोधकम् । बोधस्तु—विप्रादीतरनरावधिकव्यावर्त्यश्रेष्ठत्वगुणवदभिन्नो विप्र इति । निर्धारणापेक्षयावधित्वाविवक्षायां पञ्चम्यपि साधुः—पञ्चमी विभक्त इति सूत्रादिति दिक् ॥

Colophon :

इति शब्दार्थरत्ने पदकाण्डं समाप्तम् ॥
इति श्रीतारानाथतर्कवाचस्पतिविरचितं शब्दार्थरत्नं समाप्तम् ॥

R. No. **3729.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Cochin State.

Fol. 44*b* is left blank.

श्रुतिगीताव्याख्या—भावप्रकाशिका.

ŚRUTIGĪTĀVYĀKHYĀ : BHĀVAPRAKĀŚIKĀ.

A commentary on the Śrutigītā, which work has been described under No. 2570 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

Beginning :

सदाशिवमहं वन्दे चेन्नूरपुरवासिनम् ।
स्वभक्तेभ्यो महाभूतिं ददतं भक्तवत्सलम् ॥

प्रणिपत्य गुरुं व्यासं श्रीशुकं च महामुनिम् ।
वेदस्तुतेः करिष्यामि व्याख्यां भावप्रकाशिकाम् ॥
क्व च वेदस्तुतेरर्थः क्व चाहमतिमन्दधीः ।
भविष्याम्युपहासाय नृणां मत्सरिणामिह ॥

* * * *

तत्प्रसङ्गादिदं चोद्यं राजर्षेरिह सङ्गतम् ।
आत्मनः स्वप्रकाशत्वे कुतो वेदान्तवेद्यता ॥
इत्याक्षिपति राजेन्द्रो ब्रह्मन्नित्यादिना सुधीः ।
बोधयन्ति कथं ब्रह्मश्रुतयो द्विजसत्तम ॥

End :

निर्भाग्यानखिलान्निरीक्ष्य मनुजानल्पायुषश्च प्रभुः
कृत्वा यो विविधागमार्थममलं श्रीमन्महाभारतम् ।
शिष्येभ्यः प्रददौ विभज्य बहुधाप्येकं तु वेदं पुरा
तस्मै लोकहिताय विश्वगुरवे व्यासाय भूयो नमः ॥
कलितवेणुदरारिकराम्बुजं कमलपत्रविशालविलोचनम् ।
कनकनूपुरकुण्डलमण्डितं कमपि गोपकुमारकमाश्रये ॥

Colophon :

इति श्रुतिगीताव्याख्या ॥

R. No. **3730.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Ottapalam, Malabar district.

Foll. 67*b* and 68 are left blank.

सूर्यसिद्धान्तः, विवरणसहितः.

SŪRYASIDDHĀNTAḤ WITH VIVARAṆA.

Similar to the work described under No. 13509 of the D.C.S. MSS., Vol. XXIV. By Śrīkaṇṭha, disciple of Rudra. In the beginning of the work the commentator states that he wrote this commentary after

the completion of the commentaries on the Laghubhāskarīya, Mahābhāskarīya, Līlāvatī and Grahagaṇita, etc.

Contains the Adhyāyas 1—13 complete.

Beginning:

चिद्रूपं कारणं सर्वगतं क्षीरगताज्यवत् ।
यद्योगिदृश्यं जगतस्तन्महोऽहं समाश्रये ॥
व्याख्यातं भास्करीयं लघु तदनु महाभास्करीयं सभाष्यं
पश्चाल्लीलावती च ग्रहगतिविषयं किञ्चिदन्यच्च येन ।
सोऽयं श्रीरुद्रशिष्यो वदनजशिशवे सूर्यसिद्धान्तसंस्थं
वक्ष्यत्यस्पष्टमर्थं गणितविषयगं कर्म तत्रैव हि स्यात् ॥

तत्र तावद्भगवता सूर्येण मयायोदितं सूर्यसिद्धान्तं विवक्षुरयमाचार्य इष्टदेवताप्रणामपूर्वकं (सूर्य)मययोस्संवादं मयप्रश्नोत्तरे नियुक्तस्य सूर्यांशस्य पुरुषस्य वचनं च क्रमात्प्रदर्शयति—

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥
अल्पावशिष्टे तु कृते मयो नाम महासुरः ।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् ॥

* * *

एवं त्रिघनरन्ध्रार्करसार्कार्कदशाहृताः ।
चन्द्रादीनां क्रमादेषां मध्या विक्षेपलिप्तिकाः ॥
न्यायतो दर्शितानां परमविक्षेपकलानां सङ्ख्यात्र पठिता ॥

Colophon:

इति सूर्यसिद्धान्तविवरणे प्रथमोऽध्यायः ॥

End:

स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत् ।
अत्यद्भुततमं लोके रहस्यं ब्रह्मसंमितम् ॥

एवमुपसंहृतं शास्त्रम् ॥

नलाब्ध्योस्सङ्गमात् सौम्ये स्थितौ(च) व(प)रमादिना ।
सिद्धान्तं विवृतं सौरमीश्वरेणैवमल्पशः ॥

Colophon:

इति पारमेश्वरे सूर्यसिद्धान्तविवरणे त्रयोदशोऽध्यायः ॥

यद्भासहस्रं भुवने जनानामज्ञानरूपं तिमिरं तृणेढि ।
पद्माभिरामो भुवनप्रदीपः श्रीकण्ठनामा मिहिरस्समिन्धे ॥

R. No. **3731.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

(*a*) दुकूलाहरणम्.
DUKŪLĀHARAṆAM.

Foll. 1*a*—3*a*. Foll. 3*b*—4*b* are left blank.

A poem describing the vain attempts of Duśśāsana to strip Draupadī of her garments with a view to disgracing her in the open assembly: by Gōvindaratha who mentions the king of Bāṇapurī as the author of Jagannāthakāvya.

Contains the first Sarga complete and one stanza in the second Sarga.

Beginning:

अवनेरवनाय नाकिनां वचसा मानुषमाश्रितो वपुः ।
अहरत्पशुपालसुभ्रुवां हृदयं हारिविहारकैर्हरिः ॥
नवनीरदसुन्दरद्युतिर्द्युतिमद्रत्नविराजिभूषणः ।
धृतपीतपटो नटाकृतिर्न मुदे कस्य जनार्दनोऽभवत् ॥

End:

इति हरगृहिणीवचोऽमृतं श्रवणपुटेन निपीय गोपिकाः ।
व्रतमपि च समाप्य सादरं मुदितहृदो निजमन्दिराण्यगुः ॥
साहित्यसङ्गीतविशुद्धबुद्धिर्धीमान् वदान्यस्सुकृती गुणज्ञः ।
जीयाज्जगन्नाथपदाभिधानसत्काव्यकृद्बाणपुरीनरेन्द्रः ॥

Colophon:

इति श्रीगोविन्दरथकृतौ दुकूलाहरणे प्रथमः सर्गः समाप्तः ॥

अमुनैव विशालवर्त्मना यदुनाथो मथुरापुरीं गतः ।
अपि सर्वसखीभिरीक्षितः न मया केवलमल्पपुण्यया ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. K. C. Valiya Raja, Kottakkal, Malabar district.

(*b*) पदार्थसङ्ग्रहः.

PADĀRTHASAṄGRAHAḤ.

Foll. 5*a*—8*b*.

A treatise in the Nyāya philosophy for beginners.

Complete.

Beginning:

द्रव्यं गुणः कर्म च जातिशक्ती सादृश्यसङ्ख्ये समवाय एते ।
अष्टौ पदार्था अथ तान् विभज्य सङ्क्षिप्य वक्ष्यामि गुरोर्मतेन ।
पृथिवीजलतेजांसि दिक्कालात्ममनांसि च ।
नभो वायुरिति द्रव्यं नवधा तत्र भिद्यते ॥

End:

गुणाद्यैर्यस्तु सम्बन्धस्समवायोऽयमिष्यते ।
विशिष्टप्रत्ययाल्लिङ्गात्स चायमनुमीयते ॥
एवं पदार्थविषयं प्रक्रियामात्रमीरितम् ।
यथावस्तुस्थिति श्रोतृजिज्ञासोत्पत्तिकारणम् ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Ottapalam, Malabar district.

(*c*) पञ्चाशिकाटीका.

PAÑCĀŚIKĀṬĪKĀ.

Foll. 9*a*—17*a*. Foll. 17*b*—18*b* are left blank.

A commentary in fifty stanzas on some portions of an astronomical treatise.

Incomplete and wants the beginning.

Beginning:

. . . . र्वान्तौ स्फुटौ नेति प्रसिद्धये ।
चापान्तरं रदा यावद्दोषस्तावदितीरितम् ॥
कालेन यावता दन्तैस्समं क्रान्त्यन्तरं भवेत् ।
कालेन तावता मध्याद्यन्तौ भवतः स्फुटौ ॥

*   *   *   *

क्रान्त्यन्तराद्वर्तमानधनुषाप्तमृणं धनम् ।
क्रान्त्यन्तरोत्थफलवद्युग्म ओजपदेऽन्य(दा) ॥
. . . . वं संस्कृतं स्यात् स्फुटं तदा ।
व्यतीपाताष्टकस्यैषा श्लोकैः पञ्चाशता कृता ॥
वृत्तिर्वसतु हृत्पद्मे गणकानां चिरं शुभे ।

End :

एतत्सिद्धं ग्रहणं प्रायशो दृष्ट्या समं भवति । मानसजयन्तमालादि-सिद्धादेतत्सिद्धं ग्रहणं स्फुटं भवति सूक्ष्मं भवति । ततोऽपि सूक्ष्मतरं भास्करीयादिसिद्धम् । अत एतत्प्रायशो दृक्समं भवति.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paramēśvaran-Vādhyān Nambūdiri, Achipuram, Kottakkal, Malabar district.

(*d*) शौनकशिक्षा.

ŚAUNAKAŚIKṢĀ.

Foll. 19*a*—22*b*.

A work on phonetics and pronunciation : by Śaunaka.

Complete.

Beginning :

सर्वज्ञं सर्वकर्तारं सर्वात्मानं शिवं गुरुम् ।
प्रणम्यर्क्षु प्रवक्ष्यामि वर्णोच्चारणलक्षणम् ॥
वेदस्य लक्षणं सम्यग्बालानां बुद्धिवर्धनम् ।
यथोक्तं पूर्वशास्त्रेषु तथा सङ्क्षिप्तमर्थवत् ॥
द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च ।
अकारादिः स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ॥

End :

एतत्पुण्यं पापहरं वाङ्मन(ल)स्य विरोधनम् ।
भक्त्या ज्ञात्वा च सङ्गृह्य ब्रह्मलोकं स गच्छति ॥
अनेन विधिना वेदं योऽधीते श्रद्धयान्वितः ।
सर्वपापैर्विमुक्तस्सन् ब्रह्मलोके महीयते ॥

Colophon :

इति शौनकशिक्षा समाप्ता ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Śaṅkaran Nambūdirippāḍ, Avanapparambu, Cochin State.

(e) पाण्डवचरितम्.

PĀṆḌAVACARITAM.

Foll. 23a—25a. Foll. 25b—26b are left blank.

A short poem narrating briefly the main story of the Pāṇḍavas; as found in the Mahābhārata.

Complete.

Beginning:

जाताः कान्तारदेशे करिनगरमिताश्छद्मसद्मन्युषित्वा
दग्ध्वा तद्देहमस्माद्विपिनमुपगतास्संहरन्तो हिडिम्बम् ।
वेदव्यासस्य वाचा वनभुवि वसतिं शालिहोत्रे च हुत्वा
गत्वा तामेकचक्रं द्विजवरभवने तेऽवसन् पाण्डुपुत्राः ॥

End:

धर्मो विवर्धति युधिष्ठिरकीर्तनेन
पापं प्रणश्यति वृकोदरकीर्तनेन ।
शत्रुर्विनश्यति धनञ्जयकीर्तनेन
माद्रीसुतौ कथयतां न भवन्ति रोगाः ॥

Colophon:

पाण्डवचरितं समाप्तम् ॥

R. No. 3732.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. V. Paramēśvaran-Vādhyān Nambūdiri, Acchipuram, Kottakkal, Malabar district.

Foll. 69b and 70 are left blank.

शारीरकमीमांसान्यायसङ्ग्रहः.

ŚĀRĪRAKAMĪMĀṀSĀNYĀYASAṄGRAHAḤ.

Gives briefly the substance of the Brahmasūtras in accordance with Śaṅkara's Bhāṣya: by Prakāśātman, disciple of Ananyānubhava.

Complete.

Beginning:

प्रणम्य प्रणतार्तीनां ह(र्तारं वरदं गुरुम्) ।
शारीरकस्य सङ्क्षेपात् क्रियते न्यायसङ्ग्रहः ॥

सू—अथातो ब्रह्मजिज्ञासा— . . . अत्र विधिः—सर्वत्र विशिष्टाधिकार्यन्यतोऽप्राप्तिविष(य)तत्साध्यफलानुबन्धत्रयमपेक्ष्य प्रवृत्तिपर्यन्तो भव- . . . यजेतेत्यादि

* * * *

Colophon :

इति न्यायसङ्ग्रहे प्रथमाध्यायस्य प्रथमः पादः ॥

End :

धर्मान्तरसाधनदूषणेऽपि तथानावृत्तिशब्दात् इति च न घटते । द्वैतिनां मोक्षे . . स्मात्कार्यब्रह्मप्राप्तिलक्षणः सगुणविद्याविपाकोऽयमिति सिद्धम् ॥

Colophon :

इति श्रीमदनन्यानुभवपूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमत्प्रकाशात्मभगवतः कृतौ श्रीमच्छारीरकमीमांसा[भाष्य]न्यायसङ्ग्रहे चतुर्थोऽध्यायः ॥

न्यायसङ्ग्रहा . . . . .

मुनिवरभृङ्गसमूहानतिबहुलन्यायपरिमलाहूतान् ।

स . . . . . दत्वा प्रणयति(स)न्यायसङ्ग्रहस्रगियम् ॥

The scribe adds—

सुब्रह्मण्यात्मजेनायं वृषभग्रामवासिना ।

सुब्रह्मण्याभिधानेन लिखितो न्यायसङ्ग्रहः ॥

शारीरकमीमांसान्यायसङ्ग्रहस्समाप्तः ॥

R. No. **3733.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Harihararājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

राघवयादवीयम् , सव्याख्यानम्.

RĀGHAVAYĀDAVĪYAM WITH COMMENTARY.

Similar to the text and commentary described under R. No. 3710(*a*) ante. The name of the author of the poem is given as Vāsudēva.

Complete in ten Sargas dealing with the following subjects :—

१. रामान्वयराजधानीसङ्कीर्तनम्.
२. रामादिजन्मोत्सवकथनम्.
३. कौशिकमानदानकथनम्
४. रामानुजोद्वाहविलासः.
५. जनस्थानभयापहारः.
६. मायाविशत्रुक्षयः.
७. रामप्रियोदन्तनिवेदनम्.
८. सुरारिवर्गक्षयकृत्प्रतिज्ञा.
९. गुरुप्रतिज्ञापरिपूरणम्.
१०. वैकुण्ठपदाधिरोहः.

Beginning:

श्रीरामरामानुजचारुलीलाभागीरथीभानुसुतासमेते ।
अत्रावगाहं सुधियः सृजन्तु सरस्वतीवर्धितकाव्यतीर्थे ॥

श्रीरामस्य रामानुजस्य कृष्णस्य लीले एव भागीरथीभानुसुते गङ्गा-यमुने ताभ्यां समेते सरस्वती वाग्देवता सैव सरस्वती नदी तया संवर्धिते काव्यतीर्थे सुधियः पण्डिता अवगाहं सृजन्तु ।

गुणश्रियः पावनताविशेषो हिमांशुवंशस्य विभावनीयः ।
यत्रार्थिनीशेन धृतापि मूर्ध्नि भागीरथी जह्नुसुतेह जाता ॥

* * * *

हरेः प्रसादाय विधीयमाने काव्ये शुभे राघवयादवीये ।
जगाम रामान्वयराजधानीसङ्कीर्तनाख्यः प्रथमोऽत्र सर्गः ॥

Colophon:

इति राघवयादवीये प्रथमस्सर्गः ॥

End:

कुर्वन्नयोध्यापुरवासिनस्तान् सामीप्यभाजस्स्वजनानुदारः ।
प्रभुः कृतज्ञः स्वजनानुरागी सन्तानयुक्तं निजधाम लेभे ॥
हरेः प्रसादाय विधीयमाने काव्ये शुभे राघवयादवीये ।
स एष वैकुण्ठपदाधिरोहनामा समाप्तो दशमस्तु सर्गः ॥
मनोहरैरेव गुणैरुपेतं शुभोदयं राघवयादवीयम् ।
काव्यं तदेतद्वसुदेवनाम्ना कृतं रसज्ञाः परिशीलयन्तु ॥

Colophon:

इति राघवयादवीयं समाप्तम् ॥

R. No. 3734.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Foll. 27*b* and 28 are left blank.

न्यायचन्द्रिका.

NYĀYACANDRIKĀ.

An explanatory commentary on the Nyāyasūtras of Gautama: by Bhaṭṭakēśava, son of Anantabhaṭṭa of Lōgākṣi family and Mādhyandina-śākhā.

Complete.

Beginning:

आराधकेप्सितफलाधिकदानदक्षा
दाक्षायणी दलितपद्ममनोहराङ्गी ।
साकारभाग्यमिव यस्य नमोऽस्तु तस्मै
विघ्नेश्वराय भवभीतिभिदेऽभयाय ॥

यच्छिष्यैर्जगतीतलं परिवृतं यस्तर्कविद्यामयः
श्रीलोगाक्षिकुलारविन्दतरणिः माध्यन्दिनिः केशवः ।
यं प्रासूत सदाशिवाङ्घ्रिकमलद्वन्द्वैकनिष्ठं परं
भट्टानन्तमहं नमामि पितरं साम्बं कृपाम्भोनिधिम् ॥

सकलं न्यायसिद्धान्तमवगम्य यथामति ।
भट्टश्रीकेशवेनैषा क्रियते न्यायचन्द्रिका ॥

सू—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्श्रेयसाधिगमः—इति न्यायस्यादिमं सूत्रम् । यत्र यदस्ति तस्य तत्तत्त्वम् । तज्ज्ञानमुद्दे-शादित्रिकाधीनम् । उद्देशश्च शक्यतावच्छेदकमात्रप्रकारकः प्रतीतिजनकः शब्दः । लक्षणवाक्ये च वाक्यार्थज्ञानस्य लक्ष्यतावच्छेदकातिरिक्तप्रकार-कतया नातिप्रसङ्गः ।

End:

उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणं प्रसिद्धमेतत् । अदूषणे दूषणाभिधानं निरनुयोज्यानुयोगः । स्वसिद्धान्तविरुद्धभाषणमप-सिद्धान्तः । हेत्वाभासाश्च यथोक्ताः ॥

सुनिरूपितसर्वरूपता न कृतावत्र किमत्र दूषणम् ।
गरिमा गिरिजापतेर्गिरामपि गीर्वाणगुरोरगोचरः ॥

Colophon:

इति केशवभट्टविरचिता न्यायचन्द्रिका समाप्ता ॥

R. No. **3735.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Subrahmaṇya Śāstrigaḷ, Head Pandit, Sanskrit school, Tiruppanattura, Cochin State.

Fol. 67*b* gives the name of the owner of the original MS. Fol. 68 is left blank.

तौतातितमततिलकः.

TAUTĀTITAMATATILAKAḤ.

An explanatory treatise in the Pūrvamīmāṁsā in accordance with the Kumārila school: by Bhavadēva alias Bālavalabhībhujaṅga.

Contains the first Adhyāya, beginning in the course of the second Pāda thereof.

Beginning:

(य)थार्थावभानदोषः । तथा सति य . . तेष्वेवार्थतात्पर्येषु यथा समभिव्याहृतेष्वेव न्यायसम्पादनवशादाकाङ्क्षाद्युपसंहाराद्भवत्यपेक्षितार्थं . . . नान्यथेति । न चान्यथोच्चारितस्यावेदत्वादनादिरेवायमुच्चारणनियमः पदोच्चारणनियमवदिति वाच्यम् । असत्यध्ययनविधौ पुरुषेच्छातन्त्रत्वादर्थाभिधानशक्तितन्त्रत्वाच्चोच्चारणस्य तयोश्चोच्चावचोच्चारणेनापि सम्भवादुच्चारणनियमानुपपत्तेः ।

* * * *

नहि लौकिकवाक्यानां मन्त्रवाक्यानां च कश्चिद्विशेषोऽस्ति; येन प्रतायमानोऽप्यर्थो न विवक्ष्यत इति ।

यो नाम कश्चिदिह संविदितं प्रमेयं
ग्रन्थान्तरे लिखति वा वदति स्वयं वा ।
मत्कर्तृतामननुकीर्त्य स कीर्तिलोभा-
न्निस्सन्ततिर्जगति जन्मशतानि भूयात् ॥

यः काव्ये कविपूर्ववत्कविसभासंशोभने काव्यवत्
कोदण्डे रघुवीरवत्प्रतपने मार्ताण्डवद्राजते ।
शौर्ये शौरिरिव प्रजासु पितृवद्विप्रेषु लक्ष्मीशवत्
मान्धाता विदधाति सोऽखिलसुखं तत्त्वावलीसङ्ग्रहम् ॥

मान्धातासौ विविधविधयेत्याशयादाश्रयन्ते
कीर्त्यानीताः सकलजनता यद्गुणाम्भोधिमेतम् ।
तन्मान्धातेत्यखिलनृपतेर्नाम लब्ध्वा मुकुन्दा-
दानन्दाय प्रभवति न कस्यैष भूपालमौलिः ॥

तत्र प्रथमं पदतत्त्वमुच्यते—सुप्तिङन्तं पदमिति पाणिनीयाः । पूर्वापरयोरर्थोपलब्धौ पदमिति कालापाः । विभक्त्यन्तं पदमिति सारस्वताः । शक्तिमत्पदमिति नूतनतार्किकाः । वयं तु सङ्केतितं पदमिति ब्रूमः । तदिदं पदं द्विविधं प्रकृतिप्रत्ययभेदात् । प्रकृतिर्द्विविधा—नामधातुभेदात् । प्रत्ययस्तु पञ्चधा—सुप्तिङ्कृत्तद्धितस्त्रीप्रत्ययभेदात् । तदिदमनेकं पदं सम्बद्धार्थं सत् वाक्यमित्यभिधीयते । तद्वाक्यं द्विधा—खण्डाखण्डभेदात् । खण्डवाक्यं सुबन्तं तिङन्तं च ।

End:

यावन्नानुग्रहः कश्चिज्जायते परमेश्वरात् ।
तावन्न लभ्यते राम सच्छास्त्रं सद्गुरु(रो)रिति ।

कर्ता कर्म कर्मकर्तेति त्रयं निरूपितम् ।

Colophon:

इति तत्त्वसङ्ग्रहे प्रथमः परिच्छेदः ॥

चिकीर्षादिक्रियाश्रयः कर्ता । स च द्विविधो नित्यज्ञानाश्रयो जन्यज्ञानाश्रयश्चेत्युक्तम् । द्वावपि विभू, द्वावपि परममहान्तौ, द्वावप्येकशरीरस्थौ, द्वावपि सामान्येन ज्ञानेच्छाप्रयत्नाश्रयौ । एतान्यनयोस्साधर्म्याणि । वैधर्म्याण्यप्युक्तान्येव संसारित्वादीनि । सर्वश्रुतिसमालोचनया द्वयोरपि शरीरत्वं दृष्टम् ।

* * * *

वाहयत्यर्जुनं श्वेतवाहान् रथेन कृष्णः । स्फुटचेतननियन्तृप्रयोज्यकर्तृप्रयोगे न । वाहयति संसारदुःखं सुहृज्जनसखेन सुहृज्जसखः । नयतेस्सर्वत्र न नाययति.

R. No. 3737.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

Foll. 63*b* and 64 are left blank.

दुर्गोत्सवचन्द्रिका.

DURGŌTSAVACANDRIKĀ.

A treatise in verse laying down the procedure in connexion with recitation of the Mantra-formula and with the worship of Goddess Durgā during the Navarātri festival: by Bhāratī Bhūṣaṇa Vardhamāna Mahāpātra who wrote this at the instance of king Rāmacandradēva.

Deals with the following topics :—

१. जपविधिः.
२. होमविधिः.
३. तर्पणविधिः.
४. मन्त्रन्यासपूजाविधिः.
५. दुर्गासमर्चनविधिः.
६. दिवसविधिः.
७. परिवारपूजा.
८. अश्वादिलक्षणम्.
९. दारुदेवीविधानम्.
१०. दुर्गामहास्नानादिपूजान्तविधिः.

Complete.

Beginning :

अम्भोजा(दा)न् चिकुरच्छलेन तपनं सिन्दूरबिन्दूपतेः(धेः)
पीयूषद्युतिबिम्बमानम(न)मिषाज्ज्योत्स्नां स्मितच्छद्मना ।
शैलेन्द्रं कुचकैतवा(द्द)लिकुलव्याजाद्दह(त्खर्)नदी-
(न)द्याङ्गाय शिवस्य बिम्बनिधये मूलप्रकृत्यै नमः ॥
सकलागमसारतत्त्ववेत्ता स कलावानिव सर्वतोऽनवद्यः ।
नतु(तनु)ते भुवि रामचन्द्रदेवश्चरणाम्भोरुहभक्तिमम्बिकायाः ॥

* * * *

स निशम्य सम्यगखिलागमोदितं विबुधैर्विचिन्त्य बहुधानुमोदितः ।
शरदुत्सवे गिरिभुवस्समर्चनक्रमचन्द्रिकां दिशति संमतां सताम् ॥
मन्त्रास्सन्ति क्षितिधरभुवो लक्षशो दक्षिणेऽपि
प्रायो मार्गे जपहुतविधौ ये फलं साधयन्ति ।
अष्टत्रिंशाक्षरमनुरयं किं तु सञ्चिन्तितानां
नानार्थानां क्षम इति ततः कीर्त्यते तत्प्रयोगः ॥

* * * *

Colophon:

इति दुर्गोत्सवचन्द्रिकायां जपविधिर्नाम (प्रथमः प्रकाशः) ॥

End:

इत्येवं दशदिक्षु भौत(ति)कबलिं दत्वाथ नत्वा नृपो
रुद्राणीं मुदितां विचिन्त्य हृदये सञ्चिन्तयेदीप्सितम् ।
सौवर्णीमथ तां विशेषविभवैरानीय संमानयन्
स्वागारे विनिवेशयेदिति विधिर्भूपस्य वाञ्छानिधिः ॥
यावज्ज्यावन्धभावं दधति मधुकराः कार्मुके शम्बरारेः
यावत्तद्वैरिकण्ठे स भवतु(ति) भगवान् भूषणं पन्नगेशः ।
यावत्तत्तल्पशायी विहरति रमया स्वैरमायानुगूढः
तावच्छ्रीरामचन्द्रक्षितिपतिरचिता निर्मितः प्रीतिदास्ताम् ॥

Colophon:

इति श्रीभारतीभूषणश्रीवर्धमानाचार्यमहापात्रविरचिता दुर्गोत्सवचन्द्रिका समाप्ता ॥

The scribe adds—

इयमम्बिकायजनकारिकावली लिखिता रथान्वयसरोजभास्वता ।
हलधराभिधेन नृपतेर्गुरुणा भगवतीपदाम्बुरुहपुष्पलिहा ॥

R. No. 3738.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 54. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

रसमञ्जरी, केरलव्याख्यासहिता.

RASAMAÑJARĪ WITH MALAYALAM MEANING.

Same text as that described under R. No. 760 ante. By Śālinātha, son of Vaidyanātha. The work is accompanied with meaning in Malayalam language.

Contains the Adhyāyas 1—9 complete.

R. No. 3739.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of Vasudēva Sōmayājin, Vilayur post, via Pattambi, Malabar district.

* * * *

श्रेयांस्याशासानास्त्रयस्त्रिंशच्छ्लोकयात्मकं परशिवलीलाविग्रहकपर्दादिपादाब्द-(ब्ज)परागान्तस्तुतिकाव्यमारभन्ते ।

> आदौ कपर्दा वर्ण्यन्ते शिवस्य परमात्मनः ।
> संसारोत्तरणाः पापहारिणश्शुभकारिणः ॥

> देयासुर्मूर्ध्नि राजत्सरससुरसरित्प्रान्तपर्यन्तनिर्य-
> त्प्रांशुस्तम्भाः पिशङ्गाः तुलितपरिणतारक्तशालीलता वः ।
> दुर्वारं(रा)पत्तिगर्तश्रितनिखिलजनोद्धारणे रज्जुभूताः
> घोराघोर्वीरुहालीदहनशिखिशिखाश्शर्म शार्वाः कपर्दाः ॥

देयासुरिति । शार्वाः कपर्दा वः शर्म देयासुरिति सम्बन्धः । कपर्दाः कीदृशाः पिशङ्गाः श्वेतपीताः पीतरक्ता वा ईषद्रक्तशालीलतासादृश्यस्य वक्ष्यमाणत्वात् ।

End:

यत्तु शं सुखं भवत्यस्मादिति शम्भुरिति तन्न—कर्तरि कृतो विधानादपादाने डुप्रत्ययाभावात् । शम्भुः सुखकरः परशिवः भवतां युष्माकं शर्म कलयतु करोतु ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पूज्यपादकृतेः शिवकेशादिपादपरागान्तस्तुतेः भरद्वाजेन रामकृष्णसूरिणा कृता व्याख्या सम्पूर्णा ॥

> निर्दुष्टे मयि संस्थिते विधिवशाद्दोषापवादं वृथा
> कृत्वा केवलमाचरन्ति सुहृदोऽप्येवं हि दण्डादिकम् ।
> हा हा कृष्ण कृपानिधे मम हृदि त्वां नित्यबोधं सदा
> भेदेनाहमलं यदि त्वमधुना ध्यायामि साक्ष्यत्र भोः ॥

R. No. 3740.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 89. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Maṅgāttammaṅgār, Vaḍakkutirumāḻigai, Alwartirunagari, Tinnevelly district.

प्रमाणसारप्रकाशिका.
PRAMĀṆASĀRAPRAKĀŚIKĀ.

A treatise in support of the religious ceremony Samāśrayaṇa by quoating various authoritative passages. Regarding Samāśrayaṇa vide No. 5255 of the D.C.S. MSS., Vol. XI. By Gōvindaguru, son of Cintāmaṇidēśika. For other particulars regarding the author see the extracts given below.

Seems incomplete.

Beginning:

श्रीवैकुण्ठपतिः स्वयं समदिशत्तच्चं भुवस्स्थापितुं
वेदात्मा विहगेश्वरोऽयमिति यं पूर्वे बुधाश्चक्षते ।
यस्यैवाजनि मातुलोऽखिलगुरुश्श्रीशैलपूर्णो महान्
माता यस्य बभूव सैव कमलादेवी पिता श्रीपतिः ॥
यं रामानुजयोगिमातृभगिनीसूनुं विदुः पूर्विका
यं योगिप्रवरस्य पादकमलच्छायां विदुस्सूरयः ।
यस्मै योगिवरः स्वनाम च ददौ यो योगिराजप्रियो
भारद्वाजकुलं परिष्कृतमभूद्येनैव भूमाब्धिना ॥

* * * *

यस्य भ्रातृसुतस्य कारितनयस्याख्यां यतीन्द्रस्तदा
कुर्वन् यामुनदेशिकेन्द्रमनसो वैकल्यमेवाहरत् ॥
भोगार्थं न विविक्तमस्ति न तमश्चास्तीति यो वावदत्
यत्सूक्तिं बहु मन्वते गुरुजनास्सर्वेऽपि सत्सम्मति(ता)म् !
श्रीगोविन्दगुरोरमुष्य महती(तः) श्रीवृत्तरत्नान्वयः
श्रीचिन्तामणिदेशिकेन्द्र इति संजज्ञे महादेशिकः ॥
अचिन्त्यभूमाम्बुनिधेरमुष्य चिन्तामणेर्देशिकसत्तमस्य ।
तनूद्भवस्सर्वगुणाब्धिरासीत् गोविन्दनामा गुरुसार्वभौमः ॥
स आकलय्य श्रुतिपाञ्चरात्रं स्मृतीतिहासादिपुराणजातम् ।
चक्राङ्कनादेस्स्वमतस्य गुप्त्यै प्रमाणसारं प्रकटीकरोति ॥
चक्राङ्कितविधिं वक्ष्ये यथोक्तं विष्णुना पुरा ।
तत्प्रसादाच्च सर्वेषां भुक्तिमुक्तिफलप्रदम् ॥

* * * *

यजुषि कठशाखायाम्—

धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥

बाष्कलसंहितायाम्—

प्र ते विष्णो अब्जचक्रे पवित्रे जन्माम्भोधिं तर्तवे चर्षणीन्द्राः ।
मूले बाह्वोर्दधतेऽन्ये पुराणा(णे)लिङ्गान्यङ्गे तावकान्यर्पयन्ति ॥ इति ।

* * * *

तस्मात्तापादिसंस्काराः कर्तव्या धर्मकाङ्क्षिणाम् ।
अयमेव परो धर्मः प्रधानं सर्वकर्मणाम् ॥

Colophon:

इति हारीतस्मृतौ सुदर्शनप्रतिपादनं नाम प्रथमोऽध्यायः ॥

* * * *

विष्णुपुराणे—

संवत्सरेण यत्पापं मनसा कर्मणा कृतम् ।
तत्सर्वं नश्यते तेषां सकृच्चक्राङ्कदर्शनात् ॥
ज्वरदाहभयं चैव चोराग्निजभयं तथा ।
तत्सर्वं प्रशमं याति यत्र चक्राङ्कितो वसेत् ॥

End:

आचम्य धृतपुण्ड्रस्तु सन्ध्यां कुर्वीत पूर्ववत् ।
जपेत्तत्रैव गायत्रीं तथा मन्त्रद्वयं शुभम् ॥
सर्गादौ ब्राह्मणास्सृष्टा वैष्णवांशेन चोदिताः ।
इतरे तु त्रयो वर्णा ब्रह्मणा विष्णुसूनुना ॥

R. No. **3741.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 42. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 41*b* contains the name of the owner of the original MS. Fol. 42 is left blank.

लक्षणामृतम्, केरलभाषाटीकासहितम्.

LAKṢAṆĀMṚTAM WITH MALAYALAM MEANING.

Same text as that described under R. No. 2748 ante, wherein see for the beginning. By Bhaṭṭasundara.

Complete in 13 Paṭalas.

End:

Colophon:

इति सुन्दरविरचिते लक्षणामृते द्वादशः पटलः ॥

* * * *

अम्लाम्बा दधि काञ्चिकं च सहितं तैलेन चाभ्यञ्जनं

मांसं तत्र कुलुत्थकं च सततं माषं नृणां वारयेत् ।

* * * *

ओं रामरामाय रामवीराय निशिचरकुलसंहारवीरराजाय हन हन हुत हुत हुं फट् स्वाहा ।

* * * *

ओं वासुदेवाय त्रैलोक्यपरिपूरिताय सर्वौषधनिवासनाय । अमृतहस्ताय धन्वन्तरये सर्वामयविनाशाय विष्णवे हुं फट् स्वाहा ॥

* * * *

Colophon:

समाप्तं लक्षणामृतम् ॥

R. No. 3742.

Paper. $10\frac{5}{8} \times 8\frac{3}{4}$ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Tampu Śaṭakōpa Ayyaṅgār, Vaḍakkutirumāḷigai, Alwartirunagari, Tinnevelly district.

Foll. 31 and 32 are left blank.

अष्टादशभेदसंवादः.

AṢṬĀDAŚABHĒDASAṀVĀDAḤ.

Similar to the work described under No. 5195 of the D.C.S. MSS., Vol. XI.

Complete.

Beginning:

श्रीमद्रामानुजमुनेश्चिन्तयाम्यङ्घ्रिपङ्कजे ।

यदीयस्मृतिसन्तानस्सन्तानकतरुस्सताम् ॥

उपायत्वं विभुत्वं च श्रियः प्रपदनस्य च ।
साधनत्वं न कैवल्यं मुक्तिर्भूयः परेशितुः ॥
प्राप्तिश्चाण्डान्तरस्थानां प्रपत्तिरपि दुर्बला ।
शक्तानां भक्तियोगः स्यान्न्यासोऽशक्ताधिकार(रि)कः ॥
* * * *
सृष्ट्याद्यशक्तिर्वात्सल्यं दोषादृष्टिर्दयापि च ।
परदुःखोज्जिहीर्षेति वदन्ति कतिचित्किल ॥

End:

तत्तद्वारेषु तत्तदानुकूल्यकामनया कैश्चिद्व्रतोपवासादिकं क्रियत इति काम्यवारव्रतं दृष्टान्तीकृत्य निष्कामत्वाभिमानिभिरप्याचर्यमाणमर्कवारैकभुक्तव्रतमकृत्यमेवेति अलमत्यन्तासङ्गतसंवादसमुदायप्रपञ्चचिन्तनेन ॥

R. No. 3743.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 152. Lines, 20 in a page. Grantha Good.

Transcribed in 1921-22 from a MS. of Śrīmatī Maṅgāttammaṅgār, Vaḍakkutirumāḷigai, Alwartirunagari, Tinnevelly district.

Fol. 152 is left blank.

प्रायश्चित्तसङ्ग्रहः.

PRĀYAŚCITTASAṄGRAHAḤ.

A treatise on certain expiatory ceremonies as laid down in the Pāñcarātrāgama.

Deals with the following subjects :—

	Subjects.		Chapters.	Various Saṁhitās.
१.	भूगुप्तिविधानम्	....	४५	विष्णुतन्त्रसंहिता.
२.	भूगुप्तोद्धृतप्रायश्चित्तम्	....	४६	,,
३.	जीर्णोद्धारसंप्रोक्षणम्	....	२२	परमपुरुषसंहिता.
४.	,,	....	२७	पाद्मसंहिता.
५.	,,	....	,,	नारदसंहिता.
६.	जीर्णोद्धारविधिः	....	१६	कपिञ्जलसंहिता.
७.	शान्तिहोमविधिः	....	१५	पारमेश्वरसंहिता.

	Subjects.		Chapters.	Various Saṁhitās.
८.	शान्तिहोमविधिः	....	१२	ईश्वरसंहिता.
९.	ग्रामशान्तिविधिः	....	७२	खगप्रश्नसंहिता.
१०.	उत्पातकशान्तिः	....	८	विष्णुरहस्यसंहिता.
११.	,,	....	२९	मार्कण्डेयसंहिता.
१२.	तन्त्रसङ्ग्रहप्रायश्चित्तपटलः	....	....	हिरण्यगर्भसंहिता.
१३.	प्रायश्चित्ततुलाभारविधिः	....	२०	पारमेश्वरसंहिता.
१४.	सम्प्रोक्षणविधिः	....	३१	अनिरुद्धसंहिता.
१५.	जीर्णबिम्बत्यागविधिः	....	३५	वासुदेवसंहिता.
१६.	सम्प्रोक्षणप्रायश्चित्तविधिः	....	३०	श्रीधरसंहिता.
१७.	अष्टबन्धनप्रोक्षणविधिः	....	३६	विष्णुसिद्धान्तसंहिता.
१८.	संप्रोक्षणविधिः	....	२५	पद्मोद्भवसंहिता.
१९.	पीठचलनादिनिमित्तप्रोक्षणविधिः	....	३८	विष्वक्सेनसंहिता.
२०.	सर्वदोषपरिहारप्रायश्चित्तविधिः	....	....	गौतमसंहिता.
२१.	अशनिपातप्रोक्षणम्	....	९०	ब्रह्मसंहिता.
२२.	मरणप्रोक्षणविधिः	....	४४	सनत्कुमारसंहिता.
२३.	भूषणप्रोक्षणविधिः	....	....	काश्यपसंहिता.
२४.	लक्षकोटिहोमविधिः	....	३२	नरसिंहसंहिता.
२५.	ग्रामाश्रयादिबलिनिर्णयः	....	२४	विष्णुसंहिता.
२६.	सूतकाशौचनिर्णयः	....	२१	श्रीप्रश्नसंहिता.

Complete.

Beginning :

भृगुत्तस्य विधिं वक्ष्ये शास्त्रदृष्टया यथोदितम् ।
समाहितमना भूत्वा शृणुष्व मुनिपुङ्गव ॥
तदन्यैर्भूभुजैश्चैव स्वराष्ट्रं बाध्यते यदि ।
द्विजानां समरंचै(श्चै)व सम्भवे ग्राममध्यके ॥
अग्निना बहुशो दग्धे दस्युभिः परिपीडिते ।
अनावृष्ट्युद्भवे चैव भूकम्पे जनितेऽपि वा ॥

* * * *

कर्मार्चनानि बिम्बानि निक्षिपेद्भुतभूमिषु ।
अन्यदेशेऽथ वा कुर्यात् अथवा स्वगृहेऽपि वा ॥

* * * *

एवमुक्तेन विधिना प्रायश्चित्तं क्रियात्मज(क)म् ।
कुर्वन् यः कारयेद्यस्तु मम लोकं स गच्छति ॥

Colophon:

इति पञ्चरात्रे विष्णुतन्त्रे भृगुसोद्धृतप्रायश्चित्ते आवाहनक्रियाक्रमविधानं नाम पञ्चचत्वारिंशोऽध्यायः ॥

End:

यावत्कालाश्रयं प्रेतं तावत्कालं विना भवेत् ।
एवं विचार्य कर्तव्यं पञ्चरात्रविशारदः ॥
अन्यथा चेन्महान्दोषः कर्तुर्देशाधिपस्य तु ।
तस्मात्सर्वप्रयत्नेन उक्तमार्गेण कारयेत् ॥

Colophon:

इति श्रीपाञ्चरात्रे महोपनिषदि श्रीप्रश्नसंहितायां सूतकाशौचनिर्णयो नामैकविंशोऽध्यायः ॥

प्रायश्चित्तसङ्ग्रहस्समाप्तः ॥

R. No. 3744.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Vānamāmalai (Nanguneri), Tinnevelly district.

नीतिमाला.
NĪTIMĀLĀ.

A treatise on the Viśiṣṭādvaita-Vēdānta dealing with the following subjects :—

१. ब्रह्मविचारस्य कर्मविचारानन्तर्यवर्णनम्.
२. वेदान्तप्रामाण्यनिर्णयाधिकारः.
३. विवर्तपक्षप्रतिक्षेपाधिकारः.
४. परिणामपक्षप्रतिक्षेपाधिकारः.
५. शक्तिविक्षेपप्रतिक्षेपाधिकारः.
६. ब्रह्मस्वरूपनिर्णयाधिकारः.
७. पुरुषस्वरूपनिर्णयाधिकारः.
८. विधिस्वरूपनिर्णयाधिकारः.
९. निश्श्रेयससाधननिर्णयाधिकारः.
१०. निश्श्रेयसनिर्णयाधिकारः.

Complete.

Beginning:

वस्त्वाविरस्तु पद्माक्षं मम श्रीधरमग्रिमम् ।
अबुद्ध्यधीनसन्दर्भभारतीमूर्धभूषणम् ॥
उन्मीलयन्ति चैतन्यचक्षुर्ये हेतुकं मम ।
हृदि सन्निदधु(ध्यु)स्ते मे गुरवः करुणाश्रयाः ॥
वेलां लीलाविभूतिं प्रबलमिति शिलाराशिभिः पूर्वक्लृप्तां
ब्रह्माम्भोधेर्विषाणैः कुनयकुलमयैः भेत्तुमुद्युञ्जते ये ।
तान् वादीभान् सुतीक्ष्णैः क(न)यकुलकरजैः पाटयन् लक्ष्मणार्यः
पञ्चास्यो रङ्गधा(म) क्षितिधरनिलयो मङ्गलं मे विधत्ताम् ॥
मुनीन्द्रपारिजातो(ता)र्थसुनीतिकुसुमैरहम् ।
मालां ग्रथ्नामि रङ्गेश परिचर्याविधित्सया ॥
पौर्वापर्यस्य नियमः कर्मब्रह्मविचारयोः ।
तथा वेदान्तवाक्यानामप्रामाण्यनिराक्रिया ॥
विवर्तपक्षक्षपणं परिणामनिराकृतिः ।
शक्तिविक्षेपभङ्गस्य(श्च) ब्रह्मणो निर्णयस्तथा ॥
निर्णयः पुरुषस्यापि विधिरूपविनिर्णयः ।
मोक्षसाधननिर्णीतु(र्णीतिः) मोक्षस्य च विनिर्णयः ॥
दशार्थानधिकृत्येयं नीतिमाला प्रवर्तते ।
दोषानत्र तिरस्कृत्य गृह्यन्तां सूरिभिर्गुणाः ॥

ब्रह्मभागविचारस्य कर्मभागविचारानन्तर्यं सूत्रितम्—अथातो ब्रह्मजिज्ञासेति । तत्र केचिदाहुः—

त्रय्यन्तार्थविचारस्तु तदध्ययनपूर्वकः ।
तदधीनात्मलाभत्वात्त्रयीवाक्यविचारवत् ॥

अनधीतवेदस्य विचारानुपपत्तेर्धर्मजिज्ञासाया वेदाध्ययनपूर्वकत्वं यथा तथा ब्रह्मजिज्ञा(सा)या अपि वेदान्ताध्ययनपूर्वकत्वमेव युक्तम् ।

* * * *

Colophon:

इति नीतिमालायां ब्रह्मविचारस्य कर्मविचारानन्तर्यनिर्णयाधिकारः प्रथमः ॥

End :

तस्मात् ज्ञानानन्दाद्यसङ्ख्येयकल्याणगुणगणस्य सर्वस्वामिनः परमपुरुषस्यानुभवः शेषभूतस्य मुक्तस्य परिचर्यारसमावहतीति तथाविधो भगवदनुभवः परमनिश्श्रेयसमिति सर्वं समञ्जसम् ॥

Colophon :

इति नीतिमालायां निश्श्रेयसनिर्णयाधिकारो दशमः ॥

इति नीतिमाला सम्पूर्णा ॥

R. No. **3745.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Dīkṣita Kṛṣṇa Ayyaṅgār, Tirukkurungudi, Tinnevelly district.

(*a*) पादुकासहस्रव्याख्या.

PĀDUKĀSAHASRAVYĀKHYĀ.

Foll. 1*a*—14*b*. Foll. 15 and 16 are left blank.

A commentary on Vēdāntadēśika's Pādukāsahasra, which work has been described under No. 10571 of the D.C.S. MSS., Vol. XIX.

Contains the Citrapaddhati only complete.

Beginning :

श्रीमान् वेङ्कटनाथार्यः (. . .) सदा हृदि ॥

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम् ।

विचित्र[स्या]जगतः(दा)धारो विष्णुर्यत्र प्रतिष्ठितः ॥

विचित्र[स्य] जगदाधारः यो लोकत्रयमित्यादिप्रकारेण सर्वाधारभूतः विष्णुः यत्र पादुकायां प्रतिष्ठितः । अत एव सर्वचित्राणां प्रतिष्ठां प्रतिष्ठाहेतुमित्यर्थः ; कारणे कार्योपचार(रात् ।)प्रतिष्ठां स्थानमिति वा । तां मणिपादुकां प्रपद्ये शरणत्वेनाध्यवस्यामि । शृण्विति हे पादु पादुके चित्रमाश्चर्यं चित्रपद्धतिं च शृणु ।

End ;

अरस्थानीयप्रथमवलयस्थाक्षराष्टके वाच्यमाने श्रीश्रीवेङ्कटनाथेनेति भवति । एवं प्रथमवलयतृतीयषड्वलयाष्टवलयेषु ॥

श्रीश्रीवेङ्कटनाथेन वेदान्ताचार्यतावता ।

कविवादिमृगेन्द्रेण कृता पादावनीनुतिः ॥ इति ॥

Transcribed in 1921–22 from a MS. of Śrīmatī Maṅgāttammaṅgār, Vaḍakkutirumāḻigai, Alwartirunagari, Tinnevelly district.

(b) कैवल्यनिर्णयः.

KAIVALYANIRṆAYAḤ.

Foll. 17a—28b.

See the Tamil part of this Triennial Catalogue.

Complete.

R. No. **3746.**

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 30. Lines, 20 in a page Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. P. Sundara Śāstrigaḷ, Madras.

(a) श्रीरामपट्टाभिषेकविधिः.

ŚRĪRĀMAPAṬṬĀBHIṢĒKAVIDHIḤ.

Foll. 1a—11b. Fol. 12a gives the name of the original MS. Fol. 12b is left blank.

Similar to the work described under No. 5798 of the D.C.S. MSS., Vol. XII.

Complete; as found in the Brahmāṇḍapurāṇa.

Beginning:

अथ ब्रह्माण्डपुराणोक्तश्रीरामपट्टाभिषेकविधिः उच्यते । श्रीशिवः—

पूर्वोक्तविधिना देवि शृणुयाच्छ्रावयेदपि ।
रामाभिषेकपर्यन्तं श्रुत्वा रामायणं नरः ॥
अष्टाविंशत्पलमितकांस्यपीठे सुनिर्मले ।
चतुरश्रे शुभे रत्नसौवर्णेनोत्तरच्छदे ॥
चतुर्विंशतिनिष्कैर्वा निष्काणां द्वादशेन वा ।
तस्यार्धेन तदर्धेन वित्तशाठ्यं न कारयेत् ॥
रामलक्ष्मणसीतानां प्रतिमाः कारयेद्बुधः ।
तथा भरतशत्रुघ्नविभीषणहनूमताम् ॥

* * * *

रामपट्टाभिषेकस्य विधिं वक्ष्ये समन्त्रकम् ।
ससङ्कल्पं महादेवि सावधानमनाः शृणु ॥

अथ प्रयोगः—श्रीरामस्य स्वस्य च चन्द्रताराबलयुक्ते सुमासे सुनक्षत्रे सुदिवसे सुमुहूर्ते सुलग्ने श्रीरामपट्टाभिषेकं कुर्यात्

End :

रामायणस्य माहात्म्यं सङ्क्षिप्योक्तं हिमाद्रिजे ।
पट्टाभिषेचनविधिः किं भूयश्श्रोतुमिच्छसि ॥

Colophon :

इति श्रीमद्ब्रह्माण्डपुराणे उमामहेश्वरसंवादे श्रीमद्रामायणमाहात्म्यवर्णनपूर्वकः श्रीरामपट्टाभिषेचनविधिः ॥

या कृपा मुनिसन्त्राणे या कृपा कपिनायके ।
या विभीषणरक्षायां सा राम मयि धीयताम् ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Ayyā Śāstri, Nallapalli, Cochin State.

(b) कुमारसम्भवव्याख्या.
KUMĀRASAMBHAVAVYĀKHYĀ.

Foll. 13*a*—29*b*. Fol. 30 is left blank.

Same work as that described under R. No. 2707 ante, wherein see for the beginning. By Dakṣiṇāvarta. This commentary is called Kumārasambhavadīpikā.

Contains the commentary on Sargas seven and eight.

End:

चतुर्णामायुर्भागानामेको भाग उदित इति प्रतीयते । ज्वलन इव समुद्रा(द्रा)न्तर्गतं भान्धपान्नेयुर्थौ(?) जलहविषा तृष्णवा(या) बध्यते । तथा देवस्यापि विषयसुखतृष्णा ववृधे ॥

Colophon :

इति दक्षिणावर्तविरचितायां कुमारसम्भवदीपिकायामष्टमस्सर्गः ॥

R. No. **3747.**

Paper. 10⅝ × 9¾ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Raja of Punnattūr, Kottapudi post.

Fol. 30*a* gives the contents of this work. Fol. 30*b* is left blank.

मानरत्नावलिः
MĀNARATNĀVALIḤ.

R. No. 3748.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Kaṇṇūr-mana, Ottapalam.

Fol. 34*b* is left blank.

योगार्णवः.

YŌGĀRṆAVAḤ.

A treatise explaining the bearing of certain aspects of Yōga on the Advaita-Vēdānta.

Contains the Adhyāyas 1—8 complete, but wants the end of the 5th Adhyāya and the beginning of the 6th Adhyāya.

Beginning:

सत्यनित्यचिदानन्दनिष्कलस्य(स्व)प्रकाशिने ।
अ . . . . . नन्दविश्वात्मब्रह्मणे नमः ॥
अज्ञानतिमिरध्वंसि ज्ञानलोकप्रदायि च ।
यद्दर्शनं नमस्तस्मै गुरवे परमात्मने ॥
वक्ष्ये योगार्णवं गुह्यं ज्ञानरत्नविभू(षि)तम् ।
गुरूपदेशतो गम्यमपवर्गा . तास्पदम् ॥
मुमुक्षुतत्त्वसम्पूर्णं प्रत्यूहोर्मिदुरासदम् ।
ध्यानाधा(रम)हाद्वीपं श्रद्धावेलासमावृतम् ॥
देहं च देहविभवं च तथैव जीवं
सम्बन्धमप्यथ तयोः परमात्मवस्तु ।
ऐक्यं च जीवपरयोः सकलान्धयत्त्व-
मोङ्कारवाच्यमिति तन्त्रमिदं व्यनक्ति ॥

* * *

Colophon:

इति योगार्णवे प्रथमोऽध्यायः ॥

End:

एकस्मिन् वस्तुनि ज्ञाते सर्वं विज्ञातमेव हि ।
सर्ववस्तुषु चात्मानं तस्मिन् सर्वं च पश्यति ।
एकमेवाद्वयं ब्रह्म तस्माद् द्वैतं परित्यजेत् ॥

Colophon:

इति योगार्णवे सप्तमोऽध्यायः ॥

* * * *

वैश्वानरः स्वयं वह्निर्ब्रह्मरन्ध्रं विनिर्गतः ।
यथैव मथितो वह्निम(र)रणिं स्वं दहेत्तथा ॥
सन्तापयति स्वं देहमापादतलमस्तकं(गः) ।
ब्रह्मैवासौ भवेदात्मा न पुनर्जन्मभाग्भवेत् ॥

Colophon:

इति योगार्णवे अष्टमोऽध्यायः ॥

R. No. **3749.**

Paper. 10¾ × 9½ inches. Foll. 228. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Śrīmān Bhagavan Mahapatro, Nārāyaṇapuraśāsanam, Dharakota, Ganjam district.

Bound in two volumes.
Fol. 228 is left blank.

गोविन्दलीलामृतम्, वैष्णवाह्लादिनीव्याख्यासहितम्.

GŌVINDALĪLĀMṚTAM WITH THE COMMENTARY VAIṢṆAVĀHLĀDINĪ.

A poem describing the sweet sports and deeds of Lord Kṛṣṇa, in accordance with the Caitanya school. The text is by Kṛṣṇadāsa and the commentary is by Kaviratna, son of Paramēśvara of Bhāradvājagōtra. For other particulars regarding the author and commentator see the extracts given below.

Contains the Sargas one to eight complete and breaks off in the course of the ninth Sarga.

Beginning:

मन्दारामन्दनीलाकरतलविलसद्धर्यसौन्दर्यबृन्दं
प्रोन्मीलच्चन्दनालीविमलनखरुचिस्कन्दिताक्रन्दकूलम् ।
मारामन्दारमन्दाकिनिमुनिमनया वन्दितं साधुशीलं
वन्दे बृन्दावनेन्दोश्चरणसरसिजद्वन्द्वमानन्दकन्दम् ॥

परमपदमपूर्वं पूर्वतोऽपीश्वरो यो व्रजति तदभिधेयो नाम सामन्तरायः ।
परमपदगतानां सज्जनानां ससृ(द्व)क्षो जयति मम पितायं पुण्यपुञ्जस्वरूपः॥
भट्टाचार्यं जनार्यं (?) विविधमतविदं नाम गोविन्दरामं
जित्वा त्यक्त्वा(तर्का)वलीभिर्विजयनगरतो भैमदेव्यां सभायाम् ।

प्रत्यक्षं पण्डितानामपि सपदि पुरः प्राप सामन्तराया-
भिख्यां व्युत्पन्नपूर्वां प्रमुदितहृदयाद्भूपपीताम्बराद्यः ॥
यस्मिन् भागवतीं कथां कथयति व्याख्यां सभामध्यतः
धृत्वा वैष्णवतोषिणीं प्रतिपदं सप्रेमरोमोद्गमः ।
पाषण्डा अपि तत्क्षणं प्रविलसद्रोमाश्चकम्पाश्रुभिः
व्याप्ताः प्रेमसुखाम्बुधौ सुजनवन्मज्जन्ति भावाकुलाः ॥
साक्षाद्योऽमरकोशपुस्तकमहो प्ये (चै)कं लिलेख स्वयं
श्रीपीताम्बरभीमदेवविलसद्भूमीश्वरस्याज्ञया ।
यश्चक्रे मथुराप्रयागविदितं सत् खण्डकाव्यं हरेः
राधायाश्च कथाभिरद्भुततरं प्रश्नोत्तराभिर्युतम् ॥
* * * *
भ्राजद्राजकदम्बलम्बितमहापूजादरोऽन्तर्दरं
दृष्टश्शुभ्रगणैः प्रसन्नवदनैर्मित्रैर्मुदालोकितः ।
श्रीदामोदरपण्डितः प्रकटिताशेषश्रुतार्थक्रियः
षट्ज्यौतिषवेदिशाटिकतयाख्यातो यदीयाग्रतः ॥
नो बाला न च कालिका न स(च)रमा नो भारती चण्डिका
पूज्या यस्य न वा भवत्कुलगुरुः श्रीकृष्णचन्द्रः परम् ।
यत्पादाम्बुजरेणुरूषिततनुत्वेनास्य वादे भवेत
गीर्वाणेशगुरोः पुरोऽपि मुखरो जैत्रप्रतिज्ञानकः ॥
* * * *
यः श्रीमत्पुरुषोत्तमाभिधमहाराजाधिराजाज्ञया
श्रीमद्भक्तिरसामृताम्बुधिगतश्लोकावलीटिप्पणीम् ।
कृत्वा कीर्तिकदम्बकं प्रकटयन्नानन्दयन्वैष्णवान्
पाषण्डानपि भर्त्सयन्नुपगतानध्यापयन्नाबभौ ॥
व्युत्पन्नानां कवीनां विविधमतविदां वन्द्यपादारविन्दात्
काव्यं गोविन्दलीलामृतमिदममलस्वान्तसामन्तरायात् ।
सोऽहं तस्मात्पवि(ठि)त्वा निजपितुरधिकाभ्यासपूर्वं विदित्वा
किञ्चित्तस्य प्रसादात्तिपठिषुरुचये टिप्पणीमारभेऽस्य ॥
गोविन्दलीलामृतकाव्यटीका सद्वैष्णवाह्लादकरी मनोज्ञा ।
भावार्थमात्रप्रतिपाद(दि)नीयं सतां सदा कण्ठगताविरास्ताम् ॥

अथ सकलकविकुलमकुटालङ्कारहीरोपलः परमवैष्णवः श्रीमान् कृष्णदासः प्राणिनो दुष्पारसंसारसागरान्तरे निपत्य विषकत्वा(क्तो)लव्यालावलीकबलितान् मायामोहितमनस्कतया कुकाव्यपरिशीलनतत्परांश्च स्वयमालोच्य सपदि

* * * *

सदनुजिघृक्षया परमपवित्रविचित्ररचितत्वात्केवलभगवल्लीलावर्णनप्रधानं गोविन्दलीलामृताख्यं महाकाव्यं चिकीर्षुः सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् । आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याद्यालङ्कारिकवचनप्रामाण्यपर्यालोचनया चिकीर्षितार्थप्रतिबन्धकविघ्नध्वंसनपटुतरनिजेष्टदेवतावन्दनप्रतिपादनेन प्रकृते नमस्कारलक्षणं काव्यमुखं निर्दिशति—श्रीगोविन्देति । श्रीगोविन्दं स्वेष्टदेवं श्रीमन्नन्दनन्दनं वन्दे । भक्तिश्रद्धाविशुद्धान्तःकरणतया साष्टाङ्गं प्रणमामीत्यर्थः । तं कथंभूतं व्रजो गोष्ठं लक्षणया तत्र यो जनसमूहः तस्य य आनन्दसन्दोहः प्रमोदव्यूहस्तस्यामन्दमधिकं मन्दिरं स्थानम् ।

* * * *

श्रीचैतन्यपदारविन्दमधुपश्रीरूपसेवाफले
दिष्टे श्रीरघुनाथदासकृतिना श्रीजीवसङ्गोद्गते ।
काव्ये श्रीरघुनाथभट्टवरजे गोविन्दलीलामृते
सर्गः कुञ्जनिशान्तकेलिरचनं नामायमादिर्गतः ॥

* * * *

भारद्वाजकुलाम्बुधौ महति यस्सम्पूर्णशुभ्रांशुव-
द्विप्रश्रीपरमेश्वराख्य (उदितस्सामन्तरायस्सुधीः) ।
तत्सूनोः कविरत्ननाम दधतो गोविन्दलीलामृत
व्याख्याभिख्यकृतौ निशान्तचरितः सर्गोऽयमादिर्गतः ॥

* * * *

Colophon:

इति श्रीकविरत्नविरचितायां वैष्णवाह्लादिन्याख्यायां गोविन्दलीलामृतव्याख्यायां प्रथमः सर्गस्समाप्तः ॥

End:

तादृशपरमानन्दसमुद्रमग्नमनस्कत्वादिति भावः ॥

श्रीचैतन्यपदारविन्दमधुपश्रीरूपसेवाफले
दिष्टे श्रीरघुनाथदासकृतिना श्रीजीवसङ्गोद्गते ।

काव्ये श्रीरघुनाथभट्टवरजे गोविन्दलीलामृते
सर्गस्साम्प्रतमष्टमोऽयमगमन्मध्याह्नलीलामनु ॥

गोविन्दलीलामृते काव्ये साम्प्रतमिदानीं मध्याह्नलीलामनु लक्षीकृत्य तल्लीलावर्णनप्रचुर इत्यर्थः । अयमष्टमस्सर्गः अगमद्गतः समाप्त इत्यर्थः । अन्यत्सर्वं पूर्वमेव व्याख्यातमासीत् ॥

अतोऽत्र न सम्भ्रमः ॥

Colophon:

इति श्रीकृष्णदासकविराजविरचिते गोविन्दलीलामृते महाकाव्ये अष्टमः सर्गः ॥

भारद्वाजकुलाम्बुधौ महति यः सम्पूर्णशुभ्रांशुवत्
विप्रः श्रीपरमेश्वराख्य उदितः सामन्तरायस्सुधीः ।
तत्पुत्रेण यथाश्रुतार्थरचिते गोविन्दलीलामृत-
व्याख्याने विमलार्थसंस्कृतमये सर्गो जगामाष्टमः ॥

अथानयोर्मानसनर्तकौ तौ प्रेमा स्वपि(शि)ष्यौ ननु नर्तकीभ्याम् ।
शिक्षागुरुर्नर्तयितुं प्रवृत्तो बृन्दासखीबृन्दसभासदग्रे ॥

अथ परस्परावलोकनान्तरं प्रेमा सम्यङ्मसृणितस्वान्तत्वादविशिष्टो भावावस्थाविशेषः । स एव शिक्षागुरुः सूत्रधारः व्यस्तरूपकमिदम् । अनयोः राधाकृष्णयोः । मानसे मनोद्वयमेव नर्तकौ नटौ । तौ नर्तयितुं नृत्यं कारयितुं प्रवृत्तः तत्रासक्तो भूत्वेत्यर्थः ।

* * * *

व्यत्यस्ताकल्पगात्री द्रुतमभिसरणावेशतस्त्वं प्रिये त-
च्चापश्यं वेष एष प्रथयति मनसोऽप्येह्यहं संस्करोमि ।
इत्थं स्पर्शोत्सुकत्वात् प्रियपरिहसिताश्राङ्मुखी सङ्कुचन्ती
लोलाक्षी विभ्रमालङ्कृतिरुचिरतनुस्तस्य तुष्टिं व्यतानीत् ॥

R. No. 3750.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of the Raja of Khallikota, Ganjam district.

Fol. 130 is left blank.

श्यामार्चनतरङ्गिणी.

ŚYĀMĀRCANATARAṄGIṆĪ.

A treatise in verse on the mode of worshipping the goddess Śyāmā, who is the same as Durgā or Śakti : by Viśvēśvarasōmayājin.

Deals with the following subjects:—

१. ब्राह्ममुहूर्तकृत्यवीची.
२. प्रातस्स्नानविधिवीची.
३. स्नानशुद्ध्यन्तरद्वारपालार्चनक्रमवीची.
४. भूतशुद्धिप्राणायामवीची
५. मातृकान्यासजालवीची.
६. अन्तर्यजनवीची.
७. मधुपानविधिनिषेधवीची.
८. द्रव्यशुद्धिविवेकवीची.
९. उपचारसंस्कारविवेकवीची.
१०. पूजाक्रमविवेकवीची
११. होमक्रमविवेकवीची.
१२. कुण्डाष्टादशसंस्कारविवेकवीची.
१३. होमारम्भे होमप्रकारवीची
१४. पशुप्रोक्षणविधिवीची.
१५. दूतीयजनवीची.
१६. प्रसादस्वीकारादिशिवाबल्यन्तविवेकवीची.

Contains the Vīcīs 1—16 complete.

Beginning:

श्रीशा(ना)कमलामान्यमाकन्दलबलाभतः ।
निचिता विश्वनाथेन श्यामार्चनतरङ्गिणी ॥
सर्वतन्त्राम्बुधेः सारभागमाहृत्य शम्भुना ।
आज्ञया शाम्भवीतृप्त्यै निचितातीव निर्मला ॥
तस्या विविधकर्माणि विविक्तानि यथाक्रमम् ।
कथ्यन्ते तान्यहोरात्रविहितानि गुरोः कृपात् (?) ॥

तत्रादौ ब्राह्ममुहूर्तकृत्यमाह—

रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः ।
स ब्राह्म इति विख्यातो विहितः संप्रबोधने ॥

यथा—

ब्राह्मे मुहूर्ते चोत्थाय पृथिवीं प्रार्थयेत्ततः ।
बहिर्भूत्वा शुचिर्भूत्वा ध्यायेद्गुरुगुणान् कृती ॥

* * * *

Colophon:

इति श्रीमदद्वैतपथपथ(वादपथपथि)केन विश्वेश्वरसोमयाजिना विरचितायां श्रीश्यामार्चनतरङ्गिण्यां ब्राह्मे मुहूर्तावर्ते प्रथमा वीची निरूपिता ॥

End:

गृह्ण देवि महाशब्दे नमः कालाग्निरूपिणी(णि) ।
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव ॥
एष बलिः—शिवाभ्यो नमः—इति शिवाबलिः ।

Colophon:

इत्यद्वैतपथि(थ)पथिकेन विश्वेश्वरसोमयाजिना विरचितायां श्यामार्चनतरङ्गिण्यां श्रीमहाप्रसादस्वीकरणादिशिवाबल्यन्तविवेचनी शोषडी(षोडशी) वीची निरूपिता ॥

The scribe adds—

कलिङ्गदेशे सद्देशे प्रमोदाब्दे प्रमोददे ।
व्यलिखद्गोपीनाथाख्यदासः पुस्तमिदं शुभम् ॥
समाप्तोऽयं ग्रन्थः ॥

R. No. **3751.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. **Foll.** 130. **Lines,** 20 in a page. **Grantha. Good.**

Transcribed in 1921–22 from a MS. of Śrīmatī Maṅgātta mmaṅgār, Vaḍakkutirumāḷigai, Alwartirungari post, Tinnevelly district.

द्रव्यादिपदार्थविवेकः.

DRAVYĀDIPADĀRTHAVIVĒKAḤ.

A treatise in the Nyāya and Vaiśēṣika systems of philosophy explaining Dravya and other padarthas. The author, whose name is not given, was a disciple of Lakṣmaṇa.

Breaks off in the Śabdaparicchēda ending with the words तत्स्वत्वोत्पत्तिरिति वाच्यम्.

Beginning:

नत्वा विश्वेश्वरं देवं गुरुं श्रीलक्ष्मणाभिधम् ।
द्रव्यादीनां पदार्थानां विवेकः क्रियतेऽधुना ॥

नन्वभिमतकर्मारम्भपूर्वसमये सर्वेऽपि शिष्टा मङ्गलमाचरन्ति । तस्य क(न) समाप्तिः फलम् । कृतेऽपि मङ्गले असमाप्तेः अकृतेऽपि मङ्गले

समाप्तेश्च । नापि विघ्नध्वंसः प्रमाणाभावात् । विनायकस्तवपाठादिनापि विघ्नध्वंसस्य जायमानत्वेन व्यभिचारादिति चेन्न । इष्टसाधनत्वांशे अभ्रान्त रूपविशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे समाप्तेरुपस्थितत्वात् दृष्टत्वाच्च तस्या एव फलत्वं कल्प्यते, न त्वन्यस्य, तदुपस्थित्यादि- कल्पने गौरवात् ।

* * * *

Colophon:

इति प्रत्यक्षपरिच्छेदः समाप्तः ॥

End:

तथा खण्डपटादौ कुविन्दादिजन्यत्वान्नोक्तरीत्येश्वरसिद्धिः, किं त्वागमा- देवेत्याहुः ॥

Colophon:

अनुमानपरिच्छेदस्समाप्तः ॥

अथ शब्दो निरूप्यते—

शाब्दप्रमितिकरणं शब्दः । शाब्दत्वं च शाब्दयामीति प्रतीतिसिद्धो जातिविशेषः । इदं च प्राचीनमतेन, वस्तुतोऽतीतानागतशब्दात् शाब्द- बोधस्य जायमानत्वात् शब्दज्ञानं करणं, वृत्त्या तज्जन्यपदार्थोपस्थितिर्व्यापारः । योग्यतादिज्ञानं सहकारि ।

* * * *

न च तज्जनितेऽपि स्वत्वोत्पादः तत्स्वत्वेनेति चेत्तर्हि कालान्तरे दुग्धपरमाणु जनितद्रव्यान्तरेऽपि तत्सत्त्वो(त्स्वत्वो)त्पत्तिरिति वाच्यम्.

R. No. **3752.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 134 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Raja of Khallikota, Ganjam district.

Fol. 134*a* gives the name of the original MS. Fol. 134*b* is left blank.

भक्तिवैभवनाटकम्.

BHAKTIVAIBHAVANĀṬAKAM.

A drama purporting to establish the greatness and importance of Bhakti (devotion) towards Lord Viṣṇu: by Jīvadēvarājagaru, son of Trilōcanācārya. It is stated that the author was given many rewards by king Rudradēva.

Complete.

Beginning:

श्रीमल्लीलाशरीरोदयजनितसदाकुण्ठवैकुण्ठभोगो
योगोद्योगोपभोगस्थिरहृदयदरीसुन्दरीकेसरीन्द्रः ।
हेतुः श्रेयःपदव्या भजनकृतधियां नव्यनिर्व्याजभव्या-
नव्याद्व्याकृतात्मा भवभयविधुरानाश्रितानीश्वरो नः ॥

अपि च—

श्रीमत्पाथोजजातप्रमुखसुरसुराराातितिर्यङ्मनुष्य-
प्रत्यासक्तिः फलानि प्रतिनियतकृतानेकसम्भारभुक्तिः ।
वेदार्थैकप्रसक्तिः श्रुतिशिखरसमुद्भासमानप्रसक्तिः
पायाद्वो विष्णुभक्तिस्त्रिभुवनजनतामूर्तिमन्मुक्तिशक्तिः ॥

* * * *

सूत्रधारः—

आर्ये अस्मिन् सकलक्षेत्रसार्वभौमे श्रीपुरुषोत्तमक्षेत्रे.

स्वच्छन्दप्रसरेण दिव्यमहसा विभ्राजमानस्सदा
श्रीनीलाचलनायको विजयते त्रैलोक्यचिन्तामणिः ।
यो ध्यातो हृदये क्षणं हरिरिति स्वैरं परं कीर्तितः
स्वात्मानं वितरत्यनादिनिधनं नित्योदितानन्दथुम् ॥

किं च—

तस्योत्तुङ्गवसन्तरङ्गसमयप्रस्तारसम्भावितः
श्रीमानेष दृगुत्सवो विजयते मुक्तिप्रदो मण्टपः ।
चञ्चन्मारुतचारुचामरमरुच्चाम्पेयमालाशतै-
राविर्भूतरसं हसन् विजयते सत्पुष्पकं पुष्पकम् ॥
तत्रामी समये वसन्तसमये नानादिगन्तागता
धर्माचाररताः श्रुताखिलमता विष्णोः पदाब्जे श्रिताः ।

सर्वे भक्तिमतावतारपुरुषा विद्याकलासन्तताः
शुद्धा भागवतावताहितरसाः शुभ्रास्समित्यासते ॥

तदेतेषामग्रे भक्तिरसप्रधानं नाटकमभिनीय स्वाभिलषितं सम्पादयामः ।

* * * *

नटी—किं तं (किं तत्) । सूत्रधारः—प्रिये—
श्रीभक्तिवैभवमिति श्रुतनामधेयं साक्षाद्भवन्निगमनिर्मलरूपधेयम् ।
शृङ्गाररसाररससारणिभागधेयं निर्मत्सरैः कृतिभिरत्र सदावधेयम् ॥

यत्र हि—

ज्ञानं कर्म समुच्चितं पुनरिदं योगोऽथ सर्वं मतं
तत्तद्वार्त्तिकवृत्तिसूत्रकलितं नानानिबन्धस्थितम् ।
शैवं पाशुपतं तथागतमतं निर्मौलिकं कौलिकं
सर्वं न्यायशतैर्निरस्य निहितं कृष्णस्य शुद्धं मतम् ॥

नटी—को उण एत्थ कई (कः पुनरत्र कविः)? सूत्रधारः—किं न जानासि ?

अष्टौ हाटकचामराणि कनकच्छत्रं डमड्डिण्डिमं
योऽलब्ध प्रथितप्रतापविभवश्रीरुद्रदेवेश्वरात् ।
श्रीजीवः कविडिण्डिमो नृपगुरुष्षड्दर्शनीपण्डितो
भक्तिप्रस्थितदेशिकोऽखिलकलोऽलङ्कारदीक्षागुरुः ॥

* * * *

राजा (स्वगतम्)—

अन्यत्र सा तिष्ठति पङ्कजाक्षी दोषेण केनापि मनोगतेन ।
यतः पुरोवर्तिषु दृश्यतेऽसौ ततोऽन्यथाख्यातिरपि प्रमाणम् ॥

प्रतीहारी—इदो इदो महाराओ (इत इतो महाराजः)—इति निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीमत्कविडिण्डिमराजगुरुजीवदेवाचार्यविरचिते भक्तिवैभवनाटके विद्याविलोकनो नाम प्रथमोऽङ्कस्समाप्तः ॥

End :

नारदः एवमस्तु (नेपथ्ये भरतवाक्यम्)—

ध्यायंध्यायमुपास्य रूपमतुलं लीलाकृतेश्श्रीपते-
गायंगायमतीव शीतलतरं चित्रं चरित्रं मुहुः ।
पायंपायमयं सुधारसमयं श्रीकृष्णनामोच्चयं
जीवन्मुक्तिमवाप्य नन्दतु मुदा श्रीजीवदेवः स्वयम् ॥

किंच—

श्रीजीवः कविडिण्डिमो नृपगुरुर्नानाविधप्राकृत-
प्रेङ्खत्संस्कृतगद्यपद्यलहरीधारालधाराधरः ।
यो वेदार्थविशेषरक्षणचणः सूत्रार्थपारायणः
तस्येदं हरिभक्तिवभवपदं विद्योततां नाटकम् ॥

Colophon :

इति श्रीमत्कविराजराजगुरुत्रिलोचनाचार्यतनयश्रीभगवद्वासुदेवभक्तिप्रस्थानप्रणयनपरमाचार्यश्रीमन्महामहोपाध्यायश्रीमत्कविडिण्डिमवाहिनीपातिराजगुरुश्रीजीवदेवाचार्यविरचितं भक्तिवभवनाटकं सम्पूर्णम् ॥

R. No. 3753.

Paper. 10⅜ × 9⅝ inches. Foll. 50. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Yajñeśvaradīkṣitar, New Kalpati, Kalpati post, Palghat, Malabar district.

(*a*) बोधायनपशुप्रयोगदीपिका.
BŌDHĀYANAPAŚUPRAYŌGADĪPIKĀ.

Foll. 1*a*—28*b*.

A commentary on the Paśuprayōga which deals with the procedure relating to the performance of certain animal sacrifices, in accordance with the Bōdhāyana school : by Raṅganāthadīkṣita.

Breaks off in the fourth Adhyāya.

Beginning :

दर्शपूर्णमासाभ्यामिष्ट्वेत्यादिक्रमेणाग्रयणानन्तरं निरूढपशुप्रयोगः पशुना यक्ष्यमाणो भवति । स उपकल्पयते—पौतुद्रवान् परिधीन् गुग्गुलुसुगन्धितेजनं शुक्लमूर्णास्तुकां पैत्वस्यान्तरा श‍ृङ्गे द्वे रशने द्विगुणां च त्रिगुणां च

द्वे वपाश्रपणी विशाखां चाविशाखां च हृदयशूलं काश्मर्यमयान् परिधीन् औदुम्बरमैत्रावरुणदण्डमुखेन सम्मितमिध्मावर्हिरिध्मं प्रणयनीयं प्लक्षशाखामिडासूनुं यवान् यवमतीभ्यस्सक्तून् सक्तुहोमाय पृषदाज्याय दधि हिरण्यमिति ।

यवव्रीह्योरन्यतरं धानापिष्टानि सक्तवः ।
छागं वसा पृषत्पात्रे हिरण्यशकलं शतम् ॥

*　　*　　*　　*

Colophon :

प्रथमोऽध्यायः ॥

End:

घृतेन स्वाहा---मनसे ज्योतिष इदम् ।

प्रदक्षिणनमस्कारस्तथा ब्रह्मार्पणक्रिया । सन्तिष्ठते निरूढपशुबन्धः ॥

Colophon :

इति श्रीरङ्गनाथदीक्षितविरचितायां बोधायनपशुप्रयोगक्रमदीपिकायां तृतीयोऽध्यायः ॥

श्रीरङ्गनाथाध्वरिणे साग्निचिद्वाजपेयिने ।
श्रौतकर्माद्वितीयाय शास्त्राधीशाय ते नमः ॥

अध्वर्युः पृषदाज्यं विहृत्य जुह्वां समानीयात्याक्रम्याश्राव्याह --ओं श्रावय अस्तु श्रौषट् देवेभ्यः प्रेष्य वषट्कृते जुहोति ।

*　　*　　*　　*

अथास्य—

छागत्वं सर्वयज्ञानामाहुतित्वे व्यवस्थितः ।
यानं विभावसोर्नित्यमतश्शान्तिं प्रयच्छ मे ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Śrīnivāsa Ayyaṅgār of Lakṣattōppu, Alwartirunagari, Tinnevelly district

(*b*) क्रियादीपिका.

KRIYĀDĪPIKĀ.

Foll. 29*a*—49*b*. Fol. 50 is left blank.

The portion contained in this MS. deals with the procedure relating to reinstalling, after resanctification, in cases of injury, the image of Viṣṇu in temples and with the worship to be conducted thereafter.

Contains the seventh Paricchēda only complete.

Beginning:

अथ बालालयप्रतिष्ठाविधिरुच्यते ।

आचार्यो यजमानेन सह वैष्णवान् सकलवेदशास्त्रागमपुराणज्ञान् ब्राह्मणानपि स्वयमाहूय प्रणिपत्य प्रार्थयन्ते(ते) । तान् भोजयित्वा स्वर्णाभरण-वस्त्रगन्धपुष्पताम्बूलाद्यैरुपचार्य तान् प्रदक्षिणीकृत्य प्रणम्य कृताञ्जलिस्सन् वासुदेवं ध्यात्वा चेति विज्ञापयेत् ।

पूजाबिम्बमिदं विष्णोस्स्थापितं पूर्वसूरिभिः ।
पूज्यमानोऽङ्गवैकल्ये दूषणं चेह वर्तते ॥
अस्य जीर्णस्य बिम्बस्य चोद्धारं कर्तुमुद्यमे(तः) ।
आगमस्य वशात्कर्तुं सव्यसाध्यमुपास्महे ॥

End:

तस्मान्मामात्मसात्कर्तुं प्रसीद परमेश्वर ।
भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ॥
त्वयि विप्रतिपन्नानां त्वमेव शरणं विभो ।

इत्याचार्यः देवं विज्ञाप्य महाहविर्निवेद्य यथाविधि बलिं दद्यात् । तद्रात्रौ एकाहोत्सवं कारयेत् ॥

Colophon:

इति क्रियादीपिकायां बालालयबालबिम्बप्रतिष्ठाविधिर्नाम सप्तमः परि-च्छेदः ॥

R. No. **3754.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 118. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. C. Valiyaraja, Kottakal, Malabar district.

Fol. 118*b* is left blank.

रामायणव्याख्या—अमृतकतकटीका.

RĀMĀYAṆAVYĀKHYĀ : AMṚTAKATAKAṬĪKĀ.

Same work as that described under No. 1890 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the end.

Contains the Bālakāṇḍa complete.

Beginning:

वन्दे हस्तीशमेकाम्रनाथं वेदगिरीश्वरम् ।
स्वमनःप्राणदेहात्मस्थितांस्तान् ब्रह्मणो भजे ॥

हैरण्यगर्भं यत्तेजः श्रीप्रजेशावतारितम् ।
चतुर्मुखचतुर्व्यूहं त्रिपदार्थं सदा भजे ॥

अम्नाय्यष्टाक्षरोल्लासव्यष्टश्लोकसहस्रकम् ।
महाषोढात्मकाण्डं यत् तद्रामायणमाद्रिये ॥

असङ्गतव्याकृतिपांसुपङ्किलं रामायणं तीर्थसमुद्धृतामृतम् ।
योगीन्द्रवाणीकतकाद्रिपङ्किलं सर्वोपकारक्षममस्तु सर्वदा ॥

भो भोः किमिदं रामायणं व्याख्येयमुत न? यदि प्रयोजनं, व्याख्येयं यदि नो, न व्याख्येयं प्रयोजनमप्यैहिक(मा)मुष्मिकं वा स्यात् । न तु कृषिवाणिज्यसेवादिना धनधान्यवदैहिकं किञ्चित्प्रयोजनं रामायणपाठात्पश्यामः ।

* * * *

तस्यास्य दिव्यकाव्यस्याद्यस्सर्गो वाल्मीकेर्नारदस्योपदेशः । तत्र च नापृष्टः कस्य चिद्ब्रूयादिति न्यायेनापेक्षितप्रश्नाक्षेपः तपस्स्वाध्यायेत्यादि श्रुत्वा चैतदित्यन्तो ग्रन्थः ।

End:

श्रिया एव सत्या । अत एवोत्तरश्लोकोपमाप्युभयोः । अदुःखमानः सः ॥

Colophon:

इति श्रीमद्रामायणे अमृतकतकटीकायां बालकाण्डे सप्तसप्ततितमस्सर्गः ॥

बालकाण्डे तु सर्गाणां कथिता सप्तसप्ततिः ।
श्लोकानां द्वे सहस्रे च साशीतिशतकद्वयम् ॥

यस्सर्वोपनिषद्व्याख्यामङ्गलाभरणं व्यधात् ।
ब्रह्म जिज्ञासतां तस्मै नमो माधवयोगिने ॥

बालकाण्डव्याख्या समाप्ता ॥

R. No. **3755.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Tritala, Malabar district.

Fol. 90*b* is left blank.

भाणः.

BHĀṆAḤ.

A kind of drama called Bhāṇa; herein mention is made of King Rāmavarman, king of the Kērala country.

Complete.

Beginning:

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सूत्र—

जयति सुकृतै(:) प्राच्यैर्वृत्तैर्मिथः कलहोत्सवे
झटिति दयिते जातोत्कम्पं प्रणामविधायिनि ।
विचलितकुचः सारङ्गाक्ष्या विलोलितकुन्तलः
शिरसि घटितः पादाघातः सनूपुरनिस्वनः ॥

भोः किं नु खलु मयि विद्वत्सभाजनाय प्रवृत्ते समाकर्ण्यते । अये चिन्तयामि । नेपथ्ये

मनोज्ञैस्सल्लापैः परभृतवधूनां व्यवहरन्
परागैश्चूतानां निबिडमनुलिप्तः सुरभिलैः ।
विलोभ्य द्वन्द्वानां कुल(म)कलुषाणां घटयिता
वितन्वन्नानन्दं विट इव वसन्तो विजयते ॥

निष्क्रान्तः । स्थापना ।

ततः प्रविशति विटः ।

विट.—

अहो निर्वर्तितदिनावतारसमुचितविधेयस्य मम चित्तस्य सन्नद्धता ।

* * * *

गतैषा इयमपि । साधयामस्तावत् । परिक्रम्य चूर्णीसरित्कल्लोलहस्तालिङ्गित-प्राकारमेखलायाः केरलकुलराजधान्याः श्रीरामवर्मपरिपालिताया महोदयपुर्याः परा श्रीः । इयं हि

रथेभहयसादिभिः क्वचन मोदिभिर्मेदुरा
क्वचित्तिलकिता मुहुर्विभव(की)र्तनैः पत्तनैः ।
क्वचिच्च नयनाञ्चलैश्चलदृशां युवानः क्षताः
त्रयीपरिचयः क्वचित्खलु पुरी परिभ्राजते ॥

End:

इयमप्यस्तु—

गिरां गतिमविज्ञाय भावं कथयतामपि ।
(श्रुत्वा) जनः परावृत्य यतो नन्दतु निन्दतु ॥

किं च—

यावत्खण्डेन्दुमौलिं श्रयति गिरिसुता यावदास्ते मुरारेः
वक्षस्यक्षीणहारद्युतिमणिशबले देवता मङ्गलानाम् ।
यावद्वक्त्रे (च) मैत्रीमुपनयति गिरामीश्वरी पद्मयोनेः
तावल्लक्ष्मीप्रसूतिः स्वयमवतु भुवं रामवर्मा नरेन्द्रः ॥

(निष्क्रान्तो विटः) ॥

Colophon:

भाणस्समाप्तः ॥

R. No. **3756.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 110. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Gaṇapati Mussu, Nattanassery, Malabar district.

Fol. 109*a* gives the name of the owner of the original MS. Foll. 109*b* and 110 are left blank.

यन्त्रसारः.

YANTRASĀRAḤ.

Same work as that described under No. 8047 of the D.C.S. MSS., Vol. XV.

Incomplete.

R. No. **3757.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 180. Lines, 20 in a page. Dēvanāgarī Good

Transcribed in 1921–22 from a MS. of M.R.Ry. Peddinṭi Appayasubuddhigāru, Garabanda, Parlakimedi taluk, Ganjam district.

वैद्यसर्वस्वम्.

VAIDYASARVASVAM.

Foll. 1*a*—179*a*. Fol. 179*b* gives the Vaṭakaprayōga. Fol. 180 is left blank.

Similar to the work described under No. 13240 of the D.C.S. MSS., Vol. XXIV.

Wants the beginning; otherwise complete.

Beginning:

अथ पित्तश्लेष्मनिदानमाह—

तिक्ताम्लकटुकोद्गारः कुक्षौ हृत्कण्ठदाहकृत् ।
भ्रममूर्च्छारुचिच्छर्दिरालस्यं च शिरोरुजाः ॥
प्रसेको मुखमाधुर्यं श्लेष्मपित्तस्य लक्षणम् ।

अस्य चिकित्साकथनम्—

सिताक्षौद्रसमायुक्तः कफपित्तहरः परः ।
खदिरत्रिफलानिम्बपटोलवृषकामृताः ॥
त्वग्दोषश्लेष्मपित्ताश्रशमन्त्या क्वाथमुत्तमम् ।
पटोलयवधान्याकपिप्पलीमलिकानि च ॥

* * * *

Colophon:

इति वैद्यसर्वस्वे पित्तश्लेष्मनिदानं समाप्तम् ।.

End:

सर्वमेकीकृतं यावत्तावच्छर्करया युतम् ।
शीततोयानुपानेन नारिकेलोदकेन वा ॥ अविपत्तिचूर्णम् ॥

Colophon :

इति वैद्यसर्वस्वे वृष्यचिकित्सा समाप्ता ॥

* * * *

प्रमेहान्विंशतिं चापि मूत्राघातं च विंशतिम् ।
पीतमात्रं निहन्त्याशु विष्णुचक्रमिवासुरान ॥ कदलीकन्दघृतम् ॥

समाप्तोऽयं ग्रन्थः ॥

R. No. **3758.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 176. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Rāmakṛṣṇarājaguru, Gaṅgapuraśāsanam, Dharakota post, Ganjam district.

Foll. 175 and 176 are left blank.

अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

A commentary on Murāri's Anargharāghava, which work has been described under R. No. 132(*b*) ante : by Puruṣōttama, son of Ānandamiśra.

Breaks off in the sixth Act.

Beginning :

यामुद्वीक्ष्य शिखण्डिनः प्रतिदिनं शौण्डा दधुस्ताण्डवं
कण्ठान् किञ्चिदुदीर्य चातकचयश्चावाङ्मुखो धावति ।
सोत्कण्ठं किल मानसस्य सहसा दध्मौ मरालावलिः
कान्तिः कापि नवीननीरदनिभा पायादपायाज्जगत् ॥

कुव्याख्यानविषग्रस्तमुरारिकविभारतीम् ।
पुरुषोत्तममिश्रस्य व्याख्येयं जीवयिष्यति ॥

निर्मत्सरेण मनसा शिरसा नतेन
याचे मुहुर्मुरहरं रचिताञ्जलिस्सन् ।
ये वा समग्रगुणिनो गुणदेशभाजः
ते साधवो मम कृतिं परिशोधयन्तु ॥

सद्भावप्रतिपादिका मृदुपदा प्रोद्यत्सुवर्णद्युतिः
गम्भीरोक्तियुता च गौरवप्रिया किञ्चिद्धृतालङ्कृतिः ।
कान्तेव क्षतदूषणासुहृदुदासीनद्विषामुत्तमा
टीकेयं पुरुषोत्तमस्य विदुषां तोषाय भूयाच्चिरम् ॥

* * * *

तत्र श्रीमान् परमरामभक्तो मुरारिरखिलजनान् कुनाटकानुसन्धानपरानालोक्य तदनुजिघृक्षया नाटकव्याजेन सकलपुरुषार्थसाधनरामचरितं निबबन्ध । इदं किल दृश्यकाव्यत्वेन रूपकम् ।

* * * *

तत्रादौ ग्रन्थस्य निर्विघ्नेन परिसमाप्तिकामनया पूर्वरङ्गस्थमुख्याङ्गत्वेन चोक्तलक्षणयुक्तामिष्टदेवताप्रतिपादनपरामष्टपदां नान्दीं विदधानो ग्रन्थादौ मङ्गलमाचरति—निष्प्रत्यूहमिति । प्रत्यूहो विघ्नः तदभावाय भगवतो नारायणस्य ते तद्गुणविशिष्टे लोचने नेत्रे उपास्महे ध्यानादिना सेवयामः प्रजातप्रणामादिना भावयाम इति श्रीनिधिः ।

* * * *

पाराशर्यमुखारविन्दविगलद्गूढार्थवाक्यावलि-
व्याख्याव्याकुललब्धवर्णपटलीसिद्धान्तदीक्षागुरुः ।
सोऽभून्नारदबुद्धिदः सुमनसामानन्दमिश्रस्सुधी-
स्तत्पुत्रीयमुरारिकाव्यविवृतावङ्कोऽयमाद्यो गतः ॥

Colophon :

इति पुरुषोत्तममिश्रविरचितायां मुरारिटीकायां प्रथमोऽङ्कः ॥

End :

प्रोन्मीलत्पदकक्रमक्रमजटावर्णस्वरोच्चारणैः
काश्वी(ण्वी)याखिलमन्त्रभागक ऋचोऽधीयन् युवा शिक्षकः ।
यो योगीशधियं दधौ सुमनसामानन्दमिश्रः सुधीः
तत्पुत्रीयमुरारिकाव्यविवृतावङ्को गतः पञ्चमः ॥

Colophon :

इति श्रीपुरुषोत्तममिश्रविरचितायां मुरारिटीकायां पञ्चमोऽङ्कः ॥

प्रालेयशैलतनूयाकुचकोटिमुच्चै-
निक्षिप्य षण्मुखमुखैरतिपीतमुक्तम् ।
तर्षाकुलस्य लिहतश्शुभमादिशन्तु
लम्बोदरस्य दरपुष्करधूननानि ॥

अत्र तावत्पञ्चमाङ्कप्रान्ते हनुमत्प्रेषणं सूचितम् । अत्र तु तत्कृतचरितसूचनाय माल्यवतः प्रवेश इति अङ्कयोस्सुसन्धित्वम् । रावणवध इहाङ्कार्थः । अहहेत्यद्भुते मर्कटमात्रेण तादृक्कर्मकरणात् कष्टं च गृहादिदाहात् । दग्धा इति ।

* * * *

यज्वन एवंभूतां काञ्चनेष्टिकरीमिष्ट्वोपशमितः इष्ट्वा हि वृष्टिप्रतिबन्धनिग्रहश्शाम्यति येनेन्द्रो जितः सोऽपि लक्ष्मणेन जित इति फलितार्थः । सदायोहरणं च तत् इत्यमरः । अतिदुःखनिर्दुःखअतिदुःखान्यतचतसा इतर(?)

R. No. **3759.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Dēvulapalli Rāmakṛṣṇabrahma Śāstrigāru, Kistna district.

(*a*) चित्ररत्नाकरः.
CITRARATNĀKARAḤ.

Foll. 1*a*—26*b*.

Same work as that described under R. No. 1158 ante, wherein see for the beginning. By Cakrakavi, son of Lōkanātha and younger brother of Rāmacandra and Patañjali. The author has also composed the Pārvatīpariṇaya, the Jānakīpariṇaya and the Bhaiṣmīpariṇaya.

Contains the Paricchēdas one to five complete.

End:

शास्त्रं सुनिश्चितधियामपि चिन्तनीय-
माराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्कं गतापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशत्वम् ॥

Colophon:

देवुलपल्लि वेङ्कटप्पशास्त्रि[कृते] चित्ररत्नाकरं(रः) समाप्त(प्तः) ॥

(*b*) अलङ्कारशिरोभूषणम्.

ALAṄKĀRAŚIRŌBHŪṢAṆAM.

Foll. 27*a*—42*a*. Fol. 42*b* is left blank.

Same work as that described under R. No. 168 ante. By Kandālayārya, son of Rāmānujārya and grandson of Kēśavārya of Rāyaṭūri family and Kauśikagōtra.

Contains the third Ullāsa complete, but wants the beginning.

R. No. **3760.**

Paper. 10⅝ × 9⅝ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇattamburān, Āḻvāñjēri-mana, Tellicherry, Malabar district.

यजुःप्रातिशाख्यव्याख्या—छन्दोभाषा.

YAJUḤPRĀTIŚĀKHYĀVYAKHYĀ: CHANDŌBHĀṢĀ.

A commentary on the Prātiśākhya relating to the Yajurvēda, which work has been described under No. 928 of the D.C.S. MSS., Vol. II: by Māhiṣēyaka.

Complete.

Beginning:

अथ वर्णसमाम्नायः । अथशब्दश्शास्त्रादौ मङ्गल्य इत्युपदिश्यते । सोऽयं मङ्गलार्थः पु . . . . ते । यथा नः स्वस्ति च स्यात् साधु-चाध्ययनम् । संवृत्ते त्वाचार्यशिष्ययोरिति । वर्णानां समाम्नायो वर्णसमाम्नायः समित्येकीभावेन आङ् मर्यादायामाम्नाय इत्यानुपूर्व्येणाकारादयो यम-पर्यवसानाः पूर्वाचार्यैरुपदिष्टा वर्णाः । यथा—अ आ इ ई उ ऊ ऋ ॠ ऌ [ॡ] ए ऐ ओ औ क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह अं अः कं खं गं घम् ।

*   *   *   *

Colophon:

इति छन्दोभाषाख्यायां प्रातिशाख्यव्याख्यायां प्रथमोऽध्यायः ॥

End :

एवंविधस्स खलु आचार्यसमीपं गच्छति । आचार्याः पुनर्व्यास-प्रभृतयः । तेषां च ब्रह्मलोके स्थानम् । यश्चेदं शास्त्रमधी[य]ते । स आचार्यभूत(:) तेषां सदनं पूतो मेध्यो ब्रह्मणस्सायुज्यं सालोक्यं च गच्छति। पदक्रमसदनम् ॥

Colophon :

इति छन्दोभाषाख्यायां प्रातिशाख्यव्याख्यायां द्वितीयप्रश्ने द्वादशोऽध्यायः ॥

इति माहिषेयकस्य छन्दोभाषायां भाष्यतश्चतुर्विंशोऽध्यायः ॥

(यजुः) प्रातिशाख्यं समाप्तम् ॥

R. No. **3761.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Kaṇṇūr-mana, Malabar district.

Fol. 19*b* gives the name of the owner of the original MS. Fol. 20 is left blank.

रसार्णवालङ्कारः.

RASĀRṆAVĀLAṄKĀRAḤ.

A work on poetics and rhetoric: by Prakāśavarṣa who is mentioned by his disciple Vallabha in his commentary on the Śiśupālavadha and quoted by Mallinātha in his commentary on the Kirātārjunīya.

Contains the undermentioned five Paricchēdas, the first of which wants the beginning :—

१. दोषप्रमोषनिरूपणम्.
२. गुणदोषोपादाननिरूपणम्.
३. शब्दालङ्कारप्रकाशनम्.
४. अर्थालङ्कारनिरूपणम्.
५. शृङ्गारव्यक्तिनिरूपणम्.

Beginning :

. . . . . पदे वाक्ये अथ वाक्यार्थे दोषवर्गः . . . . पूर्व-भङ्ग्या तु तत्प्रपञ्चः—

(यदासाध्वनि)बद्धं च कष्टं क्लिष्टमनर्थकम् ।
अपुष्टार्थं च गूढार्थमप्रतीतं ससंशयम् ॥
नेयार्थमसमर्थं च यच्च तत्राप्रयोजकम् ।

* * * *

श्लेषादिगुणहीनं च वाक्यदोषाश्चतुर्दश ।
भिन्नभाषापदाविद्धं शब्दहानं (प्र)कीर्तितम् ॥

* * * *

कामशास्त्रकलाशास्त्रविरुद्धं यन्निबध्यते ।
कामशास्त्रविरोधीति तत्सर्वमभिधीयते ॥

Colophon:

इति रसार्णवालङ्कारे दोषप्रमोषो नाम प्रथमः परिच्छेदः ॥

* * * *

मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येऽप्यवहितधिया त . . भिधानम् ॥

Colophon:

इति श्रीप्रकाशवर्षकृतौ रसार्णवालङ्कारे शब्दालङ्कारप्रकाशनं नाम तृतीयः परिच्छेदः ॥

End:

. . . बन्धातिशयसम्पर्कानुगमानिति ।
युञ्जीत सर्वभावेषु वर्गयोरुभयोरपि ॥

यदपि च गदितं प्रहर्ष . . . तिरसो रतिविस्मयादिरेव ।
तदिदमिति निराकृतं प्रकृष्टाः प्रकृतिजभेदममी(या)हि सर्व एव ॥

Colophon:

इति प्रकाशवर्षकृता रसार्णवालङ्कारे शृङ्गारव्यक्तिः पञ्चमः परिच्छेद-स्समाप्तः ॥

R. No. 3762.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Gōḍavarmarājā of Cranganore, Cochin State.

Fol. 53*b* contains the name of the owner of the original MS. Fol. 54 is left blank.

देवीमाहात्म्यदीपिका.

DĒVĪMAHĀTMYADĪPIKĀ.

A treatise on the greatness of Dēvī who is the same as Durgā or Śakti. The author, whose name is not given, was a disciple of Mādhavapurī.

Complete in 13 Adhyāyas.

Beginning :

गुणरुपात्तदेहां तां विदेहां परमेश्वरीम् ।
नतः स्म परया भक्त्या दैत्यदानवमर्दिनीम् ॥
रदेन दारिता येन भजतां विघ्नमूर्तयः ।
भवतातमहं वन्दे ईशानं जगतां परम् ॥
अनुगृह्णातु सा देवी देवीमाहात्म्यवेदने ।
तस्या अनुग्रहो नाम कस्मिन् कुर्यान्न वेदनम् ॥
व्यासाचार्यं महीयांसं परं गुरुमुपास्महे ।
वेदाब्जभास्करं यं वै प्राहुर्वेदविदो जनाः ॥
श्रीमाधवपुरीसंज्ञं श्रीमाधवपरायणम् ।
गुरुं तं परया भक्त्या नमस्कुरुत नित्यशः ॥
दयालुत्वादहं वच्मि देवीमाहात्म्यदीपिकाम् ।
गुरवस्तत्प्रसादाय भूयासुः परया मुदा ॥

इष्टं हि विदुषां लोके समासव्यासधारणमिति न्यायमाश्रित्य सूर्यतनयस्य महाभागस्य सावर्णेर्मनोस्सङ्क्षेपत उत्पत्तिः कथिता । इदानीं तस्यैव प्राक्तनजन्मारभ्योत्पत्तिं विस्तरेण शुश्रूषवे क्रोष्टुकिमहामुनये तां कथां तस्य वक्ष्यमाणार्थैर्मनस्समाधानं नियुञ्जा(नः) श्रीमार्कण्डेयो विस्तरतः तत्कथां प्रतिजानीते—सावर्णिस्सूर्यतनय इति । हे महाभाग क्रोष्टुके! सूर्यस्य पितुस्सवर्णायास्तद्भार्याया मातुस्ते(स्त)नय दौ(औ)रसः पुत्रो योऽष्टमो मनुः पूर्वस्मिन् ग्रन्थे कथ्यते ।

* * * *

Colophon :

इति श्रीदेवीमाहात्म्यदीपिकायां प्रथमोऽध्यायः ॥

End :

निरमायि मया येयं देवीमाहात्म्यदीपिका ।
देव्यास्तस्या हि विज्ञप्त्यै सा भूयात्तिमिरापहा ॥
विष्णुमायां परां देवीं विष्णुनेत्रकृतास्पदाम् ।
नमामि परया भक्त्या मम रोगप्रशान्तये ॥

Colophon :

इति श्रीदेवीमाहात्म्यदीपिकायां त्रयोदशोऽध्यायः ॥

R. No. **3763.**

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. N. Subrahmaṇya-Śāstri, Head Pandit, Sanskrit school, Tirukkurungudi, Tinnevelly district.

(*a*) अनुभवविलासः.
ANUBHAVAVILĀSAḤ.

Foll. 1*a*—16*a*.

A short treatise in Advaita-Vēdānta in which the author describes his own experiences in connexion with realization of the Supreme Brahman: by Hariharaparamahaṁsa, disciple of Śivarāma, who was the disciple of Viśvēśvarāśrama.

Complete.

Beginning :

त्रिधामसुन्दरानन्दचिन्मयी स्वात्मदेवता ।
जगच्चित्रमहादर्शमयी विजयते सदा ।।

विश्वेश्वराश्रममहागुरुपादपद्मभृङ्गायितस्य शिवरामगुरोः पदाब्जे ।
मूर्ध्नाकलय्य परमाद्वयशासनस्य सारं गुरोरधिगतं खलु संलिखामि ॥

हरिहराख्ययतिर्निजहृत्स्थितं श्रुतिशिरोऽर्थसुयुक्तिभिरन्वितम् ।
अनुभवस्य विलासममुं मुदा कलयतीह गुरोरभितुष्टये ॥

दयया कश्चिदाचार्यो दृष्ट्वा दीनं स्वसेवकम् ।
प्राह बोधयितुं युक्तिश्रुतिसंश्रितवर्त्मना ॥

संज्ञातिमृत्युपरिवर्तसुभीमवेग-
संसारसिन्धुपतितस्य विना नृदेहम् ।
नास्त्येव दुःखविलयोऽथ तदाप्य तत्र
यो नोद्यतस्स हि निजात्मरिपुः प्रसिद्धः ॥

End:

तस्माद्गुरुं समुपगत्य निजात्मतत्त्व-
मद्वैतवस्तु गुरुदर्शितवेदमार्गात् ।
निश्चित्य सम्यगखिलं परिहृत्य बुद्ध्या
निश्श्रेयसं समधिगच्छ निजात्मभूतम् ॥
श्रुत्वेत्थं गुरुवचनं शिष्यः श्रुतिवाक्यतो विनिश्चित्य ।
अद्वैतात्मसतत्त्वं ब्रह्मैवाभूदखण्डसुखसान्द्रम् ॥
अनुभवविलास एष प्रोन्मिषितो हरिहराख्ययतिना यः ।
प्रीणातु तेन वि(ष्णु)र्गुरुरूपो हृदि समाहितस्सततम् ॥
स्वातन्त्र्यं सकलेऽपि च येष तन्त्रे परात्मविद्यायाम् ।
शङ्करतुल्या ये तान्नमामि विश्वेश्वराख्यपरमगुरून् ॥
संश्रितपारमहंस्यान् शिवरामाश्रमगुरूंश्च शिवरूपान् ।
यत्कृपयाहं भीमं संसाराम्भोधिमुत्तीर्णः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकपदवाक्यप्रमाणज्ञश्रीविश्वेश्वराश्रमशिष्य-श्रीशिवरामाश्रमचरणकमलानुवर्तिना हरिहराश्रमपरमहंसेन कृतमनुभवविलासाख्यं प्रकरणं समाप्तम् ॥

(*b*) सुन्दरेश्वरगुरुस्तोत्रम्.

SUNDARĒŚVARAGURUSTŌTRAM.

Foll. 16*a*—17*b*. Fol. 18 is left blank.

Eulogistic stanzas addressed to his Guru Sundarēśa, by Hariharāśrama.

Complete.

Beginning:

श्रीसुन्दरेश्वरगुरोश्चरणाम्बुजे द्वे मत्पापसन्ततिनिकृन्तनमुख्यबीजे ।
आत्मैकबोधकरणे पटुतासमेते ध्यायामि चातक इवाभ्रजबिन्दुहोहम् ॥ (?)

श्रीसुन्दरेश्वरगुरून् करुणार्द्रदृष्टीन् भक्तेषु सन्ततमहो कलिदोषहीनान् ।
साम्बासमाध्युदधिमग्नमनोयुतान् वै ध्यायाम्यहं हरिहरो निजबोधहेतोः ॥
यत्कृपावशतोऽलब्ध क्षीराम्बुधिसमां शिवे ।
भक्तिं ज्ञानप्रदां तस्मै सुन्दरेशाय वै नमः ॥

End :

योगे पतञ्जलिसमः कपिलश्च साङ्ख्ये
तर्केऽक्षपाद इह जैमिनिरध्वरीये ।
श्रीशङ्करः श्रुतिशिरोऽर्थविकासने यः
तं भावये गुरुमहं हि परात्पराख्यम् ॥
इमां स्तुतिं हरिहरोऽकरोत्सद्गुरुतुष्टये ।
जेनश्चोपहसे व्रतदर्थनाकरोद्यतः (?) ॥

R. No. 3764.

Paper. $10\frac{5}{8} \times 9\frac{3}{4}$ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Kaṇṇūr-mana, Ottapalam, Malabar district.

(*a*) तैत्तिरीयार्थकारिका.
TAITTIRĪYĀRTHAKĀRIKĀ.

Foll. 1*a*—23*b*. Fol. 24 is left blank.

A treatise in verse giving the contents of the Kṛṣṇayajurvēda and the appropriate occasions on which the Mantras therein have to be recited.

The work was written in accordance with the interpretations of Mādhavācārya.

Breaks off in the second Praśna of the first Kāṇḍa in the Taittirīya-saṁhitā.

Beginning :

प्रणम्य माधवाचार्यं तन्मतेनाथ वक्ष्यते ।
सङ्गृह्य तैत्तिरीयार्थो बालानां हितकाम्यया ॥
काण्डसप्तकसंयुक्ता संहितात्र यजुश्श्रुतौ ।
चतुर्भिरष्टकैर्युक्तो ब्राह्मणग्रन्थ उच्यते ॥

तन्नामधेयं शाखेति प्राहुरत्र विपश्चितः ।
अध्वर्योः कर्ममन्त्राश्च प्रोच्यन्तेऽत्र यजुश्श्रुतौ ॥

* * * *

नासुत्वनः पञ्च मन्त्रा बोधायनमते त्विह ।
एषां व्याख्या तृतीयस्यामद्भिः स्यादनुवाकक: ॥

इति प्रथमो घट्टः ।

End :

याज्या यद्वो वयमिति प्राह बोधायनो मुनिः ।
चतुर्दशेऽनुवाकेऽस्मिन्मन्त्रा इति चतुर्दश ॥

Colophon :

इति यजुस्संहितायां प्रथमकाण्डे प्रथमः प्रश्नः ॥

आद्ये प्रपाठके दर्शपूर्णमासेष्टिरीरिता ।
प्रपाठकत्रये चाथ सोमयागः प्रवक्ष्यते ॥
अत्र कृत्स्नं षष्ठकाष्ठं(ण्डं) ब्राह्मणं परिकीर्तितम् ।
सोमाङ्गे दीक्षणीयादौ दर्शमन्त्रातिदेशनात् ॥

* * * *

आद्येऽनुवाके प्राग्वंशप्रवेशः परिकीर्तितः ।
द्वितीये देहशुद्ध्यर्थं दीक्षा चैवाभिधीयते ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūrkoṭṭa-mana, Perumbavur post, Travancore State.

(*b*) भाणः.

BHĀṆAḤ.

Foll. 25*a*—40*a*. Fol. 40*b* is left blank.
Similar to the work described under R. No. 3693 ante.
Complete.

Beginning :

नान्द्यन्ते ततः प्रविशति सूत्रधारः—

विद्यया ख्यापिता ख्यातिः सज्जनाराधनं धनम् ।
तेषां प्रीत्या भवेद्धर्मः इत्यस्माकमुपक्रमः ॥

तस्मादार्यजनमनःप्रीत्यर्थं किंचिन्नाटकमारभामहे । आर्ये! सधनजन-प्रीतिवर्धनकरायामधनानां यौवनोत्पीडितमन्दभाग्यानां चिन्तापरायणानां शोक-वर्धनकरायां कुवलयकुमुदकल्हारकमलनिचुलकेतकिककुभकन्दलीषण्डमाण्डि-तायामस्यां प्रावृषि हृदयप्रीतिजननं किंचिद्गीतं गीयताम् । अयं खलु तावत्कालः—

जलधरनीलालेपस्तटित्समालभन(म्भ)विज्वलद्गात्रः ।
विकसितकुटजनिवसनो विटो यथा भाति घनसमयः ॥

(निष्क्रान्तः) स्थापना ।

ततः प्रविशति विटः । विटः—साध्वभिहितमेतत् ।

End:

किं ब्रवीषि न शक्यमद्य त्वयार्धपादमपीतो गन्तुमिति? भो गन्तव्यमेव मे भार्या कलेबरमन्यथा ग्रहीष्यति । किमाह भवती अहं त्वामनुनेष्यामीति । राजवद्बुद्यादप्रतिगृहीतानुनय इव दुर्जनो न शक्योऽनुनेतुमितीदं गम्यते । पादयोर्विलग्ना सह विह्वलकेन । हन्त पङ्कूकृताः स्मः । सुनन्दे

न त्वयाह(नाहं त्वा)मतिवर्तिष्ये वेलामिव महोदधिः ।
इमामपि महीं पातु राजा सागरमेखलाम् ॥

निष्क्रान्तो विटः ॥

R. No. **3765.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 80. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Foll. 79*b* and 80 are left blank.

प्रपञ्चसारार्थदीपः.

PRAPAÑCASĀRĀRTHADĪPAḤ.

Same work as that described under R. No. 3541 ante, wherein see for the beginning. By Nārāyaṇa, pupil of Ānandaśaila.

Name of the scribe—Śaṅkara.

Contains the Paṭalas 21—32 only.

End:

परिच्छेदत्रयाधिकरणाय शैववैष्णवादिमन्त्रविग्रहाय मुनिजनमानसमोदनाय संविदानन्दमयाय पराय नमस्तस्मै परिपूर्णतेजसे ।

Colophon:

आनन्दशैलचरणाम्बुजषट्पदेन नारायणेन रचिते रुचिरेऽर्थदीपे ।
गीर्वाणशाखिनि समस्तसमीहितानां द्वात्रिंश एष पटलो गहनस्समाप्तः ॥

उदियाय यतस्समस्तमेतद्विलयं यत्र सदा प्रयाति विश्वम् ।
महते महसे महामहिम्ने प्रणवाख्यं भजते नमोऽस्तु तस्मै ॥

*　　*　　*　　*

एषा मेऽन्यानपेक्षा कृतिरिह गदितैर्मन्त्रभेदैर्विधानैः
रूढैः कर्मप्रयोगैस्सकलमुनिमनोनन्दनैरर्थपा(वा)दैः ।
युक्ता सन्मार्गगण्या श्रुतिरिव भणतामिष्टदा नु(सु)प्रसन्ना
गम्भीरा सज्जनानामलममलतरे मानसे सन्निधत्ताम् ॥

सुवर्णपदविन्यासा मन्त्रिणां हर्षवर्धनी ।
सालका(ङ्का)रा कृतिर्मेस्तु कामिनीव सुदेवसा(ता) ॥ ?

The scribe adds—

श्रीशङ्करलिखितं पुस्तकम् ॥

R. No. 3766.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 224. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Foll. 223 and 224 are left blank.

रघुवंशविवरणम्—दर्पणम्.
RAGHUVAMŚAVIVARAṆAM : DARPAṆAM.

A commentary on Kālidāsa's Raghuvaṁśa, which work has been described under R. No. 540(*d*) : by Makkhibhaṭṭa alias Hēmādri, son of Īśvara.

Almost complete.

Beginning:

देवौ विष्णुविरिञ्चिवञ्चितपदद्वन्द्वानि विश्वेश्वरौ
नित्यानन्दघनौ समस्तजगतामानन्ददौ दम्पती ।
शब्दार्थात्मतया विवर्तिततनू सृष्ट्यादिकृत्यान्वितौ
वेदान्तप्रतिपादितौ हृदि सदा तौ सन्निधत्तां मम ॥

तीर्णो वेदमहार्णवः तिलकितं वेदान्तिनां दर्शनं
पीतं व्याकरणामृतं विघटितं तज्जैमिनीयं मतम् ।
क्षुण्णो न्यायमहाचलोऽपि मृदितो बाह्यागमस्सादरं
येनासौ भुवने चकास्ति यतिराट् श्रीव्यासगिर्याह्वयः ॥

वेदव्याकरणाश्रयः सुकविता वेदान्तकर्मस्मृतिः
छन्दोऽलङ्कृतिकाव्यनाटकपुराणाम्नायवारां निधिः ।
ज्योतिश्शास्त्रसुमन्त्रनीतिनिपुणो योगागमे निष्ठितो
मक्खयाख्यो विवृणोति भट्ट ऋतपाः ग्रन्थाख्यपाशं कृतम् ॥

श्रीमान् रघुवंशाख्यं काव्यं चिकीर्षुः कविचक्रवर्ती कालिदासः काव्यानामादौ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्येषामवश्यकर्तव्यत्वं मन्यमानः काव्यस्याविघ्नेन परिसमाप्त्यर्थं शिष्यप्रशिष्यद्वारा प्रसरणार्थं च विशिष्टेष्टदेवतानमस्काररूपं मङ्गलमाचरत्याद्येन वागर्थावित्यादिश्लोकेन ।

वागर्थाविव सम्पृक्तौ (. . .) पार्वतीपरमेश्वरौ ॥

अहं वागर्थप्रतिपत्तये पार्वतीपरमेश्वरौ वन्दे ।

* * * *

Colophon:

इति मक्खिभट्टविरचिते रघुवंशविवरणे प्रथमस्सर्गः ॥

* * * *

Colophon:

इति श्रीमदीश्वरसूनुहेमाद्रिविरचिते रघुवंशदर्पणे स्वयंवराभिगमनं नाम पञ्चमः सर्गः ॥

End:

दूतिसन्दर्शिताभ्यः प्रतिकृतिरचनाभ्यः समधिकतरं रूपं यासां ताः ॥

Colophon :

इति रघुवंशदर्पणे अष्टादशस्सर्गः ॥

अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसम् ।
शिश्रिये श्रुतवतामपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥

अग्निवर्णमिति । श्रुतवतां विदुषामपश्चिमोऽग्र्यः वशी(स्वे) रघोर्गोत्रापत्यं राघवः एको गोत्रे इत्यण्, सुदर्शनः । अग्नितेजसमग्नि[स]वर्णं सूनुं स्वस्मिन् आत्मीये पदे राज्ये अभिषिच्य पश्चिमे वयसि नैमिषं नैमिशारण्यं शिश्रिये ।

*   *   *   *

पाण्डु वदनं यस्यास्सा । मृदुः स्तनो यस्यास्सा . . . . नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता इति काव्यप्रकाशे । व्योमेति । राज्ञि अग्निवर्णे.

R. No. **3767.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 56. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śrīnivāsa Ayyaṅgār, Lakṣamarattōppu, Alwartirunagari, Tinnevelly district.

Foll. 55 and 56 are left blank.

बृहद्ब्रह्मसंहिता.
BṚHADBRAHMASAṀHITĀ.

Same work as that described under R. No. 1019 ante, wherein see for the beginning.

Deals with the following subjects :—

१. सम्प्रदायप्रवृत्तिकथनम्.
२. सुदर्शनगीताकथनम्.
३. श्रीवत्सचरितकथनम्.
४. श्रीवत्सचरितरहस्योपदेशकथनम्.
५. तापसंस्कारकथनम्.
६. अष्टाक्षरमाहात्म्यकथनम्.
७. श्रीवत्सचरितधर्मकथनम्.
८. महालक्ष्मीसमाराधनकथनम्.
९. महालक्ष्मीव्रतकथनम्.
१०. सृष्टिक्रमकथनम्.
११. भगवत्स्वरूपकथनम्.

Breaks off in the 11th Adhyāya (ending with निष्क्रिये गमनं कुत्र धारणं निर्विकल्पने । श्रीभगवानुवाच—)

End :

एवमेष महालीलो भगवान् भूतभावनः ।
वक्तुं द्रष्टुं च विज्ञातुं न शक्तः कोटिजन्मभिः ॥
मुनयो बीजभूतं हि स्वरूपं कारणात्मज(क)म् ।
कार्यभूतं च वक्ष्यामि यदि वो मानसी रुचिः ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि ब्रह्मनारदसंवादे बृहद्ब्रह्मसंहितायां द्वितीयपादे देवीब्रह्मसंवादे सृष्टिक्रमं नाम प्रथ(दश)मोऽध्यायः ॥

श्रीभगवानुवाच—

आनन्दलक्षणं ब्रह्मन्मरस्वरूपमविक्रियम् ।
केशादिभिरसंस्पृष्टं निष्क्रियं निर्विकल्पकम् ।।
अद्यब्द(त्यन्त)मनवच्छिन्नं(?) स्वसंवेद्यं निरञ्जनम् ।
सुसूक्ष्मं स्ववशं स्वैरं स्वयञ्ज्योतिरनादिमत् ॥
ध्रुवमेकसदानन्दस्वरूपं सर्वगं धरम् ।
गतागतविनिर्मुक्तं वासुदेवाह्वयं प्रभुम् ॥
श्रुत्वैवं संशयमना भूय(:) संप्रन(पृष्ट)वानजम् ।

ब्रह्मोवाच—

सर्वगं धारकं चेति निष्क्रियं निर्विकल्पकम् ॥
कथं स्याद्भवतो रूपं विरुद्धं प्रतिभाति मे ।
निष्क्रिये गमनं कुत्र धारणं निर्विकल्पने ॥

श्रीभगवानुवाच.

R. No. **3768.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 108. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1921–22 from a MS. of Śrīmān Vāsudēvatarkālaṅkāra Mahāpātro, Rājēndrapuraśāsanam, Dharakota, Ganjam district. Foll. 107*b* and 108 are left blank.

मुद्राराक्षसटीका.

MUDRĀRĀKṢASAṬĪKĀ.

A commentary on Viśākhadatta's Mudrārākṣasa, which work has been described under No. 12616 of the D.C.S. MSS., Vol. XXI: by Jagaddhara, son of Damayantikā and Ratnadhara. The commentator's other works are Vaidyasarvasva, Vasantōtsavakāvya, Saṅgītasarvasva and Caṇḍikāṭippaṇī.

Complete.

Beginning:

शुद्धा नान्दी त्रिवेदीवटुरविचपलं स्वान्तमिच्छा नटी सा
नेपथ्यं च त्रिलोकी जयति यवनिका यस्य माया विचित्रा ।
सङ्गीतं विश्वसङ्गो निखिलविषयको यत्न एवात्र सूत्रो
विश्वाङ्गैकाभिनेता स्मरतु स सततं मामुपेन्द्रो नरेन्द्रः ॥
विरोधिसङ्गेन न कापि हानिर्जितेन्द्रियस्येति विभावनाय ।
योगं च भोगं च दधार योऽयं शिवश्शिवं सन्ततमातनोतु ॥

टीकां निरीक्ष्य भरतं महनीयतन्त्रं
छन्दांसि कोशमपि नीतिनिबन्धसिन्धून् ।
तत्पाणिनीयचरितादि विचिन्त्य सम्यक्
श्रीमान् जगद्धरकृती वितनोति टीकाम् ॥

नाटकानुगतभावभावनानीतिरीतिकथनादिचातुरी ।
दृश्यतेऽत्र यदि तन्महाजना आद्रियध्वमिदमेव टिप्पणम् ॥

इह खलु सोमवंशे नन्दो नाम राजा बभूव । तस्य च महामन्त्री शकटारो बभूव । अथ देशान्तरादर्थार्थिनौ द्वौ परपुरप्रवेशकुशलौ ब्राह्मणौ तन्नगरीमागतौ ।

* * * *

अपरस्तु मन्त्रिराक्षसेन मलयकेतुः पर्वतेश्वरपुत्रो राज्ये मयाभिषेक्तव्य इति प्रतिज्ञाय तदुचितं विधातुमारब्धमिति कथाकथनं वस्तुनिर्देशत्वेन कटाक्षयन्नष्टपदां नान्दीं विदधान एव कविर्निष्प्रत्यूहं समीहितसिद्धिमनुरुध्य ग्रन्थादौ मङ्गलमाह – धन्येत्यादि । विभोश्शाठ्यं वोऽव्यात् । भगवतो भवानीपतेः कपटं वो युष्मान् रक्षत्वित्यर्थः । इति सभ्यान् प्रति कवेराशीर्वचनम् । इह विभुत्वेन जगदीशत्वमुक्तम् ।

*   *   *   *

तदिह रिपुरेवङ्गुणविशिष्टो न रक्षणीयः । यदाह—

क्रूरस्स्तब्धश्च विक्रान्तो दाताहंयुर्युवा विटः ।
अकृतज्ञो रिपुर्यस्स्यात्तं हन्यादविचारितम् ॥ इति ।

अङ्कशेषे सर्वेषां निष्क्रामः कर्तव्यः । यदाह भरतः—तेषामन्ते च निर्गम इति ।

रत्नं रत्नधरोऽजनिष्ट गुणिनामाद्योऽनवद्यस्सतां
सा शुद्धा दमयन्तिकापि सुषुवे नैयायिकं यं सुतम् ।
तस्य श्रीशजगद्धरस्य कवितुष्टीकाकृतो नाटके
टीकायामयमङ्क आदिमतया ख्यातो गतो नीतिमान् ॥

Colophon:

इति श्रीमज्जगद्धरविरचितायां मुद्राराक्षसटीकायां प्रथमोऽङ्कस्समाप्तः ॥

End:

सूकरस्य मुखाग्रे तु पोत्रं वस्त्रेऽपि कीर्तितम्—इति मेदिनीकारः । भूतधात्री धरा रसेति नामलिङ्गः । विपुलं पीवरं पीनमित्यमरः । स कीदृशः श्रीमन्त उत्कर्षवन्तो वा बन्धवो भृत्याश्च यस्य सः । तथा च सर्वलक्षणपूर्णराज्यराजत्वमुक्तमिति ॥

अस्मिन्नाटकसागरे नयगुणग्राहग्रहैर्दुर्ग्रहे
तत्तद्धीरगतादिभिर्विरहिते दुष्टीकयोष्टीकते ।
मट्टीकामतिविस्तृतामभिनवां सारां दृढां सद्गुणा-
मासाद्य स्थिरबुद्धयोऽर्थमधिकं तीर्त्वा लभन्तां मुदम् ॥
यदि भवति मदीये टिप्पणेऽत्र प्रमादः
क्वचिदपि स महिम्ना शोधनीयो महद्भिः ।
स्खलति गमनकर्ता प्रायशो नात्र चित्रं
भवति च गुरुहस्तालम्बतोऽपि प्रकारः ॥
रत्नं रत्नधरोऽजनिष्ट गुणिनामाद्योऽनवद्यस्सतां
सा शुद्धा दमयन्तिकापि सुषुवे नैयायिकं यं सुतम् ।
तस्य श्रीशजगद्धरस्य कवितुश्श्रीचण्डिकाटिप्पणी-
कर्तुष्टिप्पणके समाप्तिमितवानङ्कोऽप्ययं सप्तमः ॥

Colophon :

समाप्तेयं मुद्राराक्षसटीका ॥

R. No. 3769.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 124. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Vidvān Vānamāmalai-Ayyaṅgār, Nanguneri, Tinnevelly district.

Fol. 124*b* is left blank.

तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

Similar to the work described under No. 5254 of the D.C.S. MSS., Vol. XI. By Varadācārya of Vādhūlagōtra. This work is also called Paratattvavivēka.

Wants the beginning ; otherwise complete.

Beginning :

भेदेन हिरण्यगर्भजनकत्वोपपत्तेः । नारायणस्य शिवचिच्छक्तिरूपपार्व-त्यंशतया तयोः जगत्पितृत्वेन च मा . . . . या हिरण्य-गर्भजनकत्वोपपत्तेश्च । किं च—यस्मात्परं नापरमस्ति किञ्चित् यस्मान्ना-णीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः ।

* * * *

तस्माच्छिव एव सकलवेदान्तप्रतिपाद्यः परमकारणं चेति स एव मुमुक्षुभि-रुपासनीयः प्रापणीयश्चेति सिद्धम् ॥

Colophon :

अथर्वशिरःकैवल्योपनिषदादीनां शिवपरत्वोपपादनाधिकारः षष्ठः ॥

End :

तथा च—

निस्साधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे

सद्ब्रह्माद्यास्समानप्रकरणपठिताश्शङ्कितान्यार्थशब्दाः ॥

इति वेदान्ताचार्योक्तौ न कश्चिद्दोष इति स्थितम् ॥

Colophon :

इति श्रीमद्वाधूलवरदाचार्यस्य कृतौ परतत्त्वविवेके अथर्वशिखादीनां भगवत्परत्वोपपादनाधिकारश्चतुर्दशः ॥

किं चाथर्वशिरसि रुद्रान्तर्यामिनारायण एव प्रतिपाद्यते ।

* * * *

सात्त्विकस्मृतिपुराणोक्तं भगवत्पारम्यमेव वैदिकैरङ्गीकर्तव्यमिति सर्वं समञ्जसम् ॥

Colophon:

इति श्रीवाधूलकुलवरदाचार्यस्य कृतौ तत्त्वविवेके अथर्वशिरश्श्वेताश्वतरोपनिषदादीनां नारायणपरत्वसमर्थनाधिकारः पञ्चदशस्समाप्तः ॥

तत्त्वविवेकस्समाप्तः ॥

R. No. 3770.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. C. Vāsudēva-Sōmayājippāḍ, Chirumukku-mana, Vilayur post, via Pattambi, Malabar district.

Fol. 55*b* is left blank. Fol. 88*b* gives the name of the owner of the original MS.

बृहतीव्याख्या—ऋजुविमला.

BṚHATĪVYĀKHYĀ: ṚJUVIMALĀ.

Same work as that described under R. Nos. 2682, 3293 and 3580 ante. By Śālikanātha.

Contains the Adhyāyas four and five complete.

R. No. 3771.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. C. Vāsudēva Sōmayājippāḍ, Chirumukku-mana, Vilayur post, via Pattambi, Malabar district.

Fol. 38 is left blank.

जैमिनिगृह्यमन्त्रवृत्तिः.

JAIMINIGṚHYAMANTRAVṚTTIḤ.

A commentary on the Jaiminigṛhyamantras which deal with the rites to be conducted as laid down by Jaimini in connexion with the maintaining of the sacred fire in houses.

Incomplete.

Beginning :

सकलभुवनैकनाथं श्रीकृष्णं नौमि हरिमुमां च शिवाम् ।
गुरुमपि सुब्रह्मण्यं गजाननं भारतीं भवत्रान्तं(तम्) ॥
प्रणिपत्य विष्णुमीड्य विदुषोऽपि कृपाम्बुधीन् समस्तगुरून् ।
गृह्यगतमन्त्रवृत्तिः करिष्यते जैमिनेस्तमपि न[मसि]त्वा ॥
अत्युक्तानि दुरुक्तानि यान्यनुक्तानि च स्फुटम् ।
समादधतु विद्वांसः तानि सर्वाणि बुद्धिभिः ॥

तत्र प्रथमं मन्त्रविनियोगो वक्तव्यः, तत आर्षकथनं, ततश्छन्दोनिर्देशाः, ततो देवताभिधानं विनियोगादिचतुष्टयज्ञाने दोषः स्मर्यते ।

* * * *

अतो मन्त्रविवरणमर्थवद्भवति । अत्राश्वलायनोक्तं चतुष्टयमृचां पुनः पाकयज्ञप्रशंसार्थं ज्ञेयम् ।

End :

प्रपद्ये त्वामेव शरणं सदाहं गच्छामीत्यर्थः । त्वया प्रसूत इदं कर्म करिष्यामि । त्वत्प्रसादैकशरणोऽहं त्वयानुज्ञातस्सन् इदमारब्धं कर्म दर्शपूर्णमासादिकं त्व(त)त् तस्मात् । हे विरूपाक्ष !

R. No. 3772.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śaṅkara Nambūdirippāḍ, Avanapparambu, Cochin State.

(*a*) प्रणवानुष्ठानक्रमः.

PRAṆAVĀNUṢṬHĀNAKRAMAḤ.

Foll. 1*a*—19*b*. Fol. 20*a* gives the contents of this work. Fol. 20*b* is left blank.

Deals with the following topics :—

१. प्राणाग्निहोत्रसङ्ग्रहः.
२. सकलीकरणन्याससङ्ग्रहः.
३. संहारयोगः
४. कारणसंहारयोगः.
५. अनुष्ठानक्रमः.

The author, whose name is not given, salutes Śaṅkara, Padmapāda and Vēdānanda.

Complete.

Beginning:

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

अत्र प्रणवानुष्ठानक्रमस्सङ्गृह्यते—याममात्रावशिष्टायां रजन्यामल्लाज्ञामृतो हुतसंवित्क इति श्रुतिः । तत्र प्रबोधसमये प्रबोधमन्त्रेण प्रणवेन वा निद्रासाक्षितया निद्रे ज्ञस्वरूपे स्वात्मन्यवस्थानं कर्तव्यमित्याह—ज्ञ इति । नित्यप्रबुद्धाय परमात्मने नम इति प्रसिद्धो मन्त्रः । अनेन प्रबुद्धस्सन् पुनरमृतमयमूर्तिमन्त्रेण प्रणवेनैव वा विद्यामयी परमात्मनो मूर्तिरात्मत्वेनानुसन्धातव्येत्याह—श्रुतिः अमृत इति । ओं विद्यादेहाय परमात्मने नम इति मूर्तिमन्त्रः ।

* * * *

Colophon:

इति प्राणाग्निहोत्रसङ्ग्रह(स्समाप्तः) ॥

End:

एवं प्रतिपाद्यानुज्ञाप्रणवेन परिपूर्णावद्योनकेन परिपूर्णवाक्यार्थमा . . पदार्थद्वयतदैक्यप्रतिपत्तिविकल्परहिते स्थितिं कृत्वा स्वात्मस्थो भवेत् ॥

Colophon:

इत्यनुष्ठानक्रमः ॥

स्वस्मिन् विलीनसकलस्स्वयमद्वितीयः
शङ्खारियोगविलसत्करपुण्डरीकः ।
पद्मासनो नरहरिस्सुसितप्रकाशः
चित्ते चकास्तु मम केवलतारस्रूपः ॥
आचार्यं शङ्करं पद्मभगवन्तं गुरुं तथा ।
वेदानन्दं तापनीयदीपिकेशं च तं नुमः ॥

अजपादिपदानामर्थं चाह वेदानन्दः परमात्मानं हंसस्सोहमर्थेन प्रणवेनात्मत्वेन प्रतिपाद्यानुज्ञाप्रणवेन चिदात्मके(न) चिदचिदात्मकेन वा सर्वदा स्वात्मस्थो भवेत् ॥

Colophon:

इत्यनुष्ठानक्रमः ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Harihararājaguru, Chochinajagannāthapuram, Kudala, Ganjam district.

(*b*) देवीचतुष्षष्ट्युपचारपूजास्तोत्रम्.

DĒVĪCATUṢṢAṢṬYUPACĀRAPŪJĀSTŌTRAM.

Foll. 21*a*—25*b*. Fol. 26 is left blank.

Seventy-two stanzas of praise and worship attributed to Śaṅkarācārya and addressed to Dēvī, i.e. Pārvatī.

Complete.

Beginning:

उषसि मागधमङ्गलगा(य)नैर्झटिति जागृहि जागृहि जागृहि ।
अतिकृपार्द्रकटाक्षनिरीक्षणैर्जगदिदं जगदम्ब सुखीकुरु ॥
कनकमयवितर्दिशोभमानं दिशि दिशि पूर्णसुवर्णकुम्भयुक्तम् ।
मणिमयमण्टपमध्यमेहि मातर्मयि कृपया हि समर्चनं ग्रहीतुम् ॥
कनककलशशोभमानशीर्षं जलधरचुम्बिसमुल्लसत्पताकम् ।
भगवति तव सन्निवासहेतोः मणिमयमन्दिरमेतदर्पयामि ॥

End:

पूजामिमां पठेत्प्राज्ञः पूजां कर्तुमनीश्वरः ।
पूजाफलमवाप्नोति वाञ्छितार्थं च विन्दति ॥
प्रत्यहं भक्तिसंयुक्तो यः पूजनमिदं पठेत् ।
वाग्वादिन्याः प्रसादेन वत्सरात् सत्कविर्भवेत् ॥

R. No. 3773.

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

मीमांसाभाष्यव्याख्या—ग्रन्थयोजना.

MĪMĀṀSABHĀṢYAVYĀKHYĀ: GRANTHAYŌJANĀ.

A commentary on the Mīmāṁsābhāṣya of Śabarasvāmin.

Contains the first Pāda of the first Adhyāya incomplete.

Beginning:

नमामि तां मणिस्थूणां नरकेसरिमातरम् ।
स्तन्यं यत्प्रसवस्यासन् दैत्येन्द्ररुधिरच्छटाः ॥

भाष्यस्य शाबरस्येयमाचार्योक्तेन वर्त्मना ।
सुधियां सुग्रहत्वाय क्रियते ग्रन्थयोजना ॥

अथातो धर्मजिज्ञासेत्याद्यमिदं शास्त्रस्य विषयीभूतधर्मप्रयोजनतादिप्रतिपादनद्वारेणारम्भणीयतां दर्शयितुं सूत्रम् । तत्राथशब्दं प्रसिद्धार्थासम्भवादाक्षिपन् सर्वत्र प्रसिद्धार्थग्रहणस्यैव तावत्कर्तव्यतामाह—लोक इति । लोके वृद्धव्यवहारे । तानीति । बलाद्यानीत्याकृष्यते । सति सम्भवे सति प्रसिद्धार्थसम्भवे प्रमाणाविरोध इति यावत् ।

* * * *

Colophon:

इति शाबरभाष्यव्याख्याने स्फोटवादस्समाप्तः ॥

End:

शब्दशब्देन च तत्प्रमाणककारणत्वं कर्म लक्षयति । प्रामाणिकत्वद्योतनाय तत्प्रतिपाद्यं कर्मेत्युक्तिमात्रमवधूतप्रामाण्यश्शब्द एव हि तत्र कारणमित्यर्थः ॥

Colophon:

इति शाबरभाष्यव्याख्याने चित्रादिपरिहारः ॥

एवं प्रत्यक्षाविसंवादपरिहारतया सूत्रं व्याख्याय तद्विरुद्धोदाहरणपरिहारतया व्याचक्षाणस्स्थितं तावदनुभाषते—यदि त्विति । परिहरति—उच्यत इति ।

* * * *

अथेति । विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थायैतैर्भूतैर्मुक्त इत्यर्थः । तान्येवानुविनश्यति । भूतेन्द्रियविनाशे सोऽपि [सोऽपि] प्रमाणगोचरस्सन्नष्ट इव भवति । तस्य भूतेभ्यो मुक्तस्य.

R. No. 3774.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 150. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 50*b* is left blank.

बालामयचिकित्सा.

BĀLĀMAYACIKITSĀ.

A treatise in medicine dealing with the treatment of diseases of children.

Wants the beginning and the end.

Beginning:

अयथोपचयोत्सा(त्सा)हश्चलस्फिगुदरस्ततः ।
अतिस्थूलस्स्मृतो योज्यं तत्रान्नं मारुतापहम् ॥
श्लेष्मा मेदो हतं यच्च कुलस्था यवका यवाः ।
जीर्णश्यामाकमुद्राद्याः पानेऽरिष्टं मधूदकम् ॥
मधुना त्रिफलां लिह्यात् गुडूचीमभयं घनम् ।
विलङ्गं नागरं क्षारं काललोहरजो मधु ॥

End:

मूत्रं पञ्चगुणं तस्मात् पञ्चगव्यक्रमो भवेत् ।
त्वचो दारुहरिद्रायाश्शङ्खनादीरताञ्जनम् ॥
लाक्षागोमयनिर्यासस्तैलं क्षौद्रं घृतं पयः ।
एभिस्सुपिष्टैर्द्रव्यांशैरुपदंशं प्रलेपयेत् ॥

R. No. 3775.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 60. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Rāmakṛṣṇarājaguru, Gaṅgapuraśāsanam, Dharakota post, Ganjam district.

प्रक्रियाकौमुदीव्याख्यानम्—नामनिर्मलदर्पणम्.

PRAKRIYĀKAUMUDĪVYĀKHYĀNAM : NĀMANIRMALADARPAṆAM.

Same work as that described under R. No. 3355 ante, wherein see for the beginning ; by Lakṣmīdharōdgātṛ.

Contains the Kṛdantaprakriyā complete.

End:

दिङ्मात्रमिदमुक्तमिति । इदमिति सुबन्ततिङन्तयोर्यदुक्तं तत्परामृश्यते । तत्रास्माभिर्दिङ्मात्रं दर्शितम् । अन्यया दिशा अन्येऽपि प्रयोगा ज्ञातव्या

इत्यभिप्रायः । अत्र चास्माभिरुपेक्षिते सूत्रव्याख्याने कियन्तो दर्शिताः । अन्येऽपि प्रयोगाद् ज्ञेयाः ॥

Colophon:

इति कृदन्तप्रक्रियाव्याख्या समाप्ता ॥

The scribe adds—

नीलकण्ठाभिधानेन कविराजेन धीमता ।
लिखितं पुस्तकमिदं पुत्रस्याध्ययनेच्छया ॥

R. No. **3776.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī and Malayalam Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Ganapati-Mussu, Nattanasserry, Quillon, Malabar district.

(*a*) रसकच्छपुटम्, केरलभाषाटीकासहितम्.

RASAKACCHAPUṬAM WITH MALAYALAM MEANING.

Foll. 1*a*—21*b*.

Same text as that described under No. 13192 of the D.C.S. MSS., Vol. XXIII. By Nāgēśa, son of Gaṅgirāja of Bhāradvājagōtra and Vaikhānasasūtra.

Contains the first Paricchēda incomplete.

(*b*) रसरत्नाकरः, केरलभाषाटीकासहितः.

RASARATNĀKARAḤ WITH MALAYALAM MEANING.

Foll. 22*a*—56*a*. Fol. 56*b* is left blank.

Same work as that described under R. Nos. 1040(*c*) and 1932(*c*) ante. By Nityanātha, son of Pārvatī.

The Rasāyanakhaṇḍa has been recently printed and published in Bombay.

Breaks off in the course of the seventh Upadēśa in the Rasāyanakhaṇḍa.

Beginning:

नानाजीवसमुद्भूते ब्रह्माण्डस्योदरे सदा ।
भवरोगहरौ वन्दे चण्डिकाचन्द्रशेखरौ ॥

रसोपरस्यलोहानां तैलमूलविषैस्सह ।
सुसाधं प्रत्ययोपेतः कथ्यते रसशासनम् ॥
वैद्यानां यशसेऽर्थाय व्याधितानां हिताय च ।
वादिनां कौतुकार्थाय वृद्धानां देहसिद्धये ॥
मन्त्रिणां मन्त्रसिद्ध्यर्थं विविधाश्चर्यकारणम् ।
पञ्चखण्डमिदं शास्त्रं साधकानां हितं प्रियम् ॥
रसखण्डे तु वैद्यानां व्याधितानां रसेन्द्रके ।
वादिनां वादखण्डे च वृद्धानां च रसायने ॥
मन्त्रिणां मन्त्रखण्डे च रससिद्धिः प्रजायते ।
सुतरां नात्र सन्देहस्तत्तत्खण्डं विलोकयेत् ॥

End:

पिबेत्क्षीरं सितां चानु रामाणां रमयेत् कुलम् ॥

Colophon:

इति श्रीपार्वतीपुत्रनित्यनाथविरचिते रसरत्नाकरे रसायनखण्डे वीर्यवर्धनं नाम षष्ठोपदेशः ॥

* * * *

तेनैव तिलकं कुर्यात् स्त्रीवश्यं लभते नरः ।
काकोलूकस्य पक्षं च आत्मकेशस्तै(थै)व च ॥
अन्तर्धूमं समुद्धृत्य सूक्ष्मचूर्णं च कारयेत् ।
अङ्कोलतैलैर्गुलिकां कृत्वा शिरसि धारयेत् ॥
अदृश्यो जायते सिद्धः स्वयं प्रोक्तः पिनाकिना ।

R. No. 3777.

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 132. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Ankurattu-Acyuta-Valiyamannadiyar, Nallapalli, Cochin State.

शिशुपालवधव्याख्यानम्.

ŚIŚUPĀLAVADHAVYĀKHYĀNAM.

Same work as that described under No. 11814 of the D.C.S. MSS., Vol. XX. By Śrīraṅgadēva.

Contains the Sargas one to nine complete.

R. No. **3778.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 130. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Payyūr-Paṭṭēri, Kunnankulam post, Cochin State.

Foll. 129*b* and 130 are left blank.

मीमांसाश्लोकवार्त्तिकव्याख्या—काशिका.
MĪMĀMSĀŚLŌKAVĀRTTIKAVYĀKHYĀ : KĀŚIKĀ.

Volume V. This forms a portion of the work described under R. Nos. 2818, 3056 and 3233 ante. By Sucaritamiśra.

Contains from the beginning of Citraparihāra to the end of Śabdādhikaraṇa portion only.

R. No. **3779.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 314. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Narayaṇa-Nambūdirippaḍ, Varikkaśśēri-mana, Vaniyamkulam post, Malabar district.

Bound in 2 volumes.

Fol. 190*a* contains the name of the owner of the original MS. Fol. 190*b* is left blank. Fol. 314*b* gives the names of the comparers.

कौषीतकिब्राह्मणव्याख्या—सदर्थविमर्शिनी.
KAUṢĪTAKĪBRĀHMAṆAVYĀKHYĀ : SADARTHAVIMARŚINĪ.

Same work as that described under R. No. 3650 ante, wherein see for the beginning.

Contains the Adhyāyas 7—30 but wants the end in the 30th Adhyāya.

End :

उत्पन्ना एव याज्याः क्रमेण होतृकाणां स्युरन्यद्गतम् ।
ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेश्श्रीनिधे-
राचार्यस्य बटद्रुमूलवसतेरीशस्य चानुग्रहात् ।

अध्यायो नवविंश आपदबाधिं कौषीतकीब्राह्मण-
व्याख्याने बदितैष होतृकविधेर्माध्यन्दिनस्थायिनम् ॥

Colophon :

इति कौषीतकीब्राह्मणव्याख्याने सदर्थविमर्शाख्याने एकोनविंशोऽध्यायः ॥

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान्पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
प्रपन्नकामार्पणकल्पवल्लीभवन्ति यस्मिन् विहिताः प्रणामाः ।
प्रणौमि तत् ब्रह्मखलास्पदायाः पदाब्जमस्मत्कुलदेवतायाः ॥
एवं तावदनन्तरातिगतवत्यध्याय ऊचे श्रुति-
हौत्राशंसिविधेयकर्म सकलं माध्यन्दिनीयं क्रमात् ।
त्रिंशेऽस्मिन्नथ यत्तृतीयसवने तेषामनुष्ठेयता-
मापन्नं प्रकृतौ यथैव विकृतौ तद्वक्तुमुज्जृम्भते ॥

त्रिष्टुभमादित्यस्य ग्रहस्य पुरोऽनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम् । आदित्येभ्योऽनुब्रूहीत्युक्तः प्रशास्तादित्यानामवसेति पुरोऽनुवाक्यां पठेत् ।

* * * *

आत्मा वै स्तोत्रियानुरूपौ प्राणा वालखिल्याः अनन्तर्हिता उहे आत्मनः प्राणा इति । अग्ने त्वं नो अन्तमः । अग्ने भवेत्येतौ स्तोत्रियानुरूपौ पठित्वा पूर्वोक्तेन प्रकारेणाभिप्रवस्सुराधसमित्याद्या वालखिल्या ऋचः पठेत्.

R. No. **3780.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Gōpālācāriyar, Mannarkoil, Ambasamudram post, Tinnevelly district.

Foll. 31 and 32 are left blank.

भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

A commentary on the Śrībhāgavata, which work has been described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I: by Sundararāja, son of Varadārya of Śrīvatsagōtra. This commentary is also called as Śukabhāvaprakāśikā and was written in accordance with the commentary called Śukapakṣīya, written by Sudarśanasūri alias Vēdavyāsa who was the son of Vāgvijayin.

Contains the Adhyāyas one to four complete and Adhyāya five incomplete in the tenth Skandha.

Beginning :

कथितो वंशविस्तारो भवता सोमसूर्ययोः ।
राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥

*　　*　　*　　*

गोपालकमहं नौमि भगवन्तं कृपाम्बुधिम् ।
यस्यानुग्रहतस्सर्वे प्राप्नुवन्तीह वाञ्छितम् ॥
श्रीमद्भागवतव्याख्या शुकभावप्रकाशिका ।
श्रीवत्सान्वयसञ्जातसुन्दरार्येण लिख्यते ॥
कृष्णावतारचरितश्रवणामृतानिर्वृतः ।
उक्तानुवादेनौत्सुक्याद्राजा पृच्छति तत्पुनः ॥

कथित इत्यादि । ननूक्तानि—

जातो गतः पितृगृहात् व्रजमेधितार्थो
हत्वा रिपून् सुतशतानि कृतोरुदारः ।
उत्पाद्य तेषु पुरुषः क्रतुभिस्समीजे
आत्मानमात्मनिगमं प्रथयन् जनेषु ॥

इत्यादिना। सत्यं पुनरपि विस्तरेण वदेत्याह—अवतीर्येति । लोके त्रिविधा जनाः—विरक्ताः, मुमुक्षवः, विषयिणश्चेति । तेषां मध्ये न कस्याप्यलंप्रत्यय इत्याह—निवृत्तेति ।

*　　*　　*　　*

Colophon:

इति श्रीवत्स(हारीत)कुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीसुदर्शनसूरिणाभिहितशुकपक्षानुसारिणा श्रीवात्स्यवरदाह्वयजातश्रीसुन्द(र)राज(जेन) लिखितया शुकभावप्रकाशिकया सहिते श्रीभागवते दशमस्कन्धे प्रथमोऽध्यायः ॥

End :

केवलमबुध्यत । नतु पुत्रः कन्या वेति योगनिद्रया च मोहितेति ॥

Colophon :

श्रीमद्भागवतव्याख्याने दशमस्कन्धे शुकभावप्रकाशिकायां श्रीकृष्णावतारकथा नाम चतुर्थोऽध्यायः ॥

बहिरन्तःपुरद्वारः सर्वाः पूर्ववदावृताः ।
ततो बालध्वनिं श्रुत्वा गृहपालास्समुत्थिताः ॥

* * * *

मुक्तकक्षिशिखाः केचिद्भीताः स्म इति वादिनः ।
न त्वं विस्मृतशस्त्रास्त्रान् विरथान् भयसंमतान् ॥

R. No. 3781.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 105. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa-Kṛṣṇa Nambūdiri, Tekkattu-mana, Kannur, Nattur post, Malabar district.

Foll. 7, 104*b* and 105 are left blank.

बोधायनश्रौतसूत्रभाष्यम्.

BŌDHĀYANAŚRAUTASŪTRABHĀṢYAM.

A commentary on the Śrautasūtras of Bōdhāyana; by Bhavasvāmin. Contains the Savanīyakalpa and Yajñapuccha complete.

Beginning:

ब्राह्मणानां बहुत्वादेकैकस्यां शाखायां परिसमाप्तत्वात् । अर्थस्य च दुर्बोधत्वादसार्वजन्यत्वाच्च संहृत्य विवरणार्थं सुखं बुद्ध्वा कर्माण्यनुष्ठाय फलं सर्वे प्राप्नुयुरिति कल्प आरब्ध आचार्येण । वाक्यसम्बन्धश्च गर्भाधानादि- संस्कारैस्संस्कृतोऽधीतरीत्या वेदो न्यायतः कृतदार आहिताग्निरामावास्येन वेति चोदितस्य कर्मण्यधिकारः । तानि च कर्माणि नानाविधानि । तत्र दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमप्रवर्ग्याण्यपूर्वाणि । तत्र दर्शपूर्णमासविकारा इष्टयोऽग्नीषोमीयश्च पशुर्ज्योतिष्टोमविकारा एकाहा द्वादशाहाश्च । अग्निहोत्रं न प्रकृतिः । प्रकृतिर्नाम धर्माणामतिदेशकम् ।

* * * *

Colophon:

भवस्वामिकृतेयं भाष्यद्वादशाध्यायिका समाप्ता ॥

End:

एतेभ्योऽनुक्रान्ते सखादिर्वा श्वेत उद्धूनं धवन(य)न्निवोर्ध्वं कम्पयन्निव महता वात इत्यर्थः । अवृत ऋत्विक् द्वौ प्रविशेतामनेनैव मन्त्रेण ॥

Colophon:

इति भवस्वामिभाष्यकृतौ प्रवर्ग्यकल्पविवरणे पञ्चमोऽध्यायः ॥

अथाग्निष्टोमः—

अग्निष्टोमेन यक्ष्यमाणो भवति। ज्योतिष्टोम इति कर्मनामधेयं, तस्याग्निष्टोम इति संस्थानामाग्निष्टोमेन स्तोत्रेण समाप्यते ।

* * * *

अथारण्योरग्नीन् समो(मा)रोह्य स्वानि(ग्नि)गृहे नित्याग्न्यायतनान्यध्यवसाय गत्वा सायंप्रातरग्निहोत्रे यद्यतिपन्ने प्रतिजुहोति। उदवसानीयानन्तरं यद्यभि-(ति)पन्ना आहुतयस्ता अपि जुहोति नो चेन्न ॥

Colophon :

एकादशोऽध्यायः समाप्तः प्रश्नः ॥

सवनीयानि समाप्तानि यज्ञपुच्छं च ॥

R. No. 3782.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 290. Lines, 20 in a page Dēvanāgarī and Malayalam. Good

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 290*b* is left blank.

अष्टाङ्गहृदयव्याख्या.

ASṬĀṄGAHṚDAYAVYĀKHYĀ.

A commentary on the Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII.

Contains the Adhyāyas 1—38 in the Uttarasthāna.

Beginning :

प्रणम्य गुरुपादाब्जमष्टाङ्गहृदये मया ।
उत्तरस्थानमात्रस्य व्याख्या संलिख्यतेऽधुना ॥
अल्पप्रज्ञोऽपि सम्मोहादर्थरत्नं सुदुर्लभम् ।
गम्भीरे वाहटाम्भोधौ विचेतुं प्रयते तराम् ॥
कथ्यते मन्दबुद्धीनां सिद्धये प्रागिहान्ध(न्व)यः ।
पश्चात्पदार्थभावार्थौ द्र(द्व)न्यभाषा च कैरली ॥
अनिश्चये निश्चयाय तन्त्रान्तरमपि क्वचित् ।
व्याख्यान्तराभिप्रायश्च सति भेदे तु लिख्यते ॥

कायचिकित्सितादनन्तरं क्रमप्राप्तं बालादिचिकित्सितं विवक्षुरिदानी मुत्तराख्यं स्थानमारभते । तत्र प्रथमं बालचिकित्साया उत्पन्नस्य प्रतीकार-विधानादनुत्पत्तेरेवोपायकरणं श्रेयस्करमिति बालस्य रोगोद्भवप्रतिषेधविधाय-कस्य बालोपचरीयाध्यायस्य पूर्वमारम्भः ।

* * * *

Colophon:

इति उत्तरे प्रथमोऽध्यायस्समाप्तः ॥

End:

सोमवल्कादिलेपो नखविषस्य दन्तविषस्य च नाशनः । सोमवल्कम् ഓമത്തൊലി. अश्वकर्णम् വെണ്കുരുത. गोजिह्वा പൊന്നാങ്ങാണി. हंसपादिका നലംപരണ്ട. രജനികൾ മഞ്ഞളും മരമഞ്ഞളും. गैरिकम् കാവിമണ്ണ്.

Colophon:

इति अष्टाङ्गहृदये उत्तरस्थाने अष्टत्रिंशोऽध्यायः समाप्तः ॥

R. No. **3783.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Kukkampuram Nārāyaṇa Nambūdiri, Karikkāḍu Desam, Kavalapara post, Shoranur.

ब्रह्मसूत्रभाष्यव्याख्या—विद्याश्रीः.

BRAHMASŪTRABHĀṢYAVYĀKHYA: VIDYĀŚRĪḤ.

A commentary on Śaṅkarācārya's Brahmasūtrabhāṣya, which work has been described under Nos. 4659 and 4660 of the D.C.S. MSS., Vol. IX: by Jñānōttamabhaṭṭāraka, disciple of Jñānaghana.

Contains from the last Sūtra of the fourth Pāda of the second Adhyāya to the end of the 25th Sūtra in the second Pāda of the third Adhyāya.

Beginning:

शरीरान्वयिनि मध्यमरसेन वर्धमानकार्यमाह—लोहितमिति । अपां सूक्ष्मरसेन वर्धमानकार्यमाह– प्राण इति । तैलघृतनवनीतादिलक्षणत्रिवृत्कृत-तेजसः सूक्ष्मतरत्वात्तदंशास्त्रयोऽपि शरीरान्वयिन इत्याह—अस्थीति ।

* * * *

तात्पर्यार्थमाह—पदाभ्यास इति ॥

यद्वाणीबाणनिर्भिन्नाः पेतुः पाषाणसूकराः ।
तमाचार्यमहं वन्दे भगवत्पादमादरात् ॥

Colophon :

इति परमज्ञानपरितृप्तपरमहंसपरिव्राजकाचार्यश्रीज्ञानघनपूज्यपादशिष्य-ज्ञानोत्तमभट्टारकविरचितायां शारीरकभाष्यव्याख्यायां विद्याश्रियां द्वितीयोऽध्यायस्समाप्तः ॥

End :

तस्मादित्यादिना । आत्मत्वेनाभिमन्यमानब्रह्मादिशरीरवत्त्वाभावात्तन्निमित्तसुखदुःखादिमत्त्वं न भवतीत्याह—सुखदुःखान्वितमिति ।

श्रीमच्छङ्करभाष्यस्य व्याख्या वैशिष्य(ष्ट्य)शालिनी ।
विद्याश्रीर्वर्धते भक्त्या गुरोरानन्ददायिनी ॥

Colophon :

इति परमज्ञानतृप्तपरमहंसपरिव्राजकाचार्यश्रीज्ञानघनपूज्यपादशिष्य-ज्ञानोत्तमभट्टारकविरचितायां शारीरकभाष्यव्याख्यायां विद्याश्रियां तृतीयाध्यायस्य प्रथमः पादः समाप्तः ॥

सर्वज्ञैरवगाह्यार्थभाष्यतात्पर्यबोधिनी ।
शङ्क्यमानोपपत्तीनां व्याख्या साध्वी सदास्तु नः ॥

सन्ध्ये सृष्टिराह हि ।

एकजीवगतानेकदेहप्राप्तिप्रकारः प्रपञ्चित इति प्रसङ्गकमाह—अतिक्रान्त इत्यादिना । एकदेशावच्छिन्नजीवगतावस्थाभेदः प्रपञ्च्यत इति प्रसक्तमाह—इदानीमिति ।

* * * *

वेदान्तेष्वभ्यास इत्याह—वेदान्तेष्वभ्यासेनेति । अभित आस अभिमुखतयासेति च व्युत्प . . . . . व्यावर्त्यावृत्तिवाचित्वमाह—असकृदिति.

R. No. 3784.

Paper. 10⅝ × 9⅜ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Tippan-Nambūdirippād, Ponnūrkotta-mana, Perumbavore post, Travancore State.

Fol. 28b gives the name of the owner of the original MS.

पाद्मपुराणम्.
PĀDMAPURĀṆAM.

Same work as that described under No. 2129 of the D.C.S. MSS., Vol. IV, Part A.

Contains the Adhyāyas 26—31 in the Kalyāṇakāṇḍa.

Beginning :

ऋषय ऊचुः—

कथं ददाह भगवान् कटाक्षेण मनोभवम् ।
गिरीशः पश्यतामेव देवानां च हरेः पुरः ॥
कथं वा तपसा देवः पार्वत्या स वशीकृतः ।
उपयेमे च तां देवीं शैलराजसुतां पुनः ॥
प्रणयेन ददौ तस्यै स्वदेहार्धं कथं हरः ।
इदं वद महाप्राज्ञ सूत पौराणिकोत्तम ॥

सूतः—

पुरासीत्तारको दैत्यस्तारपुत्रो महाबलः ।
ब्रह्मणस्तपसा तुष्टाद्बहुशो लब्धवान् वरान् ॥

* * * *

Colophon :

इत्यादिपुराणे पाद्मे पञ्चपञ्चाशत्सहस्रसंहितायां कल्याणकाण्डे षड्विंशतितमोऽध्यायः ॥

End :

इति विप्रा! जगत्पित्रोः पार्वतीपरमेशयोः ।
पाणिग्रहणकल्याणं कथितं वस्समासतः ॥
यः पठेच्छृणुयाद्वापि श्रावयेद्वा द्विजोत्तमः ।
तस्य पापानि सर्वाणि नश्यन्त्येव क्षणात्स्वयम् ॥
इदं पवित्रं पापघ्नं न देयं यस्य कस्यचित् ।
शिवभक्ताय देयं स्यात् सश्रद्धाय सदा द्विजाः! ॥
सर्वकामप्रसिद्ध्यर्थं सर्वपापप्रशान्तये ।
अपि श्लोकं तदर्धं वा कीर्तयेत शिवाश्रमे ॥
नमश्शिवाभ्यां शशिशेखराभ्यां महेश्वराभ्यां जगतः पितृभ्याम् ।
नमः प्रपन्नेष्टवरप्रदाभ्यां पुनर्भवक्लेशविनाशनाभ्याम् ॥

Colophon:

इत्यादिमहापुराणे पाद्मे पञ्चपञ्चाशत्सहस्रसंहितायां कल्याणकाण्डे एकत्रिंशोऽध्यायः ॥

उमाविवाहस्समाप्तः ॥

R. No. 3785.

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 184 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Government Public Library, Trivandrum, Travancore State.

Fol. 1*a* gives the title of the work. Fol. 2*a* contains the name and extent of the work. Foll. 1*b*, 2*b*, and 184*b* are left blank.

शृङ्गारप्रकाशः.

ŚṚṄGĀRAPRAKĀŚAḤ.

Same work as that described under R. No. 3252 ante. By king Bhōja.

Contains the Prakāśas 9—11 complete, but wants the beginning in the 9th Prakāśa.

R. No. 3786.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1921–22 from a MS. of the Rajah of Punnattur, Katpadi post.

(*a*) शिशुपालवधव्याख्या—पदार्थदीपिका.

ŚIŚUPĀLAVADHAVYĀKHYĀ: PADĀRTHADĪPIKĀ.

Foll. 1*a*—28*a*. Fol. 28*b* is left blank.

A commentary on the Śiśupālavadha, which work has been described under No. 11719 of the D.C.S. MSS., Vol. XX.

Contains the fourth Sarga only complete, but wants the beginning.

Beginning:

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैरिति पुरीवर्णनवत्काव्याङ्गत्वेन परिगणितं शैलवर्णनं विधातुमुपक्रमते—निश्श्वासेति । असौ रैवतकं गिरिं ददर्शेत्यन्वयः । असौ अधिरूढनीरनिधितीरप्रदेशो दाशार्हः रैवतकं रैवतकाख्यं गिरिं शिलोच्चयम् ; अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः इति सिंहः ।

End :

गिरेस्सन्निधानकाङ्क्षां भगवतस्सूचयति । यथा च वक्ष्यति—रन्तुं निरन्तरमियेषेति । हलधरपरिधानोपमानेन च परिचयप्रधानत्वं वचनस्य गम्यते । सहेलं सविलासमित्युन्नमनक्रियापि विशेषणमिति ॥

Colophon :

इति माघव्याख्याने पदार्थदीपिकायां चतुर्थस्सर्गस्समाप्तः ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdirippāḍ, Kūtalūr-mana, Nareri, Tritala, Malabar district.

(*b*) उपासकाचारः.

UPĀSAKĀCĀRAḤ.

Foll. 29*a*—32*b*.

Similar to the work described under No. 5162 of the D.C.S. MSS., Vol. XI. By Pūjyapāda.

Complete.

Beginning :

श्रीमज्जिनेन्द्रचन्द्रस्य सान्द्रवाक्चन्द्रिकाङ्गिनाम् ।
हृषीष्ट दुष्टकर्माष्टघर्मसन्तापनश्रमम् ॥
दुराचारचयाक्रान्तदुःखसन्दोहहानये ।
ब्रवीम्युपासकाचारं चारुमुक्तिसुखप्रदम् ॥
आप्तोऽष्टादशभिर्दोषैर्निर्मुक्तश्शान्तरूपवान् ;
निर्ग्रन्थेन भवेन्मोक्षो धर्मो हिंसादिवर्जिताः ॥
एतेषु निश्चयो यस्य विद्यते स पुमानिह ।
सम्यग्दृष्टिरिति ज्ञेयो मिथ्याभक्तेषु संशयः ॥

End :

शरीरमण्डनं शीलं स्वर्णं स्वेदापहं तनोः ।
रागो वक्रस्य ताम्बूलात्सत्येनैवोज्ज्वलं मुखम् ॥

Colophon :

इति श्रीपूज्यपादविरचितोपासकाचारः समाप्तः ॥

(*c*) उपासकसंस्कारः.

UPĀSAKASAṀSKĀRAḤ.

Foll. 33*a*—36*a*.

Same work as that described under No. 5162 of the D.C.S. MSS., Vol. XI. By Padmanandin.

Complete.

(*d*) क्रियाकाण्डमालिका.

KRIYĀKĀṆḌAMĀLIKĀ.

Foll. 36*b*—38*a*.

The portion contained in this MS. is a eulogy on Jina. It probably forms part of a work by name Kriyākāṇḍa.

Complete.

Beginning :

सम्यग्दर्शनबोधवृत्तसमताशीलक्षमाद्यैर्गुणैः
सङ्केताश्रयवज्जिनेश्वर भवान्सर्वैर्गुणैराश्रितः ।
मन्ये त्वय्यवकाशलब्धिरहितैस्सर्वत्र लोके वयं
सङ्ग्राह्या इति गर्वितैः परिणतो दोषैरशेषैरपि ॥

यस्त्वामनन्तगुण(सिन्धु)विभुं त्रिलोक्यास्स्तौति प्रभूतकवितागुणगर्वितात्मा ।
आरोहति द्रुमशिरस्सदरो नभोऽन्तं गन्तुं जिनेन्द्रमतिविभ्रमतो बुधोऽपि ॥ (?)

End:

पल्लवोऽयं क्रियाकाण्डकल्पशाखाग्रसङ्गतः ।
जीयादेष (हि) भव्यानां प्रार्थितार्थफलप्रदम् ॥

क्रियाकाण्डसम्बन्धिनी चूलिकेयं नरैः पठ्यते चेत्रिसन्ध्यं च तेषाम् ।
वपुर्भ्रान्तिचेत(स्थ)वैकल्यतोयां (अ)पूर्णा क्रिया सापि पूर्णत्वमेति ॥(?)

* * * *

मौखर्यमेतदबुधेन मया कृतं यतद्भूरी भक्तिरवस्थितमानने वा(?)

Colophon :

क्रियाकाण्डमालिका समाप्ता ॥

(*e*) सज्जनचित्तवल्लभः.

SAJJANACITTAVALLABHAḤ.

Foll. 38*b*—41*a*.

Same work as that described under No. 5184 of the D.C.S. MSS., Vol. XI.

Complete, but the additional stanza is given below :—

यस्य विज्ञानकोणस्थो लोकालोकवणो(शो) बवौ ।
तस्मै वीरजिनेन्द्राय नमस्तत्पदलब्धये ॥

(*f*) शिवस्तुतिः.

ŚIVASTUTIḤ.

Foll. 41*b*—42*a*. Fol. 42*b* is left blank.

A eulogy addressed to God Śiva. Apparently the author was a court-poet of king Himaśītala.

Complete.

Beginning:

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं
साक्षाद्येन यथा स्वयं करतले रेखात्रयं साङ्गुले ।
रागद्वेषभयामयान्तकजरालोलत्वलोभादयो
नालं यत्पदलङ्घनाय स महादेवो मया वन्द्यते ॥
दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना
यो वा नृत्यति मत्तवत्पितृवने यस्यात्मजो वा गुहः ।
सोऽयं किं मम शङ्करो भयतृषारोषार्तिमोहक्षयं
कृत्वा यस्स तु सर्ववित्तनुभृतां क्षेमङ्करश्शङ्करः ॥

End:

नाहङ्कारवशीकृतेन मनसा न द्वेषिणा केवलं
नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया ।
राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो
बौद्धौघान् सकलान् विजित्य स घटः पादेन विस्फाटितः ॥

R. No. **3787.**

Paper. 10⅝ × 9⅜ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vēṅkaṭasubrahmaṇya Śāstri, Vadakkegrāmam, Vaḍakku-Valliyār, Tinnevelly district.

लघुवार्तिकटीका—लघुन्यायसुधा.

LAGHUVĀRTIKAṬĪKĀ: LAGHUNYĀYASUDHĀ.

A commentary on the Laghuvārtika of Surēśvaras(?) according to Catalogus Catalogorum, which is a treatise in 100 stanzas on the Advaita-Vēdānta: by Uttamaślōka, disciple of Śuddhānanda.

Contains from the beginning of the 20th Sūtra of the fourth Pāda of the second Adhyāya to the end of the fourth Pāda of the fourth Adhyāya.

Wants the beginning.

Beginning :

. . दिदर्शनाच्च भेदः प्राणेन्द्रिययोः । प्रयोजनं प्राणमानाज्जीव-विवेकः पक्षे । सिद्धान्ते त्विन्द्रियेभ्योऽपीति । संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति नाम-रूपव्याकर्तृता जीवे भाति । आकाशो ह वै नामरूपयोर्निर्वहितेति तु ब्रह्मणीति विरोधः ।

* * * *

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदुत्तमश्लोकतीर्थविरचितायां लघु-वार्त्तिकटीकायां द्वितीयाध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः ॥

End :

यावदुपयुक्तं विदुषामैश्वर्यं श्रुतं, तावदेव तेषां सर्वेश्वरवन्निरङ्कुशमिति न तेषां जगत् सृष्टि(स्रष्ट्)त्वमिति सिद्धम् ॥ स्वकृतां लघुवार्त्तिकाख्यां शत-श्लोकीं सुधात्वेन रूपयन् साम्बसदाशिवाय निवेदयति—

इत्थमुद्धृत्य वेदान्तमीमांसादुग्धसागरात् ।
शतश्लोकीसुधासारश्चन्द्रमौलौ समर्पितः ॥

अर्प्यत इति वक्तव्येऽर्पित इति वचनमारम्भात्प्रागेव तदर्पणबुद्ध्यारब्ध इति द्योतयितुम् ।

इत्थं जैमिनिबादरायणकृते तन्त्रद्वये ये नयाः
पूर्वाचार्यवरैस्तु शब्दनिवहैस्स्पष्टीकृता विस्तरम् ।
ते सङ्क्षिप्य यथामतीह सुगमैश्शब्दैः प्रकाशीकृताः
श्रीमद्विश्वपतेर्विशालनयनानाथस्य तुष्ट्यै सदा ॥
लघुवार्तिकटीकेयं लघुन्यायसुधाह्वया ।
तन्त्रद्वयाश्रिता श्रीमद्विश्वनाथे समर्पिता ॥

* * * *

विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथिता स्फुटम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दमुनिवरकिङ्करेण उत्तम-श्लोकयतिना विरचितायां लघुवार्त्तिकटीकायां लघुन्यायसुधाख्यायामुत्तरतन्त्रे चतुर्थाध्यायस्य चतुर्थः पादस्समाप्तश्चाध्यायः ॥

R. No. 3788.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Ayyā Śāstrigal, Chennamangalam, Parur post, Cochin State.

(*a*) ब्रह्मसूत्रभाष्यार्थसङ्ग्रहः.

BRAHMASŪTRABHĀṢYĀRTHASAṄGRAHAḤ.

Foll. 1*a*—7*a*. Foll. 7*b* and 8 are left blank.

A treatise in the Advaita-Vēdānta epitomising the meaning of the Brahmasūtrabhāṣya: by Brahmānandayati, pupil of Viśvēśvarānanda.

Complete.

Beginning:

घटरूपेण यो भाति पटरूपेण च प्रभुः ।
सर्वावभासकं वन्दे तमहं देवकीसुतम् ॥
श्रीमद्भाष्यामृताम्भोधेरर्थरत्नं समुद्धरे ।
अलङ्कुर्वन्त्वनेनार्याः कण्ठं कौस्तुभवद्धरिः ॥

श्रुतिस्मृतीतिहासपुराणानि हि ब्रह्मणि प्रमाणम् । तेषां च त्रिविधा प्रवृत्तिः—केषाञ्चित्परिणामदृष्ट्यनुसारिणी, अन्येषां विवर्तदृष्ट्यनुसारिणी, परेषामपवाददृष्ट्यनुसारिणी । क्वचिदेकस्य वाक्यस्य दृष्टित्रयेऽप्यन्वयः स्यात् । तथाहि—तत्र परिणामदृष्टिर्नाम ब्रह्मणः परिणामो जगदिति । यथा—घटशरावोदञ्चनादयो मृत्परिणामाः । ततश्च प्रपञ्चस्येश्वरात्मत्वं सत्यत्वं च सिध्यति ।

End:

अत्रान्तःकरणोपाधेः बाधितत्वान्न गमनादिशङ्का । इयमेवैतत्सूत्रसन्दर्भ-प्रतिपाद्या भाष्यकाराद्यभिमता च ॥

Colophon:

इति विश्वेश्वरानन्दगुरुप्रसादितसर्वज्ञत्वेन ब्रह्मानन्दयतिना कृत श्रीम-द्भाष्यार्थसङ्ग्रहः समाप्तः ॥

श्रीमद्भाष्याह्वयो विष्णुः प्रसादतु सदा मम ।
यदीयरसमास्वाद्य न मनोऽन्यपुमर्थदृक् ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Pāliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

(*b*) न्यायमाला

NYĀYAMĀLĀ.

Foll. 9*a*—15*b*. Fol. 16*a* gives the owner's name of the original MS Fol. 16*b* is left blank.

An illustrative exposition of certain confutative syllogisms, usually called Mahāvidyās—by Śivāditya. This work is presupposed and adversely noticed in Vādīndra's Mahāvidyāviḍambana published in the Gaekwad's Oriental Series.

Complete.

Beginning:

स्वपक्षसिद्धिं किल ये कथश्चन प्रकल्प्य वाञ्छन्त्यनुमानलीलया ।
विरच्यते तत्सदृगुक्तिगुम्भितैर्द्वितीयपक्षैरिह तद्विडम्बना ॥

तथा हि—

क्षित्यादिकं सकर्तृकं कार्यत्वादित्यादि । अत्र शरीरिकार्यत्वं नोपाधिः साध्या व्यापकत्वात्। तथाहि—अयं काल इदानीन्तनशरीरिकार्यत्वानधिकरण-सकर्तृकवान् कालत्वादव्यक्तकालवत्। विवादपदमकर्तृकं शरीरजन्यत्वादित्यादि ।

* * * *

पक्षतद्भिन्नवृत्तित्वरहितत्वानुरञ्जितः ।
धर्मस्साध्यवतस्साध्यो मेयत्वात्प्रतिभाक्षये ॥
अथ लब्धावकाशस्य निरुक्त्यन्तरसङ्कुलैः ।
तत्खण्डनपुरश्चारिचक्रपाणिः(णेः) कुतो[य]भयम् ॥ इति ।

End:

न चैवं घटतद्भिन्नविषयत्वविनाकृतम् ।
सिध्यद्घटेऽपि विज्ञानं घटाद्वैतं प्रसाधयेत् ॥
बाधेन तदतिक्रान्तस्थले द्वैतप्रसाधनात् ।
अबाधो यत्र तत्रास्तु नामाद्वैतं त(कु)तः क्षितिः ॥

* * * *

यदि चात्मात्मनो भिन्नः प्रकाशमानत्वादित्यस्य मौलस्यापहारदोष उच्यते, ततो विशेषग्रहादप्ररोधिकद(म)द्वैतं प्रभवतु नाम ॥

Colophon:

इति शिवादित्यकृता न्यायमाला समाप्ता ॥

R. No. 3789.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu-Valiya-Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 64*b* gives the colophon of this work. Fol. 64*a* is left blank.

धातुपरिभाषा.

DHĀTUPARIBHĀṢĀ.

A treatise in grammar explaining some of the forms of the verbal roots. The author says that he has briefly summarised herein the Kavikalpadruma of Vōpadēva and the Vaiyākarṇasarvasva of Dharaṇīdhara.

Complete.

Beginning :

अथोदात्ता उदात्तेतो व्रजान्तास्तु शुचादयः ।
शुच शोके शोचनि(ति)स्वं दुःखमात्रे त्वकर्मकः ॥
शोचत्या(त्य)र्थश्श्यानि भवेत् पूतीभावेऽर्थ ई शुचिः ।
कुच् शब्दे तार एके गतौ कोचति कोकिलः ॥

* * *

कल्पद्रुमप्रोद्गलितार्थभेदानल्पेतरान् प्राप्य च तत्र (तत्र) ।
सङ्गृह्यते तद्गतधातुरत्नजातं मया भूय इह क्रमेण ॥
इति सर्वस्वकारोक्तेः चुरादिविगमे सति ।
तदुक्तधातुरत्नानि सङ्गृह्यन्ते मया पुनः ॥
क्षीञ् हिंसायां क्षयति क्षयते वा षुञ् गतौ सवति सवते ।
अस्य सुषावेत्यादौ षत्वं भेदो डु कृञ् करणे ॥
करति करतेऽनुदात्तास्त्रय एते ह्युभयतो भाषाः ।

End :

अनुदात्तात्मता धातोरिण्णिषेधार्थमुच्यते ।
उदात्तत्वं च सेट्त्वार्थमिति सर्वत्र दृश्यताम् ॥
धात्वर्थोक्तिस्तदर्थोक्तिः क्वचित्त(त्त)दुदाहृतिः ।
केषां चिदसकृत्पाठः स्थलोक्तिश्चात्र पुस्तके ॥

इति परिभाषा ॥

Colophon:

इति धातुपरिभाषा समाप्ता ॥

R. No. **3790.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 51. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa-Vaidikan alias Kṛṣṇanambūdiri Vaidikan, Tekkattu-mana, Kammaranallur post, Malabar district.

(*a*) शङ्कराचार्यचरित्रम्.

ŚAṄKARĀCĀRYACARITRAM.

Foll. 1*a*—39*a*. Fol. 39*b* gives the name of the owner of the original manuscript.

Similar to the work described under No. 12171 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning:

गणेशाय नमस्तस्मै यत्प्रसादविवस्वता ।
प्रत्यूहध्वान्तविध्वंसः क्रियते भक्तकर्मणाम् ॥
मदीयरसनारङ्गनटनेषु समुत्सुका ।
एषा सरस्वती भूयात् सतामानन्ददायिनी[म्] ॥

*　　*　　*　　*

विष्णुलीलामृतानां ते कर्तारः कविपुङ्गवाः ।
जयन्ति सुतरां लोके वाल्मीकिव्यासशङ्कराः ॥
सर्वागमास्पदं वन्दे व्यासाचलमिमं कविम् ।
बभूव शङ्कराचार्यकीर्तिकल्लोलिनी यतः ॥

*　　*　　*　　*

निबन्धनमिदं पुण्यमध्यायनवकान्वितम् ।
करोति यतिवर्यस्य निदेशं समुपाश्रितः ॥
कथासङ्क्षेप एवाद्यो द्वितीयोऽध्याय उद्भवे ।
तृतीयो व्याससल्लापे तुर्यः प्राक् शिष्यसम्भवे ॥
सुरेश्वरस्य शिष्यस्य सन्न्यासे पञ्चमस्ततः ।
षष्ठस्तु हस्तामलकतोटकाभिख्यशिष्ययोः ॥

*　　*　　*　　*

Colophon:

इति शङ्कराचार्यस्वामिचरित्रे प्रथमोऽध्यायः ॥
सङ्क्षेपाध्यायस्समाप्तः ॥

End :

श्रीमच्छङ्करदेशिकस्य चरितं स्तोत्रं प्रबोधप्रदं
निर्दग्धाखिलपापवृन्दविपिनं संक्षिप्तमेतन्नराः ।
ये शृण्वन्ति पठन्ति चादरयुतास्संचिन्तयन्त्यन्वहं
ते लब्ध्वा भुवि सम्पदं च सकलामन्ते लभन्तेऽमृतम् ॥

Colophon :

इति श्रीशङ्कराचार्ययतिवरस्वामिचरिते दशमोऽध्यायः ॥
आचार्यस्वामिचरितं समाप्तम् ॥

(*b*) नीतिशास्त्रसमुच्चयः.

NĪTIŚĀSTRASAMUCCAYAḤ.

Foll. 40*a*—43*a*. Fol. 43*b* is left blank.

Same work as that described under No. 12055 of the D.C.S. MSS., Vol. XX. This is also called Cāṇakyasaptati.

Incomplete.

(*c*) व्यासशतकम्.

VYĀSAŚATAKAM.

Foll. 44*a*—49*a*. Foll. 49*b*—51*b* are left blank.

A centum of anthological stanzas attributed to Vyāsa.

Complete.

Beginning :

अज्ञानतिमिरान्धानां विभ्रान्तानां कुदृष्टिनाम् ।
ज्ञानाञ्जनशलाकाभिर्व्यासेनोन्मीलितं जगत् ॥
एतावज्जन्मसाफल्यं यदनायत्तवृत्तिका ।
ये पराधीनजन्मानस्ते चेज्जीवन्ति ते(के) मृताः ॥
साधोः परुषवाक्येन न मनो याति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥

End :

पाषाणोऽपि मणिस्पर्शाज्जायते भूषणं महत् ॥
केतकीकुसुमं भृङ्गः खर्जमापि च सेवते(?) ।
दोषान् किं नाम पश्यन्ति गुणापहृतचेतसः ॥
गुणाः कुर्वन्ति दूतत्वं दूरेषु वसतां सताम् ।
केतकीगन्धमाघ्राय षट्पदो याति दूरतः ॥

Colophon:

इति व्यासशतकं समाप्तम् ॥

R. No. 3791.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of the Raja of Punnattur, Kottapudi post.

(*a*) कल्पनारत्नम्.

KALPANĀRATNAM.

Foll. 1*a*—9*a*. Fol. 9*b* is left blank.

A treatise on the characteristics and qualities of elephants.

By Śivamārabhūpati who refers to certain prior works written by Pālakāpya, Budha (son of Candra) and Gautama.

Complete.

Beginning:

केशान् सोमं गुहं शक्रं पावकं वा विनायकम् ।
प्रणम्य कल्पनां वक्ष्ये पालकाप्य च गौतमम् ॥
नवत्वं नैव दोषाय पुराणत्वं गुणाय वा ।
गुणागुणानि सर्वत्र तस्माद्ग्राह्या गुणास्सताम् ॥

* * * *

करीरिकाप्रमाणं तु ज्ञात्वा सम्बध्य कल्पयेत् ।
विख्याता कल्पना प्रोक्ता नाम्ना वर्षप्रमाणिका ॥
अग्निवेश्यबुधगौतममुख्यैः पालकाप्यमुनिना च पुराणैः ।
दन्तवर्षचरणानि विलोक्य संविभज्य विधिनात्र च दिष्टः ॥

* * * *

पालकाप्यशशिसूनुगौतमैः व्याहृतां समवलोक्य संहिताम् ।
कल्पनाविधिमिमं यथाविधि व्याजहार शिवमारभूपतिः ॥

Colophon:

इति तृतीयः परिच्छेदः ॥

End:

इति कोशविधिः प्रोक्तश्श्रुत्वा विधिमुखश्र(क्र)मात् ।
सर्वशास्त्राणि संक्षिप्य विदुषां प्रीतिवर्धनम् ॥
स जयति शिवमारः क्ष्माभृतामेनकाथो
नियतविहितरक्षानन्दिताशेषलोकः ।

अविभृद्भिरिरूढो(?) न्यच(ग्)बभूव प्रजाना-
मवनिमवति यस्मिन्नाभि(ग)राजप्रभावः ॥

Colophon:

इति राज्ञा शिवमारेण कृतं कल्पनारत्नं नाम प्रकरणं समाप्तम् ॥

(b) कल्पनारत्नव्याख्यानम्.

KALPANĀRATNAVYĀKHYĀNAM.

Foll. 10a—24a Fol. 24b is left blank.

A commentary on the work described under subdivision (a) of the same number: by Mahānāga.

Breaks off in the third Paṭala.

Beginning:

प्रणम्य पुण्डरीकाक्षं सर्गादित्रयकारणम् ।
व्याख्यास्यामि महानागकल्पनां शास्त्रतत्त्वतः ॥

अथ महात्मना महानागेन मुनिवचनं दुर्विज्ञेयमिति कृत्वा करीरिकामाने मुह्यन्तं लोकं दृष्ट्वा करुणात्मना व्यामोहनिराकरणार्थं करीरिकाप्रमाणप्रधाना कल्पना सङ्क्षेपेण कृतेति सम्बन्धः । अत्रादौ प्रयोजनमुक्तम् । लौकिकपुरुषाणां प्रयोजनमपेक्ष्यैव सर्वकर्माणि प्रारभ्यत इति शोभास्य इत्यादि । शोभाशब्दोऽस्मिन्मङ्गलार्थः प्रयुज्यते । शोभार्थं चाभङ्गार्थं चार्थशब्दः प्रत्येकमभिसम्बध्यते । अर्थशब्दः प्रयोजनवाची । शोभासौष्ठवमास्यगुप्तिर्मुखरक्षणम् । प्रहारसिद्धिरित्यर्थः ।

* * * *

Colophon:

इति प्रथमपटलः ॥

End:

कल्पनासिद्धान्तो वा बद्धभेदोपग्रहं वचनन्यासमार्गेण प्रच्छन्नमित्यर्थः । एवमेव नागकल्पनानाम्ना विवृतमित्यर्थः ॥

Colophon:

द्वितीयपटलस्समाप्तः ॥

अथ सर्वगजसामान्यं वर्षप्रमाणिकाख्यां कल्पनामुक्त्वा ततः केषांचित् गजानां कल्पनां कर्तुमारब्धवानित्यर्थः । सम्बन्धः । अत्र कश्चिदाह— अवर्षप्रमाणिकैर्वेष्टसिद्धिर्भवति चेत् किमेभिर्बहुभिरिति ।

* * * *

तदसम्यक् द्विः परिक्षिप्येतिवचनात् नामधेयं कृतत्वाच्च भवति । दन्तमूलः परिणाहमूलः । कल्पयेदिति वचनात् । द्विः परिक्षिप्य तस्मादपि क्षयेदित्यर्थः । निरुपद्रवान्निरुपा.

R. No. 3792.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 92. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Mānavikraman Karanampāḍ, Alwanjeri, Malabar district.

सङ्ग्रामविजयोदयम्.

SAṄGRĀMAVIJAYŌDAYAM.

A treatise dealing with a number of topics which are considered useful by way of helping one to gain victory in a battle.

Deals with the following subjects :—

१. राशिलक्षणवर्णनम्.
२. ग्रहयोनिभेदवर्णनम्.
३. कालज्ञानवर्णनम्.
४. पञ्चस्वरभुक्तिविधिः.
५. तिथिकल्पनावर्णनम्.
६. नक्षत्रविधानम्.
७. योगविधानम्.
८. पक्षिपरिज्ञानम्.
९. रविचारचक्रसङ्क्रमणम्.
१०. चन्द्रशनिचारगुलिकाविधानम्.
११. राहुप्रकारसन्तानचक्ररूपविधिः.
१२. विष्टिचक्रकत्रिविधिः.
१३. कालचक्रनरचक्रविधिः.
१४. कूर्मीयसेवाचक्रविधिः.
१५. ताराप्रवेशनिर्गमचक्रविधिः.
१६. अंशकचक्रयुद्धलक्षणम्.
१७. योगिनीविधानम्.
१८. प्रश्नकथनम्.
१९. उदयास्तचारहोरालक्षणम्.
२०. श्वासाद्यरिष्टलक्षणम्.
२१. कालचक्रलक्षणम्.
२२. बाह्यायुःपरीक्षणम्.
२३. मृत्युञ्जयविधानम्.
२४. यन्त्रलक्षणविधिः.
२५. बीजमन्त्रकरणविधिः.
२६. मन्त्रयन्त्रविधिः.
२७. मन्त्रविधिः.
२८. परसैन्यस्वसैन्यरक्षाविधिः.
२९. फेलकूर्वीविधानम्.
३०. कर्णपिशाचीमन्त्रविधानम्.
३१. यक्षिणीविधानम्.
३२. दिव्यौषधविधिः.
३३. योगिनीदिव्यौषधविधिः.
३४. सकलास्त्रापायनपरीक्षणविधिः.

३५. धूपदीपसेनाविधिः.
३६. स्वप्नपठयन्त्रविधानम्.
३७. परसैन्यस्तम्भनविधिः.
३८. कपीन्द्रमूलमन्त्रविधिः.
३९. गौलीप्रश्नविधानम्.
४०. स्त्रीचित्तविमोहनम्.

Complete.

It is stated that this work is based upon Yuddha Jayārṇava.

Beginning :

जयति जगदेकहेतुश्शशाङ्कमौलिस्समस्तगश्शर्वः ।
सकलसुरासुरवन्दितचरणयुगश्शङ्करस्सकलः ॥
क्षितिजलपवनहुताशनयजमानाकाशसोमसूर्यमयम् ।
विभुमजमीशमनन्तं नमामि विश्वेश्वरं विश्वम् ॥
जगदेकहेतुरीशो जगाद जगतो हिताय सर्वज्ञः ।
शास्त्रमतिविस्तरार्थं युद्धस्य जयार्णवं नाम ॥
विष्णुपितामहगिरिजानन्दीन्द्रकुमारचन्द्रसूर्याद्यैः ।
गरुडोरगेन्द्रमुनिभिश्श्रुतं च तच्छास्त्रमीशानात् ॥
युद्धजयार्णवशास्त्रादुद्धृत्य मनाक्कृतो मयार्याभिः ।
क्रियते शास्त्रं सारं सङ्ग्रामजयोदयं नाम ॥
प्राचीदक्षिणपश्चिमसौम्याशाधिष्ठिताः पृथिव्यां च ।
अष्टाविंशतितारास्साक्षादनलादियाम्यान्ताः ॥

* * * *

Colophon :

इति सङ्ग्रामविजयोदये राशिलक्षणो नाम प्रथमोऽध्यायः ॥

End :

अत ऊर्ध्वं (स्वप्नं)विधिः परसैन्यस्तम्भ . . . . . ॥
. . . . दिमे समाख्याताः ।
उक्तं सर्वज्ञत्वं प्रणम्य देवं शिवं परमम् ॥
इति सङ्क्षेपतः प्रोक्तं सङ्ग्रामस्य(वि)जयं मया ।
रक्षितव्यं हि महता रहस्यं रुद्रनिर्मितम् ॥

Colophon :

इति सङ्ग्रामविजयोदये स्त्रीचित्तविमोहनं नाम चत्वारिंशोऽध्यायः ॥

समासश्च सङ्ग्रामविजयः ॥

सहस्रद्वितयादूर्ध्वं शतैर्ग्रन्थैश्च पञ्चभिः ।
सङ्ग्रामविजयो नाम शास्त्रं प्रोक्तं विपाश्रिता ।

R. No. **3793.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 214. Lines, 20 in a page. Dēvanāgari and Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdirippāḍ, Karapala-mana, Shoranur post.

Fol. 214*b* is left blank.

भारतचम्पूप्रबन्धः.
BHĀRATACAMPŪPRABANDHAḤ.

A Campūkāvya narrating the main story of the Mahābhārata: by Nārāyaṇa.

Complete.

Beginning:

अत्रेरीक्षणशुक्तिमौक्तिकमणेर्देवात्सुधादीधिते-
स्तारायामभवत्पुरा विबुधशब्दानन्ददाता बुधः ।
मासान्तक्रमनष्टदृष्टमहिलादेहादिलादात्मजो
जातस्तस्य पुरूरवाः सुरवधूनेत्रान्तकान्ताकृतिः ॥

आयुस्तस्मादजनि नहुषस्तत्सुतो निस्सपत्नं
यत्स्वाराज्यं व्यधित विधिवद्वत्सराणां सहस्रम् ।
नैवात्याक्षीत्कलशजनुषश्शेषितस्यापि शापा-
द्भोगोदग्रां त्रिदशपतितां यो महासत्त्वरीतिम् ॥

आसीदस्य ययातिरस्य तनयः पूरुर्यवीयान् गुणै-
र्ज्यायानेव बभूव यो गुरुगिरा बाल्ये दधद्वार्धकम् ।
तद्वंश्येषु नृपोत्तमेषु विदितो हस्तीत्यमर्त्यापगा-
तीरे चारुतरं चकार स पुरं नाम्ना निजेनाङ्कितम् ॥

नलिनैरिव नारीणां वदनैः प्रतिबिम्बिताः ।
नलिन्य इव शोभन्ते यत्र नीलाश्मभूमयः ॥

यस्याश्च विशालतया नातीव पर्याप्तं भुवनमुच्चतया सौधानां लोष्टका इव गिरयः रत्नबहुत्वादापणानां रिक्ता इव जलनिधयश्चातुर्येण पौराणां ग्राम्य इव मकरकेतनः गाम्भीर्येण दीर्घिकाणामुत्तानमिव सागरतलमतिशयेन शिल्पकृतामकिञ्चित्कर इव विश्वकर्मा ।

तामावसन्नसुरवीरपदापहारिबाहापदानविहतज्वरनिर्जरेन्द्राः ।
धर्मोध्वनीनचरिताश्चतुरर्णवान्ता विश्रान्तशासनगिरः कुरवो नरेन्द्राः ॥
प्रतीप इति राजाभूत्प्रदीप इव तत्कुले ।
नन्दनस्त्वभवत्तस्य शन्तनुर्नाम वीर्यवान् ॥

* * * *

दूतान् संप्रेषयामास राज्ञामानयनाय च ।
संबभार च सम्भारान् सर्वान् क्रतुवरोचितम् ॥

Colophon :

दिग्विजयस्समाप्तः ॥

गोविन्दमानन्दरसैकसान्द्रमावन्द्य नारायणभूसुरेन्द्रः ।
निर्माति धर्मात्मजराजसूयसम्पन्मयं सम्प्रति चम्पुकाव्यम् ॥
कामं भीमार्जुनाद्यैरजितपृथुमनोवर्धितैरुद्धतानां
पृथ्वीशानां जयेन प्रसभमुपहृते निस्तुले वित्तराशौ ।
तद्वृत्तं धर्मसूनुस्सपदि परममित्राय भर्त्रे यदूनामावेद्य व्यासमुख्यैस्सममभृत परद्रव्यवद् द्रव्यभारम् ॥

End :

दलिताञ्जनकान्तिरुन्नमन्ती शरधाराः समहोपलाः किरन्ती ।
अचिरेण किरातकालिका सा शमयामास धनञ्जयावलेपम् ॥
अनेकराजन्यपुराहृतं तदनन्तमाप्तेन जनेन गुप्तम् ।
चोरा युवानः प्रसभेन जह्रुर्धनं यदूनामवरोधनं च ॥
भिन्नो मन्युभरावसन्नहृदयस्खिन्नः परं निश्वसन्
खिन्नः सन्नभुजः कथं चन नयन्नाकृष्य तद्गाण्डिवम् ।
इन्द्रप्रस्थमसौ निनाय विनमन्मौलिस्त्रपागौरवान्मातङ्गोपहृतावशिष्टमबलावृन्दं पृथानन्दनः ॥
यत्तेजो धृतराष्ट्रपाण्डुविदुराख्यानां त्रिधा दिद्युते
प्राग्वंशे शशिनस्त्रिलोकमहितं त्रेताग्नितुल्यप्रभम् ।

वेदानां व्यसनं सृजन्नपि गिरा सर्वप्रमोदावहो
दैत्यारेरवतार एष भगवान् द्वैपायनः पातु वः ॥

Colophon:

स्वर्गारोहणप्रबन्धस्समाप्तः ॥

R. No. **3794.**

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Ayyā-Śāstrigal, Mallapalli post, Cochin State.

अनर्घराघवव्याख्यानम्—विक्रमीयम्.

ANARGHARĀGHAVAVYĀKHYĀNAM: VIKRAMĪYAM.

Same commentary as that described under R. No. 132(*a*) ante. By Mānavikrama, disciple of Karuṇākara, Paṅkajākṣa and Rāma.

Breaks off in the third Aṅka.

R. No. **3795.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 190. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu-Valiya-Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 189*b* gives the name of the owner of the original MS. Fol. 190 is left blank.

वाक्यपदीयम्, हेलराजीयव्याख्यासहितम्.

VĀKYAPADĪYAM: WITH THE COMMENTARY HĒLA-RĀJĪYA.

Same commentary on the Vākyapadīya of Bhartṛhari as that described under R. No. 2411 ante, wherein see for the beginning. By Hēlarāja, son of Bhūtirāja, born in the family of Lakṣmaṇa, minister of king Muktāpīḍa of Kashmir.

Contains the Samuddēśa 14th only in the third Kāṇḍa.

End:

तदेवं संसर्गावस्थः पदार्थो वाक्यार्थादपोद्धृत्य पदविभागपूर्वकं समीक्षित इति परिसमाप्तोऽर्थद्वारकः पदविचार इति शुभम् ॥

Colophon:

इति भूतिराजतनयहेलराजकृते प्रकीर्णकप्रकाशे वृत्तिसमुद्देशश्चतुर्दशः ॥ समाप्तं चेदं पदकाण्डम् ॥

मुक्तापीड इति प्रसिद्धिमगमत्काश्मीरदेशे नृप-
श्श्रीमान् ख्यातयशा बभूव नृपतेस्तस्य प्रभावानुगः ।
मन्त्री लक्ष्मण इत्युदारचरितस्तस्यान्ववाये भवो
हेलाराज इमं प्रकाशमकरोच्छ्रीभूतिराजात्मजः ॥
तमोध्वंसस्सूर्यादिभिरिह कृतो यद्यपि भुवि
प्रदीपस्साफल्यं क्वचिदपि तथाप्यत्र विषये ।
प्रयात्येव प्रायो जगति खलु भावः कृतधियां
न शक्या निह्नोतुं स्फुरदभिनवास्फाररुचिराः ॥
निराकाङ्क्षेण वपुषा गता सर्वजनीनताम् ।
तृतीया वागवस्थेयं प्रतिष्ठामुपयात्वितः ॥
त्रैलोक्यगामिनी येन त्रिकाण्डी त्रिपदी कृता ।
तस्मै समस्तविद्याश्रीकान्ताय हरये नमः ॥
सूक्तिश्रियः स्फुटा एता जयन्ति जगतां गुरोः ।
हरेर्भाष्याब्धिपीयूषच्छटाच्छुरितविग्रहाः ॥

Colophon:

समाप्तोऽयं प्रकीर्णप्रकाशः ॥

R. No. **3796.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 121. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śaṅkara-Nambūdirippāḍ, Alamballi-mana, Kavalapara post, Shoranur.

ऋग्वेदपरिभाषाव्याख्या— सर्वानुक्रमणी.

ṚGVĒDAPARIBHĀṢĀVYĀKHYĀ : SARVĀNUKRAMAṆĪ.

A commentary on the Ṛgvēdaparibhāṣā, which work has been described under No. 886 of the D.C.S. MSS., Vol. II.

Breaks off in the eigth Adhyāya of the eigth Aṣṭaka.

Beginning:

यत्प्रसादादविघ्नेन समाप्तिं यान्ति देहिनाम् ।
आरम्भास्तं गणाधीशं प्रणमामीष्टपुष्टये ॥

* * * *

यच्छिक्षामिहिरोऽस्माकं हृत्पद्मे नियतास्पदाम् ।
हिमानीमहरत्तीव्रामविद्यां तान् नुमो गुरून् ॥

देवतात्रितयं वन्दे सूर्यवाय्वग्निसंज्ञितम् ।
स्वराकाशक्षितिस्थानं नामभिर्बहुभिस्स्तुतम् ॥
यो निर्ममे पाणिनिगीतशब्दशास्त्रोदधेर्वार्त्तिकरूपनौकाम् ।
नागेश्वरो हर्षयुतः प्रकाशं भाष्यप्रदीपेन चकार यस्याः ॥
स्मृत्यन्तराणामपि यः प्रणेता कात्यायनाख्यस्स मुनिः प्रपेदे ।
सर्वज्ञतां शौनकशिष्यभावादादाय विद्यास्सकलास्तदीयाः ॥
मिताक्षरां प्रभूतार्थां सर्वानुक्रमणीमसौ ।
विदधे शौनकीयानां स्मृतीनां सङ्ग्रहात्मिकाम् ॥
सर्वभाष्यादिकं यस्यां क्रमेणाहेति निर्वचः ।
नाम्नैवानेन मुनिना कैमर्थक्यं निराकृतम् ।
निरुक्ते फणिभाष्ये च पैङ्गले च कृतश्रमः ।
टीकामहं विधास्येऽस्या यथाशक्ति यथाश्रुतम् ॥
पूर्वाचार्यैः कृता बह्वयो व्याक्रियास्सन्ति यद्यपि ।
स्वबुद्धिशुद्धये टीकामारभेऽस्यास्तथाप्यहम् ॥
सर्वस्सर्वं न जानातीत्येवमाहुः पुराणगाः ।
अतश्चाप्यर्थवत्येषा नवार्थकथनात्क्वचित् ॥
पूर्वव्याख्याकृतां भावः प्रायेणात्र प्रदर्श्यते ।
तत्सतां तत्कृतं लौल्यमनयैव प्रशाम्यति ॥

तत्र तावत्—

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥

मङ्गलादीनि हि शास्त्राणि प्रथन्त इति महाभाष्यकारवचनात् शिष्टाचाराच्चानुमितया श्रुत्या प्रबन्धारम्भे समुचितं मङ्गलाचरणं वृद्ध्यादिशब्दैरिवाथशब्देन संसूच्य श्रोतॄन् प्ररोचयन्नभिधेयं प्रतिजानीते—अथ ऋग्वेदेति ।

* * * *

ऋक्छब्देन सपादव्यवस्थ एकदेश उच्यते । तथा च जैमिनिनासूत्रितम्—तेषामृग्यत्रार्थवशेन पादव्यवस्थेति । अत्रार्थवशेनेत्युपलक्षणम् । अत एव तत्र शाबरं भाष्यं नार्थवशेनेतिवृत्तादिपरव्यावृत्त्यर्थं किं तर्हि अनुवाद एष प्रदर्शनार्थं इति ।

* * * *

स्यात्त्वयं पार्थिवस्त्वेव तथा रूपं हि दृश्यते ।
ह्रयसे पीयते चेति वैद्युते नैतदस्ति हि ॥ इति ।

Colophon:

इति प्रथमाष्टकस्य प्रथमेऽध्याये एकोनविंशतिसङ्ख्यादयः चर्चिताः ॥

End:

आद्ये जगत्यौ चतस्रश्च त्रिष्टुभ इत्यानुष्टुभत्वापवादः तेनान्त्योदृच एवानुष्टुभः ॥

Colophon:

इत्यष्टमाष्टकस्य सप्तमेऽध्याये त्रयोविंशतिसङ्ख्याकसूक्तगतऋक्सङ्ख्यादयश्चर्चिताः ॥

ऽयं षाडिति साङ्ख्यसुतोऽत्रिर्द्रष्टा न भौमः । अयं हीति तार्क्ष्यपुत्र इति पुत्रग्रहणं सन्देहनिरासार्थमन्यथा तार्क्ष्य इति सुपर्ण इति एकस्यैव नामोपदेश इति च प्रतीयेत । आद्या गायत्री, द्वितीया बृहती, तृतीयाचतुर्थ्यौ निवृत्, भूरिग्गायत्र्यौ पञ्चमी सतो बृहती । अत्राभरदन्तः प्रथमः पादः । जीवसेऽन्तस्तृतीयः । सङ्कलनेन सङ्ख्यापूर्तिः ।

* * * *

अथवा सकलवेदनमस्कारः । नमो ब्रह्मण इति । यद्वा ब्रह्मशब्देन श्रुतिशिरःखण्डलक्ष्यमखण्डं ब्रह्मोच्यते । यदि वा ब्रह्मशब्देन सर्वेषु.

R. No. **3797**.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 98. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Rāmānuja-Ayyaṅgār, Vānamāmalai, Nanganeri, Tinnevelly district.

तप्तमुद्राविलासः.

TAPTAMUDRĀVILĀSAḤ.

A treatise explaining with authoritative quotations, the necessity for undergoing the religious ceremony called Samāśrayaṇa by refuting the contrary views of the opponents. By Nṛsiṁha, son of Amṛtaphalācārya of Ātrēyagōtra and disciple of Mahācārya, son of Śrīnivāsācārya of Vādhūlagōtra.

Breaks off in the eigth Paricchēda.

Beginning:

श्रीमद्गुणाकरमहागुरुनामधेयश्रीचित्रकूटपतिकिङ्करताधुरीण ! ।
श्रुत्यादिभिर्नियतकर्मसु बाहुमूले विप्रादिभिर्विजयते विधृतोऽस्त्रराजः ॥
वाधूलश्रीनिवासप्रथितसुतवरश्रीमहाचार्यसेवा-
सुप्रीतश्रीवृषाद्रिप्रभुनियमनतस्तीक्ष्णदंष्ट्राग्निनेत्रः ।

गोविन्दक्ष्मापतेर्यः प्रतिभटविजयस्तम्भलक्ष्मीप्रतिष्ठां
चक्रे सोऽमुद्रितानां द्रुततमयगतिं चक्रराजो विधत्ताम् ॥
श्रीमत्कौशिकवाधूलमहाचार्यपदाश्रयः ।
श्रीनृसिंहो विधत्ते तान् विद्रुतान् ये ह्यमुद्रिताः ॥
आत्रेयश्रीनिवासार्यपदपङ्कजसेवया ।
अधीतसर्वशास्त्रार्थस्तप्तमुद्रां प्रकाशये ॥

पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदा मो अश्नुते । शृतास इद्वहन्तस्तत्समासत इति श्रुतिः । त्रिष्वपि वेदेषु पठिता तप्तचक्रधारणं विदधाति । हे ब्रह्मणस्पते प्रभुस्त्वं विश्वतः गात्राणि पर्येषि । तस्य ते विततं पवित्रम् ।

* * * *

Colophon:

इति श्रीमत्कौशिकवाधूलमहाचार्यश्रीचरणपरिचरणसुचरितसमधिगतपरा-वरतत्त्वयाथात्म्यावबोधेन आत्रेयकुलतिलकश्रीमदमृतफलाचार्यसूनुना तत्प्रसाद लब्धश्रीनृसिंहापरनामधेयेन विरचिते तप्तमुद्राविलासे अमुद्रितविदारणं नाम पवित्रश्रुत्यर्थनिर्णयः प्रथमः परिच्छेदः ॥

End:

सुदर्शनधारणस्य ख्यातिलाभादिकामकर्तृ(क)त्वाभावात् नावैदिकत्वप्रसङ्गः। अन्यथा मन्त्रतन्त्रविपर्यासादिनाप्यनुष्ठानप्रसङ्गादेवेति गृहाण ॥

धारणे शङ्खचक्रादेः ख्यातिलाभादिहेतुभिः ।
प्रवृत्तिर्यदि यज्ञादौ सा कथं न भवेत्ततः ॥
यज्ञादेः ख्यातिमूलत्वे वैदिकत्वं कथं भवेत्
तस्माद्वेदादिमूलत्वाद्वैदिकं चक्रधारणम् ॥

Colophon:

इति श्रीमत्कौशिक (. . .) कृते तप्तमुद्राविलासे सुदर्शनधारणनिर्णयो नाम सप्तमः परिच्छेदः ॥

एवं श्रुतिस्मृतीतिहासपुराणादिसिद्धं तप्तचक्रादिधारणं स्नानवन्नित्यम-करणे प्रत्यवायश्रवणात् । वृद्धमनुस्मृतौ—उपवीती शिखी (. .) या इत्यकरणे प्रत्यवायश्रवणात् । वृद्धम (. . .) तौ—ऊर्ध्वं (. . .) इति नित्यमिति नित्यत्वोक्तेः ॥

R. No. 3798.

Paper. 10¾ × 9½ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. ŚaṅkaraN ambūdirippāḍ, Avanapparambu, Cochin State.

(*a*) गोपिकोन्मादः.

GŌPIKŌNMĀDAḤ.

Foll. 1*a*—13*a*. Fol. 13*b* gives the owner's name of the original MS. Fol. 14 is left blank.

A short poem describing the over-powering love of the Gōpīs towards Lord Kṛṣṇa.

Complete.

Beginning:

बन्दारण्ये विलसितशरच्चन्द्रिकायां निशायां
गोपस्त्रीभिः कलमुरलिकानादसंमोदिताभिः ।
रासक्रीडामधित(क) मधुरामादधानं युवानं
वन्दे मूर्ध्ना वलभिदुपलश्यामलाङ्गं मुकुन्दम् ॥
अत्राश्चर्या(न्) रसमभिनवं सेव्यशृङ्गारसारं
मान्यां मूर्तिं मुरविजयिनो मायिनो मूर्तिभेदान् ।
वेदान्तार्थं कमपि कमपि व्यज्यमानं च मध्ये
श्राव्ये काव्ये शृणुत रसिका गोपिकोन्मादसंज्ञं(ज्ञे) ॥
काचिद्वृन्दावनपरिसरे गोकुलं चारयन्तं
पश्चादेत्य प्रकृतिमधुरं वंशमापूरयन्तम् ।
तन्नादेन श्रुतिसुरभिणा तिर्यगाकृष्यमाणा
कृष्णं क्रीडारसपरवशं पुष्पलापी(वी) ददर्श ॥

End:

गायन्ताभिस्सुरयुवतिभिश्चामरैर्वीज्यमानं
ब्रह्मेन्द्राद्यैरमरनिकरैः क्लृप्तपुष्पाभिषेकम् ॥
कृष्णं दृष्ट्वा मणिमयगृहे रत्नसिंहासनस्थं
सान्द्रानन्दामृतजलनिधौ सा निमग्नावतस्थौ ॥
गेहे गेहे वरतनुरसौ वीक्षमाणा पतीन् स्वान्
पुत्रैः पौत्रैः प्रतिगृहमपि प्राप्तसन्ध्यासहस्रान् ।
उद्गायन्तं मुनिवरममुं नारदं मानयन्ती
विष्णोः पार्श्वे सुचिरमवसत् विस्मिता तत्र दीर्घम् ॥

यदीयवाचालहरी सभायां प्रचारकालेषु विजृम्भमाणा ।
पयोधिपूरोल्लसमानवीचिप्रचारदोराहवसाभिलाषा ॥

अनादिवाणीधरणीधरं यं बुधेश्वराश्शारवतो वदन्ति ।
पितामहो मे करुणावतारस्स सन्ततं कौतुकमातनोतु ॥

विदां प्रसङ्गेषु वदन्ति वै गिरां पतिं तमेनं रघुनाथसूरिम् ।
समाश्रये यः प्रथितो रघूणां नाथस्स एवायमिति क्षमायाम् ॥

मातामहोऽस्मत्पितुरेष धीमान् शेषादिमानां वचसां रसज्ञः ।
शेषेतरं तोषमहन्ति(र्नि)शं स पुष्णातु मे वेङ्कटरामसूरिः ॥

* * * *

तातो मे सुचिरं जयी भवतु यस्सज्ञातचूडामणिः
चेतो यस्य चकास्त्यपारकरुणावाराशिपूरोल्लसत् ।
धत्ते यस्सुतरामनादिवचसामुत्तंससारे नतिं
सोऽयं गर्गकुलाब्धिशीतकिरणश्श्रीरामकृष्णाभिधः ॥

क्षेमाय मे वेङ्कटरामसूरिर्भूयात्सभूमा विलसन्मनीषः ।
यं सत्कवीन्द्रं कथयन्ति लोके यो निर्ममे रामविलासकादीन्(व्यम्) ॥

भव्याय भूयान्मम कृष्णसूरिर्योऽयं व्यतानीत्सुखभाष्यटीकाम् ।
अस्मद्गुरोः पादसरोजराजच्चेतोमिलिन्दः परि(र)ऋद्धितुष्टः ॥

अमन्दमोदं मम संनिधत्तां शुकाभिधोऽस्मद्गुरुरेष नित्यम् ।
निरूढतत्तन्मततूलजातं यदुक्तिवात्या शिथिलीकरोति ॥

* * * *

गद्यपद्यमयवाग्भिरिदानीं सन्मुदं हि रचयामि नितान्तम् ।
आर्यवर्यगुणदुग्धसरस्वती(द्वी)चिरम्यनिलयायितचेताः ॥

* * * *

सीतारामगुरोश्चरित्रजलधिः क्वाहं मनीषाल्पकः
क्वेवं चेदपि तत्कृतौ गुरुकृपा मां चोदयत्यद्भुता ।
तत्कामं मम पूरयन्तु गुरवः सीतासखी(मे)तो गिरां
देवीं तान(म)हमाश्रये सुरनुतां वाणीविलासाप्तये ॥

काञ्चीमण्डलभूषणं श्रुतिमतीतीरेऽग्रहारो महान्
सोऽस्त्यद्यापि महोच्चसौधसहितो वाणीविलासास्पदम् ।
यत्रत्या निगमान्तनिर्झरपरिष्यन्दन्मरन्दं द्विजा
लोलम्बा इव यत्पिबन्ति सततं तद्वेदभृङ्गाभिधः ॥

ग्रामेऽस्मिन्नवसत्पुरा द्विजवरश्श्रीशेषशैलाभिधो
यज्ञैः प्रीतिकृदन्वहं रघुपतेस्सोऽयं कदाचित्सुतैः ।
सत्रा तन्त्रचतुष्टयेषु निपुणैर्लक्ष्मीकलत्रान्वितः
तीर्थस्नानविधौ चकार धिषणां विद्यातपस्स्तम्भृतः ॥

स हि परमभागवतश्शेषाद्रिराज्ञावशादुदारकर्मणो वरदस्य देवदेवस्य भीमादिभिरिव धर्मानुसारिभिः प्राणैरिव पञ्चभिस्सहितस्स्वहितैरात्मजैराश्रित-लोककलुषाचलकुलिशमधिरुह्य वेङ्कटाचलं तत्र च निमज्ज्य पुनः पुनः स्वामि-पुष्करिणिवारिणि ।

End:

रमया संशोभितं दिवाकरयतिसाक्षात्कृतं तं भगवन्तं संप्रणम्य पुनः पुनस्तत्सन्दर्शनसञ्जातकुतूक(ह)लस्समस्तावीत् ।

आदौ वेदगणैरभिष्टुतगुणो यो लोकनाथो हरिः
सृष्ट्वाण्डं प्रथमं तदन्तरुदकं तस्मिन्विराड्रूपधृत् ।
शेते नापि(भि)सरोजपत्रपुटके यस्यास्ति लोकत्रयं
वन्देहस्त(ऽहं त)मशेषसेवितपदं श्रीपद्मनाभं सदा ॥

* * * *

कतिचिद्वासरान् सोऽयमुवासात्र पुरोत्तमे ।
कुतुकी कञ्जनाभाङ्घ्रिसरोरुहनिरीक्षणे ॥

Colophon:

इति कविमनोरञ्जके(सीतारामचरित्रे) प्रथमोल्लासस्समाप्तः ॥

Transcribed in 1921-22 from a MS. of M.R.Ry. Iṭṭiri Vāriyar, Karakkāṭṭu-Vāriyam, Karakkāṭṭudēśam, Kavalappara post, Shoranore.

(b) स्फुटनिर्णयतन्त्रः, विवृतिसहितः.
SPHUṬANIRṆAYATANTRAḤ WITH COMMENTARY.

Foll. 13*a*--29*b*. Fol. 30 is left blank.

A compendium of astronomical calculations dealing with the following subjects :—

१. भसङ्ख्याकथनम्.	४. भगोलस्फुटानयनम्.
२. मध्यमानयनम्.	५. भूगोलस्फुटानयनम्.
३. मन्दस्फुटानयनम्.	६. Do.

The commentator, whose name is not given, mentions herein the names of prior authors, i.e., Śrīpati, Āryabhaṭa, Varāhamihira, Lolla, Govinda, etc., and their respective works.

Complete.

Beginning :

तत्रादौ पण्डितानेव नत्वा ब्रह्मादिकान् मया ।
स्फुटनिर्णयतन्त्रस्य क्रियामार्गो विलिख्यते ॥

तत्रादौ शिष्टाचारसिद्धमिष्टदेवतानमस्कारं कविः (करोति) ब्रह्माणमित्यादिना—

ब्रह्माणं मिहिरं वरि(सि)ष्ठपुलिशौ गर्ग(र्गं)मुख्यं(नि) लोमशं
श्रीपत्यार्यभटौ वराहमिहिरं लोल्लं च मुञ्जालकम् ।
गोविन्दं परमेश्वरं सतनयं श्रीनीलकण्ठं गुरून्
वन्दे गोलविदश्च (मा)धवमुखान् वाल्मीकिमुख्यान् कवीन् ॥

इति । मिहिरः सूर्यः । ब्रह्मसूर्यवसिष्ठपुलिशलोमशाः पञ्चसिद्धान्तस्य प्रष्टृत्वादाचार्याः । गर्गतन्त्रस्यापि पञ्चसिद्धान्ततुल्यकक्ष्यत्वात् गर्गस्य ब्रह्मादिमध्ये नमस्कारः कृतः । श्रीपतिः सिद्धान्तशेखरादीनां कर्ता । ल(लो)ल्लश्शिष्टधीवृत्तिदाख्यस्य तन्त्रस्य कर्ता । मुञ्जालको मानसस्य कर्ता । गोविन्दो मुहूर्तरत्नादिकर्ता । परमेश्वरो दृग्गणिताख्यस्य करणस्य कर्ता । तस्य तनयो दामोदराख्यः तस्य शिष्यः श्रीनीलकण्ठः । तत्र सङ्ग्रहादीनां कर्ता माधवो वेलो(ला)रोहादीनां कर्ता ।

* * * *

Colophon :

इति स्फुटनिर्णय(तन्त्र)विवृतौ भसङ्ख्याकथनं नाम प्रथमोऽध्यायः ॥

End:

अथ मङ्गलाचरणपूर्वकं तन्त्रमुपसंहरति—

गुरुचरणसरोजध्यानशुद्धात्मनेदं विरचितमपि तन्त्रं यत्र विद्भिः परीक्ष्य ।

अपि च सुदृशमेनं मानवा मानयन्तो विगतविविधतापाः स्युर्ग्रहानुग्रहेण ॥

श्रीगुरुचरणाब्जपरिचर्याविशुद्धहृदयेन मया विरचितमपीदं तन्त्रं यत्र प्रकार-गणितं गोलज्ञैः परीक्ष्य दृक्सम्पातविसंवादादिपरीक्षया हि तन्त्रस्य परीक्षितत्वं स्यात् । अपि च एनं तन्त्रं पाठानुष्ठानादिभिरतिशयेन बहुमन्यमानास्सूर्या-दिग्रहाणामनुग्रहेणाध्यात्मिकादिदुःखैः विरहितास्सुखभाजो भवेयुरिति शिवम् ॥

Colophon:

इति स्फुटनिर्णय(तन्त्र)विवृतौ भूगोलस्फुटानयनं नाम षष्ठोऽध्यायः ॥

समाप्ता चेयं स्फुटनिर्णयविवृतिः ॥

R. No. **3800.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 96. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Uṇikaṇtha Menon, Karakkal-variyam, Vāllapia post, via Pattambi.

Foll. 11*a*, 14—17, 30*b*—32*a*, 41—42*a*, 6?*b*—68*b*, 75*b*—78*b*, 83*b* and 96 are left blank.

तत्त्वबिन्दुव्याख्या.

TATTVABINDUVYĀKHYĀ.

A commentary on Vācaspatimiśra's Tattvabindu, which is a refutation of the Sphōṭa-Vāda of the Vaiyākaraṇas, according to Kumārila-bhaṭṭa's views.

Incomplete.

Beginning:

अभिवन्द्य हरं . . . . ।

हरिं गुहं गुरुं चैव कायेन मनसा गिरा ॥

(वाचस्प)तिकृतौ तत्त्वबिन्दौ व्याख्यानमञ्जसा ।

करिष्ये विदुषामाज्ञां पुरस्कृत्य यथामति ॥

ग्रन्थारम्भेऽभिमतदेवताः . . . . . वाङ्मनःप्रवृत्तालक्षणया प्रणत्या पूजयति—

अहये बुध्न्याय नमो ब्रह्माय नमो नमोऽस्तु (गणप)तये ।
आर्यायै भारत्यै नमो नमो विष्टरश्रवसे ॥

अत्र च प्रमाणं प्रयोजनं च विशुद्धज्ञानदेहायेत्यत्र वार्तिककारीयैरुक्तमनुसन्धेयम् । यथोक्तम्—अस्य च कर्तव्यतायां शिष्टाचारः प्रमाणं प्रयोजनं च विघ्नोपशम इति । एवं च व्याचक्षते—ज्ञानं महेश्वरादिच्छेत् इति स्मृतिमनुविदधानो ज्ञानपुरस्सरत्वात् ग्रन्थनिर्माणस्य ज्ञान . . . स्तावन्महेश्वरं नमस्यति— अहये बुध्न्याय नम इति । विश्वे देवा इतिवदाहिर्बुध्न्य इति पदद्वयं संहत्य भगवतो वाचकमिति द्रष्टव्यम् ।

End ;

चोदितः प्रवर्तितः क इत्युच्यते नान्यथा चेतनः प्रवर्तयितुं शक्यते यतः । ननु च प्रेषणादयोऽप्यवगम्यन्ते लोके तत्कथं कार्याभिधायित्वमेव लिङादेरित्यर्थः । परिहरति—उपाधयो हि ते न शब्दार्थाः । एतदेव विपरीतं पृच्छति के पुनरमी उपाध(यः).

R. No. 3801.

Paper. 10⅝ × 9½ inches. Foll. 252. Lines, 20 in a page Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

महाभारतव्याख्या—दीपिका
MAHĀBHĀRATAVYĀKHYĀ : DĪPIKĀ.

A commentary on the Mahābhārata, which work has been described under No. 1915 of the D.C.S. MSS., Vol. IV, Part I: by Śrīnandana alias Mahābhāratabhaṭṭāraka, son of Lakṣmaṇācārya of Bhāradvājagōtra.

Contains the Ānuśāsanikaparvan only.

Date of transcription—The 7th day of the dark fortnight, corresponding to the 25th day of the solar month Mīna in the Kollam year 266.

Name of the scribe—Paramēśvaram, who belonged to the family of Koccyūrānappa.

Beginning :

ऐश्वर्यमद्भुतं यस्य धर्मस्थित्यर्थमेधते ।
अजन्मने नमस्तस्मै वसुदेवात्म[ने]जन्मने ॥

अथानुशासनिकं पर्व व्याख्यास्यते शमो बहुविधाकारस्सूक्ष्मश्चोक्तं पितामह। इति । शम(:) ज्ञातिवधशोकशमोपाय(:) बहुविधाकारं(रः) बहुविधराजधर्मा- त्मक(कः) सूक्ष्मं(क्ष्मः) सूक्ष्मरूपमोक्षधर्मात्मकमु(उ)क्तम्(:) । साधु मह्यमुप- दिष्टम्(:) । तथापि काचिच्छोकशान्तिर्मम हृदये न विद्यते । अस्मिन्निति । अस्मिन्नर्थे अस्मिन् ज्ञातिवधशोकनिमित्ते । शान्ति शोकशान्त्युपायम् ।

* * * *

Colophon :

इति नन्दनाचार्यविरचितायामानुशासनिकपर्वदीपिकायां प्रथमोऽध्यायः ॥

End :

निगमयति । विश्वास एव कर्तव्यो धर्मो बहुभयच्छले । एवं धर्मानु- शासनमुक्त्वा शिष्यं प्रत्याशीर्वचनमाह—पालयत्विति ।

Colophon :

त्रिचत्वारिंशदूद्विशततमोऽध्यायः ॥

अतः परं कुन्तीसुतो राजेत्यादिरध्यायः । अतः परमेवमुक्त्वा कुरून् सर्वान् इत्यादिरध्यायः ।

Colophon :

इति भरद्वाजकुलतिलकेन श्रीलक्ष्मणाचार्यजन्मना महाभारतभट्टारकाप- रनाम्ना श्रीनन्दनाख्येन विरचितायामानुशासनिकदीपिकायां पञ्चचत्वारिंशो(शदु- त्तर)द्विशततमोऽध्यायः ॥

आनुशासनिकपर्वव्याख्यानं सम्पूर्णम् ॥

R. No. 3802.

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 181. Lines, 20 in a page. Devanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Gōpalarāmabhadra- cāryasvāmin, Karakkurichi, Tinnevelly district.

श्रीभाष्यविवरणम्.

ŚRĪBHĀṢYAVIVARAṆAM.

A commentary on the Śrībhāṣya of Rāmānujācārya.

Wants the beginning; otherwise complete.

Beginning:

पूर्वपक्षस्यार्षत्वमाह—जग . . . . त(य)तो वा इमानि इति वाक्यमित्यर्थः . . . . त्यादिना। शब्द एवेत्येवकारेणानुमानव्यवच्छेदः। फलितमाह—. . . . . . आकाङ्क्षामुत्थापयति—कुत इति। उत्तरमाह—ईक्षतेरिति।

* * * *

अधिकरणार्थमुपसंहरति—अत इति। सिद्धं सिद्धान्त इत्यर्थः।

Colophon:

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये (श्रीभाष्यविवरणे) प्रथमस्याध्यायस्य प्रथमः पादः॥

End:

ईश्वरवाक्यमेवाह—प्रियो हीति। सूत्राभ्यासवैयर्थ्यमाशङ्क्याह—सूत्राभ्यास इति। इति सर्वं समञ्जसमिति। अथातो ब्रह्मजिज्ञा(ज्ञासे)त्यारभ्यानावृत्तिश्शब्दादनावृत्तिश्शब्दादित्येवमन्तैरधिकरणैर्निर्णीतं सर्ववेदान्तप्रमेयं समञ्जसं प्रामाणिकमिति भावः॥

Colophon:

इति शारीरकशास्त्रे (श्रीभाष्यविवरणे) चतुर्थस्याध्यायस्य चतुर्थः पादः॥
समाप्तश्चाध्यायः॥

Date of transcription—Wednesday, the 9th day of the bright fortnight of the lunar month Bhādrapada in the year Kīlaka.

Name of the scribe—Śrīnivāsa.

R. No. 3803.

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 40. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

Foll. 39 and 40 are left blank.

महाभारततात्पर्यप्रकाशिका.
MAHĀBHĀRATATĀTPARYAPRAKĀŚIKĀ.

A treatise purporting to state that the aim of the Mahābhārata is to bring out the supriority of Viṣṇu as the Supreme Being.

Wants the beginning and the end of the Nārāyaṇīya of Mōkṣadharma in the Śāntiparvan and all the Adhyāyas are in disorder.

Beginning:

दक्षिणा दिक् बुद्धिगोचरः। एवमुत्तरदेशस्थानामपश्चिमा दिक् प्राक् आदित्योदयहेतुत्वात् । एवं मेरोः प्राग्भागे स्थितानामुत्तरा दिक् । एवं दक्षिणदेशे स्थितानामादित्योदयप्रतिपत्तिहेतुत्वात् प्राची दिक् प्राक् । अध इत्यण्डकपालस्याधो भागः कथ्यते । उभयत्र स्वमिन्द्रियं चक्षुरादीन्द्रियं विष्णोर्विधारणार्थम् । समं तुल्यं सर्वदा जनाः निरुक्तविद इत्यर्थः । निरुक्तं निर्वचनम् । वदविदुषः वैदिकाश्शब्दार्थचिन्तकाः ते उभे(भये) मां विष्णुं गायन्ति सामस्वरेण स्तुवन्ति । प्राग्वंशे यज्ञशालायां द्यावापृथिव्योस्साधारणार्थं ब्रह्माण्डस्याधः प्राक् च स्वमिन्द्रियं वर्तते मम समं यस्मात्तस्माद्वेदविदः प्राग्वंशे निरुक्तं गायन्ति --अधोऽक्षज इति ।

* * * *

Colophon:

इति पञ्चषष्टिशततमोऽध्यायः ॥

End:

मोक्षशास्त्रेषु त्रयं नित्यमित्याह—साङ्ख्यमिति । सर्वं कर्मजातं तस्माद्दृष्टो वेदाद्वेदवेद्याच्च भवतीत्युपसंहारः ॥

Colophon:

इति द्विसप्ततिशततमोऽध्यायः ॥

सात्वते समाप्ते जनमेजयश्चोदयति—मोक्षशास्त्रस्य कुत्र तात्पर्यमिति । पूर्वं चोदितस्य विशेषं विज्ञातुम् ।

* * * *

जीवशब्दवाच्यानां मया सृष्टानामाधारमधिष्ठानं नित्यशुद्धं ब्रह्म तत् प्रवक्ष्यामीत्यर्थः । तर्हि सृष्टानां का गतिरिति.

R. No. 3804.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. K. C. Valiya rāja of Kottakkal, Malabar district.

(*a*) रामायणव्याख्यानम्, रामायणमाहात्म्यसहितम्.

RĀMĀYAṆAVYĀKHYĀNAM WITH RĀMĀYAṆA-MĀHĀTMYA.

Foll. 1*a*—14*b*.

A commentary on the Vālmīkirāmāyaṇa, which work has been described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I. The Māhātmya is taken from the Skāndapurāṇa.

Contains the Saṅkṣēpasarga only and wants the beginning.

Beginning:

विशेषेण दिव्यकाव्यविषयादिश्रवणाधिकारसम्पत्तिर्द्योतिता । वक्तुरप्युक्तविशेषणैस्सर्वज्ञत्वं, सर्ववक्तृत्वं, सर्वानुग्रहशक्तिमत्त्वं च सूचितम् । प्रश्नाभिप्रायः—को न्वस्मिन्नित्यादि । नु शब्दो वितर्के । अस्मिन् लोके भूलोके साम्प्रतं सम्प्रति । गुणवान् को नु सहजनित्यानन्दनित्यकल्याणगुणवान् । गुणाश्शक्त्यादयस्सत्त्वरजस्तमांसि, तद्वान् वा । गुणश्शूलम् । केचिच्छूलपाणिर्गुणवान्—इत्याहुः । तत्कथम्? नीलकण्ठविरूपाक्षशङ्करा इति ते त्रयः । तेषां शिष्यास्सहस्राणि चतुर्दश तपोऽतपन् ॥ तेषां प्रसन्नो भगवाञ्छङ्कर उमया सह । वरं ब्रूतेत्युवाचैनांस्तदा ते प्रोचुरीश्वरम् ॥ संसारविषवृक्षं त्वं छिन्धीति कठिनं वचः । तच्छ्रुत्वा, राक्षसान् वो हनिष्यामि रामो भूत्वाहमेव तु—इतीश्वरेणोक्तत्वात् ।

* * * *

पठन् क्षत्रियस्स्यात्तदासौ भूमिपतित्वमीयात् । पण्यफलत्व प्य(पण्य) द्रव्यैस्साध्यं मूलाद्द्विगुणत्रिगुड(णं) फलं यस्य तस्य भा(व)स्तत्त्वं शूद्रः जनः द्विजदासोऽपि तदितरसर्वाः(भ्यः) प्रजाभ्यो महाश्रैष्ठ्यमीयात । देहान्तरे स्वोपरिवर्णप्रा . . . मीयात् ॥

Colophon:

इति श्रीमद्रामायणे सङ्क्षेपः प्रथमः सर्गः ॥

नारदस्य त्विति ।

कथां यस्तामुपाश्रित्य पापि . . . . . . ।

कथ(य)न्त्येव सर्वेषु भुवनेषु नगात्मजे ॥

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।

End:

मयाप्युक्तं महाभागा युष्माकं मुनिसत्तमाः ।
रामायणस्य माहात्म्यं किं भूयश्श्रोतुमिच्छथ ॥

Colophon:

इति स्कान्दे पुराणे अगस्त्यसंहितायां ब्रह्मवसिष्ठसंवादे पार्वती(त्यै) परमेश्वरेण प्रोक्तं रामायणमाहात्म्यं नाम पञ्चशततमोऽध्यायः ॥

(*b*) रामायणरहस्यम्.

RĀMĀYAṆARAHASYAM.

Foll. 15*a*—20*a*. Foll. 20*b* is left blank.

Same work as that described under No. 14559 of the D.C.S. MSS., Vol. XXV; with slight difference in the end. By Vidyāraṇyamunīśvara.

Complete.

Beginning:

गुणाढ्यत्वं कारणत्वं शरण्यत्वं प्रकाशता ।
प्रकाशित्वं च निखिलैर्ध्येयता च नियन्तृता ॥
एते ब्रह्मगुणा नित्या गायत्रीपादबोधिताः ।
प्रथमन गुणाढ्यत्वं द्वितीयेन च लक्षणम् ॥
तृतीयेन शरण्यत्वं चतुर्थेन प्रकाशता ।
पञ्चमेन पदेनैव प्रकाश(शि)त्वं प्रबोध्यते ॥

End:

दृश्यते च प्रबन्धान्ते मन्त्रान्तव्यञ्जनाक्षरम् ।
तस्मादिदं त्वादिकाव्यं गायत्रीं महतीं विदुः ॥
इत्येतदादिकाव्यार्थरहस्यं साम्प्रदायिकम् ।
विद्यारण्यमुनिर्ब्रह्मविदां प्राकाशयन्मुदा ॥

Colophon:

इति परमहंसपरिव्राज(क)परिबृढेन मायवा(ना)रण्यवरदयालब्धबोधेन विद्यारण्यमुनीश्वरेण विरचितं श्रीमद्रामायणरहस्यं सम्पूर्णम् ॥

(c) रामायणसारसङ्ग्रहः, सव्याख्यः.

RĀMĀYAṆASĀRASAṄGRAHAḤ WITH COMMENTARY.

Foll. 21*a*—48*b*.

Similar to the work described under R. No. 3500 ante.

Wants the beginning and breaks off in the second Sarga of the Āraṇyakāṇḍa.

Beginning :

. . . . . (श्र)तयः पञ्चमानुगमाः स्मृताः ।
विकल्पिनी च शान्ता च हृदयोन्मीलिनी तथा ॥
एताश्चतस्रः श्रुतयो दैवतानुगताः स्मृताः ।
विस्तारिणी प्रसन्ना च निषादानुगते उभे ॥

* * * *

देवा वरुणेन यज्ञे जनकाय दापयन्निति । परशुरामकार्मुकस्य वरुणहस्ते निक्षेपणं दिव्यं देवेष्वेवास्तु किं मनुष्यहस्तेष्विति विशेषेण तस्य हस्ते निक्षेपणं स देवायुधानां निधायको दायश्चेति ॥

श्रुतवानसि तत्कर्म कृतवानस्मि भार्गव ।
अनुरुद्धा(ध्या)महे ब्रह्मन्पितुरानृण्यमास्थितम् ॥

अनुरुद्धा(ध्या)महे अनुसरामः पितृहन्तृणां क्षत्रियाणां वधे नु वैरनिर्यातनं पितुरानृण्यमास्थितवन्तमनुष्ठितवन्तम् । पितृभक्त्या किल क्षत्रियविशंसनं कृतवानिति तत्सहामः ॥

Colophon :

इतीश्वरदीक्षितीये रामायणसारसङ्ग्रहे बालकाण्डस्समाप्तः ॥

End :

ईश्वरार्हपदार्क्षो(र्थो)पस्थापनेनेति शेषः । अरा . . कामानः ॥

Colophon :

श्रीमदारण्यकाण्डे प्रथमस्सर्गः ॥

सः अथ रजन्यां तत्रोपविश्य प्रातस्तत्रत्यमुनिना प्रच्यवनमवगाहमानस्य विराधसंसर्गः । कृतातिथ्य इत्यादि । सूर्यस्योदयनं प्रतीत(ति) । उदयकाल इत्यर्थः ।

* * * *

अन्यतुच्छ(मि)ति न्यायेन एकस्य सहायत्वेन इतरस्यापि सभार्यत्वमिति जल्पति ॥

R. No. 3805.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Harihararaāja-guru, Kadala post, Chochinajagannathapuram, Ganjam district.

Fol. 37*b* gives the owner's name of the original MS. Fol. 38 is left blank.

रुक्मिणीपरिणयः.

RUKMIṆĪPARIṆAYAḤ.

A poem describing the story of the marriage of Rukmiṇī with Kṛṣṇa: by Mahāpātraparamānanda.

Apparently complete.

Beginning :

दन्तालना(वला)ननं देवं निष्प्रत्यूहं निचिण्डिलम् ।
सिन्दूरसुन्दरं वन्दे चन्द्रशेखरनन्दनम् ॥
श्रिया जितस्मेरसरोजवैभवं तवाश्रये भारति पादपङ्कजम् ।
तमोऽपहा यन्नखमण्डलत्विषो जनस्य कुर्वन्ति सदर्थबोधनम् ॥
अनारतं गोपवधूमनोहरो हरिर्मदीये स हृदि प्रकाशताम् ।
करोति कारुण्यकटाक्षलीलया क्षणाज्जनं योऽखिलसिद्धिभाजनम् ॥

* * * *

इहाशु दोषः कृतिनोऽपहृत्य मे कृतौ करिष्यन्ति गुणस्य रोपणम् ।
पिबन्ति मेघा लवणोदधेः पयो यतोऽभिवर्षन्ति सुधासमं पुनः ॥
अयुङ्क्त यं कुण्डिननाथनन्दिनी निवेद्य सर्वस्वमनोरथं रथम् ।
स उत्तमश्लोकविलोकनोत्सुकः समाययौ द्वारवतीं द्विजोत्तमः ॥

* * * *

उत्थायाथ वरासनात्क्षणमपि स्थित्वा च तत्रागतान्
सस्निग्धस्मितभाषितामृतरसैः सम्प्रीणयन् भूरिशः ।
सर्वानेव निजालयानुगमनेऽनुज्ञाय स श्रीपतिः
तं विप्रं पुरतो विधाय रुचिरं प्रापान्तरं सद्मनः ॥

Colophon :

इति महापात्रपरमानन्दकृते रुक्मिणीपरिणये महाकाव्ये प्रथमस्सर्गः ॥

End :

एकत्रापि श्रयदृतुगुणः श्रीविलासं समन्ता-
दित्थं तस्यास्सरसिजदृशः प्रीतये भाषमाणः ।

सद्यस्तस्मिन्नुपवनवरे चित्तसंमोहद(क्षः)
(भूयो) भूयः कमलनयनः क्रीडनोत्कण्ठितोऽभूत् ॥

Colophon :

इति श्रीमहापात्रपरमानन्दकृतौ रुक्मिणीपरिणये महाकाव्ये एकादश-स्सर्गः ॥

R. No. **3806.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 154. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇabhāratī-Kappiyārsvāmigaḷ, Mūppil-sthānam, Naḍuvil-maṭham, Trichur, Cochin State.

ऐतरेयब्राह्मणभाष्यम्.

AITARĒYABRĀHMAṆABHĀṢYAM.

A commentary on the Aitarēyabrāhmaṇa, which work has been described under No. 32 of the D.C.S. MSS., Vol. I, Part I: by Gōvindasvāmin, son of Viṣṇu and Aravindā of Saṅkṛti family.

Contains the Adhyāyas 1—40 complete.

Beginning :

येनाधिकार्थेतरशब्दजल्पनप्रशोकतप्ताम्बुमनःप्रसादिना ।
अदृष्टपूर्वा श्रुतिरभ्युदीरिता तमैतरेयं शिरसा नतोऽस्म्यहम् ॥
सर्वज्ञेनापि यत्कर्तुमशक्यं तत्पुनर्मया ।
अल्पज्ञेनापि सम्मोहाच्छ्रद्धया च चिकीर्ष्यते ॥
आत्मजेनारावन्दाया विष्णोस्सङ्कृतिजन्मना ।
गोविन्देनैतरेयस्य व्याख्यानं क्रियतेऽधुना ॥
क्वचिद्विधिः प्रशंसा च केषु चिद्विधिरेव च ।
केषु चित्स्तुतिरेव स्यादेवं निन्दानिषेधयोः ॥
ब्राह्मणान्नायसामर्थ्याद्गतामयनिको विधिः ।
द्वादशाहविधिर्वा स्यात्प्रसङ्गादन्यदुच्यते ॥
* * * *
दीक्षा च दीक्षणीया च दीक्षायास्स्थापनानि च ।
याज्यानुवाक्ये संयाज्ये विशेषफलसत्यते ॥

अग्निर्वै देवानामवम इत्यादि । अवमः अन्तिकः(मः) । परमः प्रथमः सर्वशब्दस्य प्रकृतापेक्षत्वात्सौमिक्यो देवताः परिगृह्यन्ते । तदन्तत्वं चोदवसानीयाग्न्यपेक्षया । एवमङ्गप्रधानदेवतापरिग्र(ह)ः सिद्धो भवति ।

* * * *

Colophon:

इत्यैतरेयब्राह्मणव्याख्याने गोविन्दस्वामिनि(मीये) प्रथमोऽध्यायस्समाप्तः ॥

End:

जाग्रति जागृयादेव जागृ निद्राक्षये । प्रबुद्धो भवेदित्यर्थः । अश्ममूर्धा अश्मेव सुदृढो यस्य मूर्धा भवति सोम(ऽश्म)मूर्धा । तमासि विद्विषन्तं क्षिप्र स्तृणुते हिनस्तीत्येवं ब्राह्मणं व्याख्यातम् ॥

Colophon:

इत्यैतरेयब्राह्मणभाष्ये गोविन्दाचार्यप्रणीते गोविन्दस्वामिनि(मीये) चत्वारिंशोऽध्यायः समाप्तः ॥

Foll. 153*b* and 154*a* contain small portions of Vēdasvarūpa and Dharmanirvacana. Fol. 154*b* is left blank.

R. No. **3807.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śrīnivāsācāriyar, Āyanārtirumāḻigai, Srirangam.

सूक्तिसाधुत्वमालिका.

SŪKTISĀDHUTVAMĀLIKĀ.

A treatise on the Viśiṣṭādvaita-Vēdānta purporting to prove that the passages contained in the Śrībhāṣya Śrutaprakāśikā and other works are appropriate and are in accordance with the rules of grammar, etc.: by Vīrarāghava son, of Nṛsiṁha of Vādhūlagōtra and disciple of Varadārya.

This is also called Sūktisādhutvadīpikā.

Contains up to the end of the Rahasyavyākhyānādhikāra.

Beginning:

प्रणम्य नरसिंहार्यवरदार्यौ विभावये ।
श्रीभाष्यादिप्रबन्धस्य सूक्तिसाधुत्वमालिकाम् ॥

तत्र तावत् श्रुतप्रकाशिकारम्भे भाष्यं चेव्यवृणोत्स्वयं यतिपतिरित्यादि । नन्वत्र व्यवृणोदिति लङ् दुर्लभः लिङ्निमित्ते लङ् क्रियातिपत्तौ इत्यनु-

वर्तमाने भूते चेतिसूत्रेण हेतुहेतुमद्भावविषये भूते लङो विधानात् । न च सतो हेतुहेतुमद्भावविषयस्याविवक्षितत्वात् न लङिति वक्तुं युक्तम्; तथा सति विवक्षितार्थासिद्धेर्हेतूक्त्या विना अनवस्थाप्रसञ्जनायोगात् ।

* * * *

ताद्धिता इति बहुवचनबलेन स्थिरशब्दादपि इमनिजुपपत्तेः । एवं च तुरीयपादारम्भे भाष्यप्रयोगाद्युपपत्तिः ।

* * * *

Colophon :

इति सूक्तिसाधुत्वदीपिकायां जिज्ञासाधिकरणम् ।

End :

अतो जगद्व्यापारवर्जमिति सौत्रपदस्य तद्रहितमित्यर्थनिर्देशो युक्तः । वृत्तिग्रन्थे तु अध्याहृतभवतिक्रियाविशेषणत्वान्नपुंसकत्वं भावार्थघञन्तस्यैव पुंलिङ्गत्वनियमादत ऐश्वर्यविशेषणत्वेऽपि क्लीबत्वोपपत्तिः । अनुक्तमन्यदुक्तदिशानुसन्धेयम् ॥

Colophon :

इति सूक्तिसाधुत्वमालिकायां वाक्यप्रबन्धाधिकारः समाप्तः ॥

जलजभवपुरन्ध्रीचारुधम्मिल्लमल्लीकुसुमवरमधूलीशीकरैश्शीतलासु ।
यतिपरिबृढसूक्तिष्वीदृशीष्वप्यमूषां विवृतिषु रमतां मे वीतदोषा मनीषा ॥

इति वाधूलकुलजलधिकौस्तुभश्रीनृसिंहसूरिसम्भवेन तच्चरणपरायणेन श्रीमद्वरदगुरुकरुणावशाधिगतनिगमशिखरयुगलहृदयेन वीरराघवदासेन विभावितायां सूक्तिसाधुत्वमालिकायां वाक्यप्रबन्धाधिकारः ॥

श्लोकप्रबन्धेषु स्तोत्ररत्ने ताव(त्) सर्वं सहे मे सहजं हि दुःखमिति । नन्वत्र सर्वं सह इत्येकं वाक्यं, मे सहजं हीत्याद्यपरं वाक्यम्; तथव व्याख्यातृभिर्व्याख्यातं च । अत्र द्वितीयवाक्यादा मे इत्ययमादेशो न भवति; समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इत्यनुशासनेन ओदनं पच तव भविष्यतीत्यत्र तवेतिवन्ममेति हि भाव्यमिति चेदत्राहुः ।

* * * *

एवं स्तोत्ररत्नगद्यत्रयादिव्याख्यानेषु द्रमिडोपनिषद्व्याख्यानेषु च यथायथं निर्वाहा(अ)नुसन्धेयाः ॥

गिरां व्याकर्तारो गरिमनिधयः केऽपि कृतिनः
स्वयं सा वाग्देवी जलजभवजिह्वाग्रनिलया ।

हयास्यो वा साक्षादिति जगति मीमांस्यविभवाः
क्षमन्तां मद्दोषं सपदि मम पूर्वे गुरुवराः ॥

Colophon:
इति सूक्तिसाधुत्वमालिकायां रहस्यव्याख्यानाधिकारः ॥

R. No. **3808.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Tarakkāḍu Uṇikaṇṭha Menon, Tarakkāḍu-Variyam, Vallupuya post, Pattambi.

Foll. 35*b* and 36 are left blank.

नारायणीयम्.
NĀRĀYAṆĪYAM.

Similar to the work described under No. 10085 of the D.C.S. MSS., Vol. XVIII.

Complete.

Beginning:

सच्चित्सन्तोषपूर्णात्मकमखिलपरिव्याप्तमाद्यन्तहीनं
निर्द्वन्द्वं विश्वकन्दं परमसुखदमन्विष्यमाणं त्रयीभिः ।
शुद्धं देहेन्द्रियाद्यैर्विरहितमपि यत्तत्परं ब्रह्म तावत्
भक्तानां मूर्तिमद्भात्यहह गुरुमरुत्पत्तनेऽनुग्रहार्थम् ॥

End:

विष्णो दुर्वारगर्वान्वितनृपतिकृतक्ष्माभरध्वंसनार्थः
कृष्णो भूत्वाथ कृत्वा खलजनविहतिं शिष्टरक्षां तदन्ते ।
पुष्णन् द्वेषानुरागप्रणयभरवशात् त्वद्गतस्वान्तनॄणां
विश्वात्मन् मोक्षलक्ष्मीं मम च दिश विभो वाय्वगारेश मोक्षम् ॥
कृष्ण त्वदङ्घ्रिभजनं भयहारि मन्ये मग्नस्य मर्त्यनिवहस्य भवाब्धिमध्ये ।
यस्त्वत्परस्स तु चरन्नपि मोक्षमार्गे कुत्रापि न स्खलति तस्य पुनः कुतो भीः ॥

* * * *

दुःखानि जन्तुषु विलोक्य विरक्त[भक्त]बुद्ध्य(ा)लब्ध्वा गुरोः करुणयातवतत्त्वबोधम् ।
त्वज्जन्मकर्मकथनोऽमितभक्ति माविद्यां तरेयमानिलेश भवत्प्रसादात् ॥

Colophon:

नारायणीयं सम्पूर्णम् ॥

R. No. 3809.

Paper. 10¾ × 9⅝ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vīrabhadramiśragāru, Badagada, Ganjam district.

प्रबोधचन्द्रोदयव्याख्यानम्.

PRABŌDHACANDRŌDAYAVYĀKHYĀNAM.

A commentary on the Prabōdhacandrōdaya, which work has been described under R. No. 1108 ante : by Caṇḍīdāsa.

Complete.

Beginning:

प्रणम्य सर्वामरवृन्दवन्द्यं मायामृगेन्द्रं कविचण्डिदासः ।
प्रबोधचन्द्रोदयदुष्प्रबोधपदार्थजातं विशदीकरोति ॥

इहानाद्यविद्यामूढत्वेन सहजसान्द्रानन्दमयमात्मस्वरूपमननुसन्धाय संसारवासनासहस्रव्याप्तानपि मोक्षोपायपराङ्मुखानपि प्राणिनः प्रेक्ष्य परमकारुणिकः (श्री)मान् श्रीकृष्णमिश्रः सततसंसारसुखासक्तमपि जनं

* * * *

वीतातत्रतरणं तद्रूपं मृष्टकलङ्कदर्पणचित्स्वरूपेणावतिष्ठत इति वक्तुमुपक्रमते । तदारम्भे . . . विघ्नविघातायाभीष्टदेवताकारेणात्मस्वरूपमेव सर्वानुस्यूतमुपास्यतया निबध्नाति—मध्याह्नेति । यदज्ञानतः यस्याविद्यातिरोधानेन स्वरूपाप्रकाशात् त्रैलोक्यं स्वार्थलक्षणम् ।

End:

पर्जन्य इति । उपप्लवा उपद्रवाः । उन्मेषस्साक्षात्कारः । तमोऽविद्याऽयोमोहः । विषयेषु गृहक्षेत्रादिषु ममतया परिग्रहेणातङ्को विना शङ्कया विह्वलत्वम् । स एव दुस्तरत्वात्पङ्कस्तं तरन्तु तमपहाय निरतिशयानन्दाविर्भावरूपं मोक्षमाप्नुवन्तु । सर्वतश्चैवम् ॥

Colophon:

इति श्रीचण्डीदासकृतायां प्रबोधचन्द्रोदयटीकायां षष्ठोऽङ्कः समाप्तः ॥

R. No. 3810.

Paper. 10⅝ × 9⅝ inches. Foll. 43. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Gōdavaramai Rāja, 12th Prince, Cranganore, Cochin State.

(*a*) कुमारीविलसितम्.

KUMĀRĪVILASITAM.

Foll. 1*a*—18*b*.

A short drama describing the story and holy deeds of Kumārī, who is no other than Durgā, worshipped at Prapāpura in the Kērala country: by Sudarśana, son of Mahīsāra of Bhāradvājagōtra.

Complete.

Beginning:

यस्याः प्राहुस्सकलजगतीमाङ्गिकं वाचिकं च
स्फीतं नानानिगमनिवहं दीव्यदाहार्यलक्ष्मीम् ।
चन्द्रादित्यप्रमुखनिखिलज्योतिराद्या नदी(टी)सा
लक्ष्मीमिष्टां दिशतु भवतां सत्त्वसम्पन्नमूर्तिः ॥

(नान्द्यन्ते) ततः प्रविशति सूत्रधारः—परिक्रम्य आदिष्टोऽस्मि—सकलसुरासुरचूडामणिमरीचिराजिनीराजितचरणारविन्दायाः भीषणतरदनुजबलोन्मेषमोषणपोषितदिविषत्प्रहर्षायाः

* * * *

त्रिभुवनप्रथितप्रपापुरनिरन्तरविहारिण्याः सुदुस्तरतरदुरितजलधितारिण्यास्सान्द्रतरकारुण्यसुधाप्रवाहसारण्या भगवत्या नारायण्या दिव्योत्सवसेवाप्रसङ्गतः सङ्गतैरनेकदेशवास्तव्यैरनवद्यविद्यावैशारद्यसाम्राज्यमूर्धाभिषिक्तैरतिमहत्त्वारोपण पुरस्स(र)मार्यमिश्रैः ।

* * * *

सूत्रधारः—आर्ये किं न जानासि तम् ?(यः) खलु सकलजनश्रवणपारणायमानगुणसमुदायः ।

भारद्वाजमहान्वयेऽजनि महीसाराभिधानो बुधः
श्रौतस्मार्तपुराणकर्तृकविताळङ्कारसङ्केतभूः ॥
तस्मात्सोऽयमभूत्सुदर्शन इति ख्यातोऽनुगृह्णाति यं
निर्व्याजं दयया प्रपापुरकृताला(बा)सा मुहुर्मातृका[:] ॥

तस्य खलु भगवतीप्रसादलब्धकवितासौभाग्यस्य—
वाणीवतंसकलिकामकरन्दस्यन्दमाधुर्याः ।
जनयन्ती(न्ति) वाग्विलासास्सहृदयहृदयेषु सान्द्रमानन्दम् ॥

तेन हि कविना कुमारीविलसितं नाम प्रेक्षणकं विधाय मम हस्ते समर्पितमासीत् । तेनैवेमां परिषदं प्रहर्षयावः । नटी—जुंजइ । सूत्रधारः—आर्ये पश्य नस्सामाजिकसामग्रीः ।

परिषद्विशेषविदुषी वयमपि नाट्येषु विदितवैदग्ध्याः ।
अभिन(ने) यो भगवत्या नारायण्या बलिमहच्छ्रे(श्रे)यान् ॥

End :

नाथ किमतः परमं प्रियं मे—

दृष्टं(ष्टः) केरलदेश एष निखिल(:)त्रैलोक्यभूषापदं
प्राप्तं तत्र महत्प्रपापुरमिदं तस्यापि भूषापदम् ।
भक्तत्राणपरायणा त्रिणयनप्रेमास्पदं मातृका
दृष्ट्योर्गोचरतामुपैति जगति प्रार्थ्यं किमातः परम् ॥

तथापीदमस्तु—

सन्तस्सन्तु विमत्सराः कविगिरां गुम्भेषु नित्यं त्रयी-
वेद्ये सामनि शक्तिरूपिणि चिरं भक्तिर्ममास्तु स्थिरा ।
भक्तेभ्यः प्रददातु वाञ्छितफलाद्य(न्य)(क्ष्णो)स्समुद्यद्दया-
वीचीशीकरशीतलैर्भगवती नारायणी वीक्षणैः ॥

इति निष्क्रान्तौ ॥

एवमस्त्विति सर्वे निष्क्रान्ताः ॥

Colophon :

कुमारीविलसितं नाम प्रेक्षणकं समाप्तम् ॥

(*b*) कुमारीविलसितम्, सव्याख्यानम्.

KUMĀRĪVILASITAM WITH COMMENTARY.

Foll. 19—22*a*. Fol. 22*b* is left blank.

Same text as that described under subdivision (*a*) of the same number. The work is followed by a commentary.

Incomplete.

Beginning :

आज्ञप्तो विदुषां गणैरभिनवे नाट्ये तदन्वेषण-
व्यग्रो वल्लभया सुदर्शनकृतस्संस्मारितः प्रेक्षणः ।
प्रातर्माधवगेययाथ गिरिशं द्रष्टुं मुनीन्द्रोदित-
स्थानालोकनलोलुपस्य वचनश्रोता नटः शोभते ॥

कैलासान्मिथुनं विमानवरगं काशीं च गोदावरीं
काञ्चीं वेगवतीं च हाटकसभां दृष्ट्वा गतं केरलान् ।
मध्याह्ने समुपेत्य वह्नितटिनीं वीथीं विहारावधौ
नत्वाम्बां निशि सेवते बलिमहं यद्द्वन्द्वमव्याद(दि)दम् ॥

* * * *

स जयत्येष कविस्सुदर्शनः प्रेक्षणकमिह कुमारीविलसितमुदितसुदर्शनेनेदं श्रुत्वाद्रियते देवी वरिवसिता प्रतिदिनं प्रपापुर्याः । इह खलु सर्वमङ्गलायाः श्रीमच्चरणारविन्दभक्तिरसप्रधानप्रबन्धं चिकीर्षुः कविः प्रारिप्सितपरिसमाप्ति-प्रत्यूहविध्वंसनायादौ संविद्रूपपरदेवतानुस्मृतिपूर्वकमाशीर्वादरूपं मङ्गलमा-चरति—यस्याः प्राहुरिति ।

यस्याः प्राहुस्सकलजगतीमाङ्गिकं वाचिकं च
स्फीतं नानानिगमनिवहं दीव्यदाहार्यलक्ष्मीम् ।
चन्द्रादित्यप्रमुखनिखिलज्योतिराद्या नटी सा
लक्ष्मीमिष्टां दिशतु भवतां सत्त्वसम्पन्नमूर्तिः ॥

अत्र स्वाभिमतदेवताया नटीत्वमारोपय(प्य)तदुचितानि वि(शे)षणान्य-भिधत्ते । सकलजगतां यस्या आङ्गिकं प्राहुः(जगत्) अविकृतेरिति वा पाठः । यस्या अविकृतेः जगत् आङ्गिकं प्राहुः । उच्यते ।

End :

निजैकचक्रस्खलनभीतेन भगवता सूर्येणाविदूरं मुच्यमानैः महद्भिः प्रासादैः परिवृता अवधीरणाकुपितकुम्भसम्भवप्रस्तुतिपु.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paramēśvara Nambūdirippāḍ, Kanipayūr-mana, Kannankulam post, Cochin State.

(*c*) मयमतवास्तुशास्त्रम्.

MAYAMATAVĀSTUŚĀSTRAM.

Foll. 23*a*—36*a*. Fol. 36*b* is left blank.

Same work as that described under Nos. 13034 and 13038 of the D.C.S. MSS., Vol. XXII, but with slight difference.

Contains the Pratimālakṣaṇa or Pramāṇādhikāra, Samānavidhāna and Nayanōnmīlanakrama only.

Beginning :

मृत्तिकातरुपाषाणलोहद्रव्यैस्सनातनैः ।
कर्तव्यं सकलं बेरं तन्मानमधुनोच्यते ॥

धामगर्भगृहस्तम्भद्वारहस्ताङ्गुलैस्तु षट् ।
भेदैर्मानं तु वक्ष्येऽहं मूलबेरायतं क्रमात् ॥

*　　　*　　　*　　　*

Colophon:

इति मयमते वास्तुशास्त्रे प्रमाणाधिकारो नाम ॥

End:

इदं परोक्तं ह्यषिणा मयेन वै नृणां सुराणामिव वास्तुलक्षणम् ।
तथा हि तावज्जगतस्समासतः प्रकीर्तितं तद्रविणा मयेन तु ॥

Colophon:

इति मयमते वास्तुशास्त्रे नयनमोक्षणं नाम ॥

The scribe adds—

श्रीरामो भावसेव्ये कलौ याते दिने पुनः ।
लिखितं येन केनापि शङ्कराख्येण पुस्तकम् ॥

कलिदिनसङ्ख्या (१७४४९२२).

Foll. 37*a*—39*a* contain the different readings of the Avimāraka. Foll 39*b* gives the different readings of the Mattavilāsaprahasana. Fol. 40 gives the different readings of the Ūrubhaṅga. Foll. 41*a*—42*b* give the different readings of the Pañcarātra. Fol. 43*a* contains a small portion of the different readings of the Subhadrādhanañjaya. Fol. 43*b* is left blank.

R. No. 3811.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Iṭṭiri Vāriyar, Karakkāṭṭu-Vāriyam, Karakkāṭṭu-dēśam, Kavalapara post, Shornore.

Fol. 38*b* gives the name of the owner of the original MS.

सङ्गीतविषयः, केरलभाषाटीकासहितः.

SAṄGĪTAVIṢAYAḤ WITH MALAYALAM MEANING.

Similar to the work described under No. 13018 of the D.C.S. MSS. Vol. XXII.

Incomplete.

Beginning :

यस्मादेते विस्फुटं प्रस्फुरन्तो वर्णास्सम्भूयानुयातात्मजाताः ।
विश्वात्मत्वेनास्थितास्तत्प्रपद्ये ज्योतिर्मात्रं वैभवं नादरूपम् ॥

* * * *

नाद(दात्)श्रुतिसमुत्पत्तिः श्रुतिभ्यस्स्वरसम्भवम्(:) ।
नाडिभ्यश्श्रुतिसम्भूतिर्नाडीनां स्थानमुच्यते ॥

* * * *

इडा (च) पिङ्गलाख्या च सुषुम्ना अ(चा)स्थिजिह्विका ।
अलम्बुसा यथा पूषा गान्धारी शङ्खिनी कुहूः ॥
देहमध्यगता एका मुख्याः स्युर्दश नाडयः ।

* * * *

नाकारं(रः) प्राण इत्युक्तो दकारश्चानु(न)लो मतः ।
अग्निमारुतसंयोगान्नादस्समुपपद्यते ॥

End :

नागध्वनिश्च काम्बोजी लघ्वीडोम्बकृतिस्तथा ।
आभीरी अपराभीरी श्रीकण्ठा सैन्धवी वरा ॥
सैन्धवी भिन्नपौराली चोराली मधुकर्यपि ।
सालवाहिनिसौराष्ट्री भर्माणी च पुलिन्दिका ॥

* * * *

मार्गो(र्गः) सार्वत्रिकं(कः) प्रोक्तं(क्तः) देशिदेशसमुद्भवा ।

* * * *

शब्दशास्त्रपरिज्ञानं छन्दोविचितिनैपुणम् ।
अभिधानेषु दक्षत्वं कलानामपि कौशलम् ॥
सप्तगीतिप्रवीणत्वं चातुर्यं रसभावयोः ।

अल.

R. No. **3812.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 92. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nilakaṇṭha Nambudirippāḍ, Kannanūr-mana, Ottapalam, Malabar district.

Foll. 91 and 92 are left blank.

रघुवंशव्याख्या.

RAGHUVAMŚAVYĀKHYĀ.

A commentary on Kālidāsa's Raghuvaṁśa, which work has been described under R. No. 540(*d*) ante: by Mahēśvara.

Contains the Sargas 4, 7 and 8 only.

Beginning:

अथ रघोर्लब्धप्रशमनार्थमनुष्ठानं वर्णयितुमारभते—स इति । सः गुरुणा दत्तं राज्यं प्रतिपद्याधिकं बभौ इत्यन्वयः । सः रघुः गुरुः, तस्य पिता दिलीप इति भावः । दत्तं कर्मणि निष्ठा । राज्यं सप्ताङ्गलक्षणं राष्ट्रम् ।

* * * *

Colophon:

इति रघुवंशव्याख्यायां चतुर्थस्सर्गः ॥

इतः पदक्रमेण व्याख्यायते प्रसादेन लभ्यम् । अथ कुमारस्य कन्यारत्नलाभशेषभूतं विवाहादि वर्णयितुमुपक्रमते—अथेति । अथ वरणानन्तरम् उपयन्त्रा वरेण उपयमो विवाहः; विवाहोपयमौ समौ—इत्यमरः ।

End:

सूर्यवंश्याः कुलधुर्ये सति गृहाय न भवन्ति—इति द्विभङ्गोऽन्वयः ॥

Colophon:

इति महेश्वरविरचितायां रघुवंशव्याख्यायां सप्तमस्सर्गः ॥

अथोत्क्षिप्तामजस्य राज्यप्राप्तिं रघोः परमपुरुषार्थप्राप्तिं च वर्णयितुमुपक्रमते—अथेति । अथ भरणीयवर्गार्पणानन्तरम् । तस्य कुमारस्य ।

* * * *

अजस्सर्गं प्राप्य प्रत्यापत्तिं प्राप्नुवन्त्या हरिण्याख्यया स्वकान्तया सह सुखमुषितवानिति वाक्यार्थः । वृत्तं मन्दाक्रान्ता—मन्दाक्रा(न्ता)जलधिषड गै(म्भौ) न तौ ताद्गुरू चेदिति लक्षणम् ॥

रघुवंशाख्यकाव्यस्य महेश्वरविनिर्मिते ।
व्याख्यानेऽत्राष्टमस्सर्गस्समाप्तोऽभूत्सुसंस्कृतः ॥

Colophon:

इति रघुवंशकाव्यव्याख्या समाप्ता ॥

R. No. 3813.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Valiyatambirān, Alvañjēri, Malabar district.

Fol. 68 is left blank.

सुभाषितावली.

SUBHĀṢITĀVALĪ.

Slightly different from the work described under R. No. 797 ante.

Deals with the following Paddhatis :—

धर्मपर्वस्था—

१. प्ररोचनापद्धतिः.
२. नमस्कारपद्धतिः.
३. आशीःपद्धतिः.
४. वेदब्राह्मणप्रशंसापद्धतिः.
५. सृष्टिक्रमपद्धतिः.
६. हितोपदेशपद्धतिः.
७. धर्मप्रशंसापद्धतिः.
८. अधर्मप्रशंसा.
९. सत्यप्रशंसा.
१०. असत्यप्रशंसा.
११. डम्भपद्धतिः.
१२. दानप्रशंसा.
१३. तपःप्रशंसा.
१४. अहिंसाप्रशंसा.
१५. दयापद्धतिः.
१६. आचारपद्धतिः.
१७. अनाचारपद्धतिः.
१८. गृहस्थपद्धतिः.
१९. साध्वीपद्धतिः.
२०. पतिप्रशंसा.
२१. श्रुतप्रशंसा.
२२. अज्ञप्रशंसा.
२३. काव्यप्रशंसा.
२४. सुजनपद्धतिः.
२५. दुर्जनपद्धतिः.
२६. युगविधिकर्मप्रशंसा.
२७. दुर्विधिप्रशंसा.
२८. मृत्युप्रशंसापद्धतिः.

सङ्कीर्णपर्वस्था—

२९. राजलक्षणपद्धतिः.
३०. राजप्रशंसा.
३१. असद्राजपद्धतिः.
३२. अराजकपद्धतिः.
३३. राजविद्यापद्धतिः.
३४. जितेन्द्रियपद्धतिः.
३५. अजितेन्द्रियपद्धतिः.
३६. विनयाविनयपद्धतिः

३७. कामजयपद्धतिः.
३८. मृगयादोषमृगयागुणपद्धतिः.
३९. द्यूतदिवास्वप्नपरिवारदोषपद्धतिः
४०. स्त्रीव्यसनपद्धतिः.
४१. साहसद्रोहेर्ष्यासूयापद्धतिः.
४२. अक्षदूषणदोषपद्धतिः.
४३. वाक्पारुष्यपद्धतिः.
४४. दण्डपारुष्यपद्धतिः.
४५. लोभमानहर्षप्रमादपद्धतिः.
४६. आज्ञापद्धतिः.
४७. दण्डपद्धतिः.
४८. क्रोधनिन्दापैशुन्यपद्धतिः.
४९. दुष्पुत्रसुपुत्रभ्रातृपद्धतिः.
५०. मन्त्रोत्साहशक्तिपद्धतिः.
५१. पुरोहितपद्धतिः.
५२. पुत्रपद्धतिः.

Incomplete.

Beginning:

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात्सारयति च ।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥ अभिनवगुप्तस्य ।
सरस्वतीविभ्रमदर्पणानां सूक्तामृतक्षीरमहोदधीनाम् ।
सन्मानसोल्लाससुधाकराणां कवीश्वराणां जयति प्रकर्षः ॥
राजशेखरस्य ।

* * * *

Colophon:

प्ररोचनापद्धतिः ॥

End:

पुत्रपद्धतिः—

राजपुत्रा मदोन्मत्ता गजा इव निरङ्कुशाः ।
भ्रातरं स्वामिनं घ्नन्ति पितरं वाभिमानिनः ॥
प्रजात्मश्रेयसे राजा कुर्वीतात्मजरक्षणम् ।
लोलुभ्यमानास्तेऽर्थेषु हन्युरेनमलक्षिताः ॥

* * * *

सतु तत्र विशेषदुर्लभस्सदुपन्यस्यति कृत्यवर्त्म यः ॥ भारवेः ।
द्वेष्यो भवत्युत्कटभाष . . . . ।
. . . नुबन्धं मधुरं च मन्त्री ब्रूयात्प्रिया वानु मयानुकूलम् ॥

R. No. 3814.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Rāmayyar, Manager, Karandapalayam Sanyāsi-Mutt, Kalladakurichi, Tinnevelly district.

(*a*) जैमिनिरामायणम्.

JAIMINIRĀMĀYAṆAM.

Foll. 1*a*—15*a*.

A treatise narrating in a somewhat different manner the main story of the Rāmāyaṇa and bringing out the greatness of the holy name of Rāma. The work is attributed to Jaimini.

Contains the Sarga 51st complete and the 52nd incomplete.

Beginning :

जैमिनिरामायणे महर्षीन् प्रति शौनकः—

अथातस्सम्प्रवक्ष्यामि महदाश्चर्यकारणम् ।
इतिहासं पुरावृत्तं रामभक्तिविवर्धनम् ॥
शृणुध्वमृषयस्सर्वे रामभक्तिप्रभावजम् ।
पुरा कृतयुगे काले सिद्धाश्च परमर्षयः ॥

* * * *

अगस्त्यः—

शृणुध्वमृषयस्सर्वे राममन्त्रजपादिना ।
ब्रह्मनिष्ठापदेशाच्च ध्यानाभ्यासलयेन च ॥
एकाग्रचित्तसाध्यस्य सर्वोन्नतफलस्य च ।
साधकस्य प्रभावं च रामभक्तेश्च वैभवम् ॥

* * * *

ब्रह्मविद्दर्शनाद्दग्धपापसङ्घः प्रसन्नधीः ॥
तत्र भार्यामपत्यांश्च पृष्टवान् स त्वया गिरा ।
युष्मदर्थं मया घोरः पापौघः क्रियते किल ॥

Colophon :

इति जैमिनिरामायणे रामनाममाहात्म्ये व्याधस्य सप्तर्षिसन्दर्शनं नामैकपञ्चाशस्सर्गः ॥

अथ गत्वालयं व्याधः स्वप्राक्पुण्यस्य गौरवात् ।
ब्रह्मविद्दर्शनाद्दग्धपापसङ्घः प्रसन्नधीः ॥

End:

तत्सिद्ध्यर्थं स्तुतिमिमां दास्यामस्तुभ्यमादरात् ।
इत्युक्त्वा ऋषयस्सर्वे दयार्द्रहृदयाः पुनः ॥
प्रत्येकमादिशन्तस्ते श्रीरामस्तुतिरूपकम् ।
एकैकं श्लोकमेकैकऋषिरत्रिमुखक्रमात् ॥

(*b*) रामसप्तर्षिस्तोत्रम्.

RĀMASAPTARṢISTŌTRAM.

Foll. 15*a*—16*a*.

Same work as that described under No. 10299 of the D.C.S. MSS., Vol. XVIII, but with Phalaśruti given at the end.

Complete.

End:

उपदिश्य स्तुतिमिमां रामब्रह्मात्मबोधिनीम् ।
रामध्यानजपान्ते त्वं पठ भक्त्या सदा रदा(दरा)त् ॥
* * * *
तस्मात्स्तोत्रं पठेन्नित्यं रामभक्तिं सदा कुरु ।
ये रामनामजप्तारस्तेऽपि वाञ्छितमाप्नुयुः ॥

Foll. 16*b*—17*b* contain a small portion of Cāṭuślōkas.

(*c*) शिवशैलस्थलमाहात्म्यम्.

ŚIVAŚAILASTHALAMĀHĀTMYAM.

Foll. 19*a*—43*a*. Foll. 18 and 43*b*—44*b* are left blank.

On the greatness and religious importance of the Śivaśaila (Shivagiri), situated on the bank of the river Ghaṭanā which flows in the Madura and Tinnevelly districts.

Complete; as found in the Śivarahasyakhaṇḍa of the Brahmāṇḍa-purāṇa.

Beginning:

शुक्लाम्बरधरं (. . .) विघ्नोपशान्तये ॥
वागर्थाविव (. . .) पार्वतीपरमेश्वरौ ॥
गुरवे सर्वलोकानां (. . .) दक्षिणामूर्तये नमः ॥
वन्दे स्नेहपुरीरम्यां वन्दे कल्याणनायिकाम् ।
वन्देऽहं शिवशैलेशं वन्देऽहं घटनानदीम् ॥
* * * *

पुरस्ताच्छिवशैलस्य देशे पश्चिमदिङ्मुखः ।
शिवः परमकल्याणीनायको रमते सदा ॥
मलयस्योत्तरे देशे घटनादक्षिणे तटे ।
परीतो भूतपार्षद्भिः कल्याणीं रमयन् सदा ॥
पश्चिमद्वारनिलयो घटनातीरभूषणः ।
इति सङ्ग्रहतः प्रोक्तं विस्तराद्वक्तुमर्हसि ॥

* * * *

Colophon:

इति ब्रह्माण्डपुराणे शिवरहस्यखण्डे शिवशैलमाहात्म्ये प्रथमोऽध्यायः ॥

End:

श्रीमद्व्यासमुखारविन्दगलितं नित्यं पिबत्यादरा-
द्भक्त्या यश्शिवशैलनाथमहिमाभिख्याभिधानं मधु ।
सम्यक्छ्रोत्रपुटेन जन्ममरणव्याध्याधिसोपद्रवं
संसारं स विहाय गच्छति पुमाञ्छम्भोः पदं शाश्वतम् ॥

Colophon:

इति ब्रह्माण्डपुराणे शिवरहस्यखण्डे शिवशैलमाहात्म्ये द्वादशोऽध्यायः॥

The scribe adds—

कामाक्षीगर्भभूतेन योगानन्देन योगिना ।
लिखितोऽयं पुराणश्च कल्याणीशप्रसादतः ॥
स्नेहपुर्यां निवसता सुन्दरेण च धीमता ।
शिवशैलेशकृपया लिखितः पूर्ण एव सः ॥

* * * *

शिवशैलमाहात्म्यं समाप्तम् ॥

R. No. **3815.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 142. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Panavūr-mana, Lakkidi post, Malabar district.

Fol. 142 is left blank.

शिशुपालवधव्याख्या—सारटीका.

ŚIŚUPĀLAVADHAVYĀKHYĀ: SĀRAṬĪKĀ.

Same work as that described under R. No. 3179 ante. By Vallabhadēva, grandson of Ānandadēva. This commentary is also called Sandēhaviṣauṣadhi.

Contains the Sargas three to nine complete and tenth Sarga incomplete.

R. No. **3816**.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 50. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śaṅkara Nambūdirippāḍ, Avanapparambu, Cochin State.

Fol. 50*b* gives the name of the owner of the original manuscript.

आशौचदीपकम्, सव्याख्यानम्.

ĀŚAUCADĪPAKAM WITH COMMENTARY.

Same work as that described under R. No. 2976 ante.

Complete.

R. No. **3817**.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 86. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

नारदीयपद्धतिः.

NĀRADĪYAPADDHATIḤ.

A treatise in the Pañcarātrāgama dealing with the following subjects:—

१. यागयोगविधिक्रमः.
२. अर्चनापद्धतिः.
३. अग्निसंस्कारपद्धतिः.
४. मन्त्रलक्षणपद्धतिः.
५. मुद्रापद्धतिः.
६. अधिवासपद्धतिः.
७. दीक्षापद्धतिः.
८. अभिषेकपद्धतिः.
९. साधकविधिनियमपद्धतिः.
१०. मन्त्रध्यानपद्धतिः.
११. प्रतिमालक्षणपद्धतिः.
१२. स्नानकर्मपद्धतिः.
१३. अधिवासपद्धतिः (प्रकारान्तरम्).

१४. प्रतिष्ठापद्धतिः.
१५. उत्सवपद्धतिः.
१६. तीर्थयात्रापद्धतिः.
१७. महास्नपनपद्धतिः.
१८. लघुस्नपनपद्धतिः.

Complete.

Beginning :

नमस्संसृ(हृ)तिसम्भूतिस्थितिभेदैरनेकधा ।
विभक्तायाविभक्ताय ज्योतिषे ज्ञानमूर्तये ॥

वासुदेवमुखाम्भोजविकासो भा . . . . ।
तन्त्रमाविष्कृतं येन भारतं तं नमाम्यहम् ॥

* * * *

नारदीयस्य सारस्य यागयोगविधिक्रमम् ।
सङ्क्षेपतः प्रवक्ष्यमि सविभक्तमनाकुलम् ॥
स्नानादिकाः क्रियास्सर्वाः फलसंसिद्धिहेतवः ।
अतस्तत्प्रथमं वक्ष्ये साधकानां हिताय वै ॥

* * * *

Colophon :

नारदीये पद्धतौ प्रथमः (पटलः) ॥

End :

ब्रह्मचर्यव्रतान्नित्यं वर्ज्याचारसमन्विताः ।
पञ्चरात्रविदस्सम्यक् नाकर्मनिरतास्सदा ॥

वर्णाचारगुणोपेता विप्रा भागवताः स्मृताः ।
एवं सम्पूज्य विधिवन्नृत्तगेयादि कारयेत् ॥

इति सम्यक् समाख्यातं वैष्णवं स्नपनं परम् ।
एकं कृत्वा तु विधिवत्सर्वान् कामानवाप्नुयात ॥

क्रमोपयातं गुरुसम्प्रदायतः प्रसाद्य लक्ष्मीपतिसंज्ञकं गुरुम् ।
परम्पराज्ञानमवाप्य सम्भृतं समस्ततन्त्रार्थगुणा हि पद्धतिः ॥

Colophon :

इति श्रीनारदीये पद्धतौ स्नपनपटलः ॥
इति नारदीयपद्धतिस्समाप्ता ॥

R. No. 3818.

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 104. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Rāmakṛṣṇabrahma Śāstrigāru, Devulapalli, Repalle taluk, Guntur district.

Fol. 104*b* gives the name of the owner of the original manuscript. Fol. 2*b* contains a small portion of the same work.

कुवलयानन्दटिप्पणी—मकरन्दझरी.

KUVALAYĀNANDAṬIPPAṆĪ: MAKARANDAJHARĪ.

A short commentary on the Kuvalayānanda which is a well-known work on figures of speech by Appayadīkṣita and which has been described under No. 12846 of the D.C.S. MSS., Vol. XXII: by Rāmasaṅkhyāvat of Agastyagōtra and Kuravi family. Herein Vaidyanātha's Candrikā, a prior commentary on the Kuvalayānanda, is adversely noticed and criticised.

Contains the Laharīs one to three only.

Beginning:

अन्योन्याकारवीक्षणविस्मरशृङ्गाररसारसर्वस्वम् ।
तेजः परं शिवाख्यं चिरमव(तात्) मां पुराणदाम्पत्यम् ॥
वन्दित्वा तन्महश्चन्द्रचूडमानन्दमन्दिरम् ।
कुर्वे कुवलयानन्दमकरन्दझरीमहम् ॥
यद्यप्यप्पयसोमपीथिकविचन्द्रालोकविस्तारिते
व्याख्येयं किमिहास्ति मे कुवलयानन्दे तथाप्यादरात् ।
यतः कश्चन कार्य एव ननु तं यद्वैद्यनाथोदिता
व्यत्यस्तं कुरुते दुरध्वकलनैर्व्याख्यामिषा चन्द्रिका ॥

तथाहि—

चन्द्रालोकात्कुवलयानन्दोऽभूदिति नाद्भुतम् ।
परं कुवलयानन्दाच्चन्द्रिकेत्येतदद्भुतम् ॥
अत एव चकार वैद्यनाथो निजकृत्याहविपर्ययप्रमादम् ।
परिहर्तुमुदारमूलतते(पङ्क्तेः) बत मूले विपरीतलेखनानि ॥
तानि स्फुटीकरिष्यन्ते तत्र तत्र विभाव्य च ।
विमत्सरं सहृदयो मां निन्दत्वथ नन्दतु ॥

सामान्यलक्षणान्वितमेव ग्राह्यं विशेषलक्ष्म न क्वाप्यतिप्रसङ्गो नामूलं लक्ष्म किंचित् अत्र कृतम् ;

Beginning:

श्रीमातः करुणाकटाक्षसरणीं सम्प्राप्य ते पद्मभूः
ब्रह्माण्डानि करोति रक्षति हरिर्हन्तीश्वरो लीलया ।
श्रुत्यन्ते पुरुषः परात्पर इति ख्यातोऽपि संवित्कुले
सा काष्ठेति च सा परा गतिरिति त्वय्येव विश्राम्यति ॥

* * * *

यस्यानुग्रहतन्त्राद्रामोऽजयदखिलरक्षांसि ॥
परमाख्यशिवानन्दनाथश्रीमणिपादुकाम् ।
प्रपन्नो मनसा वाचा कायेन च निरन्तरम् ॥
अद्वैतविद्याकार्यश्रीवेङ्कटाद्रितनूभवः ।
नारायणाम्बिकागर्भशुक्तिमुक्तामणिस्सुधीः ॥
ललितादेशिकादेशाद्व्याख्यां नारायणः स्फुटम् ।
सहस्रस्य रहस्यस्य नाम्नां विरचयाम्यहम् ।

* * * *

आत्मा प्रेष्ठतमः आत्मनः कामाय सर्वं प्रियं भवति । तदात्मलाभात् परं न विद्यते । भवति चात्मलाभः इच्छन्ति तूपायश्रिताय व्याकुर्महे—श्रीमातेति । श्रीरैश्वर्यं विश्वशरीरत्वं तदेवं नामैश्वर्यं येन जगच्छिरसा निजाज्ञां वहति, न तु चतुरङ्गबलं परिमितं किलैतत् ।

End:

परिवर्ज्य धर्मसर्वधर्मान् त्वामेकामम्ब शरणमुपयाताऽहम् ।
न करोमि शुद्धं त्वं मां सर्वाभ्यो विरोचय श्रीमातः ॥
संविद्भट्टारिकाया अधरकिसलयः कालिदासावतंसः
गौडाचार्यः स्मितं शङ्करगुरुचरणः क(काम)द्रो दृग्विलासः ।
नासामण्युत्पलस्वाम्यभिनवसकृतिः स्वकृत्वचः क्षेमराजो
मुक्तास्रक् सिंहराजः कुचयुगचरणः पादभूषोऽहमीष्टे ॥

Colophon:

इति श्रीभट्टनारायणेन विरचिता ललितासहस्रनामस्तोत्रव्याख्या जयमङ्गलाख्या सम्पूर्ण(र्णा) ॥

Date of Transcription—The solar month Vṛścika in the year Dhātu.
Name of the scribe—Viśvanātha of Eṇṇappāḷam.

R. No. **3820**.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 160. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 160*b* is left blank.

अष्टाङ्गहृदयव्याख्या — व्याख्यासारः.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ: VYĀKHYĀSĀRAḤ.

A commentary on the Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII.

Contains the Adhyāyas 1—15 in the Sūtrasthāna.

Beginning:

आचार्यश्शास्त्रमारिप्सुर्विघ्नोपशमाय शिष्टाचारानुसारेणेष्टदेवतानमस्कारं करोति—रागेत्यादि । राग आदिर्येषां ते रागादयः । आदिशब्देन लोभमोहमदमात्सर्यडम्भाहङ्कारा गृह्यन्ते । एके च क्रोधादयोऽपीति । अन्ये अरिषड्वर्गः परिगृहीतो वा ।

इदं मे स्यादिदं मे स्यादिति भेदविकल्पिता ।
मानसी साध्यविषया वृत्तिरिच्छेति कथ्यते ॥
प्रचिता सैव कुर्वाणा प्रवृत्तिं चोत्तरक्षणे ।
तदसिद्धौ विरोधेन तापनी राग उच्यते ॥

रागः कामो वा ।

हन्म्येनं छेदयिष्यामि सर्वोपायैर्धनादिकः(तः) ।
अस्येति तीव्रा या बुद्धिः स द्वेष इति कथ्यते ॥

लोभो हि सम्मतशिष्टैरर्थत्यागासहिष्णुतेति चेत्यादि भावविवेकादिषु प्रसिद्धम् । रागादयश्च ते रोगाश्च रागादिरोगा इति समासः ।

* * * *

Colophon:

इति व्याख्यासारे प्रथमोऽध्यायः ॥

End:

एत इत्यादि । एते पूर्वोक्ता वर्गा दोषदूष्यदेशबलाद्यपेक्षं दोषदूष्यादान् विकल्प्य कल्कादिषु कल्कादिभिर्वा प्रयोगैः वैद्येन युक्ताः प्रयो-

जिताः । पानाद्युपयोगे सति बहिर्लेपाभ्यङ्गैश्च यथोक्तान् सुकृच्छ्रान् रोगान् घ्नन्ति आदिशब्देन भाण्डशीतकषायादिपरिग्रहः अभ्यङ्गैरिति बहुवचननिर्देशाल्लेपाभ्यङ्गस्नानादिभिरिति वेद्यम् ॥

Colophon:

इति व्याख्यासारे पञ्चदशोऽध्यायः ॥

R. No. **3821.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 26. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Pathalattu Rāmuṇṇi Vādhyār, Panthalayam, Quilon, North Malabar.

(*a*) प्रायश्चित्तपद्धतिः.

PRĀYAŚCITTAPADDHATIḤ.

Foll. 1*a*—12*b*.

A treatise on the expiatory ceremonies to be observed in connexion with the performances of Śrauta-sacrifices : by Agnicinmiśra Śaṁbhu.

Complete.

Beginning:

सोमयाजिनश्चतुर्दश्यां भ्रान्त्या वा दुग्धलाभाद्वा दधिलोभाकरणे कृते वा दधिहोमे भ्रान्त्या दधिशेषारक्षणे रक्षितेऽपि वा होमशेषे प्रथमावा(यां) नष्टे दुष्टे वा सायं दोहोद्वासनानन्तरं भूपत इत्यादि वृणीमह इत्यन्तेन ब्रह्मवरणम् । ततो ब्रह्मजपः । गार्हपत्ये ब्राह्मण आज्यसंस्कारः । चतुर्गृहीतेन समित्पूर्वको भुवः स्वाहेति दक्षिणाग्नौ होमः । पुनस्सकृद्गृहीतेन पञ्चाहुतयः । तत्र मन्त्राः---त्वं नो अग्ने, स त्वं नो अग्ने, अयाश्चाग्ने, ये ते शतम्, उदुत्तमं वरुणमित्येताष्षडाहुतयः आध्वर्यवशब्दवाच्याः ।

End:

अग्रतो दक्षिणपादमकृत्वा दक्षिणपादाभिहतचरमकृत्वा प्रवेशे हौत्रकमुत्तरया वेदिश्रोण्या दक्षिणपादप्राङ्गप्राशे आधायानिधाने च दक्षिणपादाग्रेण बहिरनाक्रमे च ॥

Colophon:

इत्यग्निचिन्मिश्रशम्भुकरकृता ऐष्टिकप्रायश्चित्तपद्धतिः समाप्ता ॥

(*b*) सिद्धसारसङ्ग्रहः.
SIDDHASĀRASAṄGRAHAḤ.

Foll. 13*a*—25*a*. Foll. 25*b* and 26 are left blank.

A treatise on medicine dealing with the following subjects :—

१. करोत्पत्त्यधिकारः.
२. महाद्रावलक्षणम्.
३. लोहवर्गद्राववर्णनम्.
४. केशद्राववर्णनम्.
५. द्विप्राणविद्यावर्णनम्.
६ महाकालशाल्मलीकल्पवर्णनम्.
७. विषनाशवर्णनम्.
८. रसजारणादिवर्णनम्.
९. गन्धककल्कवर्णनम्.
१०. सुवर्णशोधनम्.

This work is also called Amṛtataraṅgiṇī.

Complete.

Beginning:

ईश्वरी उवाच—

नवानामिह रत्नानां सङ्ख्यायामगुणेन च ।
विद्यया कर्तुमिच्छूनां भक्तानां मे महेश्वर ॥
उपायं श्रोतुमिच्छामि करणेन महेश्वर ।
यथाक्रमेण वक्तव्यं क्रियामौषधसारवत् ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यदा दश्येह पृच्छसि ।
पद्म(रागे)न्द्रनीलादिमुक्तामण्यवसानतः ॥
आनूपमम्बराद्भूमौ पतमानं वलाहकात् ।
स्तम्भयित्वा जलं तस्मिन् कर्तव्यं रत्नसन्ततिः ॥
तस्माद्वक्ष्यामि देवेशि तोयस्तम्भनमादितः ।

* * * *

रत्नानामम्भसा साक्षादुत्पत्तिरिति निश्चयम्(:) ।
तस्माद्वद्धजलैरेतैः कर्तव्यं रत्नमुत्तमम् ॥
आख्यातमेतदधुना परिकीर्त्यमानं
यश्चादरादुपशृणोति पठन्ति नित्यम् ।

तस्याहमेव सकलान् वितरामि कामान्
दिव्याननन्तगुणासिद्धिमतुल्यरूपाम् ॥

Colophon :

इत्यमृततरङ्गिण्यां करोत्पत्त्यधिकारः प्रथमोल्लासः ॥

End :

अयस्संलिप्य सहसा पुटात्तारं भविष्यति ।
एतत्कौतूहलं लोके चित्राच्चित्रतरं प्रिये ॥
भक्तानामेव दातव्यं शिष्याणां साधुकर्मणाम् ।
अविरक्ताय भक्ताय न दातव्यं कदाचन ॥
विद्यामशान्ते यो दद्यात्स पापी नरकं व्रजेत् ।
आप्तावी . च विफला भवेद्भैरवकोपतः ॥

Colophon :

इति सिद्धसारखण्डे दशमः पटलः ॥

R. No. 3822.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 66. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vaidikan-Nārāyaṇa-Nambūdiri, Tekkattu-manakkal, Malabar district.

Foll. 65*b* and 66 are left blank.

शैवसुधाकरः.
ŚAIVASUDHĀKARAḤ.

A treatise on the Śaivāgama dealing with the following subjects: by Sadānandasvāmin who wrote this work at the instance of king Svarūpasiṁha :—

१. शिवपूजोत्कर्षवर्णनम्.
२. भस्मनिरूपणम्.
३. रुद्राक्षोत्कर्षनिरूपणम्.
४. ऊर्ध्वपुण्ड्रादिखण्डनम्.
५. लिङ्गपूजोत्कर्षनिरूपणम्.
६. उपचारनिरूपणम्.
७. जलोत्कर्षवर्णनम्.
८. अभिषेकोत्कर्षवर्णनम्.
९. गन्धोत्कर्षवर्णनम्.
१०. अक्षतोत्कर्षवर्णनम्.
११. बिल्वादिपत्रपुष्पोत्कर्षवर्णनम्.
१२. धूपोत्कर्षवर्णनम्.
१३. दीपोत्कर्षवर्णनम्.
१४. नैवेद्योत्कर्षवर्णनम्.

Complete.

Beginning:

अथ शिवार्चनस्य धर्मार्थकाममोक्षहेतुत्वात्तत्प्रकाराः प्रदर्श्यन्ते—तत्र पराशरपुराणे—

ब्राह्मणस्सर्वसिद्ध्यर्थं कुर्याच्छङ्करपूजनम् ।
ब्रह्मविष्ण्वादिदेवानां पदप्राप्तिश्च पूजये(ना)त् ॥
अष्टैश्वर्यं सुरत्वं च पदं गान्धर्वपूर्वकम् ।
मनोहराः स्त्रियस्सौख्यं कल्याणभवनानि च ॥

* * * *

Colophon:

इति श्रीमत्स्वामिसदानन(न्द)विरचिते शैवसुधाकरे शिवपूजोत्कर्षवर्णनं नाम प्रथमः किरणः ॥

End:

शिवरात्रिव्रतं देवपूजाजपपरायणः ।
करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ॥ इत्यर्घ्यदानम् ।

* * * *

(श्री)सदानन्दगिरिभिः(रयः) श्रीमच्छैवसुधाकरम् ।
कृत्वार्पयन्महेशाय चैकलिङ्गस्वरूपिणे ॥
क्षणं ध्यात्वाङ्घ्री यौ धनदसदनं नन्दनवनं
तृणायेन्द्रं काकं विधिमपि वराकं क्षितिपतिम् ।
न(रा) मन्यन्ते(ऽमी) इह तदवशिष्टं क्षितिपति-
स्वरूपो लब्ध्वेमं स्मरति सततं तौ सुखकरौ ॥
रसे दुन्दुभिवर्षे विक्रमादित्यभूपतेः ।
पूर्णोऽयं कार्त्तिके शुक्ले त्रयोदश्यां विशेषतः ॥

Colophon :

इति श्रीमन्महीमहेन्द्रमहाराणश्रीस्वरूपसिंहप्रेरितश्रीमत्परमहंसपरिव्राजकाचार्यश्रीसदानन्दस्वामिविरचिते शैवसुधाकरे पञ्चविंशः किरणः ॥

समाप्तश्चायं शैवसुधाकरः ॥ संवत्सरं . . . . शाक्ते(के) . आषाढकृष्णतृतीयायां चन्द्रवासरे लिपिकृता सूर्यदत्तविजयीपुरवासिना भाषायां सुजाणमलशर्मणा लिखापितं ब्रह्मचारिजि श्रीलक्ष्मणानन्दजि.

R. No. **3823.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 84. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

Fol. 83*b* gives the name of the owner of the original MS. Fol. 84 is left blank.

यज्ञप्रकाशः.

YAJÑAPRAKĀŚAḤ.

A treatise explaining the procedure relating to the performances of sacrifices : by Vāsudēvadīkṣita, elder son of Dayānidhiratha who was the son of Kāśīnātha and Vanamālikā of the Ātrēyagōtra. The author says that he has consulted Yajñapaśu and other works.

Complete.

Beginning :

भक्तौ(घ)हृदयारण्यतमोग(ण)विदारणम् ।
श्रीहरिं यामि शरणं नीलाचलविहारिणम् ॥
यत्कृपालेशमात्रेण मूकानां वावदूकता ।
स्वसिद्ध्यै भुवनेशानीं वरदां तां नतोऽस्म्यहम् ॥
यज्ञपश्वादिकंग्रन्थान् समालोच्य विचार्य च ।
यज्ञप्रकाशः क्रियते वासुदेवेन धीमता ॥
निष्प्रत्यूहं चलत्येव रथः प्रहितवर्त्मना ।
प्राचीन(वेद)मार्गं तं न त्यजामि कदाचन ॥
एष याज्ञिकजीवातुरेष यज्ञार्थसङ्ग्रहः ।
एनमेवं गृहीत्वा (तु) पद्धतौ यातु(न्तु) याज्ञिकाः ॥

* * *

बहुवेदगतन्यायविवेकज्ञो यदाब्रवीत् ।

कात्यायनो न तद्वाच्यमन्याय्यमिति मादृशैः ॥

वेदादृतेऽपि कुर्वन्ति कल्पैः कर्माणि याज्ञिकाः । इति ।

यथा दीक्षायामवशिष्टायां ब्राह्मण इति काण्वश्रुतौ विहितम् । कात्या-यनेन दीक्षितोऽयं ब्राह्मण इत्यभिहितम् ।

End:

अग्निं कपालेन सह वपति । भग्नोखाकपालानि उपशयया सह निदधाति ॥

इति चयनप्रायश्चित्तविशेषः ॥

इति यज्ञप्रकाशः ॥

काशीनाथरथो योऽभूत्पावकः पृथिवीतले ।
तस्मात्कुलप्रदीपो यः प्रकाशस्तस्य शोभताम् ॥

निपुणं विभाव्य लिखितं मया हि यत्
परिपालयन्तु विबुधा विलोक्य तत् ।
रचितं परोपकृतयेऽतिनिर्मलं
परमेश्वरस्य(च) पदाम्बुजेऽर्पितम् ॥

जातः स मेश्वरकुले वनमालिकामा(यां)
तस्माद्दयानिधिरथः स्वकुलावतंसः ।
तस्यात्मजो विमलधीर्मम तातपादा-
ज्जातोऽग्रिमस्तु तनयोऽहमितोऽतिधीरः ॥

आत्रेयाम्बुधितस्सुधांशुरभवच्छ्रीवासुदेवाभिधो-
(यज्वा)राज्यमथाप्य सन्ततगतिः श्लाघ्ये च विष्णोः पदे ।
तस्यायं कृतिव(न)स्तु यज्ञविषये मीमांसया सम्भृतो
ग्रन्थोऽयं विमलो गभीरहृदयो यज्ञप्रकाशाभिधः ॥

कात्यायनोक्तमथ गर्गमतं प्रयत्ना-
द्यत्साम्प्रदायिकमतं तदपि स्मृतिस्थम् ।
यज्ञोपयोगि निखिलं च विचार्य सारं
सम्यग्विभाव्य लिखितं च विभावयन्तु ॥

यश्चात्रेः कुलसत्तमस्सजनतो मोदार्णवं वर्धयन्
सर्वाह्लादकरः स्वबन्धुकुमुदान्यामोद(य)न् विप्रराट् ।

सोऽयं सर्वकलानिधिः स्वगतिदं विष्णोः पदं शीलयन्
सर्वध्वान्तनिवारणो विजयते श्रीवासुदेवाभिधः ॥

Colophon:

इति श्रीवासुदेवरथदीक्षितविरचितः यज्ञप्रकाशस्समाप्तः ॥

R. No. **3824.**

Paper. 10⅝ × 9⅜ inches. Foll. 60. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Śaṅkaran Nambūdirippād, Paliyaduttu-mana, Lakkidi post, Malabar district.

कौषीतकगृह्यकारिका.

KAUṢĪTAKAGṚHYAKĀRIKĀ.

Foll. 1*a*—58*b*.

A treatise in verse narrating some of the ceremonials as laid down in the Gṛhyasūtras ascribed to Kauṣītaki.

Complete.

Beginning:

वन्दे रामपुरावासं बृन्दारकवरार्चितम् ।
इन्दिराकुचकस्तूरीसुन्दरोरसमच्युतम् ॥

दक्षिणामूर्तिविघ्नेशौ वाचं कौषीतकिं गुरून् ।
नमामि यन्नमस्कारादभीष्टं लभते नरः ॥

विवाहादेरनुष्ठानं यथोक्तं गुरुभिः पुरा ।
बालप्रबोधनार्थं तदल्पज्ञेन मयोच्यते ॥

बन्धुभिस्सह भुक्त्वाथ स्वगुरूनभिवाद्य च ।
तेभ्यश्चाषिय(शिष)मादाय वरो माङ्गलिकं जपन् ॥
आत्मना सदृशीमन्यगोत्रजातां हि कन्यकाम् ।
अन्विष्य तद्गृहं गच्छेत् ज्ञातिभृत्यजनैस्सह ॥

* * * *

वरस्य वस्त्रयुगलं स्पर्शयित्वा च कन्यया ।
पिता दद्याद्व(द्यु)वं वस्त्राणीत्यृचा तदनन्तरम् ॥
वस्त्रं तत्प्रतिगृह्णातु बृहस्पतय इत्यथ ।

End :

उक्त्वा(क्ता)न्येतानि कर्माणि गृह्यप्रोक्तानि कानिचित् ।
अन्यथात्वमिह स्याच्चेद्बुधैस्तत्परिशोध्यताम् ॥

Foll. 58*b*—59*b* contain a few stanzas on the Āśaucaviṣaya with Malayalam meaning. Fol. 60 is left blank.

R. No. **3825.**

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 114. Lines, 20 in a page. Grantha. Slightly injured.

Transcribed in 1921–22 from a MS. of M.R.Ry. Ayyambhaṭṭācārya, Mannarkoil, Ambasamudram post, Tinnevelly district.

वैखानसागमः.

VAIKHĀNASĀGAMAḤ.

A treatise on the Vaikhānasāgama dealing with the following topics; as found in the various Saṁhitās :—

१. विखनस उत्पत्तिनिर्णयः	.. अध्याय	१९	आनन्दसंहिता.
२ विष्णुभक्तार्चनविधिः	.. ,,	९९	अत्रिसंहिता.
३. कुम्भस्थापनविधिः	.. ,,	९	शौनकसंहिता.
४. नवकलशस्नपनविधिः	.. स्तबक	२२	विमलसंहिता.
५. सहस्रशङ्खकलशस्नपनविधिः	.. अध्याय	९९	भृगुसंहिता.
६. सहस्रकलशस्नपनविधिः	.. पटल	३०, ३१	मरीचिसंहिता.
७. सेवाप्रकरणम्	.. अध्याय	१०	भृगुसंहिता.
८. वैखानसभेदादिमहाभिषेकान्तविधिः	.. ,,	२९	,,
९. तैलोत्सवमण्डलाभिषेकविधिः	.. ,,	६९	,,
१०. प्रणवस्वरूपवर्णनम्	.. पटल	७७	मरीचिसंहिता.
११. पद्माक्षतुलसीमालिकाधारणविधिः	.. अध्याय	१३	भृगुसंहिता.
१२. द्वारपालविधिः	.. पटल	७०	ऐन्द्रमतवास्तुशास्त्रम्
१३. वैखानसानुग्रहगर्भाधानादिशक्तिसङ्ग्रहणान्तकथनम्.			

Incomplete.

Beginning:

अथ सस्मार भगवान् विश्वसृष्टिकमच्युतम् ।
धातारं सर्गकरणे चतुरं चतुराननम् ॥
स्मरणानन्तरादेव प्रादुरासीत्सुरप्रभुः ।
त(त)स्समस्तजगतामुत्पत्तिकरणक्षमम् ॥
तं प्राह भगवान् विष्णुः प्रणतं पुरतस्स्थितम् ।

* * * *

तथासौ विखना विष्णोर्ध्यानापन्नसमुद्भवः ।
अ(आ)ध्यानान्तस्समुत्पन्नो ज्ञेयोऽसौ गर्भवैष्णवः ॥
मत्पुत्राणां च सर्वेषामग्रजः पुरुषोत्तमः ।
भृग्वादीनुपनीयाथ सावित्रीमुपदिष्टवान् ॥

* * * *

Colophon:

इति श्रीवैखानसे मरीचिप्रोक्ते आनन्दसंहितायां विखनस उत्पत्तिनिर्णयो नाम पञ्चदशोऽध्यायः ॥

End:

तस्मात्सर्वप्रयत्नेन स्थापयेच्छुभदं भवेत् ।
इति तद्द्वारपालस्य सर्वप्राणिहिताय वै ॥
प्रभामण्डलसंयुक्तं तदूर्ध्वे नासिका भवेत् ।
व्याले च मकरे चैव सिद्धभूषादि(द्य)लङ्कृतम् ॥

Colophon:

इत्यैन्द्रमते वास्तुशास्त्रे द्वारपालविधिर्नाम सप्तति(तमः) पटलः ॥
ब्रह्मघोषः—

श्रुतिस्मृती नदी . . . . र्णवम् ।
वन्दे भृगुं . . . . मुनिम् ॥
अत्रिं चैव त्र . . . . दिनः ।
यत्सूत्रं श्रुतियुक्त . . . . मृतम् ॥
श्रीमच्छ्रीमण . . . . नारायणः ।
शब्दब्रह्मकृताधि . . . . महे ॥
वन्दे विखनसं साक्षात् . . . . . नीश्वरम् ।
श्रुतिस्मृती . . . . भिष्टुतम् ॥

Beginning:

श्रीकाङ्क्षिणा सकलदुर्णयमन्त्रभाजा दुर्योधनेन विजिताश्छलदेवनेन ।
ते पञ्च पाण्डुतनयाः सह धर्मपत्न्या पाञ्चालराजसुतया वनमध्यवात्सुः ॥
तत्राध्यगीषति(त)शरासनवेदमेते राज्ये हृतेऽक्षकपटात्कुटनापटूकाः ।
हिंस्रात्तपस्विगणमुद्विजितारमावन् कीर्त्यंशुकैश्च जगदूर्णयितं बभूवुः ॥

* * * *

Colophon:

इति लक्षणादर्शे पाण्डवचरिते महाकाव्ये पाणिनीयकुटादिभूवादिपाद-द्वयलक्ष्मसङ्ग्रहः पाण्डवनि(वि)वासो नाम प्रथमस्सर्गः ॥

End:

वासं मन्त्रितमात्मनोऽनुरहसं व्यक्तीकरिष्यंस्ततः
शल्यं प्रत्युरसं द्विषामनुगवं हित्वा रथं फल्गुनः ।
केशे सञ्चरमाणमुत्तरमनु व्यध्वेन दध्रे तथा
येन ह्यङ्गुलमप्यगान्न विजयी भूष्णुः क्षणेनेव सः ॥

Colophon:

इति लक्षणादर्शे महाकाव्ये महोपाध्यायश्रीदिवाकरविरचिते उत्तर-पलायनं नाम त्रयोदशस्सर्गः ॥

अथ तमिदमवादीदुत्तरं सव्यसाची त्यज भयमहमेव त्वत्कृतेनैव योत्स्ये ।
उषितमिह मयाहोरात्रमारादनेन नृपसुत भवतस्त्वं ह्यह्नवासेऽपि बन्धुः ॥
अथ पुनरयमूचे त्वं ह्रिया वार्यमाणं कलय निभृतवासे गुप्तमेवार्जुनं माम् ।
तदिह समरमेभिः कर्तुमेवैष कण्डूयियिषति मम बाहुर्वैविरोधो दधे नः ॥

R. No. 3827.

Paper. 10¾ × 9½ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

Foll. 53*b* and 54 left blank.

सुलोचनामाधवम्.

SULŌCANĀMĀDHAVAM.

A poem describing the story of the marriage of prince Mādhava, son of Vikrama, king of the town Tāladhvaja, with Śulōcanā, daughter of Śuśīlā and Guṇākara who was the king of the town Dīvyantī in the Plakṣadvīpa: by Vrajasundara, son of Balabhadra who followed the Caitanya school. The author was a court-poet of king Anaṅgabhīma of the Gaṅga dynasty.

Breaks off in the 14th Sarga.

Beginning:

महेन्द्रनीलोपलकन्दलोद्यन्महःप्रसारासहविग्रहच्छविः ।
कृतानुरागः कुरुतां दिने दिने विप(त्ति)नोदं मम नन्दनन्दनः ॥

विचक्षणैश्शास्त्रविचारदक्षिणैरभाणि यत्काव्यमतीव दुष्करम् ।
उपास्यदवस्य पदानुकम्पया तथापि तत्कर्तुमवश्यमुत्सहे ॥

असत्प्रसङ्गादपि तुङ्गकौतुकं रसावहं काव्यमभव्यमुच्यते ।
इदं पुराणोक्तचरित्रकीर्तनाद्पुण्यकर्मात्र पवित्रयिष्यति ॥

सुलोचनामाधवकीर्तिमौक्तिकैरलङ्कृतं काव्यमलङ्कृतं मया ।
गलस्थलैकाभरणं भृशादराच्चिरस्य किं नो सुदृशां भविष्यति ॥

* * * *

विभाति तालध्वजनामकीर्तिता सुधांशुबिम्बागतसौधशोभा ।
पुरी मनोज्ञा न विभाव्यते म(य)या सुपर्वभर्तुर्नगरी गरीयसी ॥

* * * *

पुरी यथा भूरिगुणौघभूषिता गुणोज्ज्वलं विक्रमनामपार्थिवम् ।
तथैव लब्ध्वा विधुनेव शर्वरी बभावपि द्यौरिव सप्तसप्तिना ॥

* * *

यं चक्रे स्वसभाविभूषणमणिं राजन्यचूडामणि-
र्विद्यासिन्धुरनङ्गभीमनृपतिश्श्रीगङ्गवंशोद्भवः ।
तस्य श्रीव्रजसुन्दरस्य कृतिनो विप्राशिषां काङ्क्षिणः
काव्ये पावनमाधवीयचरिते सर्गोऽयमादिर्गतः ॥

Colophon:

इति सुलोचनामाधवे प्रथमस्सर्गः ।

* * * *

कमलयामलया हि ममात्मजस्सुचिरमेष यतः परिरंस्यते ।
इति विमृश्य महीमघवा सुतं स विदधे ननु माधवमाख्यया ॥
यं चक्रे (. . .) सर्गो द्वितीयोऽगमत् ॥

Colophon:

इति सुलोचनामाधवे द्वितीयस्सर्गः ।

*　　*　　*　　*

द्वीपो भाति समस्तवस्तुसहितः लक्षाभिधालक्षितो
लक्ष्मीसाधुकटाक्षपातविषयः पारेसमुद्रं महान् ।
तत्रास्ते बहुसौधमूर्धपटलीरुद्धाम्बराडम्बरा
दीव्यन्तीति पुरी पुरन्दरपुरन्यक्कारिणी हारिणी ॥

भुजाभवद्भैरवविक्रमारुणप्रभापरिक्षोभितवैरिकैरवः ।
विभाति तत्रैव गुणाकराह्वयो महीमहीयान् गुणवान् महीश्वरः ॥
निजास्यशोभाकलयापि शारदं विडम्बयन्तीव बलात्कलाकरम् ।
सती सुशीलेति भुवि श्रुताख्यया विराजते तन्महिषी महीयसी ॥

*　　*　　*　　*

ततोऽदसीयादुदियाय कुक्षितश्चिराय लक्ष्मीरिव सागरोदरात् ।
सुलोचनेति प्रथिता तदाख्यया सुता शरच्चन्द्रमनोरमानना ॥

*　　*　　*　　*

यत्तातो बलभद्रनामभणितो धीमान् कविः काव्यतः
तस्य श्रीव्रजसुन्दरस्य सरसे सर्गोऽगमत्सप्तमः ॥

End:

इत्युक्त्वायं किञ्च सुषेणः क्षितिभर्ता
पुत्रीमस्मै नाम जयन्तीं ललिताङ्गीम् ।
सौम्ये लग्नेऽदत्त विवाहव्यवहृत्या
नानावाद्यध्वाननिरुद्धाम्बरगर्भः ॥
लब्ध्वा पुत्रीं वीरवरोऽयं क्षितिभर्तु-
र्भूमेरर्धं यौतुकभावादपि तृप्तः ।
गङ्गातीरे धामनि रत्नावलिरस्ये
धर्मं प्रेयश्शर्मनिमित्तं चरतिस्म ॥

सुषेणनृपनन्दनां परिणयेन गृह्णन्नसौ
कृतस्तनुगोपनः पुरुषभावविस्मायनः ।
चिरं रचितवञ्चनोऽकृततदङ्गसङ्गोत्सवः
परं वितनुतेतरामहरहस्तपो दुष्करम् ॥

यं चक्रे (. . .) सर्गश्चाद्य गतस्त्रयोदशतया गीतः कवीनां हितः ॥

Colophon:

इति सुलोचनामाधवे महाकाव्ये गण्डकखण्डनो नाम त्रयोदशस्सर्गः ॥

अथ प्रचेष्टः परमादराहौं विवाहवस्तूत्करमाददानः ।
करग्रहार्थं नृपनन्दनायास्सङ्केतदेशं सहसा विवेश ॥

* * * *

इति प्रलापं बहुशो वितन्वन्नसौ न सौख्यं समुपाजिहानः ।
पदे पदे तत्पुरमानवानामतानवं विस्मयमाततान ॥

R. No. **3828.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 114. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Subrahmaṇya-Nambūdirippāḍ, Peruttipalla-manakkal, Vallapula post, Pattambi.

Foll. 113*b* and 114 are left blank.

अगस्त्यवास्तुशास्त्रम्.

AGASTYAVĀSTUŚĀSTRAM.

Similar to the work described under No. 13032 of the D.C.S. MSS., Vol. XXII, and is attributed to Agastya.

Contains the Adhyāyas 1—5 and 20—32 complete.

Deals with the following subjects :—

१. वास्तूपपत्तिविभागः.
२. वास्तुपरीक्षाविधिः.
३. वास्तुग्रहणाविधिः.
४. मासनक्षत्रप्रक्रियाविधानम्.
५. सभाविधानम्.

२०. राजगृहविधानम्.
२१. दुर्गनिवेशः.
२२. दुर्गादिकरणम्.
२९. स्कन्धावारविन्यासः.
२३. राजवेश्मनिधानम्.

२६. प्राकारविधानम्.
२७. गोपुरविधानम्.
२८. वेश्मवासाधिकारः.
२९. प्रसूतिकागारविधानम्.
३०. निशान्तप्रवेशः.
३१. दिव्यस्थानविधानम्.
३२. यन्त्रविधानम्.

Beginning:

. . . . यस्य नास्य समानिका ।
यानहत्यादिकं रूपं यानं चेति प्रकीर्तितम् ॥
स्थावरं जङ्गमं वापि यत्र सारगुणान्वितम् ।
मञ्चमञ्चलिकाकाष्ठपञ्जरं पलकासनम् ॥
पर्यङ्कं बालपर्यङ्कं श . . . . . . ।
. . . . प्रतिमाङ्गानि निष्कला ॥

* * * *

थातत्थं सन्निधायां(?) महिसुरमुनिषु श्रेष्ठविद्वानगस्त्यः
सङ्क्षेपाद्वक्तुमीशे सलिलधिमसृतः स ग्र . . . . ॥

Colophon:

इति आगस्त्यवास्तुशास्त्रे वास्तूपपत्तिविभागो नाम प्रथमोऽध्यायः ॥

End:

सुषिरसम्बन्धेषु समालोच्योत्प्रेक्षाशिक्षादक्षतक्षकाः कारयेयुः ॥
दुर्गप्राकारमार्गप्रकरणरणितं यन्त्रमष्टाष्टभेदं
चत्वारिंशद्विधानोपकरणनिकरं षष्टियुक्तचष्टमार्गम् ।
उत्प्रेक्ष्याभीक्ष्यतक्षा क्षणकृतिनिपुणस्तीक्ष्णबुद्धिर्यथार्थं
निश्शेषं शेषयुक्तं निखिलमपि चलं [क्षनमा]दौ विधेयाः ॥
यवनविषयजातं जातकर्मप्रकारैस्सहितविविधमन्त्रं यन्त्रसंपालिसालम्(?) ।
सकलरिपुधरेन्द्रैस्सर्वथा सर्वकाले दुरुपगतमलङ्घ्यं दुष्प्रवेशं भवेद्धि ॥

Colophon:

इत्यागस्त्यवास्तुशास्त्रे यन्त्रविधानं नाम द्वात्रिंशोऽध्यायः ॥

The scribe adds—

सद्विद्याधरसूनुनापि लिखितं रक्षागताख्येनत
द्वास्त्वागस्त्यमवस्तु वस्तु विदुषा शास्त्रेषु मेधाविना ।

शिल्पाचार्यवरेण पुष्पवनपूवाचार्यनाम्ना मया
यच्छास्त्रेण विना न वस्तुकरणे पाण्डित्यमातन्यते ॥

R. No. 3829.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 166. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Rāma Ayyaṅgār, retired District Registrar, Sheramadevi, Tinnevelly district.

Fol. 165B gives the name of the owner of the original manuscript. Fol. 166 is left blank.

उत्तररामचरितव्याख्या — भावार्थदीपिका.

UTTARARĀMACARITAVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

A commentary on Bhavabhūti's Uttararāmacarita, which work has been described under No. 12500 of the D.C.S. MSS., Vol. XXI : by Nārāyaṇa, disciple of Nārāyaṇa of the Uparivana village in the Kerala country.

Complete.

Beginning :

भक्तालोकहृदम्भोजसमुन्मीलनभास्करम् ।
अन्तरायविघाताय सिन्धुराननमाश्रये ॥

* * * *

उक्तिर्गौणधुरीणभङ्गिगहना यत्रेतिवृत्तं पुनः
गम्भीरं चरितं तथोत्तरमिदं रामस्य पूर्णात्मनः ।
तत्र श्रीभवभूतिहृद्रसपरीवाहे निबन्धाम्बुधौ
यत्सत्यं विजिगाहिषैव विदुषां तोषाय सैषा भवेत् ॥
सत्यज्ञानमयं वितीर्य रुचिरं सिद्धौषधं ये जनान्
खिन्नान्मोहमहागदव्यतिकरैरुल्लाघयेयुः स्वतः ।
सन्तुष्टा विवरीषया यदिह ते नाब्धेऽत्र नः केवलं
व्याख्येयाखिलदृष्टिवस्तुचतुरां प्रज्ञां विदध्युर्न किम् ॥
दीपिकेव यतो भावान् गूढानपि विभावयेत् ।
भावार्थदीपिकेतीह व्याख्यास्माभिर्विरच्यते ॥

* * * *

इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे । तां वाणीं वन्देमहि चेत्यन्वयः । इदंगुरुभ्य इदानीन्तनेभ्यो गुरुभ्यः । सुप्सुपेति समासः । पूर्वेभ्यश्चिरन्तनेभ्यः व्यासवाल्मीक्यादिभ्य इत्यर्थः । क्रियार्थेत्यादिना चतुर्थी । गुरून् प्रीणयितुमित्यर्थः ।

* * * *

Colophon :

उत्तरे रामचरिते भवभूतिकवेः कृतौ ।
नाटके प्रथमाङ्कोऽयं यथाशक्ति विचारितः ॥

इति भावार्थदीपिकायामुत्तररामचरितव्याख्यायां प्रथमोऽङ्कः ॥

End :

केवलमिह मात्सर्यवार्तानभिज्ञाः सुविपुलमतिबलविदितसाहित्यहृदयसारसमुदायाः सकलगुणदोषेष्वविरतमवहितहृदयास्सहृदयाश्शरणम् ॥

शृङ्गारायितविश्वहृद्यकरुणात्मावेधवेदी भव-
च्छब्दार्थोभयविग्रहेऽत्र चरिते सीतापतेरुत्तरे ।
गम्भीरे भवभूतिकीर्तिलतिकाकन्दोद्गमे नाटके
व्याख्यातश्चरमोऽप्यसावचरमस्त्वङ्को हि यस्सप्तमः ॥

* * * *

ब्रह्मक्षत्रमहीवतंसकनिभे नारायणाख्यः कवि-
र्जातो यस्तु वलक्षमङ्गलयुतग्रामे मठाख्ये गृहे ।
तेनेयं भवभूतिसंहितवचोगाम्भीर्यकृच्छ्रानम-
द्बाच्याद्यर्थपरीक्षणव्यसनिना टीका पुनर्निर्मिता ॥

श्रीमत्केरलभूवलयमहितभूषणोपरिवनग्रामधामे(म्नि) प्रथितपूर्वोत्तरमीमांसापरमाचार्यश्रीनारायणकविवरप्रथमान्तेवासिविरचितायां भावार्थदीपिकायामुत्तररामचरितव्याख्यायां सप्तमोऽङ्कः ॥

R. No. 3830.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vēṅkaṭasubrahmaṇya Śāstri, Kiḻakke-Grāmam, Vaḍakkuvalliyār, Tinnevelly district.

Fol. 82 is left blank.

शारीरकन्यायमणिमाला.

ŚĀRĪRAKANYĀYAMAṆIMĀLĀ.

A brief exposition of the Brahmasūtrabhāṣya of Śaṅkarācārya.

Contains from the beginning of the third Pāda of the first Adhyāya (wants the beginning) to the end of the second Adhyāya complete and a small portion of the first Sūtra of the first Pāda of the third Adhyāya.

Beginning:

पुनरुद्भवात् । अर्थानां च जातीनां पूर्वसदृशीनामुत्पादात् वर्णानित्यत्वपक्षेऽपि क्रमोपगृहीतवर्णानां . . . त्वात् । क्रमस्योच्चारणोपलब्ध्योरन्यतरस्यानित्यत्वात्तत्सादृश्यनियमस्यैव वेदनित्यत्वाच्च ।

* * * *

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि । शुक् शोकः अस्य जानश्रुतेः पौत्राद्यपास्य तत्तेषां हंसानामात्मन्यनादरो न । आदरो बहुमानः

* * * *

Colophon:

इति शारीरकन्यायमणिमालायां प्रथमाध्यायस्य तृतीयः पादः ॥

End:

नामरूपव्याकरणे तु उत्तमपुरुषश्रुतेस्स्वतन्त्रकर्तृत्वम् । क्त्वाप्रत्ययस्तु जीवब्रह्मणोस्स्वरूपैक्यादुपपादयितव्य इति ॥

इति मुनिवचनैर्विरोधशान्त्या परपरिकल्पितमानदूषणैश्च ।
श्रुतिकलहनिरासतश्च वेदैः परमपदं प्रतिपाद्यमित्यवादि ॥

Colophon:

इति न्यायमणिमालायां द्वितीयाध्यायस्य चतुर्थः पादः ॥

समाप्तश्च द्वितीयोऽध्यायः ॥

सूत्राणि २२ । प्रथमपादे न्यायाः १३ । सूत्राणि ३७ । द्वितीयपादे न्यायाः १९ । सूत्राणि ४९ । तृतीयपादे न्यायाः २९ । सूत्राणि ५३ । चतुर्थपादे न्यायाः ९ । सूत्राणि । २२ । मिलित्वा न्यायाः ४९ । सूत्राणि २२९ ॥ (?)

पूर्वस्मिन्नध्याये अविरोधो ब्रह्मणि समन्वितानां वेदान्तानामुक्तः । इदानीं तत्प्राप्तिसाधनं ब्रह्मज्ञानं सोपायमिह चिन्त्यते । तत्रापि प्रथमपादे पञ्चाग्निविद्यामाश्रित्यास्य संसरणं चिन्त्यते वैराग्यार्थम् । अत्र पादे षडधिकरणानि । तत्रेदं सप्तसूत्रमाद्यमधिकरणम् । तदन्तरप्रतिपत्तौरंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् । पूर्वशरीराच्छरीरान्तरं तद[न]न्तरं तस्य प्रतिपत्तौ प्राप्तौ भूतसूक्ष्मैः परिष्वक्तो रंहति कुतः प्रश्ननिरूपणाभ्यां प्रश्नो यथा वेत्थ पञ्चम्यामा.

R. No. 3831.

Paper. 10¾ × 9½ inches. Foll. 74. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vānamāmalai Rāmānujayyaṅgār-Svāmi, Vānamāmalai Mutt, Nanguneri, Tinnevelly district.

वेदान्तरत्नमाला, अलङ्कारादर्शसहिता.

VĒDĀT ARATNAMĀLĀ WITH ALAṄKĀRĀDARŚA.

An exposition in verse of the Brahmasūtras in accordance with the views of Śrīrāmānujācārya. It is followed by a commentary in prose. By Śrīnivāsācārya (author as well as commentator), disciple of Vēṅkaṭācārya of Gōvardhana.

Complete.

Beginning:

अखिलभुवनयन्ता शर्मदः स्वाश्रिताना-
मगणितगुणकोशो हेयगन्धाभिभावी ।
चिदचिदधिपतिर्यो रङ्गभूमिस्थ आद्यो
विलसतु मम चित्ते श्रीनिवासो मुनीन्द्रः ॥
असुरकुलनिहन्ता पुण्यकीर्तिस्त्रयधाशः
रघुकुलतिलकोऽसौ रामचन्द्रः परात्मा ।
कुजकरकमलाभ्यां लालितश्रीपदाब्जो
विलसतु मम चित्ते भूमिजाभूषणश्रीः ॥
श्रीश्रीनिवासदासेन श्रीयतीन्द्रकृपेक्षणात् ।
वेदान्तरत्नमालेयं श्रीरङ्गायार्प्यते मया ॥

श्रीश्रीनिवासदासेन नत्वा श्रीलक्ष्मणं मुनिम् ।
वेदान्तरत्नमालालङ्कारादर्शो विरच्यते ।'
श्रीभाष्यकारवाक्यानां सङ्ग्रहः क्रियते मया ।
स्वबोधा[या]र्थमतो धीराः क्षम्यन्तां मम साहसम् ॥

अथातो ब्रह्मजिज्ञासा ।

क्रियाफलक्षयिष्णुत्वाद्ब्रह्मज्ञानफलाक्षयात् ।
इत्यतो ब्रह्मजिज्ञासा कर्तव्यात्र मुमुक्षुभिः ॥

क्रियाफलेति केवलकर्मणां क्षयिष्णुत्वं दर्शयन्ति श्रुतयः । तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते । अन्तवद्देवास्य तद्भवति ।

* * * *

सर्वे एव हि वेदान्ता उक्ता ब्रह्मपराश्च ते ।'
जगत्कारणता तस्मात्परस्मिन् ब्रह्मणि स्थिता ।
पदाभ्यासोऽत्र चाध्यायसमाप्तिद्योतको भवेत् ॥

Colophon:

इति श्रीशारीरकवेदान्तरत्नमालायां प्रथमाध्यायस्य चतुर्थः पादः ॥

इति श्रीवेदान्तरत्नमालालङ्कारादर्शे प्रथमाध्यायस्य चतुर्थः पादः ॥

End:

न च पुनरावर्तत इत्यादिशब्दादेव मुक्तस्यानावृत्तिरवगम्यते इति ॥

श्रीमद्यतीन्द्रकरुणारसनिर्भरेण
श्रीश्रीनिवासवरदासन्ध(ज)नेन भव्या ।
वेदान्तरत्नरचिता वरदिव्यमाला
श्रीरङ्गधामरमणोरसि धापितेयम् ॥
श्रीरङ्गराज अनया शरणागतानां
श्रीरङ्गमङ्गलमहोत्सवलम्पटानाम् ।
संसारभोगरसवैरसमानसानां
स्वाङ्घ्र्यब्जयुग्ममनसामिह यां तनोतु ॥

Colophon:

इति श्रीगोवर्धनकृतवासानां वादिहंसनवाम्बुदानामुभयवेदान्तप्रवर्तकानां श्रीमद्वेङ्कटाचार्याणां चरणारविन्दभ्रमरायमाणमानसेन वादीभकेसरिणा

श्रीनिवासदासेन रचितायां श्रीशारीरकवेदान्तरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

श्रीयतीन्द्रस्य करुणाकटाक्षोद्बुद्धचेतसा ।
वेदान्तरत्नमालालङ्कारादर्शः कृतो मया ॥

The scribe adds—

श्रीकटकग्रामवासिना श्रीनिवासाह्वयेन दासेन लिखिता ॥

Colophon:

इति श्रीवेदान्तरत्नमालालङ्कारादर्शे चतुर्थाध्यायस्य चतुर्थः पादः ॥

R. No. **3832.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kadala post, Ganjam district.

Fol. 52 is left blank.

कृष्णचन्द्रोदयम्.

KṚṢṆACANDRŌDAYAM.

A poem describing the story of Lord Kṛṣṇa and the main incidents connected therewith, by Gōvinda, son of Śrīnivāsa who was the son of Viṣṇu of Ātrēyagōtra.

१. द्वारवतीवर्णनम्.
२. नारदागमवर्णनम्.
३. भामाभामापनयनम्.
४. पाकशासनानुशासनम्.
५. अननुमतपारिजातम्.
६. सन्ध्यावर्णनम्.
७. प्रदोषानुवर्णनम्.
८. चन्द्रोदयवर्णनम्.
९. नन्दनप्रवेशवर्णनम्.
१०. समरसन्नाहवर्णनम्.
११. गीर्वाणसैन्यनिर्याणम्.
१२. युद्धारम्भवर्णनम्.
१३. अनङ्गसात्यकियुद्धवर्णनम्.
१४. महेन्द्रोपेन्द्रद्वन्द्वयुद्धवर्णनम्.
१५. पारिजातानयनवर्णनम्.
१६. कृष्णद्वारकाप्रवेशवर्णनम्.

Breaks off in the 16th Sarga.

Beginning:

यत्रागुणं गुणवती श्रुतिरस्तनिष्ठा
काष्ठां न यस्य कलयन्ति च दर्शनानि ।

यो विस्मृतस्मृतिभिरुक्तकथः पुराणै
र्यस्यागमो न गमकस्तमहं प्रपद्ये ॥

यं कर्म केचिदपरे शिवमेकहेतु-
मात्मानमेकमितरे च परे सयागम् ।

एके निरीहमपदेहमुशन्ति सन्त
स्तं नन्दनन्दनमहं शरणं प्रपद्ये ॥

* * * *

सोऽयं दुरन्तनृपकैतवदानवौघ-
भारार्ति(र्त)भूमिभविकाय भुवीह जज्ञे ।
वृष्ण्यन्धभोजयदुनाथगृहेऽधिनाथो
यं केलिशीलमधिगम्य ननन्द नन्दः ॥

* * *

आसीदात्रेयगोत्राम्बुरुहदिनमणिर्विष्णुराचीर्णदीक्षो
दक्षोऽस्मात्स्थूललक्ष्योऽजनि सुजनमतो दीक्षितः श्रीनिवासः ।
गोविन्दस्तत्तनूजः कविकुलमकुटं तेन लीलाप्रणीते
काव्ये सर्गोऽयमाद्योऽवसितिमुपययौ कृष्णचन्द्रोदयाख्ये ॥

Colophon:

इति श्रीकृष्णचन्द्रोदये महाकाव्ये द्वारवतीवर्णनं नाम प्रथमः सर्गः॥

End:

. . . . यदुभटाः सितार्थं प्रभुं
विलोकयितुमुत्सुकाः सहलिनः परं चाययुः ।
परेऽपि पुरवासिनः ससुतदारभृत्या जना
यथाविभवमुद्यता गिरितटीमवाशीलयन् ॥

. . . .

क्षणविनिहितदृष्टिर्दृष्टपौरानुयातः ।
चरमगिरिवनालीनिह्नुते तिग्मभानौ
पुरमविशदशेषाश्चर्यपात्रं प्रतीतः ॥
आसीदात्रेयगोत्राम्बुरुहदिनमणिर्विष्णुराचीर्णदीक्षो
दक्षोऽस्मात्स्थूललक्ष्योऽजनि सुजनमतो दीक्षितः श्रीनिवासः ।
गोविन्दस्तत्तनूजः कविकुलमकुटं तन लीलाप्रणीते
काव्ये सर्गोऽयमागादवसितिममलः पक्षमानोऽसमानः ॥

Colophon :

इति श्रीकृष्णचन्द्रोदयाख्ये महाकाव्ये पारिजातानयनं नाम पञ्च-दशस्सर्गः समाप्तः ॥

अथ शातकुम्भघटकारयुतामतियत्नरत्नगृहरश्मिमतीम् ।
परिबद्धतोरणलसद्विशिखां स पुरीमवापदुरगारियुतः ॥
अभियातवर्त्मनि रथाङ्गधरे प्रतिसौधमुत्सुकधियो वनिताः ।
प्रतिजालमर्पितसरोजदृशो ददृशुर्महोत्सवगलद्विनयाः ॥

* * * *

अथ रैवताद्रिमलसानुभृतो भगवान्निरीय यदुवीरगणैः ।

R. No. 3833.

Paper. 10⅝ × 9½ inches. Foll. 70. Lines, 20 in a page. Telugu. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Laṅkā Sūryanārāyaṇa Śāstrigāru, Repalli, Guntur district.

Fol. 70*b* gives the colophon of this work. Foll. 69*b* and 70*a* are left blank.

पाकयज्ञपद्धतिनिर्णयः.

PĀKAYAJÑAPADDHATINIRṆAYAḤ.

Foll. 1*a*—65*b*.

On the procedure to be observed in performing the Pākayajñas which are seven in number: by Candraśēkhara, alias Candracūḍabhaṭṭa, son of Umāpati alias Umāśaṅkara also called as Ummaṇabhaṭṭa who was the son of Dharmābhaṭṭa.

Complete.

Beginning :

नत्वा महेश्वरं देवमापस्तम्बं मुनिं तथा ।
तत्सूत्रभाष्यकारादीन् पितरौ च पितामहम् ॥
उमापतितनूजेन चन्द्रशेखरशर्मणा ।
विलोक्य सूत्रभाष्यं च त्रिविधाः पद्धतीस्तथा ॥
क्रियते पाकयज्ञानां पद्धति(ते)श्च विनिर्णयः ।
यदत्र स्खलितं किंचित् बोध्यं तद्बहुवेदिभिः ॥

लौकिकानां पाकयज्ञशब्दः । लोकास्त्रैविद्यवृद्धाशिष्टा द्विजन्मानस्तैर्नाद्रियन्ते यानि कर्माणि, तानि लौकिकानि । तेषां मध्ये सप्तानामेवौपासनहोमादीनां पाकयज्ञशब्दस्संज्ञात्वेन प्रसिद्धः । तेषां क्रमः—औपासनं, वैश्वदेवः, पार्वणम्, अष्टका, मासिश्राद्धम्, सर्पबलिः, ईशानबलिरिति सप्त पाकयज्ञशब्दवाच्यानि । तानि यज्ञोपवीतिना प्रदक्षिणं कार्याणि । तन्मध्ये अष्टकामासिश्राद्धे अपरपक्ष एव प्राचीनावीतिना अप्रदक्षिणे कार्ये; पितृयज्ञत्वात् । प्राचीनावीतं पितॄणामुपवीतं देवानामिति श्रुतेः ।

* * * *

Colophon:

इति चन्द्रचूडभट्टकृते पाकयज्ञनिर्णये नित्यप्रयोगहोमनिर्णयस्समाप्तः ॥

End:

मृन्मयपात्रं दर्वीं तृणं च अपः पिण्डानभ्यवहरेद्ब्राह्मणं वा प्राशयेत् सन्तिष्ठते पिण्डपितृयज्ञ इत्यलं भूयसा ॥

धर्मेश्वरात्मजश्रीमानु(मद्गु)माशङ्करसूनुना ।
कृतोऽयं चन्द्रचूडेन पाकयज्ञादिनिर्णयः ।

Colophon:

समाप्तः पाकयज्ञनिर्णयः ॥

अथ पुनरुपनयनमुच्यते । पारिजाते शातातपः—

लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनीम् ।
उष्ट्रमाहिषिकेमाश्वारासभीक्षीरभोजनात् ॥
उपायनं पुनः कुर्यात् तप्तकृच्छ्रं चरेन्मुहुरिति ॥

* * * *

अथर्वणस्तु पिण्डान्ते वैश्वदेवं चतुर्विधम् ॥

Colophon:

इति श्रीपौराणिकधर्माभट्टसुतोम्मणभट्टात्मजचन्द्रचूडभट्टकृते सप्त पाकयज्ञास्समाप्ताः ॥

The scribe adds—

माधवेऽब्दे चित्रभानौ नवम्यां कृष्णपक्षके ।
मद्दूरिरामवर्येण लिखिता चान्द्रचूडिका ॥

Fol. 66 gives the Dattaputtranirṇaya. Foll. 66*b*—67*b* contain the Vratacatuṣṭayaprayōga. Foll. 67*b*—69*a* contain the Māsiśrāddha and Aṣṭakāśrāddhavicāra. Foll. 69*b* and 70*a* are left blank. Fol. 70*b* gives the colophon of this work.

Colophon:

इति पाकयज्ञपद्धतिनिर्णयः ॥

R. No. **3834.**

Paper. 10¾ × 9⅓ inches. Foll. 112. Lines, 20 in a page. **Grantha. Good.**

Transcribed in 1921-22 from a MS. of M.R.Ry. Śaṅkara Nambūdirippāḍ, Paliyadattu-mana, Lakkiḍi post, Malabar district.

Fol. 112*b* is left blank.

सर्वानुक्रमणीटीका — दीपप्रभा.

SARVĀNUKRAMAṆĪṬĪKĀ: DĪPAPRABHĀ.

Same work as that described under R. No. 3796 ante; wherein see for the beginning. By Nārāyaṇa.

Complete.

End:

आचार्यशब्देनात्र विद्यानां प्रदातार उच्यन्ते न तूपनीयाध्यापयितैव, तेभ्योऽप्युत्कृष्टं बह्वृचकुञ्जरं शौनकं पृथङ्नमस्करोति—नमश्शौनकायेति ॥

Colophon:

इति सर्वानुक्रमण्या(णीटीकाया)मष्टमाष्टकस्याष्टमेऽध्याय एकान्नपञ्चाशत्सूक्तगतऋक्सङ्ख्यादयश्चर्चिताः ॥

इति षट्चत्वारिंशदधिकशतसङ्ख्याकसूक्तपरिमाणे अष्टमाष्टकस्समाप्तः ॥

एवं सहस्रे सूक्तानां मया सप्तदशाधिके ।
ऋष्याद्यं विस्तरेणोक्तमाचार्यैस्सूचितं मतम् ॥

ब्रह्मक्षत्रो जयति विपुलो भूप्रदेशो महान्तो
यत्राचार्याः श्रुतिषु निपुणाश्शङ्कराद्या बभूवुः ।
अब्धौ तेजस्त्रितयपरमे निर्ममे जामदग्न्यो
यं ब्रह्मार्थं भुवनमहितं केरलैर्जुष्टमत्र ॥

वेदो नाम महत्पदं जनपदो यत्र द्विजानां ततिः
साङ्गं वेदमधीत्य वाच्यमखिलं मीमांसते सुस्फुटम् ।

तत्र ग्रामवरे क्वचिन्निवसता नाम्ना च नारायणे-
नैषानुक्रमणीप्रदीपनपरा दीपप्रभा निर्मिता ॥
ग्रामे महाविहाराख्ये जातेनाङ्गिरसां कुले ।
आर्यासुतेन टीकेयं रचि(लिखि)ता दैवशर्मणा ॥
वेदार्थार्णवतारणाय मुनिना कात्यायनेन स्मृतां
सर्वानुक्रमणीं दृढां सुरुचिरां प्राप्यापि नौकामिमाम् ।
नेतारं सदृशं विचिन्त्य कुशलं कच्छे स्थितान् कोविदान्
अस्मद्व्याकृतिनाविका यदि रुचिरतेषां भवेत् तारयेत् ॥

* * * *

Colophon :

सर्वानुक्रमणी(टीका) नारायणकृता समाप्ता ॥

R. No. **3835**.

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 104. Lines, 20 in a page. Dēvanāgarī Good.

Trasncribed in 1921–22 from a MS. of M.R.Ry. Dēvulapalli Rāmakṛṣṇabrahma Śāstrigāru, Repalli, Guntur district.

Fol. 104*b* gives the colophon of this work. Fol. 10 is left blank.

वैखानसगृह्यसूत्रव्याख्या.

VAIKHĀNASAGṚHYASŪTRAVYĀKHYĀ.

Same work as that described under R. No. 1609 ante, wherein see for the beginning. By Nṛsiṁhāgnicit, son of Mādhavācārya.

Contains the Praśnas six to ten complete.

End :

एवं नित्यं मनोवाक्कायकर्मभिश्शनैः(शनैः) क्रमक्रमेण धर्म(र्म्यं)सदाचारं समाचरति समा(म्यगा)चरतीति विप्रोतिप्रति(विप्रप्रीति)करः समाप्तः ॥

Colophon :

माधवाचार्यपुत्रेण नृसिंहाग्निचिता (कृते ।)
वाजपेयकृता भाष्ये प्रश्नोऽयं नवमो गतः ॥

विप्राद्याश्रमधर्मं च प्रभाष्याथ प्रभाष्यते ।
विप्राद्याश्रमधर्मं(?) च रामं नत्वा मयाधुना ॥

इदानीं साम्यतो गृहस्थाश्रमधर्ममाह—गृहस्थाश्रमो(मे) दि(द्वे)यज्ञोपवीते वैणवममसववांस(चमसकार्पास)कल्माद्दिण्डं(?) कमण्डलुं चकारादुपानच्छत्री (त्रे) च धारयेत् । नित्यं पूर्ववत् । स्नात्वा सभार्यः प्र(गृ)ह्याग्निस्मार्ताग्नि औपासनाग्नी गृह्याणि ? ।

* * * *

एवं कृते सति अभीष्टं यथेच्छापरामुत्कृष्टां गतिं स मृतको गत्वा विष्णुलोके महीयते विष्णुवत्पूज्यते । तस्मात्प्रयत्नेन नारायणबलिः कर्तव्यः ॥

Colophon:

तृतीयः पटलः ॥
समाप्ता वैखानस(गृह्य)सूत्रव्याख्या ॥

R. No. **3836.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 198. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Ambaramauli Rāmuṇṇi Vaidyar, Quilandy, Panthalayur, North Malabar district.

Fol. 198*b* is left blank.

अष्टाङ्गहृदयव्याख्या—वाक्यप्रदीपिका.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ: VĀKYAPRADĪPIKĀ.

Same work as that described under R. No. 3266 ante. By Paramēśvaradvijōttama, a resident of Aśvatthagrāma, *i.e.*, Araśūr.

Contains from the 12th Adhyāya of the Sūtrasthāna (wants the beginning) to the end of the 4th Adhyāya complete and the 5th Adhyāya incomplete in the Cikitsāsthāna.

Beginning:

स्थो दोषभेद(:) । एकैकवृद्धिसमस्ताश्रयैः षट् भवन्ति ! पुनश्च षट् । एतत् क्षयद्वन्द्वव्या (वृद्ध्या) सविपर्यया यत्वे(ते)दाषभेदाः पुनश्च षट्प्रकाराः भवन्ति । कथम् एकद्वन्द्ववृद्ध्या सविपर्यया

* * * *

Colophon:

इति वाक्यप्रदीपिकायां द्वादशोऽध्यायः ॥

* * * *

यथा सत्यभामा भामिनि । अत्र सूत्रिताः सूक्ष्मा अर्थाः सर्वतस्तत्रैस्मिन् तन्त्रे प्रतन्यन्ते विस्तार्यन्ते । तस्माद्ध्रस्वदेतत् स्थानमिति भावः ॥

भार्गवेण नि(नी)लासौम्यभागेऽश्वत्थतीरवासिना ।
व्याख्यातं वाहटेनोक्तं सूत्रस्थानं समासतः ॥

Colophon:

इति नीलातीरगताश्वत्थग्रामवासिना परमेश्वरद्विजोत्तमेन कृतायामष्टाङ्गहृदयव्याख्यायां वाक्यप्रदीपिकायां सूत्रस्थाने त्रिंशोऽध्यायः ॥

End:

विद्रधीति । आवृतानामुपेक्षणादनुपक्रमाद्विद्रध्या(द)य उपद्रवा भवन्ति । तस्मादुपक्रमे यतितव्यमित्यर्थः ॥

द्विजोत्तमस्य वैद्यस्य शिष्येण सहचारिणा ।
निदानं स्थानमित्येवं व्याख्यातं वाहटोदितम् ॥

Colophon:

इति वाक्यप्रदीपिकायां षोडशोऽध्यायः ॥

निदानस्थानं समाप्तम् ॥

अथ ज्वरचिकित्सितमाह—रोगपरीक्षा निदानस्थानोदिता । साम्प्रतं चिकित्सितं वक्तुं युक्तमिति । तथा च मुनिः—रोगमादौ परीक्षेत ततोऽनन्तरमौषधमिति ।

* * * *

भूयिष्ठं बाहुल्येन । कालेति । कालाद्योऽन्योन्यभेषजैः साध्याः स्युः ॥

Colophon:

इति वाक्यप्रदीपिकायां चिकित्सिते चतुर्थोऽध्यायः ॥

अथ राजयक्ष्मचिकित्सितम् । बलिन इति । अतिशयेन स्निग्धस्विन्नस्य शोधनाङ्गत्वेऽपि पुनर्ग्रहणात् ।

* * * *

हृद्रोगैरिति । सुखोष्णं सलिलं तैलं चेति । पञ्चभिर्लवणैः गोमूत्रेण काञ्जिकेन च । विरत्रमिति.

R. No. 3837.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll 118. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Naḍuvil-maṭham, Trichur, Cochin State.

Fol. 118*b* is left blank.

विषनारायणीयम्.

VIṢANĀRĀYAṆĪYAM.

A treatise in medicine laying down the procedure to be adopted in using different kinds of poisonous substances after necessary purification, in connexion with the preparations of certain medicines: by Nārāyaṇa.

Contains the Paṭalas 1—32 complete, but wants the beginning.

Beginning:

वर्णवृद्ध्या जपग्रासस्तेनान्येषां समूहयेत् ।
बीजाद् द्वित्रिगुणा मन्त्रमालामन्त्रेजपक्रिया ॥

* * * *

रुद्रैर्युक्ता केवला वा मनूनां कर्मारम्भे मातृकां विन्यसेद्यः ।
मन्त्रास्सद्यः कुर्वते तस्य सिद्धिं पापैस्सार्धं याति नाशं जरा च ॥
संसाधिता ये विषहा लिपिस्तैस्सर्वे च मन्त्रा इह साधिताः स्युः ।
किमस्ति तत्कर्म समस्तमन्त्रयोन्या तया साधु न साध(ध्य)ते यत् ॥

Colophon:

इति नारायणीये प्रथमः पटलः ॥

End:

तारो मेषा विषं दन्तिनरौ दीर्घौ यणा रसः । क्रुद्धोल्काय ठ ठ । महोल्काय ठ ठ । वीरोल्काय ठ ठ । द्युल्काय ठ ठ । सहस्रोल्काय ठ ठ ।

एवमष्टाक्षरं मन्त्रं वैष्णवं साङ्गमीरितम् ।
स्नात्वाश्म(त्म)शुद्धिं कृत्वा च पुनस्तेनार्चयेद्धरिम् ॥

* * * *

तेन श्लोकैस्सहस्रद्वितयपरिमितैस्तन्त्रमेतत्प्रणीतं
निष्कृभू (. . . . . .) (नारा)यणेन ॥

एतस्मिन्मन्त्रवादे भुवनहितकरे सर्वतन्त्रार्थकोशे
नाम्ना नारायणीये प्रचुरपरिचयः श्रद्ध . . . . . ।
. . . . . त्तरं कामचारी वशित्वा-
द्दिव्यानिष्टांश्च भोगाननिमिषपतिवत् प्राप्नुयाद्दिव्यदेहम् ॥

Colophon:

इति नारायणीये विषवैद्ये द्वात्रिंशः पटलः ॥

R. No. 3838.

Paper. 10¾ × 9½ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Veṅgu Śāstrigal, Teppakulam street, Kallakadu, Tinnevelly district.

Fol. 52 is left blank.

काव्यलक्षणसङ्ग्रहः, सव्याख्यः.

KĀVYALAKṢAṆASAṄGRAHAḤ WITH COMMENTARY.

A treatise in poetics dealing with the following subjects :—

I. काव्यप्रकरणम्.

१. सङ्ग्रहत्रयप्रतिपाद्यक्लृप्तिसरणिः.
२. काव्यप्रकरणसरणिः.
३ काव्यस्वरूपसरणिः.
४. महाकाव्यलक्षणसरणिः.

II. शब्दार्थप्रकरणम्.

५. अभिधावृत्तिसरणिः.
६. लक्षणावृत्तिसरणिः.
७. व्यञ्जनावृत्तिसरणिः.

III. पद्यसन्दर्भप्रकरणम्.

८. पद्यक्लृप्तिसरणिः.
९. मात्राछन्दस्सरणिः.
१०. वर्णवृत्तसरणिः.

IV. वृत्तिरीत्यादिसन्दर्भप्रकरणम्

११. वृत्तिभेदसरणिः.
१२. रीतिभेदसरणिः.
१३. शय्यापाकसरणिः.

V. ध्वनिप्रकरणम्.

१४. विवक्षितवाच्यध्वनिसरणिः.
१५ विवक्षितान्यपरवाच्यध्वनिसरणिः.
१६. संलक्ष्यासंलक्ष्यक्रमव्यङ्ग्यध्वनिसरणिः.
१७. गुणीभूतव्यङ्ग्यध्वनिसरणिः.

VI. रसप्रकरणम्.

१८. विभावादिसरणिः.
१९. नवरससरणिः.

VII. दोषप्रकरणम्.

२०. पददोषसरणिः.
२१. वाक्यदोषसरणिः.
२२. अर्थदोषसरणिः.

VIII. गुणप्रकरणम्.

२३. शब्दगुणसरणिः.
२४. अर्थगुणसरणिः.

IX. अलङ्कारप्रकरणम्.

२५. अनुप्राससरणिः.
२६. यमकसरणिः.
२७. चित्रालङ्कारसरणिः.

By Śrīnivāsa.

Contains the Prakaraṇas one (wants the beginning) to eight complete and ninth incomplete.

Beginning:

प्रकारतो वर्ण्यन्ते । सुभाषितसङ्ग्रहे प्रतिपाद्यं निरूपयति—

शिष्टे सुभाषितैरेव सरसैः प्रतिपाद्यते ।
राजदेवप्रसङ्गाभ्यामैहिकामुष्मिकार्जनम् ॥

शिष्टे अवशिष्टे सङ्ग्रहे सरसैस्सुभाषितैरेव राजतोषणोपायप्रसङ्गेन देवप्रसादोपायप्रसङ्गेन चैहिकामुष्मिकार्थद्वयार्जनप्रकारः प्रतिपाद्यत इत्यर्थः । एवं सति ज्ञेयार्थबहुले सङ्ग्रहलये ग्रन्थविस्तरशङ्कां निवारयति —

आद्यः पञ्चशतग्रन्थो द्वितीयस्त्रिशतो भवेत् ।
तृतीयो द्विशतश्चैवं सहस्रं भविता त्रयम् ॥

विद्वद्भिरादरणीयत्वसिद्ध्यर्थमस्य प्रबन्धस्य प्राचीना एव प्रबन्धा आकरा इत्याह—

प्रायः प्राश्चः प्रबन्धाः स्युस्सङ्ग्रहत्रितयाकराः ।
काव्यप्रकाशिकामुख्या माघाद्या मुक्तकादयः ॥

* * * *

Colophon :

इति श्रीनिवासकृतौ काव्यसारसङ्ग्रहत्रितये सङ्ग्रहत्रयप्रतिपाद्यक्लृप्ति-सरणिः ॥

* * *

Colophon :

इति गुणीभूतव्यङ्ग्यसरणिः ॥

इति श्रीनिवासस्य कृतौ काव्यलक्षणसङ्ग्रहे ध्वनिप्रकरणं समाप्तम् ॥

End :

यो हेतुः काव्यशोभायाः सोऽलङ्कारः प्रकीर्त्यते ।
गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्ययः ॥

इति । अतः गुणानां सङ्घटनाश्रयत्वमेव युक्तम् ॥

Colophon :

इति काव्यलक्षणसङ्ग्रहे गुणप्रकरणं समाप्तम् ॥

अथालङ्कारः— अथ गुणनिरूपणानन्तरमलङ्कारा निरूप्यन्ते । अलङ्क्रियन्ते अनेनेति चारुत्वहेतुरलङ्कारः । तथा चोक्तं काव्यप्रकाशे—

उपस्कुर्वन्ति तं सन्तं येऽङ्गद्वारेण संश्रिताः ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ इति ।

सन्तं विद्यमानं तं रसं काव्यजीवितभूतम् । उपस्कुर्वन्ति यथा करचरणाद्यवयवगतैः वलयनूपुरादिभिः तदलङ्कारतया प्रसिद्धैरवयव्येवालङ्क्रियते । तथा शब्दार्थावयवगतैरनुप्रासोपमादिभिस्तदलङ्कारतया प्रसिद्धैरवयवीभूतं काव्यमुपस्क्रियते ।

* * * *

Colophon :

इति यमकसरणिः ॥

अथ चित्रालङ्कारः—

स्वरवर्णस्थानबन्धगतीनां नियमं तथा ।
प्रहेलिकाच्युतं गूढमेतच्चित्रं निगद्यते ॥

* * * *

यथा च

क: खे चरति का रम्या का जप्या किं नु भूषणम् ।
को वन्द्य: कीदृशी लङ्का वीरमर्कटकम्पिता ॥

अत्र क: खे चरतीत्यादीनां पञ्चानां प्रश्नानां चतुर्थपादविच्छेदेनोत्तराणि भवन्ति । षष्ठस्य तु समासेनोत्तरम् । विच्छेदस्तु वि:.

R. No. 3839.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Harihararājaguru, Chochinajagannathapuram, Ganjam district.

Fol. 32*b* is left blank.

रुक्मिणीहरणम्.

RUKMIṆĪHARAṆAM.

A poem describing how Rukmiṇī was carried away by Kṛṣṇa: by Gōvindaratha, who mentions king Mukunda.

Breaks off in the fifth sarga.

Beginning:

पृथिवीतलशीतलद्युतिर्द्युतिमानद्भुतविद्रुमद्रुम: ।
द्रुमशातितशत्रुरोजसां गतिरासीत्किल भीष्मकाह्वय: ॥
यदनल्पभुजौजसाग्निना परिदग्धारिनृपालिकाननात् ।
उदभूदतिभूरसौ यशस्ततिरत्युज्ज्वलभूतिसन्तति: ॥

* * * *

Colophon:

इति श्रीगोविन्दरथकृतौ रुक्मिणीहरणे महाकाव्ये प्रथमस्सर्ग: ।

End:

आसीमाचलमिन्दुपद्मकरयोश्छिन्दान्ति भासस्तम:
स्मेरं भेरुचिरावृतं वितनुते पातालमश्मत्विष: ।
छेत्तुं केवलमर्थिसार्थहृदय[:]द्रोणीशयाभ्यर्थना-
दु:खध्वान्तमलं सुकान्तिरवनीचन्द्रो मुकुन्दो नृप: ॥

Colophon :

इति श्रीगोविन्दरथकृतौ रुक्मिणीहरणे महाकाव्ये चतुर्थस्सर्गः ॥

अथाविशद्भूपतिचक्रम(ध्यं) गते विदर्भावनिपाकशासने ।
स्वयंवरावेक्षणकौतुकाकुलं कुलं सुराणामजनिष्ट सङ्कुलम् ॥

* * * *

अयं गणानामधिपो गजाननः स्फुटैकदंष्टः प्रणतार्तिनाशनः ।
दधाति सिन्दूरपरागरूषितो दिनान्तरागच्छुरिताम्बुदश्रियम् ॥

R. No. **3840.**

Paper. 10⅝ × 9½ inches. Foll. 80. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Svāmi Śāstrigal, Nāraṇammapuram, Tinnevelly district.

Foll. 78*b*—80*b* are left blank.

अद्वैतभूषणम्.

ADVAITABHŪṢAṆAM.

An epitome of the contents of the Pañcapādikāvivaraṇa, similar to Vidyāraṇya's Vivaraṇaprameyasaṅgraha: by Bōdhānandēndrasaṁyamin, disciple of Gīrvāṇēndrayati. This work is also called Vivaraṇaprameyasaṅgraha, in the colophon at the end of the sixth Varṇaka.

Breaks off in the course of the seventh Varṇaka.

Beginning :

मुद्रां भद्रार्थदात्रीं सपरशुहरिणां बाहुभिर्बाहुमेकं
जान्वासक्तं दधानो भुजगवरसमाबद्धकक्ष्यो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटः क्षीरगौरस्त्रिणेत्रः
दद्यादाद्यैश्शुकाद्यैर्मुनिभिरपि वृतो भावशुद्धिं भवो वः ॥

* * * *

विश्वरूपं च विश्वेशं विश्वसत्ताप्रदं शिवम् ।
वेदयोनिमहं वन्दे व्यासं वेदार्थसिद्धिदम् ॥

समाश्रिता गिरां देवी नन्दयत्यात्मसंश्रितान्
तमाश्रये श्रिया जुष्टं शङ्करं करुणानिधिम् ॥

व्याख्यावाचोऽतिदप्यत्सुरवरतटिनीभङ्गभङ्गप्रवीणाः
श्रुत्वा त्यक्त्वा भिदाशां झटिति भयभरभ्रान्तनेत्रा यदस्य ।
धावन्तो द्वैतिषण्डाः श्रुतिशिखरवचोभावबोधैकदक्षं
गीर्वाणेन्द्रं प्रपद्ये गुरुवरमनिशं तद्यथार्थाभिधानम् ॥
गीर्वाणेन्द्रयतीन्द्राणां चरणाम्बुरुहद्वयम् ।
स्वर्गापवर्गदं पुंसां नौमि विघ्नौघशान्तये ॥
टीकातन्मूलभाष्यादीन् सम्यग्बोधेन्द्रसंयमी ।
आलोच्य तत्त्वं सङ्गृह्य करोत्यद्वैतभूषणम् ॥

ओं धर्मजिज्ञासासूत्रे ह्येतदेव स्थितम् । स्वाध्यायोऽध्येतव्य इतिअध्ययनविधेरदृष्टार्थत्वमुत दृष्टार्थत्वमिति विशये विधिवशाद् दृष्टार्थत्वम् ।

* * * *

तस्माद्युक्तमुक्ताधिकारिविशेषणमोक्षसाधनब्रह्मज्ञानाय श्रवणादिविधिः । तस्मात्सम्भावितविषयप्रयोजनत्वात् शास्त्रमारम्भणीयमिति प्रथमवर्णकं सिद्धम् ।

टीकाद्यर्थान्समालोक्य व्याकरोत्सारसङ्ग्रहम् ।
अद्वैतभूषणं नाम विदुषां प्रीतयेऽधुना ॥
यद्बोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

विचारविधेः व्यवहितविषयानुबन्धः फलानुबन्धश्च प्रवर्तमानपुरुषस्य प्रथममाकाङ्क्षितत्वाद्विचारितः । अनन्तरमव्यवहितविषयस्य विचारस्य गतार्थत्वशङ्कायां द्वितीयवर्णकारम्भः ।

End:

विशिष्टरूपेण कर्तुरपि स्वरूपेणोपादानत्वसम्भवात् । तस्मात्सर्वार्थप्रकाशनसमर्थसर्वशब्दोपादानतया सर्वज्ञं ब्रह्मेति सिद्धम् ॥

Colophon:

इति विवरणप्रमेयसङ्ग्रहे षष्ठवर्णकमवसितम् ॥

अथ वा पूर्वसूत्रेण ब्रह्मणो लक्षणमुक्तम् । अत्र प्रमाणमुच्यते—लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः । अत्रेदं विचार्यते—तं तु औपनिषदं पुरुषं पृच्छामीत्यादि वाक्यं ब्रह्मणश्शास्त्रैकगम्यत्वं प्रतिपादयति न वेति ।-

* * * *

नाद्यः—तेषां व्यावहारिकत्वेन यथाव्यवहारं व्यवस्थोपगमात्। न द्वितीयः—बिम्बप्रतिबिम्बधर्मवदेव नित्यमुक्तत्वसर्वज्ञत्वादीनामपि व्यवस्थोपपत्तेः । तस्मात् परमार्थ.

R. No. 3841.

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 46 is left blank.

हठयोगप्रदीपिका, केरलभाषाटीकासहिता.

HAṬHAYŌGAPRADĪPIKĀ WITH MALAYALAM MEANING.

Same text as that described under No. 4393 of the D.C.S. MSS., Vol. IX, By Sahajānandasantānacintāmaṇi. The work is followed by commentary in Malayalam language.

Complete in four Upadēśas.

Colophon:

इति सहजानन्दसन्तानचिन्तामणिना विरचितायां हठप्रदीपिकायां चतुर्थ उपदेशः ॥

R. No. 3842.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Kannūr-mana, Ottapalam, Malabar district.

Fol. 40 is left blank.

महाभास्करीयव्याख्या—कर्मदीपिका.

MAHĀBHĀSKARĪYAVYĀKHYĀ: KARMADĪPIKĀ.

A short commentary on Bhāskarācārya's Mahābhāskarīya, which work has been described under No. 13467 of the D.C.S. MSS., Vol. XXIV: by Paramēśvara.

Complete.

Beginning:

किरीटहारमकरकुण्डलाद्यैरलङ्कृतम् ।
नमामि तं हरिं चक्रशङ्खपद्मगदाधरम् ॥
व्याख्याने भास्करीयस्य भाष्यस्य प्राक् प्रदर्शिता ।
गुरुकर्मोपपत्तिस्तु सगोला विस्तरान्मया ॥

क्रियामात्रप्रसिद्ध्यर्थमधुना मन्दचेतसाम् ।
व्याख्याल्पा तस्य मूलस्य क्रियते कर्मदीपिका ॥

कलां बिभर्तीति शम्भुस्तुतिं(तिः) । जयन्तीति ग्रहस्तुति(:) । तपोभिरित्यार्यभटतन्त्रस्य तच्छिष्याणां चाशीर्वचनम् । नवादी(ग्री)ति ।

* * * *

Colophon:

इति पारमेश्वरकृतायां कर्मदीपिकायां प्रथमोऽध्यायः ॥

End:

अस्मिन् तन्त्रे यद्ग्रहकर्म नास्ति, तत् क्वचिदपि तन्त्रे न स्यात् । एवमनेन श्लोकेन तन्त्रं स्तूयते—

अधिकारो न येषां स्यादस्य भाष्यनिरीक्षणे ।
कर्ममात्रप्रबोधार्थं तेषां व्याख्येयमीरिता ॥

Colophon:

इति परमेश्वरकृतायां कर्मदीपिकायामष्टमोऽध्यायः ॥

मुहूर्ताष्टकसिद्धान्तवक्ष्यमाण्यायकर्मणाम् ।
दीपिकां गोलभटयोश्चाकरोत्परमेश्वरः ॥

R. No. 3843.

Paper. 10¾ × 9½ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paṭalattu Rāmuṇṇi-Vaidyar, Panthalayini, Quillon, North Malabar district.

Fol. 98 is left blank.

सुबोधिनीसारः.
SUBŌDHINĪSĀRAḤ.

A commentary on the Nāmaliṅgānuśāsana, which work has been described under No. 1620 of the D.C.S. MSS., Vol. III. At the beginning of the work it is stated that this commentary is a summary of prior work called Subōdhinī written by Jātavēdādhvarin.

Contains the first Kāṇḍa complete and breaks off in the course of the Vanauṣadhivarga in the second Kāṇḍa with the text.

Beginning:

श्रीकान्तं कान्तमत्यन्तमेकान्तसुखदायिनम् ।
वेद्यविद्यादिदात्मानं लोकालोकमुपास्महे ॥

ज्ञानादयो विवर्धन्ते सिध्यन्त्येव च सिद्धयः ।
ययोः प्रसादात्तौ वन्दे परावरगुरू क्रमात् ॥
जातवेदाध्वरिप्रोक्तां यथार्थाख्यां सुबोधिनीम् ।
व्याख्यामभरकोशस्य सङ्क्षिप्याख्यातुमारभे ॥
संस्कृतकेरलभाषाभेदविहीनानि संस्कृतैस्तैस्तैः ।
भिन्नानि तु नामानि प्रोच्यन्ते केरलीयभाषाभिः ॥

ग्रन्थारम्भे यन्मङ्गलसाधनमिष्टदेवताराधनं शिष्टाचारानुमेयवेदोक्तं न केवलं तत् कर्तुरेव मङ्गलसाधनं किन्तु पुण्यान्तरवदन्यान् प्रति कर्तव्यमित्युपदेशकस्यापि । तत्र लघूपाया मङ्गलमवाप्तुं ग्रन्थस्यादौ यस्येत्यादिश्लोकेन बोध(द्धृ)न् प्रति प्रशस्तो देव आराध्य इत्युपदिश्यत । श्लोकोऽयं द्व्यर्थः । तत्र प्रथमं तावत् प्रधानभूतोऽर्थः प्रदर्श्यते—यस्य भगवतो देवस्य ज्ञानदयासिन्धोः ज्ञानदययोरत्यर्थप्रभूतयोः विपुलाश्रयस्य सर्वज्ञस्य सर्वभूतानुकम्पित्वशालिन इति यावत् ।

* * *

Colophon:

इति स्वर्गवर्गोक्तनामलिङ्गविवेचनम् ॥

End:

निकुञ्जकुञ्जौ वा क्लीबे लतादिविहितोदरे । पर्वतगतनिम्नप्रदेशे इति शेषः । द्वौ लतादिविहितोदरे पूर्वोक्तगिरिनिम्नप्रदेशे ॥

Colophon:

इति क्ष्माभृद्वर्गः ॥

पूर्ववर्गान्ते लतादिविहितप्रदेशप्रसङ्गात्तत्प्रभवाणां लतौषधादीनां तदुद्भवस्थानस्य वनस्य च नामलिङ्गानुशासनार्थमतिमहान्तं वर्गमुपक्रमते— अटव्यरण्यं विपिनं गहनं काननं वनम्—षट् च वृक्षलतादिबहुलप्रदेशमात्रे । अटन्त्यात्र भयादत्राटवी । स्त्री ।

* * *

वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि । वृक्षोपरिभुवो वृक्षान्तरस्य नामान्येतानि । कषायः शीतलः पाके ग्राही स्याद्व्रणरोपणः इति.

R. No. 3844.

Paper. 10¾ × 9½ inches. Foll. 24. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1921-22 from a MS. of M.R.Ry. Vengu Śāstrigal, Kallakkadu, Tinnevelly district.

रुद्रभाष्यम्.

RUDRABHĀṢYAM.

Similar to the work described under R. No. 1206(*a*) ante.

Complete.

Beginning :

अतः परमग्निकाण्डमग्न्यार्षेये चरमाग्नामिष्टकायाः शतरुद्रीयं जुहोति। नमस्ते रुद्र मन्यव इत्यस्य समुदायस्याग्निकाण्ड ऋषिः, महाविराट् छन्दः, शम्भुर्देवता । जाबालोपनिषत्---अथ हैनं ब्रह्मचारिण ऊचुः-- किंजप्ये नामृतत्वं ब्रूहीति । स होवाच---शतरुद्रीयेणेति ।

* * * *

शत्रुनगरचतुष्पथे देवालये वा शङ्कुं शतसहस्राभिमन्त्रितं निखाय गच्छेत् । संवत्सरान्नगरं नश्यति ।

प्रणमदमरलोकमौलिमालाकुसुमरजोऽरुणपादपद्मयुग्मम् ।
अनवरतमनुस्मरेद्भवान्या सह जगतां पितरं पिनाकपाणिम् ॥

Colophon :

इति प्रथमोऽनुवाकः ॥

End :

यश्च नः अस्मान् द्वेष्टि तं वः जम्भे दधामि तं वो जम्भेषु दधामि स्थापयामि । तं भक्षयतेत्यभिप्रायः । नमो ये अन्तरिक्षे स्थिताः । एषां वात इषवः । नमो दिवि एवं स्थिताः एषां वर्षमिषवः । तेभ्यो दशेत्यादि पूर्ववत् । पुनश्चरणम् । एकरात्रमुपवासमेकरात्रमुषित्वा शुद्धो भवति। यं यं कामं प्रार्थयते तत . . . हं जप्त्वा तं तं लभते । एतच्च यजुस्त्रयं समस्तन्यस्तं च जपितं यथाकामफलप्रदम् । पुनश्च ध्यानानन्तरं कृच्छ्रद्वयं चरित्वा एकादशसहस्रं जपः । एतत्सर्वं पश्चिमद्वारे शिवालये कर्तव्यम् ॥

वृषाधिरूढं देवेशं सर्वलोकैकपूजितम् ।
ध्यायेद् ब्रह्मादिभिस्स्तुत्यं पार्वतीसहितं शिवम् ॥

जपमात्रेण सर्वसिद्धिर्भवति ॥

R. No. 3845.

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 172. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. A. Vēṅkaṭācāriyar, Mēlattirumāḷigai, Alwartirunagari, Tinnevelly district.

न्यायरत्नमालाव्याख्यानम् — नायकरत्नम्.

NYĀYARATNAMĀLĀVYĀKHYĀNAM: NĀYAKA-RATNAM.

A commentary on Pārthasārathimiśra's Nyāyaratnamālā, which work has been described under No. 4421 of the D.C.S. MSS., Vol. IX: by Rāmānujācārya.

Complete.

Beginning:

सम्यङ्नयाञ्जनप्रमेधितमस्तदोष-
माम्नायसंज्ञमनुशास्ति विशुद्धचक्षुः ।
मानान्तरानधिगतं खलु धर्मतत्त्वं
तत्त्वान्तरं च पुरुषोत्तमसंज्ञकं तत् ॥

आम्नायान्तिमसीमनि स्फुरति वस्सद्भावनागोचरः
स्वे स्वे कर्मणि यः प्रशास्ति पुरुषं योग्याधिकारक्रमात् ।
आधत्ते विविधोपचारमखिलैरङ्गैरशेषाङ्गिनां
साक्षाद्विष्णुरिवैधते विधिरयं नानावताराश्रयः ॥

अविभक्तविभक्तमार्गयोर्मतयोर्भट्टगुरूपदिष्टयोः ।
उभयोरपि पार्थसारथिः प्रथितः प्राथमिकोऽभियोगवान् ॥

अस्पष्टभावमपरीक्षकदुष्प्रवेश-
माचार्यचन्द्रमधिकृत्य दृढप्रकाशम् ।
न्यक्कृत्य पार्थरथसारथिरन्यतन्त्रं
सत्प्रीतये ग्रथितवान्नयरत्नमालाम् ॥

गुरुतन्त्रनियन्त्रितोऽप्यहं बहुमानादिह पार्थसारथेः ।
विवृणोमि मतान्तराश्रितां स्थिरभावां नयरत्नमालिकाम् ॥

प्रारिप्सितस्य ग्रन्थस्य प्रत्यूहप्रशान्तये सर्वोत्कृष्टां श्रुतिशिर[स]स्समधिगतां स्वेष्टदेवतां नमस्यति — आनन्दमिति । आनन्दं निरतिशयसुखस्वरूपम् । अमृतं नित्यमुक्तस्वरूपम् । ज्ञानं संवित्स्वरूपमजम् उत्पत्तिरहितम् । अनेन नित्यत्वमपि स्थापितम् ।

* * * *

अथातो धर्मजिज्ञासेत्यत्र शास्त्रादौ भाष्यकारेण मीमांसारम्भणीयानारम्भणीया वेति विचिन्त्य तदर्थं स्वाध्यायाध्ययनविधेरर्थज्ञानपर्यवसानमस्ति वा न वेति चिन्ता कृता । तत्र स्वाभिमतपूर्वपक्षराद्धान्तौ पश्चात्प्रवर्तयिष्यन् प्रथमं प्रभाकरमते पूर्वपक्षराद्धान्तौ दूषयितुमनुवदति—तत्र तावदिति । एषा हि तन्मतस्थितिः ।

* * * *

सिद्धान्तं निगमयति—तस्मादिति । प्रक्रान्तं प्रकरणं समापयति—आचार्येति ।

Colophon :

इति श्रीमद्रामानुजाचार्यविरचिते न्यायरत्नमाला(व्याख्याने) नायकरत्ने प्रयुक्तिवर्णकव्याख्यानं समाप्तम् ॥

भूसुराणां सुराणां वा सभा जयति सम्पदम् ।
जातवेदगुरुर्यज्वा व्याख्यया च तथेज्यया ॥
अस्ति गोदावरीनाम नदी तत्तीरवासिनम् ।
नरसिंहं नमस्यामि शश्वद्धर्मपुरीश्वरम् ॥

सम्प्रति वेदप्रामाण्यसिद्ध्यर्थं स्वतः प्रामाण्यं परतश्च प्रामाण्यमाचार्यैरुक्तं तदधिकृत्य प्रकरणं प्रवर्तयति—विज्ञानस्येति ।

End :

स्वग्रन्थस्य सम्प्रदायशुद्धिं दर्शयति—भुवनत्रयेति । तत एव स्वकीयपितृसकाशादेव स्वप्रबन्धस्योपादेयतां दर्शयति—मीमांसाब्धिमिति । मीमांसैवाब्धिः मीमांसाब्धिः शाबरभाष्यम् । मत्या स्वबुद्धिकौशलेन । आचार्यैः भट्टाचार्यैः । धीरः पार्थसारथिरिति शेषः ।

Colophon :

इति श्रीरामानुजाचार्यविरचितन्यायरत्नमालाव्याख्यानं नायकरत्नं सम्पूर्णम् ॥

R. No. 3846.

Paper. 10⅝ × 8¼ inches. Foll. 58. Lines, 20 in a page. Devanāgari and Malayalam. Good.

Transcribed in 1921–22 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 58 is left blank.

कटकभूषणम्, केरलभाषाव्याख्यासहितम्.

KAṬAKABHŪṢAṆAM WITH MALAYALAM MEANING.

A treatise on architecture ascribed to Viśvakarman. The work is followed by a commentary in Malayalam language.

Wants the beginning; otherwise complete.

Beginning:

गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्यासमाप्राक्प्लवा
स्निग्धा धीररवा प्रदक्षिणजलोपेनाशुबीजद्रुमा ।
संप्रोक्ता बहुपांसुरक्षयजला तुल्या च शीतोष्णयोः
श्रेष्ठा भूरधमा समुक्तविपरीता मिश्रिता मध्यमा ॥ इति ।

* * * *

उत्पाद्योक्तवदल्पबिम्बमुपनीयातो बहिस्सन्दहेत्
शो(गो)र्सिस्स्नापितं नदहेगग(दह)ने तद्गौरवं चेद्गुरुम्(:) ॥
लोहं चेद्गुरवे समर्पयतु तद्विद्राव्य यत्नाथ वा
छित्वा नालमिदं विशोध्य सुशुभं तत्कौतुकं कल्पयेत् ॥ इति ।

* * * *

सेयं कृतिस्तन्त्ररहस्यदृग्(ष्टा) रक्ष्या मुहुर्मुखमुरुत्पानात्(?) ।
आचार्यवर्यैरिय . . . . . रेज्यास्मदनुष्ठितास्तु (?) ॥ इति ॥

* * * *

अथातस्सम्प्रवक्ष्यामि यथावदनुपूर्वशः ।
यथा प्रासादालङ्कारः प्रस्त रोत्तरमध्यतः ॥

* * * *

कटकभूषणमित्येवं तत्सूत्रज्ञैस्तदुच्यते ।

End:

शिखरे गलकपोतादौ नानारूपविचित्रितम् ।
चित्रपञ्जरमित्याहुरेवं नामानि सर्वतः ॥

* * * *

पूर्वोक्तत्रिचतुर्भूमिपञ्जरं हर्म्यगोपुरे ।
महाप्रासादके वा स्यादल्पे द्वितलपञ्जरम् ॥
एवमाचार्यवर्येण प्रोक्तं पञ्जरलक्षणम् ।

* * * *

Colophon:

इति विश्वकर्मकृतौ कटकभूषणविशेषनामयुक्त पञ्जरालङ्कारोध्यायः ॥
कटकभूषणं समाप्तम् ॥

R. No. 3847.

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Kiḻakēdil Nārāyaṇa-Eḻuttacchan, Kanniyanpuram, Ottapalam, Malabar district.

Foll. 35b—36b are left blank.

अमरकोशव्याख्यानम्—अमरकोशोद्घाटनम्.

AMARAKŌŚAVYĀKHYĀNAM: AMARAKŌŚŌDGHĀṬANAM.

A commentary on Nāmaliṅgānuśāsana, which work has been described under No. 1620 of the D.C.S. MSS., Vol. III: by Kṣīrasvāmin. The commentary is called Amarakōśōdghāṭana.

Contains the third Kāṇḍa complete with the text.

Beginning:

विशेष्यनिघ्नैस्सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसङ्ग्रहैर्वर्णो(र्गै)स्सामान्ये वर्ण(र्ग)संश्रयाः ॥

विशेष्यनिघ्नैर्विशेषणविशेष्यादिभिर्हेतृभिर्भूतैर्ये पञ्च वर्गास्ते काण्डद्वयोक्तः साधारण्यात्सामान्यकाण्डेऽस्मिंस्तृतीयेऽवान्तरवर्गात्संश्रयति । यथा—नानार्थैकान्तादिवर्गो अव्ययवर्गेऽनेकार्थैकार्थ(व)र्गौ ।

* * * *

समौ ग्रामेयकग्राम्यावच्छिन्नं तु बलाद्धृते ।
चोरिते मुषितं मुष्टं स्थपुटं तु नतोन्नतम् ॥
उत्पाटितोन्मूलितार्थमद्ध . . वहिते दृढम् (?) ।
आचिते निचितं पूर्णं पूरितं भरितं भृतम् ॥

* * * *

Colophon:

इति विशेष्यनिघ्नवर्गस्समाप्तः ॥

End:

त्रिकदण्डिका जालिका । तथा प्रमाणाद्या अजहल्लिङ्गवचनाः । वेदाः प्रमाणाः(णं) स्मृतयः प्रमाणं भूतमियं ब्राह्मणी विप्रा विशेषो भद्रम् ॥

Colophon:

भट्टक्षीरस्वाम्युत्प्रेक्षिते अमरकोशोद्घाटने सामान्यकाण्डस्तृतीयः ॥

इति विवृतवान् निबन्धान् भुक्त्वा(मुक्त्वा)न्यानमरकोशमतिगहनम् ।
भट्टक्षीरस्वामी सन्तु कृतार्था अतस्सन्तः ॥

R No. **3848.**

Paper. 10¾ × 9½ inches. Foll. 158. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kudala post, Ganjam district.

हरिहरचतुरङ्गम्.

HARIHARACATURAṄGAM.

Deals with the following subjects :—

१. गजलक्षणपरिच्छेदः.
२. रथलक्षणपरिच्छेदः.
३. अश्वलक्षणपरिच्छेदः.
४. पत्तिलक्षणपरिच्छेदः.
५. धनुर्विद्यापरिच्छेदः.
६. नीतिपरिच्छेदः.
७. युद्धपरिच्छेदः.
८. क्रीडापरिच्छेदः.

By Gōdāvaramiśra, minister and court-poet of king Pratāparudradēvagajapati.

Complete.

Beginning :

प्रत्यूहप्रतिनागेन्द्रवारणं वारणाननम् ।
वन्दे चन्दनसिन्दूरबिन्दुभिश्चित्रिताननम् ॥

वन्दे हरिहरौ वीरौ चतुरङ्गबलान्वितौ ।
बाणासुरपुरे पूर्वं युध्यमानौ रणप्रियौ ॥

श्रीदुर्गाचरणाम्भोजद्वन्द्वचन्दनबिन्दुना ।
कृतिर्गोदावरेणेयं तत्प्रसादाद्विरच्यते ॥

धीरगोदावरस्येदं(यं) कृतिरास्तां मुदे सताम् ।

* * * *

चतुर्विधा गजा यत्र जायन्ते वनभूमिषु ।
तत्कथ्यतेऽधुना सम्यक् कुलमेषां च कथ्यते ॥

प्राज्ये वने ये जायन्ते ते गजा भद्रजातयः ।
ऐरावतकुलोत्पन्नास्ते भवन्त्युत्तमा गजाः ॥

* * * *

Colophon:

इति श्रीमन्महाराजाधिराजगजपतिप्रतापरुद्रदेवस्वहस्तधारितकनककेसरिचतुष्टयावेष्टितशातकुम्भमयकुम्भसम्भृतमेघाडम्बराभिधानसितातपत्रशोभमानकविपुङ्गवपण्डितराजगुरुवाजपेययाजिमन्त्रिवरगोदावरमिश्रविरचिते हरिहरचतुरङ्गे प्रथमो गजपरिच्छेदः ॥

End:

क्रीडाया यदि विच्छेदो भवेन्मध्ये तदा पुनः ।
हतयोद्वृपदेनैव गणादानं द्वयोर्भवेत् ॥
अद्यैत(व)दाने प्राप्ते तु गृह्णीयाद्विजया पराक् ।
हतानामहतानां च पदसङ्ख्याकृतं पणम् ॥
यत्प्रसादादिमं चक्रे धीरगोदावरः कृतिम् ।
श्रीदुर्गाचरणाम्भोजे तस्मिन्नेतां समर्पये ॥

Colophon:

इति श्रीमन्महाराजाधिराजगजपतिप्रतापरुद्रदेवस्वहस्तधारितकनककेसरी-(रि)चतुष्टयावेष्टितशातकुम्भ(मयकुम्भ)सम्भृतमेघाडम्बराभिधानसितातपत्रशोभमानकविपुङ्गवपण्डितराजगुरुवाजपेययाजिमन्त्रिवरगोदावरमिश्रविरचिते हरिहरचतुरङ्गे अष्टमः क्रीडापरिच्छेदः ॥

समाप्तोऽयं ग्रन्थः ॥

R. No. 3849.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 416. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Śrīmān Bhagavanmahāpātro, Nārāyaṇapurasaśānam, Dharakota post, Ganjam district.

Bound in two volumes.

Foll. 411*a*—415*b* give the contents of this work. Foll. 1, 2, 410*b* and 416 are left blank.

रसकल्पद्रुमः.

RASAKALPADRUMAḤ.

A treatise describing the nine Rasas : by Jagannāthamiśra, son of Dīkṣitānandamiśra.

Deals with the following subjects (Pallavas) :—

I.

साधारणशाखादलम्.

१. विभावनिरूपणम्.
२. अनुभाववर्णनम्.
३. सञ्चारिवर्णनम्.
४. साच्विकवर्णनम्.
५. रसस्वरूपवर्णनम्.

II.

शृङ्गाररसशाखादलम्.

१. विभावः.
२. अनुभावः.
३. व्यभिचारिभावः.
४. साच्विकभावः.
५. शृङ्गाररसस्वरूपवर्णनम्.

III.

हास्यरसशाखादलम्.

IV.

करुणरसशाखादलम्.

V.

रौद्ररसशाखादलम्.

VI.

वीररसशाखादलम्.

VII.

भयानकरसशाखादलम्.

VIII.

बीभत्सरसशाखादलम्.

IX.

अद्भुतरसशाखादलम्.

X.

शान्तिरसशाखादलम्.

Complete.

Beginning :

वामे कोदण्डदण्डं भुजगसमभुजे दक्षिणे चण्डकाण्डं
स्कन्धे तूणीरबन्धं सुपटकटितटे स्वर्णमुष्ट्यासियष्टिम् ।
मौलौ कोटीररत्नं खचितमणिगणं नूत्नरत्नं दधानं
युद्धे बद्धावधानं रघुकुलतिलकं नौम्यहं प्रत्यहं तम् ॥
गुरूपदेशाद्विज्ञातं श्रुतं यत्किञ्चिदेव च ।
सम्प्रदायमुखेनेदं सुखेन प्रोच्यते मया ॥

* * * *

मुनिं प्रणम्य भरतं जगन्नाथेन धीमता ।
क्रियते रसिकप्रीत्यै रसकल्पद्रुमोऽधुना ॥

कल्पद्रुमत्वकल्पनं यथा—

विभावाद्यैर्दलैरेभिः पञ्चभिः पल्लवः स्मृतः ।
सर्वेष्वपि रसेष्वेवं कल्पद्रुत्वं प्रकल्पते ॥

* * * *

Colophon :

इति रसकल्पद्रुमे साधारणरसशाखायां विभावनिरूपणं नाम प्रथमदलम् ॥

* * * *

एवमपरे यथासम्भवमूहनीयाः ॥

Colophon :

इति रसकल्पद्रुमे साधारणरसशाखायां रसस्वरूपनिरूपणं नाम पञ्चम-दलम् ॥

इति प्रथमः पल्लवस्समाप्तः ॥

* * * *

Colophon :

इति श्रीजगन्नाथमिश्रविरचिते रसकल्पद्रुमे शृङ्गाररसशाखायां शृङ्गार-रसस्वरूपनिरूपणं नाम पञ्चमदलमिति द्वितीयः पल्लवस्समाप्तः ॥

End :

मातर्मेदिनि तात मारुत सखे तेजः स्वबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गसुखोपजातसुकृतस्फारस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥
दीक्षितानन्दमिश्राणां सूनुना कल्पितो रसात् ।
कल्पद्रुमोऽयं फलतात्कवीनामभिवाञ्छितम् ॥

Colophon :

इति श्रीजगन्नाथमिश्रविरचिते रसकल्पद्रुमे शान्तिरसशाखायां शान्ति-रसस्वरूपनिरूपणं नाम पञ्चमदलमिति दशमः पल्लवः ॥

R. No. 3850.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 194. Lines, 20 in a page. Grantha. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vānamāmalai Ramanuja-Ayyangar, Vānamāmalai-Mutt, Nanguneri, Tinnevelly district.

Fol. 194*b* is left blank.

श्रीभाष्यप्रकाशिका.
ŚRĪBHĀṢYAPRAKĀŚIKĀ.

A clear and short exposition of what is contained in the Śrībhāṣya of Rāmānuja: by Tirumalisi Śrīnivāsācārya alias Vēṅkaṭācārya, son of Nṛsimhācārya and pupil of Lakṣmaṇācārya of Vādhūlagōtra.

Complete.

Beginning:

श्रीनृसिंहं प्रणम्य श्रीलक्ष्मणार्यं च देशिकम् ।
श्रीभाष्यसङ्ग्रहं कुर्वे श्रीनिवासस्सतां मुदे ॥

परमकारुणिको भगवान् रामानुजाचार्यः शारीरकं शास्त्रं शङ्करादिकुदृष्टिभिरतिदूषितं श्रीमद्यामुनाचार्यदिव्याज्ञया सम्यग्व्याचिकीर्षुश्चिकीर्षितस्य प्रबन्धस्याविघ्नपरिसमाप्तिसिद्धये विशिष्टशिष्टाचारपरिप्राप्तमिष्टदेवताभिष्टुत्यादिरूपं मङ्गलं शिष्यानुजिघृक्षया प्रबन्धयन् व्याससमासरसिकमहर्षिमर्यादया श्रोतृबुद्धिसौकर्यसमाधित्सया च शास्त्रार्थमपि सङ्गृह्णन् इष्टदेवतां त्रिशिनष्टि —अखिलेत्यादिना प्रथमपद्येन । तत्र प्रथमचरणेन पूर्वद्विकार्थस्सङ्गृहीतः ।

* * * *

Colophon

इति श्रीलक्ष्मणार्यकटाक्षलब्धतत्त्वयाथात्म्येन श्रीनिवासदासेन विरचितायां भाष्यप्रकाशिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

End:

शब्दादत्यर्थप्रियं ज्ञानिनं लब्ध्वा परमकारुणिको भगवान् परमपुरुषोऽपि तं नावर्तयिष्यतीत्यवगम्यते । अतः स्वेन वा परेण वा न पुनरावृत्तिशङ्का ॥

सूत्रावृत्तिश्शास्त्रपरिसमाप्तिं द्योतयति ॥

Colophon:

इति श्रीवाधूलकुलतिलकश्रीलक्ष्मणार्यकरुणाकटाक्षलब्धतत्त्वयाथात्म्येन तदनन्यदैवतेन श्रीमन्नृसिंहार्यतनूजेन श्रीमहीसारपुरवास्तव्येन श्रीवेङ्कटाचार्या-

परनाम्ना श्रीनिवासदासेन विरचितायां श्रीभाष्यप्रकाशिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

R. No. **3851.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Nārāyana-Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

Fol. 58 is left balnk.

पदमञ्जरीव्याख्यानम्.

PADAMAÑJARĪVYĀKHYĀNAM.

A commentary on Haradatta's Padamañjarī which itself is a commentary on the Kāśikāvṛtti of Jayāditya and Vāmana: by Raṅganāthayajvan, son of Nārāyaṇadīkṣita, grandson of Nalladīkṣita who was the brother of Caturvēdidīkṣita and great grandson of Nārāyaṇadīkṣita of the Cōla country.

Contains the Sūtras one to seven in the first Pāda of the first Adhyāya.

Beginning:

श्रीरामचन्द्रं जनकात्मजापतिं सलक्ष्मणं राक्षसमोक्षकारणम् ।
नमामि वाचा मनसा च मूर्ध्ना निर्विघ्नसिद्ध्यै कुलदैवतं नः ॥

यो नारायणदीक्षितस्य नप्ता नल्लादीक्षितसूरिणस्तु पौत्रः ।
श्रीनारायणदीक्षितेन्द्रपुत्रः व्याख्याम्येष हि रङ्गनाथयज्वा ॥

मातामहो यस्य च शब्दपारगो भाष्यार्थवेत्ता खलु यस्य मातुलः ।
असूतलज्जेन हि तेन केनचित्प्रकाश्यते सा पदमञ्जरी खरा ॥

श्रीचोलदेशे सुधियो बृहस्पतेस्तुल्यास्त्रयः पञ्च गृहे गृहे बुधाः ।
वसन्ति तेषां धुरि मत्कृतिस्तथा विभाति कीटो रविसन्निधौ यथा ॥

पाठने किल न कश्चन भारः स्पर्धिचित्तहरणश्च विनोदः ।
लेखनं भवति साहसमेतदस्म्यहं भुवि विनिर्जितलज्जः ॥

जगन्मण्डलविख्यातो यश्चतुर्वेददीक्षितः ।
अस्मत्पितृपितृव्यश्च वन्दे तच्चरणाम्बुजम् ॥

अन्यथोक्तमपि स्याच्चेद्बुद्धिव्यामोहतः क्वचित् ।
क्षन्तव्यं पण्डितैस्तद्धि कस्य नास्ति मतिभ्रमः ॥

चिकीर्षितग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं शिष्टाचारपरिप्राप्तमिष्टदेवता-नमस्काररूपं मङ्गलमादौ निबध्नाति—व्यक्तप्रधानपुरुषात्मकमिति । व्यक्तं परिदृश्यमानं कार्यं, प्रधानं प्रकृतिः व्यक्तोपादानकारणमतीन्द्रियः पदार्थः, पुरुषो जीवः ।

* * * *

निजे ग्रन्थे इत्यन्तेन श्लोकार्धेन परिहरति—वृत्त्यन्तरेष्वसन्तमिति । निजे ग्रन्थे वृत्त्यन्तरेष्वसतो गुणस्याभिधाने नास्ति पुनरुक्तादोषः ।

* * * *

वृद्धिरादैच् । सूत्रत्रयस्य द्विपदत्वे आदैजिति समाहारद्वन्द्वाश्रयणे द्वन्द्वाच्चुदषहान्तात्समाहार इति टच् समासान्तः प्राप्नोति । इतरेतर(योगे)त्वादैचां बहुत्वात् बहुवचनं प्राप्नोतीति द्विपदपक्षे दोषदर्शनादाह—त्रिपदामिति । ऐजिति पदच्छेदे तपरकरणमैजर्थमित्युक्तम् । तकारस्यापदान्तत्वेन जश्त्वस्याप्रसङ्गादतस्त्रीणि पदानि दर्शयति ।

End:

मुखनासिकावचनोऽनुनासिकः । एकवद्भावः स्यादिति । सर्वो द्वन्द्वो विभाषैकवद्भवति ।

R. No. **3852.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 16. Lines, 20 in a page. Grantha and Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Ayanārtirumāḷigai, Srirarangam.

(*a*) ज्ञानार्णवः.

JÑĀNĀRṆAVAḤ.

Foll. 1*a*—3*b*.

Same work as that described under R. No. 1278 ante. By Sriraṅgarājayajvan, son of Abhayaprada.

Wants the beginning and the end in the first Paricchēda.

Transcribed in 1921–22 from a MS. of M.R.Ry. Vidvān Vānamāmalai-Ayyangar, Nanguneri, Tinnevelly district.

(*b*) न्यायरत्नावलिः.

NYĀYARATNĀVALIḤ.

Foll. 4*a*—7*a*. Fol. 7*b* is left blank.

Same work as that described under No. 4916 of the D.C.S. MSS., Vol. X, wherein see for the beginning. By Vēdāntācārya, son of Ādivarāhācārya and Kōṇaṭyambā.

Complete in two Paricchēdas.

End:

श्रूयते हि परं साम्यं मुक्तानां ब्रह्मणामिति स्थितिः ।
सालोक्यादिपरा यद्वा तारतम्यपरा स्मृतिः .
तत्सर्वथापि मुक्तानां भोगसाम्यं व्यवस्थितम् ॥

Colophon:

इति श्रीमत्कु(द्वत्सकु)लजलधिकौस्तुभवैदिकचरणारविन्दचञ्चरीकस्य कोनेत्र(नट्य)म्बागर्भसंभवस्य वेदान्ताचार्यस्य कृतिषु न्यायरत्नावल्यां द्वितीयः परिच्छेदः ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Sūryanārāyaṇa-Śāstrigāru, Repalli, Guntur district.

(*c*) संस्कारनिर्णयः.

SAMSKĀRANIRṆAYAḤ.

Foll. 8*a*—11*a*. Fol. 11*b* is left blank.

Same work as that described under No. 3838 of the D.C.S. MSS., Vol. VII, wherein see for the beginning. By Candracūḍabhaṭṭa, son of Ummaṇabhaṭṭa and grandson of Dharmabhaṭṭa, who was the author of Pākayajñapaddhati described under R. No. 3823.

Complete.

End:

मृत्योरन्तर्धानभूतं दक्षिणतोऽश्मानं निदधाति । तस्य शुभमिच्छन् चालनं न कुर्यात्—अत्यलमतिविस्तरेण ॥

आपस्तम्बीयसूत्रं बुधनरसुलभं हारदर्भ(त्तं)च भाष्यं
दृष्ट्वा सौदर्शनं (सद्)विविधकृतमहापद्धतीस्तान्निबन्धान् ।
बद्धो यश्चन्द्रचूडाभिधबुधनिचयास्तन्नमानेन रम्यः
संस्काराणां द्विजज्ञप्रमुदितहृदयो निर्णयोऽयं समाप्तः ॥

Colophon :

इति श्रीमत्पौराणिकधर्मभट्टसूनुश्रीमद्विद्वन्मकुटमाणिक्यउम्मणभट्टसूनुचन्द्रचूडभट्टविरचितः संस्कारनिर्णयः समाप्तः ॥

Transcribed in 1921–22 from a MS. of M.R.Ry. Tampu Śaṭhakōpa-Ayyangar, Vaḍakkatteru, Alvartirunagari, Tinnevelly district.

(*d*) वानाद्रियोगिप्रपत्तिः.

VĀNĀDRIYŌGIPRAPATTIḤ.

Foll. 12*a*—14*b*. Foll. 15 and 16 are left blank.

Stanzas expressing the supplicant's self-surrender to sage Vānamāmalaisvāmigal.

Complete.

Beginning :

रम्योपयन्तृमुनिवर्यदयानिवासं रामानुजं यतिपतिं करुणामृताब्धिम् ।
वन्दे मनोज्ञवरदाह्वयमात्मवन्तमाजन्मसिद्धपरिपूतचरित्रबोधम् ॥

* * * *

सद्यः प्रबुद्धसरसीरुहतुल्यशोभौ संपश्यतां नयनयोर्मुदमादधानौ ।
संसारसागरसमुद्धरणप्रवीणौ वानाद्रियोगिचरणौ शरणं प्रपद्ये ॥

End :

वाधूलवंशतिलको वरदार्थवर्यो वात्सल्यसिन्धुरखिलात्मगुणोपपन्नः ।
निक्षिप्तवान् निजभरं सकलं ययोस्तद्वानाद्रियोगिचरणौ शरणं प्रपद्ये ॥

* * * *

शिष्याचार्यतनुद्वयीं निरभजत्प्रायेण लक्ष्मीपतिः
ये(ए)कोऽभून्नरसंज्ञकस्तदपरो नारायणाख्यः पुरा ।
अद्यत्वे कतर कृपामृतनिधिस्सौम्योपयन्ता मुनि-
स्तच्छिष्याग्रसरोऽपरो विजयते रामानुजाख्यो मुनिः ॥

Colophon :

इति वानाद्रिमठ(योगि)प्रपत्तिस्सम्पूर्णा ॥

R. No. 3853.

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 108. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of the Naḍvil-Maṭham, Trichur, Cochin State.

Fol. 108*b* is left blank.

ब्रह्मसिद्धिटीका—अभिप्रायप्रकाशिका.

BRAHMASIDDHIṬĪKĀ: ABHIPRĀYAPRAKĀŚIKĀ.

A commentary on Maṇḍana's Brahmasiddhi, which work has been described under R. No. 3250 ante: by Citsukha, disciple of Jñānōttamapūjyapāda.

Complete in four Kāṇḍas and wants the beginning.

Beginning:

विद्रूपता च फलव्यवस्थापनीयत्वादित्याहुः । योगाचारास्तु विज्ञानमसत्याकारोपेतप्रमेयप्रकाशनाकारेण प्रमाणफलम् । तस्यैव प्रकाशनशक्तिप्रमाणमित्याचक्षते । अतः स्वरूपविशेषे विप्रतिपत्तावपि न स्वरूपमात्रे विप्रतिपत्तिरिति भावः । लौकिकानामपि फलं सम्प्रतिपन्नमित्याह—प्रज्ञायते चेति । तथापि कथं स्वप्रकाशतेति तत्राह—न चेति ।

* * * *

Colophon:

इति परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यचित्सुखमुनिविरचितायां ब्रह्मसिद्ध्यभिप्रायप्रकाशिकायां ब्रह्मकाण्डं समाप्तम्

End:

परप्रवृत्तेरिति । कथं ज्ञानस्य शोकादिनिवृत्तिः फलं विदुषोऽपि शोकादिदर्शनादित्यत आह—यद्यपि चेति । इतश्चाभेदेनैव तदुपदिश्यत इत्याह—भेदेन चेति । तथाभावादिति । श्रोतुरपि ब्रह्मभावादित्यर्थः । इदानीं ब्रह्मसिद्धिश्लोकव्याख्यानमुपसंहरति—एषेति ।

व्याख्यानेऽस्मिन् स्वस्तदुस्तार[1]वाक्याशङ्काव्याजव्यञ्जिताशेषपक्षा ।
एषादोषा भाषिता ब्रह्मसिद्धेः साध्वी टीका योगिना चित्सुखेन ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां ब्रह्मसिद्धिटीकायामभिप्रायप्रकाशिकायां चतुर्थकाण्डः समाप्तः ॥

---

[1] स्वस्तदुस्तर्कवाक्या—इति पाठान्तरम.

R. No. **3854.**

Palm-leaf. 13 × $1\frac{1}{8}$ inches. Foll. 29. Lines, 9 in a page. Grantha. Injured.

Purchased in 1921-22 from M.R.Ry. Aṇṇāsāmi-Śāstrigal, Bhavani, Coimbatore district.

(*a*) देवीमानसिकस्तोत्रम्.

DĒVĪMĀNASIKASTŌTRAM.

Foll. 1*a*—2*b*.

Same work as that described under No. 10769 of the D.C.S. MSS., Vol. XIX, with different colophon as given below :—

Complete.

Colophon :

श्रीदेवीमानसिकं सम्पूर्णम्.

(*b*) भवानीमानसस्तोत्रम्.

BHAVĀNĪMĀNASASTOTRAM.

Foll. 3*a*—7*b*. Foll. 8 and 9*b* are left blank. Fol. 9*a* contains the title of the work Matatritayasarvasva.

Same work as that described under No. 9613 of the D.C.S. MSS., Vol. XVIII. By Śaṅkarācārya.

Almost complete.

(*c*) मतत्रितयसर्वस्वम्.

MATATRITAYASARVASVAM.

Foll. 10*a*—16*b*.

A small treatise explaining the principles of the Advaita, Viśiṣṭādvaita, and Dvaita views of the Vedānta : by Vēṅkaṭēsa-Śāstrin.

Complete.

Beginning :

यः स्वयं स्वमहिम्निस्थस्सर्वाकारश्च लीलया ।
रमतेऽन्यांश्च रमयत्यहं रामं तमाश्रये ॥
यद्यन्मतिर्वितनुते तत्तन्मतमितीरितम् ।
मत्यतीतानुभूतिः स्यादमतित्वेन निश्चिता ॥
अमतं ज्ञातुमिच्छूनां सतामनुजिघृक्षया ।
सर्वश्रुतिशिरोरत्नमद्वैतमतमागतम् ॥

अमतं निन्दितुं मोहादद्वैतप्रतियोगिनाम् ।
उपागम्यागतं द्वैतं विशिष्टाद्वैतमेव च ॥
तत्तन्मतप्रयोक्तॄणां तत्तन्नामाङ्कितान्यहम् ।
तानि क्रमेण वक्ष्यामि यथाबुद्धिबलोदयम् ॥
रामदूतमतं राममतं रामानुजं मतम् ।
द्वैतमद्वैतमित्युक्तं विशिष्टाद्वैतमित्यपि ॥
स्वेतरद्वैतविज्ञानशाखाग्रादनशालिनः ।
रामदूतस्य तु मतं द्वैतं भजनकारिणः ॥
प्रस्फुरद्ध्वान्तपटलीविध्वंसनविवर्जितः(म्) ।
रामस्य मतमद्वैतं सीता ज्योत्स्ना कलानिधेः ॥
रामांशप्रभवस्यापि रामदास्यं वितन्वत' ।
रामानुजस्य तु मतं विशिष्टाद्वैतमेव हि ॥

End :

ग्राह्यं तच्चापि युगलमद्वैतस्योपयोगि चेत् ।
नो चेत्त्याज्यं गुलापूपं यथा गरलरूषितम् ॥
मतत्रितयसर्वस्वमिदं येषां हृदि स्थितम् ।
तेषां रतिः कुतो राममतादन्यत्र सम्भवेत् ॥
रामप्रसादेन मया वेङ्कटेशाख्यशास्त्रिणा ।
मतत्रितयसर्वस्वमिदमुक्तमशेषतः ॥

Colophon :

इति मतत्रितयसर्वस्वप्रकरणं परिसमाप्तम् ॥

(*d*) घृतशौचप्रदीपिका.

GHṚTAŚAUCAPRADĪPIKĀ.

Foll. 18*a*—22*a*. Fol. 17*a* gives the title page of this work. Foll 17*b* and 22*b* are left blank.

A treatise on the performance of expiatory ceremonies: by Sthāṇu-Śāstrin, pupil of Tryaṁbaka-Śāstrin.

Complete.

Beginning :

ध्वान्तस्वाम्यग्रहारोऽभूदुत्तरस्यां पुरा दिशि ।
प्रथिता यस्य रजतपुरमित्यभिधा भुवि ॥

End :

इदं श्रीफलिनीदण्डायुधपाण्यष्टकस्तवम् ।
पठतामाशु सिध्यन्ति निखिलाश्च मनोरथाः ॥

अत्रत्यफलिनीशब्दस्य द्रामिडभाषया பழனி (Palani) इत्यर्थोऽवगन्तव्यः । अत्र दण्डायुधपाण्यधिष्ठितस्य गिरेः शिवगिरिनामव्यवहारप्रसिद्धिः, तत्प्राचीदिग्भागस्थस्य तु शक्तिगिरिरिति नामव्यवहारप्रसिद्धिश्च सत्पुरुषसाङ्केतिकवचनैरवगम्यते । स्पष्टमन्यत्सर्वमपि ॥

Fol. 25 a gives the Kāvaḍīśabdanirvacana. Fol. 25 contains the Dvijalakṣaṇa.

(*f*) शिवस्तोत्रम्.
ŚIVASTŌTRAM.

Foll. 26*a*—29*a*. Fol. 29*b* is left blank.
A eulogy addressed to God Śiva.
Wants the beginning and the end.

Beginning :

ध्रुवं कंचिद् ब्रूते सकलमपरस्त्वध्रुवमिदं
परे ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्ते वक्तव्यस्तदुभयमपीत्थंकृतभय-
मनिष्टा यैषा ते भव भुवनशिल्पे कुशलता ॥

End :

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न क्वापि क्ष (णमपि) भवन्तं प्रणतवान् ।
नमन्मुक्तस्सम्प्रत्यहमतनुरग्रेऽप्यनिति मा-
नितीश क्षन्तव्यं तदिदमपराधद्वयमपि ॥

R. No. 3855.

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 113. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Aṇṇāsāmi-Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) वादावलिः.

VĀDĀVALIḤ.

Foll. 4*a*—77*a*. Foll. 67*a* and 77*b* are left blank. Fol. 1*a* gives the titles of the works contained in this MS. Foll. 1*b*—2*b* are left blank. Fol. 3*a* contains a small portion of the Vādāvali. Fol. 3*b* gives the contents of this work.

A polemical treatise supporting the conclusions of the Advaita-Vēdānta and refuting the views of Viśiṣṭādvaita and Dvaita schools of philosophy, by Śrīnivāsayajvan.

Deals with the following topics:—

१. अभिन्ननिमित्तोपादानत्ववादः
२. प्रपञ्चमिथ्यात्ववादः.
३. भावरूपाज्ञानवादः.
४. मनसो मध्यमपरिमाणत्वसमर्थनम्
५. अनिर्वचनीयख्यातिवादः.
६. एकजीववादः.
७. विश्वाद्वैतसमर्थनम्.
८. ब्रह्मणो निर्गुणत्वसमर्थनम्.
९. वृत्तिज्ञानस्य स्वविषयत्वभङ्गः.
१०. चितस्स्वविषयत्वभङ्गः.
११. जीवब्रह्मणोरभेदसमर्थनम्
१२. वृत्तिनिर्गमनसमर्थनम्.
१३. स्फुरणस्य नित्यसाक्षित्वसमर्थनम्
१४. अनुभूतेः स्वप्रकाशत्वसमर्थनम्
१५. वृत्तिसमर्थनम्.
१६. सत्यादिपदानां पर्यायत्वसमर्थनम्.
१७. अन्धकारस्य भावत्वसमर्थनम्.
१८. सुवर्णस्य केवलतैजसत्वसमर्थनम्.
१९. स्वमते निर्विकल्पत्वसमर्थनम्.
२०. परमते निर्विकल्पत्वभङ्गः.
२१. मानसानुव्यवसायनिरासः.
२२. अखण्डार्थवादः.
२३. दृष्टिसृष्टिवादः.
२४. शब्दापरोक्षवादः.
२५. जन्यज्ञानानां सैद्धान्तिकस्वप्रकाशत्वनिरासः.
२६. विचारसार्थक्यवादः.

Incomplete.

Beginning:

यस्मिन्मायाविलासेन विचित्रा विश्वसृष्टयः ।
सत्यं ज्ञानमनन्तं यत्तद् ब्रह्म सुखमस्म्यहम् ॥
अभीष्टदेवता सेयमस्माकं गुरुरेव सः ।
इत्यादिकल्पनाधाम्ने भूम्ने मह्यं नमो नमः ॥
वेदान्तैकविचारणीयमहिमन्यद्वैततन्त्राध्वनि
प्रायः स्वानुभवैकसिद्धवपुषि स्फूर्जेत् कथं वानुमा ।

ये तर्काः कथिताः परं गुरुजनैस्सम्भावनाहेतवः
तैरेवात्र कथं कचाकचिविधा कल्लोलिता कथ्यते ॥
अद्वैतिनां हेतुकखण्डनाय कथासु कौतूहलिता यदि स्यात् ।
कक्ष्याक्रमद्योतिकयानयामी विवादवीरा विहरन्तु गोष्ठ्याम् ॥
कार्यः कथायास्समयस्य बन्धो यथाव्यवस्थात्र तथा प्रयोगः ।
तथा जयश्चात्र पराजयश्च ज्ञातं तदित्थं कथकाभियुक्त्या ॥
माद्यदद्वैतिमहाटोपविपाटनपटीयसोः ।
वक्ष्ये कक्ष्यानुकक्ष्याणां प्रयोगपरिपाटिकाः ॥
यद्येका खण्डिता युक्तिर्वादिना वा परेण वा ।
युक्त्यान्ययापि तत्साध्यमित्यत्र समयस्थितिः ॥
षड्भाषासार्वभौमस्य श्रीनिवासस्य यज्वनः ।
वादावलिरियं विद्वत्कर्णभूषायतां चिरम् ॥

जन्माद्यस्य यत इति सूत्रसूचितन्यायानुगृहीता हि यतो वा इमानि भूतानि जायन्ते, यस्सर्वज्ञस्सर्वविदित्यादिभिश्श्रुतिभिरुपलब्धस्वरूपलक्षणद्वयलक्षितस्य प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्रसूचितन्यायानुगृहीता हि

* * * *

ब्रह्मैवोपादानकारणं माया तु शक्तितया वह्न्यादिनिष्ठशक्तिवत् केवलं कारणतावच्छेदिकेत्यस्मद्गुरुचरणश्रीकेशवपुरेचरणादयः । तत्र निरीश्वरमीमांसकानां माया केवलं कारणतावच्छेदिकेति वदतां मायाविनां चैवं कथाक्रमः ।

End:

महावाक्यार्थो निश्चेतुं न शक्यत इति सकलानुभवसाक्षिकमेव । तस्मादत्रैतादृशविरोधप्रतिभासनिराकरणाय भवितव्यमेव विचारेणेति न मद्धेतुरप्रयोजकः । भवद्धेतुश्चासिद्ध इति । इत्थमुपर्युपरि कक्ष्याक्रम ऊहनीयः ॥

Colophon:

इति विचारसार्थक्यवादः ॥
प्रायः पल्लवितार्थाय पञ्चेषुब्रह्मविद्यया ।
प्राणच्चरणभूषाय परस्मै ब्रह्मणे नमः ॥

Fol. 78 gives a portion of the Vicārasārthakyavāda.

Date of transcription—the 7th day of the solar month Āvaṇi in the year Plava. Name of the scribe—Āndhra Vēṅkaṭēśvara.

(*b*) तत्त्वचिन्तामणिसारः.

TATTVACINTĀMAṆISĀRAḤ.

Foll. 78*b*—89*a*. Foll. 89*b*—100*b* are left blank.

Same work as that described under No. 4030 of the D.C.S. MSS., Vol. VIII. By Gōpīnātha.

Contains from the last portion of the Anumānakhaṇḍa to the end of the Upamānakhaṇḍa.

(*c*) पदार्थमाला.

PADĀRTHAMĀLĀ.

Foll. 101*a*—113*a*. Fol. 113*b* is left blank.

Same work as that described under No. 4267 of the D.C.S. MSS., Vol. VII. By Jayarāma.

Contains the Dravyanirūpaṇa incomplete.

R. No. **3856.**

Palm leaf. 18×1¼ inches. Foll. 210. Lines, 7 in a page. Grantha and Nandināgarī. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Annāsāmi-Śāstrigal, Bhavani, Coimbatore district.

(*a*) न्यायरत्नमालाव्याख्यानम्—नायकरत्नम्.

NYĀYARATNAMĀLĀVYĀKHYĀNAM: NĀYAKARATNAM.

Foll. 2*a*—155*a*. Foll. 1 and 155*b* are left blank.

Same work as that described under R. No. 3845 ante. By Rāmānujācārya.

Breaks off in the third Paricchēda (ending with the words सौत्रामण्यादीनां च पृथक्फलार्थतया नान्योन्याङ्गाङ्गिभावस्संभवतीति) ।

(*b*) न्यायरत्नमाला.

NYĀYARATNAMĀLA.

Foll. 156*a*—166*a*.

Same work as that described under No. 4421 of the D.C.S. MSS., Vol. IX, wherein see for the end. By Pārthasārathimiśra, son of Yajñātman.

Contains the Prayuktitilaka only.

Beginning :

आनन्दममृतं ज्ञानमजं साक्षिणमक्षरम् ।
ब्रह्म सर्वमसर्वं सदसद्वन्दे विभुं हरिम् ॥
मीमांसार्णवसम्भूतैः कुमारस्वामिनाहृतैः ।
न्यायरत्नैरहं मालां संश्रया(ग्रथ्ना)मि मनोरमाम् ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते ।
आचार्यपक्षमाश्रित्य प्रतिपक्षनिरासतः ॥
तत्र तावदिमं केचित्पूर्वपक्षं प्रचक्षते ।
आचार्यकनियोगार्थस्स्वाध्यायस्तत्प्रयुक्तितः ॥
प्रथमावगतत्वेन तद्धि युक्तं प्रयोजनम् ।
न तु वाक्यार्थविज्ञानं तद्धि पश्चात्प्रतीयते ॥
ततो विवक्षितार्थत्वाद्वेदस्यार्थविचारणम् ।
न कर्तव्यमतः शास्त्रं मीमांसाख्यमनर्थकम् ॥

आचार्यकरणविधिप्रयुक्तस्य स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां पुरुषान्तरगामित्वेन बहिरङ्गमपि प्रथमावगतत्वेन तत्सिद्धिरेवास्य प्रयोजनं युक्तं नार्थज्ञानं तस्य पश्चाद्भावित्वात् ।

(*c*) विधितत्त्वनिश्चयः.
VIDHITATTVANIŚCAYAḤ.

Foll. 166*a*—171*b*.

Determines exactly what is meant by 'Vidhi' or a command according to Kumārilabhaṭṭa.

Incomplete.

Beginning :

विधितत्त्वे विमन्यन्ते बहुधा वादिनो यतः ।
अतो वार्त्तिककारीयैः क्रियते तत्र निश्चयः ॥

कः पुनरयं विधिः ? केचिदाहुः—प्रमाणान्तरागोचरो लिङादिमात्रावलम्बनः कार्यात्मा यागादिना (भा)वार्थगोचरः । स्वर्गकामादिकं च नियोज्यमात्मनि प्रेरयन्नियोगो विधिरिति । कथं पुनरेवंविधे विधौ लिङादीनां व्युत्पत्तिः ? तत्राहुः ।

* * * *

ततश्च शब्देनापि शक्यत एव फलकामस्य कार्यतया क्रिया प्रत्येतुमिति नापूर्वाभिधानसिद्धिः । यच्चान्यदत्र वक्तव्यं तत्सर्वमङ्गनिर्णय एव वक्ष्यामः । अन्यन्मतं समीहितसाधनत्वमेव भावना; या लिङादिभिरभिधीयते, तदवगतेरेव प्रवृत्तिकारणत्वेनात्मनि दृष्टत्वात् ।

* * * *

आचार्यस्य तु अभिधां भावनामाहुरन्यामेव लिङादय इति वदतोऽन्यादृशं विधितत्त्वमभिमतं लक्ष्यते । किं पुनस्तदुच्यते—इदं तावत्सिद्धं यथा समीहितसाधनत्वावगतिमन्तरेण चेतनस्य स्वतन्त्रा प्रवृत्तिर्न घटत इति ।

End:

प्रैषादिव्यपदेशभाक् सर्वानुगतं शब्दार्थ इति साम्प्रतम् । अल्पकार्यत्वाभ्युपगमेनैव याच्ञायां लिङ्प्रयोगादित्युक्त.

(*d*) मीमांसान्यायप्रकाश (आपदेवीयः).

MĪMĀṀSĀNYĀYAPRAKĀŚAḤ (ĀPADĒVĪYAḤ).

Foll. 172*a*—208*b*. Fol. 210*b* gives the title of Nāyakaratna. Foll. 209 and 210*a* are left blank.

Same work as that described under No. 4405 of the D.C.S. MSS., Vol. IX. By Āpadēva, son of Anantadēva.

Complete.

R. No. 3857.

Palm-leaf. $13\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 316. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Annāsāmi-Śāstrigal, Bhavani, Coimbatore district.

Foll. 1—3, 290*b*—316*b* are left blank.

चन्द्रिकाखण्डनम्.

CANDRIKĀKHAṆḌANAM.

Same work as that described under R. No. 9 ante. By Rāmānujadāsa alias Ramyajāmātṛmuni, disciple of Veṅkaṭācārya of Vādhūla gōtra. The work is also called Rāmānujasiddhāntavijaya.

Contains the first Pāda of the first Adhyāya.

R. No. **3858.**

Palm-leaf. 14 × 1¼ inches. Foll. 90. Lines, 8 in a page. Grantha Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsāmi-Śāstrigal, Bhavani, Coimbatore district.

(*a*) महावीरचरितम्.

MAHĀVĪRACARITAM.

Foll. 3*a*—30*b*. Foll. 1 and 2 are left blank.

Same work as that described under No. 12583 of the D.C.S. MSS., Vol. XXI. By Śrīkaṇṭha, known otherwise as Bhavabhūti, son of Jātūkarṇī.

Wants the beginning in the first Act and breaks off with the 46th stanza in the fifth Act.

Colophon :

महावीरचरितार्धं समाप्तम्.

Date of transcription—The 5th day of the bright fortnight of the lunar month Vaiśākha in the year Hēvilambin.

Name of the scribe—Śaṅkaran.

(*b*) कर्पूरमञ्जरी.

KARPŪRAMAÑJARĪ.

Foll. 31*a*—55*b*.

Same work as that described under R. No. 2090(*b*) ante. By Rājaśēkhara.

Complete.

Colophon :

समाप्तः कर्पूरमञ्जरीपरिणयप्रबन्धः ॥

The scribe adds—

रचिता कविना तेन नाटिका राजमौलिना ।
सट्टकाख्या विलिखिता शङ्करेण सदक्षरा ॥

Date of transcription—The 1st day of the bright fortnight in the lunar month Śrāvaṇa.

Name of the scribe—Śaṅkaran.

(c) अभिज्ञानशाकुन्तलटीका.
ABHIJÑĀNAŚAKUNTALAṬĪKĀ.

Foll. 56a—87b.
Similar to the commentary described under R. No. 2775(b) ante.
Complete.

Beginning :

प्रणम्य पार्वतीनाथं यथामतिबलं मया ।
शाकुन्तलस्य नाट्यस्य व्याख्या किल विधीयते ॥
स्वयमेव सुबोधार्थान् प्रदेशान् परिवर्धयन् ।
अबोधस्य प्रदेशस्य करोम्यर्थप्रकाशनम् ॥

नान्द्यन्ते सूत्रधारः । नान्दीलक्षणं द्विधा दृश्यते, रङ्गपूजा नान्दी च रङ्गपूजा । नान्द्याःस्वरूपमुक्तं भरते—

नन्दी वृषस्सोऽपि महेश्वरस्य रङ्गत्वमादौ किल खे जगाम ।
तद्रङ्गमुद्दिश्य कृतां तु पूजां नान्दीति तन्नाट्यविदो विदन्ति ॥

इह तु रङ्गपूजा नान्दी कृतेति द्रष्टव्यम् । तदन्ते सूत्रधारो नाट्ये विशारदो नटो रङ्गं प्रविश्याह—या सृष्टिरित्यादि । भगवतश्शम्भोरष्टमूर्तिस्वरूपनिर्देशेन प्रशंसति । स्त्रष्टुः ब्रह्मणः आद्या सृष्टिर्जलसृष्टिः । उक्तं च—"अप एव ससर्जादौ तासु वीर्यमपासृजत्" । इति ॥

End :

क्रतुरिति । राजा समवायस्सङ्गमः । तच्चिह्नं लताशकुन्तलाकुसुममङ्गुलीयकम् । न खल्वस्य विश्वासं संभावनीयं श्लाघ्यम् । एकान्तरमेकान्तमरीचिना परिगतशक्तिः स्वयम्भूः ।

Colophon :

इति शाकुन्तलव्याख्याने सप्तमोऽङ्कः ॥
शार्वरीशरद्भाद्रपदसितत्रयोदश्यां शाकुन्तलव्याख्या समाप्ता ॥

The scribe adds—

श्रीमच्छङ्करमूर्याख्यशिवस्य तनुजेन वै ।
शङ्करेणाशु लिखिता व्याख्या शाकुन्तलस्य सा ॥

Fol. 88 contains some Vēdāntaviṣaya. Fol. 89a gives the list of works in this MS. Foll. 89b and 90 are left blank.

R. No. 3859.

Palm-leaf. 15⅝ × 1⅝ inches. Foll. 201. Lines, 7 in a page. Grantha. Very much injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsāmi-Śāstrigal, Bhavani, Coimbatore district.

शास्त्रदीपिकाव्याख्यानम्—प्रभामण्डलम्.

ŚĀSTRADĪPIKĀVYĀKHYĀNAM: PRABHĀMAṆḌALAM.

Same work as that described under No. 4500 of the D.C.S. MSS., Vol. IX. By Yajñanārāyaṇadīkṣita, son of Koṇḍubhaṭṭōpādhyāya.

Contains the second Adhyāya complete and the first Pāda of the third Adhyāya incomplete.

Wants the beginning in the second Adhyāya.

R. No 3860.

Palm leaf. 12 × 1 inches. Foll. 168. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsāmi-Śāstrigal, Bhavani, Coimbatore district.

(*a*) प्रश्नमहोदधिः.

PRAŚNAMAHŌDADHIḤ.

Foll. 1*a*—4*b*.

Same work as that described under No. 13953 of the D.C.S. MSS., Vol. XXIV. The work is also called Ṣaṭpañcāśaddhōrā or Ṣaṭpañcīkā. By Bhaṭṭōtpala.

Incomplete.

Foll. 4*b*—6*a* contain the portion of Bṛhajjātaka. Fol. 6*b* is left blank.

(*b*) ज्ञानप्रदीपिका.

JÑĀNAPRADĪPIKĀ.

Foll. 7*a*—26*a*. Fol. 26*b* is left blank.

Same work as that described under No. 13931 of the D.C.S. MSS., Vol. XXIV, and R. No. 981(g) ante.

Breaks off in the 18th Kāṇḍa

(*c*) ऐतरेयारण्यकभाष्यम्.

AITARĒYĀRAṆYAKABHĀṢYAM.

Foll. 27*a*—95*a*. Foll. 90*b* and 95*b* are left blank.

A commentary on the Aitarēyāraṇyaka, which work has been described under No. 38 of the D.C.S. MS., Vol. I, Part I: by Sāyaṇācārya.

Contains the first and fourth Āraṇyakas.

Complete, but wants the beginning in the first Āraṇyaka.

Beginning:

(द्यावा)पृथिवीभ्यामनुज्ञातेनेन्द्रेण कृतो वृत्रवध एवमाम्नायते—स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन् इति । एवमन्यत्रापि—इन्द्रो वृत्राय वज्रं प्राहरत् । इन्द्रो वृत्राय वज्रमुदयच्छत्, इन्द्रो वृत्रं हत्वेत्यादिषु प्रसिद्धिर्द्रष्टव्या ।

* * * *

अग्ने सख्ये मा रिषामा वयं तव इत्यस्यैव चतुर्थपादस्य पठितत्वात्समानोदर्कत्वम् । अन्यत्पूर्ववद्व्याख्येयम् । अभ्यासोऽध्यायसमाप्त्यर्थः, प्रथमारण्यकसमाप्त्यर्थः, कर्मकाण्डसमाप्त्यर्थश्च ॥

Colophon:

इति माधवीये वेदार्थप्रकाशे ऐतरेयारण्यके प्रथमारण्यके पञ्चमोऽध्यायः ॥

End:

विदा मघवन्विदोमिति । हे मघवन् ऐन(धन)वन्निन्द्र विदा(द)वेत्थ सर्वं जानासि । अतोऽसद्धितं विद विद्धि जानीहि चित्ते अवधारय ओं अस्तु श्रेयोऽस्माकमिति शेषः । तदिदं नवसङ्ख्याकानामृचां पुरीषपदानां च प्रतिपादकं ग्रन्थजातं यद्यपि कर्मकाण्डे पठितुं युक्तं, तथाप्यारण्यक एवाध्येतव्यमित्यभिप्रेत्य चतुर्थारण्यकत्वेनात्र पठितम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

Colophon:

इति श्रीसायणाचार्यविरचिते वेदार्थप्रकाशे ऐतरेयारण्यकाण्डे चतुर्थारण्यकं समाप्तम् ॥

(*d*) **प्रश्नमणिदर्पणम्.**

PRAŚNAMAṆIDARPAṆAM.

Foll. 96*a*—99*b*.

Same text as that described under No. 13952 of the D.C.S. MSS., Vol. XXIV.

Complete.

(e) पञ्चाङ्गसाधनसङ्गतिः.

PAÑCĀṄGASĀDHANASAṄGATIḤ.

Foll. 100*a*—114*a*. Fol. 114*b* is left blank.

Similar to the work described under No. 13455 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning:

षष्टिर्विंशतिगुणिता व्यपगतसंवत्सरेण संमिश्रा ।
नवगगनाब्धिसमेतं शकनृपकालं विजानीयात् ॥

शाकाब्दसंयुतसमाः कमलासनस्य जन्मादितो गणनया प्रभवन्ति सन्तः ॥
नन्दाद्रिचन्द्रमुनिनागगजाम्बरर्तुभूबाणनागवसुवारिधिलोचनानाम् ॥
(२४८८५१६०८८७१७९) ।

End:

यावत्तिष्ठन् गुरुस्सौरिस्तावद्दुर्भिक्षलक्षणम् ।
आद्यन्तदर्शयोर्मध्ये तयोराद्यन्तयोर्यदा ॥
सङ्क्रान्तिद्वितयं स्याच्चेच्छून्यमासस्स उच्यते ।
यज्ञोपवासव्रत . . . . ति ॥

Foll. 115*a*—116*a* contain the Pañcapakṣiśakuna. Fol. 116*b* is left blank.

(f) पञ्चपक्षिशकुनम्.

PAÑCAPAKṢIŚAKUNAM.

Foll. 117*a*—119*a*. Fol. 119*b* is left blank.

Same work as that described under No. 13946 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Foll. 120 and 121 contain some astrological matters.

(g) लम्पाकविवृतिः.
LAMPAKAVIVṚTIḤ.

Foll. 122*a*—130*b*.

Same work as that described under No. 13987 of the D.C.S. MSS., Vol. XXIV, but with slight difference.

Complete in five Adhyāyas.

Beginning:

ब्रह्मविष्णुमहेशानां कारणं जगतोऽस्य च ।
वन्दे परतरं ब्रह्म प्रमाणातीतगोचरम् ॥
बोधाद्वैतमयं नित्यं शक्तितो भिन्नमीश्वरम् ।
प्रणम्य क्रियते श्रीमल्लम्पाकविवृतिः परा ॥
अण्डाङ्घ्रिकुक्षिवक्षोदोः शिरांस्युक्षादिदक्षिणे ।
क्रमाद्वामे च कौर्प्यादिव्युत्क्रमात्तानि निर्दिशेत् ॥

End:

पद्मनाभकृतं शास्त्रं शास्त्रिणां हितकाम्यया ।
द्विषष्टिश्लोकसङ्क्षिप्तं लम्पाकं लोकभूषणम् ॥

Colophon:

इति लम्पाकशास्त्रे नष्टमुष्टयध्यायः पञ्चमः ॥

(h) जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Foll. 131*a*—235*b*.

Same work as that described under R. No. 374(*c*) ante. By Vēṅkaṭācārya, son of Yajñanārāyaṇayājūka.

Contains the Pūrvabhāga only.

Complete.

(i) लक्षणरत्नपरिभाषा—सव्याख्या.
LAKṢAṆARATNAPARIBHĀṢĀ WITH COMMENTARY.

Foll. 136*a*—140*b*.

The Lakṣaṇaratnaparibhāṣā is a treatise on Vedic technicalities. It is followed by a commentary; by Rāma, the author of both Lakṣaṇaratnaparibhāṣā and its commentary was the son of Bhāskarārya who mentions Vaidyanātha.

Complete.

Beginning :

नमस्कृत्य गुरून् साक्षाच्छिवसूर्यस्वरूपिणः ।
स्वकृतं लक्षणं रामो व्याख्यात्यृग्यजुषोस्समम् ॥

प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तये आदावभ्यर्हितस्वेष्टदेवतानमस्कारपूर्वकं चिकीर्षितं प्रतिजानीते—प्रणम्येति ।

प्रणम्य सिद्धिविघ्नेशं वैद्यनाथकृतं वरम् ।
भास्करार्यतनूजेन लक्षणं पूर्यतेऽधुना ॥

भास्करेति । भास्कराख्यास्तातचरणा आर्या गुरवः तेषां तनूजेन जन्मना विद्यया च । ननु वैद्यनाथकृतलक्षणस्य (सत्त्वेन स्व)कर्तव्यत्वाभावाच्चद्यत्नेनालमित्यत आह—पूर्यत इति । लक्ष्यलक्षणसङ्ग्रहाभ्यां पूर्यते न तु क्रियत इति भावः । तल्लक्षणस्वरूपं वक्तव्यं चाह—

यजुषि प्रतिपञ्चाशल्लक्षणं वच्मि सारवत् ।
अत्र प्रवर्तकान् वर्णान् लक्ष्याणि च बहून्यथ ॥

इदमुपलक्षणमृग्वेदे प्रतिवर्गमित्यपि ज्ञेयम् ।

End :

पञ्चाशति वर्तमानो लक्ष्याभावश्चेत् स सम इति ज्ञेयम् ॥

Colophon :

इति लक्षणरत्नस्य परिभाषामितार्थदा ।
रामेण प्रेरितेनार्यैर्व्याख्याता सा यथामति ॥

Foll. 141*a*—149*b* contain the Vṛttalaghuguruprastāramērupatākāviṣaya. Foll. 150—159 are left blank.

(j) मन्त्रार्णस्तुतिः.
MANTRĀRṆASTUTIḤ.

Foll. 160*a*—162*b*. Foll. 163—168 are left blank.

A eulogy addressed to Dakṣiṇāmūrti, a manifestation of Śiva. The work is written in the Mattamayūra metre. By Śaṅkarācārya.

Complete.

Beginning:

ओमित्येतद्यस्य बुधैर्नाम गृहीतं यद्भासेदं भाति समस्तं वियदादि ।
यस्याज्ञातस्तस्य वशास्था विधिमुख्यास्तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥

End:

गैषा रम्यैर्मत्तमयूराभिधवृत्तैरादौ क्लृप्ता यन्मनुवर्णैर्नुतिभङ्गी ।
तामेवैतां दक्षिणवक्त्रः कृपा(पया)सावूरीकुर्याद् देशिकसम्राट् परमात्मा ॥

Colophon:

इति श्रीभगवत्पादकृता मन्त्रार्णस्तुतिस्समाप्ता ॥

R. No. **3861.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 115. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsāmi-Śāstrigaḻ, Bhavani, Coimbatore district.

(*a*) वासवदत्ता.

VĀSAVADATTĀ.

Foll. 1*a*—13*b*. Fol. 14 is left blank.

Same work as that described under R. No. 734(*a*) ante.

Incomplete.

(*b*) स्वरसिद्धान्तचन्द्रिका.

SVARASIDDHĀNTACANDRIKĀ.

Foll. 15*a*—85*b*.

Same work as that described under No. 1023 of the D.C.S. MSS., Vol. II, wherein see for the beginning. By Śrīnivāsa, son of Anantāmbā and Kṛṣṇa of Saṅkṛtigōtra.

Wants the beginning otherwise complete.

End:

उदात्तेनेत्यत्रानुदात्तपदं नानुवर्तयन्ति, तन्मत स्वरितस्य तूदात्त इत्येतदप्युत्कर्षज्ञापकमिति सिद्धम् ॥

Colophon:

इति सङ्कृतिकुलजलधिकौस्तुभस्य श्रीमदनन्ताम्बापरि(गत)गृहमेधिभावस्य श्रीकृष्णसूरेस्सूनुना पदवाक्यप्रमाणपारावारीणप्रज्ञासमुल्लासेन श्रीनिवासेन

विरचितायां स्वरसिद्धान्तचन्द्रिकायामारम्भप्रकरणम् , दत्ताचादिस्वरूपप्रकरणम्, परिभाषाप्रकरणम्, संहितास्वरप्रकरणम्, धातुस्वरूपप्रकरणम्, प्रत्ययस्वरप्रकरणम्, समासस्वरप्रकरणम्, फिट्स्वरप्रकरणम्, सुबन्तसर्वानुदात्तप्रकरणम्, तिङन्तसर्वानुदात्तप्रकरणम्, प्लुतादिस्वरप्रकरणम्.

(*c*) ऋक्संहितापदपाठः.

ṚKSAMHITĀPADAPĀṬHAḤ.

Same work as that described under No. 8 of the D.C.S. MSS., Vol. I, Part 1.

Contains the fifth Aṣṭaka (wants the beginning) and the sixth Aṣṭaka (wants the end).

R. No. **3862.**

Palm-leaf. $11\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 178. Lines, 7 in a page. Grantha. Slightly injured

Purchased in 1921–22 from M.R.Ry. Annāsāmi-Śāstrigaḻ, Bhavani, Coimbatore district.

(*a*) आर्यभटसूत्रार्थप्रकाशिका.

ĀRYABHAṬASŪTRĀRTHAPRAKĀŚIKĀ.

Foll. 2*a*—86*b*. Fol. 1 is left blank.

Same work as that described under No. 13389 of the D.C.S. MSS., Vol. XXIV. By Sūryadēvayajvan.

Breaks off in the 25th Sūtra.

Beginning:

नमस्सकलकल्याणगुणसंवासभूमये ।
निरवद्याय नित्याय महसेऽस्तु महीयसे ॥
त्रिस्कन्धार्थविदा सम्यक् सूर्यदेवेन यज्वना ।
आचार्यार्यभटप्रोक्तसूत्रार्थोऽत्र प्रकाश्यते ॥

स्वाध्यायमधीयीतेत्यर्थज्ञानपर्यन्ताध्ययनविधानेनार्थज्ञानोपायतयार्थाद्विहितस्याङ्गाध्ययनस्य तस्मात् ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येतव्य इति निष्कृष्य विधानात् ।

Fol. 87*a* contains the first stanza of the Kaṇādasiddhāntacandrikā. Foll. 87*b* and 88*a* are left blank. Foll. 88*b*—96*b* and 98*a*—99*b* contain the Jyautiṣaviṣaya. Foll. 97 and 100 are left blank.

(*b*) शक्तिवादः.

ŚAKTIVĀDAḤ.

Foll. 101—178*b*.

Same work as that described under No. 4302 of the D.C.S. MSS., Vol. VIII. By Gadādharabhaṭṭācārya.

Complete.

R. No. **3863.**

Palm-leaf. 15½ × 1½ inches. Foll. 89. Lines, 9 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇasāmi-Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) कारकव्याक्रिया.

KĀRAKAVYĀKRIYĀ.

Foll. 1*a*—17*a*.

A commentary on the Kārakaprakriyā forming a part of the Siddhāntakaumudī, which work has been described under No. 1354 of the D.C.S. MSS., Vol. III.

Incomplete.

Beginning:

कामेशवदनालोकप्रादुर्भूतगणेश्वरः ।
कारकव्याक्रियाविघ्नध्वंसायास्त्वखिलार्थदः ॥
सिद्धान्त(कौमुदी)कारकव्याख्यानाय भारती ।
बोभूयात्स्फूर्तिदा मह्यं साधूनां विदुषां मुदे ॥

तदेवं सुप्तिङन्तमिति सूत्रश्रितक्रमानुरोधात् सामान्यतः प्राति(पादि)कप्रकृतिकं ङ्याबन्तप्रकृतिकं च सुबन्तं निरूप्यते। विशेषप्रातिपदिकप्रकृतिकसुबन्तनिरूपणस्य विभक्त्यर्थज्ञानसापेक्षत्वात् तदर्थनिरूपणं प्रथमादिक्रमेण कर्तुमारभते —प्रातिपदिकार्थेत्यादिना ।

* * * *

प्रातिपदिकार्थश्च लिङ्गं च परिमाणं च वचनं चेति द्वन्द्वः । मात्रशब्दस्यावधारणमर्थः ।

End:

उपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीयेति कौस्तुभकृत् उपपदविभक्तिमाह — उभेति । उभसर्वशब्दयोस्तसिलन्तयोः प्र.

Fol. 18*a* gives the title page of Śitikaṇṭhīyaśabdakhaṇḍa. Fol. 17*b* and 18*b*—19*b* are left blank.

(*b*) न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKA-PRAKĀŚIKĀ.

Foll. 20*a*—88*b*. Fol. 89 gives the portion of Śitikaṇṭhīya.

Same work as that described under Nos. 4223 and 4224 of the D.C.S. MSS., Vol. VIII. By Śrīkaṇṭha.

Wants the beginning and the end in Śabdakhaṇḍa.

R. No. 3864.

Palm-leaf. $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 125. Lines, 8 in a page. Telugu. Slightly injured

Purchased in 1921–22 from M.R.Ry. Aṇṇāsāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) भोजचरित्रम्.

BHŌJACARITRAM.

Foll. 2*a*—52*b*. Fol. 1 is left blank.

Same work as that described under No. 12202 of the D.C.S. MSS., Vol. XXI, but with slight difference.

Complete.

Beginning:

स्वस्ति श्रीमन्महाराजाधिराजस्य भोजस्य प्रबन्धः कथ्यते । आदौ धारानगरे सिन्धुलसंज्ञो राजा प्रजाः पर्यपालयत् ॥

End:

राजा चमत्कृतः प्राह—सुकुमारि त्वां लीलादेव्यनुमत्या स्वीकुर्मः इति
धारानगरं नीत्वा तथैव स्वीकृतवान् ।
पवित्रं भोजराजस्य चरित्रं लिखितं मया ।
अबद्धं तत्र यद्यस्ति सुधियः क्षन्तुमर्हथ ॥

Colophon:

इति श्रीमन्महाराजाधिराजसकलमहीपालमकुटमणिसकलविद्याविशारद-श्रीमुञ्जमहीपालकुलजलधिचन्द्रस्य सकलविद्वत्कविवरमण्डलसंस्तूयमानकीर्ति-महामण्डलस्यानवरतविश्राणितविविधतुलापुरुषादिदानविभवजितमान्धातृमुख्यम-हीपलामहिम्नः भोजमहीपालस्य प्रबन्धस्समाप्तः ॥

(*b*) तर्कभाषाव्याख्या—भावार्थदीपिका

TARKABHĀṢĀVYĀKHYA: BHĀVĀRTHADĪPIKĀ.

Foll. 54*a*—77*b*. Fol. 53 is left blank.

Same work as that described under No. 4134 of the D.C.S. MSS., Vol. VII. By Gōvardhanasudhī.

Wants the beginning and end.

(*c*) लीलावतीव्याख्या.

LĪLĀVATĪVYĀKHYĀ.

Foll. 79—125*b*. Fol. 78 is left blank.

A commentary on Bhāskarācārya's Līlāvatī, which work has been described under No. 13477 of the D.C.S. MSS., Vol. XXIV.

Beginning:

. . . . श्रीभास्कराचार्यविनिर्मितायाः ।

पाठ्याः करोत्ययतथो(र्थ्यपदो)पपत्ति कामाह्वयः प्रौढधियां मुदे च ॥

. . . . चार्यास्सिद्धान्तशिरोमणिसंज्ञकं महाप्रबन्धं निर्माय तन्मध्यवर्तिपाठिगणितजात्या सोदाहरणं गणित . . . . य लीलावती संज्ञकं ग्रन्थं कृतवन्त इदानीं तत्र गणितपाठ्या व्याख्यानं मन्दावबोधार्थं क्रियते किं च ।

End:

एवं मिलितास्सर्वे बुधाः । एवं स्थानान्तरेषूदाहार्यम् ॥

Colophon:

इति गणितलीलावतीव्याख्याने अङ्गपाशस्समाप्तः ॥

R. No. **3865.**

Palm-leaf. 15½ × 1⅜ inches. Foll. 150. Lines, 9 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsāmi-Śāstrigal' Bhavani, Coimbatore district.

(*a*) चम्पुभारतम्.

CAMPUBHĀRATAM.

Foll. 2*a*—27*a*. Foll. 1, 27*b*—28*b* are left blank.

Same work as that described under No. 12233 of the D.C.S. MSS., Vol. XXI. By Anantabhaṭṭa.

Breaks off in the fourth Stabaka.

(*b*) कुवलयानन्दः.

KUVALAYĀNANDAḤ.

Foll. 29*a*—83*b*.

Same work as that described under No. 12846 of the D.C.S. MSS., Vol. XXII.

Complete.

(*c*) वार्त्तिकसारव्याख्यानम्—सारसङ्ग्रहः.

VĀRTTIKASĀRAVYĀKHYĀNAM: SĀRASAṄGRAHAḤ.

Foll. 84*a*—126*a*.

Same work as that described under R. No. 1307 ante.

Contains the sixth Adhyāya only complete.

Fol. 126*b* gives a portion of Hastāmalakastōtra.

(*d*) कर्पूरमञ्जरी.

KARPŪRAMAÑJARĪ.

Foll. 127*a*—142*b*.

Same work as that described under R. No. 2090(*b*) ante.

Complete.

Foll. 143—150*a* contain some Udāharaṇaślōkas taken from Kuvalayānanda.

R. No. 3866.

Palm-leaf. 16⅝ × 1½ inches. Foll. 242. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Annāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) महाभाष्यप्रदीपविवरणम्, (बृहत्).

MAHĀBHĀṢYAPRADĪPAVIVARAṆAM (BṚHAT).

Foll. 2*a*—169*b*. Fol. 1*a* contains the title page of Laghuvivaraṇī. Foll. 1*b* and 170*a*—171*b* are left blank.

A commentary on the Mahābhāṣyapradīpa of Kaiyaṭa, which work has been described under No. 1296 of the D.C.S. MSS., Vol. III. By Rāmacandrasarasvatī.

In the colophon of the first Āhnika of the first Pāda of the first Adhyāya the commentator is said to be Īśvarānanda, disciple of Satyānanda.

Wants the beginning and incomplete.

Beginning :

भाष्यं व्याचिकीर्षुश्चिकीर्षितस्याविघ्नेन परिसमाप्तये शिष्टाचारपरिप्राप्तं मङ्गलाचारं कृतं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—सर्वेति । परमात्मानं प्रणम्य जैयटात्मजोऽहं कैयटो (यथा)गमं विप्रतिष्ठवं विधास्य इति सम्बन्धः । अत्र च क्त्वाप्रत्ययेन पूर्वकालतया प्रमाणमस्य हेतुत्वं वदता ग्रन्थारम्भेऽवश्यं कर्तव्यत्वं सूचितम् । परमात्मानं जगदुपादानकारणतया साधयति—सर्वाकारमिति । सर्वस्य कार्यस्याकारं स्वरूपं उपादानमिति यावत् । उपादानं हि कार्यस्य स्वरूपम् ।

* * * *

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यसत्यानन्दशिष्येश्वरानन्दविरचिते भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

* * * *

तथा चैकरूप्यायानुवाद्यत्वमेवास्तु न तु विधेयत्वम्; वचित्त्वपीत्यादीनां कितीति दोषनियामकत्वोपादानमिति सर्वमनवद्यम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥

न धातुलोप आर्धधातुके । भाष्यगतप्रत्युदाहरणोपयोगित्वेन निषेध्यं दर्शयति—गुणेति । प्राधान्यं च प्रथमविभक्तिप्रथमानिर्दिष्टत्वादिक इति षष्ठीनिर्दिष्टत्वाच्च गुणभावः ।

यथा—राज्ञः पुरुष इति षष्ठीनिर्दिष्टो राजशब्दो गुणः प्रतीयते पुरुषश्च प्रधानं प्रधाने च कार्यसम्प्रत्यय इति भावः ।

End :

तत्त्विति । तथा सति चार्थे द्वन्द्व इति पृथक्सूत्रकरणमनर्थकं स्यादिति भावः ॥

Colophon :

इति (द्वितीये) द्वितीयमाह्निकम् ॥

सरूप । ननु समानानामित्युक्तौ प्राधान्यादर्थतस्समानत्वमाश्रीयेत । ततश्च भिन्नार्थेषु ।

Colophon :

इति बृहद्विवरणी ॥

(*a*) महाभाष्यप्रदीपविवरणम् (लघु).

MAHĀBHĀṢYAPRADĪPAVIVARAṆAM (LAGHU).

Foll. 172*a*—237*a*. Foll. 237*b*—242*b* are left blank.

Same work as that described under Nos. 1303 and 1304 of the D.C.S. MSS., Vol. III, wherein see for the end. By Rāmacandrasarasvatī.

Wants the beginning and incomplete.

Beginning :

लघुविवरणीयम्—वृद्धिरादैच् । द्विपदमिदं सूत्रं कृतमनयोस्साधुत्वमिति भाष्यकारेण द्विवचननिर्देशात् । न चादैच्छब्दस्येतरेतरयोगद्वन्द्वे आदैचाविति भवितव्यम् । समाहारद्वन्द्वे तु द्वन्द्वाच्चुदषहान्तात् समाहारे इति समासान्ते सति आदैचमिति भवितव्यमिति वाच्यम् ।

* * * *

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥

न धातु- —ननु लिविहि(लवि)तेत्यादि प्रत्युदाहरणमनुपपन्नमानन्तर्यात् । परिभाषानिषेधेऽपि गुणस्यानिषेधेन [गुणस्यानिषेधेऽपि] तत्प्रवृत्तौ लिविहि-(लवि)तेत्यादेस्सिद्धत्वादित्याशङ्क्य सूत्रार्थमाह— गुणवृद्ध्योरिति । प्रधानत्वं च गुणवृद्ध्योस्ता- थ्यादिकपरिभाषायास्तां प्रति शेषत्वेन तदुपस्थानाय प्रदेश-विशेषप्रदर्शनार्थं गुणवृद्ध्योरुपादानादित्यत आह—दीधीति ।

R. No. 3867.

Palm-leaf. 18½ × 1¼ inches. Foll. 180. Lines, 8 in a page. Grantha Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Foll. 1*a*—106*b*.

Same work as that described under Nos. 3211 and 3212 of the D.C.S. MSS., Vol. V. By Varadarāja.

Breaks off in the Prakīrṇakapāda.

(*b*) अघविवेकः.

AGHAVIVĒKAḤ.

Foll. 107*a*—124*a*.

A work on pollution: by Nīlakaṇṭhadīkṣita, son of Appayadīkṣita of Bhāradvājagōtra.

Complete, but wants the beginning.

Beginning:

सूतके मृतके चैव वपनं दशमेऽहनि ।
मासर्क्षतिथिवाराणामनपेक्षाह गौतमः ॥
प्रथमेऽहनि कर्तव्यं क्षौरकर्म प्रवर्त(वृत्ति)तः ।
तृतीये पञ्चमे वापि सप्तमे वाप्प्रदानतः ॥

* * * *

Colophon:

श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्याप्पयदीक्षितस्य सूनोः नीलकण्ठदीक्षितस्य कृतावघविवेके पूर्णाशौचप्रकरणं समाप्तम् ॥

End:

ब्राह्मणादिमध्ये यस्य यावत्कालमाशौचमुक्तमकृतक्रियस्त(स्य त)स्याशौच-कालस्यानन्तरं स्नात्वा पाणिनापः स्पृष्ट्वा शुध्येत्; न तत्कालातिक्रममात्रेण । एवं क्षत्रियो वाहनादिकं स्पृष्ट्वा शुध्यति । वैश्यः प्रतोदरश्मी स्पृष्ट्वा शुध्यति । शूद्रो यष्टिं स्पृष्ट्वा शुध्यति ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्याप्पयदीक्षितस्य सूनोर्नीलकण्ठदीक्षितस्य कृतावघविवेके अवशिष्टप्रक्रिया नाम षष्ठं प्रकरणं सम्पूर्णम् ॥

अघविवेकस्समाप्तः ॥

(*c*) अघविवेचनम्.

AGHAVIVĒCANAM.

Foll. 124*b*—127*b*.

Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V. By Rāmacandrādhvarin, son of Anantasōmayājin.

Complete.

Fol. 128 gives the Āśaucaviṣayavacanas. Foll. 129*a*—130*a* contain the Rēkhālakṣaṇa. Foll. 130*b*—132*b* are left blank.

(*d*) तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: PHAKKIKĀ.

Foll. 133*a*—180*b*.

Same work as that described under No. 4027 of the D.C.S. MSS., Vol. VIII. By Madhurānāthatarkavāgīśa.

Contains the Apūrvavādarahasya only.

R. No. 3868.

Palm-leaf. $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 228. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Annāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) तत्त्वचिन्तामणिव्याख्या—दर्पणः.

TATTVACINTĀMAṆIVYĀKHYĀ: DARPAṆAḤ.

Foll. 3*a*—141*b*. Fol. 2*a* gives the title page of Maṇidarpaṇa. Foll. 1 and 2*b* are left blank.

Similar to the commentary described under No. 4001 of the D.C.S. MSS., Vol. VIII. By Rāmānujadīkṣita, pupil of Tātadēśika.

Contains from the Sannikarṣavāda to the end of the Pratyakṣaparicchēda.

Beginning:

तातदेशिकशिष्येण रामानुजविपश्चिता ।
सन्निकर्षपरिच्छेदः क्रियते मणिदर्पणे ॥

संयोगेन द्रव्यग्रहः, संयुक्तसमवायेन रूपादेः, संयुक्तसमवेतसमवायेन रूपत्वादेः, समवायेन शब्दस्य, समवेतसमवायेन शब्दत्वादेः, विशेषणतया शब्दाभावस्य, इन्द्रियसंयुक्तविशेषणतया भूतलादिनिष्ठस्य,

*   *   *   *

समवायनिष्ठस्याभावादेर्ग्रहणम् । विशेषणतात्वेन प्रत्यासत्तिविभजनात् न षोढापारिगणनानुपपत्तिः । न च समवायत्वेन चतुर्णामैक्यापत्तिः स्वतन्त्रेच्छाया(च्छस्य) नियोगपर्यनुयोगानर्हत्वात् ।

End :

इदन्ताविषयकानुभवजन्यसंस्कारप्रयोज्यत्वमेव तच्छब्दप्रयोगे नियामकम् । अत एव प्रत्यभिज्ञानोक्ता भासते इदन्ता चानुभवे काले धर्मान्तरम्— इति सङ्क्षेपः ॥

Colophon :

इति रामानुजदीक्षितविरचिते मणिदर्पणे प्रत्यक्षपरिच्छेदः ॥

The scribe adds—

शङ्करनारायणेन लिखितमिदं मणिदर्पणम् ॥

(*b*) तत्त्वचिन्तामणिव्याख्या—दर्पणः.

TATTVACINTĀMAṆIVYĀKHYĀ : DARPAṆAḤ.

Foll. 143*a*—225*a*. Foll. 142, 225*b*—228*b* are left blank.

Same work as that described under No. 4001 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning. By Rājacūḍāmaṇidīkṣita, pupil and brother of Ardhanārīśvaradīkṣita, son of Ratnakhēṭa-Śrīnivāsadīkṣita and Kāmākṣī.

Contains the Śabdakhaṇḍa complete.

End :

अर्थापत्तेस्तु व्यतिरेकिण्यन्तर्भाव इत्युक्तमनुमानपरिच्छेदे । अनुपलब्धेस्तु प्रत्यक्षसहकारित्वमात्रं न प्रमाणान्तरमित्युक्तं प्रत्यक्षपरिच्छेदे । तस्माद्युक्तमुक्तं चत्वार्येव प्रमाणानीत्यनवद्यम् ॥

Colophon :

इति श्रीमति(द्न्ति)द्योतिदिवाप्रदीपाक(क्क)विश्वजिदतिरात्रयाजिसर्वतन्त्रस्वतन्त्राद्वैतविद्याचार्यविश्वामित्रवंशमुक्ताफलसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य विश्वजिद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु मणिदर्पणे शब्दपरिच्छेदस्सम्पूर्णः ॥

R. No. 3869.

Palm-leaf. $12\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 114. Lines, 12 in a page. Grantha and Telugu Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* gives the title page of the Bhēdadhikkāra. Fol. 1*b* is left blank.

(*a*) भेदधिक्कारः.

BHĒDADHIKKĀRAḤ.

Foll. 2*a*—12*a*. Fol. 12*b* is left blank.

Same work as that described under No. 4696 of the D.C.S. MSS., Vol. IX. By Nṛsiṁhāśrama, disciple of Jagannāthāśrama.

Complete.

(*b*) भेदधिक्कारसत्क्रिया.

BHĒDADHIKKĀRASATKRIYĀ.

Foll. 13*a*—77*a*. Fol. 77*b* is left blank.

Same work as that described under No. 4699 of the D.C.S. MSS., Vol. IX. By Nārāyaṇāśrama, a disciple of Nṛsimhāśrama.

Complete.

(*c*) सूर्यदण्डकः.

SŪRYADAṆḌAKAḤ.

Foll. 78*a*—84*b*. Fol. 84*b* contains four stanzas in praise of the Sungod by Sūrya, son of Śiva.

A eulogy in the Daṇḍaka metre addressed to Sun: by Rāmadēśika.

Complete.

Beginning:

जय जय भगवन् विवस्वन् नमस्ते नमस्ते यशस्ते समस्तेषु देवेषु कस्तेजसास्ते पुरस्तादधस्तात्कृतिस्तावदस्तावदस्तांशुरिन्दुर्विहस्ताशयस्तारकाभिस्समेतस्समस्ताभिरस्ताभिरालोकविस्तारतस्तावतस्ते ।

End:

सर्वलोकात्मने देव तुभ्यं नमस्सर्ववेदात्मने देव तुभ्यं नमस्स(र्व)देवात्मने देव तुभ्यं नमः ॥

श्रीमद्दण्डिकरामदेशिकवरश्चण्डत्विषो दण्डकं
प्रीत्यै कल्पितवांस्तदद्य पठतां संशृण्वतां भक्तितः ।

जायन्ते सकलानि वाञ्छितफलान्यत्रैव लोके चिरा-
द्ध्वंसन्तेऽपि च पातकानि कृपया सूर्यस्य तेजोनिधेः ॥

Fol. 85 contains the Apūrvavidhyādivacanas and a portion of the Siddhântakalpavallī.

(*d*) सिद्धान्तकल्पवल्ली.

SIDDHÂNTAKALPAVALLĪ.

Foll. 86*a*—102*b*.

Similar to the work described under No. 4764 of the D.C.S. MSS., Vol. IX. By Sadāśivēndra, disciple of Paramaśivēndra.

Contains the Stabakas one to four complete.

Beginning:

अङ्कुरितबोधमुद्रिकमपसव्योरूपरिस्थसव्यपदम् ।
वस्त्वेकमनुसरामो वटभूरुहमूलवास्तव्यम् ॥
वदनतदधोविभागव्यञ्जितमातङ्गमानवाभेदम् ।
मदनारिभागधेयं महिमानं वयमुपास्महे कमपि ॥
यदपाङ्गतः प्रबोधो भवदुस्स्वप्नावसानकरः ।
तमहं परमशिवेन्द्रं वन्दे गुरुमखिलतन्त्रजीवातुम् ॥
सिद्धान्तलेशसङ्ग्रहवर्णितनानामतावधानाय ।
हृद्यैरयं कतिपयैः पद्यैस्सन्दर्भयामि कृतिमेताम् ॥
इह खलु शान्त्यादिमतः प्रत्यग्ब्रह्मैक्यबोधसम्पत्त्यै ।
आत्मा श्रोतव्य इति श्रुतो विधिः किंविधो ग्रहीतव्यः ॥
अत्र प्रकटार्थकृतः श्रवणं ब्रह्मापरोक्षहेतुतया ।
अप्राप्तमतो विधिरयमपूर्व एवेति मन्यन्ते ॥
वेदान्तश्रवणमिदं नाप्राप्तं किं तु पक्षतः प्राप्तम् ।
नियमविधिरेष तस्मादित्याहुर्विवरणाचार्याः ॥

* * * *

Colophon:

इत्थं परमशिवेन्द्रानुग्रहभाजनसदाशिवेन्द्रकृतौ ।
सिद्धान्तकल्पवल्ल्यां प्रथमस्स्तबकोऽभवत्पूर्णः ॥

End:

परमार्थतस्तु मुक्तस्सर्वेशत्वादिधर्मनिर्मुक्तम् ।
विगलितसर्वविकल्पं सकलं ब्रह्मैव केवलं भवति ॥

Colophon:

इत्थं परमशिवेन्द्रानुग्रहभाजनसदाशिवेन्द्रकृतौ ।
सिद्धान्तकल्पवल्ल्यां तुर्यस्स्तबकश्च सम्पूर्णः ॥

(*e*) कच्चिरङ्गनृपतिस्तोत्रम्.
KACCIRAṄGANṚPATISTŌTRAM.

Foll. 103*a*—105*b*. Foll. 106*a*—107*a* contains the Sthālīpākavidhi. Fol. 107*b* is left blank.

Stanzas in praise of Kacciraṅgappaoḍayār, a zamindar of Uḍaiyarpālaiyam in the Trichinopoly district.

Contains up to the 34th stanza only.

Beginning:

भूषाकौस्तुभबिम्बितां निजतनूमालोक्य मत्तोऽपि ते
कान्ता कान्त विभाति कान्तरिति सक्रोधं विवृत्ताननाम् ।
सीतां किं भ्रमसीति मन्दहसितोद्भेदं गिरा सान्त्वयन्
पातु त्वामिह कच्चिरङ्गनृपते रामोऽभिरामाभिधः ॥

End:

प्रत्यग्रे भवतः प्रतीपनगरे प्रान्ते प्रतापातपे
जाग्रत्युग्रतरे निरन्तरमहो त्वच्छत्रुषुच्छत्रतः ।
छायातो न च रात्रितः प्रशमनं प्रापच्छ्रमोऽप्युच्छ्रितः
श्रीमद्राजकिरीटघट्टितपद श्रीबालरङ्गप्रभो ॥

विषं भुङ्क्ष्व सहामात्यैर्विनाशमुपयास्यसि ।
नाभ्यां केनापि राजेन्द्र कृष्णाजिनमकण्डकम् ॥

Foll. 108*a*—110*a* contain the Saṅgatiprayōjanaviṣayavacanas. Fol. 110*b* gives the Viṣam bhuṅkṣvētiślōkārtha. Foll. 111*a*—112*b* contain the Upākarmaprayōga. Foll. 113 and 114 contain the Nāgapratiṣṭhāprayōga.

R. No. 3870.

Palm leaf. 18 × 1½ inches. Foll. 223. Lines, 11 in a page. Telugu, Grantha and Nandināgarī. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 1 gives the portion of Dvitīyasvalakṣaṇa in Caturdaśalakṣaṇī.

(a) भवानन्दीयव्याख्या—सर्वोपकारिणी.

BHAVĀNANDĪYAVYĀKHYĀ : SARVŌPAKĀRIṆĪ.

Foll. 2a—129b.

Same work as that described under R. Nos. 1023, 1686 and 2262(a) ante. By Mahādēva *alias* Punatāmakara.

Up to the Sāmānyalakṣaṇagrantha.

(b) लीलावती.

LĪLĀVATĪ.

Foll. 130a—144b. Foll. 144b and 145a contain the Ṣaṭcchlōkī (Jyautiṣaviṣaya).

Same work as that described under No. 13477 of the D.C.S. MSS., Vol. XXIV.

Complete.

(c) आर्यभटीयम्.

ĀRYABHAṬĪYAM.

Foll. 145b—150b.

Same work as that described under No. 11385 of the D.C.S. MSS., Vol. XXIV.

Complete.

(d) लघुमानसम्.

LAGHUMĀNASAM.

Foll. 150b—154a. Fol. 154b contains some Bandhaślōkas.

Same text as that described under No. 13475 of the D.C.S. MSS., Vol. XXIV. By Mañjulācārya.

Complete.

Fol. 155 gives the Samāsacakra. Foll. 156 and 157 are left blank.

(e) खण्डनखण्डखाद्यम्.

KHAṆḌANAKHAṆḌAKHĀDYAM.

Foll. 158a—173a. Fol. 173b is left blank.

A well-known treatise maintaining the anirvacanīyatā doctrine of Advaita-Vēdānta: by Śrīharṣa. The commentary is described under R. No. 2762 ante.

Contains the first Paricchēda incomplete.

Fol. 174 gives the Advaita-Vēdāntaviṣayakārikās.

(f) खण्डनखण्डखाद्यव्याख्या.

KHAṆḌANAKHAṆḌAKHĀDYAVYĀKHYĀ.

Foll. 175a—219a.

Similar to the commentary described under R. No. 2762 ante. From another copy of this commentary it is made out that the commentator was Ānandapūrna, disciple of Abhayānanda.

Contains the first Paricchēda incomplete.

Beginning:

विश्वश्चाकारवाच्यस्सकलविषयभुक् भ्रान्तितत्कारणाभ्यां
बद्धस्संस्कारमात्रप्रविरचिततनुस्तैजसश्चेत्युवाच्यः ।
प्राज्ञो ज्ञानैकबद्धस्सुरनरस(क)ला(नन्द)भुङ्(मा)क्षरेक्ष्यो(ण)
वाक्या(च्या)र्थो यस्तुरीय(यो)विगलितसकलस्सोऽहमेवास्मि भूमा ॥

* * * *

अबोधपङ्काविलबोधनीरे यदीयवाचः कतकीभवन्ति ।
वन्दे मुनीन्द्रान्मुनिबृन्दवन्द्यान् श्रीमद्गुरून् श्वेतगिरीन् वरिष्ठान् ॥
कथाख्यभूमिप्रचलत्प्रचण्डवादीभकुम्भप्रविभेदतोत्रम् ।
रसावसिक्तं बुधमण्डनं यत् तत्खण्डनं व्याकरवाणि नीत्या ॥

ग्रन्थारम्भादौ शिष्टाचारपरम्पराप्राप्तकर्तव्यभावं परदेवतास्तुतिनमस्कार-लक्षणं मङ्गलं विधातुमधिकारिप्रयोजनसम्बन्धाभिधेयप्रतिपादनाय चाह—अविकल्प इति । अस्य च नियोगतः फलवत्कार्यान्तरारम्भसंयोगात् साक्षा-दफलत्वाच्च फलवत्सन्निधावफलं तदङ्गमिति कार्यान्तरशेषत्वेऽवधृते सत्या-रम्भस्य समाप्तिपर्यन्तत्वादपेक्षा(क्षिता)विघ्नपरिसमाप्तिः प्रयोजनम् । अपेक्षि-तावि(धेरनपेक्षितावि)धानं दुर्बलमिति फलान्तरकल्पनादुर्बलत्वात् ।

End:

अतिप्रसङ्गेनैतदयाकरोति तर्हीति । गोजातिमन्तरेण गोशब्दस्य तद्यक्तिष्वनेकार्थतया निवेशनेन गोत्वजातिरपह्नूयत इत्यर्थः । स्वरूपस्य प्रतिव्यक्ति ग्रहणं न घटते ।

R. No. **3871.**

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 99. Lines, 10 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) महाभाष्यम्.

MAHĀBHĀṢYAM.

Foll. 1*a*—57*a*. Fol. 57*b* is left blank.

Same work as that described under Nos. 1293 and 1294 of the D.C.S. MSS., Vol. III.

Contains from the fourth Pāda of the second Adhyāya to the second Āhnika of the second Pāda in the third Adhyāya complete and the third Āhnika of the same Pāda in the same Adhyāya incomplete.

(*b*) परिभाषार्थसङ्ग्रहः.

PARIBHĀṢĀRTHASAṄGRAHAḤ.

Foll. 58*a*—99*a*. Fol. 99*b* contains a portion of Paribhāṣāviṣayavacanas.

Same work as that described under No. 1474 of the D.C.S. MSS., Vol. III. By Vaidyanātha, son of Ratnagiridīkṣita.

Complete.

R. No. **3872.**

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 107. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) नलोदयः, सव्याख्यः.

NALŌDAYAḤ WITH COMMENTARY.

Foll. 2*a*—33*a*. Fol. 1*b* gives one stanza of Bhōjacaritra. Foll. 1*a* and 33*b*—34*b* are left blank.

Text is the same as that described under No. 11843 of the D.C.S. MSS., Vol. XX.

This commentary on Nalōdaya is similar to that described under **R. No. 101** ante.

Contains the Aśvāsas one (without the beginning) and two complete and three stanzas in the third Aśvāsa.

Beginning:

. . . विग्रहः । ताभिस्सह लीलारसमनुभवः तत्र वापि पिङ्गलता भवनादिषु सञ्चारः । येन च भूः भूमिः अगोपि अरक्षि । यश्च कंसान्न केवलं द्वेषमेव इतः प्राप्तः अपि तु इतः अस्मात् कंसात् आगोऽपि इतः अपराधमपि प्राप्तः तुरगवृषभयमलार्जुनादिरूपैः महासुरैः कंसादपराधमपि किल प्राप्तवान् । तस्माद्यादवात् हे हृदय मा गा इति पूर्वेण सम्बन्धः ।

यद्वारिषु सन्ना मानस्थितयो यन्नुन्नमुदलसन्नामानः ।
यत्र स सन्नामानः स्युर्भवभाजश्च पठितसन्नामानः ॥

यद्वारिषु यस्य शत्रुषु मानस्थितयः गर्वस्य स्थितयः सन्ना उत्सन्नाः ।

* * * *

Colophon:

इति नलोदयव्याख्याने प्रथम आश्वासः ॥

End:

भूमिं रक्षितवान् । किं च तदा सः राजराजराः राजराजो वैश्रवणः राजराजस्येव राः धनं यस्येति सः राजराजराः रराज दीप्तवान् ॥

Colophon:

इति नलोदयव्याख्याने द्वितीय आश्वासः ॥

अथ सुरवृषभास्वरतः प्रेक्ष्य कलिं प्रस्थिता महाभास्वरतः ।
यः कृतिषु शुभास्वरतः पप्रच्छुस्तद्गतिं घननिभाःस्वरतः ॥

अथ अनन्तरं प्रस्तावे भास्वरतः भास्वरात्(महात्) अस्माद्दमयन्तीस्वयंवरोत्सवात् स्वः प्रस्थिताः स्वर्गं प्रति गच्छन्तः ।

* * * *

वच इति उत्सवासवस्वादिभ्यः उत्सवः स्वयंवरोत्सवः स एवासवः मधु आस्वादितवद्भ्यः.

(*b*) किरातार्जुनीयम्.
KIRĀTĀRJUNĪYAM.
Foll. 35*a*—69*b*.

Same work as that described under No. 11464 of the D.C.S. MSS., Vol. XX. By Bhāravi.

Breaks off in the 11th Sarga.

(c) कस्तूरीतिलकस्तवः.

KASTŪRĪTILAKASTAVAḤ.

Foll. 70*a*—72*b*.

Same work as that described under No. 9877 of the D.C.S. MSS., Vol. XVIII. By Saumyavara.

Complete.

(d) नासामौक्तिकपञ्चविंशतिः.

NĀSĀMAUKTIKAPAÑCAVIṀŚATIḤ.

Foll. 73*a*—74*b*.

Twenty-five stanzas in praise of the nose ornament of Goddess Gōdā, also known by the Tamil name as Āṇḍāḷ. By Vēṅkaṭēśa, son of Rāmānuja and grandson of Śēṣācārya of Ātrēyagōtra.

Complete.

Beginning:

पद्माह्लादकरस्य पावनकरामर्शाद्विकासोन्मुखे
नित्यं षट्पदगीतचारुविभवे लक्ष्मीनिवासस्थले ।
गोदाया वदनाम्बुजे निवसतो हंसस्य लीलां श्रयन्
नासामौक्तिकमातनोतु भवतां नानाविधां संपदम् ॥

End:

श्रीरामानुजदेशिकस्य तनयः शेषाद्रिविद्वन्मणेः
पौत्रो यामकृतेह भक्तिनिभृतः श्रीवेङ्कटेशः कविः ।
नासामौक्तिकपञ्चविंशतिमिमां नित्यं जपन् मानवो
गोदापादसरोजयुग्मविषयां भक्तिं भजेत् पावनीम् ॥

Colophon:

इति श्रीमदात्रेयगोत्रभूषायमाणशेषाचलाचार्यपौत्रेण श्रीरामानुजगुरुवर-सूनुना श्रीवेङ्कटनिवासदासेन विरचिता श्रीगोदानासामौक्तिकपञ्चविंशतिः समाप्ता ॥

(e) सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Foll. 75*a*—81*b*.

Same work as that described under No. 48 of M. Seshagiri Sastri's Report, No. II.

Complete.

(f) सूर्यशतकम्.

SŪRYAŚATAKAM.

Foll. 82*a*—90*b*.

Same text as that described under R. No. 139(*a*), (*b*) ante. By Mayūrakavi.

Complete.

(g) भोजचरित्रश्लोकाः.

BHŌJACARITRAŚLŌKAḤ.

Foll. 91*a*—102*b*.

Same work as that described under No. 12202 of the D.C.S. MSS., Vol. XXI.

Complete.

(h) कामाक्षीपञ्चशती.

KĀMĀKṢĪPAÑCAŚATĪ.

Foll. 103*a*—107*b*.

Same work as that described under No. 9576 of the D.C.S. MSS., Vol. XVIII. By Mūkakavi.

Contains the Kaṭākṣaśataka incomplete.

R. No. **3873.**

Palm-leaf. 12¾ × 1 inches. Foll. 170. Lines, 5 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(a) रामवर्मविलासः.

RĀMAVARMAVILĀSAḤ.

Foll. 1*a*—141*a*. Fol. 141*b* is left blank.

A drama in five Acts describing the story of Rāmavarman, king of Cochin: by Bālakavi, son of Kālahasti and grandson of Mallikārjuna

who was the son of Yauvanabhāratī and grandson of Sōmanātha. The author was a disciple of Kṛṣṇa.

Complete in five Aṅkas.

Beginning :

. . . . समये स्वयंवरविधिं गुम्भेषु पुष्पस्रजां
संपादेषु समित्कुशस्य कुशलं कर्मापि वै . . . ।
न्यासेषु च विष्टरस्य गिरिशस्यार्धासनावस्थितिं
संचिन्त्यान्तरपत्रपाभरवती गौरी शिवायास्तु वः ॥

* * * *

सूत्र—श्रुत्वा, अये भगवतो दाशरथेर्भजनमुपदिशन्तीव मे श्वश्रेय-सायार्यमिश्राः । पुनराकाशे . . . . स्फुरति ततो नाम यस्य तस्यास्तु ।

सू—श्रुत्वा, आचार्य एते खलु यं कंचित्प्रयोगाय प्रबन्धमन्विच्छति मयि स्व . . . तस्य कस्यापि रूपकस्य नाम निरूढार्थैः पदैर्निवेदयन्ति । तदेतेषु तावत् नामपदानां पयाय क्रमेण . . . पर्यालोचयामि । निरूप्य सानुस्मरणानन्दम् । रामवर्मविलासं नाम प्रयोक्तव्यमित्यत्र भवतामादेशः ।

* * * *

यः किल रत्नकेतूदयस्य.

नटी—कहं काळहत्थिकविंदणन्दणो बाळकई (छा) कथं कालहस्तिकवीन्द्रनन्दनो बालकविः ।

* * * *

कृतं खलु पुरैव तदस्य गुरुणा राज्यशुनासीर(गु)रुयशःप्रशस्तिलुण्टाकपाण्डितीकेन प्रतिवादिमदगदोल्लाघनागदङ्कारेण केरलमण्डलालङ्कारेण निखिलकलाकलापनदीष्णेन कृष्णमनीषिणा सुगुणपोषिणा । यथा—

योऽभूद्यौवनभारतीकविवराच्छ्रीसोमनाथात्मजात्
छन्दोगरस्सुतमल्लिकार्जुनकविर्धन्यः पिता यत्पितुः ।
सोऽयं बालकविर्विसृत्वरकवित्वामोदवाङ्मञ्जरी-
स्व(द्रे): कस्य न कर्णमेति सुयशाः कौ कालहस्त्यङ्गभूः ॥

* * * *

पाश्चात्यसिन्धुपरिखां परिघोरुबाहुः प्राक् द्वारकामिव पतिर्भगवान् यदूनाम् ।
कोच्चीपुरीमधिवसन्(निज)राजधानीं श्रीरामवर्मनृपतिर्भुवि दीव्यतीति ॥

कनका—जानामि तमार्ये जानामि ।

* * * *

स्वमखिलमधिरोप्य स्वानुजे राज्यभारं
गुणवति युवराजे गोदवर्माभिधाने ।
प्रचलति नगरात् स्वात्प्रत्यमूमुत्तराशां
रविरिव मलयाङ्कादिङ्मुखाद्रामवर्मा ॥

End:

कुमुदेन्दीवरशबला सविलासतरङ्गिता प्रसादवती ।
द्राघीयसी प्रियाया दृष्टिरिव धिनोति दीर्घिका हृदयम् ॥

Colophon:

पञ्चममङ्कं पूर्णं बालकवेरस्य रामवर्मकृतौ ।
पूरयति (स्म) तमेनं कामाक्ष्याख्यां वहन् क्षितौ कवनी ॥

(*b*) उन्मत्तराघवम्.

UNMATTARĀGHAVAM.

Foll. 142*a*—150*b*.

A drama describing the deeds of Rāma after Sītā was carried away by Rāvaṇa: by Bhāskara.

The work is printed in the Kāvyamālā series.

Complete.

Beginning:

कला चान्द्री शम्भोः प्रणयकलहप्रापितरुषः
प्रणामे पार्वत्याः पदकमललाक्षापरिचिता ।
श्रिय भूयादस्या वदनशशिनः कोपकलुषात्
प्रसादेनारुण्यं विनिमयवशेनेव दधती ॥

(नान्द्यन्ते सूत्रधारः) सू—नेपथ्याभिमुखमवलोक्य आर्ये! इतस्तावत् । प्रविश्य नटी—अज्ज इअं ह्मि को णियोओ णिरू(आण)वेदु । सू—अद्य खल्वादिष्टोऽस्मि विमलतरनिजकीर्तिकर्पूरकरण्डीकृतनिखिलब्रह्माण्डेन

* * * *

विद्यारण्यश्रीचरणारविन्दवन्दनमहोत्सवमिलितेनामुना सामाजिकजनेन । यथा—

उन्मत्तराघवं नाम यत्प्रेक्षणकमुक्तवान् ।
भास्करः कृतिनां मान्यस्तच्चयाद्य निरूप्यताम् ॥ इति ।

End:

रामः—इतः परं किं प्रियमस्ति । अगस्त्यः—तथापीदमस्तु भरत-वाक्यम्—

समयविहितवर्षैस्सस्यपूर्णां धरित्रीं
जनयतु जलदौघः प्रेरितो वासवेन ।
भवजलनिधिमध्ये मज्जतां मानवानां
भवतु तरणिरूपा सङ्गतिः सज्जनानाम् ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

समाप्तमिदं भास्करसूरिविरचितमुन्मत्तराघवं नाम प्रेक्षणकम् ॥

Foll. 151*a*—153*b* contain 26 stanzas narrating the story of the Rāmāyaṇa. Foll. 154*a*—170*b* contain a small portion of the Rāmavarmavilāsa.

R. No. **3874.**

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 136. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* gives the title page of the Bōdhāyanadharmavyākhyā. Fol. 1*b* is left blank. Foll. 2*a*—5*b* contain some correspondence in Sanskrit by Vīrarāghava. Foll. 6 and 17 give the contents of this work (Bhōdhāyanadharmavyākhyā). Fol. 8 is left blank.

बोधायनधर्मविवरणम्—गोविन्दस्वामीयम्.

BŌDHĀYANADHARMAVIVARAṆAM: GŌVINDASVĀMĪYAM.

Foll. 9*a*—134*b*. Foll. 45*b*, 135 and 136 are left blank.

A commentary on the Bōdhāyanadharmasūtra: by Gōvindasvāmin. Contains the Prapāṭhakas one and two complete.

Beginning:

उपदिष्टो धर्मः प्रतिवेदं प्रतिशाखम् । अतीन्द्रियार्थप्रतिपादको नित्यो ग्रन्थराशिर्वेदः । तत्प्रतिपाद्यो धर्मः । यद्यप्येकैकस्यां शाखायां परिपूर्णान्यङ्गानि, तथापि कल्पसूत्रान्तरैश्शाखान्तरोक्ताङ्गोपसंहारः क्रियत एव । अन्विति पश्चादित्यर्थः । स्मार्तो द्वितीयः अनुभूतविषयासंप्रमोषस्मृतिस्तदभिव्यञ्जको ग्रन्थस्स्मृतिशब्देनोपचर्यते । स्मार्तः स्मृत्युपदिष्टः अनुव्या . . ग्रहणं

स्मार्तधर्मस्य कल्पविधिमन्त्रार्थवादमूलत्वप्रदर्शनार्थम् । तच्च धन्वन्नि(व) प्रपा असि । तस्माच्छ्रेयांसं पापीयान् पश्चादन्वेतीति ।

* * * *

Colophon:

इति बोधायनीये धर्मविवरणे गोविन्दस्वामिनि(मीये) प्रथमोऽध्यायः ॥

* * * *

Colophon:

इति गोविन्दस्वामिकृते धर्मविवरणे एकादशोऽध्यायः ॥

समाप्तः प्रथमः प्रश्नः ॥

End:

सम्बन्धः । स च वैदिकानामेव मन्त्राणामेषा पूर्वा सेवा पुनश्चरणश्चेदमिति विज्ञापनार्थम् । मन्त्राणां कर्मसाधनमिति । मन्त्रे(न्त्रै) रिष्टानिष्टप्रान्तिपरिहारसिद्धावित्यर्थः । तथा च शौनकः—पुरश्चरणमादौ मन्त्राणां सिद्धिकारणमिति ॥

Colophon:

बोधायनीये धर्मविवरणे गोविन्दस्वामिनि(मीये) द्वितीयः प्रश्नः ॥

गोविन्दस्वामिना प्रोक्तं धर्मपद्धतिकारणम् ।
यः कश्चिद्विन्दते लोके स पुमान् ब्रह्मनिष्ठितः ॥

इति बोधायनधर्मव्याख्या समाप्ता ॥

R. No. 3875.

Palm-leaf. 15⅓ × 1¼ inches. Foll. 254. Lines, 8 in a page. Grantha and Telugu. Good.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) तर्कदीपिका.

TARKADĪPIKĀ.

Foll. 1*a*—50*a*. Foll. 46 and 50*b* are left blank.

A hand-book of Nyāya and Vaiśēṣika by Lakṣmīnṛsiṁha, son of Rāmāṁbā.

Contains the Pratyakṣakhaṇḍa incomplete.

Beginning:

यत्पादाम्बुजयुग्मसन्ततगलन्माध्वीझरीगाहनात्
प्रत्याख्यातविषाद्यशेषकलुषो दैत्येन्द्रसूनुर्बभौ ।
यल्लीलैव जगज्जनिस्थितिलयांश्चकर्ति मायात्मिका
तं लक्ष्मीकुचकुङ्कुमाङ्कितततनुं लक्ष्मीनृसिंहं नुमः ॥
महीधरशिरोत्तंसो रामाम्बागर्भसम्भवः ।
यज्वा लक्ष्मीनृसिंहाख्यस्तनुते तर्कदीपिकाम् ॥

इह खलु लोके धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्थाः । तेषु मोक्षः परमपुरुषार्थः । स च पदार्थतत्त्वज्ञानाधीन इति पदार्थतत्त्वमत्र विविच्यते। ननु मोक्षो न पदार्थतत्त्वज्ञानाधीनः; तरति शोकमात्मविदित्यादिश्रुत्या तस्यात्मज्ञानसाध्यत्वावगमादिति चेत् सत्यम्—न स्वरूपेणात्मज्ञानं मोक्षसाधनम्; इदानीमपि तत्प्रसङ्गात् ।

End:

न चैवं स्पर्शोऽपि न विशेषगुणः स्यात् तस्यापि चतुष्टयवृत्तित्वादिति वाच्यम्; चतुर्ष्वपि स्पर्शेषु वैजात्यानुभवेन पाकादिजन्यतावच्छेदकजातिचतुष्टयमादायैव तस्य विशेषगुणत्वात् । न चेह तथा वैजात्यमनुभूयते.

(b) कृष्णविलासः.
KṚṢṆAVILĀSAḤ.

Foll. 51*a*—140*a*. Foll. 82*b*, 89*b* and 93*b* are left blank.

Same work as that described under R. No. 2088 ante. By Gurusvayaṁbhūrāma, son of Svayaṁbhūguru and the daughter's son of Rājanātha.

Complete.

Foll. 140*b*—142*b* contain some cāṭuślōkas.

(c) चित्रपटः.

CITRAPAṬAḤ.

Foll. 143*a*—157*a*. Fol. 157*b* contains some Mīmāṁsāvacanas. Foll. 158*a*—160*b* contain a portion of the Dakṣiṇāmūrtimantra.

A short treatise in verse summarising the contents of the Pūrvamīmāṁsāśastra of Jaimini: by Appayadīkṣita, son of Raṅgarājadhvarin.

Complete.

Beginning:

अथातो धर्मजिज्ञासा धर्मोऽर्थो विधिचोदितः ।
तन्निमित्तं परीक्ष्यं स्यात् न काम्यैस्तत् प्रमीयते ॥
विधिस्तस्मिन्मानमेव नित्यश्शब्दपदात्मकः ।
नित्यानि वेदवाक्यानि नानित्या(नि)समाख्यया ॥

Colophon:

प्रथमः पादः ॥

मन्त्रार्थवादप्रमुखाः प्रमाणमिति वार्त्तिके ।
तत्रार्थवादास्तुत्यर्था विधिवन्निगदास्तथा ॥

End:

कश्चिदेव परार्थानि कुर्याद्बहुषु यष्टृषु ।
तेषु यः कश्चिदेव स्यात् सत्रे गृहपतिर्मतः ॥
सत्रेऽपि सर्वे कुर्वीरन् संस्कारानन्दनादिकान् ।
आर्त्विज्यं ब्राह्मणायैव कुर्युस्सर्वेषु कर्मसु ॥

Colophon:

श्रीमदद्वैतविद्याचार्यश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चित्रपटे द्वादशोऽध्यायः ॥

(*d*) वातूलतन्त्रम्.

VĀTŪLATANTRAM.

Foll. 161*a*—175*b*.

Same work as that described under No. 5477 of the D.C.S. MSS., Vol. XI.

Breaks off in the tenth Paṭala.

(*e*) कौषीतक्युपनिषदारण्यकम्, सव्याख्यानम्.

KAUṢĪTAKYUPANIṢADĀRAṆYAKAM WITH COMMENTARY.

Foll. 176*a*—250*b*.

Same work as that described under R. No. 2511 ante.

कौषीतक्युपनिषद्श्शाङ्करानन्ददीपिका ।
आनीता रामभद्रेन्द्रयोगिना चोलदेशतः ॥

Foll. 251—254 contain the Taṭākapratiṣṭhāvidhi.

R. No. 3876.

Palm-leaf. 15¼ × 1⅜ inches. Foll. 52. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 51 is left blank.

आश्वलायनसूत्रवृत्तिः—अभ्युदयप्रदा.

ĀŚVALĀYANASŪTRAVṚTTIḤ : ABHYUDAYAPRADĀ.

Same work as that described under R. No. 3163(a) ante, wherein see for the beginning. By Ṣaḍguruśiṣya.

Contains the Adhyāyas 7—10 complete.

End :

उत्तरा होतुः प्रागित्येव प्रतीच्यध्वर्योर्दिगित्येव उदीच्युद्गातुर्दिगित्येव । ता एव होत्रन्ता अन्वायत्ताः अन्वायत्ताः . . . आपुरुषास्तत्तद्दिग्भाज इत्यर्थः ॥

इत्यश्वमेधो व्याख्यातस्सर्वपापप्रणाशनम् । द्विरुक्तिरुक्तार्थः ॥

Colophon :

इति षड्गुरुशिष्यविरचितायामाश्वलायनश्रौतसूत्रवृत्तौ अभ्युदयप्रदायां दशमोऽध्यायः ॥

Date of transcription—Friday, the 1st day of the solar month Vṛścika in the year Ānanda.

R. No. 3877.

Palm-leaf. 14½ × 1⅜ inches. Foll. 130. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(a) वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Foll. 1*a*—35*a*. Fol. 34*b* contains two stanzas of Mallinātha.

Same work as that described under R. No. 1466(*e*) ante.

Complete.

Fol. 35*b* contains one pithy stanza. Fol. 36 contains a small portion of the Vasantatilakabhāṇa. Foll. 37*a*—45*b* contain a portion of the Gauḍabrahmānandīya.

(*b*) वायुस्तोत्रम्.

VĀYUSTŌTRAM.

Foll. 46*a*—51*a*. Fol. 51*b* is left blank.

Same work as that described under No. 9830 of the D.C.S. MSS., Vol. XVIII.

Incomplete.

(*c*) शान्तिविलासः.

ŚĀNTIVILĀSAḤ.

Foll. 52*a*—55*b*.

Same work as that described under R. No. 1428(*d*) ante. By Nīlakaṇṭhadīkṣita.

Complete.

(*d*) कलिविडम्बनम्.

KALIVIḌAMBANAM.

Foll. 56*a*—59*b*.

Same work as that described under R. No. 1428(*a*) ante. By Nīlakaṇṭhadīkṣita.

Complete.

(*e*) सभारञ्जनम्.

SABHĀRAÑJANAM.

Foll. 60*a*—63*b*.

Same work as that described under R. No. 1428(*b*) ante. By Nīlakaṇṭhadīkṣita.

Complete.

(*f*) सूर्यशतकम्.

SŪRYAŚATAKAM.

Foll. 64*a*—73*a*.

Same text as that described under R. No. 139(*b*) ante. By Mayūrakavi.

Complete.

(*g*) सूर्यशतकव्याख्यानम्.

SŪRYAŚATAKAVYĀKHYANAM.

Foll. 72*b*—79*a*. Foll. 79*b*—80*b* are left blank.

Same commentary as that described under No. 11321 of the D.C.S. MSS., Vol. XIX.

Incomplete.

(*h*) वाक्यकरणम्.

VĀKYAKARAṆAM.

Foll. 81*a*—88*b*.

Same work as that described under No. 13495 of the D.C.S. MSS., Vol. XXIV.

Contains the Adhikāras one to five complete.

(*i*) तन्त्रसङ्ग्रहः.

TANTRASAṄGRAHAḤ.

Foll. 89*a*—101*b*.

Same work as that described under No. 13426 of the D.C.S. MSS., Vol. XXIV.

Breaks off in the third Adhyāya.

(*j*) वाक्यपञ्चाध्यायीव्याख्या.

VĀKYAPAÑCĀDHYĀYĪVYĀKHYĀ.

Foll. 102*a*—108*b*. Fol. 105*b* is left blank.

A commentary on the Vākyapañcādhyāyī, which work has been described under No. 13495 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning:

वाक्यपञ्चाध्याय्या व्याख्या क्रियते— कल्यब्द इति । कलेः गताब्दः कल्यब्दः न तु द्वात्रिंशत्सहस्राधिकचतुर्लक्षवर्षनिकरः । कलिगतसंवत्सर-

ज्ञानोपायत्वेन षष्टिद्वाविंशतिगुणितमित्याहुः । मातुलगुणः मातुलशब्देन कटपयादिभिः स्वरात्पूर्वैः ज्योतिश्शास्त्रप्रसिद्धैः स्थानात्स्थानं दशगुणं स्यादिति न्यायेन पञ्चषष्ट्यधिकशतत्रयसङ्ख्या लक्ष्यन्ते ।

End:

वर्तमानवर्षादेस्तुल्यकालादिनात् प्राग्गतसावनदिवसगणः ।

(*k*) वाक्यकरणदीपिका.

VĀKYAKARAṆADĪPIKĀ.

Foll. 109*a*—127*b*.

Same work as that described under No. 13497 of the D.C.S. MSS., Vol. XXIV. By Sundararāja.

Breaks off in the second Adhyāya.

Fol. 128 gives a portion of the Karaṇasūtra. Foll. 129 and 130 are left blank.

R. No. 3878.

Palm-leaf. 18 × 1½ inches. Foll. 167. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) न्यायसिद्धान्तमञ्जरीव्याख्या—दीपिका.

NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ: DĪPIKĀ.

Foll. 3*a*—147*a*. Foll. 1 and 2 are left blank. Fol. 147*b* contains the Murajabandha stanza.

Same work as that described under No. 4223 of the D.C.S. MSS., Vol. VIII. By Śrīkanṭhaśarma.

Contains the Anumāna portion complete.

(*b*) प्रामाण्यवादः.

PRĀMĀṆYAVĀDAḤ.

Foll. 148*a*—162*b*. Foll. 163*a*—166*a* contain the Vyāptiviṣayapatra. Foll. 166*b*—167*b* are left blank.

Same work as that described under R. No. 113(*b*) ante. By Harirāmatarkavāgīśa.

Incomplete.

R. No. **3879.**

Palm-leaf. 16 × 1⅜ inches. Foll. 146. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Annāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) दक्षिणामूर्त्यष्टकम्, मानसोल्लासवार्त्तिकसहितम्.

DAKṢIṆĀMŪRTYAṢṬAKAM WITH THE COMMENTARY MĀNASŌLLĀSA.

Foll. 1*a*—15*b*.

Same work as that described under No. 10996 of the D.C.S. MSS., Vol. XIX.

Wants the beginning; otherwise complete.

(*b*) तन्त्रदर्पणम्.

TANTRADARPAṆAM.

Foll. 16*a*—54*b*.

A treatise in Pūrvamīmāṁsā in accordance with the Kumārila school: by Aṇṇā Śāstrin, son of Rāmabudha of Prayāga family. The author was a member of the Bṛhaccaraṇa sub-caste named after the Kaṇḍaramāṇikya village and then lived in Peralam village.

Contains the first Pāda of the second Adhyāya complete and the second Pāda of the same Adhyāya incomplete.

Beginning:

हरिणाङ्ककलोज्वलोत्तमाङ्गं करुणापूरकरम्बितान्तरङ्गम् ।
नरदन्तिमयं वपुर्वहन्तं वरदं देवमुपास्महे भृशं तम् ॥
यत्सेवासमयप्रतीक्षणपरा ब्रह्मेन्द्रमुख्यास्सुरा
ध्येयो यश्च मुमुक्षुभिर्मुनिगणैः षड्भिर्मुखैरुज्ज्वलम् ।
श्रेयस्सन्ततिमातनोति सदयं यद्वीक्षणं प्राणिनां
वाग्गुम्भेषु स एष मे घटयतु प्रागल्भ्यमन्यादृशम् ॥
यदनुग्रहमात्रेण तन्त्रार्था विशदीकृताः ।
कलये यतिवर्यांस्तान् देशिकान् कांश्चिदद्भुतान् ॥
मध्ये कल्पितभावरत्नमहितो वज्रोपमैरुज्ज्वलं
न्यायैरद्भुतयुक्तिमौक्तिकगणैरावेष्टितं दर्पणम् ।
तन्त्रार्थस्फुटवीक्षणाय तनुते शब्दैस्सुवर्णात्मकैः
श्रीमद्रामबुधात्मजस्सविनयस्स श्रीमदण्णासुधीः ॥

षडाननकृपालब्धप्रगल्भमधुरोक्तिभिः ।
भेदलक्षणमारभ्य कलये तन्त्रदर्पणम् ॥

यं तन्त्रदर्पणमहं बहुयुक्तिसारान्निष्कृष्य सांप्रतमनेककृतिप्रकीर्णान् ।
मन्दः करोम्यहमथापि बुधैरुपेयः कीटैः कृतं मधुरिमाद्रियते न सद्भिः ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ।

अथातो धर्मजिज्ञासेति प्रथमसूत्रे श्रुत्यर्थाभ्यां धर्मतत्प्रमाणतत्स्वरूपतत्साधनतत्फलानां तत्तदाभासानां च जिज्ञास्यत्वं प्रतिज्ञातम् । तत्र प्रथमाध्याये विध्युद्देशार्थवादमन्त्रनामधेयस्मृत्याचाराणां सर्वेषां धर्मप्रमितिजनकत्वेन प्रामाण्यस्य निरूपितत्वात् ।

* * * *

Colophon:

इति श्रीप्रयागकुलकलशसिन्धुकौस्तुभस्य श्रीमत्कण्डरमाणिक्यग्रामरत्नाभिजनस्य पेरलग्रामवासिनः श्रीमदण्णाशास्त्रिणः कृतौ तन्त्रदर्पणे द्वितीयस्याध्यायस्य प्रथमः पादः ॥

End:

कर्मणोऽन्यतः प्राप्त्यभावेन गुणमात्रविधानायोगात् कर्मविधिनिश्चये तत्रैवेतरेषां वाक्यानां विशिष्टविधिगौरवभीत्या देवतामात्रविधित्वकल्पने दोषाभावात् । न चैवं समिद्वाक्यावि ।

Fol. 55 is left blank. Fol. 56 contains a portion of Sāmānyaniruktidīdhiti.

(c) सामान्यनिरुक्तिविवरणम्.
SĀMĀNYANIRUKTIVIVARAṆAM.

Foll. 57*a*—78*a*. Foll. 78*b* and 79 are left blank.

Similar to the work described under No. 4323 of the D.C.S. MSS., Vol. VIII.

Incomplete and wants the beginning.

Beginning:

यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं तदिहानतिरिक्तवृत्तित्वमिदानीं निवेश्यते, तदासम्भवः विशिष्टस्यानतिरिक्ततया वह्न्यभावविशिष्टह्रदादिरूप-

दोषविषयकत्वस्य शुद्धहृदत्वाद्यवच्छिन्नविषयकज्ञानेऽपि सत्त्वेनानुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वादतः स्वरूपसम्बन्धरूपमेव वाच्यम् ।

End:

ह्रदत्वादिविशिष्टविषयान्तर्गतायां ह्रद इत्यादिविषयितायामुभयाभावप्रयोजकत्वसत्त्वादतिव्याप्तेरनवकाशादिति वाच्यम् ।

(*d*) ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: BHĀṢYARATNAPRABHĀ.

Foll. 80*a*—103*b*.

Same work as that described under No. 4679 of the D.C.S. MSS., Vol. IX. By Gōvindānanda.

Contains the first Pāda of the first Adhyāya incomplete and wants the beginning.

Fol. 104*a* gives the name of the Padārthadīpikāvyākhyā. Fol. 104*b* is left blank.

(*e*) पदार्थदीपिकाव्याख्या.

PADĀRTHADĪPIKĀVYĀKHYĀ.

Foll. 105*a*—140*b*.

A commentary on the Padārthadīpikā, which work has been described under R. No. 74 ante under the name Koṇḍubhaṭṭīya.

Breaks off in the Śabdakhaṇḍa.

Beginning:

विश्वाधिकं विमलचिन्मयमिन्दुचूडं प्रालेयशैलतनयादृतवामभागम् ।
तापिञ्छगुच्छमसृणच्छविकण्ठमूलं देवं नमामि शमितत्रिपुरं गिरीशम् ॥
प्रसादेन गिरीशस्य गुरूणामप्यनुग्रहात् ।
पदार्थदीपिकाव्याख्यां रचयामि यथामति ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये कृतं स्वेष्टदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—श्रीमदिति । सितासितमुपास्महइत्यन्वयः । सितासितपदेन हरिहरात्मकं वस्तु प्रतिपाद्यते ।

स्वग्रन्थे प्रेक्षावत्प्रवृत्तये विषयप्रयोजने निर्दिशन् चिकीर्षितं प्रतिजानीते—

इहेति । इह जगति खलु वाक्यालङ्कारे चतुर्थपुरुषार्थो मोक्षः । आमनन्तीति तरति शोकमात्मविदित्याद्याः श्रुतय इति शेषः । शोकतरणं मोक्षः ॥

* * * *

Colophon :

इति प्रत्यक्षपरिच्छेदः ॥

End :

अनुमितित्वाव्याप्यत्वमेवेति । साक्षात्कारत्वव्याप्यचाक्षुषत्वादिवदित्यर्थः ॥

Colophon :

उपमानपरिच्छेदः ॥

शब्दकारणतां दर्शयति—तथाहीति । प्रयोज्यप्रयोजकवाक्यमिति । अत्र प्रयोज्यपदं सम्पातायातम् । प्रयोज्येन वाक्यस्याप्रयुज्यमानत्वात् ।

* * * *

अत उक्तं विरुद्धविभक्तिरहितेति । एतदाकाङ्क्षाज्ञानकरणत्वे युक्तिमाह—घटपटमिति । अन्यथेति.

(*f*) कृष्णविलासोदाहरणम्.

KṚṢṆAVILĀSŌDĀHARAṆAM.

Foll. 142*a*—145*b*. Foll. 141 and 146 are left blank.

A short treatise in verse dealing with the sportive deeds and incidents which took place during the boyhood of Lord Kṛṣṇa: by Gurusvayambhūrāma.

Complete.

Beginning :

श्रीकान्तैकान्तलीलासखसहजदयालोक लोकैकनाथ
प्रह्लादव्यासरुक्माङ्गदमुखवरदाम्नायगेयोरुकीर्ते ।
. . . व श्रीवेङ्कटा . . . . विभवनिधे वासुदेवावतार-
त्वद्बालक्रीडनोदाहरण इह सकृद् देहि चित्तावधानम् ॥

व्रजपरिसरे नन्दानन्दाय चङ्क्रममाचरन्
गहनशिथिलां कर्षन् कर्षन् नवाम्बरपट्टिकाम् ।
विहरति हरिर्बालो व्यालोलकाञ्चनकिङ्किणी-
निकरमुखरस्मेरोदारो ममाशयमन्दिरे ॥

End :

रचितं गुरुस्स्वयम्भूरामेणाचन्द्रतारकं जीयात् ।
बहुविधकृष्णविलासप्रथमोदाहरणमिदमुदाहरणम् ॥

* * * *

भक्त्या पठति यश्शौरेरुदाहरणमन्वहम् ।
आयुरारोग्यमैश्वर्यं सन्तानं चायमाप्नुयात् ॥

R. No. **3880.**

Palm-leaf. 17 × 1¾ inches. Foll. 136. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) **महाभाष्यम्.**

MAHĀBHĀṢYAM.

Foll. 1*a*–84*a*. Fol. 84*b* is left blank.

Same work as that described under No. 1293 of the D.C.S. MSS., Vol. III.

Contains the third Adhyāya complete and a small portion of the first Sūtra of the first Pāda in the fourth Adhyāya.

(*b*) **सिद्धान्तकौमुदीव्याख्या—सुखबोधिनी.**

SIDDHĀNTAKAUMUDĪVYĀKHYĀ : SUKHABŌDHINĪ.

Foll. 85*a*–134*b*. Foll. 120*b*, 135 and 136 are left blank.

Same work as that described under R. Nos. 33 and 153 ante. By Nīlakaṇṭhavājapēyin, son of Varadēśvarayajvan and grandson of Rāmacandrādhvarin of Atrēyagōtra.

Contains the Halsandhiprakaraṇa (wants the beginning) to the Halantastrīliṅgaprakaraṇa complete and the Halantanapuṁsakaliṅgaprakaraṇa incomplete.

R. No. **3881.**

Palm-leaf. 18 × 1⅜ inches. Foll. 201. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Foll. 1*a*—3*a* contain a portion of the second Pāda of the first Adhyāya in the Śāstradīpikā. Fol. 3*b* is left blank.

(*a*) तत्त्वचिन्तामणिव्याख्या—न्यायचूडामणिः.

TATTVACINTĀMAṆIVYĀKHYĀ: NYĀYACŪḌĀMAṆIḤ.

Foll. 4*a*—83*b*.

Same work as that described under No. 4201 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning. By Rāmakṛṣṇādhvarin, son of Dharmarājādhvarin. This is also called Nyāyaśikhāmaṇi.

Contains from the beginning of the Prāmāṇyavāda up to the end of the Anyathākhyātivāda.

End:

विशिष्टज्ञाने प्रतियोगित्वं समूहालम्बने चानुयोगित्वं भासत इति चेद्धन्तैवं रजतत्ववैशिष्ट्यानुयोगित्वं यद्रजते प्रसिद्धं तद्दोषवशाच्छुक्तौ भासत इति कासङ्गाव . . . . . इति सङ्क्षेपः ।

Colophon:

इति श्रीधर्मराजाध्वरीन्द्रसुतश्रीरामकृष्णाध्वरिविरचितन्यायशिखामणौ ग्रन्थशिखामणौ अन्यथाख्यातिवादस्सम्पूर्णः.

Foll. 84 and 85*b*—86*b* are left blank. Fol. 85*a* gives the name of the Nyāyāmṛtavyākhyā.

(*b*) न्यायामृतव्याख्यानम्—लक्ष्मीनाथीयम्.

NYĀYĀMṚTAVYĀKHYĀNAM: LAKṢMĪNĀTHĪYAM.

Foll. 87*a*—200*b*. Foll. 201 is left blank.

Same work as that described under R. No. 1302 ante. By Lakṣmīnātha.

Contains the first Paricchēda incomplete.

R. No. 3882.

Palm-leaf. 15 × 1¼ inches. Foll. 292. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* gives the contents of all the works in this MS. Fol. 1*b* is left blank.

(*a*) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 2*a*—8*a*.

Same work as that described under No. 310 of the D.C.S. MSS., Vol. I, Part III. By Śaṅkarācārya.

Complete.

(*b*) केनोपनिषद्भाष्यम्.

KĒNŌPANIṢADBHĀṢYAM.

Fol. 8.

Same work as that described under No. 387 of the D.C.S. MSS., Vol. I, Part III. By Śaṅkarācārya.

Contains a small portion only.

(*c*) कठोपनिषद्भाष्यम्.

KAṬHŌPANIṢADBHĀṢYAM.

Foll. 9*a*—33*b*. Foll. 34*a*—41*b* are left blank.

Same work as that described under No. 342 of the D.C.S. MSS., Vol. I, Part III. By Śaṅkarācārya.

Complete.

Foll. 42—45 contain a small portion of the Aitarēyōpaniṣadbhāṣya.

Foll. 46—49 are left blank.

(*d*) गौडपादीयविवेकः.

GAUḌAPĀDĪYAVIVĒKAḤ.

Foll. 50*a*—90*a*. Foll. 75 and 90*b* are left blank.

A commentary on the Kārikās of Gauḍapāda, which are divided into four Prakaraṇas, i.e., Āgama, Vaitathya, Advaita and Alātaśānti.

Almost complete.

Beginning:

सच्चिदानन्दमात्मानमाचार्यांश्च गुरूनपि ।
प्रणम्य गौडपादीयं यथाभाष्यं विविच्यते ॥

शारीरकमीमांसाशास्त्रस्यातिविस्तृतत्वेन बहुविधन्यायोपेतत्वेन मुमुक्षूणां मन्दबुद्धीनां दुष्प्रवेशत्वेन तदनुग्रहणाय परमकारुणिको गौडपादाचार्यो वेदान्तार्थसारसङ्ग्रहमिदं प्रकरणचतुष्टयं बहिःप्रज्ञो विभुर्विश्व इत्याद्यारभते । अस्य प्रकरणस्य वेदान्तार्थप्रतिपादकत्वेन वेदान्तानां यानि सम्बन्धाभिधेय-

प्रयोजनानि, तान्येवास्यापीति । न पृथग्वक्तव्यानि । बन्धनिवृत्तिरपवर्ग इति न प्रयोजनम् । तस्य विद्याफलत्वान्न वेदान्तफलत्वमिति शङ्कनीयम् । विद्याया वेदान्तमूलत्वेन तत्फलत्वोपपत्तेरिति द्रष्टव्यम् । तत्र प्रथमप्रकरणस्य माण्डूक्योपनिषद्व्याख्यानरूपत्वात् श्रुत्यर्थापरिज्ञानेन तदर्थोऽपि स्फुटं निश्चेतुमशक्य इति श्रुत्यर्थोऽपि साक्षेपतः प्रदर्श्यते— ओमित्येतदक्षरमिदं सर्वमिति । यदिदमर्थजातं तत् सर्वमोङ्कार एवाभिधानव्यतिरेकेणाभिधेयस्वरूपानिरूपणात् । तथा च श्रुतिः—वाचारम्भणं विकारो नामधेयमिति ।

* * * *

Colophon:

इति गौडपादीयविवेके प्रथमं प्रथमं(करणं) समाप्तम् ॥

End:

(दुर्दर्शमतिगम्भीरमजं साम्यं विशा)रदम् ।
बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलम् ॥

वेदान्तदृष्टिरहितैर्द्रष्टुमशक्यं दुर्दर्शम् अत एवाति . . . . अनानात्वं नानात्वेन भेदेन वर्जितं पद्यते प्राप्यते ज्ञानि पद्य तद्भूतास्सन्तो नमस्कुर्मः । निरन्तरं तन्निष्ठा . . . . भवति ध्रुवम् । श्रेयान् परमभीप्सू . . . . . मार्गप्रदर्शनम् ॥

Colophon:

इति गौडपादीयविवेके चतुर्थप्रकरणं.

(*e*) ईशावास्योपनिषद्भाष्यटिप्पणम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 91*a*—97*b*.

Same work as that described under No. 312 of the D.C.S. MSS., Vol. I, Part III. By Śivānandayatī.

Complete.

(*f*) तलवकारोपनिषद्भाष्यटिप्पणम्.

TALAVAKĀRŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 98*a*—121*a*.

Same work as that described under No. 389 of the D.C.S. MSS., Vol. I, Part III. By Śivānandayati.

Complete.

(*g*) कठोपनिषद्भाष्यटिप्पणम्.

KAṬHŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 121*b*—131*b*.

Same work as that described under No. 345 of the D.C.S. MSS., Vol. I, Part III. By Śivānandayati.

Complete.

(*h*) मुण्डकोपनिषद्भाष्यटिप्पणम्.

MUṆḌAKŌPANIṢDBHĀṢYAṬIPPAṆAM.

Foll. 132*a*—140*b*.

Same work as that described under No. 722 of the D.C.S. MSS., Vol. I, Part III. By Śivānandayati.

Wants one stanza in the beginning; otherwise complete.

The scribe adds :—

विदानन्दैरिदं काश्यां लिखित्वा प्रेषितं मुदा ।
चोलदेशस्थभिक्षूणामुपकाराय केवलम् ॥

(*i*) बृहदारण्यकोपनिषद्भाष्यटिप्पणम्.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 141*a*—290*b*. Foll. 291 and 292 are left blank.

A gloss on Śaṅkarācārya's Bṛhadāraṇyakōpaniṣadbhāṣya, which work has been described under No. 644 of the D.C.S. MSS., Vol. I, Part III. By Śivānandayati.

Complete.

Beginning:

परवागन्तनिगद्यभूमभूमा प्रथमोद्भूतहृदब्जसाक्षिसाक्षी ।
प्रथितालङ्कृतिमण्डलान्तरस्थः परिवेषान्तरभानुमानिवास्ते ॥

विसृजति शमयेद्यो वीक्षणाद्विश्वविश्वं
फलयति जनकर्माण्यण्डदेहान्तदेहैः ।
तुलयति जडधीः स्याद्यं विरिञ्चादिभिस्तं ?
कलयति मम चेतः कामहन्तारमन्तः ॥

* * * *

शास्ता सर्वचराचरस्य तिमिरात् गोप्ता विधाता च यो
वेदान्तेषु विभाव्यते सकलधीसाक्षी समाराध्यताम् ।
काण्वाम्नायशिरोऽर्थभाषणमिषात् सर्वागमार्थाभिधं
भाष्यं भाष्यकृतोऽधिवर्णयति सल्लोकोक्तिमट्टिप्पणात् ॥

नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः,

* * * *

ग्रन्थतोऽर्थतश्च बृहत्त्वाद्बृहदारण्यकनामधेयोपनिषदमुररीकृत्य शिष्टाचारानुमितागममूलविघ्नध्वस्तिसमाप्त्यादिप्रयोजनशास्त्रप्रतिपाद्यप्रत्यगभिन्नमूर्तित्रयोप - लक्षितपरमानन्दपरदेवतागुर्वादिप्रणामलक्षणं मङ्गलाचरणं नमो ब्रह्मादिभ्य इत्याद्युदाहृतवाक्येन चरित्वा उषा वा अश्वस्येत्येवमाद्या वाजसनेयिब्राह्मणोपनिषत्तस्या इयमल्पग्रन्था वृत्तिरारभ्यत इत्यादिना तद्विवरणं चकार । तच्च भाष्यकारप्रणीतत्वात् स्वपदवर्णनभाष्यैकदेशलक्षणवत्त्वादात्मेत्येवोपासीतेत्यादिविद्वत्परिषत्प्रसिद्धसूत्रव्याख्यानत्वाद्वा भाष्यमिदमापाततः प्रसन्नपदपदार्थवाक्यवाक्यार्थमपि प्रायेणातिगम्भीरागाधभावार्थत्वादल्पमतीनामनवगाह्यतात्पर्यमतोऽस्य ।

उत्प्लुत्योत्प्लुत्य या व्याख्या टिप्पणं साभिधीयते ।
इति वृद्धोक्तलक्ष्मैतत् टिप्पणं क्रियते मया ॥

तत्रापि संसारनि(वि)वृत्सुभ्यः संसारहेतुनिवृत्तिसाधनविद्याप्रतिपत्तये सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या ।

* * * *

Colophon :

बृहदारण्यभाष्यटिप्पणे प्रथमोऽध्यायः ॥

End :

सान्निध्यात्खिलकाण्डस्य वंशोऽयमिति शङ्कां निवर्तयन् वंशब्राह्मणतात्पर्यमाह—अथेदानीमिति । कीर्त्यते ब्राह्मणेनेति सम्बन्धः । शुक्लानि यजूंषीत्यस्य व्याख्या अव्यामिश्राणि दोषैरसङ्कीर्णानि पौरुषेयत्वाभावादित्यर्थः । अयातयामानीति । अदृष्टानीत्यर्थः । एवं क्रमेण मनुष्यादिः प्रजापत्यन्तो वंशो व्याख्यातः । इदानीमर्थक्रमेण प्राजापत्यादिर्वंश इत्याह—प्रजापतिमिति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छिवानन्दकृते बृहदारण्यकभाष्य-टिप्पणे षष्ठोऽध्यायः ।

भगवत्पादभाष्यस्य भावगाम्भीर्यवेदिना ।
शिवानन्दयतीशेन टिप्पणं कृतमादरात् ॥

R. No. 3883.

Palm-leaf. $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 252. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) मीमांसानयविवेकदीपिका.

MĪMĀṀSĀNAYAVIVĒKADĪPIKĀ.

Foll. 1*a*—78*b* and 114*a*—252*b*.

Same work as that described under R. No. 1552 ante, wherein see for the beginning. By Varadarāja, son of Raṅganātha and disciple of Sudarśanācārya of Ātrēyagōtra.

Contains the fourth Adhyāya (wants the beginning) and from the third Pāda of the sixth Adhyāya to the end of the eighth Adhyāya.

End:

न चैवमिति । तत्र हेतुसामान्येतियावत्सम्भवं सामान्योपदिष्टे स्मृत्याचारप्राप्तिरेव धर्मैश्श्रुत्योपकारसिद्धिकल्पनायाः कार्यत्वसिद्धेः कार्यत्वनिर्वाहादित्यर्थः ॥

विशेषातिदेशे कृता दीपिकेत्थं यथासम्प्रदायं मयाभीष्टदेन ।
गुरोश्चक्रसूरेः पदद्वन्द्वसेवानिरस्ताखिलान्तस्तमस्सञ्चयेन ॥

Colophon:

इति श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायामष्टमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

Foll. 78*b*—113*b* contain the second and third Pādas of the sixth Adhyāya in the Mīmāṁsānayavivēka.

(*b*) तन्त्ररत्नम्.

TANTRARATNAM.

Foll. 253*a*—352*b*.

Same work as that described under R. No. 2713 ante. By Pārthasārathimiśra.

Contains from the first Pāda of the sixth Adhyāya (wants the beginning) to the end of the fourth Pāda of the same Adhyāya (wants the end).

R. No. 3884.

Palm-leaf. $16\frac{5}{8} \times 1$ inches. Foll. 246. Lines, 5 in a page. Grantha. Very much injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

सिद्धान्तसारावलिः, सव्याख्या.

SIDDHĀNTASĀRĀVALIḤ WITH COMMENTARY.

Same work as that described under No. 5554 of the D.C.S. MSS., Vol. XI. The text is by Trilōcanācārya and the commentary by Anantaśivācārya.

Wants the beginning and breaks off in the 119th stanza.

R. No. 3885.

Palm-leaf. $16 \times 1\frac{1}{4}$ inches. Foll. 239. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(*a*) पातञ्जलसूत्रम्, योगमणिप्रभाव्याख्यासहितम्.

PĀTAÑJALASŪTRAM WITH THE COMMENTARY YŌGA-MAṆIPRABHĀ.

Foll. 5*a*—55*b*. Foll. 1*a*, 2*a* and 4*a* contain the names of Citrapaṭa, etc. Fol. 1*b*, 2*b*, 3 and 4*b* are left blank.

Same work as that described under R. No. 2627 ante wherein see for the beginning. By Rāmānandasarasvatī, disciple of Gōvindānanda.

Complete.

End:

तदिदं पुरुषस्य नित्यशुद्धासङ्गस्वप्रकाशस्य कैवल्यमतिरमणीयम् ।
सौत्र इतिशब्दश्शास्त्रपरिसमाप्तिद्योतनार्थः ॥

यद्वाचि प्रवणप्रवर्तिदहनस्सद्योऽन्तरायाटवीं
दग्ध्वा स्वात्मनि बोधदीपमचलं सूते तमःपाटनम् ।

यत्र न्यस्तसमस्तकर्म जनयेद्योगं तदङ्गं विना
वन्दे सिद्धिभुवं तमीशमनिशं कैवल्यदं राघवम् ॥
यत्प्रसादलवस्सूते मोक्षाद्यास्सर्वसम्पदः ।
उमाधवं महेशानं तं काशीनिलयं भजे ॥
फणीन्द्रसूत्रसम्बद्धा व्यासवाङ्मणिभूषिता ।
मद्वाङ्मौक्तिकमालासक्तु(?) सदा श्रीरामपादयोः ॥
काहं प्रमादनिरतः क्व वात्सल्यं गुरोरिदम् ।
नूनं महात्मनां दीने स्वतश्चित्तं कृपान्वितम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्पूज्यपादशिष्य-श्रीरामानन्दसरस्वतीकृतौ साङ्ख्यप्रवचने योगमणिप्रभायां कैवल्यपादश्चतुर्थ-स्समाप्तः ॥

(*b*) विक्रमोर्वशीयम्.

VIKRAMŌRVAŚĪYAM.

Foll. 57*a*—81*b*. Fol. 56 is left blank.

Same work as that described under No. 12665 of the D.C.S. MSS., Vol. XXI.

Complete.

(*c*) अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 82*a*—123*a*.

Same work as that described under No. 12465 of the D.C.S. MSS., Vol. XXI.

Complete.

(*d*) मालविकाग्निमित्रीयम्.

MĀLAVIKĀGNIMITRĪYAM.

Foll. 123*a*—140*b*.

Same work as that described under No. 12605 of the D.C.S. MSS., Vol. XXI.

Breaks off in the fourth Act.

(*e*) कुवलयानन्दः.

KUVALAYĀNANDAḤ.

Foll. 141*a*—152*a*. Fol. 152*b* contains the Śivastōtra.

Same work as that described under No. 12846 of the D.C.S. MSS., Vol. XXII. By Appayadīkṣita.

Wants the beginning; otherwise complete.

(*f*) प्रबोधचन्द्रोदयम्.

PRABŌDHACANDRŌDAYAM.

Foll. 153*a*—194*b*.

Same work as that described under R. No. 1108 ante. By Kṛṣṇamiśra.

Complete.

(*g*) रत्नेश्वरप्रसादनम्.

RATNĒŚVARAPRASĀDANAM.

Foll. 195*a*—239*a*. Fol. 239*b* contains the Śivastōtra.

Same work as that described under No. 12632 of the D.C.S. MSS., Vol. XXI. By Gururāma.

Complete.

R. No. **3886.**

Palm-leaf. $14\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 197. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) तन्त्रदर्पणम्.

TANTRADARPAṆAM.

Foll. 2*a*—20*a*. Fol. 1*a* contains some anthological stanzas. Fol. 1*b* is left blank.

Same work as that described under R. No. 3879(*b*) ante. By Aṇṇā Śāstrin.

Contains a small portion in the second Pāda of the second Adhyāya (Paurṇamāsyādhikaraṇa).

(*b*) न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ.

Foll. 22*a*—43*b*. Foll. 20*b* and 21 are left blank.

Same work as that described under No. 4215 of the D.C.S. MSS., Vol. VIII. By Jānakīnātha alias Cūḍāmaṇibhaṭṭācārya.

Breaks off in the Śabdakhaṇḍa.

Fol. 44 contains a few stanzas of the Śiśupālavadha. Fol. 45*a* gives the name of the work Śāstradīpikā. Foll. 45*b*—48*b* are left blank.

(*c*) शास्त्रदीपिका.

ŚĀSTRADĪPIKĀ.

Foll. 49*a*—151*b*.

Same work as that described under No. 4478 of the D.C.S. MSS. Vol. IX, wherein see for the end. By Pārthasārathimiśra.

Contains the first Pāda of the first Adhyāya only.

Beginning:

लक्ष्मीकौस्तुभवक्षसं मुररिपुं शङ्खासिकौमोदकी-
हस्तं पद्मपलाशपत्रनयनं पीताम्बरं शार्ङ्गिणम् ।
मेघश्याममुदारपीवरचतुर्बाहुं प्रधानं परं
श्रीवत्साङ्कमनाथनाथममृतं वन्दे मुकुन्दं सदा ॥
शबरस्वामिनं नत्वा भट्टाचार्यं च जैमिनिम् ।
कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम् ॥

अथातो धर्मजिज्ञासा । अनेन सूत्रेण प्रारिप्सितस्य शास्त्रस्य श्रोतृप्रवृत्तिसिद्धये धर्मज्ञानं प्रयोजनतया कथ्यते। यदा हि धर्मजिज्ञासा कर्तव्येत्युक्त्या शास्त्रमारभ्यमाणं दृश्यते तदा नूनमिदं शास्त्रं साक्षाद्धर्मप्रतिपादनप्रयोजनमित्यवगम्यते । विदितं तावत्प्रयोजनं सम्बन्धोऽपि शास्त्रस्य प्रस्तावहेतुर्वक्तव्यः । यथा शास्त्रान्तरेषु अथातो धर्मं व्याख्यास्याम इत्यादिषु ।

Foll. 137 and 152 are left blank.

(*d*) मुक्तावलीव्याख्यानम्—दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM: DINAKARABHAṬṬĪYAM.

Foll. 153*a*—195*b*. Foll. 157*b* and 196*a*—197*b* are left blank.

Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII. By Mahādēva.

Wants the beginning in the Pratyakṣakhaṇḍa and the end in the Anumānakhaṇḍa.

Same work as that described under No. 913 of the D.C.S. MSS., Vol. II.

Complete.

(*f*) विलङ्घ्यम्, सव्याख्यानम्.

VILAṄGHYAM: WITH COMMENTARY.

Foll. 75*b*—77*a*.

Same work as that described under No. 965 of the D.C.S. MSS., Vol. II. By Nārāyaṇa.

Incomplete.

(*g*) नपरतपरम्, सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Foll. 77*a*—78*a*.

Same work as that described under No. 918 of the D.C.S. MSS., Vol. II. By Śaurisūri.

Complete.

(*h*) अवर्णी.

AVARṆĪ.

Foll. 78*a*—79*b*.

Same work as that described under No. 858 of the D.C.S. MSS., Vol. II.

Complete.

(*i*) आवर्णी.

ĀVARṆĪ.

Foll. 79*b*—80*a*.

Same work as that described under No. 868 of the D.C.S. MSS., Vol. II.

Complete.

(*j*) अनिङ्ग्यम्.

ANIṄGYAM.

Foll. 80*a*—83*a*.

Same work as that described under No. 853 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 83 contains a portion of Pūrvōttarōbhayadīrghī. Foll. 83*b* and 84*a* contain the Īkārāntas. Fol. 84*a* contains the Yōhilakṣaṇa and Trikrama. Foll. 84*a*—85*a* contain the Kuṁbhakarṇabhēṭ.

(*k*) षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRAM.

Foll. 85*a*—88*b*.

Same work as that described under No. 991 of the D.C.S. MSS., Vol. II.

Complete.

Foll. 88*b* and 89*a* contain the Śamāna portion.

(*l*) सिद्धान्तशिक्षा, सव्याख्या.

SIDDHĀNTAŚIKṢĀ WITH COMMENTARY.

Foll. 89*a*—106*b*.

Same work as that described under No. 1012 of the D.C.S. MSS., Vol. II. By Śrīnivāsādhvarīndra.

Complete.

(*m*) जटामणिः, सव्याख्या.

JAṬĀMAṆIḤ WITH COMMENTARY.

Foll. 107*a*—113*b*.

Same work as that described under No. 908 of the D.C.S. MSS., Vol. II, wherein see for the beginning. This work is followed by a commentary called Jaṭāsiddhāntacandrikā. By Lakṣmaṇa.

Complete.

End :

तत्र हेतुः श्रपयानिति दर्शनादिति । अन्यथा श्रपयानिति निषेधग्रहणं व्यर्थमेव स्यादित्यभिप्रायः । जटाध्ययने फलमाह—

य इच्छति जटां वक्तुं स विप्रो वेदपारगः ।
तस्य कीर्तिर्विवर्धेत स वे(द)फलमश्नुते ॥
संहितां च पदं वापि क्रमं चैव जटां पठन् ।
लक्षणज्ञस्तदाप्नोति ब्रह्मलोकं च शाश्वतम् ॥
ध्यात्वा सर्वजगन्नाथं साम्बं सर्वार्थसाधकम् ।
रचिता लक्ष्मणाख्येन जटासिद्धान्तचन्द्रिका ॥

प्रातिशाख्यादिशास्त्रज्ञस्सर्वशिक्षाविशारदः ।
बुद्धिशक्तिसमेतो यस्स जटां वक्तुमर्हति ॥

(*n*) जटावलिः.

JAṬĀVALIḤ.

Foll. 113*b*—115*b*.

Same work as that described under No. 909 of the D.C.S. MSS., Vol. II.

Complete, but wants two stanzas in the beginning.

(*o*) स्वरपञ्चाशत्, सव्याख्यानम्.

SVARAPAÑCĀŚAT WITH COMMENTARY.

Foll. 115*b*—135*b*.

Same work as that described under No. 1018 of the D.C.S. MSS., Vol. II.

Complete.

(*p*) सर्वसम्मतशिक्षा—सव्याख्या.

SARVASAMMATAŚIKṢĀ WITH COMMENTARY.

Foll. 135*b*—150*a*.

Same text and commentary as those described under No. 998 of the D.C.S. MSS., Vol. II. The text is by Kēśavārya, son of Sūridēva and the commentary by Āmūr Mañcibhaṭṭa.

Complete.

(*q*) शमानम्, पददर्पणव्याख्यासहितम्.

ŚAMĀNAM WITH THE COMMENTARY PADADARPAṆA.

Foll. 150*b*—164*b*. Fol. 165 is left blank.

Same work as that described under No. 981 of the D.C.S. MSS., Vol. II. By Mallayārya.

Incomplete.

R. No. 3888.

Palm-leaf. $17\frac{3}{4} \times 1\frac{3}{4}$ inches. Foll. 196. Lines, 11 in a page. Telugu. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(a) अद्वैतसिद्धिः.

ADVAITASIDDHIḤ.

Foll. 2a—97a. Foll. 1 and 97b are left blank.

Same work as that described under No. 4527 of the D.C.S. MSS., Vol. IX. By Madhusūdanasarasvatī, disciple of Viśvēśvarasarasvatī.

Breaks off in the second Paricchēda.

(b) अद्वैतसिद्धिव्याख्या— गुरुचन्द्रिका.

ADVAITASIDDHIVYĀKHYĀ: GURUCANDRIKĀ.

Foll. 100a—196a. Fol. 196b is left blank.

Same work as that described under R. No. 1614 ante. By Brahmānandasarasvatī, disciple of Paramānandasarasvatī.

Contains the first Paricchēda incomplete.

R. No. 3889.

Palm-leaf. 16¾ × 1¼ inches. Foll. 128. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921-22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 128 is left blank.

परिभाषार्थसङ्ग्रहव्याख्या —चन्द्रिका.

PARIBHĀṢĀRTHASAṄGRAHAVYĀKHYĀ: CANDRIKĀ.

Same work as that described under No. 1478 of the D.C.S. MSS., Vol. III. By Svayaṁprakāśayati.

Incomplete.

R. No. 3890.

Śrītāla. 19 × 2 inches. Foll. 262. Lines, 12 in a page. Telugu and Grantha. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

(a) सिद्धान्तकौमुदीव्याख्या—सुखबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: SUKHABŌDHINĪ.

Foll. 3a—216b. Foll. 1, 2, 135 and 217a—218b are left blank.

Same commentary as that described under R. No. 153 ante. By Nīlakaṇṭhavājapēyin, son of Varadēśvara, who learnt the Tantras from the son of Appayadīkṣita.

Contains up to the end of Prāgghitīya in the Taddhitaprakaraṇa.

Beginning:

विश्वेश्वरं विशालाक्षीं गणेशं षण्मुखं गुरुम् ।
मुनित्रयं नन्दिकेशं भारतीं नौमि सिद्धये ॥
पदवाक्यप्रमाणानां परा(पार)गं विबुधोत्तमम् ।
रामचन्द्रमहेन्द्राख्यपितामहमहं भजे ॥
आत्रेयाब्धिकलानिधिः कविबुधालङ्कारचूडामणिः
तातः श्रीवरदेश्वरो मखिवरो योऽयष्ट देवान् मखैः ।
अध्यैष्टाप्पयदीक्षितार्यतनयात्तन्त्राणि काश्यां पुनः
षड्वर्गाण्यपि यो व्यजेष्ट शिवतां यः प्राप नस्सोऽवतात् ॥
श्रीवाजपेयिना नीलकण्ठेन विदुषां मुदे ।
सिद्धान्तकौमुदीव्याख्या क्रियते सुखबोधिनी ॥
अस्मद्गुरुकृतां व्याख्यां बह्वर्थां तत्त्वबोधिनीम् ।
विभाव्य तत्रानुक्तं च व्याख्यास्येऽहं यथामति ॥
महायासेन यल्लभ्यं तदनायासतो बुधाः ।
गृह्णन्तु सुखबोधिन्या पाण्डित्याय विमत्सराः ॥
तन्त्रे पाणिनिकर्तृके दृढतरं सत्सम्प्रदायाच्चिरं
भक्त्याधीत्य निबन्धजातमखिलं शेषीयभाष्यं पुनः ।
टीकाभिः परिभाव्य सारमखिलं ये जानते पण्डिताः
तेष्वेकोऽपि विलोकयेन्मम कृतिं धन्यो मदीयः श्रमः ॥

प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तये मङ्गलादीनि च शास्त्राणि प्रथन्ते

* * * *

ज्ञापयन् चिकीर्षितं प्रतिजानीते— मुनित्रयमित्यादिना ।

End:

सोदरोऽपि विमुश्चति, यत्र भ्राता सहोदर इत्यादिषु तु सह समानमुदरं यस्येति वोपसर्जनस्येति सभावः । इति प्राग्दिवतीया इति । लौकिकप्रत्यया इति शेषः । तेन भवे छन्दसीत्यादिना सङ्ग्रहेऽपि न क्षतिरिति सर्वं शिवम् ॥

Colophon :

इति श्रीनीलकण्ठवाजपेययाजिना विरचितायां सिद्धान्तकौमुदी-व्याख्यायां सुखबोधिन्यां प्राग्घितीयास्समाप्ताः ॥

समाप्ताश्चा(तुर)र्थिकाः ॥

(*b*) प्रक्रियासर्वस्वम्.

PRAKRIYĀSARVASVAM.

Foll. 219*a*—259*b*. Foll. 260—262 are left blank.

Same work as that described under R. Nos. 3024 and 3091 ante, wherein see for the end. By Nārāyaṇa, son of Mātṛdatta.

It is stated that the author wrote this work at the instance of king Dēvanārāyaṇa.

Breaks off in the Taddhitakhaṇḍa.

Beginning :

रासविलासविलोलं स्मरतु मुरारेर्मनोरमं रूपम् ।
प्रकृतिषु यत् प्रत्ययवत् प्रत्येकं गोपिकासु सममिलितम् ॥
तिष्ठत्येवानिलोऽपि प्रचरति गिरिरप्याज्ञया यस्य राज्ये
शत्रोस्सर्वाभिसारे सति रचयति यस्तस्य सर्वापहारम् ।
सोऽयं निश्शेषशास्त्रश्रुतिनिवहकलानाठकेष्वद्वितीयो
भाति श्रीदेवनारायणधरणिपतिर्मग्नचेता मुकुन्दे ॥

* * * *

सोऽथ कदाचन राजा स्वगुणैराकृष्य सन्निधिं नित्यम् ।
श्रीमातृदत्तसूनुं नारायणसंज्ञमशिषदवनिसुरम् ॥
वृत्तौ चारु न रूपसिद्धिकथना रूपावतारे पुनः
कौमुद्यादिषु चात्र सूत्रमखिलं नास्त्येव तस्मात्त्वया ।
रूपानीतिसमस्तसूत्रसहितं स्पष्टं मितं प्रक्रिया-
सर्वस्वाभिहितं निबन्धनमिदं कार्यं मदुक्ताध्वना ॥
इह संज्ञा परिभाषा सन्धिः कृत्तद्धितास्समासाश्च ।
स्त्रीप्रत्ययस्सुबर्थास्सुपां विधिश्चात्मनेपदविभागाः ॥
तिङपि च लार्थविशेषास्सनन्तयङ्यङ्लुकश्च सुब्धातुः ।
न्यायो धातुरुणादिच्छान्दसमिति सन्तु विंशतिः खण्डाः ॥

* * * *

अयमच्युतगुरुकृपया पाणिनिकात्यायनादिकारुण्यात् ।
यत्नः फलप्रसूः स्यात् कृतरागरसोऽद्य शब्दमार्गजुषाम् ॥

R. No. **3891.**

Palm-leaf, $90\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 207. Lines, 7 in a page. Telugu and Grantha Slightly injured

Purchased in 1921–22 from M.R.Ry. Aṇṇāsvāmi Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* contains some discussion in logic. Foll. 1*b*—2*b* are left blank.

(*a*) अखण्डात्मप्रकाशिका.

AKHAṆḌĀTMAPRAKĀŚIKĀ.

Foll. 3*a*—131*a*. Fol. 131*b* is left blank.

An elementary treatise in Advaita-Vēdānta: by Gōpālānandasarasvatī, disciple of Yōgānanda.

Complete.

Beginning:

अव्याद्व्याजकारुण्यसुधापूर्णदृगञ्चलः ।
प्रह्लादाह्लादकः श्रीमान् नृसिंहो वै महाबलः ॥

*   *   *   *

यो विधाय विधातारं तस्मै वेदं न्यवेदयत् ।
तं देवमात्मधीदीपं प्रपद्ये शरणं हरिम् ॥
प्रणम्य प्रणतार्तीनां हरणं शरणं भजे ।
भूरादयस्त्रयो लोका यदुपक्रमसम्भवाः ॥
ब्रह्मादिभ्यश्श्रीगुरुभ्यो नमोवाकमधीमहे ।
जायते यदनुस्मृत्या सद्यो विद्या विमुक्तिदा ॥
स्वात्मन्येवात्मनात्मानं मत्वा स्वात्मानमात्मनि ।
अखण्डात्मप्रकाशोऽयं सुलभः क्रियते मया ॥

इह खलु स्वभावादेव सच्चिदानन्दा . . . चर्यब्रह्मभावमापन्नोऽप्यात्मा चिदाश्रयया चिद्विषयया मायया सविलासया स्वाभाविकब्रह्मभावात्प्रच्युतस्सन्ननात्मदेहादितादात्म्यमापन्नः परमपुरुषार्थमलभ(मानोऽ)नर्थजातं जन्ममरणस्वर्गनरकादि च पुनः पुनरनुभवन् विषीदंश्च कदाचिद्भाग्यातिशयेन केनचिन्नित्यादिभिराराधितभगवदनुग्रहवशाच्छुद्धचित्तस्सन्निहामुत्रार्थफलभो(ग - विरा)गवान् परमपुरुषार्थसाधनमात्मज्ञानमापाततोऽवगत्य तज्जिज्ञासया गुरुमुपपन्नः ।

*   *   *   *

महावाक्यैः करतलीकृतब्रह्मभाव आत्मारामः पूर्णाद्वितीयसच्चिदात्मनावतिष्ठत इति वेदान्तमर्यादा ।

End:

महावाक्यैर्भेदनिन्दापूर्वकं जीवपराभेदो बोध्यत इति निष्कृष्टार्थः । अयमित्थं प्रमाणशिखामण्यद्वैतशास्त्रसिद्धान्तः । तथाहि—

इह खलु कस्यचित्पुरुषधौरेयस्य कुतश्चिद्भाग्योदयान्निष्कामकर्मणि प्रवृत्तिः, नित्यनैमित्तिककर्मानुष्ठानाद्धर्मोत्पत्तिः, धर्मोत्पत्तेः पापहानिः, ततः चित्तशुद्धिः, ततस्संसारायाथात्म्यावबोधः, ततो वैराग्यं, ततो मुमुक्षुत्वं, ततः तदुपायपर्येषणं, ततस्सर्वकर्मसन्न्यासः, ततः तत्त्वमस्यादिवाक्यार्थपरिज्ञानं, ततो मननं, ततो योगाभ्यासः, ततश्चित्तस्य प्रत्यक्प्रवणता, ततस्सर्वविद्योच्छेदः, ततः स्वात्मन्यवस्थानं भवतीति । तथा च स च जीवन्मुक्तः ॥

इत्यभ्यासक्रमेण प्रशमितमितधीरात्मसर्वात्मभावो
रूढेशात्माभिमानो हृदि निरहमभीमानवृत्तौ स योगी ।
हित्वाविद्यासमस्तं निजमहिमहितज्योतिरात्मा तुरीयो
निर्वाणैकस्वभावे विहरति परमानन्दपीयूषसिन्धौ ॥

Colophon:

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्योगानन्दश्रीगुरुचरणशिष्यगोपालानन्दसरस्वत्या सङ्गृहीतोऽयमखण्डात्मप्रकाशाख्यः ग्रन्थः(समाप्तः) ॥

Foll. 132*a*—137*a* contain a portion of Akhaṇḍārthavāda. Fol. 137*b* is left blank. Fol. 138 gives the definition of Prājña, Viśva and Taijasa. Foll. 139–140 contain the Mithyātvapariṣkāra. Fol. 141*a* contains a portion of the Akhaṇḍātmaprakāśa left out in the work described above. Fol. 142*b* is left blank. Fol. 142 contains a few Dharmaśāstravacanas. Foll. 143—149 contain the Biṁbapratibiṁbabhāvavicāra.

(*b*) विधिवादार्थः.

VIDHIVĀDĀRTHAḤ.

Foll. 150*a*—156*b*.

Similar to the work described under No. 4279 of the D.C.S. MSS., Vol. VIII.

Wants the beginning; otherwise complete.

Beginning:

प्रवृत्तित्वावच्छिन्नकार्यतानिरूपितकारणतानिरूपितस्वनिष्ठविषयतानिरूपि-तविषयितासम्बन्धावच्छिन्नावच्छेदकताकं यत्तदेव विधिशक्यं तच्चेष्टसाधनत्वं, कृतिसाध्यत्वं चेति द्वयम् । लोके तदुभयज्ञानादेव घटादौ प्रवृत्त्युपलम्भात् तथा च ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ विधिस्थले ज्योतिष्टोमत्ववा-जपेयत्वादितत्तद्धर्मप्रकारकतत्तत्प्रवृत्तित्वावच्छिन्नं प्रति ।

End:

तद्वारणाय वैजात्यप्रकारकोपस्थितिरावश्यकीति तन्निर्वाहाय निर्विकल्पक-स्मरणमङ्गीकृत्यापि तादृशवैजात्यनिष्ठतादृशप्रकारतानिरूपितप्रकारिताशालि-स्मरणमुपपादितामिति सर्वं समञ्जसमिति सङ्क्षेपः ॥

Colophon:

विधिशक्यतावच्छेदकविचारस्समाप्तः ॥

The scribe adds :—

सूर्यनारायणलिखितोऽयं विधिवादार्थः ॥

(*c*) रत्नकोशमतवादार्थः.

RATNAKOŚAMATAVĀDĀRTHAḤ.

Foll. 157*a*—179*a*. Fol. 179*b* is left blank.

Same work as that described under R. No. 480 ante, but with a different colophon as given below.

Complete.

इति श्रीहरिरामतर्कालङ्कारविरचितो रत्नकोशमतविचारस्समाप्तिमगमत्.

(*d*) शक्तिवादः.

ŚAKTIVĀDAḤ.

Foll. 180*a*—200*a*. Fol. 200*b* is left blank.

Same work as that described under No. 4302 of the D.C.S. MSS., Vol. VIII.

Complete.

(*e*) कारकवादार्थः.

KĀRAKAVĀDĀRTHAḤ.

Foll. 201*a*—207*b*.

Same work as that described under R. Nos. 114(*c*) and 1489(*b*) ante. By Jayarāma.

Incomplete.

R. No. **3892.**

Śrītāla. 13¾ × 2 inches. Foll. 114. Lines, 12 in a page. Grantha. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Aṇṇāsvāmi-Śāstrigal, Bhavani, Coimbatore district.

(*a*) तत्त्वचिन्तामणिप्रकाशः.

TATTVACINTĀMAṆIPRAKĀŚAḤ.

Foll. 1*a*—84*a*. Fol. 84*b* is left blank.

Same work as that described under No. 4014 of the D.C.S. MSS., Vol. VIII. By Rucidatta.

Contains the Anumāna portion incomplete.

Fol. 85 contains several Tarkakārikās.

(*b*) तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Foll. 86*a*—108*b* and 110*a*—114*b*. Fol. 109*a* contains the first stanza of Raghuvaṁśa. Fol. 109*b* is left blank.

Same work as that described under No. 3982 of the D.C.S. MSS., Vol. VIII. By Gaṅgēśōpādhyāya.

Contains the Anumānakhaṇḍa (wants the beginning and end) and a small portion of the Pratyakṣakhaṇḍa.

R. No. **3893.**

Palm-leaf. 13⅝ × 1 inches. Foll. 223. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1921-22 from M.R.Ry. Annāsvāmi-Śāstrigal, Bhavani, Coimbatore district.

चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ: SARASVATĪVILĀSAḤ.

Same work as that described under No. 12248 of the D.C.S. MSS., Vol. XXI and R. No. 737 ante. By Narasiṁhācārya of Kauśikagōtra.

Breaks off in the sixth Stabaka.

The scribe adds:—

अब्दे खरे च मीनेऽस्मिन् मासे शिशिरऋतौ तथा ।
कृत्तिकायां च नक्षत्रे चतुर्थ्यां च दिने तथा ॥
वेदान्ताख्येन येनापि(चालेरि) चम्पुभारतदीपिका ॥

R. No. **3894.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 238. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

महाभाष्यप्रदीपविवरणम्—(बृहत्).
MAHĀBHĀṢYAPRADĪPAVIVARAṆAM: (BṚHAT).

Same work as that described under R. No. 2866 ante; by Rāmacandrasarasvatī.

Wants the beginning and breaks off in the first Āhnika of the III Pāda in the first Adhyāya.

Beginning:

भाष्यं व्याचिकीर्षुश्चिकीर्षितस्याविघ्नेन परिसमाप्तये शिष्टाचारपरिप्राप्तं मङ्गलाचारं कृतं शिष्यशिक्षार्थं ग्रन्थेन निबध्नाति—सर्वेति । परमात्मानं प्रणम्य जैयटात्मजोऽहं कैयटो यथागमं विवृतिष्ठवं विधास्य इति सम्बन्धः ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यसत्यानन्दशिष्येश्वरानन्दविरचिते भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य द्वितीयपादे द्वितीयमाह्निकम् । पादश्च समाप्तः ॥

R. No. **3895.**

Palm-leaf. $18 \times 1\frac{1}{4}$ inches. Foll. 48. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

आश्वलायनश्रौतसूत्रसिद्धान्तिभाष्यम्.
ĀŚVALĀYANAŚRAUTASŪTRASIDDHĀNTIBHĀṢYAM.

Same work as that described under R. No. 1695(*a*) ante.

Contains from the last portion of the fourth Adhyāya and breaks off in the course of the sixth Adhyāya. Dēvasvāmin's Āśvalāyanaśrautasūtrabhāṣya is referred to in the beginning.

R. No. **3896.**

Palm-leaf. 16¼ × 1⅝ inches. Foll. 178. Lines, 10 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

(*a*) आश्वलायनश्रौतसूत्रवृत्तिः.
ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Foll. 1*a*—169*a*.

A commentary on the Śrautasūtras of Āśvalāyana which work has been described under No. 1029 of the D.C.S. MSS., Vol. II; by Nārāyaṇa, son of Narasiṁha of Gārgyagōtra.

Complete.

Beginning :

प्रज्ञानानन्दमूर्तिस्सकलदिगतिगः सर्वदा सन्ननन्यः
सर्वस्मात्स्वप्रकाशः स्थिरचरनिलयः प्रत्यगात्माविभेदः ।
सम्यग्वेदान्तविद्याश्रवणमनननिध्यानवैराग्यलभ्यः
सब्रह्मा विष्णुरीशस्सकलमपि जगत्सर्वदाव्यादसौ नः ॥
गुणदोषविनिर्मुक्तं स्वप्रकाशमनाकुलम् ।
गम्भीरबोधमानन्दं नमामि ब्रह्म शाश्वतम् ॥
आश्वलायनसूत्रस्य भाष्यं भगवता कृतम् ।
देवस्वामिसमाख्येन विस्तीर्णं सदनाकुलम् ॥
तत्प्रसादान्मयेदानीं क्रियते वृत्तिरीदृशी ।
नारायणेन गार्ग्येण नरसिंहस्य सूनुना ॥

अथैतस्य समाम्नायस्य . . . वक्ष्यामः । लोके यानि प्रत्याम्नायं प्रयोगशास्त्राणि स्मर्यन्ते, तान्यनुष्ठानौपयिकतयाध्ययनविध्याक्षिप्तत्वात् प्रत्या-

मायमङ्गत्वं प्रतिपन्नानि । अत्राङ्गाङ्गिनोरनुष्ठानौपयिकमानन्तर्यमथशब्दो द्योतयति ।

* * * *

Colophon:

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां प्रथमोऽध्यायः ॥

End:

एवं ब्रह्मणे नमस्कृत्याचार्येभ्यो नमस्कारं कृतवान् । योऽयमस्य शास्त्रार्थसम्प्रदायाविच्छेदात(द)स्माभिरधीतेन पुनः स्वमनीषिकयोत्प्रेषित इति भगवतो दर्शनमनेन नमस्कारेण नमः शौनकाय नमश्शौनकायेति चतुर्थ्या । द्विरुक्तिश्शास्त्रपरिसमाप्तिसूचनार्था ॥

Colophon:

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वादशोऽध्यायः ॥

(*b*) आश्वलायनश्रौतप्रायश्चित्तप्रयोगः.

ĀŚVALĀYANAŚRAUTAPRĀYAŚCITTAPRAYŌGAḤ.

Foll. 170*a*—178*b*. Fol. 169 gives a portion omitted on Fol. 94.

Similar to the work described under No. 1145(*c*) ante.

Complete.

Beginning:

अथ हविर्यज्ञप्रायश्चित्तान्युच्यन्ते—विध्यपराधे प्रायश्चित्तिः । विधीनां विहितानां न्यायकरणे अकरणे च प्रायश्चित्तं कर्तव्यमपराधे सति । तदर्थं विहितं प्रायश्चित्तमस्ति चेत्तदेव कर्तव्यम् । तेन सह सर्वप्रायश्चित्ताख्यो व्याहृतिहोमश्च कर्तव्यश्च ।

End:

यदि अग्निहोत्रे पूर्वस्यामाहुत्यामहुतायामाहवनीयोऽनुगच्छेत् । तदा द्वितीयाहुत्या स्था(ल्यां) हिरण्यं निधाय तत्रोत्तराहुतिं जुहुयात् । हिरण्ये यथा-सम्भवमुत्तरां गां(दद्या)त् ॥

Colophon:

इत्याश्वलायनप्रायश्चित्तम् ॥

उद्धृत्यावोक्ष्याग्निं मथित्वा गार्हपत्यायतने निधायावसितहोमं करिष्य इति सङ्कल्प्य

* * * *

आज्येनावदाय स्विष्टकृदिडादि कुर्यात् ।

R. No. **3897.**

Palm-leaf. $14\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 143. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

तत्त्वप्रदीपिकाटीका—मानसनयनप्रसादिनी.

TATTVAPRADĪPIKĀṬĪKĀ: MĀNASANAYANAPRASĀDINĪ.

Foll 1*a*—142*b*. Foll. 88*b* and 143 are left blank.

A commentary on Citśukhamuni's Tattvapradīpikā which is a polemical treatise in four Paricchēdas written in support of the Advaita-vēdānta and in refutation of non-advaitic doctrines; by Pratyak-svarūpa, disciple of Prajñānātmaprakāśa.

Contains the first Paricchēda complete and breaks off in the second Paricchēda.

Beginning:

(यत्पादपावन)सरोजरजःपरागैरेते विनेयनिवहा विरजस्त्वमापुः ।
सत्त्वप्रकाशपरिशुद्धनिजानुभावं प्रत्यक्प्रकाशमभिनौमि गुरुं यतीन्द्रम् ॥

(उद्यद्विद्या)सुरसरिदियं निस्सृता यत्सकाशात्
यत्पादाब्जं सकलविबुधोत्तंसलीलां बिभर्ति ।
ईन्ता(हंसा)नां यद्विमलबहुवाक् जीवनं जीवनं तं
वन्दे विद्यागुरुमविरतं मानसं तीर्थमार्यम् ॥
नवनयनरुचिरतत्त्वप्रदीपिकालोकनार्थिना क्रियते ।
अज्ञानतिमिरहन्त्री मानसनयनप्रसादिनी(टी)का ॥

* * * *

प्रारिप्सित(तत्त्वदीपिका)प्रकरणस्य निरन्तरायपरिसमाप्तिपरिपन्थिकल्मष-परम्परानिवारणाय शिष्योपशिष्यद्वारा प्रचयगमनाय च शिष्टानुष्ठानप्रतिष्ठापनेन विशिष्टपरिग्रहाय च . . . . पूर्वकं परमेश्वरं परि-

Same work as that described under No. 12846 of the D.C.S. MSS., Vol. XXII.

Complete.

The scribe adds—

इदं कुवलयानन्दमप्पयज्वेन्द्रानिर्मितम् ।
सत्यं कुवलयानन्दं यशश्चन्द्रविजृम्भणम् ॥
लिखितं पुस्तकमिदं वेङ्कटेश्वरसूरिणा ।
समस्तकाव्यविदुषा व्याक्रियाजलधीन्दुना ॥

Foll. 87*a*—90*b* contain a small portion of Kuvalayānanda.

(*b*) चन्द्रालोकश्लोकाः.

CANDRĀLŌKAŚLŌKAḤ.

Foll. 91*a*—99*b*.

Same work as that described under No. 12871 of the D.C.S. MSS., Vol. XXII.

Complete.

(*c*) विक्रमराघवम्.

VIKRAMARĀGHAVAM.

Foll. 100*a*—120*a*. Fol. 121*a* contains a portion of the Chāndōgyōpaniṣad. Foll. 120*b* and 121*b* are left blank.

A poem describing the story of Rāma and the incidents that took place during his life. The author, whose name is not given, had the title "Nūtanakālidāsa."

Contains the Sargas one to three complete and breaks off in the course of the fourth Sarga.

Beginning :

श्रियः पतिर्विश्वरसंस्थितानि श्रेयांसि भूयांसि ददातु तुष्टः ।
बाह्वोर्द्वयादक्षियुगाच्च यस्य क्षत्रं जगद्रक्षकमाविरासीत् ॥
सारस्वते सत्त्वगुणैकलभ्ये सत्काव्यनिर्माणकलाप्रगल्भे ।
पुण्येन नेता पुरुषोत्तमश्चेदिक्षोः फलं सौरभमेव हेम्नः ॥
जाग्रत्सु विष्णोर्जननान्तरेषु धत्ते मुदं दाशरथौ मनो मे ।
वने पुरस्तादपि वर्तमाने सर्वैरुपेयं सहकारमूलम् ॥

* * * *

तिरोहिते वेधसि तापसानां नाथः पुरा नारददर्शितेन ।
मार्गेण रामायणनामधेयं चक्रे शनैर्दाशरथेश्चरित्रम् ॥

सुरास्रवन्तीसुषुमां जयन्त्यास्तीरे सरय्वास्त्रिदिवाभिरामा ।
राजत्ययोध्येति पुरी रघूणां निजप्रभानिर्जितनिर्जराणाम् ॥

* * * *

Colophon :

उद्दण्डांहितचण्डखण्डनलसत्कोदण्डदण्डस्फुर-
द्वाहामण्डनशालिनो रघुपतेराश्चर्यचर्यास्पदे ।
काव्ये विक्रमराघवे नवरसप्रोद्दामवाग्दामभिः
श्राव्ये नूतनकालिदासरचिते सर्गोऽगमत्पूर्वजः ॥

End :

पुरा दशरथं पुरोहितसुतावरोधान्वितं
प्रवेश्य भवनं महत्प्रथितवस्तुकं मैथिलः ।
विवेश तदनु स्वकं विविधमङ्गलोपक्रमं
प्रगल्भजनबन्धुरं प्रकृतिसुन्दरं मन्दिरम् ॥

Colophon :

. . . रचिते सर्गस्तृतीयो गतः ॥
ततश्शुचावुत्तरफल्गुनीयुते दिने परस्मिन्मिथिलाधिपो महम् ।
निवेदयन् पङ्क्तिरथाय कन्यकाविवाहदीक्षां विधिनोपचक्रमे ॥

* * * *

ततः परं दाशरथेर्दिदृक्षया सविभ्रमाः पौरसरोजलोचनाः ।
हठादलश्चकुरनादृतक्रिया वितर्दिसौधाग्रगवाक्षवासिताः ॥

R. No. 3899.

Palm-leaf. $12\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 263. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasimha-Śāstrigal, Bhavani, Coimbatore district.

ब्रह्मसूत्रभाष्यव्याख्या—शिवादित्यमणिदीपिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚIVĀDITYAMAṆI-DĪPIKĀ.

Foll. 4*a*—263*a*. Foll. 1—3, 162*b*, 251*b* and 263*b* are left blank.

Same work as that described under No. 5093 of the D.C.S. MSS., Vol. X. By Appayadīkṣita.

Contains from the fourth Pāda of the first Adhyāya to the end of the second Adhyāya.

Beginning :

पूर्वोत्तरपादार्थप्रदर्शनेन सङ्गतिं सूचयति—पूर्वपाद इति । प्रथमे पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि विचारितानि । द्वितीयेऽनतिस्पष्टब्रह्मलिङ्गानि । तृतीये स्पष्टास्पष्टब्रह्मलिङ्गानि । चतुर्थे त्वस्मिन्नस्पष्टब्रह्मलिङ्गानि वाक्यानि विचार्यन्त इति ब्रह्मलिङ्गानां स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमत्वक्रमेण पादानामवतार इति भावः । आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च । सौत्रमेकेषामिदं व्याकुर्वाणस्तदपेक्षितं चाध्याहरन्नेव विषयवाक्यमुदाहरति—एकेषामिति ।

* * * *

Colophon :

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणिदीपिकायां प्रथमस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ॥

End :

वैशेष्यात्तद्वादस्तद्वादः । अन्नादिति । अर्धमन्नमर्धमितरत् । भूतद्वयमित्येवमादिरूपेण भूयस्त्वेन प्रकारेण(त)द्वैशिष्ट्यं विशेषः । ततो हेतोरित्यर्थः ॥

Colophon :

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणिदीपिकाख्यायां द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ समाप्तश्चाध्यायः

R. No. 3900.

Palm-leaf. 15 × 1¾ inches. Foll. 227. Lines, 12 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

(*a*) शास्त्रदीपिकाव्याख्या—मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ: MAYŪKHAMĀLIKĀ.

Foll. 2*a*—170*b*. Fol. 1*a* gives the name of the commentator of this work. Foll. 1*b*, 77*b* and 171 are left blank.

Same work as that described under No. 4510 of the D.C.S. MSS., Vol. IX and R. No. 810 ante.

Contains from the sixth Adhyāya to the third Pāda of the tenth Adhyāya complete and the fourth Pāda of the tenth Adhyāya incomplete.

(*b*) नयमयूखमालिका.

NAYAMAYŪKHAMĀLIKĀ.

Foll. 172*a*—225*a*. Foll. 225*b*—227*b* are left blank.

Same work as that described under R. No. 1335 ante. By Appayadīkṣita.

Contains the first Pāda of the first Adhyāya (wants the beginning) to the end of the fourth Pāda of the same Adhyāya.

R. No. 3901.

Palm-leaf. 18⅛ × 1⅜ inches. Foll. 272. Lines, 11 in a page. Grantha and Telugu. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

(*a*) वार्त्तिकसारः.

VĀRTTIKASĀRAḤ.

Foll. 1*a*—91*b*.

A summary of Surēśvara's Bṛhadāraṇyakōpaniṣadvārttika which is referred to in the description given under R. No. 3227 ante.

Complete in eight Adhyāyas.

Beginning:

श्रीमत्सुरेश्वराचार्यपादाब्जभ्रमरा इमे ।
वार्त्तिकेषु रसं पीत्वा तृप्यन्त्वात्मानुभूतितः ॥
संसारकारणाविद्याध्वंसकृज्ज्ञानलब्धये ।

प्रारब्धेयं प्रयत्नेन वेदान्ते . . . . ॥
. . . पनिषच्छब्दो ब्रह्मविद्यैकगोचरः ।
तच्छाब्दावयवार्थस्य विद्यायामेव संभवात् ॥
उपोपसर्गस्सामीप्ये तत्प्रतीचि समाप्यते ।
सामीप्यतारतम्यस्य विश्रान्तेस्स्वात्मनि क्षणात् ॥

End:

यो वै ज्येष्ठश्रेष्ठतादिगुणके ध्यानमीर्यते ।
प्राणस्यान्नं सर्वभोज्यमापो वासोऽप्यनग्नता ॥
हिरण्यगर्भमाप्नोति यथोक्तप्राणचिन्तकः ।
द्वितीये स्वर्गलोकादौ . . . . ॥
. . . ब्रह्मवद्ध्यात्वा गतिं यात्यर्चिरादिकाम् ।
यज्ञाधिकारिणः स्वर्गं प्राप्य यान्ति पुनर्भुवि ॥
विद्याकर्मविहीना ये ते कीटाद्या भवन्ति हि ।

* * * *

इति वार्त्तिकसारोऽयं [1]सङ्गृहीतो मया किल ।
तुष्टो वार्त्तिकसारेण . . . . ।
. . . . विद्यातीर्थमहेश्वरः ॥

Colophon:

इति वार्त्तिकसारे अष्टमोऽध्यायः ॥

(*b*) वार्त्तिकसारव्याख्यानम्—सारसङ्ग्रहः ।
VĀRTTIKASĀRAVYĀKHYĀNAM: SĀRASAṄGRAHAḤ.

Foll. 264*b*.

Same work as that described under R. No. 1307 ante.

Contains up to the sixth Brāhmaṇa in the third Adhyāya.

Foll. 265—267 are left blank. Foll. 268*a*—270*a* give a portion of Śārīrakanyāyanirṇayavyākhyā. Fol. 270*b* is left blank. Foll. 271—272 contain Śrīsūkta.

---

[1] विदुषां तुष्टये कृतः.

R. No. 3902.

Palm-leaf. 16 × $1\frac{1}{4}$ inches. Foll. 208. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

सिद्धान्तरत्नावलिः.

SIDDHĀNTARATNĀVALIḤ.

Same work as that described under Nos. 5063 and 5064 of the D.C.S. MSS., Vol. X. By Vēṅkaṭācārya, son of Tātācārya and disciple of Vēṅkaṭadēsika.

Wants the introductory portion in the beginning and breaks off in the second Paricchēda.

R. No. 3903.

Palm-leaf. $18\frac{3}{8}$ × $1\frac{1}{4}$ inches. Foll. 72. Lines, 11 in a page. Grantha. Injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

वेदार्थतत्त्वनिर्णयः.

VĒDĀRTHATATTVANIRṆAYAḤ.

A treatise purporting to establish the identity of Brahman, Viṣṇu, Śiva, and other gods: by Liṅgādhvarin, son of Gōvindādhvarīndra.

Contains the first Paricchēda only.

Beginning:

गुणत्रयविभेदेन मूर्तित्रयमुपेयुषे ।
मन्त्रार्थवपुषे धाम्ने विद्याधिपतये नमः ॥
अध्यापिता . . . . . येन शास्त्राणि कोविदा ।
स्थापितो वैदिको मार्गो मीमांसाद्वयचक्षुषा ॥
यथाविधि कृतस्तद्वद्वाजपेयमुखा मखाः ।
तं वन्दे पितरं भक्त्या गोविन्दाध्वरिशेखरम् ॥
अध्याप्य सर्वशास्त्राणि त्रयीं च सह टीकया ।
लिङ्गाध्वरीन्द्रो वेदार्थतत्त्वनिर्णयमारभे ॥
विष्णोः परत्वे वेदानामेके तात्पर्यमूचिरे ।
अन्ये तु शम्भोरुत्कर्षे तात्पर्यं मेनिरे बुधाः ॥

हिरण्यगर्भपारम्ये तात्पर्यमपरे जगुः ।
तन्निरासमुखेनात्र त्रयाणामैक्यमुच्यते ॥

शिवस्यैव जगत्कारणत्वं, विष्णोरेव जगत्कारणत्वं, हिरण्यगर्भस्यैव जगत्कारणत्वमिति वदन्ति । सूर्यस्यैव जगत्कारणत्वं सकलवेदप्रतिपाद्यं-(द्यत्वं)चेत्यपरे । एवमग्नेरिन्द्रस्य च । तत्र वदामः । सूर्यस्य सर्ववेदप्रतिपाद्यत्व-मुच्यते—तद्विभूतयोऽन्या देवताः । तदप्येतदृषिणोक्तम्—इन्द्रं वरुणमग्नि-माहुरिति । एवं निरुक्ते परिशिष्टाध्याये सर्ववेदप्रतिपाद्यत्वं सूर्यस्ये-त्युक्तम् ।

End:

शतशीर्षरु(द्र)स्य शमनीयं शमनसाधनमिति करणे स्नानीयवत् अनीयर्-प्रत्यवा(या)न्तम् । तथैवास्मादयमेतदन्नं सम्भरति । शतरुद्रीयं तेन एनं शमयति । स्पष्टम् . . . ॥

Colophon:

इति श्रीमद् . . . . साग्निचित्यसर्वतोमुखातिरात्रसाग्नि-चित्याग्निवाजपेययाजिगोविन्दाध्वरीन्द्रतनयलिङ्गाध्वरीन्द्रविरचिते वेदार्थतत्त्व-निर्णये प्रथमः परिच्छेदस्समाप्तः ।

R. No. 3904.

Palm-leaf. $12\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 71. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha-Śāstrigal, Bhavani, Coimbatore district.

(*a*) रत्नत्रयपरीक्षा, सव्याख्या.

RATNATRAYAPARĪKṢĀ WITH COMMENTARY.

Foll. 3*a*—29*a*. Foll. 2*a* gives the names of the works contained in this MS. Foll. 1, 2*b* and 29*b* are left blank.

Same work as that described under No. 5098 of the D.C.S. MSS., Vol. X, wherein see for the beginning. By Appayadīkṣita.

Complete.

End:

सारमण्डल इत्यादिवचनैर्व्यवस्थापित इति सर्वं समञ्जसम् ॥

आमथ्य भाष्यदुग्धाब्धिमाप्तं रत्नत्रयं . . ।
. . . . . . श्रेति तच्च सम्यक् परीक्षितम् ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजि - श्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षित(स्य) कृतौ नाम सः ? ॥

इति रत्नत्रयपरीक्षा समाप्ता ॥

(*b*) राजपुरुषवादार्थः.
RĀJAPURUṢAVĀDĀRTHAḤ.

Foll. 30*a*—36*b*.

Similar to the work described under R. No. 1472(*b*) ante.

Complete.

Beginning:

तत्पुरुषे राजपुरुष इत्यादौ पूर्वपदे लक्षणेति वदन् वादी प्रष्टव्यः । किं राज्ञः पुरुष इति व्यासे षष्ठ्यर्थस्य सेव्यसेवकभावलक्षणसम्बन्धस्य भानाद्राजपुरुष इत्यत्र समासेऽपि तत्सम्बन्धभानार्थं लक्षणा कल्प्यते, किं वा तादृशसम्बन्धस्य व्यासे प्रकारतया भानात्समासेऽपि तत्प्रकारकबोधार्थं लक्षणा कल्प्यते ।

End:

तस्मात् षष्ठीतत्पुरुषे लक्षणाया एव वक्तुमशक्यतया विनापि लक्षणां सम्बन्धबोधस्योपपादितत्वान्न समासे लक्षणेत्यलं पल्लवितेन ॥

(*c*) अद्वैतसिद्धान्तविद्योतनम्.
ADVAITASIDDHĀNTAVIDYŌTANAM.

Foll. 37*a*—71*a*. Fol. 71*b* is left blank.

Same work as that described under R. No. 1341 ante. By Brahmānandasarasvatī.

Contains the first Paricchēda complete, but with different colophon as given below:—

इत्यद्वैतसिद्धान्तविद्योतने परमहंसपरिव्राजकश्रीब्रह्मानन्दसरस्वतीविरचिते प्रथमः परिच्छेदः ॥

R. No. 3905.

Palm-leaf. 14⅝ × 1⅜ inches. Foll. 127. Lines, 9 in a page. Grantha. Injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

Foll. 1 and 120*b* are left blank.

बोधायनश्रौतसूत्रभाष्यम्.

BŌDHĀYANAŚRAUTASŪTRABHĀṢYAM.

Same work as that described under R. No. 3781 ante, wherein see for the beginning. By Bhavasvāmin.

Contains the Pūrvakalpa complete and four Adhyāyas in the Karmānta-Sūtras (Uttarakalpa).

Colophon:

इति भवस्वामिकृते बोधायनीयकल्पविवरणे अग्ना एकोनविंशोऽध्यायः॥ समाप्तोऽग्निः पर्वः कल्पः समाप्तः ॥

पञ्चतयेन कल्पमवेक्षेतेत्यादि कर्मान्त इत्यन्वर्थसंज्ञा कर्मणामन्त इति। समाप्तिः । अत्र कर्माणि समाप्यन्ते किञ्चिदविशेषेण.

* * * *

End:

तूष्णीमितरत् । किं तु विभज्य प्रयोक्तव्यं यथोक्तमिति ॥

Colophon:

इति प्रथमस्य कर्मान्तस्य चतुर्थोऽध्यायः ॥

अथात आ . . . . . . आदिश्यतेऽनेनेत्यादेशः उत्सर्गः । तस्य कारितानि बाधकानि अपवादा इत्यर्थः ।

* * * *

तत्र यद्यविज्ञातदैवतं प्रायश्चित्तादि तदाग्नेयं कर्तव्यम् । तथा सोम इन्द्राभिभार इत्येतेनैव व्याख्या . . . . . . ति औषधस्य निर्वापण.

R. No. 3906.

Palm-leaf. 14⅝ × 1⅜ inches. Foll. 214. Lines, 10 in a page. Grantha. Injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* gives the names of the Saṁvatsaras. Fol. 1*b* is left blank.

सूर्यसिद्धान्तः, कामदोग्ध्रीसहितः.

SŪRYASIDDHĀNTAḤ WITH KAMADŌGDHRĪ.

Foll. 2*a*—213*b*. Foll. 213*b* and 214*a* give the genealogy of the commentator of this work. Fol. 214*b* gives the Dēvarṣitarpaṇaprayōga.

Same text as that described under R. No. 1706 ante. The commentary, which is different, is by Tammayajvan, son of Vēṅkaṭāmbā and Mallayajvan (who lived in Śākinīpura) and grandson of Honnārya.

Date of transcription—Thursday, the 26th day of the solar month Mithuna in the year Virōdhikṛt. Name of the scribe—Gaṅgaya.

Complete.

Beginning:

श्रीविद्यां हृदयस्थितां शिवमयीं श्रीमत्समाराधितां
कामाक्षीं करुणाकटाक्षकलिकाकल्याणसन्दायिनीम् ।
कोदण्डाङ्कुशपाशबाणविलसद्धस्तां प्रसन्नाननां
सिन्दूरारुणदेहकान्तिमनिशं श्रीहोन्नमाम्बां भजे ॥

शुभ्राङ्गं पीतवस्त्रं सुरतरुसदृशं सूर्यकोटिप्रकाशं
नानाभूषासमेतं नलिनभवनुतं नागयज्ञोपवीतम् ।
शूलं पात्रं च खड्गं डमरुगमतुलं पाणिपद्मे दधानं
मैलाराख्यं महेशं मणिमयमकुटं मालचीनाथमीडे ॥

* * * *

ये होन्नयार्यादिकुलप्रसिद्धास्सूर्यादिसिद्धान्तविदो महान्तः ।
ये मल्लयज्वादिसमस्ततन्त्रव्याख्याधुरीणा मम देवतास्ते ॥

श्रीहोन्नार्यस्सर्वतन्त्रस्वतन्त्रस्तस्माज्जातस्तादृशो मल्लयज्वा ।
तज्ज्ञः ख्यातः सर्वसिद्धान्तवेत्ता शाकिन्याख्ये पत्तने मल्लयज्वा ॥

तत्पुत्रोऽहं वेदवेदान्तवेदी ज्योतिर्विद्यापारगस्तम्मयज्वा ।
सूर्यं नत्वा सुर्यतन्त्रस्य टीकां होन्नम्बाये कामदोग्ध्रीं करोमि ॥

इह तावत्प्रारिप्सितस्य निर्विघ्नपरिसमाप्तिकामः स्वेष्टदेवताप्रणामरूपं मङ्गलं श्लोकतो निबध्नाति—

अचिन्त्याव्यक्तरूपाय (. . .) मूर्तये ब्रह्मणे नमः ॥ इति ।

ब्रह्मणे परमात्मने नम इति सम्बन्धः । नमःस्वस्तिस्वाहास्वधालंवषड्योगा-चेति चतुर्थी । लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति तटस्थलक्षणसूचनार्थ-माह — समस्तजगदाधारमूर्तय इति ।

* * * *

Colophon :

इति श्रीमैलारेश्वरहोन्नाम्बिकावरलब्धवाग्विभवेन श्रीपरि(र)गिमल्लयज्वन-स्तनूजेन ज्यौतिषिकहृत्कुमुदचन्द्रेण तम्मयार्येण श्रीसूर्यसिद्धान्तस्य मध्याधि-कारस्य प्रथमाध्यायस्य टीका कृता ॥

End :

प्रत्यक्षसिद्धभेदं श्रुति(र)नुवदतीति तस्यामनुवादकत्वेनाप्रामाण्यात् ।
किं च तथाविधश्रुतेरनाकलनाच्चेति जीवब्रह्मणोरभेदः पारमार्थिकः ॥
ये कामदोग्ध्रीं तद्दशा मदुक्तां होन्नाम्बिकाप्रीतिकरीं च टीकाम् ।
सकृत्प्रयत्नैरपि लोकयन्ते ते सर्वसिद्धान्तविदो भवेयुः ॥

घनाद्रिनिकटे भाति पश्चिमे परगीपुरी ।
तस्यां श्रीहोन्नमाम्बायाः प्रसादी जोह्रियाभिधः ॥
विद्वान् श्रीसूर्यसिद्धान्ताद्यष्टसिद्धान्तपारगः ।
रपीतरकुलाम्भोधिसुधांशुसदृशः प्रभुः ॥
ऋग्वेदी वेदवेदान्तशास्त्रज्ञो मन्त्रकोविदः ।
सर्वज्ञसदृशः प्राज्ञो वर्तते सर्वभोगभाक् ॥
तस्यात्मजो मल्लयज्वा सर्वतन्त्रस्वतन्त्रकः ।
तत्पुत्रौ मल्लयज्वा च सोमनाथाध्वरी ह्युभौ ॥

* * * *

तन्मध्ये मल्लयज्वाख्यः वेङ्कटाम्बातनूभवः ।
तम्मयार्यस्तर्कशास्त्रे वेदान्ते शब्दशास्त्रयोः ॥
ज्यौतिषे वेदवेदाङ्गश्रौतस्मार्ताखिलेषु च ।
निपुणः श्रीहोन्नमाम्बावरवाग्विभवस्सुधीः ॥

श्रीहोन्ना . . . . . . वगुरुसदृशान्मल्लयज्वाख्यपुत्रा-
ज्जातो मल्लाध्वरीन्द्रात् परगिपुरवरस्थायिनस्तम्मयार्यः ।

सिद्धान्तस्यार्कनाम्नः . . . . कामदोग्ध्रीं सुटीकां
मानाध्यायस्य सम्यग्रविगुरुकृपया प्रोक्तवानम्बिकायै ॥

Colophon:

इति सूर्यसिद्धान्ते मानाधिकारो नाम चतुर्दशोऽध्यायः ॥

R. No. **3907.**

Palm-leaf. $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 148. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

आपस्तम्बश्रौतसूत्रभाष्यदीपिका.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYADĪPIKĀ.

Fol. 1*a* gives the title of this work. Foll. 1*b*, 54*b*—68*b*, 138 and 146 to 148*a* are left blank. Fol. 148*b* gives the name of the work Dhūrta-svāmibhāṣya.

Same work as that described under R. Nos. 973, 1241, 1245 and 1496 ante. By Kauśikarāma.

Contains the Praśnas 7—10 complete and the 11th incomplete.

R. No. **3908.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 103. Lines, 7 in a page. Grantha Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Foll. 1, 25*b* and 99*a*—103*b* are left blank.

परिभाषावृत्तिः.

PARIBHĀṢĀVṚTTIḤ.

Same work as that described under Nos. 1460 and 1462 of the D.C.S. MSS., Vol. III. By Sīradēva.

Wants the beginning; otherwise complete.

R. No. **3909.**

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 343. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Foll. 1, 2, 342 and 343 are left blank.

शास्त्रदीपिका.

ŚĀSTRADĪPIKĀ.

Same work as that described under No. 4478 of the D.C.S. MSS., Vol. IX. By Pārthasārathimiśra.

Contains from the second Pāda of the first Adhyāya to the end of the third Adhyāya and the fourth Pāda of the fifth Adhyāya.

R. No. 3910.

Palm-leaf. $17\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 210. Lines, 9 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Fol. 1*a* contains the name of this work. Foll. 1*b*—6*b*, 21*b*, 55, 89*b*, 112*b*, 120*b* and 178—210 are left blank.

न्यायरत्नमालाव्याख्यानम् – नायकरत्नम्.

NYĀYARATNAMĀLĀVYĀKHYĀNAM: NĀYAKARATNAM.

Foll. 7*a*—177*b*.

The commentary is the same as that described under R. No. 3845 ante. By Rāmānujācārya.

Complete.

R. No. 3911.

Palm-leaf. $16 \times 1\frac{1}{4}$ inches. Foll. 221. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) सर्वानुक्रमणीवृत्तिः—वेदार्थदीपिका.

SARVĀNUKRAMAṆĪVṚTTIḤ: VEDĀRTHADĪPIKĀ.

Foll. 2*a*—22*b*. Fol. 1 is left blank.

Slightly different from the commentary described under No. 1004 of the D.C.S. MSS., Vol. II. By Ṣaḍguruśiṣya.

Wants the beginning; otherwise complete.

Beginning:

आग्नेयं चतुरनुष्टुबन्तम् । मैनमग्ने . . . . द्रप्सास्तिस्रः सौम्योपान्त्ये अनुष्टुभा उपान्त्या पुरस्ताद्बृहती वा । त्वष्टा दुहित्रे

* * * *

द्विवस्परि प्रथमवात्सप्रमार्षं भालन्दन इत्युक्तम् आग्नेयमिदमुत्तरं च ॥

Colophon:

इति सप्तमोऽष्टकस्समाप्तः ॥

प्रहोता दश ।

End:

सद्भिरपीड्यत इत्याह—

सर्वानुक्रमणी सैषा कात्यायनमुनेः कृतिः ।
समाप्तैकाध्यायवती षट्सप्ततिकखण्डिका: ॥
तस्या वृत्तिरियं चापि समाप्ता षड्गुरोः कृतिः ।
वेदार्थदीपिकादीनां षड्गुरूणां प्रसादतः ॥
खगोन्त्यामेमिषमापेति कल्यहोगणने सति (१५६९१३२) ।
सर्वानुक्रमणीवृत्तिर्जाता वेदार्थदीपिका ॥
लक्षाणि पञ्चदश वै पञ्चषष्टिसहस्रकम् ।
द्वात्रिंशच्छतं चेति दिनवाख्या(क्या)र्थ ईरितः ॥

विनायकशूलपाणिमुकुन्दव्यासशिवयोगीति षड्वे । नमामि तान्
सर्वदा पान्तु मा ते यैर्वा षड्भिस्सप्त विद्यास्तु दत्ताः ॥
आद्यानुक्रमणी द्वितीया महाव्रतं चोपनिषद्द्वयं च ।
महाव्रतं सूत्रमासां . . . . चत्वारिंशद्ब्राह्मणं वै चतुर्थम ॥
सूत्रं पञ्चमं त्रिषष्टि तु गृह्या शाकल्यस्य संहिता सप्तमीमिति ।
बदात्तास्सप्तविद्यास्तुतये.

Colophon:

इति षड्गुरुशिष्येण कृता वेदार्थदीपिका ।
सर्वानुक्रमणीवृत्तिस्समाप्तेष्टार्थपूर्तये ॥

(*b*) पदान्तदीपिनी.

PADĀNTADĪPINĪ.

Foll. 23*a*—24*b*.

A treatise indicating clearly the endings of certain words occurring in the Ṛgvēda. Herein it is stated that the Ṛkprātiśākhya of Śaunaka is followed by the author. The first stanza is apparently unconnected with this work.

Complete.

Beginning:

[यज्ञनारायणाख्यस्य यज्वनः प्रियसूनुना ।
शमानं साधु सव्याख्यं नागदेवेन निर्मितम् ॥]

भूतेशोऽपि प्रसादार्थी यस्याभूत्त्रिपुरान्तकः ।
करुणानिधये तस्मै गणानां पतये नमः ॥
प्रारिप्सितेषु सर्वेषु भासतां नस्सरस्वती ।
विश्वप्रकाशिनी शश्वत् कुमुदेष्विव कौमुदी ॥
ऋग्वेदपाठे शाकल्ये(ल्य) दृष्टे तद्वर्त्मना कृतिम् ।
पदान्तदीपिनीं नाम करोम्यर्थानुबन्धिनीम् ॥
बहुशस्संशयान् दृष्ट्वा बहुधा धीमतामपि ।
ऋगाम्नायपदान्तेषु निर्णयाय यतामहे ॥
आलोच्य शौनकप्रोक्तं प्रातिशाख्यं प्रयत्नतः ।
विवृणोम्यतिमूढोऽपि मन्दानुग्रहकाङ्क्षया ॥

* * * *

षोडशव्यञ्जनोत्थानि वाक्यानि व्यञ्जनद्विकैः ।
कथयन्त्यष्टरूपाणां प्रतिवर्गं स्वरैरपि ॥

End:

तान् वाणी तु महत्सम्राट् एतप्रोस्वरनानुदः ॥
को(गो)ष्ठान्निर्णिक् ककुप् प्रत्यङ् तस्मै गोजरितृप्रणक् ।
पूषण्वान् सितुसेम्यन्तस्तनूसाताविति क्रमः ॥

(*c*) पदान्तदीपिनीव्याख्या.
PADĀNTADĪPINĪVYĀKHYĀ.

Foll. 24*b*—28*a*.

A commentary on the work described above.

Almost complete.

Beginning:

श्रियं तनोतु श्रितविघ्नभेदी गणादिनाथो गणवान्ममोच्चैः ।
यदर्चनादेव फलन्ति कामाः कृशाः प्रभूता अपि वा जनानाम् ॥

अथ पदान्तदीपिनीनामधेयं व्याचिकीर्षुराचार्यः तस्याविघ्नपरिसमाप्त्यादिफलसिद्ध्ये स्वेष्टदेवतां विनायकं नमस्करोति—भूतेशोऽपीति । तस्मै गणानां पतये नमः करोमीति शेषः । अस्त्विति वा । भूतेशः शिवः ; भूतेशः खण्डपरशुरित्यमरः ।

* * * *

अथ चिकीर्षितं प्रतिजानीते—ऋग्वेदेति । शाकल्यदृष्टे ऋग्वेदे(द) पाठे विषये नाम्ना पदान्तदीपिनीं कृतिं करोमीति तद्वर्त्मना शाकल्यवर्त्मना आचार्यसम्प्रदायानतिक्रमेणेति यावत् ।

End:

उपसंहरति—वाक्यानामिति स्फुटम् ॥

पदसङ्ख्या नृवत्योऽयं पिब स्वाहा जुहोमि ते ।
तान् वाणी तु महत्सम्राळेतप्रोस्वरनानुदः ॥
गोष्ठान्निर्णिक् ककुप् प्रत्यक् तस्मै गोजरितृ पृणक् ।
पूषण्वान् सितु सेम्यन्तस्तनूसातावितिक्रमः ॥

Foll. 28*b*—71*a* contain the Ṛgvēdalakṣaṇānukramaṇikā. Fol. 71*b* is left blank.

(*d*) अवर्णदीपव्याख्यानम्.

AVARṆADĪPAVYĀKHYĀNAM.

Foll. 72*a*—82*b*.

A commentary on Dakṣiṇāmūrti's Avarṇadīpa which work has been described under No. 859 of the D.C.S. MSS., Vol. II.

Complete.

Beginning:

सन्ध्याचन्द्रकलामनोज्ञनखरैः पादप्रभाभासुरैः
भूषावन्मणिनूपुरौ णन(प्रण)मतां सन्दर्शयन् पाणिना ।
वामं पादतलं विमुक्तपदवीसोपानमासोहि(रोह)तां
मध्ये हेम . . होऽस्तु सततं प्रत्यूहविच्छित्तये ॥

अथ दक्षिणामूर्तिनामा कश्चिद्विपश्चित् अवर्णदीपनामकं लक्षणं चिकीर्षुरतदनन्तरायपरिपूरणाय विशिष्टेष्टदेवतां नमस्कृत्य श्रोतृजनमनस्समाधानाय विषयप्रयोजने निर्दिशति— गुरुमिति । सकलजगद्गुरुमीश्वरं गुणत्रयात्मकाविद्याश्रयं शब्दब्रह्मस्वरूपं स्वभक्तानां ज्ञानप्रदानेन दंसर)संसारसमुद्र)सन्तारकं भक्तिपुरस्सरं नत्वा ।

* * * *

अथ सर्वपदाद्यवर्णानां ग्रहणे प्राप्ते पदाद्यवर्णं विशिनष्टि—आत्रेष्टइति ॥

End:

अकारस्सङ्ग्रहः कृत इत्यर्थः । यथामतीति वचनं विदुषः महतः प्रति केवलं स्वविनयप्रदर्शनार्थमेव तन्न्यूनातिरिक्तादिदोषपरिजिहीर्षया ॥

Colophon :

ऋगवर्णिन्यकारसङ्ग्रहस्समाप्तः ॥

Foll. 82*b*—86*a* contain the Akārasaṅgraha in Ṛgvēda.

(*e*) विलिङ्ग्यम्.

VILIṄGHYAM.

Foll. 86*a*—89*b*.

Same work as that described under Nos. 963 and 964 of the D.C.S. MSS., Vol. II. By Nāgadēva, son of Yajñanārāyaṇa.

Complete.

(*f*) अवर्णदीपः.

AVARṆADĪPAḤ.

Fol. 90.

Same work as that described under No. 859 of the D.C.S. MSS., Vol. II. By Dakṣiṇāmūrti of Vatsagōtra.

Incomplete.

(*g*) शिक्षासमुच्चयः.

ŚIKṢĀSAMUCCAYAḤ.

Foll. 92*a*—101*a*. Fol. 91 contains a portion of Rāvaṇabhēṭ. Fol. 101*b* is left blank.

A treatise on Vedic phonetics dealing with the following topics:—

१. उपोद्घातप्रकरणम्.
२. वर्णोत्पत्तिप्रकरणम्.
३. वर्णप्रकरणम्.
४. वृत्तिप्रकरणम्.
५. स्वरभक्तिप्रकरणम्.
६. द्विरोष्ठ्यप्रकरणम्.
७. प्रयत्नप्रकरणम्.
८. नकारप्रकरणम्.
९. प्रकीर्णकप्रकरणम्.
१०. अनुनासिकप्रकरणम्.
११. मात्राप्रकरणम्.
१२. द्विरुक्तिप्रकरणम्.
१३. स्वरविषयप्रकरणम्.
१४. यमप्रकरणम्.
१५. क्रमप्रकरणम्.
१६. जटाप्रकरणम्.
१७. उच्चारणविषयः.

Wants a few stanzas in the beginning; otherwise complete.

Beginning :

आकाशवायुप्रभवश्शरीरात् समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यस्स शब्दः ॥

तमक्षरं ब्रह्म परं पवित्रं गुहाशयं सम्यगुशन्ति विप्राः ।
स्वकीयरूपाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति ॥
मन्त्रो हीनः स्वरतो वर्णतो वा . . यथेन्द्रशत्रुस्स्वरतोऽपराधात् ॥

Colophon :

इत्युपोद्घातप्रकरणम्.

End :

शिक्षा कल्पो व्याकरणं निरुक्तं ज्यौतिषं तथा ।
छन्दसां लक्षणं चेति षडङ्गानि विदुर्बुधाः ॥
अनुपदं चानुविदं छन्दोभाषासमन्वितम् ।
मीमांसान्यायतर्कांश्च उपाङ्गानि विदुर्बुधाः ॥
. . . . ब्रह्मलोके महीयते ।

Colophon :

इति शिक्षासमुच्चयस्समाप्तः ॥

(*h*) ऋक्प्रातिशाख्यव्याख्या—पार्षदवृत्तिः.
ṚKPRĀTIŚĀKHYAVYĀKHYĀ : PĀRṢADAVṚTTIḤ.

Foll. 102*a*—221*b*.

Same work as that described under No. 882 of the D.C.S. MSS., Vol. II, wherein see for the end.

Breaks off in the 18th Paṭala.

Beginning :

शुक्लाम्बरधरं (. . .) सर्वविघ्नोपशान्तये ॥

अष्टौ समानाक्षराण्यादितः । . . . . , ... एते स्वरा एते सन्ध्यक्षराणि च स्वरसंज्ञानि अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ इपरो दीर्घवत्प्लुतः इकारपरः प्लुतो दीर्घवत् विन्दतीति विन्दाति । अनुस्वारो व्यञ्जनं वा स्वरोवा इत्यनुस्वारः सर्वशेषो व्यञ्जनान्येव । एवकारो विभाषानिवृत्त्यर्थः ।

* * * *

Colophon :

इति पार्षदवृत्तौ परिभाषापठलस्समाप्तः ॥

R. No. 3912.

Palm-leaf. 16 × 1⅛ inches. Foll. 63. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Fol. 1*a* gives the name of the Kāśikāvṛtti.

Foll. 2*a*—7*b* contain the few Kārikās of the Kāsikāvṛtti.

(*a*) श्लोकवार्त्तिकव्याख्या.

ŚLŌKAVĀRTTIKAVYĀKHYĀ.

Foll. 8*b*—59*b*. Foll. 1*b*, 8*a*, 29*b* and 30 are left blank.

A commentary on the metrical Vārttikas of the Mahābhāṣya, as contained in the Kāśikāvṛtti of Vāmana and Jayāditya, which work has been described under No. 1313 of the D.C.S. MSS., Vol. III: by Rājarudra, son of Gannaya.

Wants the beginning; otherwise complete.

Beginning:

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥
ईदूतौ सप्तमीत्येव लुप्ते(ऽर्थ)ग्रहणाद्भवेत् ।
पूर्वस्य चेत्सवर्णोऽसावाडां भावः प्रसज्यते ॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥

* * * *

शरावत्यवधेः प्राग्दक्षिणो देशः प्राच्यः पश्चिमोत्तर उदीच्य इत्यत्रत्यो व्यवहारः ॥

Colophon:

इति राजरुद्रविरचिते श्लोकवार्त्तिकव्याख्याने प्रथमाध्यायस्य प्रथमः पादः॥

इको झल् । सन्नित्यनुवर्तते क्त्वेति निवृत्तम् । इगन्तात्परो धातोर्झलादिरसन् किद्भवति ।

End:

इरिकादिभ्यः प्रतिषेधो वक्तव्यः । इरिकावनम् ।

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ।
ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः ॥

इति वृक्षवनस्पत्यभेद इह गृहीतः ॥

Colophon:

इति राजरुद्रीये (काशिका)वृत्तिश्लोकव्याख्यानेऽष्टमस्याध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः ॥

आदिराजकाकतीयप्रतापरुद्रप्रधानवर्यस्य मुद्राक गन्नय्यसूनुरचितं वार्त्तिकव्याख्यानम् ॥

(b) वार्त्तिकव्याख्या- -अर्थप्रकाशिका.

VĀRTTIKAVYĀKHYĀ: ARTHAPRAKĀŚIKĀ.

Foll. 60a—63b.

A commentary on the Vārttikas of Vararuci or Kātyāyana: by Rāghavasūri, whose preceptor is stated to be Nārāyaṇa.

Incomplete.

Beginning:

स जयति (किल) करिवदनः कमलासनमुख्यदेवगणसेव्यः ।
कटतटविलुलितनिनदद्भ्रमरः कल्याणपूर्णरुचिराङ्गः ॥
शङ्खेन्दुकुमुदक्षीरकुन्दकुट्मलशालिनम् ।
तुरगाननमीडेऽहमिन्दिरानन्दमन्दिरम् ॥
देशिकवरं कृपालुं वन्देऽहं विहतहृदयसन्देहम् ।
नारायणेति नाम्ना ख्यातं सकलभुवनविख्यातम् ॥
कात्यायनप्रणीतानां वार्त्तिकानां विरच्यते ।
अर्थप्रकाशिकाख्या च व्याख्या राघवसूरिणा ॥

ऐ औच् । इहादिरन्त्येन सहेतेत्यनेन मध्यवर्तिनां वर्णानामजादिसंज्ञा विधीयमाना इकारादीनामिव णकाराद्यनुबन्धानामपि प्राप्नोति । ततश्च दधि णकारः, दधि ककारः, दधि ङकारः इत्यत्रेको यणचीति यणादेशः प्राप्नोति णकाराद्यनुबन्धानामज्ग्रहणेन ग्रहणात् ।

* * * *

प्राप्नोतीत्यत्राह—प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु नेति । प्रत्याहारेऽक्षर समाम्नाये ।

End:

सप्तमीति । गौरी इत्यत्र प्रगृह्यसंज्ञायां कर्तव्यमित्यर्थग्रहणं भवेत् । पूर्वस्य चेत्सवर्णोऽसाविति परिहरति आडाम्भावः प्रसज्यत इति । यदि पूर्वसवर्णदीर्घः स्यात् ङेराडामौ स्याताम्.

R. No. 3913.

Palm-leaf. 15½ × 1⅝ inches. Foll. 154. Lines, 8 in a page. Grantha and Tamil. Very much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal̤, Bhavani, Coimbatore district.

(*a*) पुरुषार्थरत्नाकरः.

PURUṢĀRTHARATNĀKARAḤ.

Foll. 3*a*—57*b*. Fol. 1*a* gives the names of the works in this MS. Foll. 1b and 2 are left blank.

Same work as that described under No. 5774 of the D.C.S. MSS., Vol. XII. By Raṅganāthasūri, disciple of Kṛṣṇānandasarasvatī.

Breaks off in the fifth Taraṅga.

(*b*) पञ्चाक्षरचक्रविधानम्.

PAÑCĀKṢARACAKRAVIDHĀNAM.

Foll. 58*a*—117*b*. Foll. 97*a* and 118 are left blank.

On the construction of the Pañcākṣaracakra for conducting therewith the worship of Śiva and Śakti.

Incomplete and in disorder.

Beginning:

स्नातश्शुक्लाम्बरधरः शुक्रवारादियुक्ते शुभदिने गोमयालिप्ते वितानदर्पण-लम्बककदलीस्तम्भाद्यलङ्कारयुक्ते पुण्याहजलेन प्रोक्षिते शुद्धजलेन पादौ प्रक्षाल्याचम्य प्रविश्योदङ्मुख आसीनमुपविश्य परितो यवका(यावक)पटं प्रसार्य सम्भृतसकलपूजाद्रव्यसम्भारः पूर्वोक्तगुणविशिष्टतिथौ श्रीसशिवकाम . . . . चिदम्बरेश्वरप्रसादसिद्ध्यर्थं पाञ्चभौतिकचिदम्बरेश्वरार्चनाचक्रे श्रीशक्ति-सहितचिदम्बरेश्वरपूजां करिष्य इति सङ्कल्प्य प्राणानायम्य ।

* * * *

मध्ये ह्रीं परंज्योतिरिति पञ्चाक्षराणि क्रमेणैकमेकमक्षरं लिखित्वान्तरकोष्ठस्थ-ह्रीङ्कारपार्श्वद्वययोर्हंस हंस इति जपित्वा तद्बहिः कोष्ठचतुष्केषु तत्तद्दक्षिण-पार्श्वे हर इति हर इति च लिखेत् ।

End:

द्वितीयं च चतुर्थं च पञ्चमाद्यतृतीयकम् ।
तृतीयं पञ्चमाद्यं च द्वितीयं च चतुर्थकम् ॥
चतुर्थं च तृतीयं च द्वितीयं पञ्चमाद्यकम् ।

पञ्चाक्षरमथः पङ्क्तौ क्रमेण विलिखेद्बुधः ।

* * * *

त्वं नो अग्ने वरुणस्य विद्वान् । सुवर्णः पन्थामभयं कृणोतु । असु-
रन्तमभया . . . . . । इमं मे वरुण
. . . . गण्डोष्ठद्वयदन्तपङ्क्तियूगले मूर्धास्ययोश्च स्वराट् ।
दोःपत्सन्धितदग्रपार्श्वयुगले पृष्ठे च नाभोदरे . . . . कक्ष.

(e) शल्यादितन्त्रजालम्.

ŚALYĀDITANTRAJĀLAM.

Foll. 119a—151b. Foll. 152—154 gives the Pañcākṣaracakraviṣaya.

On the means and methods of taming certain wild animals, etc., so as to keep them under one's control and do according to one's desires, etc.

Incomplete and in disorder.

Beginning :

प्रवक्ष्याम्यथ देवेशि शल्यतन्त्रं सुदुर्लभम् ।
साधकानां हितार्थाय सर्वेषां हितकारकम् ॥
नराणां तोय . . . . णां तु विशेषतः ।
गजवाजिखरोष्ट्राणामजानां महिषस्य च ॥
व्याघ्रभल्लूकचित्राङ्गमृगधूर्तकदंष्ट्रिणाम् ।
सारङ्गमृगखड्गानां (वराहस्य) वृषस्य च ॥

* * * *

एतेषां च समायुक्तं प्रयोगं कथयामि ते ।

* * * *

Colophon :

इति शल्यतन्त्रः ॥

End :

तत्पित्तमात्मबीजं तु धूर्तबीजसमन्वितम् ।
मर्दयित्वा प्रदातव्यं पूर्णं तच्च शक्रुद्भवेत् ॥

Colophon :

इति भारद्वाजतन्त्रः ॥

वृश्चिकाहिमरीचस्य यस्य मूर्ध्नि विनिक्षिपेत् ।
षण्डो भवत्यसौ तावत् यावत्तन्नापनीयते ॥
अनूराधा च नक्षत्रं लाङ्गलीमूलिकां रिपोः ।
निखनेत्प्रस्रवस्थाने षण्डत्वं जायते नृणाम् ॥

* * * *

संयोगादन्यसत्कारं भूपते लभते नरः ।
पण्यं च विक्रयं लाभं बलं विजयमेव च ॥
सौभाग्यं दुर्भग . . . . यशः प्राप्नोति योषिताम् ।
सौवर्चलावचाहिङ्गुमीनसिक्तनिशाकृतम् ॥

सौविरागः रुक्कणायो.

R. No. 3914.

Palm-leaf. 17 × 1⅝ inches. Foll. 34. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

तत्त्वप्रकाशः, सव्याख्यः.

TATTVAPRAKĀŚAḤ WITH COMMENTARY.

A treatise by Bhōjarāja explaining the doctrines of the Śaiva-Philosophy. It is followed by a short commentary by Aghōraśivācārya.

Complete.

Beginning :

(देवं) प्रणम्य षट्त्रिंशत्तत्त्वातीतं सशक्तिकम् ।
व्याख्यां तत्त्वप्रकाशस्य स्फुटां लघ्वीं करोम्यहम् ॥
अद्वैतवासनाविष्टैः सिद्धान्तज्ञानवर्जितैः ।
. . तोऽन्यथैवान्यैर्यत्ततोऽस्माकमुद्यमः ॥

तत्र तावदाचार्यः प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्त्यर्थं सिद्धान्तशास्त्र(परिज्ञान)निमित्तं सकलतत्त्वातीतं निष्कलं परमशिवमाद्ययार्यया स्तौति—

चिद्घन एको व्यापी नित्यस्सततोदितः प्रभुश्शान्तः ।
जयति जगदेकबीजं सर्वानुग्राहकः शम्भुः ॥

चिच्छब्देनात्र ज्ञानक्रिये विवक्षिते । तदुक्तं मृगेन्द्रे—चैतन्यं दृक्-क्रियारूपमिति । चिदेव घनो देहस्स्वभावो यस्य स चिद्घनः न तु कर्म-कालादीनामीश्वरत्वादीनामिव जडः ।

End:

एतदेव प्रपञ्चयति—

यस्याखिलं करतलामलकक्रमेण
देवस्य विस्फुरति चेतसि तत्त्वजातम् ।
श्रीभोजराजनृपतिस्स शिवागमोत्थ-
तत्त्वप्रकाशमसमानमिमं व्यधत्त ॥

यश्शास्त्रेषु शिवोदितेषु परमं व्याख्यातृभावं गतः
सामान्येष्वपदादिकेषु च सुधी . . . . ।
तेनाघोरशिवेन शैवतिलकैस्संप्रार्थितेनादरात्
सङ्क्षेपेण गुरूत्तमेन विवृतस्तत्त्वप्रकाशः स्फुटम् ॥

Colophon:

इति अघोरशिवाचार्यविरचिता तत्त्वप्रकाशवृत्तिः समाप्ता ॥

Foll. 18*a*—24*b* contain the Yantravyākhyā (wants the beginning and the end). Foll. 25—34 contain a portion of the Śabdakaustubha.

R. No. 3515.

Palm-leaf. 16¼ × 1¼ inches. Foll. 64. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Foll. 1*a*—49*a*. Fol. 50*a* contains the Daṇḍapramāṇaviṣayavacana. Foll. 49*b* and 50*b* are left blank.

Same work as that described under No. 4134 of the D.C.S. MSS., Vol. VIII. By Gaurīkānta.

Breaks off in the Śabdaparicchēda.

(*b*) रामाभिषेकचम्पुः.

RAMĀBHIṢĒKACAMPUḤ.

Foll. 51*a*—64*a*. Fol. 64*b* contains a eulogy addressed to Viṣṇu.

A treatise in prose and verse describing the story of the coronation of Śrī Rāma. The author, whose name is not given, was the son of Śaṅkarayajvan and grandson of Sundararājayajvan.

Contains the Āraṇyakāṇḍa only complete.

Beginning:

आयार(राध)याम्यनिशमञ्जनशैलधाम्नः
पादारविन्दयुगलं परमस्य धाम्नः ।
यत्रार्पितं किमपि यत्नमवाप्य पुष्पं
सूते फलानि विविधानि सुदुर्लभानि ॥
मन्दस्मितस्फुरितमुग्धमुखारविन्दं
कन्दर्पकोटिशतसुन्दरदिव्यमूर्तिम् ।
आताम्रकोमलजटाघटितेन्दुरेख-
मालोलये वटतटीनिलयं दयालुम् ॥
प्रविश्य गहनं वनं प्रमदया दयालुः प्रभुः
प्रभूतमृगसङ्कुलं प्रमुमुदे रघुग्रामणीः ।
प्रभिन्नगजमस्त(क)प्रसरदास्रपूरस्खल-
न्नखायुधकुलाग्रणीनखपदारुणं दारुणम् ॥

अथ विविधवीरुधाश्लिष्टविकटविटपिकोटरकुटीरकुक्कुटीराशिततत्र(कम्र)रसितवलीमुखकुलचरितशिलीमुखमुखर

* * *

कृतलोकविराधनं विराधनामानमद्राक्षीत् ।

End:

तस्यां शिखावति विहाय तनुं गताया-
मम्भो(ज)सम्भवगृहाङ्क(ङ्ग)णमाशु रामः ।
. . . . पयसां निधानं
पम्पासरस्सरसतामरसं प्रपेदे ॥

Colophon:

इति श्रीमत्सुन्दरराजयज्वसूनुशङ्करयज्वतनय . . . . . विरचिते रामाभिषेकनाम्नि चम्पुमहाकाव्ये आरण्यकाण्डस्समाप्तः ॥

R. No. **3916.**

Palm-leaf. 16 × 1 inches. Foll. 192. Lines, 7 in a page. Grantha. Very much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḻ, Bhavani, Coimbatore district.

खण्डनखण्डखाद्यटीका.

KHAṆḌANAKHAṆḌAKHĀDYAṬĪKĀ.

Same work as that described under R. No. 3870(*f*) ante.

Contains the first Paricchēda incomplete.

R. No. **3917.**

Palm-leaf. 17 × 1¼ inches. Foll. 179. Lines, 6 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḻ, Bhavani, Coimbatore district.

मीमांसानयविवेकदीपिका.

MĪMĀṀSĀNAYAVIVĒKADĪPIKĀ.

Same work as that described under R. No. 1552 ante. By Varadarāja, son of Raghunātha of Ātrēyagōtra and disciple of Sudarśanācārya.

Contains from the second Pāda of the first Adhyāya to the end of the first Pāda in the second Adhyāya complete, and the second Pāda of the second Adhyāya incomplete.

R. No. **3918.**

Palm-leaf. 15¼ × ⅞ inches. Foll. 111. Lines, 6 in a page. Grantha Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḻ, Bhavani, Coimbatore district.

(*a*) पाणिनिसूत्रविवरणम्.

PĀṆINISŪTRAVIVARAṆAM.

Foll. 2*a*—53*a*. Fol. 1 gives a portion of the Ṇatvabādhāvidhūnana. Foll. 12*b*—14*b*, 36*b* and 53*b* are left blank.

A treatise explaining the meaning of the Sūtras of Pāṇini.

Incomplete.

Beginning :

नारायणाब्जभवहैमवतीशरूपं
श्रेयस्करं प्रणमतां धृतचन्द्रमस्कम् ।
साधूपलब्धमनिदंप्रथमोक्तिलक्ष्यं
ब्रह्माविरस्तु मम हृद्यमितप्रभावम् ॥

नारायणः विष्णुः स च अब्जात्पद्मात् भवः उत्पत्तिर्यस्य सः अब्जभवः ब्रह्मा स च; अवर्ज्यो जन्माद्युत्तरपदो व्यधिकरणबहुव्रीहिरिति वामनः। सच्छास्त्रजन्मा हि विवेकलाभ इत्यादौ तथा दर्शनात् । हिमवतोऽपत्यं स्त्री हैमवती पार्वती तस्या ईशः शिवः स च

* * * *

उत्प्रेक्षयोरुपमायाश्च संसृष्टिरिति । अ इ उण् ऋलृक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल् इति चतुर्दशेमानि सूत्राणि महेश्वरादुत्पन्नानि । हलन्त्यम्—आद्योच्चारणेऽन्त्यं हलित् स्यात् । अतस्सूत्राणामन्त्या णादय इत्संज्ञाः । आदिरन्त्येन सहेता ।

End :

झरो झरि सवर्णे इति सूत्रस्थसवर्णपदवैयर्थ्यपरतया भाष्यवाक्यनयनं तु अस्मदनुकूलम् । तदवलम्बनेनैव हि व्यवहाराय संज्ञाकरणमित्याक्षेपः परिहार्योऽस्माभिरित्यलं बहुना । अणुदित्सवर्णस्य चाप्रत्ययः.

(*b*) सूत्रार्थशोधनम्.
SŪTRĀRTHAŚŌDHANAM.

Foll. 54*a*—90*a*. Fol. 90*b* is left blank.

A treatise purporting to explain the meaning of several Sūtras of Pāṇini refuting Manōramā, Kaustubha and Tattvabōdhinī: by Bhāskara, son of Rāmasvāmimakhin.

Incomplete.

Beginning :

शिवं प्रणम्याधुनिकोक्तिमद्भुतां मनोरमाकौस्तुभतत्त्वबोधिनीः ।
सुनीलकण्ठाध्वरिवाग्झरीरपि स्फुटं क्वचिद् दूषणये कुतूहलात् ॥
श्रीरामस्वामिमखिनां तनयो भास्कराभिधः ।
सूत्रार्थशोधनं नाम चित्रां वितनुते कृतिम् ॥

नन्विह सूत्रार्थो दुर्बोधः अन्योन्याश्रयात् । तथा हि—हलिति चतुर्दशसूत्रस्थस्य लकारस्येत्संज्ञायामादिरन्त्येनेति हल्संज्ञा, हल्संज्ञायां सिद्धायां चतुर्दशसूत्रस्थस्य लकारस्य हल्त्वाद्धलन्त्यमितीत्संज्ञा । तदेवमित्संज्ञा हल्संज्ञामाश्रयति सा च तामिति चेदेतत्परिहाराय चत्वारः पक्षा भाष्यकारैरुपन्यस्ताः ।

End:

अन्त्य(ऽथा)वृत्त्यर्थं सूत्रमिति कौस्तुभ एवाङ्गीकृतत्वेन तदर्थं स्वपदानुवृत्त्यवश्यम्भावात् । तदनुवृत्तौ हि स्वपदेन प्रधानस्यादेः परामर्शः ततोऽन्त्यव्यावृत्तिश्च सङ्गच्छते । अतश्च यण्शब्दस्य संज्ञात्वेन पूर्वं प्रकृतस्य सूत्रपरमतात्पर्याविषयत्वात्प्रधानत्वाच्च स्वपदेन परामर्शः स्यात् । यण् . . . . इत्याक्षेपोऽपि सङ्गच्छते । परिहारस्तूक्त एव.

(*c*) श्रौतप्रयोगकारिका.

ŚRAUTAPRAYŌGAKĀRIKĀ.

Foll. 91*a*—100*a*. Fol. 100*b* contains Liṅgāṣṭakaślōkas.

A treatise in verse dealing with the ritualistic procedure in connexion with the performance of Śrauta sacrifices.

Wants the beginning and the end.

Beginning:

वक्ष्ये साङ्कर्यमेषां प्रथमचरमतालक्षणं तत्फलाना-
मग्निष्टोमाग्निसंयोजन(मिद)मनुनिष्पादिनीं प्राप्तिमन्याम् ।
सूते द्यावापृथिव्ये विधिरनु(यमनु) निष्पादिनैयत्ययुक्तां
जुह्वामाज्यस्य बर्हिः प्रतिनयनमिताज्यप्रयाजव्यवस्थाम् ॥

End:

अन्यस्मात् साङ्ग्रहण्यां सुलभमपि फलं कीर्त्यतेऽङ्गत्वसिद्ध्यै
स . . . . प्रथनमपि तथाध्वर्यवत्वं नियन्तुम् ।
प्राप्तात्मत्वान्यलभ्यग्रहविषयविधिः काम्यशुक्राग्रतादि ?
धारा . . . . परिणमदपृथक्सिद्धितस्सम्भवाच्च ॥

* * * *

(ऐ)कार्थ्यान्न्यायस्य किं वा फलमखिलपदैर्ब्रह्मनिर्णयसिद्धेः ॥

Fol. 101 contains a portion of the Śabdōdāharaṇakāvyavyākhyā.

(*d*) सूर्यदण्डकः.

SŪRYADAṆḌAKAḤ.

Foll. 102*a*—111*b*.

A eulogy in the Daṇḍaka metre addressed to Sun.

Wants the beginning; otherwise complete.

Beginning:

कस्तेजसास्ते पुरस्तादशस्तार्क . . . . रिन्दुर्विहस्ताशयस्तारकाभिस्समस्ताभिरस्ताभिरालोकविस्तारतस्तावतस्ते पुनस्तादृशाभोगशस्तामहस्ता . . . . . .

* * * *

नतध्वान्तभेदिन्ममाभ्यन्तरध्वान्तमुद्भिन्धि तुभ्यं निबद्धोऽञ्जलिः ।

End:

आदित्य तुभ्यं नमस्सर्वलोकात्मने देव तुभ्यं नमस्सर्ववेदात्मने देव तुभ्यं नमस्सर्वदेवात्मने तुभ्यं नमः ॥

Colophon:

सूर्यदण्डकं समाप्तम् ॥

R. No. 3919.

Palm-leaf. $13\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 152. Lines, 7 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

(*a*) पाण्डवाभ्युदयम्.

PĀṆḌAVĀBHYUDAYAM.

Foll. 1*a*—38*b*. Fol. 15*b* contains one Bandhaślōka.

A treatise in eight Sargas narrating the story of the Pāṇḍavas: by Śivasūryamakhin.

Contains the Sargas one to eight complete.

Beginning:

श्रियः प्रतिष्ठाश्रितकल्पशाखी चकास्ति लोके किल चन्द्रवंशः ।
अवातरन्नत्र विशुद्धशीला ययातिपूरुप्रमुखा नरेन्द्राः ॥
तदन्वयाम्भोनिधिमध्यजाता युधिष्ठिराद्या भुवि कीर्तिमन्तः ।
बभूवुरुर्वीपतयोऽत्युदारा दिवोऽवतीर्णा इव कल्पवृक्षाः ॥
कदापि ते हास्तिननामपुर्यां कृतास्पदाः कौरवविप्रकारात् ।

प्रदक्षिणीकृत्य भुवं नरेन्द्राः कलिन्दजातीरमगुस्सुरम्यम् ॥

* * * *

इति बहुचित्रसूक्तिमति पाण्डुसुताभ्युदये
रसिकजनाग्रणीहृदयनर्तनरङ्गभुवि ।
गुरुकरुणैकधुर्यशिवसूर्यमखीन्द्रकृतौ
विलसतु सर्ग एष विदुषां प्रथमोऽनुमतः ॥

Colophon :

इति पाण्डवाभ्युदये प्रथमस्सर्गः ॥

End

इत्थं सर्वर्तुरम्योपवनपरिवृते पद्मिनीजालयुक्ते
शक्रप्रस्थे धनेशाभ्यधिकविभववान् धर्मसूनुर्महात्मा ।
तस्मिन् भ्रातर्युपेन्द्रप्रियसुहृदि तदा फल्गुने न्यस्तभारः
स्त्रीभिस्सार्धं विजह्रे सुरपरिबृढवत् सर्वलोकैकवीरः ॥
इति बहुचित्रसूक्तिमति पाण्डुसुताभ्युदये
रसिकजनाग्रणीहृदयनर्तनरङ्गभुवि ।
गुरुकरुणैकधुर्यशिवसूर्यमखीन्द्रकृतौ
विलसतु सूरिणामनुमतोऽष्टमसर्गवरः ॥

Colophon :

इति श्रीपाण्डवाभ्युदयनाम्नि महाकाव्येऽष्टमस्सर्गः ॥

(*b*) कृष्णविलासोदाहरणम्.

KṚṢṆAVILĀSŌDĀHARAṆAM.

Foll. 39*a*—43*b*.

Same work as that described under R. No. 3879 ante. By Guru-svayaṁbhurāma.

Complete.

(*c*) चिकदेवराजवंशप्रशस्तिः.

CIKADĒVARĀJAVAṀŚAPRAŚASTIḤ.

Foll. 44*a*—60*a*.

This work purports to be a eulogy on Raṇakanthīrava, Śrīraṅgarāja and Cikadēvarāja who ruled over Mysore.

Complete.

Beginning :

अमृतजलधिं निर्मथ्योच्चैः प्रतीपविपाकिनि
प्रसरति हलाहाले हाहारवाकुलरोदसि ।
द्रुवति दिविषत्सङ्घे दीने विषं झटिति ग्रस-
न्नवतु भगवानव्याजं नश्चिरं करुणानिधिः ॥

* * * *

शास्त्रज्योतिर्दर्शिताशेषकृत्याः प्रीत्या नित्यं वन्दनीया महान्तः ।
भद्रा लक्ष्मीर्वाचि येषां निषण्णा या साधूनां कल्पते मङ्गलाय ॥
अधिवसति सुचर्ये तिर्मलाचार्यवर्ये
निखिलमतरहस्योद्घाटने भद्रपीठीम् ।
व्यरमदुरगराज चातुरीशब्दमात्रे
गलितनिजदुरुक्तिर्गीष्पतिः खं जगाहे ॥

साहित्यं सरसीरुहासनवधूसाम्राज्यसिंहासनं
विद्या विश्वमिदं चतुर्दशतया जेतुं समुज्जृम्भते ।
दानं दिव्यगवीविहायितकलादुर्वारगर्वापहं
सौजन्यं पुनरन्यदेव जगति श्रीतिर्मलाचार्य ते ॥

* * * *

विदुषां चिकदेवेन्दोस्तिर्मलाचार्यः प्रसादमानेता ।
जलनिधिजलं पयोदादन्यो वद चातकाय किमु दाता ॥

* * * *

उमासखं देवमनन्यभावस्सदैव चित्ते किल यो विधत्ते ।
एणाङ्कचूडामणिरेधयेत श्रीरङ्गभूपालकबालचन्द्रम् ॥
अद्य प्राप्ता निखिलजगती निर्वृतिं कोविदाना-
मद्य श्रेयोऽजनि मखभुजामद्य सौहित्यलाभः ।
राजोत्तंसश्चरणरणकण्ठीरवक्ष्मापतीन्दो
येन प्राप्ता जलधिवसना वीरपत्नीपदं ते ॥

श्रीकण्ठीरवभूपुरन्दर भवत्प्रत्यर्थिपृथ्वीपति-
श्रेणीप्राणसमासमागमपरीहाराय किं त्वद्दशः ।
आक्रन्दन्ति दिगन्तकन्दरिगुहागम्भीरसंजृम्भण-
त्वद्यानोद्यदमन्ददुन्दुभिरवप्रध्मायमाना दिशः ॥

* * * *

जयरमावरदेशयभूपतेरजनि दानजलैरयमर्णवः ।
इतरथा भविता किमुदारता तदुदितेषु शिलापशुशाखिषु ॥

कल्याणयक्षितिप यत्तव दिग्वधूनां
कर्पूरचन्दनविशोभि यशोऽभिरामम् ।
दिग्दान्तिनां मदमषीमलिनेतराभ-
कर्णप्रकीर्णकमुदं तदिदं तनोति ॥

दूना नानारूपसंसारतापैर्जानानान्यन्नैव चेतश्चकोरी ।
ध्यायं ध्यायं कम्पयेन्दोः प्रसादं प्रीतिं धत्ते हन्त भीतिं जहाति ॥

* * * *

जम्भारिश्चिकदेवरायनृपतिर्भूत्वा यशोमौक्तिका-
न्याकल्पं धरणेरयं निजगुणैराकल्पमाकल्पयेत् ।
इत्येषा चिक्कदेवदुर्गवपुषं मेरुं समासेदुषी
देवानां नगरी तदन्तिकचरी भूता दरीदृश्यते ॥

* * * *

हरिरादिवराहतयैव पुरा वसुधामुदधेरुदधादथ ताम् ।
वहते चिक्कदेवमहीपतिरित्यवलोकितुमागत एव स किम् ॥

अनन्तगिरिसीमनि द्विशतगर्तमात्रीं भुवं
न्यरुद्ध निखिलं फलं निखिलभुक्तिसिद्धामपि ।
कुमारयविभुस्त्वयि स्वजनपोषणेकाय(णैकार्थ) मे
वयं बत कुटुम्बिनो यदुचितं तदालोच्यताम् ॥

End:

स्वस्ति श्रीमन्निरवधिगुणमणिकल्याणशैलभूतानाम् ।
आश्रितवैदिकविद्वत्कविकुलसुरसालशीलानाम् ॥
हरिहरचरणस्मरणस्वर्धुनिनिर्धूतनिजरजस्तमसाम् ।

दीनानाथजनानामभिमतदानावतीर्णानाम् ॥

* * * *

सदसद्विवेचनचणप्रज्ञानां नागपार्थसुमतीनाम् ।
परबलभेदनकृतिनश्चिरं सुधर्माधिवासस्य ॥
भूसुरपोषणकुतुकाद्भुवमवतीर्णस्य देवराजविभो ।
करुणा भवति श्रीभरभरिता भवतादनन्यसामान्या ॥
अधिवसतु मन्दिरोदरमुरो हरेरिव तवेन्दिरा नियतम् ।
धर्माविरोधिनस्ते सिध्यन्तु मनोरथास्सर्वे ॥

* * * *

इत्थं हरिहरपूजाप्रणामवेलासु साधुसंसदि च ।
त्रेताग्निसन्निधावप्यभ्यर्थनमनुदिनं कलयन् ॥
शिवसूर्यमखी किञ्चित्स्वगृहोचितकृत्यमभिमतं ब्रूते ।
आफाल्गुनसितसप्तम्यासिष्महि वामलूरुपुरवर्ये ॥
वयमिह भवदवलम्बनमिह परत्र च हितं विनिश्चित्य ।
सुखमास्महे भवन्तो न जहतु नो युष्मदायत्तान् ॥
कमलापरिबृढकरुणा भवतु श्रीदेवराजभूपस्य ।
तस्यास्य च तव भवतां भवन्तु युष्माकमस्माकम् ॥

Fol. 60 contains some erotic stanzas. Foll. 61*a*—66*b* contain some anthological stanzas.

(*d*) श्यामलादण्डकः.
ŚYĀMALĀDAṆḌAKAḤ.

Foll. 67*a*—69*b*.

Same work as that described under No. 10837 of the D.C.S. MSS., Vol. XIX.

Complete.

Foll. 69*b*—71*b* contain the Dēvīcūrṇikā. Foll. 71*b* and 72 contain Daśāvatāravisayaślōkas. Foll. 72*b*—74*a* contain Kṛṣṇastuti. Foll. 74*a*—75*a* contain the Kāntimatyambikāstuti. Foll. 75*a*—77*a* and 80*b*—83*b* contain the Śivagadya. Foll. 77*a*—78*b* contain Mīnākṣīstava. Foll. 78*b*—80*a* contain the Sūryastōtra.

(*e*) वेङ्कटेशनृपप्रशस्तिः.
VĒṄKAṬĒSANṚPAPRAŚASTIḤ.

Foll. 83*b*—85*a*.

A work purporting to extol the king Vēṅkaṭanarapāla who ruled over the Karṇāṭaka country.

Incomplete.

Beginning :

विन्ध्यमन्दररूपधुरन्धरगन्धसिन्धुरगण्डतलान्तरमन्दकन्दलदम्बुनिरन्तर-गन्धतुन्दिलताविलसद्धरिदन्तसन्ततसक्तमिलिन्दकवृन्दवन्धुपगीतयशोभर! वङ्ग-कोङ्कणभूपसेवित वेङ्कटेश विभो! विजयी भव।

End :

सरसलालितामित्र! हरसमानचरित्र सुविशङ्कटार्यगुण तिरुवेङ्कटार्यसुत-कृष्णपत्कमलगुरुमाननासादर सुकृष्णयप्रमुखपेरुमाळयसहोदरज! कर्ण एवास्ति यदि वर्णनं त्वयि न किमु सङ्घटेत गभीर वेङ्कटेश्वर धीर वितरणोदारजय-कृतरणोदारजय.

Fol. 85 gives the Śaṅkrāntinirṇayavacanas. Foll. 86 and 87 contain the Vēṇuvanēśvarīstuti (Prākṛta). Foll. 89 and 90 give the Vēṅkaṭēśa-khaḍgastuti.

(*f*) कुमारविजयचम्पुः.

KUMĀRAVIJAYACAMPUḤ.

Foll. 91*a*—115*b*.

A treatise in prose and verse describing the story dealing with the incidents that led to the birth of Kumāra or Subrahmaṇya: by Bhās-karayajvan, son of Śivasūryādhvarin.

Contains the Ucchvāsas one to four complete.

Beginning :

वन्दे गजेन्द्रवदनं शिवयोर्हृदन्तरुद्यत्प्रमोदनिकरायितदेहभाजम्।
वेदान्तवेद्यमखिलामरराजरत्नकोटीरकोटिमणिरञ्जितपादपद्मम्॥

अपि च—

सिध्यतु मनोरथो मे प्रसन्नगणनाथ तव दयासुधया।
रदकौमुदीनिरस्तप्रत्यूहसमूहशार्वरन(त)मस्ते॥

किञ्च—

कञ्जासनेन्द्राद्यजरालिरत्नकिरीटराजच्चरणस्स एषः।
इष्टानि दद्यादखिलाण्डनाथानाथस्सदा नः करिकाननेशः॥

अन्यच्च—

शिवस्साक्षादन्तस्स्थिरतरमहामोहतिमिरं
निरस्य ज्ञानाब्जं सदयमयमुन्मीलयति यत् ।
अतो विद्वद्बृन्दैर्गदितशिवसूर्याध्वरिवर-
प्रसिद्धिं वन्देऽहं गुरुमखिलविद्यापरिणतिम् ॥
श्रीवत्सान्वयवारिधेरुदभवच्छ्रीमान् कलानां निधिः
सन्मार्गैकरतो द्विजावलिमुदां हेतुः सुधास्यन्दिगौः(गुः) ।
यस्सर्वज्ञशिखामणिर्विशदयन् कीर्त्या दिशामण्डलं
विख्यातशिवसूर्ययज्वतिलको लोकेषु किं न श्रुतः ॥

* * * *

तस्यात्मजो गुणनिधिः करुणारसानां
पात्रं पवित्रमिह भास्करयज्वनामा ।
गौरीसुतस्य चरितं कुरुते मनोज्ञं
[1]चम्पूप्रबन्धमृजुभावरसानुविद्धम् ॥
सोऽहं मितंपचवचा अपि वाचमेनां
मूर्खस्तवेन नितरां कलुषां गुरूणाम् ।
तेषां करोमि दयया विशदैर्विशुद्धां
गाङ्गेयपावनलसच्चरितामृतौघैः ॥
स्वल्पोऽपि वाग्विभव एष तनोतु मोदं
भूयांसमेव विदुषां हृदये मदीयः ।
बालोक्तिरादरभरात् भुवनेन किं वा
कुर्यात् प्रमोदमधिकं सुजनावलीनाम् ॥

* * * *

अथ महोत्सवे निवृत्ते देवदेवमुमापतिमामन्त्र्य हरिविरिञ्चादयः स्वं स्वं धाम प्रतिपेदिरे ॥

Colophon:

इति भास्कराध्वरिविरचिते कुमारजयचम्पुप्रबन्धे प्रथम उच्छ्वासः ।

End:

गिरिजातनुजोऽथ मृगीसुतया स तया सह सर्वगुणोन्नतया ।

---

[1] चम्पुं कुमारविजयाभिधमप्युदारम्—इति पाठान्तरम्.

कमलातनयासुविलायकलाकमनीयचरित्रविचित्रितया ॥
सदने विजने गृहकेलिवने कलकोकिलकाकलिकाकलिते ।
सरसीतटसीमनि सारसिकारसितानुगते विजहार सुखम् ॥

Colophon:

इति भास्कराध्वरिविरचिते कुमारविजयचम्पूप्रबन्धे तुरीय उच्छ्वासः ॥

Foll. 116*a*—117*a* contain the Śivarātrīvratanirṇaya. Fol. 117*b* contains the Śivastuti. Foll. 118*a*—122*b* contain the Vēṅkaṭabhūpālapraśaṁsā. Fol. 123 contains some Cāṭuślōkas. Fol. 124 contains the Prāyaścittavacanas and Candraśēkharāṣṭōttaranāmāvali. Foll. 125*a*—128*a* contain the Cidaṁbaracakravidhāna as found in the Makuṭāgama Fol. 128*b* gives the Paramēśvarastuti. Foll. 129*a*—131*b* contain a portion of Pañcamukhēśvarapūjā. Foll. 132*a*—134*a* contain the Hariharastōtra. Fol. 134*b* contains several Ślōkas in praise of Śivasūryādhvarin. Foll. 135 and 136 contain the Śūlapāṇistuti.

(*g*) अखिलाण्डनायिकादण्डकः.
AKHILĀṆḌANĀYIKĀDAṆḌAKAḤ.

Foll. 137*a*—140*a*.

A eulogy in the Daṇḍaka metre addressed to the goddess Akhilāṇḍēśvarī worshipped at Jaṁbukēśvaram near Trichinopoly: by Bhāskara, son of Śivasūryadīkṣita.

Complete.

Beginning:

कदम्बतरुमञ्जरीकलितकर्णपूरोज्वलं
कलक्कणविपञ्चिकाकलनदत्तकर्णोत्सवम् ।
करस्फुरितशारिकं कठिनपीनतुङ्गस्तनं
जगत्त्रितयमङ्गलं जयति मन्मनोमन्दिरे ॥

जय जय जगदेकमातः शिवे देवि जम्बूपतीशानहृन्मोदकृन्मारसञ्जीवनोद्दामशोभाभिरामाखिलाङ्गोज्वले ।

End:

अथाप्यादरात् बाललीलावचो मातुरत्यन्तमोदं विधत्ते शिवे तन्मया बालिशेनानिशं गुम्भितं चापराधं क्षमस्वाखिलाण्डेश्वरि त्वं सदा पाहि मां दीनमीशप्रिये देवि तुभ्यं नमो देवि तुभ्यं नमः ॥

शिवसूर्यदीक्षितगुरोर्भास्करनाम्ना तनूभुवा रचितः ।

अखिलाण्डनायिकायाः कुर्याच्चिरमेष दण्डकः प्रमदम् ॥

Fol. 140 contains the Gauristuti.

(*h*) शिवकामसुन्दर्यम्बादण्डकः.

ŚIVAKĀMASUNDARYAMBĀDAṆḌAKAḤ.

Fol. 141.

A eulogy in the Daṇḍaka metre addressed to the goddess Śivakāmasundarī worshipped at Cidambaram.

Complete.

Beginning :

जय जय शिवकामसुन्दर्युमे देवि रम्याकृते भक्तराजीहृदन्तस्स्थिताज्ञानगाढान्धकारप्रभेदस्फुरद्बालसूर्यायमाणैर्नखैर्भूषिते पादकान्त्या निरस्तारुणाभाम्बुजे जङ्घयाधःकृतानङ्गतूणीयुगे कन्तुजिन्मोहदोरूद्वयीशोभिते . . . .

* * * *

को वा भृशं शक्नुयाद्वेदवाचां सुदूराणि दिव्यानि ते सुचरित्राणि को वेद भूम्यामुमे ।

End :

अपराधं शिवे क्षम्यतां सर्वमेतत्त्वया सर्वलोकेश्वरि त्वं सदा पाहि मां तुभ्यमस्तु प्रणामाञ्जलीनां शतम् ॥

Foll. 142*a*—146*b* contain the Pārvatīstōtra, and some Nāgabandhādiślōkas. Foll. 147*a*—152*b* contain the Gaṇapatistuti, Kṛṣṇastuti, Śivastuti, Cāṭuślōkas and Bandhaślōkas.

R. No. **3920.**

Palm-leaf. $15\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 240. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* gives the name of this work. Foll. 1*b* and 2 are left blank.

आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAVṚTTIḤ.

Foll. 3*a*—191*b*. Foll. 192—240 are left blank.

Same work as that described under No. 3 of M. Seshagiri Sastri's Report No. II and R. No. 973 ante. By Kauśikarāma.

Contains the Praśnas one to six complete.

R. No. **3921.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 203. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḻ, Bhavani, Coimbatore district.

शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवर्त्तिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ : NYĀYAKARPŪRAVARTTIKĀ.

Same work as that described under R. Nos. 765 and 1469 ante. By Rājacūḍāmaṇidīkṣita.

Contains the Adhyāyas six to eight complete; the first Pāda in the ninth Adhyāya incomplete, and the first Adhyāya (Pādas two and three complete and Pāda fourth incomplete) incomplete.

Foll. 27*b*, 113*b*, 116*b* and 203*b* are left blank.

R. No. **3922.**

Palm-leaf. 15⅞ × 1⅜ inches. Foll. 207. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry Narasiṁha Śāstrigaḻ, Bhavani, Coimbatore district.

तत्त्वचिन्तामणिप्रकाशव्याख्या, तर्कचूडामणिः.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ : TARKACŪḌĀMAṆIḤ.

Same work as that described under No. 4102 of the D.C.S. MSS., Vol. VIII. By Dharmarājādhvarin.

Contains from the Anumāna to the end of the Mōkṣavāda.

R. No. **3923.**

Paper. 12½ × 1⅜ inches. Foll. 62. Lines, 9 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḻ, Bhavani, Coimbatore district.

Foll. 24*b*, 61*b* and 62 are left blank.

न्यायकौस्तुभः.

NYĀYAKAUSTUBHAḤ.

A treatise on Navya Nyāya; the author, whose name is not given, was the son of Lakṣmyambā and Kacchapēśayajvan.

Contains the Saṅgatirahasya complete and the Hētvābhāsalakṣaṇa incomplete.

Beginning:

आलूरान्वयवारिधेस्सितकरो यश्शिष्यसङ्घे सदा।
विद्यादानकुतूहलैकरसिकश्शान्त्यादिरत्नाकरः।
यस्य श्रीकरुणाकटाक्ष . . . . विदामग्रणीः
तं सर्वागमपारगं गुरुमहं चित्ते सदा भावये ॥
श्रीकच्छपेशयज्वानं तातं सर्वकलानिधिम्।
लक्ष्म्यम्बा . . . . मीष्टार्थसिद्धये ॥

प्रत्यक्षोपजीवकत्वात्प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात्प्रागनुमानं निरूप्यत इति मणिकृतः। ननु सङ्गतिप्रदर्शननिरूपणप्रतिज्ञयोः प्रयोजनाभावः। न चोन्मत्तप्रलपितत्वादिशङ्कानिरासः प्रयोजनमिति वाच्यम्; वस्तुतस्सङ्गताभिधानेनैवोन्मत्तप्रलपितत्वादिशङ्कानिराससम्भवे सङ्गतिप्रदर्शनस्य व्यर्थत्वात्।

* * * *

दीधितावपि तृतीयान्तपदसमभिव्याहृतनिपूर्वकरूपधातोः प्रतिपत्त्यनुकूलशब्दमात्रार्थत्वेनानन्वयाभावादिति तत्त्वम्।

Colophon:

इति न्यायकौस्तुभे सङ्गतिरहस्यं समाप्तम्॥

End:

किन्त्वनतिरिक्तवृत्तित्वरूपं तथा च वह्न्यभाववद्वृत्तिर्धूम इति व्यभिचारधीनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभावव.

R. No. **3924.**

Palm-leaf. $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Foll. 240. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

(*a*) महाग्निचयनप्रयोगः.

MAHĀGNICAYANAPRAYŌGAḤ.

Foll. 3*a*—9*b*. Fol. 2*a* gives the names of the works in this MS. Foll. 1, 2*b* and 10—18 are left blank.

Similar to the work described under Nos. 1130 and 1131 of the D.C.S. MSS., Vol. II.

Wants the beginning and the end.

Beginning:

वन्तु नः। तिसृभिर्द्वेधा मधुमिश्रेण कूर्ममभ्यज्य "मही द्यौः पृथिवी च न . . . मरीमभिः" तया पुरस्तात् स्वयमातृण्णायाः प्रत्यक्षं जीवन्त प्राङ्मुख उपदधाति ।

* * * *

तत आपराह्णिक्ये प्रवर्ग्योपसदौ सुब्रह्मण्याह्वानान्ते अश्मपरिणयनम् । अधि श्वः सूर्ये अग्नौ ज्योतिष्मतम् । नक्षत्रोदये वाग्विसर्गः चतुस्तनव्रतजागरणं च ।

Colophon:

प्रथमाचितिस्समाप्ता ॥

End:

अन्तरिक्षमसि तया, अन्तरिक्षाय त्वा तया। द्वे संयान्यौ सहश्च सहस्यश्च हैमन्तिकावृतू अग्नेः पृथिवी.

(*b*) चयनप्रयोगः.

CAYANAPRAYŌGAḤ.

Foll. 19*a*—50*a*. Fol. 45*b* is left blank.

Same work as that described under No. 1130 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 50 contains a few Kārikās on Iṣṭakāpramāṇa, etc.

(*c*) शुल्बोपधानप्रकारः.

ŚULBŌPADHĀNAPRAKĀRAḤ.

Foll. 51*a*—61*b*.

On the construction of the sacrificial balls in accordance with the Āpastaṁba school.

Incomplete,

Beginning:

अग्नीनां शुल्बोपधानप्रकार उच्यते—

सूत्रात्पञ्चदशाध्यर्धाः स्थाप्याः पुच्छे तु पूर्वतः ।
चतस्रोऽध्यर्धास्तिरश्चीनाः प्रादेशौ तत्र पार्श्वयोः ॥
अग्निशेषे तु पञ्चम्यः प्राच्योऽरत्नो दशात्मनि ।
षष्ठ्याः पश्चात्त्रिकाः पूर्वास्तिस्रश्चाष्टाङ्गुलेष्टकाः ॥

End:

अरत्निप्रमितोऽन्यस्मादर्धाङ्गुलिसमन्वितः ।
चयनं चाग्निमानं च तुल्यस्सप्तविधाग्निका ॥

(*d*) आपस्तम्बशुल्बसूत्रभाष्यम्.

ĀPASTAMBAŚULBASŪTRABHĀṢYAM.

Foll. 62*a*—88*b*.

Same work as that described under R. Nos. 151(*b*) and 777 ante. By Kapardisvāmin.

Complete in six Paṭalas.

(*e*) आपस्तम्बशुल्बसूत्रव्याख्या—शुल्बप्रदीपिका.

ĀPASTAMBAŚULBASŪTRAVYĀKHYĀ: ŚULBAPRADĪPIKĀ.

Foll. 88*b*—139*b*.

Same work as that described under R. No. 931(*c*) ante. By Karavindasvāmin.

Complete.

(*f*) मन्त्रोपधानकारिका.

MANTRŌPADHĀNAKĀRIKĀ.

Foll. 139*b*—178*b*.

Similar to the work described under subdivision (*c*) of this same number.

Complete.

Beginning:

हरिचरण(सं)स्मरणविध्वस्तसमस्तान्तरायतिमिरौघाः ।
ऋषिभिर्बहुधा भणितान् शुल्बार्थान् सङ्कलय्य विलिखामः ॥

दिक्साधनम्.

सलिलसमीकृतदेशे सुमहद्वृत्तं विलिख्य तन्मध्ये ।
पृथुमूलं सूक्ष्माग्रं शङ्कुमृजुं द्वादशाङ्गुलं निखनेत् ॥

शङ्कुच्छायाग्रेण स्पृष्टा वृत्तस्य यत्र लेखास्य ।
प्राह्वापराह्वयोः स्यात्तदुपरि सूत्रं धृतं प्राचि ॥

End:

इष्टकानामिति शतादधिकं नवसप्ततिः ।
निहिता विंशतिस्सैका शिष्टा लोकम्पृणा स्मृता ॥

Colophon:

इति चतुरश्रस्य कारिकास्समाप्ताः ॥

(*g*) शुल्बकारिका.

ŚULBAKĀRIKĀ.

Foll. 178*b*—181*b*.

Similar to the work described under R. No. 1003(*a*) ante. By Vēṅkaṭanāthavājapēyin of Vatsagōtra.

Complete.

Beginning:

शुल्बोक्तेषु प्रयोगेषु यः स्पष्टं न प्रतीयते ।
अवश्यापेक्षणीयश्च सोऽयं सङ्ग्रह्य कथ्यते ॥
लेखायां वृत्तमध्यस्थशङ्कुच्छायाग्रपातयोः ।
स्थाप्यौ च कालयोश्शङ्कू स्थाप्यौ ते दक्षिणोत्तरे ॥

End:

त्रिस्तावाग्निर्यदा त्वश्वमेधे तत्र विधीयते ।
त्रैगुण्यं प्राकृतस्याग्नेस्सार्धसप्तविधस्य च ॥
पुंसामेकैकविंशोऽग्नावभ्यासेनार्थयोगिनाम् ।
सर्वत्र पुरुषेष्वेवं सङ्ख्यासंयोगदर्शनात् ॥

Colophon:

इति वात्स्यवेङ्कटनाथवाजपेययाजिविरचिते(ता) शुल्बकारिक समाप्ता ॥

(*h*) अग्निकारिका.

AGNIKĀRIKĀ.

Foll. 188*b*—219*a*. Foll. 189—200 and 211—215 are left blank.

A treatise in verse laying down the procedure for the performance of sacrifices and based on Āpastamba Śrautasūtra Bhāṣyavṛtti, etc. The author, whose name is not given, was the son of Nārāyaṇayajvan and pupil of Vēdāntadīkṣita.

Complete.

Beginning:

अग्निकल्पे यदस्पष्टं मन्दानां प्रतिभासते ।
भाष्यवृत्त्यनुरूपेण तत्स्पष्टीक्रियतेऽधुना ॥
अग्निष्टोमे त्वनारभ्याधीतोऽप्याग्निर्न चीयते ।
गुणमात्राविकारत्वादुक्थ्यादिषु न चेष्यते ॥
विकृतिष्वेव सर्वेषु त्वेकान्तेषु विकल्प्यते ।
साद्यस्का(स्का)दौ निषेधेन पक्ष्या विनिमयेन च ॥

End:

उपस्थानमुप त्वेति नित्यं गमन एत्र वा ।
पर्वण्यनन्तरे वाह्नि सौत्रामण्यादिकं भवेत् ॥
रामाशूद्राक्रमेणेत्थाप्यन्यस्त्री क्षत्रियादिका ।
काञ्चनेनि स्वर्णे . . . . तानो . . . यात् त्सरं क्रमात् ?) ॥
नमो नृजन्मगुरवे श्रीनारायणयज्वने ।
विद्यागुरूभ्यो वेदान्तदीक्षितेभ्योऽहर्निशम् ॥

Colophon:

अग्निकारिकास्समाप्ताः ॥

(*i*) श्येनकारिका.

ŚYĒNAKĀRIKĀ.

Foll. 219*a*—221*b*.

Same work as that described under R. No. 1737 ante

Wants the beginning; otherwise complete.

(*j*) त्रिषाहस्तप्रस्तारप्रयोगः.

TRIṢĀHASRAPRASTĀRAPRAYŌGAḤ.

Foll. 221*b*—229*b*. Foll. 222, 223 and 230*b*—240*b* are left blank.

Similar to the work described under R. No. 2641 ante.

Incomplete.

Beginning :

प्रयोगे तु द्विषाहस्रे मन्त्रास्तु विहिताः पुनः ।
त्रिषाहस्रेऽपि च ज्ञेयास्सर्व(क्रतु) विचक्षणैः ॥
अपि दानं तती(तो)ज्ञेयाः प्रस्तारेऽपि तृतीयके ।
वशानामुपधानं स्यात्रिवृतां चापि चेष्यते ॥
पञ्चम्यामपि चित्यायां रूपाण्यह्नामुदीरिताः ।
लोकाख्याः पावमानाश्च प्रस्तारे तु तृतीयके ॥
राष्ट्रभृत्संज्ञका एतास्त्रिषाहस्रे विकल्पिताः ।
सर्वमन्यद्यथासूत्रं कर्तव्यं मुनिसत्तमैः ॥

End :

चतुर्थेऽप्येवमेव स्यादेषा भाष्यकृतो मतिः ।
प्रस्तारपञ्चके न स्यादिष्टकानां सहस्रकम् ॥

Foll. 229*b* and 230*a* give Śyēnakārikāviṣayaślōkas.

R. No. **3925.**

Palm-leaf. 14⅝ × 1 inches. Foll. 99. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

Foll. 12 and 79 are left blank.

विरिञ्चिनाथचरितचम्पूः.

VIRIÑCINĀTHACARITACAMPŪḤ.

A Kāvya in prose and verse describing the greatness of Viriñcinātha worshipped at Viriñcipura near Vellore, North Arcot district: by Navanītakavi, son of Vēdapurīśayajvan of Vādhūlagōtra.

Same work as Mārgasahāyacampu described under No. 13336 of the D.C.S. MSS., Vol. XXI.

Contains the Āśvāsas one to five complete and breaks off in the course of the sixth Āśvāsa.

This is also called Mārgasahāyacampu.

Beginning :

कटस्थलोन्मीलितदानवारये कटाक्षसंरक्षितदानवारये ।
(करोमि कंसाहितमातुलाय ते नमस्कृतिं) येन रमातुलायते ॥
अङ्के शङ्करवल्लभस्य पृथुको निश्शङ्कमासेदिवा-
नूर्ध्वीभावित (पुष्करो विजयते विघ्नेश्वरो) लीलया ।

मौलौ तिष्ठति जाह्नवी कथमियं मन्मातुरुच्छ्रायिणी
तामुर्व्यामधुनेति(रोषपरुषस्सम्पातयिष्य)न्निव ॥
शुभाय भूयादिति वाचमादावुदीर्य कुर्याश्चरितं ममेति ।
योऽन्वग्रहीत्स्वप्नगतस्स साक्षा(च्छुभाय भूयात्सरणीसहायः) ॥

* * * *

(व्याधूतपाप्मा)पुरि पद्मयोनेर्वाधूलवंशार्णवपूर्णचन्द्रः ।
अप्राकृतो वेदपुरीशयज्वा विप्रावतंसस्स्वयमाविरासीत् ॥

* * * *

तनयस्तस्य सं(पन्नविनयः)शङ्कराज्ञया ।
विरिञ्चिपुरनाथस्य चरितं कुरुते कृती ॥
यच्छ्राभाविशदा वाणी मूकानामपि जृम्भते ।
ईशं(वीटीं)तामादिशत् गौरी चेटीकृत(सरस्वती) ॥

अथ कदाचिदखिलजननयनानन्दसन्दोहसुलभनैपुण्ये(पुण्ये)तरपुरुषागण्ये नैमिशारण्ये निखिलमुनिजनवरिष्ठमात्मनिष्ठं(वसिष्ठमन्तेव)सन्तस्तपस्यन्तस्सर्वेऽपि मुनयो विनयोज्ज्वला एवमप्राक्षुः ।

* * * *

Colophon:

इति विरिञ्चिपुरनाथचरिते प्रथमाश्वासः ॥

* * * *

नभस्तलादवरुह्य च पुनरवनीतलतिलकायमानगौरीपुरविरहमसहमान इव तस्यास्य समीप एव पश्चिमायामाशायामुत्त(र)रङ्गाभिधाने स्थाने योगनिद्रापदेशमुद्रिताक्षः पुण्डरीकाक्षो लक्ष्म्या सह सन्निधानमादधाति ॥

Colophon:

इत्यवनीतलप्रसिद्धनवनीतकविविरचिते विरिञ्चिपुरनाथचरिते द्वितीयाश्वासः ॥

End:

(इ)ति धनपतिकीर्त्या पूर्तिमत्यां जगत्या-
मखिलधवलवस्तुव्यत्ययात्प्रत्ययाय ।

सरसिजभवनेन प्रार्थयन् भेदमिन्दुः-
स्सपादि सफल(चेतोवा)ञ्छितो लाञ्छितोऽभूत् ॥

Colophon:

इति श्रीविरिञ्चपुरनाथचरिते पञ्चमाश्वासः ॥

नवनीतकवेर्नवीनसूक्तैरवनीमण्डलमण्डना(यमानैः) ।
(नव.ी)रदमण्डलैः कवीन्द्रा नवनीपा इव नन्दिता भवन्तु ॥

वाणीपतेनगरसीम्नि वसन् पिनाकी
विप्रं निनाय सकलेबरमात्मलोकम् ।
चित्रं चरित्रमिदमीक्षितुमाद्दतानां
दीपायितानि मम सूनृतबन्धनानि ॥

* * * *

त्रिभुवनगुरो स्वामिन्(श्रीमन्)विरिञ्चिपुरेश्वर
(क्षणमिह कृपादृष्ट्या वृष्ट्या)प्रसादपरो भव ।
अनुकलमिति स्तावं स्तावं धिया वपुषा गिरा
मरतकलतानाथं मार्गसहायमुपास्महे ॥

* * * *

अलमलमहो जन्माद्युन्मादवर्जनचर्यया क्वचिदपि गुण.

R. No. **3926.**

Palm leaf 17 × 1¾ inches. Foll. 186. Lines, 9 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

(*a*) वेदान्तपरिभाषाव्याख्या, वेदान्तशिखामणिः.

VĒDĀNTAPARIBHĀṢĀVYĀKHYĀ : VĒDĀNTAŚIKHĀMAṆIḤ.

Foll. 4*a*—57*a*. Fol. 1*a* gives the title of this work. Foll. 1*b*—3*b* and 57*b*—68*b* are left blank.

Same work as that described under No. 4739 of the D.C.S. MSS., Vol. IX. By Rāmakṛṣṇādhvarin, son of Dharmarājādhvarin.

Contains from the beginning of Anumāna to the end of the Anupalabdhivāda.

(*b*) जगन्मिथ्यात्वदीपिका.

JAGANMITHYĀTVADĪPIKĀ.

Foll. 69*a*—181*a*. Foll. 137*b* and 146*b* are left blank. Fol. 181*b* gives the Granthasaṅkhyā of this work.

Same work as that described under No. 4576 of the D.C.S. MSS., Vol. IX, wherein see for the beginning. By Rāmēndrayōgin.

Complete.

End:

जीवसूत्रान्तर्यामि शुद्धब्रह्मसंज्ञं भवति । एवं शुद्धबुद्धमात्मानं ब्रह्म वेद यः स ब्रह्मैव भवति । ब्रह्म वेद ब्रह्मैव भवति, तरति शोकमात्मवित्, तदा विद्वान्नामरूपाद्विमुक्तः, ब्रह्मैव सन् ब्रह्माप्येति—इति श्रुतिशतैरुद्घोषितत्वात् ॥

यथामति कृतामेतां जगन्मिथ्यात्वदीपिकाम् ।
रामेन्द्रयोगिना सन्तः कुर्वन्तूच्चैस्तरां बुधाः ॥

Colophon:

श्रीमत्परमहंसपरिव्राजकरचिता विंशतिप्रकरणात्मिका जगन्मिथ्यात्वदीपिका सम्पूर्णा ॥

(*c*) छन्दस्सूत्रम्.

CHANDASSŪTRAM.

Foll. 182*a*—185*a*. Foll. 185*b* and 186 are left blank.

Same work as that described under No. 901, of the D.C.S. MSS., Vol. VII.

Complete.

Colophon:

पिङ्गलिसूत्रं समाप्तम्.

The scribe adds—

श्रीनिवासशास्त्रिणः शङ्करनारायणाख्येन केनचिल्लिखितम्.

R. No. 3927.

Palm-leaf. 19⅝ × 1⅝ inches. Foll. 236. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

Fol. 1*a* gives the name of the work and its author. Foll. 2*a*—4*b* give the contents of this work. Foll. 1*b* and 5—7 are left blank.

अलङ्कारराघवम्.

ALAṄKĀRARĀGHAVAM.

Foll. 8*a*—233*a*. Foll. 233*b*—236 are left blank.

A treatise in poetics: by Yajñēśvaradīkṣita, brother of Tirumalayajvan and son of Koṇḍubhaṭṭōpādhyāya of Carakūri family. The illustrations given herein are in praise of God Rāma.

Complete.

Beginning:

सञ्जातं स्फुटमञ्जनापरिणमद्गर्भान्तरालान्नवं
किंचिद्वस्तु वरेण्यमस्तु सततं वः श्रेयसे भूयसे ।
मार्तण्डग्रसने प्लुतिं कृतवतो यस्य प्रचण्डात्मनः
तेजोवैभवसम्भवेन भुवने सर्वं विधूतुं(तं) तमः ॥

* * * *

गुरुपादाम्बुजद्वन्द्वं प्रणम्य दृढभक्तितः ।
अलङ्कारं कवीशानां कुर्वेऽलङ्कारराघवम् ॥
मनोवाञ्छितदातारं देवताचक्रवर्तिनम् ।
श्रीरामं सपरीवारमुदाहर्तुमियं कृतिः ॥
रामाज्ञया स्वप्ननिरूढया मे विनिर्मितेऽलङ्कृतिराघवेऽस्मिन् ।
न युक्तिदौर्बल्यमुदाहृतीनां न मान्यमित्याद्रियन्तु सन्तः ॥

* * * *

Colophon:

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन तिरुमलयज्व-प्रियसोदरेण विरचिते अलङ्काररराघवे उपोद्घातप्रकरणं सम्पूर्णम् ॥

अलङ्कारो मुख्यो हरिणनयनानां तु पुरुषः
कलैवालङ्कारो जगति पुरुषाणामनुपमः ।
कलालङ्काराणां प्रतिकलमलङ्कारवचसा-
मलङ्कारो रामो जयति भुवनेऽनुत्तमतमः ॥

अथ सर्वप्रबन्धप्रतिष्ठाबीजभूततया नायको निरूप्यते—ननु नायको गुणवान् पुमानिति शब्दार्णवसुधाकरकारः । अदीनो धार्मिकः शूरः कृतज्ञो रूपवान् बुधः । तेजस्वी धैर्यगाम्भीर्यदक्षदौपा(तौदा)र्यसंश्रयः ॥ प्राज्ञश्चापि महाभागः नायकः परिकीर्तितः । इति साहित्यचिन्तामणिकारः ।

End :

तस्माद्रूपकालङ्कार एवेति सिद्धम् । साधकेन संशयनिवृत्तिर्यथा—

दिगङ्गनाः पूर्वनृपालकीर्तौ क्रमेण शाट्यां शिथिलीभवन्त्याम् ।
आच्छादयन्त्यद्य यशोदुकूलमात्मानुकूलं तव रामचन्द्र ॥

अत्र यश एव दुकूलमिति रूपकालङ्कारे आच्छादयन्तीति साधकं प्रमाणम् । तेन यशोदुकूलयोरभेदप्रतीतिः ॥

Colophon :

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन तिरुमलयज्वप्रियसोदरेण विरचिते अलङ्काररराघवे अर्थालङ्कारप्रकरणं सम्पूर्णम् ॥

अर्थालङ्कारमयं प्रकरणमेतज्जगत्सु यः पठति ।
रामप्रसादतोऽयं भुवनालङ्कारभावमाप्नोति ॥
वाक्पूजयालङ्कृतिराघवाख्यया मदीयया दुष्करयान्यपण्डितैः ।
सलक्ष्मणोऽयं परिवारवेष्टितः प्रीणातु रामः सह सीतया सदा ॥

R. No. **3928.**

Palm-leaf. $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 256. Lines, 9 in a page. Nandināgarī. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) मायावादखण्डनपञ्जिकाव्याख्या—मन्दारमञ्जरी.
MĀYĀVĀDAKHAṆḌANAPAÑJIKĀVYĀKHYĀ: MANDĀRAMAÑJARĪ.

Foll. 1*a*—14*a*.

Same work as that described under R. No. 454(*b*) ante, wherein see for the beginning. By Vyāsayati, pupil of Brahmaṇyatīrtha.

Complete.

End :

विवक्षित्वा भाष्यकारेण स्वोक्तार्थे च सूत्रं प्रमाणीकृतमित्याह—सर्वगुणेष्विति । प्रकरणार्थमुपसंहरंस्तदनुगुणमिति । अत्रापि सर्वार्थान् साधयामीत्यनेन नारायणोत्तमत्वस्यैव सर्वशास्त्रार्थत्वोक्तेरिति भावः ॥

सान्द्रभक्तिमदानन्दतीर्थमानसपङ्कजे ।
वसन्तं सततं कंसध्वंसिहंसं भजेऽनिशम् ॥

Colophon:

इति श्रीमायावादखण्डन(पञ्जिकाव्याख्या)मन्दारमञ्जरी समाप्ता ॥

(*b*) प्रपञ्चमिथ्यात्वानुमानखण्डनपञ्जिकाव्याख्या.

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAPAÑJIKĀ-VYĀKHYĀ.

Foll. 14*a*—21*b*.

A commentary on Jayatīrtha's Prapañcamithyātvānumānakhaṇḍana-pañjikā which work has been described under No. 4800 of the D.C.S. MSS., Vol. X.

Incomplete.

Beginning:

कमलारमणं नत्वा पूर्णबोधेष्टदैवतम् ।
व्याकुर्वे विश्वमिथ्यात्वमानखण्डनपञ्जिकाम् ॥
स्पष्टार्थो य इह ग्रन्थस्स न व्याक्रियते मया ।
ग्रन्थगौरवभीरुत्वाच्च चोद्ग्रन्थं बहूच्यते ॥

प्रपञ्चमिथ्यात्वानुमानखण्डनं व्याचिख्यासुर्जयतीर्थाचार्यो ग्रन्थादौ मङ्गलमाचरन् चिकीर्षितं प्रतिजानीते—नत्वेति। यद्यपि (सृष्टिस्थितिसंहारप्रवाहस्य) अनादित्वाद्दर्शपूर्णमासयोरिव नैकस्यादित्वं सम्भवति, तथाप्युत्पन्नस्य नाशवन्नष्टस्य नोत्पत्तिरित्येकव्यक्त्यपेक्षयोदयादे. प्राथम्यादिह सृष्टिस्थितिलयानां क्रम उपपन्नः । व्याख्येयस्यास्य प्रकरणतासिद्धये शास्त्रैकरस(त्वं प्रपञ्चय)ति—जन्माद्यस्य यत इत्यादिना ।

End:

सद्विविक्तत्वेन . . विशेषितत्वविवक्षायां सद्विविक्तत्वमनिर्वचनीयेऽन्तर्भवति अन्यस्यासत्त्व इत्यर्थः । सत्त्वाभाव इति । सत्त्वस्य साधकताप्रयोजकत्वेन साधनत्वमत्यन्तासत्त्व इव सत्त्वाभावेऽप्यापततीति ता.

(*c*) प्रमाणपद्धतिव्याख्या.

PRAMĀṆAPADDHATIVYĀKHYĀ.

Foll. 22*a*—37*b*.

Same work as that described under R. No. 2314 ante. By Vāsudēva-tīrtha.

Contains the Pratyakṣa-portion incomplete.

Fol. 38*b* gives the last portion of Pramāṇalakṣaṇaṭīkāprakāśikā with colophon, and a portion of Tattvasaṅkhyānavimarśana. Fol. 38 is left blank.

(*d*) तत्त्वोद्द्योतपञ्जिकाव्याख्या.

TATTVŌDDYŌTAPAÑJIKĀVYĀKHYĀ.

Foll. 39*a*—80*b*.

A commentary on the Tattvōddyōtapañjikā also called Tattvōddyōtavivaraṇa which work has been described under No. 4792 of the D.C.S. MSS., Vol. X. By Vēdēśabhikṣu, pupil of Vēdēśa-tīrtha.

Complete.

Beginning:

जयति जगति जन्मस्थेमसंहारपूर्वं-
चिदचिदखिलयन्ता यः स्वतन्त्रोऽखिलज्ञः ।
विततमखिलशक्तिः पूर्णबोधेष्टरूपः
श्रुतिततिमतयुक्तामुक्तभेदो रमेशः ॥
व्यासं नत्वा तथा मध्वं जयतीर्थगुरूनपि ।
व्याख्यास्ये मन्दबोधाय तत्त्वोद्द्योतस्य पञ्जिकाम् ॥

स्वेष्टदेवतानमनपूर्वकं चिकीर्षितं निर्दिशति—विश्वोत्पत्तीति । नन्व ल्पाच्तरं पूर्वमिति शास्त्रानसारेण स्थितिशब्दस्यैव प्राक् प्रयोग उचितः । अत एव विश्वस्थितिप्रलयेति भगवत्पादीयवचनमिति चेत् उत्पत्तेः स्थित-प्रलयजन्यत्वेनाभ्यर्हितत्वात् अभ्यर्हितं पूर्वमिति विशेषशास्त्रेणोत्पत्तिशब्द-स्यैव प्राक् प्रयोगात् ।

End:

एवं समापितप्रकरणव्याख्यानो भगवान् टीकाकारः स्वग्रन्थप्रचयाया-न्तेऽपि भगवत्प्रीतिप्रार्थनरूपं मङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थान्ते निबध्नाति—

श्रीमदानन्दतीर्थेति । श्रीमदानन्दतीर्थेत्यादिविशेषणेन कमलाश्लेष-रसिक इत्यनेन च कमलानन्दतीर्थयोरपि . . . . . श्रितेति ज्ञातव्यम् ॥

वेदेभेदसुशाखेतं बोधादिफलसंयुतम् ।
भजतामिष्टदं व्यासं सुरद्रुममहं भजे ॥
मात्सर्यादथवातिकौशलधियायद्वाखिलार्थज्ञता-
मानान्वेदमकारि . . . . ये ।
यद्वा मन्दधियाममन्दमिति वा टीकार्थविज्ञप्तये
यत्नोऽयं हरितुष्टिकार्यपि भवेद्वेदेशभिक्षोर्मम ॥

Colophon:

इति श्रीमद्वेदेशतीर्थार्यपादपूज्यपादशिष्येण वेदेशभिक्षुणा विरचिता तत्त्वोद्द्योतपञ्जिकाव्याख्या समाप्ता ॥

(*e*) तत्त्वविवेकटीकाव्याख्या—भावप्रकाशिका.

TATTVAVIVEKAṬĪKĀVYĀKHYĀ : BHĀVAPRAKĀŚIKĀ.

Foll. 81*a*—88*a*. Fol. 88*b* is left blank.

Same work as that described under R. No. 1323(*e*) ante. By Vyāsayati, pupil of Brahmaṇyatīrtha.

Complete.

(*f*) तत्त्वप्रकाशटीकाव्याख्या—मन्दारमञ्जरी.

TATTVAPRAKĀŚAṬĪKĀVYĀKHYĀ : MANDĀRAMAÑJARĪ.

Foll. 89*a*—115*b*.

Same work as that described under R. No. 2374(*a*) ante. By Vyāsayati, pupil of Brahmaṇyatīrtha.

Wants the beginning; otherwise complete.

Beginning:

प्रदक्षिणमेव पूर्वापरकालवृत्तित्वेन प्रवाहशब्दार्थत्वात् । दृष्टपूर्वं चैतत् । एकदेशस्थशब्देनोपाधिनानेकवृक्षाणामेव वनशब्दार्थत्वदर्शनात् । तेषां चानादित्वमेकप्रवाहमध्यपातित्वमेकप्रवाहिप्रतियोगिकप्रागभावावच्छिन्नकालावृत्तित्वाधिकरणप्रध्वंसप्रतियोगिप्रवाहित्वमिति न कश्चिद्दोषः ॥

(*g*) प्रपञ्चमिथ्यात्वानुमानखण्डनपञ्चिकाव्याख्या—भावप्रकाशिका.

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAPAÑCIKĀVYĀKHYĀ : BHĀVAPRAKĀŚIKĀ.

Foll. 115*b*—131*b*.

Same work as that described under R. No. 3928, subdivision (*b*) ante, wherein see for the beginning By Vyāsayati, pupil of Brahmaṇyatīrtha.

Complete.

End:

अर्थे प्रवर्तत इति ; हेतुशब्द इत्यनुवर्तते । व्याप्तिग्रहणस्थलमिति । यत्र सतोर्व्याप्यव्यापकयोर्व्याप्तिर्गृह्यते, तद्व्याप्तिग्रहणस्थलमिति द्रष्टव्यम् । नाप्य . . . . . काभेदात् । प्रशस्तो यो गुणगुणिभावः सोऽपि नेति गुणग्रहणं कुर्वतोक्तमित्यर्थः । अभेदेऽपि विशेषबलाद्गुणगुणिभावो भविष्यतीति भावः ॥

अभीष्टसाधनं तातशुकादिद्विजसेवितम् ।
भवाध्वाटनखिन्नोऽहं . . . . ॥

Colophon:

इति श्रीब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना विरचिता भावप्रकाशिका मिथ्यात्वानुमानखण्डनटीका समाप्ता ॥

(*h*) मायावादखण्डनपञ्जिकाटिप्पणी—भावप्रकाशिका.

MĀYĀVĀDAKHAṆḌANAPAÑJIKĀṬIPPAṆĪ : BHĀVAPRAKĀŚIKĀ.

Foll. 132*a*—140*b*.

Same work as that described under R. No. 2318 ante. By Vyāsayati, pupil of Brahmaṇyapūjyapāda.

Wants the beginning ; otherwise complete.

(*i*) प्रमाणपद्धतिप्रकाशिका.

PRAMĀṆAPADDHATIPRAKĀŚIKĀ.

Foll. 141*a*—150*b*.

A commentary on Jayatīrtha's Pramāṇapaddhati, which work has been described under No. 4803 of the D.C.S. MSS., Vol. X : by Ananta, son of Narasiṁhārya.

Breaks off in the Śabdaparicchēda.

Beginning:

नारायणं ब्रह्मशिवेन्द्रपूर्वैर्वन्द्यं सुरेशैर्विभुमप्रमेयम् ।
शुभैरसङ्ख्येयगुणैश्च पूर्णं रमापतिं ज्ञानतनुं नमामि ॥
व्यासं मुनीन्द्रं जगदेकदेवं सर्वेष्टदं पूर्णमचिन्त्यशक्तिम् ।
रमादिभिश्चिन्तितपादपद्मं श्रीविट्ठलं ज्ञानदमानतोऽस्मि ॥

शिवादिभिर्देववरैस्समस्तैर्वन्द्यं सदा श्रीहरिपादभक्तम् ।
आनन्दतीर्थं प्रणमामि लोकः प्राप्नोति मोक्षं यदनुग्रहेण ॥

* * * *

येषां प्रसादात्सुजनास्समस्ता मध्वार्यशास्त्रं प्रवदन्ति भक्त्या ।
तेषां गुरूणां शुभपादपद्मरजो मनोज्ञं शिरसा वहामि ॥
श्रीमद्गुरूणां करुणाबलेन मध्वार्यसन्मानसुमार्गदीपम् ।
प्रीत्यै . . . . . . गुरोः करिष्यामि यथावबोधम् ॥

अथ श्रीमज्जयतीर्थाचार्याः प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्ये प्रचयगमनाय च शिष्टाचारपरम्पराप्राप्तं विशिष्टेष्टदेवतानतिरूपं मङ्गलं मनसि कृतं शिष्यशिक्षायै ग्रन्थतो निबध्नन्त एव तत्र प्रकारप्रवृत्त्यर्थं चिकीर्षितं प्रतिजानते—प्रणम्येति । प्रकर्षेण उरसा शिरसेत्याद्युक्तप्रकारेण भक्तिश्रद्धापूर्वकं नमस्कृत्येत्यर्थः ।

* * * *

प्रमाणपद्धतिमिति । प्रमाणानां पद्धतिरिव पद्धतिः प्रमाणपद्धतिः प्रमाणार्थलक्षणादिप्रतिपादकग्रन्थ इत्यर्थः । इतरप्रमाणानि हन्यन्ते ययेति वा विभज्यत इत्येके ।

* * * *

Colophon:

इति प्रमाणपद्धतिवाक्यार्थसङ्ग्रहे प्रथमः परिच्छेदः समाप्तः ॥
व्यासं श्रियं मध्वदेवं भारतीं च शिवादिकान् ।
जयतीर्थमुनीन् वन्दे नृसिंहार्यवरान् गुरून् ॥

End:

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
अनुमानपरिच्छेदो व्याकृतोऽयं यथामति ॥
नरसिंहार्यवर्याणां गुरूणां पादयोर्भजे ।
ज्ञानवैराग्यभाग्यादिकल्याणगुणशालिनाम् ॥

Colophon:

इति श्रीपद्धतिप्रकाशिकायामनुमानपरिच्छेदः समाप्तः ॥

उपजीव्ये प्रत्यक्षानुमाने सप्रपञ्चं निरूप्य सम्प्रति प्रत्यक्षोपक्रमादिबहनुमानोपजीवकमागमं निरूपयति—निर्दोषश्शब्द इति ।

* * * *

नाद्यः—अनवस्थापातात् । न द्वितीयः—सुप्तकालादौ च तत्प्रसङ्गात् । तस्मात् स्मर्तव्य.

Foll. 151*a*—152*a* contain the last portion of Māyāvādakhaṇḍanaṭīkābhāvadīpa.

(*j*) कर्मनिर्णयपञ्जिकाव्याख्या—तात्पर्यदीपिका.
KARMANIRṆAYAPAÑJIKĀVYĀKHYĀ : TĀTPARYADĪPIKĀ.

Foll. 1·2*b*—166*b*.

A commentary on the Karmanirṇayapañjikā, which itself is a commentary by Jayatīrtha on Madhvācārya's Karmanirṇaya—a treatise purporting to establish that all the different Vedic passages which enjoin the performance of some Karma to propitiate the different dieties Indra, Varuṇa, Agni and others, refer to God Viṣṇu : by Anantācarya, son of Narasiṁhācārya.

Complete.

Beginning :

वन्दे विष्णुं परं ब्रह्म रमां मध्वं च मारुतम् ।
शिवेन्द्रादींश्च तच्छिष्यान् जयतीर्थमुनीन् गुरून् ।
येऽध्यापयित्वा निगमान् माध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यास्तान् भूयो भूयो नमाम्यहम् ॥
येषां मुखाम्बुजाच्छ्रुत्वा यतयो गृहिणस्तथा ।
अनेकसङ्ख्या व्याचख्युर्नृसिंहार्यान्नमामि तान् ॥
नृसिंहार्यदयाकल्पवृक्षश्रेष्ठसमाश्रयात् ।
व्याकरिष्ये यथाबोधं कर्मनिर्णयपञ्जिकाम् ॥

अत्रादौ मङ्गलमाचरति—ब्राह्मणेति । वेदगिरः यत्क्रीडाभूमयः यस्य परब्रह्मणः क्रीडास्थानानीत्यर्थः । शाखान्तरस्यान्यपरत्वशङ्कां निराकरोति—अखिला इति । तदेव प्रपञ्चयति—ब्राह्मणेति । कर्मपरश्रुतीनां विष्णुपरत्वं नास्तीति वदतां दुर्वादिनां निराकरणं प्रपञ्चनप्रयोजनं द्रष्टव्यम् । ननु यज्ञविद्येति । तत्रेन्द्रादीनामेव प्रोक्तत्वान्न तद्वन्दनं युक्तमिति भावः ।

End :

भावशब्दः स्वभावार्थक इत्यभिप्रेत्याह—भावमिति । भूतमहेश्वरमित्यत्र कर्मधारय इत्यभिप्रेत्याह—भूतमिति । न पुनरतद्विद इति । उपलक्षणमेतत् ।

अतिष्ठमानस्येत्यपि द्रष्टव्यम् । स्मृतिभ्य इत्यत्र दोषमाह—अयमिति । एवं समापितग्रन्थोऽपि श्रीमज्जयमुनिः प्रचयाद्यर्थं भगवत्प्रणाममाचरति—यत्सम्बन्धेनेति ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
भूयात्प्रीत्यै हरेर्नित्यं कृता तात्पर्यदीपिका ॥
विट्ठलं ज्ञानदं वन्दे वेदव्यासमहाप्रभुम् ।
आनन्दतीर्थभगवत्पादाचार्यान् गुरूनपि ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितकर्मनिर्णयविवरणस्य श्रीमज्जयतीर्थमुनिविरचितस्य टीका श्रीमन्नरसिंहार्यचरणनलिनसेवकश्रीमदनन्ताख्यविरचिता तात्पर्यदीपिका समाप्ता ॥

(*k*) मिथ्यात्वानुमानखण्डनपञ्जिकाव्याख्या.

MITHYĀTVĀNUMĀNAKHAṆḌANAPAÑJIKĀVYĀKHYĀ.

Foll. 166*b*—168*a*. Foll. 168*b*—170*b* are left blank.

A commentary on Jayatīrtha's Mithyātvānumānakhaṇḍanapañjikā, which work has been described under No. 4800 of the D.C.S. MSS., Vol. X: by Ananta, son of Narasiṁhācārya.

Incomplete.

Beginning:

वन्दे सर्वोत्तमं विष्णुं रमां मध्वं च मारुतम् ।
मध्वशिष्यान् शिवादींश्च जयतीर्थमुनींस्तथा ॥
येऽध्यापयित्वा निगमान् माध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यांस्तान् भूयो भूयो नमाम्यहम् ॥
नरसिंहार्यवर्याणां गुरूणां करुणाबलात् ।
व्याकुर्वेऽखिलमिथ्यात्वमानखण्डनपञ्जिकाम् ॥

अथ ग्रन्थादौ मङ्गलमाचरन् चिकीर्षितं च प्रतिजानीते—नत्वेति । विश्वेति । विश्वेषामुदय उत्पत्तिः स्थेम स्थितिर्लयः संहारः उपलक्षणार्थमेतत् । नियमनादिकमपि ग्राह्यम् । तेषां तत् निमित्तमित्यर्थः । नन्विदं प्रकरणमनारम्भणीयं प्रयोजनाभावादतो न व्याख्येयं चेत्यतस्तत्प्रयोजनमाह—

जन्मादीति । निमित्तकारणत्वमिति । उपादानकारणत्वपक्षस्य दूषितत्वाद्वा-ध्यादाविति भावः ।

End:

यद्वा दृश्यत्वस्य स्वरूपेणाभावो हेतुः । तस्य हेतुत्वाकारेणाभावो हेतुमानिति सामान्यविशेषभावे . . . . . ज्ञेयः । अनध्यवसितविशेषस्यापीति । सर्वमनित्यं प्रमेयत्वादित्यादेरित्यर्थः । यावतो हीति । प्रतिबिम्बोपाधौ त्रैकालिकसत्यताप्रतिषेध इत्यादि सर्वमसत्त्वोपा.

(*l*) उपाधिखण्डनटीकाव्याख्या—भावदीपिका.

UPĀDHIKHAṆḌANAṬĪKĀVYĀKHYĀ : BHĀVADĪPIKĀ.

Foll. 171*a*—173*a*.

The text of Upādhikhaṇḍana is also called Tattvaprakāśikā.

A commentary on Jayatīrtha's Upādhikhaṇḍanaṭīkā, which work has been described under No. 4782 of the D.C.S. MSS., Vol. X: by Anantācārya, son and pupil of Narasiṁhācārya.

Complete.

Beginning:

वन्दे विष्णुं परं ब्रह्म रमां मध्वं च मारुतम् ।
मध्वशिष्यान् शिवादींश्च जयतीर्थमुनीन् सदा ॥
येऽध्यापयित्वा . . . भूयो भूयो नमाम्यहम् ॥
नृसिंहार्यदयाकल्पवृक्षश्रेष्ठसमाश्रयात् ।
तत्त्वप्रकाशिकाव्याख्यां व्याकरिष्ये यथामति ॥

ग्रन्थादौ मङ्गलमाचरन्तश्चिकीर्षितं प्रतिजानते—रमाया इति । तत्त्वप्रकाशिकेति । वेदान्तशास्त्रविषयादितत्त्वप्रकाशिकाव्याख्यामित्यर्थः । अत्र शेषे षष्ठ्यासमासो बोध्यः ।

End:

एवं समापितप्रकरणः श्रीमज्जयतीर्थमुनिः स्वेष्टं प्रार्थयते—सदे(सुरे)ति । नखत्विषीत्यस्य विशेषणं सुरेत्यादि । पादयुगळनखत्विषीति व्य . . . . . . र्तव्या ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
पूर्णप्रज्ञयतेः प्रीत्यै कृतेयं भावदीपिका ॥
ज्ञानानन्दाद्यसङ्ख्येयगुणैः पूर्ण रमापतिम् ।
सर्वेष्टदं मध्वनाथं वन्देऽहं विठ्ठलं प्रभुम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वप्रकाशिकाटीकायाः श्रीमज्जयतीर्थमुनिविरचितायाः टीका श्रीमदशेषविद्वज्जनपूजितनरसिंहार्यवर्याणां सुतेन परमशिष्येणानन्ताख्येन कृता भावदीपिका समाप्ता ॥

(*m*) तत्त्वसङ्ख्यानविवरणव्याख्या—तत्त्वदीपिका.
TATTVASAṄKHYĀNAVIVARAṆAVYĀKHYĀ : TATTVADĪPIKĀ.

Foll. 173*a*—175*a*.

A commentary on Jayatīrtha's Tattvasaṅkhyānavivaraṇa, which work has been described under No. 4789 of the D.C.S. MSS., Vol. X: by Ananta, son and pupil of Narasiṁhārya.

Complete.

Beginning:

नारायणं परं ब्रह्म रमां मध्वं पृषत्पतिम् ।
मध्वशिष्यान् शिवादींश्च वन्दे जयमुनीन् गुरून् ॥
नरसिंहार्यवर्याणां गुरूणां करुणाबलात् ।
व्याकुर्वे तत्त्वसङ्ख्यानव्याख्यानं नातिविस्तरम् ॥

तत्त्वसङ्ख्यानं व्याचिख्यासुः श्रीमज्जयमुनिर्ग्रन्थादौ मङ्गलमाचरन् चिकीर्षितं च प्रतिजानीते—लक्ष्मीपतेरिति । गुरोरपीति । तत्राचार्याणामक्षोभ्यतीर्थानां चेत्यर्थः । तत्त्वसङ्ख्यानेति । तत्त्वानां सङ्ख्यानं यस्मिन् तत् तत्त्वसङ्ख्यानम् । यद्वा करणल्युट्प्रत्ययः तद्व्याख्यानमित्यर्थः । नातिविस्तरमिति । विस्तरशब्दं प्रयुञ्जानस्येह ग्रन्थे शब्दप्रपञ्चनमेव नास्ति । अर्थप्रपञ्चनं तु न विद्यत एवेति भावः ।

End:

अथ समापितप्रकरणः श्रीमज्जयमुनिः स्वेष्टदेवताप्रीतिं प्रार्थयति—यद्ोति

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
श्रीपतेः प्रीयते(तये) भूयात्कृतेयं तत्त्वदीपिका ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वसङ्ख्यानव्याख्यानस्य विवरणं समाप्तम् ॥

(*n*) तत्त्वविवेकव्याख्याविवरणम्.
TATTVAVIVĒKAVYĀKHYĀVIVARAṆAM

Foll. 175*a*—176*b*.

A commentary on Jayatīrtha's Tattvavivēkavyākhyā, which work has been described under No. 4786 of the D.C.S. MSS., Vol. X: by Anantācārya, son of Narasiṁhācārya.

This commentary is called Tattvadīpa.

Complete.

Beginning:

भावाभावात्मकं विश्वं सत्तादि लभते यतः ।
स्वैकज्ञेयगुणैः पूर्णं वन्दे तं पुरुषोत्तमम् ॥
यथाक्रमं गुरून् नत्वा नृसिंहार्यप्रसादतः ।
व्याख्यां तत्त्वविवेकस्य व्याकरिष्ये यथामति ॥

ग्रन्थादौ मङ्गलमाचरन् चिकीर्षितं प्रतिजानीते—प्रणम्येति । गुरूनिति । अक्षोभ्यतीर्थानित्यर्थः । ननु (अनारो)पितत्त्वं तत्त्वलक्षणं न प्रमेयत्वं तथा सति प्रमासम्बन्धात्प्रागतत्त्वताप्रसङ्गादित्यत एकार्थत्वमुपपादयति—अनारोपितत्त्वं हीति ।

End:

तत्त्वानुपपत्तेश्चेत्यादि द्रष्टव्यमिति भावः । एवं समापितप्रकरणः श्रीमज्जयमुनिरन्तेऽपि स्वेष्टदेवतां प्रणमति—करतलेति ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
भूयात्कृतस्तत्त्वदीपः प्रीत्यै माधवमध्वयोः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वविवेकविवरणस्य श्रीमज्जयमुनिविरचितस्य विवरणं समाप्तम् ॥

(o) कथालक्षणपञ्जिकाव्याख्या—कुसुममाला.

KATHĀLAKṢAṆAPAÑJIKĀVYĀKHYĀ: KUSUMAMĀLĀ.

Foll. 176b—181b.

A commentary on Jayatīrtha's Kathālakṣaṇapañjikā, which work has been described under No. 4784 of the D.C.S. MSS., Vol. X: by Anantācārya, son of Narasiṁhācārya.

Complete.

Beginning:

रङ्गनाथं विठ्ठलं च नृसिंहं बादरायणम् ।
रमां मध्वं मध्वशिष्यान् वन्दे जयमुनीन् गुरून् ॥
येऽध्यापयित्वा निगमान् माध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यांस्तान् कृपालून् प्रणतोऽस्म्यहम् ॥
यन्मुखाम्भोजतः श्रुत्वा यतयो गृहिणस्तथा ।
व्याचख्युर्मध्वशास्त्रं हि नृसिंहार्यान् नमाम्यहम् ॥
सर्वतन्त्रस्वतन्त्राणां गुरूणां करुणाबलात् ।
यथाबोधं व्याकरिष्ये कथालक्षणपञ्जिकाम् ॥

ग्रन्थादौ मङ्गलमाचरति—श्रिय इति । श्रियः कमितुः कान्तस्येत्यर्थः । कथालक्षणेति । कथा लक्ष्यते लक्षणवत्तया प्रतिपाद्यतेऽनेनेति कथालक्षणम् ।

End:

एवं समापितप्रकरणः श्रीमज्जयतीर्थमुनिर्नारायणं रक्षणमाशास्ते—श्रीमदानन्दतीर्थेति ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
कृता कुसुममालेयं प्रीत्यै रङ्गेशमध्वयोः ॥
रङ्गनाथं नृसिंहं च विठ्ठलं बादरायणम् ।
रमामध्वौ मध्वशिष्या जयतीर्थमुनिस्तथा ॥
नरसिंहार्यवर्याश्च सर्वदा गुरवो मम ।
परिहृत्याज्ञानतमो हरिभक्तिं दिशन्तु मे ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितकथालक्षणटीकायाः श्रीम-

जयतीर्थमुनिविरचिताया व्याख्या श्रीमन्नरसिंहार्यवर्यसुतेनानन्ताख्येन कृता कुसुममाला समाप्ता ॥

(p) विष्णुतत्त्वनिर्णयव्याख्याटीका—न्यायमञ्जरी.
VIṢṆUTATTVANIRṆAYAVYĀKHYĀṬĪKĀ : NYĀYA-MAÑJARĪ.

Foll. 181b—199a.

A commentary on Jayatīrtha's Viṣṇutattvanirṇayavyākhyā, which work has been described under No. 4843 of the D.C.S. MSS., Vol. X: by Anantācārya, son of Narasiṁhācārya.

Complete in three Paricchēdas.

Beginning :

ज्ञानानन्दादिभिस्सर्वैर्गुणैः पूर्णं निरञ्जनम् ।
नारायणं सदा वन्दे वेदवेद्यं जगत्पतिम् ॥

* * * *

सर्वतन्त्रस्वतन्त्राणां गुरूणां करुणाबलात् ।
तत्त्वनिर्णयटीकाया भावं वक्ष्ये यथामति ॥

* * * *

ग्रन्थादौ मङ्गलमाचरति—विश्वस्योदयमातनोतीति । अनेन पितृत्व-मुपपा(दि)तं भवति । तदन्वित्यादिना पतित्वं सौख्याप्तीत्यादिना गुरुतमत्वं तत्रापि अलमित्यनेन . . . . क्रीडारूपत्वाद्देवत्वं संहारकारणत्वेऽपि तस्याद्वेष्यत्वं च ।

* * * *

द्वितीयपक्षेऽपीति । अभेदो ब्रह्मणो भिन्न इति पक्ष इत्यर्थः । ननु आद्य-श्लोके भगवानित्यनुक्तत्वादुपसंहारे भगवानिति किमर्थमुच्यत इत्यत आह—भगवानिति । पूजार्थ इति ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
व्याकृतो वेदवेद्यत्वपरिच्छेदो यथामति ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य श्रीविष्णुतत्त्वनिर्णयस्य टीकाया श्रीमज्जयतीर्थमुनिविरचिताया विवरणे श्रीमन्नरसिंहार्यवर्यसुतेनानन्ताख्येन कृते सदागमैकविज्ञेयत्वं नाम प्रथमपरिच्छेदः समाप्तः ॥

चराचरात्मकं विश्वं सत्तादि लभते यतः ।
अज्ञानादितमोभानुर्भास्व(स)तां मे हृदम्बरे ॥

End:

अन्तेऽपि मङ्गलाचरणस्य कर्तव्यत्वात् नारायणस्य स्तुतिप्रणामौ करोति—आनन्देति । (विशिष्ट)व्याख्यानेति । विशिष्टेत्युक्तत्वात्सुरा इति घटते इति मन्तव्यम् ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
भूयाल्लक्ष्मीपतेः प्रीत्यै निर्मिता न्यायमञ्जरी ॥
नरसिंहार्यवर्याणां गुरूणां पादयोर्भजे ।
ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनाम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीविष्णुतत्त्वनिर्णयस्य टीकायाः श्रीमज्जयतीर्थमुनिविरचिताया विवरणे न्यायमञ्जर्यां विशिष्टविद्वज्जनवन्दितचरणानां श्रीमन्नरसिंहाचार्यवर्याणां सुतेनानन्ताख्येन कृतायां निर्दोषाशेषसद्गुणत्वं नाम तृतीयः परिच्छेदः समाप्तः ॥

Fol. 199*a* gives the Sannyāsapaddhati. Foll. 199*b*—200*a* contain the Madhvajanmakathā. Foll. 200*b*—202*b* contain the third Adhyāya of Tantrasāraṭīkā-Tattvadīpikā.

(*g*) सत्तन्त्रदीपिका.

SATTANTRADĪPIKĀ.

Foll. 203*a*—209*a*.

Similar to the work described under No. 5413 of the D.C.S. MSS., Vol. XI. By Anantācārya, fourth son of Narasiṁhācārya.

Complete.

Beginning:

वन्दे विष्णुं परं ब्रह्म वायुपूर्वान् सुरानपि ।
ऋष्यादीन् मध्वदेवं च . . . . षान् ॥
येऽध्यापयित्वा वेदांश्च मध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यास्तान् भूयो भूयो नमाम्यहम् ॥

* * * *

सर्वतन्त्रस्वतन्त्राणां गुरूणां करुणाबलात् ।
सङ्क्षेपात्तन्त्रसारीयपूजाया विधिरुच्यते ॥

प्रातरुत्थाय श्रीशं तत्प्रियतमं परमान्तरङ्गं परशुक्लत्रयमितरांश्च देवान् ऋष्यादींश्च सम्प्रदायप्रवर्तकान् सुखतीर्थान् तच्छिष्यान् जयमुनीन् नरसिंहार्यवर्यमुखान् गुरूंश्च स्वज्ञातगुणोत्कर्षानुसारेण स्मृत्वा प्रणमेत् । अथ यथास्मृति शौचादिकं कृत्वा स्नात्वा देवमभिषिच्य तर्पयित्वोर्ध्वपुण्ड्रं धृत्वा च सन्ध्यामुपासीत ।

End :

न हि भागवता देवा विष्ण्वभुक्तं न भुञ्जते ।
बहुनात्र किमुक्तेन सर्वशास्त्रविरोधि तत् ॥

तस्मान्नारायणः पूज्यः प्रथमं स्वीकरोत्यजः ।
ततो रमाकञ्जजाद्या इति शास्त्रस्य निर्णयः ॥

विट्ठलायाखिलेशाय सरमाय सवायवे ।
नृसिंहार्यवरैर्नित्यं पूजिताय नमो नमः ॥

श्रीमन्नृसिंहार्यगुरो(र)नन्तनाम्ना ह्युपान्त्येन चतुर्थसूनुना ।
हरेस्सुपूजाविधिरेवमुक्तः प्रीत्यै हरेर्देवतानां गुरोश्च ॥

सर्वतन्त्रोक्तिमार्गेण ह्यनन्ताख्येन निर्मिता ।
सत्तन्त्रदीपिका भूयात्प्रीत्यै माधवमध्वयोः ॥

Colophon :

इति तन्त्रदीपिका समाप्ता ॥

(r) भारततात्पर्यनिर्णयटीका—तत्त्वमाला.

BHĀRATATĀTPARYANIRṆAYAṬĪKĀ : TATTVAMĀLĀ.

Foll. 209*a*—216*a*.

A short commentary on Ānandatīrtha's Bhāratatātparyanirṇaya, which work has been described under No. 4824 of the D.C.S. MSS., Vol. X : by Ananta, son of Narasiṁhārya.

Contains the Adhyāyas 10—32 complete, but wants the beginning in the 10th Adhyāya.

Beginning:

पयोऽब्धेरुत्तरं तीरमिति । उत्तरसमुद्र एव श्वेतद्वीपस्य सत्त्वादुत्तरं पयोऽब्धितीरमासाद्येत्यर्थः । केचित्तूत्तरं तीरमित्यस्य तीरान्तरमित्यर्थमाहुः श्वेतद्वीपस्य परितस्सत्त्वं चाहुः ।

* * * *

Colophon:

इति दशमोऽध्यायः ॥

End:

कृते प्रजाता इति पाठे हरितोषणाय कृते हरितोषणप्रयोजनायेत्यर्थः केचित् कृते कृतयुग इत्यर्थमाहुः । सूत्रोत्थं सूत्रोत्पन्नम् । सुत्रातमिति क्वचित्पाठः । गयाख्ये क्षेत्रे भार्यायां बुद्धोदितपक्षसंस्थः जिनः पश्चादन्यदेव मतं चक्रे । प्रीत एवाल . . . . . भाम् ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
कृता सत्तत्त्वमाला स्यात्प्रीत्यै रङ्गेशमध्वयोः ॥
येऽध्यापयित्वा निगमान् (. . .) भूयो भूयो नमाम्यहम् ॥
येषां मुखाम्बुजाच्छ्रुत्वा (. . .) मध्वशास्त्रं नमामि तान् ॥

Colophon:

इति श्रीनृसिंहार्यसुतेनानन्ताख्येन कृता तत्त्वमाला समाप्ता ॥

Foll. 216*a*—217*b* contain the Dvīpapramāṇavacanas. Foll. 217*b*—218*a* contain the Caturmukhādimānuṣaparyantatāratamyaviṣaya. Foll. 218*a* and 220*b* contain various Stōtras of Viṣṇu.

(*s*) तत्त्वप्रकाशिकाटीका.

TATTVAPRAKĀŚIKĀṬĪKĀ.

Foll. 221*a*—222*b*.

A commentary on the Ānandatīrtha's Tattvaprakāśikā, also called Upādhikhaṇḍana, which is described under No. 4781 of the D.C.S. MSS., Vol. X: by Padmanābhatīrthabhaṭṭāraka.

Complete.

Beginning:

अज्ञानवशादीशस्य संसारित्वमिति यन्मायिमतं, तत्तदीय(श)स्य पूर्वश्लोकोक्तापदा(शेष)दोषरहितत्वसिद्ध्यर्थं निराकरोति—अज्ञताखिलसंवेत्तुरित्यादिना ।

सर्वज्ञत्वादिलक्षण . . . . उपाधिवशाद्युज्यत इति मन्तव्यम्; उपाधेर्निरूपयितुमशक्यत्वात् । तथापि जीवेश्वरभेदापादकोपाधिः न मध्यस्थावा . . . . . . अज्ञानकल्पितो वा अनध्यस्तश्चेदद्वैतभङ्गः स्यात् ।

End:

कमलारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्कर इति मायावादस्य निर्गुणत्वनिराकारत्वप्रतिपादकं मायावादं निरस्य "यदा पश्यः पश्यते रुक्मवर्ण"-मित्यादिश्रुत्युक्तं प्रकारासिद्धिं नारायणं नम इति नम इति ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वप्रकाशिका(याष्टीका) श्रीपद्मनाभतीर्थभट्टारकविरचिता समाप्ता ॥

(*t*) मायावादखण्डनटीका.

MĀYĀVĀDAKHAṆḌANAṬĪKĀ.

Foll. 222*b*—223*a*.

A commentary on Ānandatīrtha's Māyāvādakhaṇḍana, which work has been described under No. 4835 of the D.C.S. MSS., Vol. X: by Padmanābhabhaṭṭāraka.

Complete.

Beginning:

अमितसज्ज्ञानसुखशक्तिपयोनिधित्वान्नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकर इत्युक्तम् । तत्र सज्ज्ञानेनाज्ञानव्युदसनप्रकारमाह—विमतमनारम्भणीयमित्यादिना । जैनादिमतवदस्य मतस्यापि बाधितविषयत्वेनाङ्गीकारात् । मायावादिना जैनबौद्धादिग्रन्थवन्मायावादो नारम्भणीयः बाधितविषयत्वाविशेषादित्यर्थः ।

End:

दृढविश्वासार्थं भगवद्वेदव्यासवचनं महाभारताद्युक्तमुदाहरति—नास्ति नारायणसममिति । नास्ति नारायणसमं न भूतं न भविष्यति—इत्यस्य वाक्यस्य सत्यत्वकथनेन रुद्रादेर्जगदुत्तमत्ववचनं पुराणादिगतमन्या-(यथा)र्थमिति सूति(चि)तं भवति ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितमायावादखण्डनटीका श्रीपद्मनाभतीर्थभट्टारकविरचिता समाप्ता ॥

Foll. 223*b* and 224*a* contain a portion of the Mithyātvānumānakhaṇḍanaṭīkā and a portion of Pramāṇalakṣaṇaṭīkā by Padmanābhatīrthabhaṭṭāraka.

(*u*) कथालक्षणटीका.

KATHĀLAKṢAṆAṬĪKĀ.

Foll. 224*a*—225*a*.

Similar to the work described under No. 4784 of the D.C.S. MSS., Vol. X. By Padmanābhatīrtha.

Complete.

Beginning:

प्रवक्ष्यामि कथालक्षणमिति प्रतिज्ञातं निरूपयितुमाह—वादो जल्पो वितण्डेति । वादादीनां लक्षणं निरूपयति—तत्त्वनिर्णयमित्यादिना । केवलं तत्त्वे निर्णयं तद्गुरुशिष्ययोरन्येषां वा सतां परस्परं पक्षप्रतिपक्षपरिग्रहेण सम्मित मनोहरा कथासौ वादः इत्युच्यते ।

End:

वादजल्पवितण्डानामिति । वादजल्पवितण्डाभिः भगवत्प्रतिपक्षनिरासाद्भगवत्पक्षस्थापनात् कथालक्षणकथनेन भगवत्प्रीतिर्भविष्यतीत्यत आह—आनन्दतीर्थमुनिनेति ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितकथालक्षणटीका पद्मनाभतीर्थभट्टारकविरचिता समाप्ता ॥

(*v*) विष्णुतत्त्वनिर्णयटीका.

VIṢṆUTATTVANIRṆAYAṬĪKĀ.

Foll. 225*a*—242*a*.

A commentary on the Viṣṇutattvanirṇaya which, work has been described under No. 4840 of the D.C.S. MSS., Vol. X.

Breaks off in the first Paricchēda.

Beginning:

श्रीविष्णुं मोक्षदं वन्दे भक्त्या(चा)भ्यधिकं (प्रभुम्) ।
प्रत्ययाद्दं(तिपाद्यं च) यद्वेदैः पूर्णप्रज्ञं नमामि तम् ॥

आनन्दतीर्थश्रीपादैः विष्णुतत्त्वनिर्णयः ग्रन्थः कृतः । हरिप्रीत्यै तद्व्याख्यानं समारभे । श्रीविष्णुतत्त्वं निर्णेतुकामः श्रीमदानन्दतीर्थमुनिः तदर्थमेव विष्णुं प्रमाणमि(णम)ति—सदागमैकविज्ञेयमिति । सदागमैकविज्ञेयं समतीतक्षराक्षरमिति । निर्देशक्रमेणैव यानि विष्णुविशेषणानि श्रुतीतिहासादिसदुक्तिभिरिह ग्रन्थे पुराणवचनैः प्रथयति—ऋगाद्या इत्यादिना ।

End :

दुःखादिलक्षणसंसारस्य सत्यत्वे मायावादिनो यदनिष्टं तदाह—अतश्चेति । अनुभवसिद्धस्यापि दुःखादिसंसारस्य मुक्तिमात्रेण मिथ्यात्वाङ्गीकारात् । अनुभवसिद्धत्वाविशेषादात्मनोऽपि मिथ्यात्वं स्यात् जगद्वत्सत्यत्वात् मा जगदसत्यमिति यद्द्विधाकल्पने कल्पनागौरवं स्यादित्यात्ममिथ्यात्वे युक्तिसम्भवात् निखिलसंसारेऽधिष्ठानत्वेनात्मास्तित्वासिद्धिरिति उच्यते.

Foll. 243*a*—244*b* contain the last portion of Tattvōddyōtaṭīkā of Padmanābhatīrthabhaṭṭāraka.

(*w*) तत्त्वोद्द्योतपञ्जिकाटीका—भावप्रकाशिका.

TATTVŌDDYŌTAPAÑJIKĀṬĪKĀ : BHĀVAPRAKĀŚIKĀ.

Foll. 245*a* 256*a*.

Similar to the work described under R. No. 14 ante. By Ananta, son of Narasiṁha.

Complete.

Beginning :

नारायणं परं ब्रह्म रमां मध्वं सुरेश्वरम् ।
मध्वशिष्यान्नमामीशान् श्रीमज्जयमुनींस्तथा ॥
येऽध्यापयित्वा निगमान्मध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यांस्तान् भूयो भूयो नमाम्यहम् ॥
नरसिंहार्यवर्याणां गुरूणां करुणाबलात् ।
व्याकरिष्ये यथाबोधं तत्त्वोद्द्योतस्य पञ्जिकाम् ॥

ग्रन्थादौ समुचितमङ्गलमाचरन् चिकीर्षितं प्रतिजानीते—विश्वेति । विवृण्महे इति । वर्तमानसामीप्य इत्यादिना लट् । ननु इदं प्रकरणं व्यर्थं प्रयोजनाभावात् . . . . . . न्तरायविधुरैर्मङ्गलं कुतः कृतमित्याशङ्कां परिहरन्नाद्यपद्यमवतारयति—इहेत्यादिना ।

End:

एवं समापितप्रकरणोऽपि श्रीमज्जयतीर्थः प्रकरणान्तेऽपि स्वेष्टदेवता प्रार्थनरूपं मङ्गलमाचरति—श्रीमदानन्दतीर्थेति ॥

नरसिंहार्यवर्याणामनन्ताख्येन सूनुना ।
भावप्रकाशिका भूयात्कृता प्रीत्यै हरेस्सदा ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य तत्त्वोद्द्योतस्य टीकायाः श्रीमज्जयमुनिविरचितायाः वचनप्रसूनमालाख्यायाः टीका श्रीमन्नरसिंहार्यवर्यसुतेनानन्ताख्येन कृता भावप्रकाशिका समाप्ता ॥

R. No. **3929**.

Palm-leaf. 18 × 1⅝ inches. Foll. 262. Lines, 7 in a page. Grantha. Telugu and Nandināgarī. Very much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Foll. 49*b*, 80 and 81 are left blank.

भावानन्दीप्रकाशिका.

BHĀVĀNANDĪPRAKĀŚIKĀ.

Same work as that described under No. 4100 of the D.C.S. MSS., Vol. VIII. By Vajraṭaṅka.

Wants the beginning in the Anumānakhaṇḍa and the Śabdakhaṇḍa incomplete and in disorder.

R. No. **3930**.

Palm-leaf. 15⅝ × 1⅝ inches. Foll. 120. Lines, 12 in a page. Grantha Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Fol. 1*a* gives the name of this work. Foll. 1*b*, 2, 3, 70, 94*b*, 114—120 are left blank.

तत्त्वचिन्तामणिदीधितिपरीक्षा.

TATTVACINTĀMAṆIDĪDHITIPARĪKṢĀ.

Same work as that described under No. 4039 of the D.C.S. MSS., Vol. VIII. By Rudrabhaṭṭācarya, son of Vidyānivāsabhaṭṭācārya.

Contains the Pratyakṣakhaṇḍa complete.

Beginning :

अनिर्वाच्यगुणग्राममानताशेषकारणम् ।
चिराय चिन्मयं धाम घनश्याममुपास्महे ॥
विद्यानिधानवृक्षस्य न्यायवाचस्पतेरियम् ।
निर्मितिर्निर्मलधियामानन्दयतु मानसम् ॥

प्रेक्षावदिति । प्रेक्षावत्प्रवृत्तये प्रयोजनवत्तां अभिधेयसम्बन्धौ चाहेत्यन्वयः ।

तदुक्तम्—

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यस्सम्बन्धस्सप्रयोजनः ॥

* * * *

परम्परया निश्श्रेयसे सम्बन्धोऽस्तीति जगत्पदवाच्यानामचेतनाना कुतो दुःखपङ्कमग्नत्वमत आह—संसार्येवेति । जगदेवेत्येवकारस्तु प्रसिद्धार्थः घट एवेतिवत् तत्र प्रसिद्धा घटा इतिवत् अत्रापि प्रसिद्धं जगदिति भावः ।

End:

इदं रजतत्वेन जानामीति प्रत्यक्षेणैव रङ्गे रजतत्वविशिष्टबुद्धिसिद्धिः कारणबाधादेव तत्र ज्ञानद्वयमभ्युपेयं तन्निरासे च तादृशानुव्यवसायादेव भ्रमसिद्धिरित्यर्थः ॥

Colophon:

इति श्रीमहोपाध्यायश्रीविद्यानिवासभट्टाचार्यात्मजश्रीरुद्रभट्टाचार्यविरचितां प्रत्यक्षदीधितिपरीक्षा समाप्ता ॥

R. No. 3931.

Palm-leaf. 15⅜ × 1¼ inches. Foll. 86. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district,

शिखरिणीमाला, शिवतत्त्वविवेकसहिता.
ŚIKHARIṆĪMĀLĀ WITH ŚIVATATTVAVIVĒKA.

Foll. 5*a*—85*b*.

Same work as that described under No. 5106 of the D.C.S. MSS., Vol. X. By Appayadīkṣita.

Breaks off from the 43rd stanza.

Foll. 1*a*—4*a* give the Śivapāramyavacanas. Fol. 4*b* is left blank, Fol. 86 contains a portion of Gāyattrīrāmāyaṇa.

R. No. **3932.**

Palm-leaf. $19\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 276. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal̤, Bhavani, Coimbatore district.

Fol. 1*a* gives the title of this work. Foll. 1*b* and 276 are left blank.

तन्त्रशिखामणिः.
TANTRAŚIKHĀMAṆIḤ.

Same work as that described under Nos. 4417 and 4418 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita, son of Kāmākṣī and Vēṅkaṭaśrīnivāsadīkṣita.

Contains the Adhyāyas seven to ten complete.

R. No. **3933.**

Palm-leaf. $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 222. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal̤, Bhavāni, Coimbatore district.

(*a*) काशिकावृत्तिव्याख्या—पदमञ्जरी.
KĀŚIKĀVṚTTIVYĀKHYĀ: PADAMAÑJARĪ.

Foll. 2*a*—155*b*. Fol. 1*a* gives the names of the works contained in this Library. Fol. 1*b* is left blank.

Same work as that described under No. 1316 of the D.C.S. MSS., Vol. III.

Contains the fifth Adhyāya complete.

(*b*) जातककर्मपद्धतिः, सव्याख्या.

JĀTAKAKARMAPADDHATIḤ WITH COMMENTARY.

Foll. 156*a*—172*b*.

Same work as that described under R. No. 1087 ante. By Sūrya-dēvayajvan.

Breaks off in the sixth Adhyāya.

(*c*) आपस्तम्बश्रौतसूत्रभाष्यम्.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.

Foll. 173*a*—217*b*. Fol. 218 is left blank. Foll. 219*a*—222*a* contain a portion of the Svaraprakaraṇa. Fol. 222*b* is left blank.

Same work as that described under No. 1060 of the D.C.S. MSS., Vol. II. By Kapardisvāmin.

Contains the 15th Praśna only.

R. No. 3934.

Śrītāla. $10\frac{5}{8} \times 2\frac{1}{8}$ inches. Foll. 218. Lines, 13 in a page. Grantha. Slightly injured.

Purchased in 1921-22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

(*a*) दुरूहशिक्षा.

DURŪHAŚIKṢĀ.

Foll. 1*a*—114*a*. Fol. 114*b* is left blank.

A treatise maintaining the soundness of the views set forth in the Vidhirasāyana of Appayadīkṣita and refuting the adverse comments of certain critics. In the beginning of the work it is stated that the son of Appadīkṣita is the author of the work, while the other colophons give the author's name as Appayadīkṣita, who is stated to have written this at the instance of Cinnabommabhūpāla, minister of Cokkanātha (son of Cinnamāmbā) of Nalla Bomma family.

१. उदाहरणोद्धारभङ्गः.
२. त्रैदोष्यव्यवस्थाभङ्गः.
३. अग्निविध्याक्षेपपरिहारभङ्गः.
४. अपूर्वविधिखण्डनम्.
५. अपूर्वविधिलक्षणसमर्थनभङ्गः.
६. नियमविधिसमर्थनभङ्गः.
७. परिसङ्ख्याविधिसमर्थनभङ्गः.

Complete.

Beginning:

विद्वत्प्रभोः कृपायोगात् शोकनाथमहीभुजः ।
दुरूहशिक्षां मन्दोऽपि निश्शङ्कं कर्तुमारभे ॥

नाप्रबन्द्धास्ति नायष्टा येषां नाब्रह्मवित् कुले ।
आमूलोन्मूलितद्वैतान् कुलवृद्धान्नमामि तान् ॥

यद्रसायनसमीरितं विधौ क्षुद्रधीः परिजहार दूषणम् ।
तन्निराकरणकौतुकी जनस्सन्निधापयतु मामिकां कृतिम् ॥

यद्यपि न विधिरसायनमास्कन्दति दूषणं गुरूक्तमपि ।
तदपि तदाधुनिकानां मन्दविषन्यायतो निराकुर्मः ॥

श्लाघाकम्प्रद्रुहिणगृहिणीकर्णपूरेन्दुरिङ्ख-
ज्ज्योत्स्नासङ्गद्विगुणधवलीभूतसाहित्यकीर्तिः ।
ब्रह्माद्वैतप्रवचनगुरुर्यस्य तातोऽप्पयज्वा
सोऽहं लक्ष्यैस्सह विधिविधालक्षणानि क्षिणोमि ॥

प्रायेण सिद्धवत्कृत्य पदार्थान् विलिखामि तान् ।
कृतोपपादना ये स्युर्मूले विधिरसायने ॥

व्रीहीन् प्रोक्षतीति विधिर्नापूर्वविधिः अग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामिति दर्शपूर्णमासप्रकरणाधीतमन्त्रबलादेव प्रोक्षणकर्तव्यतासिद्धेरित्याक्षिप्तं विधिरसायने । तत्र केचित् परिहरन्ति । अयमपूर्वविधिरेव.

* * * *

Colophon:

इति श्रीमन्नल्लयो(बो)म्मकुलार्णवपुण्य(पूर्ण)चन्द्रचिन्नमाम्बागर्भशुक्तिमुक्ताफलब्रह्मण्यविरुदाङ्कचो(शो)क्कनाथभूपालप्रियसचिवचिन्नबोम्मभूपालहृदयकुहरविहरमाणसाम्बशिवप्रेरितेन अप्पयदीक्षितेन विरचितायां दुरूहशिक्षायामुदाहरणोद्धारभङ्गः ॥

End:

तस्मात्प्राचीनव्यवहारानुसारेण लक्षणं कर्तव्यम् । तथा च नियमविधिलक्षणमप्यव्याप्त्यतिव्याप्तिग्रस्तत्वादयुक्तमेवेति सिद्धम् ॥

Colophon:

इति श्रीमन्नल्लबोम्मकुलार्णवपूर्णचन्द्रचिन्नमाम्बागर्भशुक्तिमुक्ताफलब्रह्मण्यविरुदाङ्कचा(शो)क्कनाथभूपालप्रियसचिवचिन्नबोम्मभूपालहृदयकुहराविहरमाणसाम्बशिवप्रेरितेनाप्पयदीक्षितेन विरचितायां दुरूहशिक्षायां नियमविधिसमर्थनभङ्गः ॥

अथ तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयत इति परिसङ्ख्याविधिलक्षणमाचार्यैरुक्तम् । तद्यपि विधिरसायने बहुधा दूषितम् ।

* * * *

यदुक्तं दीक्षितैस्तत्तथैव वज्रलेपायते ॥

कथं बत निरुध्यतां कमलनालसूत्रैस्त्वया
मदत्रुटितशृङ्खलावलयबन्धनस्सिन्धुरः ।
कृतं विधिरसायने तदिह दूषणान्वेषणै-
र्वैरं पुरहरे चिरं मन इदं सखे स्थाप्यताम् ॥

Colophon :

दुरूहशिक्षा च सम्पूर्णा ॥

(b) आश्विनसहस्रप्रयोगः.

ĀŚVINASAHASRAPRAYŌGAḤ.

Foll. 115a—180a. Foll. 180b—218b are left blank.

Similar to the work described under No. 1158 of the D.C.S. MSS., Vol. II.

Complete.

Name of the scribe—Śēṣan.

Beginning :

दीक्षणीयेष्टिमारभ्य सवनीयपशुपर्यन्तं समानम् । सवनीयपशोस्सारस्वत्या वपायाः । ये(यजाम)हे प्रक्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः । प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्या वौ । पुरोडाशस्य । ये (. . .) हे पावीरवी कन्या चित्रायुस्सरस्वती वीरपत्नी धियं धात् । ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् वौ ।

End :

बृहस्पते अति यदर्यो अर्हाद्द्युमाद्विभाति क्रतुमज्जनेषु —ओम् । यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रोम् । त्रिः उक्थं वाचि आश्विनेन ग्रहणे सपुरोडाशेन चरन्ति । ये यजामहे प्र वामन्धांसि मद्यान्यस्थुरंगतं हविषो वीतये मे । तिरो अर्यो हवनानि श्रुतं नः । उभा पिबतमश्विनोभा नश्शर्म यच्छतम् । अविद्रियाभिरूतिभिः वौ । नेयं शस्त्रयाज्या ।

यद्येतस्य पुरोडाशस्य स्विष्टकृता चरेयुः । पुरोडाशा अग्ने पचतोऽग्ने प्रधानाहुतिमिति याज्या—इत्यन्तोऽतिरात्रे—इति शेषः ॥

Colophon:

आश्विनसहस्रं समाप्तम् ॥

R. No. 3935.

Palm-leaf. 13⅜ × 1 inches. Foll. 172. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

(*a*) न्यायाध्वदीपिका.

NYĀYĀDHVADĪPIKĀ.

Foll. 2*a*—86*b*. Fol. 1*a* gives the names of the works contained in this MS. Foll. 1*b*, 87*b* and 88 are left blank. Fol. 87*a* contains the Vidhibhēdanirūpaṇavacana.

Same work as that described under No. 4795 of the D.C.S. MSS., Vol. X. By Vijayīndrabhikṣu.

Incomplete.

Beginning:

न्यायाध्वगामिना मध्वदर्शनाद्गतिसिद्धये ।
तन्यते विजयीन्द्रेण तन्वी न्यायाध्वदीपिका ॥

यद्यपि शास्त्रदीपिकादिरूपिका दीपिका न्यायाध्वगामिनां गतिसिद्धये तदध्वदर्शनरूपाः पूर्वमेव प्रवृत्तास्सन्ति; तथापि न ताभिर्बालाबालसाधारणं गतिसाधनं दर्शनं सिध्यति । शास्त्रदीपिकादेः प्रौढप्रकाशकत्वेन बालदृष्ट्यभिभावकत्वात् । न हि तद्दृष्ट्यभिभवे तद्गतिसाधनं दर्शनं सम्भवति दृष्ट्या चरन्त एव प्रौढसौरालोकाभिभूतदृष्टयो लोकास्सन्निकृष्टानपि पदार्थानपश्यन्तो दृश्यन्ते ।

End:

न ैवं प्रयाजादिवाक्यवन्मन्त्राणामप्यङ्गभूतार्थप्रतिपादनमात्रेण पर्यवसानसम्भवात्स्वरूपेण प्रधानैरग्रहणात् कर्मकाले प्रयोज्यत्वं न स्यात् । अन्य-

थाङ्गप्रतिपादनमात्रेण स्वरूपग्रहणे प्रयाजादिवाक्यानामपि मन्त्रवत्स्वरूपग्रहणापत्तिरिति वाच्यम् । मन्त्राणां विधित एव स्वरूपेण तादर्थ्यसिद्धेः । न चाङ्गवाक्यानां तथा विधिरस्तीत्यलं पल्लवेन ।

(*b*) आपदेवीयम् (मीमांसान्यायप्रकाशः).

ĀPADĒVĪYAM (MĪMĀṀSĀNYĀYAPRAKĀŚAḤ).

Foll. 89*a*—171*a*. Foll. 113, 144*b*, 171*b* and 172 are left blank.

Same work as that described under No. 4405 of the D.C.S. MSS., Vol. IX. By Āpadēva, son of Anantadēva.

Complete.

R. No. 3936.

Palm-leaf. 19⅜ × 1⅝ inches. Foll. 224. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Foll. 223 and 224 are left blank.

शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवर्त्तिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ: NYĀYAKARPŪRAVARTTIKĀ.

Same work as that described under Nos. 4497—4498 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita.

Contains from the third Adhyāya to the fifth Adhyāya.

R. No. 3937.

Palm-leaf. 14⅜ × 1¼ inches. Foll. 33. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

प्रौढमनोरमाव्याख्या.

PRAUḌHAMANŌRAMĀVYĀKHYĀ.

A commentary on the Prauḍhamanōramā which itself is a commentary by Bhaṭṭōjidīkṣita on his Siddhāntakaumudī. The commentator, whose name is not given, was the son of Rāmasvāmidīkṣita.

Breaks off in the Svarasandhiprakaraṇa.

Beginning:

प्रणम्य तातचरणान् श्रीरामस्वामिदीक्षितान् ।
व्याचक्षेऽनन्यसापेक्षैः पदैः प्रौढमनोरमाम् ॥

परं ब्रह्म परमात्मानं ध्यायं ध्यायं ध्यात्वा ध्यात्वा आभीक्ष्ण्ये णमुल् चेति णमुल् । नित्यवीप्सयोरिति द्विर्भावः । गुरोः एतच्छास्त्राध्यापयितुः गिरः एतच्छास्त्रगूढार्थप्रतिपादिका वाचः । स्मारं स्मारं स्मृत्वा स्मृत्वा न तु स्वयं किञ्चित्प्रकल्प्येत्यर्थः ।

End:

स्थानिवद्भाव इति भाष्ये व्याख्यातम् । तस्यायमर्थः—आदेशनमादिष्टम् । तद्यस्य नास्ति सोऽनादिष्टः अकृत . . . . आदेशे आदिष्टाच्चैषोऽचः पूर्वः अचो यः पूर्व इत्यर्थः । वैयाकरण इत्यत्रैच्

* * * *

व्याख्यातमिति । स्वाभिहितार्थपर्यवसन्नं वार्त्तिकमित्यर्थः । पदस्य चर.

R. No. 3938.

Palm-leaf. $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 50. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Fol. 1*a* gives the name of this work. Foll. 1*b* and 49*a*—50 are left blank.

लीलावतीविलासः.

LĪLĀVATĪVILĀSAḤ.

A commentary on Bhāskarācārya's Līlāvatī, which work has been described under No. 13477 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning:

नत्वा गुरुचरणाम्बुजमम्बां वागीश्वरीं च वाक्सिद्ध्यै ।
लीलावतीविलासं रचये रसिकजनमौलिसन्तुष्ट्यै ॥

प्रारिप्सितग्रन्थस्यविघ्नपरिसमाप्तये विघ्नराजप्रणामरूपं मङ्गलं कुर्वन् चिकीर्षितं प्रतिजानीते—प्रीतिमिति । स्वेष्टकार्यनिर्विघ्नपरिसमाप्तिजन्यामिति

भावः । पाटीमिति सम्प्रदायमित्यर्थः । लालित्यलीलावतीमिति । लालित्यस्य मृदुभावस्य या लीला विलासः तद्वतीमित्यर्थः । मार्दवपरमकाष्ठाभूषितामिति यावत् । इदमेवास्य ग्रन्थस्य नामापि । अस्मिन् शास्त्रे अपेक्षितास्संज्ञा आह—वराटकानामित्यादिना ।

End:

न चोक्तं तेन घनगोलाकारा एव भूम्यादयः । भृगुगुरुबुधशनिभौमाः भृग्वादिबिम्बानां च योज(न)व्यासक्रमेण ङ्ञणनमांशकाः शशिबिम्बयोजनव्यासस्य ङांशः पञ्चमांशः, भृगोर्बिम्बस्य योजनव्यासः ञांशः दशमांशः, गुरोर्णांशः पञ्चदश.

R. No. 3939.

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 142. Lines, 10 in a page. Telugu. Very much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

आश्वलायनश्रौतसूत्रसिद्धान्तिभाष्यम्.

ĀŚVALĀYANAŚRAUTASŪTRASIDDHĀNTIBHĀṢYAM.

Same work as that described under R. No. 1695(*a*) ante. By Dēvasvāmin alias Viṣṇugūḍhabhaṭṭōpādhyāya.

Contains the Adhyāyas one to three complete and Adhyāya four incomplete.

Fol. 1*a* gives the name of this work. Foll. 1*b*, 71 and 72 are left blank.

R. No. 3940.

Śrītāla. $12\frac{7}{8} \times 1\frac{7}{8}$ inches. Foll. 288. Lines, 16 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

(*a*) न्यायचूडामणिः—तत्त्वचिन्तामणिव्याख्या.

NYĀYACŪḌĀMAṆIḤ : TATTVACINTĀMAṆIVYĀKHYĀ.

Foll. 3*a*—80*b*. Fol. 1*a* gives the name of this work. Fol. 2 contains the last portion of this work. Fol. 8*b*, 43, 63, 65*b* and 88—90 are left blank.

Same work at that described under No. 4201 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning. By Rāmakṛṣṇādhvarin, son of Dharmarājādhvarin.

This is also called Nyāyaśikhāmaṇi.

Contains upto the end of the Anyathākhyativāda.

End :

हन्तैवं रजतत्ववैशिष्ट्यानुयोगित्वं यद्रजते प्रसिद्धं तद्दोषवशाच्छुक्तौ भासत इति क्वासद्धानवार्ताविकाश इति सङ्क्षेपः ॥

Colophon :

इति श्रीधर्मराजाध्वरीन्द्रसुतश्रीरामकृष्णाध्वरिविरचिते न्यायशिखामणौ अन्यथाख्यातिवादस्सम्पूर्णतामाप.

(*b*) आपस्तम्बश्रौतसूत्रवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ.

Foll. 91*a*—203*b*.

Same work as that described under No. 1064 of the D.C.S. MSS., Vol. II. By Ahōbilasūri, son of Narasiṁhayajvan and pupil of Śaṅkarānandatīrtha.

Breaks off in the fourth Paṭala of the fourth Praśna. This Vṛtti is called Yājñikasarvasva

---

(*c*) आपस्तम्बपरिभाषासूत्रव्याख्या.

ĀPASTAMBAPARIBHĀṢĀSŪTRAVYĀKHYĀ.

Foll. 204*a*—224*a*. Fol. 224*b* is left blank.

Same work as that described under No. 1075 of the D.C.S. MSS., Vol. II. By Haradattacārya.

Complete.

(*d*) आपस्तम्बश्रौतसूत्रवृत्तिः—सूत्रदीपिका.

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ : SŪTRADĪPIKĀ.

Foll. 225*a*—282*b*. Foll. 284—288 contain a small portion of this work. Fol. 283 is left blank.

Same work as that described under No. 1062 of the D.C.S. MSS., Vol. II and R. No. 375(*b*) ante, wherein see for the beginning. By Bhaṭṭarudradatta.

Contains the Praśnas 9—14 complete.

End :

यज्ञायज्ञियकाले पयांसि आशीराद्यर्थानि । . . . . व शास्ति विविधं प्रेष्य तसूत्सूक्तवाककाले . . . . . . स्सुत्यामिन्द्राग्निभ्यामित्यादिनापि शेषं पूर्ववत् । एते (. . .) जुहुयात् । एतेषामेकस्मिन्नपि कर्माणि पूर्वे(षु) क्रियमाणेषु जुहुयादेवं . . . . . या बहुषु वेत्यर्थः ॥

Colophon:

नवमः पटलः.

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां चतुर्दशः प्रश्नः ॥

R. No. **3941.**

Palm-leaf. $12\frac{1}{2} \times 1$ inches. Foll. 288. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasimha Śāstrigaḷ, Bhavani, Coimbatore district.

तत्त्वविवेकदीपनव्याख्या—अद्वैतरत्नकोशपालिनी.

TATTVAVIVĒKADĪPANAVYĀKHYĀ : ADVAITARATNA-KŌŚAPĀLINĪ.

Same work as that described under R. No. 1513(*b*) ante. By Rāmādhvarin, son of Kṛṣṇādhvarīndra.

Contains the first Paricchēda complete, but wants the beginning.

R. No. **3942.**

Palm-leaf. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 111. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasimha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) शब्दोदाहरणम्, सव्याख्यानम्.

ŚABDŌDĀHARAṆAM WITH COMMENTARY.

Foll. 1*a*—89*a*.

A poem describing the story of the Rāmāyaṇa; the author Bhāskarasūri, who wrote a commentary on his own work, was the son of one Rāmasvāmidīkṣita. The work has been written after the model of the Bhaṭṭikāvya.

The text is also called Sītārāmīya.

Breaks off in the second Ullāsa.

Beginning:

शिवं नत्वा महादेवं शब्दोदाहरणाभिधम् ।
व्याख्यास्ये स्वकृतं काव्यं यथामति विदां मुदे ॥
इहान्वयार्थकथनसमासाद्युक्तयः पुरा ।
पश्चात्तु वैयाकरणी प्रक्रिया सङ्ग्रहीष्यते ॥

तस्य काव्यस्यायमादिमः श्लोकः—

नारायणाब्जभवहैमवतीशरूपं श्रेयस्करं प्रणमतां धृतचन्द्रमस्कम् ।
साधूपलब्धमनिदंप्रथमोक्तिलक्ष्यं ब्रह्माविरस्तु मम हृद्यमितप्रभावम् ॥

नारायणः विष्णुः स च अब्जात्पद्माद्भव उत्पत्तिर्यस्य सः अब्जभवः ब्रह्मा स च हिमवतोऽपत्यं स्त्री हैमवती पार्वती तस्या ईशः शिवः स च ते रूपाणि विग्रहा यस्य तादृशम् ।

* * * *

कस्कः कवी रामगुणस्तवार्थान् कांस्कान् प्रबन्धानतनिष्ट नाग्र्यान् ।
तथापि नाम स्पृहयामि रामस्तुत्यात्तसाफल्यजनुष्कतायै ॥

कस्कः को वा को वा कविः प्रबन्धकर्ता रामस्य भगवतो रामचन्द्रस्य गुणानां माहात्म्यादीनां स्तवाय स्तवार्थान् अग्र्यान् श्रेष्ठान् कांस्कान् कीदृशान् प्रबन्धान् काव्यादीन् नातनिष्ट न कृतवान् ।

* * * *

सन्धिनिरूपणरूपश्रीरामस्वामिदीक्षितसुतस्य ।
सीतारामीयाख्यस्वकाव्यविवृतौ गतोऽग्रिमोल्लासः ॥

Colophon:

इति श्रीरामस्वामिदीक्षिततनूजभास्करसूरिविरचितायां स्वकृतसीतारामीयाख्यमहाकाव्यव्याख्यायां शब्दोदाहरणाख्यायां सन्धिनिरूपणं नाम प्रथम उल्लासः ॥

स्वात्मत्वात्प्राणिनां प्रेष्ठः क्षोदं क्षोदीयसां ददत् ।
दिविष्ठसङ्घे वृन्दिष्ठः श्रायसायास्तु नश्शिवः ॥
द्वैतीयीके त्वथोल्लासे सुपूक्यङादिनिरूपणम् ।
क्रियते सोपकरणं तेन तुष्यतु शङ्करः ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात्। कृत्तद्धितसमासाश्च।

* * * *

स्वयंभुवं तत्र विलोक्य देवा उदीयुषां ते समये समाने।
पूष्णामिवौघं प्रमदाब्धिमग्ना दण्डा इवोर्व्यां तरसा निपेतुः॥

उदीयुस् आं [शासिवसिघसीनां च] (आदेशप्रत्यययोः)—इण्कुभ्यां परस्यैषां(स्य) प्रत्ययावयवस्य सस्य षः स्यादिति षत्वमुदीयुषाम्.

(b) णत्वबाधाविधूननम्.
ṆATVABĀDHĀVIDHŪNANAM.

Foll. 89b—90b. Foll. 91 and 92 are left blank.

Similar to the work described under R. No. 1882(c) ante. By Śēṣādri, who salutes one Rāmamakhin.

Contains 12 stanzas only.

Beginning:

शेषाद्रिशास्त्रिणा शैवमूर्धन्येन कृता मुदे।
णत्वबाधाविधूतिस्तु नारायणपदे सताम्॥
अयमप्पयदीक्षितोक्तमार्गः तमसां सुदृशां गतिप्रदः स्यात्।
कुदृशामशिवान्तरङ्गभाजां चलितुं शक्यमिहायनप्रदे॥
अद्वैतविद्यागुरुणाप्पयज्वविद्वद्वरेण्येन कृतेन्दुमौलौ।
नारायणीभाविनि लक्षणातः रूढ्याथ वा सद्विदुषां मुदे या॥
शेषाद्रिविद्वत्प्रमुखेन सैव योगेन शम्भौ स्थगिता निरस्य।
णत्वं शिवे बाधत इत्यभाणि तेनेति ये तान् प्रतिवादिनोऽपि॥

End:

तेषां राममखीन्द्राणां चरणाम्बुरुहद्वये।
मानसं मामकं नित्यं भृङ्गीभूय रमत्वलम्॥

(c) णत्वसाधनम्.
ṆATVASĀDHANAM.

Foll. 93a—97a. Foll. 97b—104b are left blank.

Similar to the work described under subdivision (*b*) of the same number.

Incomplete.

Beginning :

शिवमानोनुवानोऽलं शास्त्रार्थे चङ्क्रमाणधीः ।
शिवोत्कर्षाविरोधित्वात् णत्वबा(सा)धनमारभे ॥
नारायणपदे णत्वं तेऽपि चेदप्पदीक्षिताः ।
दुस्साधं मेनिरे योगे केऽर्वाञ्चस्तस्य साधने ॥
तेऽप्यन्तर्यामिताहेतोः नारायणपदाभिधम् ।
शम्भुं वदन्तस्सोसूचाश्चक्रिरे णत्वबाधनम् ॥
शिवादिशब्दा गोविन्दे यौगिका यदि किं ततः ।
शुकवद्वादिनान्योक्तिरनुकर्तुं न साम्प्रतम् ॥

End :

तमोऽनुवादेन यदा तम इति वाक्यस्य सुबालवाक्यवदेव ब्रह्मत्वाभिमतस्य त . . . कालवद्भावप्रतिपादनेन साफल्यसम्भवेन-शिवशब्दस्य योगे नारायणपरत्वेऽपि न वाक्यवैयर्थ्यम्.

(*d*) वेदाम्बिकास्तोत्रम्.

VĒDĀMBIKĀSTŌTRAM.

Foll. 105*a*—107*a*.

A eulogy addressed to goddess Vēdavatī, worshipped at the Śaiva shrine in Tirukkaḻukunṟam : by Rāma.

Wants the beginning and the end.

Beginning :

कामधुकूषडङ्गगीरदभ्रशृङ्गनानठत्प्रसङ्ग पाणिसत्कुरङ्ग जिततप्तकनक - प्रपदगुप्तभवतप्त शशिसप्तहयसप्तभुजकु(क्रु)प्तलोचनाधिपत्यजृम्भमाणपद्मसम्भ - वाधिचक्रदम्भ भारविप्रलम्भ

* * * *

शक्रसुरचक्रकृतशुक्रवारभजना परं जयति वेदनायिका ।

End :

बहुलमुक्तिसुहृदुक्तिभरयुक्तिशतभक्तिपरिवृत्तिकरभुक्तिकुचसाक्तिचेदि(टि)- तरुणानुरञ्जितवधूपवाटिके.

(c) वर्णलघुव्याख्यानम्.

VARṆALAGHUVYĀKHYĀNAM.

Foll. 107b—108b. Foll. 109—111 are left blank.

A short commentary by Rāma on his own work Varṇa which is a treatise on music.

Incomplete.

Beginning:

वेदाम्बिकापदाम्भोजयुगन्दिन्दिरश्चेतसा ।
रामेण स्वकृतो वर्णो लघु व्याख्यायते स्फुटम् ॥

वर्णस्य चत्वारः पादाः । पादाश्च द्विकलाः । कला च त्रिकण्ठिका सलम्बना च । कण्ठिकालम्बने च यथाबुद्धि कविभिः कल्प्ये । तत्र च यथा प्रथमा कण्ठिका तथा सर्वा, यथा प्रथमं लम्बनं तथा सर्वं रचनीयानी(यमि)ति निर्बन्धः । अत एवास्मिन् वर्णे द्वितीयायां कलायां तृतीयायां कण्ठिकायां देहभिन्मतङ्गेत्यत्र दकारस्य मकारे परे यरोऽनुनासिकेऽनुनासिको वेति विकल्पितोऽनुनासिकभावो नाङ्गीकृतः तदङ्गीकारे हि देहभिन्मतङ्गेति स्यात् । तथात्वं च तानतत्त तनतत्त तान इति कण्ठिकापकर्णरचनाप्रकारानुकारस्य द्रमिडशास्त्रे குறிப்பு प्रसिद्धस्य विरोधि ।

End:

ओजानां द्वितीयवर्णसाम्यम् । युग्मानां स्वस्वपूर्वेणाद्यवर्णसाम्यम् । मेलने . . . . . द्वयरूपता । स्त्रीकलानां पुंस्कलाभिधेयार्थेऽन्वयः ।

इत्येव . . . पक्ष महान्निर्बन्ध आश्रितः । अतोऽत्र प्रतीता अनपत्रिसुरविन इत्यापस्तम्बीयसूत्रे अपत्रिर्दारिद्यमिति व्याख्यातृवाक्यशरणस्य.

R. No. **3943.**

Palm-leaf. 13 × 1 inches. Foll. 77 Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(a) शिववेदपादस्तवः.

ŚIVAVĒDAPĀDASTAVAḤ.

Foll. 1a—6a. Fol. 6b is left blank.

Same work as that described under R. No. 488(v) ante.

Contains upto 66th stanza only.

(*b*) वाक्यकरणम्.

VĀKYAKARAṆAM.

Foll. 7*a*—13*b*.

Same work as that described under No. 13495 of the D.C.S. MSS., Vol. XXIV.

Contains the Adhyāyas 1—5.

Foll. 14*a* and 15*a*—16*b* give the Śukramandōccagativiṣayasaṅkhyā. Fol. 14*b* is left blank. Foll. 17—21 contain the Grahasphuṭakriyāprakaraṇa. Fol. 22*a* gives a small portion of Ravyādisphuṭa. Fol. 22*b* is left blank.

(*c*) सूर्यसिद्धान्तोदाहरणम्.

SŪRYASIDDHĀNTŌDĀHARAṆAM.

Foll. 23*a*—41*a*. Fol. 41*b* is left blank.

Gives illustrative examples to the Sūryasiddhānta, which work has been described under No. 13580 of the D.C.S. MSS., Vol. XXIV.

Wants the beginning in the first Adhyāya and the end in the second Adhyāya.

Beginning:

षण्मनूनां महायुगानि ४२६ वैवस्वतमनोर्गतयुगानि २७, अनयोर्योग- ४५३१, अस्य सौराब्दा महायुगप्रमाणेन सङ्गुणिताः १९९६९६०००० षण्मनूनां सन्धयः कल्पादिसन्धिश्च वैवस्वतमनुकालाष्टाविंशतिमहायुगस्थः कृतप्रमाणं चाशेषं कृतयुगाष्टकप्रमाणं भवति ॥

* * * *

Colophon:

सूर्यसिद्धान्तोदाहरणे प्रथमोऽध्यायः ॥

End:

अहः ३०-१६, रात्र्यर्धम् १४,९६ रात्रिप्रमाणम् २९-९२, मध्यरात्रप्रमाणम्.

Fol. 42*a* contains the Grahaśīghragativiṣaya. Fol. 42*b* is left blank.

(*d*) सङ्क्रान्तिवाक्यम्.

SAṄKRĀNTIVĀKYAM.

Foll. 43*a*—49*a*

Similar to the work described under No. 13504 of the D.C.S. MSS., Vol. XXIV.

Complete.

Beninning:

षष्टि द्वाविंशतिगुणितां व्यपगतसंवत्सरैश्च संमिश्राम् ।
नववेदाग्नि(नल)[सं]युक्तां शकनृपकालं विजानीयात् ॥
धूसीकालयुतं वर्षं कलेरब्दं तु तद् भवेत् ।
कल्यब्दो मातुलगुणो वर्षवांशेन संयुतः ॥

* * * *

कालानिलैर्दैवरैश्च शिष्टं वाक्यं शशाङ्कजम् ।
गीर्नः श्रेयादिकं ज्ञेयं क्रमाल्लब्धं फलैस्त्रिभिः ॥

End:

क्षमावाचि क्षलद्धीजप्रतिसूत्रं तनुर्धरः ।
नवरागप्रिया नारी मेषादिघटिकाः क्रमात् ॥

प्रतिमासं भगणराशिभागकलादिषु कलादिशुद्धदिने समे लग्ने तत्तद्व्यास-सङ्क्रान्तिकालो भवति ॥

(*e*) रव्यादिज्यावाक्यम्.

RAVYĀDIJYĀVĀKYAM.

Foll. 49*a*—54*b*.

Same work as that described under No. 13471 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Fol. 55 gives a portion of Gaṇitasaṅgraha. Foll. 56 and 57 are left blank.

(*f*) नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Fol. 58.

Same work as that described under No. 13797 of the D.C.S. MSS., Vol. XXIV.

Complete.

(*g*) राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Fol. 59.

Same work as that described under No. 13865 of the D.C.S. MSS., Vol. XXIV. This is also called Bhāvanighaṇṭu.

Complete.

(*h*) ग्रहनिघण्टुः.
GRAHANIGHAṆṬUḤ.

Fol. 59*b*.

Same work as that described under No. 13654 of the D.C.S. MSS., Vol. XXIV.

Complete.

(*i*) गणितसङ्ग्रहः.
GAṆITASAṄGRAHAḤ.

Foll. 60*a*—64*b*.

A treatise bearing on certain astronomical calculations.

Incomplete.

Beginning:

श्रीराघवं नमस्कृत्य सीतालक्ष्मणसंयुतम् ।
बालानां सुखबोधार्थं वक्ष्ये गणितसङ्ग्रहम् ॥
अष्टाविंशष्षष्टिगुणो रुद्रो नः प्रभवादियुक् ।
शकाब्दा नवशैलेन्द्रवह्नियुक्ताः कलेर्गताः ॥
कल्यब्दो रविभिर्गुण्यो मासैश्चैत्रादिभिर्युतः ।
अधो द्विघ्नः पुनश्चाधो नृपनन्दाप्तवर्जिताः ॥

Colophon:

इति गणितसङ्ग्रहे मध्यमाध्यायः प्रथमः ॥

End:

स्फु च—९-२६ ४८ । ग—७-२८ । स्फु र—०.९०. ग—१८. ए—१७-८-४२-१२ । शन—६० । स्फु च—१०-८-११. ग—८-२३ । स्फु र—०-९-१८ । ए—१८-११ । आन—१-५ । ए—१०-१२ । धनि—४९-८ । वन्द्यो मान्येशः स्फु—३-१४-२४ । ग—८-४३ । स्फु र—०-२१-३२ । ग—१८.

Foll. 65*b*—68*a* give the Ravyādimadhyagatipadakas. Fol. 68*b* is left blank. Foll. 67—77 contain the Līlāvatīnyāsa and Parahitaguṇanaprakāra.

R. No. 3944.

Palm-leaf. $12\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 80. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) तत्त्वचिन्तामणिदीधितिव्याख्या.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ.

Foll. 2*a*—69*b*. Fol. 1*a* gives the name of this work. Foll. 1*b* and 33*b* are left blank.

Same work as that described under No. 4101 of the D.C.S. MSS., Vol. VIII, wherein see for the end. By Vajraṭaṅka.

Contains the Saṅgatigrantha incomplete, but wants the beginning.

Beginning:

यत्तु पूर्वापरग्रन्थवाक्यैक्यताप्रतिपत्तये शिष्याणामवधानाय च सङ्गतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते—प्रत्यक्षमित्यादीति । तत्रेदमुच्यते—एकवाक्यत्वं न वाक्यार्थैक्यं प्रतिकरणं वाक्यार्थभेदात् । न तरामेव पदार्थैक्यं घटोऽस्ति कलशोऽस्ति इत्यादिवद्विरोधाच्च । अथार्थैक्या(त्वा)देवं (कं)वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति जैमिनिसूत्रं तदिह विवक्षितम् ।

* * * *

शब्दप्रतीत्यनुपधायकत्वात् । अस्तु वा कथञ्चिदुक्तैकवाक्यत्वं तथापि उपजीव्योपजीवकभावस्य न तद्ग्राहकता ॥

(*b*) प्रामाण्यवादटीका.

PRĀMĀṆYAVĀDAṬĪKĀ.

Foll. 70*a*—79*a*. Foll. 79*b* and 80 are left blank.

A commentary on the Prāmāṇyavāda, which is a treatise on the criteria of truth as known to the Nyāya philosophy.

Wants the beginning and the end.

Beginning:

. . . स्य कर्तुमशक्यत्वादित्याक्षेपे अथ किमित्यादिना प्रामाण्यनिश्चयस्य प्रवृत्तावहेतुत्वाभिधानमसङ्गतम्; तावतापि प्रामाण्यज्ञानस्य स्वातन्त्र्येण मोक्षहेतु-

तथा तदाक्षेपानुद्धरात् । अतोऽन्यथा फक्किकामवतारयति—प्रामाण्यनिश्चयं विनेत्यादि ।

End:

तत्प्रामाण्याग्रहादुक्तसाधनताज्ञानस्य प्रामाण्यग्रहात् । भट्टमतासिद्धाभिन्नत्वमुक्तसामग्र्या विवृणोति—भट्टेनेत्यादि । दे . . . .

R. No. **3945.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{1}{8}$ inches. Foll. 108. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

तन्त्रशिखामणिः.
TANTRAŚIKHĀMAṆIḤ.

Same work as that described under Nos. 4417 and 4418 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita.

Contains from the sixth Pāda of the sixth Adhyāya to the end of the first Pāda of the ninth Adhyāya.

R. No. **3946.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{5}{8}$ inches. Foll. 44. Lines, 12 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

वार्त्तिकसारव्याख्यानम्—सारसङ्ग्रहः.
VĀRTTIKASĀRAVYĀKHYĀNAM: SĀRASAṄGRAHAḤ.

Same work as that described under R. No. 1307 ante.

Contains the Adhyāyas four and five, but wants the beginning of the fourth Adhyāya.

R. No. **3947.**

Palm-leaf. $14\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 288. Lines, 11 in a page. Grantha. Much injured

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Foll. 1*a*—143*a*.

Same work as that described under Nos. 3982—3984 of the D.C.S. MSS., Vol. VIII. By Gaṅgēśōpādhyāya.

Contains the Śabdakhaṇḍa complete.

The scribe adds—

घनशैलाप्पलाचार्यसूनुवेङ्कटसूरिणा ।
लिखितश्शब्दखण्डोऽयं पठितश्च मुदा महान् ॥

Fol. 143*b* is left blank. Fol. 144*a* gives the contents of the Pratyakṣakhaṇḍa in the Tattvacintāmaṇi. Fol. 144*b* is left blank.

(*b*) तत्त्वचिन्तामणिप्रकाशसारः.

TATTVACINTĀMAṆIPRAKĀŚASĀRAḤ.

Foll. 145*a*—280*a*. Fol. 280*b* is left blank.

This gives a brief summary of the Tattvacintāmaṇiprakāśa, which work has been described under No. 4013 of the D.C.S. MSS., Vol. VIII. By Pettādīkṣita of Kauṇḍinyagōtra, pupil of his paternal uncle Dharmarājādhvarin.

Contains up to the end of the Nirvikalpakavāda.

Beginning:

आमूलगाढरचनान्यचिरेण तानि
निघ्नन्तु विघ्नमखिलं विशदेन्दुमौलेः ।
अक्ष्णां दधुस्सफलतामनिमेषताया
बृन्दारका यदवलोकनजागरूकाः ॥

श्रीधर्मराजाध्वरिणः पितृव्यात् षड्दर्शनीतत्त्वमवेत्य सम्यक् ।
पेत्तामखी कुण्डिनगोत्रजातः प्रकाशसारं प्रकटीकरोति ॥

प्रारिप्सितविघ्ननिवृत्तये देवतानमस्काररूपं मङ्गलमाचरितं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—कृष्णेति । स्वकीर्त्यनुवृत्त्यर्थं स्वनाम दर्शयन् स्वग्रन्थोपादेयताहेतुं संप्रदायाभिज्ञत्वं स्वस्य दर्शयति—अधीत्येति । ननु नमस्कारे प्रवृत्तिर्न युक्ता फलाभावात् । न च समाप्तिः फलं, तस्य निराकरिष्यमाणत्वात् । नापि विघ्नध्वंसः फलं, मानाभावात्, भावे वा तस्य ग्रन्थतो निबन्धनं व्यर्थं, न हि तन्निबन्धनमपि तदङ्गमित्यत आह—प्रारिप्सितेति ।

* * * *

Colophon :

इति पेत्तादीक्षितसूरिविरचिते प्रकाशसारे मङ्गलवादः ॥

The scribe adds—

घनशैलाप्पलाचार्यसूनुवेङ्कटसूरिणा ।

वादो मङ्गलनामायमालिख्य पठितो द्रुतम् ॥

End :

जन्मान्तराननुभूतसामान्यप्रत्यासत्तिजन्यप्रत्यक्षे तादृशस्मरणहेतुत्वासम्भवेन व्यभिचारात् सामग्र्यास्सत्त्वेन पुरोवर्त्यंशे स्व(स)प्रकारत्वमितरांशे सर्वत्र निर्विकल्पक(त्व)मित्यस्य नियन्तुमशक्यत्वेनास्तिवेत्यादिकमप्ययुक्तम् । एवं चाभावादावपि न निर्विकल्पकसिद्धिः विशेष्यज्ञानस्याहेतुत्वेन विशिष्टज्ञानसामग्रीसत्त्वेन निर्विकल्पकासम्भवात् । तस्मादेतच्चिन्त्यम् ॥

Colophon :

इति पेत्तादीक्षितविरचिते प्रकाशसारे निर्विकल्पकवादः ॥

Foll. 281—288 contain the portion of Tattvacintāmaṇiprakāśavivaraṇa of Jātavēdādhvarin.

R. No. **3948.**

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{8}$ inches. **Foll.** 132. Lines, 7 in a page. Grantha. Very much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) मीमांसाभाष्यविवरणव्याख्यानम्.

MĪMĀṀSĀBHĀṢYAVIVARAṆAVYĀKHYĀNAM.

Foll. 1*a*—87*b*.

A commentary on a commentary of the Śābarabhāṣya.

Wants the beginning and the end in the fourth Pāda of the first Adhyāya.

Beginning :

यद्यत्र भाष्ये कर्मण्यप्युद्भिच्छब्दस्य प्रसिद्धिस्सामानाधिकरण्याधीननिर्णयोपादानार्थं विवक्षिता ततो न नामधेयं विधायिष्यत इति किमर्थमुक्तम् ।

End:

नन्वसतो गुणयोगासम्भवान्मा भूत्तन्निमित्तं गौणत्वम् । आरोपनिमित्तं तु भविष्यतीत्याशङ्क्याह —यत्रेति । . . . . देवदत्तादेर्गौणत्वं प्रसिद्धम् । नारोप्यस्य सिंहत्वादेरित्यर्थः ।

* * * *

ब्राह्मणादिष्वदर्शनात्कथमत्र गौणप्रयोगः ।

(*b*) कन्यामाधवम्.

KANYĀMĀDHAVAM.

Foll. 89*a*—132*a*. Fol. 88*a* gives the name of this work. Foll. 88*b* and 132*b* are left blank.

A drama in seven Acts describing the story of the marriage of Kanyā (Kamalā) with Aḻahar, worshipped at Madura: by Subrahmaṇya, son of Uṇṇamāmbā and Saṅgamēśvara of Parāśaragōtra.

Complete.

Beginning:

वामाङ्गीकृतया हिमाद्रिसुतया कल्याणविख्यातया
प्रेम्णा सेवकमानसाम्बुजगुहागर्भेषु सन्धानितः ।
स्वेषां कामितपूरणाय सततं सन्त्यक्तसर्वस्पृहो
देवोऽसौ वृषभध्वजो दिशतु वः श्रेयः परं शङ्करः ॥

अपि च—

कालोद्यन्नटनप्रकारविलुठद्गङ्गानरङ्गच्छटा-
जातक्षालितफालसम्भवलसत्स्वेदोदबिन्दुक्रमः ।
भूषाभूतभुजङ्गपुङ्गवपरिभ्राम्यत्स्फटारत्नवि-
द्योतव्रातनिरूढमाङ्गलिकसन्नीराजनोऽव्याच्छिवः ॥

* * * *

(सू) स्मृत्वा आः शृणोषि कच्चित् निरन्तरपरिशीलितधीरमण्डलस्य गौरीपतिचरणकमलभ्रमरायमाणमानसस्य भट्टसङ्गमेश्वरतनूभवस्यापीतकुचाम्बागर्भसुधाम्बुराशिचन्द्रस्य पाराशर्यस्य सुब्रह्मण्यकवेः कन्यामाधवं नाम नाटकमभिनवमिति ।

* * * *

अस्ति किल सामन्तराजमण्डलसफलीकृतभुजाविभवः निरन्तरतन्तन्यमानसमन्तन्तुसन्तानकसन्तर्पितदेवतागणो निजाभिख्याप्रकटितकल्याणसकलगुणो मध्यम-

Beginning :

श्रीमद्रामायणस्येयं सारसङ्ग्रहदीपिका ।
उपजीव्य कृतिं प्राचां वेङ्कटार्येण तन्यते ॥
प्रकाश्यन्ते जन्मवर्षमासर्तुदिवसादयः ।
रामस्य वनवासेषु वत्सराश्च वयांस्यपि ॥
जाते वर्षे विलम्बिन्यजजुषि मिहिरे जाग्रतीन्द्रौ नवम्यां
सौम्येऽब्दे मासि मीने जनकनृपसुतां पूर्णिमायामुदूह्य ।
दुन्दुभ्यब्देऽथ चैत्रे विपिनमधिगतो मासि मीने युवाब्दे
हत्वा शत्रून् स यातः खलु मधुसमये राघवो राज्यमाप ॥

इह खलु निखिलजगदुदयविभवलीलाविनोदशीलो भगवान् परमकारुणिकः श्रीमन्नारायणो दशमुखभुजबलविलोपितसम्पद्भिर्निलिम्पैरत्यर्थमभ्यर्थितो धर्मसंस्थापनाय

* * * *

श्रीरामचन्द्रस्वरूपेणावततार ।

End :

हनूमतस्सीतादर्शनानन्तरं किञ्चिदवशिष्टायां निशायां . . . . रावणे चागच्छति दीपिका ।

R. No. **3950.**

Palm-leaf. $11\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 91. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigal, Bhavani, Coimbatore district.

ऐतरेयारण्यकवृत्तिः.

AITAREYĀRAṆYAKAVṚTTIḤ.

Foll. 1 and 91 are left blank.

Same work as that described under R. Nos. 3352 and 3411 **ante**, wherein see for the beginning. By Ṣaḍguruśiṣya.

Contains the Āraṇyakas one to three and Mahānāmnīkhaṇḍa complete.

End :

द्वाविंशतिः पञ्चविंशतिः त्रयोदशेति पर्वखण्डाष्षष्टिरिति स्थितिः ॥
त्रिपर्वारण्यकं गतम् ।

म(ध्येऽधी)तस्य सूत्रं तु चतुर्थारण्यकं परम् ।
मध्येऽधीता महानाम्न्यस्संहित्यो धर्मयोगतः ॥
धर्मश्शान्ति . . . . कतादि च ।
वैश्वामित्र्ये महानाम्न्य ऐन्द्रो वैके प्रजापते ॥
इति ह्यार्षानुक्रमण्यास्स्थानमासां तु संहिता ।

* * * *

अथ इत्थं सकृद्रूपखण्डस्योक्तो यथामति ।
महानाम्नीसंज्ञमेतत् सूक्तं व्याख्यातमञ्जसा ॥

Colophon:

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ मोक्षप्रदायां संहितायां सकृदुक्तिखण्डाख्योऽध्यायः समाप्तः ॥

R. No. 3951.

Palm-leaf. $11\frac{3}{8} \times 1$ inches. Foll. 36. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

(*a*) पदान्तदीपिनी.

PADĀNTADĪPINĪ.

Foll. 3*a*—6*a*. Foll. 1, 2 and 6*b* are left blank.
Same work as that described under R. No. 3911(*b*) ante.
Complete.

(*b*) पदान्तदीपिनीव्याख्या.

PADĀNTADĪPINĪVYĀKHYĀ.

Foll. 7*a*—17*b*.

Same work as that described under R. No. 3911(*c*) ante, wherein see for the beginning. The name of the author as well as commentator is Bhāskara, son of Rāmasvāmimakhin.

Complete.

End:

पृणक् पूषण्वान् सितुसेम्यन्तः तनु सातौ इति षोडशात्मानः । अनानुद आदीनि निर्णिक् प्रत्यङ् गो पृणक् इति अष्टमादिवर्णगतानुबन्धगम्यानि पञ्च रूपाणि षोडशात्मभिरेव मिलित्वा लिखितानि.

Colophon:

श्रीरामस्वामिमखिनां तनयो भास्कराभिधः ।
पदान्तदीपिनीं तस्या वृत्तिमप्यलिखच्छुभाम् ॥
क्रोधिचैत्रसिताष्टम्यां प्राच्यां वृत्तौ तु या गिरः ।
क्वचिदासन् सुदुर्बोधा रचनाशक्त्यभावतः ॥
तत्र तत्र स्ववाक्यानि प्रक्षिप्य सुलभानि तैः ।
स्फुटयन् भावमेतासां गिरां वृत्तिं लिलेख ताम् ॥
अनेन भगवाञ्छम्भुर्बालबोधार्थमृध्यता ।
लेखनातिप्रयत्नेन सन्तुष्यतु दयानिधिः ॥

Foll. 18*a*—20*a*, 21*a*—24*a* and 25*a*—28*a* contain the Saptasaṅkhyā-nirūpaṇa. Foll. 20*b*, 21*b*, 24*b* and 28*b* are left blank.

(*c*) वाल्मीकिसूत्रम्, सवृत्ति.
VĀLMĪKISŪTRAM, SAVṚTTI.

Foll. 29*a*—36*a*. Fol. 36*b* is left blank.

Same work as that described under No. 1549 of the D.C.S. MSS., Vol. III.

Incomplete.

R. No. 3952.

Palm-leaf. 13¾ × 1⅛ inches. **Foll.** 70. **Lines,** 8 in a page. **Grantha.** Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Fol. 1*a* gives the name of the Vākyakaraṇadīpikā and Kāvyādipañcagrahavyākhyā. Foll. 1*b* and 2 are left blank. Foll. 3*a*—7*a* contain the Agniṣṭōmaprayōga. Fol. 7*b* is left blank.

(*a*) वाक्यकरणदीपिका.
VĀKYAKARAṆADĪPIKĀ.

Foll. 8*a*—43*b*.

Same work as that described under No. 13497 of the D.C.S. MSS. Vol. XXIV. By Jambūnātha, son of Anantanārāyaṇa.

Complete in five Adhyāyas.

(*b*) कुजादिपञ्चग्रहवाक्यम्.

KUJĀDIPAÑCAGRAHAVĀKYAM.

Foll. 44*a*—69*b*.

Same work as that described under No. 13400 of the D.C.S. MSS., Vol. XXIV.

Complete.

Foll. 69*b* and 70*a* give the Tithyādinayanalalitamārgavicāra. Fol. 70*b* is left blank.

R. No. 3953.

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 89. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Narasiṁha Śāstrigaḷ, Bhavani, Coimbatore district.

Foll. 87*b*—89*b* are left blank.

ब्रह्मसूत्रभाष्यव्याख्या—शिवादित्यमणिदीपिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚIVĀDITYAMAṆI-DĪPIKĀ.

Same work as that described under Nos. 5093 and 5094 of the D.C.S. MSS., Vol. X. By Appayadīkṣita.

Contains the latter portion of the third Pāda of the first Adhyāya only.

R. No. 3954.

Paper. $10\frac{3}{8} \times 4\frac{1}{4}$ inches. Foll. 29. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1921–22 from Śrījut Bhajan Lal, Amritsar.

भगवन्नाममाहात्म्यम्.

BHAGAVANNĀMAMĀHĀTMYAM.

On the religious efficacy resulting from the repetition of the names of god Viṣṇu: by Raghunāthayati.

Complete.

Beginning;

यन्नामकीर्तनादेव सद्यः पापक्षयो भवेत् ।
तमहं संस्मरामीशं शिवं कृष्णं विमुक्तये ॥

ननु नामकीर्तनात्सद्यः पापक्षयप्रतिपादकमन्त्रार्थवदितिहासपुराणोपपुराण-संहितागमादीनां कर्मानुष्ठानादिपराणां स्वार्थे प्रामाण्यमे(व) नास्तीति चेन्मा-

नान्तरसंवादिवाक्यानामग्निर्हिमस्य भेषजं, स प्रजापतिरात्मनो वपामुदखिदत्, यजमानः प्रस्तर इत्यादि(दी)नामिवाप्रामाण्यं स्वार्थे उत मानान्तरसंवादविसंवादरहितानामपि । आद्ये इष्टापत्तिः द्वितीयस्तु न सम्भवति ।

End:

वासिष्ठतन्त्रे—

हरिपूजापरो यस्तु हरिनामपरायणः ।
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥

तथा—

श्रीशब्दपूर्वं जयशब्दमध्यं जयद्वयानन्तरतस्तथैव ।
त्रिसप्तकृत्वो नरसिंहनाम जयन्ति हन्ति द्विजकोटिस(ह)त्याम् ॥
स(कृ)दुच्चारितं नाम हरेर्नाम चिदात्मकम् ।
फलं नास्य क्षमो वक्तुं सहस्रवदनो विधिः ॥

ग्रन्थान्तरे श्रीकृष्णः—

सत्यं ब्रवीमि मनुजः स्वयमूर्ध्वबाहु-
र्यो मां मुकुन्द नरसिंह जनार्दनेति ।
जीवन् जपत्यनुदिनं मरणे रणे वा
पाषाणकाष्ठसदृशाय ददाम्यभीष्टम् ॥

यन्नामकीर्तनादेव कृतार्था अप्यहो वयम् ।
तस्मै शिवाय कृष्णाय भूयो भूयो नमाम्यहम् ॥
भगवन्नाममाहात्म्यग्रहा(न्था)नां सङ्ग्रहः कृतः ।
रघुनाथेन्द्रयतिना शिवस्य परितुष्टये ॥

Colophon:

इति श्रीरघुनाथयतिना विरचितं श्रीभगवन्नाममाहात्म्यं सम्पूर्णम् ॥

Name of scribe and year of transcription:

संवत् १८९४ लिखितं गोवर्धनेन ॥

R. No. **3955.**

Palm-leaf. 17 × 1½ inches. Foll. 163. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–22 from M.R.Ry. Lakṣmīnarasiṁha Bhaṭṭar, North Chitra street, Srirangam.

Fol. 1 gives some horoscope. Fol. 2 contains a small portion of the Vivādabhaṅgārṇava.

विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Foll. 3*a*—163*b*.

Same work as that described under No. 3189 of the D.C.S. MSS., Vol. V.

Complete.

R. No. 3956.

Palm-leaf. 12½ × 1⅝ inches. Foll. 125. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. Lakṣmīnarasiṁha Bhaṭṭar, North Chitra street, Srirangam.

आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः.

ĀPASTAṀBAŚRAUTASŪTRABHĀṢYAVṚTTIḤ.

Same work as that described under R. Nos. 937, 1241 and 1245 ante. By Kauśikarāma.

Complete one to six Praśnas and a small portion of the seventh Praśna.

R. No. 3957.

Palm-leaf. 18 × 1⅝ inches. Foll. 34. Lines, 10 in a page. Grantha. Injured.

Purchased in 1921–22 from M.R.Ry. G. Lakṣmīnarasiṁha Bhaṭṭar, North Chitra street, Srirangam.

विहगेन्द्रसंहिता.

VIHAGĒNDRASAṀHITĀ.

A Saṁhitā of the Pāñcarātrāgama, dealing with the following subjects:—

१. देवतामन्त्रमाहात्म्यम्.	८. दिक्चक्रमूर्तिलक्षणम्.
२. मूर्तिभेदकथनम्.	९. चक्राब्जमन्त्रोद्धारः.
३. वाहनायुधमूर्तिभेदकथनम्.	१०. ऋषिनिर्णयकथनम्.
४. पूर्वापराङ्गविधानम्.	११. मन्त्रन्यासविधानम्.
५. प्रतिष्ठाविधानम्.	१२. प्राणायामविधानम्.
६ समाराधनविधानम्.	१३ परिवारार्चनविधिः.
७. मूर्तिचक्रलक्षणम्.	१४. यन्त्रोद्धारविधानम्.

१५. महायज्ञविधानम्.
१६. दिग्बन्धनविधानम्.
१७. महाप्रयोगविधानम्.
१८. होमार्चनविधानम्.
१९. महाप्रयोगविधानम् (प्रकारान्तरम्).
२०. षट्कर्मविधानम्.
२१. मन्त्रोद्धारविधानम्.
२२. आचार्यलक्षणकथनम्.
२३. मन्त्रनाथरोगशान्तिविधानम्.

Contains the Paṭalas 1—23 complete and a small portion in the 24th Paṭala.

Beginning:

नमस्तस्मै सुचक्राय जपाकुसुमसन्निभ ।
दैत्यशोणितगात्राय भक्तानामार्तिभञ्जन ॥

अम्बरीष उवाच—

नमो मुनिवरश्रेष्ठ सर्वशास्त्र(विशारद) ।
. . . . . मुहूर्तं श्रोतुमिच्छामि तत्त्वतः ॥
सुदर्शनविधिं सर्वं प्रसादं कुरु सुव्रत ।
के देवाः के च ऋषयः मन्त्रसिद्धिर्भवेत्पुरा ॥
किं पुरश्चर्यकं साध्यं का पूजा . . . . . . ।
. . . . . सारं परं गुह्यमाख्यातं मूर्तिलक्षणम् ॥
सुदर्शनस्य माहात्म्यं प्रसादं कुरु सुव्रत ।

अगस्त्य उवाच—

प्रसन्नोऽहं महाभाग इक्ष्वाकुकुलनन्दन ।
दुर्लभं त्रिदशानां च सुगीतां येन (संहिताम्) ॥

* * * *

रूपेण वीर्येण पराक्रमेण तपःप्रभावेन पराक्रमेण ।
जपेन जापेन बलेन सत्यं तथा न चक्रस्य समं त्रिलोके ॥

Colophon:

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे देवतामन्त्रमाहात्म्यं नाम प्रथमः पटलः ॥

End :

तिलशर्करहोमेन सर्वग्रहविनाशनम् ॥
यानि यानि च (कार्याणि) तांस्तां (तत्तत्) होमेन सिध्यति ।
सर्वपापविनिर्मुक्तः सुखं रोगा(द्विमुच्यते) ॥

Colophon :

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये अगस्त्यप्रोक्ते मन्त्रनाथस्य रोगशान्तिविधानं नाम त्रयोविंश[ति]: पटलः ॥

अम्बरीषः—

(नमस्ते मुनिशा)र्दूल महासत्त्व महाबल ।
मोक्षोपायरहस्यार्थ(:) कथ्यतां मे महाप्रभो ॥

अगस्त्यः—

भोगमोक्षप्रदं देवं नारायणमनामयम् ।

R. No. **3958.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{2}$ inches. Foll. 147. Lines, 9 in a page. Grantha. Slightly injured

Purchased in 1921–22 from M.R.Ry. G. Lakṣmīnarasiṁha Bhaṭṭacāriyar, North Chitra street, Srirangam.

(*a*) श्रीमुष्णमाहात्म्यम्.
ŚRĪMUṢṆAMĀHĀTMYAM.

Foll. 1*a*—33*b*.

This forms the Adhyāyas 1 to 12 of the Nāradīyapurāṇa and deals with the greatness and religious sanctity of the shrine in Śrīmuṣṇa dedicated to the worship of god Viṣṇu.

Beginning :

ऋषय ऊचुः—

सूत सूत महाप्राज्ञ पुराणर्षे महामते ।
कलौ कलुषचित्तानां कथं स्याद्गतिरुत्तमा ॥
अल्पायासेन मर्त्यानां वद नो वदतां वर ।

सूतः—

अयमेव पुरा प्रश्नो भरद्वाजेन धीमता ॥

Same work as that described under No. 2506 of the D.C.S. MSS., Vol. IV, Part II, but with the additional stanzas given below.
Complete.

यादवाचलमाहात्म्यं यस्य गेहेऽपि वर्तते ।
आयुरारोग्यमैश्वर्यं सर्वं तत्र भविष्यति ॥

* * * *

मुनिवरगिरमेनामित्थमाकर्ण्य केचित्
व्यधिषत यदुशैले वीतरागा निवासम् ।
कति चन सहसाद्यं धाम संप्राप्य विष्णो-
रकृषत सह सेवां शेषशेषाशनाद्यैः ॥

Colophon:

इति श्रीमन्नारदीयपुराणे ज्ञानकाण्डे श्रीमद्यादवगिरिमाहात्म्ये भगवत्संदर्शनं नाम द्वादशोऽध्यायः ॥

यादवगिरिमाहात्म्यं सम्पूर्णम् ॥

The scribe adds—

वत्सरे राक्षसाभिख्ये सप्तविंशतिवासरे ।
इषे मासि सुपूर्णं स्याद्यादवाद्रेस्तु वैभवम् ॥

(*d*) श्रीनिवासमाहात्म्यम्.
ŚRĪNIVĀSAMĀHĀTMYAM.

Foll. 101*a*—123*a*. Fol. 123*b* is left blank.
On the greatness of god Viṣṇu worshipped under the name Śrīnivāsa at Tirupati; as found in the Brahmāṇḍapurāṇa.
Complete.

Beginning:

श्रीशौनकः—

प्रसीद भगवन्मह्यं प्रसन्नाम्बुजलोचन ।
नारायणपदाम्भोजमकरन्दमधुव्रत ॥

* * * *

भगवन् भवतः पूर्वं सर्वमेतन्मया श्रुतम् ।
श्रोतुमिच्छामि माहात्म्यं श्रीनिवासस्य तत्त्वतः ॥

वक्तुमर्हसि तत्त्वज्ञ विस्तरेण महामुने ।
न तृप्यति मनस्तन्मे पीत्वा तव वचस्सुधाम् ॥

* * * *

Colophon:

इति ब्रह्माण्डपुराणे भृगुशौनकसंवादे श्रीनिवासमाहात्म्ये प्रथमोऽध्यायः ॥

End:

किमत्र बहुनोक्तेन माहात्म्यमिदमुत्तमम् ।
यः पठेच्छृणुयाद्वापि श्रावयेच्च लिखेदपि ॥
स्मरेद्वा बिभृयाद्वापि लिखित्वैतद्ददाति सः ।
सर्वान् कामानवाप्नोति ब्रह्मभूयं च विन्दति ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे उत्तरभागे भृगुशौनकसंवादे श्रीनिवासमाहात्म्ये द्वादशोऽध्यायः ॥

(*e*) श्वेतगिरिमाहात्म्यम्.
ŚVĒTAGIRIMĀHĀTMYAM.

Foll. 124*a*—146*a*. Foll. 146*b* and 147 are left blank.

Similar to the work described under Nos. 1576 and 2577 of the D.C.S. MSS., Vol. IV, Part II.

Complete in 12 Adhyāyas.

Beginning:

कचो बृहस्पतिसुतः प्रोवाच वदतां वरः ।
श्रुतानि तु महाभाग पुण्यतीर्थानि सर्वशः ॥
पुण्यतीर्थानि सर्वाणि पुण्या नद्यस्सरांसि च ।
मोक्षप्रदायकास्सर्वे क्षेत्राः पुण्यात्मनौकसः ॥

* * * *

मार्कण्डेय महाबुद्धे वद श्वेताद्रिवैभवम् ।
सर्वे प्रलयवश्या हि त्वं नित्यस्सततं मुने ॥

* * * *

Colophon :

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे श्वेतगिरिमाहात्म्ये प्रथमोऽध्यायः ॥

End :

इति शुक्रवचनं निशम्य रम्यं परिपठतामघनाशनं पवित्रम् ।
सुरगुरुतनयः कचो महात्मा निरवधिकं परमं सुखं प्रपेदे ॥

माहात्म्यं विमलाचलस्य महितं तत्रारविन्देक्षण-
प्रादुर्भावमहोत्सवं च विश्रुता पद्मालयायाः परम् ।
मार्कण्डेयतप:(फलं)नरपतेस्सौभाग्यमत्युन्नतं
लोकेषु प्रथयन् कचो मुनिवरश्चक्रे पवित्रं जगत् ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे श्वेतगिरिमाहात्म्ये द्वादशोऽध्यायः ॥

R. No. 3959.

Palm-leaf. 16⅛ × 1⅛ inches. Foll. 144. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1921–22 from M.R.Ry. G. Lakṣmīnarasiṁha Bhaṭṭar, North Chitra street, Srirangam.

(a) पारमेश्वरविवृतिः.
PĀRAMĒŚVARAVIVṚTIḤ.

Foll. 1*a*—109*b*. Fol. 107*b* is left blank.

Same work as that described under R. No. 1658 ante. By Narasiṁhayajvan, son of Saṁpatkumāra.

Complete in 26 Adhyāyas.

The additional stanzas at the end are given below :—

भगवन् सर्वविजय सतस्वारपराजित ।
शरणं त्वां प्रपन्नोऽस्मि श्रीकरं श्रीसुदर्शनम् ॥
सनकादिमतिग्राह्यं क शास्त्रं काहमल्पधीः ।
पारमेश्वरभक्तिर्मामवशं समचोदयत् ॥

Colophon :

इति श्रीसम्पत्कुमारसूनुश्रीनृसिंहयज्वविरचितायां पारमेश्वरपद्यविवृतौ क्रियाकाण्डे षड्विंशोऽध्यायः ॥

आङ्गीरनामके(साह्वये) वर्षे नृसिंहाख्येन यज्वना ।
पारमेश्वरपद्यां(द्यानां)विवृती रचिता मया ॥

Fol. 110 gives the Sahasradhārālakṣaṇa. Foll. 111 and 112 contain the Śaṅkhalakṣaṇa.

(*b*) प्रद्युम्नसंहिता.

PRADYUMNASAMHITĀ.

Foll. 113*a*—126*b*.

This forms a part of the Pāñcarātrāgama.

Contains the 44th Adhyāya only (Vasantōtsavavidhi), but wants the beginning.

Beginning:

(घ)टिकात्रयमधिवास्य स्नपनाङ्गहोमपूर्वकं कूर्चसहितदर्पणे तत्रैव सप्तदशकलशस्नपनं कुर्यात् । ततः रथप्रतिष्ठासिध्यर्थमाचार्यादीनां रथस्य दक्षिणभागे स्तम्भे रथप्रतिष्ठार्थं पूर्ववत् रक्षाबन्धनं कुर्यात् ।

End:

आचार्यं पूजयेत्पश्चाद्दशनिष्केण दापयेत् ।
तदर्धमृत्विजां चैव तदर्धं परिचारकम् ॥
ब्राह्मणान् भोजयेत्पश्चात् अष्टोत्तरशतं भवेत् ।
ब्राह्मणान् तोषयेत्पश्चात् प्रत्येकं स्वर्णदानकं(त): ॥
यागशालां प्रविश्याथ होमकर्म समापयेत् ।
वह्निमध्यगतं देवं मण्डले तु समर्पयेत् ॥
मण्डलस्य तु तच्छक्तिं कुम्भमध्ये समाह्वयेत् ।
कुम्भबिम्बादिसर्वेषां मूलबेरे समर्पयेत् ॥

Colophon:

इति श्रीपाञ्चरात्रे प्रद्युम्नसंहितायां वसन्तोत्सवो नाम चतुश्चत्वारिंशोऽध्यायः ॥

Foll. 126*b*—129*a* contain the portion of Śāṇḍilyasamhitā.

(*c*) वासुदेवसंहिता.

VĀSUDĒVASAMHITĀ.

Foll. 129*a*—134*b*.

This forms a part of the Pañcarātrāgama.
Contains the Pavitrōtsavavidhi portion only.

Beginning :

श्रीभगवानुवाच—

अथातस्संप्रवक्ष्यामि पवित्रोत्सवविधिं परम् ।
सर्वपापक्षयकरं राजराष्ट्रविवर्धनम् ॥
ग्रामवृद्धिकरं पुण्यं राज्ञस्तु पुरवर्धनम् ।
तस्मात्सर्वप्रयत्नेन पवित्रारोह(प)णं चरेत् ॥
अयुग्मैकादशीप्रोक्तं पवित्रारोह(प)णं चरेत् ।
एकादशे अयुग्मे तु पवित्रारोह(प)णं चरेत् ॥
आषाढे वृश्चिकान्ते तु पवित्रारोह(प)णं चरेत् ।
आषाढे वृश्चिके मासि एकादश्यामुपक्रमे ॥

End :

आचार्यं पूजयेत्पश्चात् ग्रामैश्च नगरादिभिः ।
उत्तरां दक्षिणां दद्यात् शतनिष्कमनुत्तमम् ॥
गोदानं भूमिदानं च मम प्रीतिकरं शुभम् ।
ब्राह्मणांस्तोषयेद्दानैः ऋत्वि(आर्त्वि)जीनांश्च तोषयेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे श्रीवासुदेवसंहितायां पवित्रारोपणविधिर्नाम चत्वारिंशोऽध्यायः ॥

Foll. 134*b*—140*a* contain the Kṛttikādīpōtsavavidhi. Fol. 140*b* is left blank. Foll. 141—144 give the portion of Pañcarātraprāyaścittabhāga.

R. No. **3960.**

Palm-leaf. 15½ × 1⅝ inches. Foll. 228. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1921–22 form M.R.Ry. G. Lakṣmīnarasiṁha Bhaṭṭar, North Chitra street, Srirangam.

विश्वामित्रसंहिता.
VIŚVĀMITRASAṀHITĀ.

Foll. 1*a*—119*b*. Fol. 81*b* is left blank.

Same work as that described under R. No. 1601 ante, wherein see for the beginning.

Contains the Adhyāyas 1 to 27 complete.

End :

सप्तविंशतिभिः प्रोक्तमध्यायैः कश्यपात्मज ।
विश्वामित्रीयनाम्नैतन्मयोक्तत्वात् प्रथां गतम् ॥
(नाशिष्याय प्रदातव्यं न संसारनिवासिने) ।
वैष्णवाय प्रदातव्यमुपसन्नाय धर्मतः ॥
इति श्रुत्वा मुनिश्रेष्ठः काश्यपस्सुप्रसन्नधीः ।
प्रणम्य भगवन्तं तं विश्वामित्रं (तपोनिधिम्) ॥

* * * *

अवाप्य तत् परं धाम यतो नावर्तते पुनः ॥

Colophon :

इति श्रीपाश्वरात्रे महोपनिषदि विश्वामित्रसंहितायां प्रायश्चित्तविधिर्नाम सप्तविंशोऽध्यायः ॥

विश्वामित्रसंहिता समाप्ता ॥

Foll. 192*a*—193*a* contain a portion of 91st Adhyāya in the Vāsudēvasaṁhitā. Foll. 193*a*—196*b* give the 25th Adhyāya in the Viṣṇurahasya. Foll. 197*a*—194*b* contain the 8th Paṭala of the Vihagēndrasaṁhitā. Foll. 200*a*—210*b* give the Bhagavanmantranyāsādi. Foll. 213*a*—228*b* contain the Dhruvabēravidhi.

R. No. 3961.

Palm-leaf. 13 × 1½ inches. Foll. 163. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1921–23 from M.R.Ry. G. Lakṣmīnerasiṁha Bhaṭṭar, North Chitra street, Srirangam.

Fol. 1 gives the names of the Āgama works. Fol. 2 is left blank. Fol. 3 gives the contents of the Saṁhitās. Foll. 4*a*—6*b* contain the 44th Adhyāya of the Anantasaṁhitā and Mahānavamīpūjāviṣaya.

(*a*) विश्वामित्रसंहिता.

VIŚVĀMITRASAṀHITĀ.

Foll. 7*a*—125*b*.

Same work as that described under R. Nos. 1601 and 3960 ante.

Complete.

Fol. 126*a* gives the Pāñcarātra-Puṇyāhavācanavidhi. Foll. 86*a* and 126*b*—127 are left blank. Foll. 128*a*—129*a* contain the Jīrṇōddhāravidhi (Vāsudēvasaṁhitā). Foll. 129*a*—131 give the Prāyaścittaprakaraṇa. Foll. 132 and 133 contain the 18th Paṭala of the Vihagēndrasaṁhitā. Foll. 134*a*—145*b* and 149—153 contain the Ṣōḍhānyāsa, Mantrōddhāra, Daśāvatāramantra and a portion of Viṣṇutattva. Foll. 146—148 are left blank.

(*b*) वैखानसागमः.

VAIKHĀNASĀGAMAḤ.

Foll. 154—161*a*.

Same work as that described under No. 5368 of the D.C.S. MSS., Vol. XI. By Marīci.

Contains the 19th Paṭala only.

Fol. 161 gives a portion of the Khagapraśnasaṁhitā. Foll. 162*a*—163*a* contain the Āgamācamanavidhi. Fol. 163*b* is left blank

R. No. 3962.

Palm-leaf. 14½ × 1¼ inches. Foll. 99. Lines, 6 in a page. Grantha. Very much injured.

Purchased in 1921–22 from M.R.Ry. G. Lakṣmīnarasiṁha Bhaṭṭar, North Chitra street, Srirangam.

उत्सवसङ्ग्रहः.

UTSAVASAṄGRAHAḤ.

Same work as that described under R. No. 3286 ante.

Wants the beginning and end; imperfect and in disorder.

R. No. 3963.

Palm-leaf. 15½ × 1½ inches. Foll. 12. Lines, 8 in a page. Grantha Injured.

Purchased in 1921–22 from M.R.Ry. G Lakṣhmīnarasimha Bhaṭṭar, North Chitra street, Srirangam.

आशौचनिर्णयः.

ĀŚAUCANIRṆAYAḤ.

Similar to the work described under Nos. 3029 and 3030 of the D.C.S. MSS., Vol. V. The procedure herein laid down is intended for the followers of the Pāñcarātrāgama.

Date of transcription—Friday, the 14th day of the bright fortnight of the solar month Aippiśi in the year Plavaṅga, corresponding to October 1847. Name of the scribe—Arcaka Śrīnivāsa Ayyaṅgār who copied the MS. for Komāṇḍūr Śēṣayyaṅgār.

Complete.

Beginning :

श्रीचक्रराजः कुरुते नृसिंहाध्व(र्य)तनूद्भवः ।
श्रीजयाख्यादितन्त्रैश्च दीक्षिताशौचनिर्णयम् ॥

दीक्षितानामाशौचविधिः निरूप्यते—

न च स्मृत्यादौ दीक्षितानामाशौचविधानेन तदनुसारेणैवाशौचमनुष्ठेयमिति वाच्यम् । तदपेक्षयागमदीक्षितानामागमशास्त्रविशेषाभिधानेनानुक्तमन्यतो ग्राह्यमितिनियमात् तदनुसारायोगात् ।

End :

दीक्षितोऽप्येकपुत्रश्चेत् मातापित्रोर्मृतिर्यदि ।
संस्कृत्य शालामागत्य यज्ञशेषं समापयेत् ॥

R. No. **3964.**

Palm-leaf. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of Śrīmān Hariharacaturaṅgaguru, Ganjam district.

(*a*) कृष्णचरितम्.

KṚṢṆACARITAM.

Foll. 1*a*—22*b*. Foll. 23 and 24 are left blank.

A poem describing the main incidents that took place during the boyhood of Lord Kṛṣṇa.

Wants the beginning and breaks off in the seventh Sarga.

Beginning :

स याचितो देवगणैरुपप्लुतैर्हरिर्भुवो भारविनाशहेतवे ।
दधौ दुरन्तासुरनाशदीक्षितस्स्वजन्म धन्ये वसुदेवसद्मनि ॥
चतुर्भुजश्शङ्खगदासिपद्मभृद्विशालवक्षस्स्थललम्बिकौस्तुभः ।
दधद्रु(द्रु)तस्वर्णसवर्णमम्बरं विराजमानः शिरसा किरीटिना ॥

* * * *

आनीयतामिह निवेशय सेनमुग्रं
संमोहयिष्यति दुरन्तममुं नृशंसम् ।
मां तत्र लम्भय ततस्तव मङ्गलं स्या-
दित्थं निगद्य स बभूव विभुः कुमारः ॥

Colophon:

इति श्रीकृष्णचरिते महाकाव्ये कृष्णोत्पत्तिर्नाम प्रथमस्सर्गः ॥

End:

निपततितरामिन्दुस्सोऽयं वियोगिविदारणः
सुमुखि न चिरादर्कश्चण्डांशुरभ्युदयिष्यते ।
त्यज सखि शुचं प्राप्तं प्रप्त न विघ्नमङ्गलं (?)
करुणवचनां चक्रः कान्तामितीव रुतैरशात् ॥

Colophon:

इति श्रीकृष्णचरिते महाकाव्ये वत्सासुरनिधनं नाम षष्ठः सर्गः ॥

अथ वारुणीमुपगतो विकसन् तरुणीकपोलतलपाण्डुवपुः ।
विधुरम्बरं स(म)पहाय शनैश्चरमाचलस्य शिरसि न्यपतत् ॥

* * * *

न तया व्यमोचि न तदा स विधुः किमवस्थया विषमया सुकरम् ।
क्षणदारुचः कुमुदिनीति विधोर्दयिताः पुरश्शुशुभिरे कलया ॥
इह(वा)पि नैनम्.

Transcribed in 1921–22 from a MS. of the Raja of Punnattūr, Kottapadi post.

(*b*) कुमारोदयम्.

KUMĀRODAYAM.

Foll. 25*a*—42*a*. Fol. 42*b* is left blank.

A treatise in prose and verse dealing with the incidents that lead to the birth of Kumāra or god Subrahmaṇya.

Contains up to the marriage of Pārvatī with Śiva.

Beginning:

श्रीमत्यां दक्षपुत्र्यां पितरि कमितृनिन्दातिरूक्षे प्रकोपा-
दुद्दीप्ते योगवह्नौ हुतवपुषि रुषा प्रस्फुरन्नुद्धटौजाः ।

भीतैर्जातानुजातैस्सपदि सुरगणैस्संस्थि(स्तु)तश्शान्तमन्युः
कुर्वन्गुर्वीं तपस्यामकृत हिमगिरौ वासमीशश्चिराय ॥
ततस्सतीनां प्रथमं सती सा समाधिवैश्वानरदग्धगात्री ।
मेनापतेस्तस्य बभूव पुत्री मैनाकसौभ्रात्रवती हिमाद्रेः ॥

* * * *

अथ भगवानरविन्दयोनिस्स्यन्दमानमन्दहसितसुन्दरतरवदनेन्दुः अनुकम्पानुषङ्गमङ्गलैरपाङ्गैरमरकुलमनुगृह्णन् (आ)ननारविन्दात्सुवर्णालङ्कृतां सुललितपदन्यासामधिकावदातामपरामिव सरस्वतीं सरस्वतीमुद्गलयामास ।

End:

अथ निखिलमुनीन्द्रानिन्दुमौलिर्विसृज्य क्षितिधरपतिकन्यामादधानः करेण ।
कनककलशरक्षाशक्तिशोभासनाथः क्षितिविरचितशय्यं कौतुकागारमागात् ॥

R. No. **3965.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇan alias Kṛṣṇa-Nambūdiri, Vaidika-Tekkattu-mana, Kumaranellur post.

(*a*) ब्रह्मसिद्धिः

BRAHMASIDDHIḤ.

Foll. 1*a*—13*a*. Foll. 13*b* and 14 are left blank.

Same work as that described under R. No. 3250 ante, wherein see for the beginning. By Ācāryamaṇḍanamiśra.

Contains the Niyōgakāṇḍa without the beginning.

End:

हानोपादानादिलक्षणायाः प्रवृत्तेर्मूलत्वादीदृशं प्रवृत्त्यङ्गत्वमत्राप्यस्त्येव । शब्दाप्रमिते ब्रह्मणि साक्षात्करणाय प्रवृत्तेरिष्टत्वादिति ।

एषा वेदान्ततत्त्वप्रविचयचतुरप्रस्फुरन्न्यायतेजाः
मार्गं मुक्तेर्निरुन्धन्निबिडमपि तमोऽनादि निर्दारयन्ती ।
सद्यः प्रक्षालयन्ती घनमपि जगतां तीर्थदुस्तर्कपङ्कं
व्याख्यातोत्खातविश्वा शिवनिरतिशयश्रेयसे ब्रह्मसिद्धिः ॥

Colophon :

इति मण्डनमिश्राणां कृतिर्ब्रह्मसिद्धिस्समाप्ता ॥

तत्त्वस्पृशः खण्डितभेदवादिनो
विनिस्सृताः पण्डितषण्डमण्डनात्(ः) ।
ध्वान्तच्छिदो मण्डनवक्त्रपङ्कजात्
जयन्ति वाचः श्रुतिनीतिमण्डनात्(ः) ॥

Transcribed in 1920–21 from a MS. of the Sanskrit Library, Tiruppanattura, Cochin State.

(*b*) पूर्णत्रयीशस्तोत्रम्.

PŪRṆATRAYĪŚASTŌTRAM.

Foll. 15*a*—29*b*. Fol. 30 is left blank.

A eulogy on god Viṣṇu worshipped in Tiruppanitura.

Complete.

Beginning :

[श्री] पूर्णत्रय्याख्यपुर्यां हरिभवननिभे स्वालये सन्निषण्णः
पीठे हैमे स कृष्णः फणिवरलसितो हारकोटीरधारी ।
केयूरैः कुण्डलैस्तैर्मणिवरकटकैर्भूषणैर्भासुराङ्गो
माल(ठ)श्रीरामभूपं कठिनकवचधृत् पातु पूर्णत्रयीशः ॥
पूर्वं यः कंसहेतोर्निजपितृजननीभ्यां स्तुतो बालकृष्णो
जातः पित्रा निशायां व्रजपतिरमणीसूतिकागेहमध्यम् ।
सन्नीतः स्वीयताते व्रजपतितनयां सम्प्रयाते गृहीत्वा
माठश्रीरामभूपं मृदुहसनपरः पातु पूर्णत्रयीशः ॥

End :

पूर्णत्रय्याख्यपुर्यां विरचितविहतिर्देवगन्धर्वयक्षैः
सिद्धैस्साध्यैर्मुनीन्द्रैर्दिगधिपतिवरैः सेव्यमानाङ्घ्रियुग्मः ।
भक्ताभीष्टप्रदाता विकसितवदनाम्भोरुहश्श्रीनिकेतः
माठश्रीरामभूपं वरगुणरुचिरं पातु पूर्णत्रयीशः ॥

पूर्णत्रयीशचरितं यदुनाथभक्ताः शृण्वन्ति ये त्वनुदिनं च पठन्ति ये वै ।
सत्कीर्तिपुण्यधनधान्यमहीसुतांश्च दीर्घायुरन्यविभवान् समवाप्नुयुस्ते ॥

Colophon :

श्रीपूर्णत्रयीशस्तोत्रं समाप्तम् ॥

R. No. 3966.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 144. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Kūtālūr-mana Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

Fol. 144*b* is left blank.

स्फोटसिद्धिव्याख्या—गोपालिका.

SPHŌṬASIDDHIVYĀKHYĀ : GŌPĀLIKĀ.

A commentary on Maṇḍanamiśra's Sphōṭasiddhi which is a treatise dealing with the doctrine of Sphōṭa : by the son of Bhavadāsa. The commentator has written Tattvavibhāvanā, a commentary on Tattvabindu.

Contains the commentary for 27 stanzas in the beginning.

Beginning:

अभिवन्द्य महादेवं महादेवं गणेश्वरम् ।
कृतिर्मण्डनमिश्राणां स्फोटसिद्धिर्विविच्यते ॥

प्रकरणमारभमाणोऽविघ्नपरिसमाप्त्यादिसिद्धये गुणसङ्कीर्तनलक्षणया स्तुत्या कायवाङ्मनःप्रह्वतालक्षणया प्रणत्या च विशिष्टदेवतां पूजयति—

योगदान्तैकदृश्यात्मा यो गदान्तकरो नृणाम् ।
तत्त्वावस्थाणवे तस्मै तत्त्वावस्थाणवे नमः ॥ इति ।

तस्मै स्थाणवे नमः । कस्मै योगदान्तैकदृश्यात्मा यो भवति योगात् दान्तः उपरतः एको दृश्यस्यात्मा यस्य, योगस्संयोगः परामर्शः एकः केवलः दृशिः द्रष्टा पुरुषः दृशिस्वरूपस्य पुरुषस्य कर्मविषयतामापन्नं दृश्यं तस्यात्मा स्वरूपं तदेवं दृश्यात्मनः ईश्वरसंयोगादुपरतत्वं वदता संसारदुःखहेतुराहित्यं दर्शितम् ।

* * * *

Colophon:

इति स्फोटसिद्धिव्याख्यायां प्रथमः श्लोकः ॥

* * * *

पूर्वार्धेनेह भाष्यस्य तावत्प्रस्तावना कृता ।
उत्तरार्धेन तत्रोक्तदोषपक्षकवारणम् ॥

Colophon:

इति परमर्षिसिद्धान्तानुसारिण्यां गोपालिकाख्यायां स्फोटसिद्धिव्याख्यायां तृतीयश्श्लोकस्समाप्तः ॥

End:

एतच्च दुर्विदग्धैरवक्षिप्त इत्यत्रोक्तस्य प्रपञ्च इति वेदितव्यम् । तथा हि—दर्शने न्यायलेशो निदर्श्यत इत्युक्तम् । तदेवोपसंहृतं स्पष्टं न्याय-नीत्यादिना पूर्वांशेन तत्रत्यः पूर्वार्धो विवृत इति प्रतिज्ञा । सर्वमविकलमेव प्रतिष्ठितम् ॥

Colophon:

इति स्फोटसिद्धिव्याख्यायां गोपालिकाख्यायां सप्तत्रिंशः श्लोकस्समाप्तः ॥

तत्त्वबिन्दोः कृता येन व्याख्या तत्त्वविभावना ।
तेनेयं रचिता व्याख्या नाम्ना गोपालिका स्मृता ॥
शब्दानां पालकं ह्येतदस्या मूलं निबन्धनम् ।
एषा व्याख्येयशब्दानामुपादानाच्च पालिका ॥
नन्दगोपसुता देवी वेदारण्यनिवासिनी ।
मात्रा गोपालिका नाम्ना सेवितास्मदपेक्षया ॥
तत्प्रसादादियं व्याख्या मयापि रचिता किल ।
इति गोपालिकासंज्ञामस्या व्याचक्षते बुधाः ॥
मण्डनाचार्यकृतयो येष्वतिष्ठन्त कृत्स्नशः ।
तद्दृश्येन मयाप्येषा रचिताराध्य देवताम् ॥
ब्रह्मविष्णुमहेशानरूपिणीं विश्वमातरम् ।
ऋषिं पितरमानम्य भवदासमनन्तरम् ।
गुरूनन्यांश्च रचिता व्याख्येयं क्षम्यतां बुधैः ।

* * * *

यथोक्तं भट्टपादैः—

यदीयशक्त्युचनाविष्टं जगत्स्पन्दितुमक्षमम् ।
युक्तिभिस्तमपह्नोतुं कश्शक्तः परमेश्वरम् ॥ इति ॥

R. No. 3967.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 160. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Manager, Sabhāmaṭham, Kunnankulam, Cochin State.

Fol. 159*b* contains some notes on this work. Fol. 160 is left blank.

ब्रह्मसिद्धिव्याख्या—भावशुद्धिः

BRAHMASIDDHIVĀKHYĀ : BHĀVAŚUDDHIḤ.

A commentary on Maṇḍana's Brahmasiddhi, which work has been described under R. No. 3250 ante: by Ānandapūrṇa, pupil of Abhayānanda. Similar commentary has been described under R. No. 3251 ante.

Complete.

Beginning:

नमस्तस्मै महाघोरप्रत्यूहोरगहारिणे ।
सतां धीपद्मनीडाय हैरम्बाय गरुत्मते ॥
यो विश्वोऽकारवाच्यस्सकलविषयभूः(भुक्)भ्रान्तितत्कारणाभ्यां
बद्धस्संस्कारमात्रप्रविरचिततनुस्तैजसेचे(सश्च)त्युवाच्यः ।
प्राज्ञो ज्ञानैकबद्धस्सुरनरसकलानन्दभुग्माक्षरेक्ष्यः(ण)
वाक्या(च्या)र्थो यस्तुरीयो विगलितसकलस्सोऽहमेवास्मि भूमा ॥
जिह्वारङ्गतले मृगाङ्ककलया सम्प्रोतमौलिर्मुदा
नित्या नृत्यतु नूपुरामलमुखो दाराभिरामाङ्घ्रिका ।
हेलास्फालनलोकनाखिलजगत्सन्दर्शिनी नर्तकी
क्षोणीरङ्गतलस्थसंसद इयं विस्मापनी भारती ॥
शिवौ नत्वैकसद्भावौ प्रकृतिप्रत्ययाविव ।
ब्रह्मसिद्धेर्निबद्धेयं भावशुद्धिर्विधीयते ॥

ग्रन्थारम्भे सदाचारपरम्परापरिप्रापितकर्तव्यभावं परदेवतास्तुतिनमस्काररूपं मङ्गलाचरणं [1] कुर्वन्नधिकारिप्रयोजनप्रतिपाद्यसङ्गतिप्रतिपादनाय (चा)ह—आनन्दमिति । अस्य च नियोगतः फलवत्कार्यान्तरारम्भसंयोगात्स्वयं साक्षादफलत्वाच्च फलवत्सन्निधावफलं तदङ्गमिति कार्यान्तरशेषत्वेऽवधृतेऽपेक्षिताविघ्नपरिसमाप्तिः फलम् । अपेक्षितविधेरनपेक्षितविधानं दुर्बलमिति फलान्तरकल्पनाया दुर्बलत्वात् ।

*　　*　　*　　*

कथं तर्हि सामान्यात्मा वर्णित इत्यत्राह—सामान्यं त्विति । द्वितीयमुत्थापयत्यथेति । दूषयति विशेषैरिति ।

---

[1] रूपमङ्गलाचरणायाधि—इति पाठान्तरम्.

Colophon:

इति श्रीमदभयानन्दपूज्यपादशिष्येण आनन्दपूर्णमुनीन्द्रेण विरचिते ब्रह्मसिद्धिव्याख्यानरत्ने ब्रह्मकाण्डं समाप्तम् ॥

ब्रह्मकाण्डेन ब्रह्मणि प्रदर्शितोपनिषत्समन्वयमाक्षिपति—नन्विति । एतस्मिन्नद्वये आत्मानात्मभेदरहिते ग्रावाणः प्लवन्ते अन्धो मणिमविन्दत् इत्यादिवदित्यर्थः ।

End:

वेदान्तानामनुग्राहकस्तर्कश्श्रीमच्छारीरकशास्त्रे प्रतिपादित इत्याह सद्य इति । जगतां मुमुक्षूणां जन्तूनां परप्रत्ययमात्रशरणानां तरत्यनेन संसारमिति तीर्थं शास्त्रं तद्बुद्ध्या प्रणीतद्वैतशास्त्राभासं(सः) तत्र प्रतिपादको यो दुस्तर्कः तदात्मकं पङ्कं सद्यः प्रक्षालयन्ति(न्ती(। श्रीमच्छारीरकशास्त्रे विस्तरेण तत्र तत्र प्रतिपादिततर्ककलापं संगृह्यैकत्र प्रदर्शयन्ति(न्ती) तत्प्रकरणत्वादित्यर्थः ।

Colophon:

इति श्रीमदभयानन्दपूज्यपादशिष्येणानन्दपूर्णमुनीन्द्रेण विरचितं ब्रह्मसिद्धिव्याख्यानरत्नं समाप्तम् ॥

R. No. **3968.**

Paper. $13\frac{3}{4} \times 8\frac{3}{4}$ inches. Foll. 213. Lines, 28 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

Foll. 1 and 2 give the contents of this work.

(*a*) श्रीविद्याविलासः.

ŚRĪVIDYĀVILĀSAḤ.

Foll. 3*a*—181*a*. Fol. 181*b* gives the index for a small portion of this work. Foll. 10, 11 and 182 are left blank.

Same work as that described under No. 5743 of the D.C.S. MSS., Vol. XII. By Gaganānanda.

Complete.

(*b*) श्रीचक्रलेखनप्रकारः.

ŚRĪCAKRALĒKHANAPRAKĀRAḤ.

Foll. 183*a*—191*a*. Fol. 191*b* is left blank.

Similar to the work described under No. 5731 of the D.C.S. MSS., Vol. XII.

Wants the beginning and the end.

Beginning :

षोडशारे—देव्यग्रा द्विवि विलोमेन षोडश स्वरान् सबिन्दुकान् लिखेत् । प्रथमचतुरश्रे पश्चिमादिचतुर्दिक्षु द्रां द्रीं क्लीं ब्लूं हत्येकैकं विलिखेत् । तद्बद्वायव्यादिकोणेषु सः क्रों ह्स्ख्फ्रों कल्हीं इति प्रत्येकं विलिखेत् ।

End :

नागदलेषु कवर्गाद्यष्टवर्गाः क्रमेण कचटतपयशळवर्गाः सबिन्दुका लेखनीयाः । तत्रादिप्रथमचतुष्टयं पूर्वादि[वि]दिक्षु इतरचतुष्टयमाग्नेयादिविदिक्षु विलिखेत् ।

(*c*) श्रीचक्रलेखनविधिः.

ŚRĪCAKRALĒKHANAVIDHIḤ.

Foll. 192*a*—195*a*. Fol. 195*b* is left blank.

Similar to the above.

Complete.

Beginning :

अथ कल्पान्तरोक्तप्रकारेणापि श्रीविद्याचक्रलेखनप्रकारा लिख्यन्ते—

अथ पुरतो विहाय निजे विष्टरात् अरत्निमवनीमथ स मन्त्री क्रमसाधनयजाः(शाः)

अङ्गुलीयम्—

व देव भागवसुतोयपद्मभूरचयाम चक्रमरुणं सुकेसरम् ।

End :

श्रीं ह्रीं क्लीं सौः इत्यष्टदले, ऐं क्लीं सौः इति षोडशदले, आं आं सौः इति चतुरश्रे इति नवचक्रनायकीबीजानि तत्तदावरणात् पुरतो विलिखेत् ॥

Colophon :

इति श्रीचक्राक्षरलेखनविधिस्सम्पूर्णः ॥

(*d*) परशुरामसूत्रम्.

PARAŚURĀMASŪTRAM.

Foll. 196*a*—212*b*. Fol. 213 is left blank.

Same work as that described under No. 5674 of the D.C.S. MSS., Vol. XII, and R. No. 844(*a*) ante; but the additional sentences are given at the end.

Complete.

दुष्टक्षत्रियकुलकालान्तकेन रेणुकागर्भसम्भूतेन म[न्दहे](हा)देवप्रधान-शिष्येण श्रीपरशुरामभार्गवमहोपाध्यायेन कुलाचार्येण प्रकटितेति श्रीयुत ॥

अथातस्सर्वेषां मन्त्राणामवसृष्टमन्त्रस्येति विधिवत्कृत इत्थं साङ्गा मि(ही)-यमेव महाविद्याथ प्राथमिके चतुरश्रेण हृच्चक्रे । एवं गणपतिमिष्ट्वा इत्थ-मथातो दीक्षां दश.

Colophon:

इति परशुरामसूत्रं सम्पूर्णम् ॥

R. No. **3969.**

Paper. $1\frac{3}{4} \times 8\frac{3}{4}$ **inches. Foll.** 393. **Lines,** 36 **in a page. Telugu. Good.**

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

ललितार्चनचन्द्रिका.

LALITĀRCANACANDRIKĀ.

Foll. 1*b*—394*a*. Foll. 1*a*, 313*b*, 362*b*, 391*b* and 394*b* are left blank.

Similar to the work described under R. No. 1247(*a*) ante.

Deals with the following subjects:—

१. प्रातर्निर्गमनविधिः.	११. श्रीचक्रन्यासबोधनम्.
२. तान्त्रिकस्नानविधिः.	१२. श्रीचक्रन्यासप्रयोगबोधनम्.
३. सन्ध्यावन्दनप्रबोधनम्.	१३. करशुद्ध्यादिन्यासनिरूपणम्.
४. सूर्यार्घ्यविधानबोधनम्.	१४. करशुद्ध्यादिन्यासप्रयोगः.
५. द्वारपूजाप्रयोगविधिः.	१५. मानसपूजाविधानम्.
६. पूजाप्रारम्भबोधनम्.	१६. ऊर्ध्वाम्नायन्यासबोधनम्.
७. भूतशुद्धिप्राणप्रतिष्ठा.	१७. श्रीविद्यासञ्चारक्रमविधिः.
८. मातृकान्याप्रबोधनम्.	१८. अर्घ्यस्थापनबोधनम्.
९. षट्त्रिंशत्तत्त्वन्यासादिविधिः.	१९. आत्मपूजादिबोधनम्.
१०. पूर्वषोढान्यासबोधनम्.	२०. मूलदेव्यर्चनविधिः.

२१. नित्यागुर्वङ्गावरणार्चनबोधनम्.
२२. नवावरणार्चनबोधनम्.
२३. श्रीचक्रपूजार्हकपञ्चपञ्चिकार्चन-बोधनम्.
२४. श्रीचक्रपूजार्हसमस्तदेवतार्चन-बोधनम्.
२५. पूजाशेषसमापनम्.
२६. पात्रसाधनप्रयोगः.
२७. आत्मपूजाप्रयोगः.
२८. पीठपूजाप्रयोगः.
२९. चतुरायतनप्रयोगः.
३०. श्रीचक्रपूजार्हदेवतापूजाप्रयोगः.
३१. श्रीक्रमपूजाप्रयोगबोधनम्.

By Saccidānandanātha.
Complete in 31 Prakāśas.

Beginning:

शिवं गुरुं गणाधीशं प्रणम्य परदेवताम् ।
ललितायास्समेदायाः प्रवक्ष्येऽर्चनचन्द्रिकाम् ॥

नमः (ततः) श्रीमान् साधकेन्द्रः,

रात्रिशेषे समुत्थाय कृत्वावश्यादिकं ततः ।
मानसैश्च शुचिर्भूत्वा गुरुं ध्यायेच्छिवोपरि ॥ इति ।

तद्यथा —

व्योमाम्बुजे कर्णिकमध्यसंस्थे सिंहासने संस्थितदीप्तमूर्तिम् ।
ध्यायेद्गुरुं चन्द्रशिलाप्रकाशं चित्पुस्तकाभीतिकरं दधानम् ॥

* * * *

इत्यनेन भूमिं प्रार्थ्य श्वासानुसारेण भूमौ पादं निधाय गृहाद्बहिर्गच्छेत् ॥

सच्चिदानन्दनाथेन सहजानन्दचेतसा ।
चन्द्रिकायां प्रणीतायां प्रकाशः प्रथमोऽगमत् ॥

Colophon:

इति श्रीसच्चिदानन्दनाथविरचितायां ललितार्चनचन्द्रिकायां प्रातर्निर्गमनविधिर्नाम प्रथमः प्रकाशस्समाप्तः ॥

End:

अथात्यन्तपरमापत्कल्पे सर्वत्र सर्वदा मानसपूजामेव कुर्यात् ।

इति सङ्क्षेपपूजाविधिः ।

एवमपि न करोति यः । सोऽधो याति न संशयः । इति सङ्क्षेपार्चा च शक्तानामनर्थकारिणी स्यादिति सङ्क्षेपः ॥

सच्चिदानन्दनाथेन सहजानन्दचेतसा ।
चन्द्रिकायां प्रणीतायामासीत्रि(मेक)त्रिंशः प्रकाशकः ॥

Colophon:

इति श्रीसच्चिदानन्दनाथविरचितायां ललितार्चनचन्द्रिकायां श्रीक्रम-पूजाप्रयोगबोधको नाम (एक)त्रिंशः प्रकाशस्समाप्तः ॥

Date of transcription—Friday, the 11th day of the dark fortnight of the lunar month Āṣāḍha in the year Kālayukti.

Name of the scribe—Bulusu Subrahmaṇya Śāstrin.

R. No. 3970.

Paper. $8\frac{3}{4} \times 4\frac{3}{4}$ inches. Foll. 120. Lines, 20 in a page. Telugu. Slightly injured.

Presented in 1921-22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

नित्योत्सवनिबन्धः.

NITYŌTSAVANIBANDHAḤ.

Foll. 1*b*—119*b*. Foll. 1*a*, 6*b*, 53*b*, 57*b* and 120 are left blank.

Same work as that described under R. Nos. 2462 and 2611 ante, wherein see for the beginning. By Umānandanātha, pupil of Bhāsurānandanātha.

Contains the Ārambhōllāsa (incomplete), Taruṇōllāsa (wants the beginning), Yauvanōllāsa, Prauḍhōllāsa and Anavasthōllāsa complete.

End:

इतोऽपि विस्तरो नान्यत्र द्रष्टव्य इति दिक् । एतन्निबन्धनाध्ययनात् सर्वदेवतोपास्तिफलं भवति । तदुक्तं सूत्रकृता भगवता—य इमां दशखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूतामधीते सर्वेषु यज्ञेषु यष्टा भवति ।

* * * *

नित्योत्सवनिबन्धोऽयं यथाविधि कृतं मया ।
भ्रमप्रमादस्खलितं क्षमन्तु प्रमुदा बुधाः ॥
अनेन वागथर्वेण समाराध्य कथञ्चन ।
प्रीयतां देशिकात्मा मे देवि श्रीललिताम्बिके ॥
विश्वाश्चर्यतपोमयविश्वामित्रर्षिगोत्रतिलकेन ।
श्रीबालकृष्णविद्वत्सुतेन लक्ष्म्यम्बयोपलाल्येन ॥

श्रुतपेटवोपनाम्ना चोलाधिपभोसलेन्द्रमान्येन ।
नाटककाव्यादिकृता महितमहाराष्ट्रजातिहीरेण ॥
त्रय्यन्ततत्त्वशीलनदलितजगच्चक्रजालमोहेन ।
भारत्युपाख्यभास्करदेशिकमुखलब्धदैक्ष्य(स)नाम्ना ॥
आम्नायतन्त्रजालालोकपरेणार्यसम्प्रदायजुषा ।
ललितापदाब्जरोलम्बेन जगन्नाथपण्डितवरेण ॥
क(लिवर्षेषु)रसार्णवकरिवेदमितेष्विह व्यतीतेषु । (४८४६) ।
नव्यः क्रोधनशरादि प्रलम्बिनित्योत्सवः शिवप्रीत्यै ॥

Colophon:

इति श्रीमद्भासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेनोमानन्दनाथेन-निर्मिते अभिनवकल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे साधारणक्रमनिरूपणं नामानवस्थोल्लासः सम्पूर्णः ॥

R. No. 3971.

Paper. 7½ × 4¾ inches. Foll. 16. Lines, 13 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Foll. 1*a*—10*b*.

Same work as that described under Nos. 11241 of the D.C.S. MSS., Vol. XIX. By Śaṅkarācārya.

Complete.

The scribe adds—

लिखितमिदं पुस्तकं वेद राजारामेण.

Foll. 11*a*—16*a* contain the Bhuvanēśvarīmantra and Āmnāyapūrvōttaraṭippaṇī (wants the beginning and the end).

R. No. 3972.

Paper. 8½ × 6¾ inches. Foll. 18. Lines, 12 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

विश्वगुणादर्शः.

VIŚVAGUṆĀDARŚAḤ.

Same work as that described under R. No. 1067 ante. By Vēṅkaṭādhvarin.

Wants the beginning and end.

R. No. 3973.

Paper. 9½ × 7½ inches. Foll. 54. Lines, 20 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

रामार्चनचन्द्रिका.

RĀMĀRCANACANDRIKĀ.

Same work as that described under No. 8683 of the D.C.S. MSS., Vol. XVI. By Ānandavana, disciple of Mukundavana.

Contains the Paṭalas one to four only.

Fol. 53 gives a portion of the Śrīrāmanavamīvrata. Fol. 54*a* is left blank. Fol. 54*b* gives the name of the Rāmārcanacandrikā.

R. No. 3974.

Paper. 13½ × 8½ inches. Foll. 34. Lines, 28 in a page. Telugu. Good.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar Shermuhammadpur, Chicacole, Ganjam district.

(*a*) श्रीविद्यारत्नसूत्रदीपिका.

ŚRĪVIDYĀRATNASŪTRADĪPIKĀ.

Foll. 1*a*—16*a*. Fol. 16*b* is left blank.

Same work as that described under No. 5741 of the D.C.S. MSS., Vol. XII. By Vidyāraṇyamuni.

Complete.

(*b*) अभिनयदर्पणम्.

ABHINAYADARPAṆAM.

Foll. 17*a*—34*a*. Fol. 34*b* is left blank.

Same work as that described under R. No. 1471 ante.

Complete.

(*a*) वर्णनिघण्टुः.

VARṆANIGHAṆṬUḤ.

Foll. 1*a*—3*b*. Fol. 4 is left blank.

Same work as that described under No. 8074 of the D.C.S. MSS., Vol. XV.

Complete.

(*b*) राजराजेश्वरीदिव्यमङ्गलध्यानम्.

RĀJARĀJĒŚVARĪDIVYAMAṄGALADHYĀNAM.

Foll. 5*a*—10*a*. Fol. 10*b* is left blank.

Same work as that described under R. No. 1517(*c*) ante, but with a different colophon as given below :—

इति श्रीरुद्रयामले उमामहेश्वरसंवादे राजराजेश्वरीदिव्यमङ्गलध्यानं सम्पूर्णम्.

This work is also called Rājarājēśvarīstōtra.

(*c*) त्रिपुरोपनिषद्भाष्यम्.

TRIPURŌPANIṢADBHĀṢYAM.

Foll. 11*a*—19*a*. Foll. 20*a*—36*b* contain a duplicate copy of the same work Foll. 19 and 37 are left blank.

Same work as that described under No. 529 of the D.C.S. MSS., Vol. I, Part III, wherein see for the beginning. By Bhāskarācārya.

Complete.

End:

तस्य महिमानं श्रुतिरपि वक्तुमसमर्था । तस्य ब्रह्मैकरूपत्वात् तत्र वाचामप्रवृत्तेरित्याशयेन श्रुत्या मौनमाश्रितमित्युपनिषत् समाप्तेत्यर्थः । इतोऽधिकरहस्यवक्तव्यांशाभावादिति भावः ॥

Colophon:

इति भास्कररायेण रचितास्त्रिपुरामहोपनिषदर्थाः ।
प्रकटयितुमयोग्या अपि विदुषां तोषाय कतिपये कथिताः ॥

(*d*) श्रीचक्रविवरणम्.

ŚRĪCAKRAVIVARAṆAM.

Foll. 38*a*—43*a*. Fol. 64*b* is left blank.

Same work as that described under No. 5732 of the D.C.S. MSS., Vol. XII.

Complete.

Foll. 45*b* and 46*a* contain some additional stanzas belonging to the same work.

Date of transcription—Tenth day of the bright fortnight of the lunar month Caitra in the year Piṅgala. Name of the scribe—Sādi Subbannayya.

End:

अन्ते यादिक्षान्ते नवमं[ग]ळकारादिमं नास्ति ॥
अथ प्रातस्समुत्थाय जपित्वा स्व(गुरु)नाम च ।
ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवलो गुरुः ॥

* * * *

प्रकाशानन्दनाथाय नमः ओं परमशिवोत्तमानन्दनाथाय नमः ओं पराशक्तिपरा.

Colophon:

श्रीचक्रलेखनक्रमः सम्पूर्णः ॥

(*e*) सरस्वतीसहस्रनामस्तोत्रम्.

SARASVATĪSAHASRANĀMASTŌTRAM.

Foll. 47*a*—55*a*. Fol. 55*b* is left blank.

Same work as that described under No. 9329 of the D.C.S. MSS., Vol. XVII.

Complete.

R. No. **3977.**

Paper. 13¾ × 8¾ inches. Foll. 43. Lines, 25 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

(*a*) राजराजेश्वरीस्तोत्रम्.

RĀJARĀJĒŚVARĪSTŌTRAM.

Foll. 1*a*—5*b*.

Same work as that described under No. 10764 of the D.C.S. MSS., Vol. XIX, and with two additional stanzas in the beginning: the work is also called Dēvīdivyamaṅgaladhyāna.

Complete, as found in the Viṣṇuyāmalatantra.

(*b*) श्रीविद्यारत्नसूत्रदीपिका.

ŚRĪVIDYĀRATNASŪTRADĪPIKĀ.

Foll. 6*a*—23*a*. Fol. 23*b* is left blank.

Same work as that described under Nos. 5741 and 5742 of the D C.S. MSS., Vol. XII.

Complete.

(*c*) चण्डीरहस्यम्.

CAṆḌĪRAHASYAM.

Foll. 25*a*—43*a* Fol. 24 gives the contents of the Caṇḍīrahasya-nighaṇṭu. Fol. 43*b* is left blank.

Similar to the work described under No. 5662 of the D.C.S. MSS., Vol. XII.

Contains the fourth Paricchēda only.

Beginning :

ओं नमश्चण्डिकायै । मार्कण्डेयपुराणान्तर्गतचण्डिकायां सप्तशतश्लोकाः। तत्र प्रमाणं चिदम्बरतन्त्रे—

मार्कण्डेयपुराणोक्तस्तवः सप्तशतावधिः ।
स्तवस्य पठनात्तस्य सर्वसौख्यं लभेद्ध्रुवम् ॥
तस्मिन्दिव्यस्तवे पूर्णे मन्त्रास्सप्तशतं शिवे ।

इत्यादिसप्तशतीप्रमाणम् । चण्डीपाठे नियमे मार्कण्डेयं प्रति ब्रह्मवाक्यम्—

अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।
जपेत्सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥

End :

बहु किं कथ्यते देवि सर्वशान्ति लभेन्नरः ।
सर्वशङ्काविनिर्मुक्तो जायते मदनोपमः ॥
एवं कृते महेशानि यदि शान्तिर्न जायते ।
पुनस्तेनैव कर्तव्यं ततस्सिद्धिर्भवेद्ध्रुवम् ॥

Colophon :

इति मातृकाभेदतन्त्रे षष्ठः पटलः ॥

इति चण्डीरहस्ये चतुर्थः परिच्छेदः ।

(*c*) विष्णुसहस्रनामविशेषनामविभागः.

VIṢṆUSAHASRANĀMAVIŚEṢANĀMAVIBHĀGAḤ.

Fol. 30.

Same work as that described under R. No. 2814(*b*) ante.

Complete.

Foll. 30*b*—34*b* contain the Balabhadrādidhyānaślōkas, Viṣṇusahasranāmarudraśāpavimōcanavidhi, Upacārapūjā, Śāradāpūjā, Vajrapañjaravibhūtidhāraṇa, Dēvīdigbandhavidhi, Śaivācamanavidhi and Mānasikasnānavidhi. Fol. 35*a* gives the context of some Mantras. Fol. 35*b* is left blank.

(*d*) आत्मशुद्ध्यादिपूजाविषयः.

ĀTMAŚUDDHYĀDIPŪJĀVIṢAYAḤ.

Foll. 36*a*—43*a*.

On self-purification, etc., prior to the commencement of the repetition of certain Mantras.

Beginning :

आत्मा स्थानं द्रव्यमन्त्रदेवी शुद्धिस्तु पञ्चमम् ।
यावन्न कुरुते मर्त्यस्तावद्देवार्चनं न हि ॥
स्नानभूतेन संशुद्धिं प्राणायामादिभिः प्रिये ।
षडङ्गाद्यखिलं न्यासैरात्मशुद्धिरुदीरिता ॥ इति ।

अथो विद्यागण(णि)विधिः—

अकारादिक्षकारान्तं मूलमन्त्रेण मन्त्रवित् ।
पुनः प्रथमखण्डं च खण्डद्वयमतः परम् ॥
खण्डत्रयं मातृकायाः कुङ्कुमन्यासमुत्तमम् ।

* * * *

आत्मपूजासमा नास्ति पूजा रघुकुलोद्भव ।
मत्सान्निध्यमवाप्नोति चण्डालोऽप्यात्मपूजया ॥ इति ।

End :

अन्तिमदिने षोडशोत्तरसप्तदशाधिकं पञ्चसहस्रं जपेत् । अनेन विद्यासिद्धिः । होमाशक्तौ कृष्णाष्टमीमारभ्य कृष्णचतुर्दश्यवधि कृतायुतचतुष्टयजपस्य तद्दशांशहोमसङ्ख्याद्विगुणजपं करिष्य इति सङ्कल्पः ; यद्यदङ्गं विहीयेत तत्सङ्ख्याद्विगुणो जपः इति प्रामाण्यात् अयं द्विगुणपक्षः न तु ब्राह्मणभोजनपरः । किं च भवेदङ्गद्वयैव(नैव) पुरश्चरणपूर्तिरिति ।

Fol. 43 gives the Hōmadravyalakṣaṇādi.

(*e*) महाचीनाचारक्रमः.

MAHĀCĪNĀCĀRAKRAMAḤ.

Foll. 44*a*—51*b*. Foll. 52—60 are left blank.

A treatise explaining the religious observances of the Mahācīna sect of the worshippers of Śakti.

Complete in five Paṭalas.

Beginning:

श्रीदेव्युवाच—

महाचीनक्रमाचारास्सूचिता न प्रकाशिताः ।
इदानीं श्रोतुमिच्छामि कथयस्व महेश्वर ॥
इति पृष्टः पुरा देव्या कैलासशिखरे हरः ।
चिन्तयामास मनसा किञ्चिदामीलितेक्षणः ॥

* * * *

Colophon:

इति महाचीनाचारसारतन्त्रे सर्वाचारसारोत्तमोत्तमे महाचीनाचारक्रमे प्रथमः पटल ॥

ततः प्रणम्य तां देवीं वसिष्ठोऽसौ महामुनिः ।
जगामाचारविज्ञानं वाञ्छया बुद्धरूपिणम् ॥
ततो गत्वा महाचीनदेशे ज्ञानमयो मुनिः ।
ददर्श हिमवत्पार्श्वे लोकेश्वरसुसेवितम् ॥

End:

यो जपेच्चण्डिकां देवीं तस्य दुःखं पदे पदे ॥
देया विद्यार्थिने विद्या व्याधितेभ्यश्चऔ(ईवौ)षधम् ।
देयं तदा था)र्थिने अ(चा)न्नं त्र(प्र)य(च्छ)स्वर्ग[स्व]लक्षणम् ॥

Colophon:

इति महाचीनाचारसारतन्त्रे सर्वाचारसारोत्तमोत्तमे महाचीनाचारक्रमः समाप्तः ॥

(*f*) मन्त्रमालिका.

MANTRAMĀLIKĀ.

Foll. 61*a*—139*b*.

Similar the work described under R. No. 1210 ante.

A collection of Mantras containing the following :—

Fol. 61.—मातृकामन्त्रः (see under No. 6931 of the D.C.S. MSS., Vol. XIII).

Fol. 61*b*.—वागीश्वरीमन्त्रः (see under No. 7195 of the D.C.S. MSS., Vol. XIV).

Foll. 61*b*—62*a*.—बालत्रिपुरासरस्वतीमन्त्रः (see under No. 6756 of the D.C.S. MSS., Vol. XIII).

Fol. 62.—महात्रिपुरसुन्दरीपञ्चदशाक्षरीमन्त्रः (see under No. 6887 of the D.C.S. MSS., Vol. XIII).

Foll. 62*b*—63.—सिद्धविद्यामन्त्रः (see under No. 7507 of the D.C.S. MSS., Vol. XIV).

Foll. 63*b*—64*b*.—मातङ्गीश्वरीमन्त्रः (see under No. 6924 of the D.C.S. MSS., Vol. XIII).

Foll 64*b*—65*a*.—लघुमातङ्गीमन्त्रः (see under No. 7124 of the D.C.S. MSS., Vol. XIV).

Fol. 65*a*.—कल्याणमातङ्गीमन्त्रः (see under Nos. 6033 and 6269 of the D.C.S. MSS., Vols. XII and XIII).

Fol. 65.—भुवनेश्वरीमन्त्रः (slightly different from Nos. 6830 and 6834 of the D.C.S. MSS., Vol. XIII).

Foll 65*b*—66*a*.—त्रिपुटीमन्त्रः (same work—see No. 6332 of the D.C.S. MSS., Vol. XIII).

Foll. 66*a*—67*b*.—बृहद्वाराहीमन्त्रः (same work—see No. 6783 of the D.C.S. MSS., Vol. XIII).

Foll. 67*b*—68*a*.—लघुवाराहीमन्त्रः (same work—see No 7130, Vol. XIV).

Fol. 68.—किरातवाराहीमन्त्रः (same work—see No. 6088, Vol. XII).

Foll. 68*b*—69*a*.—स्वप्नवाराहीमन्त्रः (same work—see No. 7626, Vol. XIV).

Fol. 69.—मध्याह्नवाराहीमन्त्रः (same work—see No. 6861, Vol XIII)

Foll. 69*b*—70*a*.—बगलामुखीमन्त्र. (same work—see No. 6706, Vol.. XIII).

Foll. 70.—त्वरितामन्त्रः (same work—see No. 6363, Vol. XIII).

Foll. 70*b*—71*a*.—छिन्नामन्त्रः (same work—see No. 6120, Vol. XII).

Fol. 71.—अन्नपूर्णेश्वरीमन्त्रः (same work—see Nos. 5877 and 5878, Vol. XII).

Foll. 71*b*—72*a*.—वनदुर्गामन्त्रः (same work—see No. 7160 of the D.C.S. MSS., Vol. XIV).

Fol. 72.—जातवेदसदुर्गामन्त्रः (same work—see No. 6308 of the D.C.S. MSS., Vol. XIII).

Fol. 72*b*.—पञ्चबाणेश्वरीमन्त्रः (same work—see No. 6557, Vol. XIII).

Foll. 72*b*—73*a*.—अश्वारूढामन्त्रः (same work—see No. 5901, Vol. XII).

Fol. 73*a*.—संमोहनसुन्दरीमन्त्रः (same work—see No. 7459, Vol. XIV).

Fol. 73.—धूमावतीमन्त्रः (same work—see No. 6443, Vol. XIII).

Foll. 73*b*—74*a*.—गायत्रीमन्त्रः (same work—see No. 6204, Vol. XII).

„ 74.—पञ्चाक्षरीमन्त्रः (same work—see Nos. 6572 and 6573, Vol. XIII).

Foll. 74*b*—75*a*.—अघोरमन्त्रः (same work—see No. 5823, Vol. XII).

„ 75*a*.—अघोरास्त्रमन्त्रः (do. 5840 of the D.C.S. MSS., Vol. XII).

Fol. 75.—वीरशरभमन्त्रः (same work—see No. 7275 of the D.C.S. MSS., Vol. XIV).

Foll. 75*b*—76*a*.—महाशरभमन्त्रः (same work—see No. 6912, Vol. XIII).

Fol. 76.—शरभसाळुवमन्त्रः (same work—see No. 7346 of the D.C.S. MSS., Vol. XIV).

Fol. 76*b*.—वीरभद्रमन्त्रः (same work—see No. 7265 of the D.C.S. MSS., Vol. XIV).

Foll. 76*b*—77*a*.—दक्षिणामूर्तिमन्त्रः (same work—see No. 6378 of the D.C.S. MSS., Vol. XIII).

Fol. 77.—मेधादक्षिणामूर्तिमन्त्रः (same work—see No. 6962 of the D.C.S. MSS., Vol. XIII).

Foll. 17*b*—78*a*.—हंसदक्षिणामूर्तिमन्त्रः (same work—see Nos 7644 and 7745, Vol. XIV).

Fol. 78.—नीलकण्ठमन्त्रः (same work—see No. 6505, Vol. XIII).

Foll. 78*b*—79*a*.—कुक्कुटाख्यसदाशिवमन्त्रः (same work—see No. 6091, Vol. XII).

Fol. 79*a*.—चिदम्बरनटनमन्त्रः (same work—see No 6294, Vol. XIII).

„ 79.—पुत्रकामेष्टिसौभरिमन्त्रः (do. 6721 of the D.C.S. MSS., Vol. XIII).

Foll. 79*b*—80*a*.—पाशुपतास्त्रमन्त्रः (same work—see No. 6610 of the D.C.S. MSS., Vol. XIII).

Fol. 80*a*.—नारायणाष्टाक्षरीमन्त्रः (see No. 6493, Vol. XIII).

„ 80*b*.—द्वादशाक्षरीमन्त्रः (do. 6431, Vol. XIII).

„ 80*b*—81*a*.—कृष्णाष्टादशाक्षरीमन्त्रः (see No. 6109, Vol. XII).

„ 81*a*.—कृष्णदशाक्षरमन्त्रः (see No. 6098, Vol. XII).

„ 81.—एकाक्षरकृष्णमन्त्रः (do. 6017, Vol. XII).

„ 81*b*.—पिण्डगोपालमन्त्रः (do. 6617, Vol. XIII)

„ 81*b*—82*a*.—आनुष्टुभपुत्रगोपालमन्त्रः (see Nos. 5970 and 5971, Vol. XII).

Fol. 82*a*.—कृष्णषडक्षरीमन्त्रः (see No 6102, Vol. XII).

„ 82*a*.—कृष्णैकाद्यक्षरीमन्त्रः (do. 6112, Vol. XII).

„ 82*b*—83*a*.—सुदर्शनमन्त्रः (do. 7540, Vol. XIV).

„ 83*a*.—हयग्रीवमन्त्रः (do. 7702, Vol. XIV).

„ 83.—राममन्त्रः (do. 7050, Vol. XIV).

„ 83*b*—84*a*.—रामदशाक्षरीमन्त्रः (see Nos. 7038 and 7040, Vol. XIV).

Fol. 84*a*.—रामद्वादशाक्षरीमन्त्रः (see No. 7046, Vol. XIV).

„ 84*a*.—रामषोडशाक्षरीमन्त्रः (do. 7077, Vol. XIV).

„ 84.—हनुमन्मन्त्रः (do. 7674, Vol. XIV).

„ 84*b*—85*a*.—हनुमद्द्वादशाक्षरीमन्त्रः (see No. 7667, Vol. XIV).

„ 85*a*.—हनुमद्गारुडमन्त्रः (see No. 7665, Vol. XIV).

„ 85.—महागणपतिमन्त्रः (do. 6879, Vol. XIII).

„ 85*b*.—गणपत्येकाक्षरमन्त्रः (do. 6144, Vol. XII).

Foll. 85*b*—86*a*.—गणपतिषडक्षरमन्त्रः (see No. 6141, Vol. XII).

Fol. 86.—उच्छिष्टगणपतिमन्त्रः (do 6008, Vol. XII).

Foll. 86*b*—87*a*.—हरिद्रागणपतिमन्त्रः (do. 7716, Vol. XIV).

Fol. 87*a*.—गणपतित्र्यक्षरमन्त्रः (do. 6131, Vol. XII).

„ 87.—शक्तिगणपतिमन्त्रः (do 7299, Vol. XIV).

Foll. 87*b*—88*a*.—सौराष्टाक्षरीमन्त्रः (do. 7611, Vol. XIV).

Fol. 88.—सौरचतुरक्षरीमन्त्रः (do. 7605, Vol. XIV).

Foll. 88*b*—89*a*.—आपदुद्धारणभैरवमन्त्रः (see No. 5975, Vol. XII).

Fol. 89*a*.—सुवर्णभैरवमन्त्रः (see No 7573, Vol. XIV).

„ 89.—कार्तिकेयमन्त्रः (do. 6068, Vol XII).

„ 89*b*.—चिन्तामणिमन्त्रः (do. 6299, Vol. XIII).

Foll. 89*b*—90*a*.—कामधेनुमन्त्रः (see No. 6042, Vol. XII).

Fol. 90*a*.—कामराजमन्त्रः (do. 6046, Vol. XII).

Foll. 90*a*—91*b*.—पाशुपतमन्त्रः (do. 6609, Vol. XIII).

„ 91*b*—92*a*.—ब्रह्मास्त्रमन्त्रः (do. 6809, Vol. XIII).

Fol. 92.—तुर्यगायत्रीमन्त्रः (do. 6326, Vol. XIII).

Foll. 92*b*—93*a*.—पञ्चबाणमन्त्रः (do. 6555, Vol. XIII).

Fol. 93.—रतिप्रियामन्त्रः (do. 6983, Vol. XIII).

„ 93*b*.—सुलोचनासिद्धिमन्त्रः (do. 7571, Vol. XIV).

Foll. 93*b*—94*a*.—मदनयक्षिणीमन्त्रः (see No. 6857, Vol. XIII).

Fol. 94*a*.—सिद्धलक्ष्मीयक्षिणीमन्त्रः (do. 7505, Vol. XIV).

„ 94*a*.—कालकर्षिणीयक्षिणीमन्त्रः (do. 6071, Vol. XII).

„ 94.—शङ्खसुवर्णयक्षिणीमन्त्रः (do. 7309, Vol. XIV).

Foll. 94*b*—95*a*.—चन्द्रिकामन्त्रः (do. 6288, Vol. XII).

Fol. 95*a*.—अनुरागिणीमन्त्रः (see No. 5869 of D.C.S. MSS., Vol. XII).

Fol. 95.—विद्युज्जिह्वामन्त्रः (see No. 7223 of D.C.S. MSS., Vol. XIV).

„ 95*b*.—कर्णपिशाचिनी (do. 6028 do. Vol XII).

Foll. 95*b*—96*a*.—लक्ष्मीनृसिंहमन्त्रः (see No. 7104 of D.C.S. MSS., Vol. XIV).

Fol. 96.—नृसिंहानुष्टुभमन्त्रः (see No. 6537 of D.C.S. MSS., Vol. XIII).

Fol. 96*b*.—नृसिंहैकाक्षरमन्त्रः (see No. 6543 of D.C.S. MSS., Vol. XIII).

Fol. 96*b*.—नृसिंहषडक्षरमन्त्रः (see No. 6531 of D.C.S. MSS., Vol. XIII).

Foll. 96*b*—97*a*.—महाशास्तृमन्त्रः (see No. 6914 of D.C.S. MSS., Vol. XIII).

Fol. 97.—हुतभूषणीमन्त्रः (see No. 7727 of D.C.S. MSS., Vol. XIV).

" 97*b*.—गरुडपञ्चाक्षरीमन्त्रः (see No. 6164 of D.C.S. MSS., Vol. XII).

Fol. 97*b*—98*a*.—महाभैरवीमन्त्रः (see Nos. 6896 and 6897 of D.C.S. MSS., Vol. XIII).

Fol. 98*a*.—अमृतपञ्चाक्षरीमन्त्रः (see No. 5887 of D.C.S. MSS., Vol. XII).

Fol. 98.—मैलारदेवमन्त्रः (see No. 6970 of D.C.S. MSS., Vol. XIII).

Fol. 99.—मृतसञ्जीविनीमन्त्रः (see No. 6952 of D.C.S. MSS., Vol. XIII).

Foll. 99*b*—100*a*.—प्रत्याङ्गिरासूक्तमन्त्रः (see No. 6660 of D.C.S. MSS., Vol. XIII).

Fol. 100.—बन्धविमोचनीमन्त्रः (see No. 6728 of D.C.S. MSS., Vol. XIII).

Fol. 100*b*.—एकाक्षरीबन्धविमोचनीमन्त्रः (see No. 6021 of D.C.S. MSS., Vol. XII).

R. No. **3979**.

Paper. $8\frac{1}{2} \times 7$ inches. Foll. 27. Lines, 25 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar, Shermuhammadpur, Chicacole, Ganjam district.

(*a*) **पुरश्चरणदीपिका.**

PURAŚCARAṆADĪPIKĀ.

Foll. 1*a*—11*b*.

A treatise setting forth the preliminary conditions necessary for learning the Mantras, etc.

Deals with the following Prakāśas :—

१. गुरुशिष्यपरीक्षा.
२. दीक्षाविधानम्.
३. अरिमन्त्रत्यागादिविधानम्.
४. जपस्थानादिनिर्णयः.
५. जपविधानम्.

Complete in five Prakāśas. By Śivanātha.

Beginning :

कामेश्वरपदद्वन्द्वं निधाय हृदि सुन्दरम् ।
रच्यते शिवनाथेन पुरश्चरणदीपिका ॥
तत्रादौ गुरुशिष्ययोः परीक्षा प्रोच्यते मया ।
गुरुशिष्यावुभौ मोहादपरीक्ष्य परस्परम् ॥
उपदेशं वदन् गृह्णन् प्राप्नुयातां पिशाचताम् ।
अशास्त्रीयोपदेशं तु यो गृह्णाति ददाति च ॥
भुज्ये(ञ्जा)ते तावुभौ घोरान् नरकानेकविंशतिम् ।
अनर्हो मन्त्रविज्ञानं(ने) न तिष्ठति कदाचन ॥

* * * *

तथा शिष्यकृतं(तो) दोषो गुरुं प्राप्नोत्यसंशयः ।
तस्माच्छिष्यं गुरुर्नित्यं परीक्ष्यैव परिग्रहेत् ॥

Colophon :

इति पुरश्चरणदीपिकायां गुरुशिष्यपरीक्षाख्यः प्रथमः प्रकाशः ॥

End :

तर्पणस्य दशांशेन नमोऽन्तं मन्त्रमुच्चरन् ।
अभिषिञ्चेत्स मूर्धानं जलैः कुम्भाख्यमुद्रया ॥

Colophon :

इति पुरश्चरणदीपिकायां जपविधानाख्यः पञ्चमः प्रकाशः ॥

Foll. 11*b*—14*a* contain the Japamālāprārthanā, Bālādhyānabhēda, Vajrapañjara and Vibhūtidhāraṇavidhi.

(*b*) देवीपूजादिविषयः.

DĒVĪPŪJĀDIVIṢAYAḤ.

Foll. 14*a*—23*b*.

Similar to the work described under No. 8638 of the D.C.S. MSS., Vol. XVI.

Deals with the following subjects :—

१. कलशस्थापनविधिः.
२. वर्णभेदेन मन्त्राद्यधिकारः.
३. मन्त्रभेदाः.
४. मन्त्रसिद्ध्यादिप्रकारः.
५. जपमालासनादिनियमः.
६. मुद्रादिकथनम्.
७. पौरश्चरणिकक्रमः.
८. नवरात्रविधानम्.
९. जपतर्पणादिप्रकारः.
१०. जपमालाक्षनिर्णयः.

Incomplete.

Beginning :

अथ कलशस्थापनविधिः.

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मी कीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदानवरात्रप्रतिपदि विहितकलश स्थापनदुर्गापूजाकुमारीपूजादि करिष्ये—इति सङ्कल्प्य ।

End :

एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसङ्ख्याजपं कुर्यात् पुरश्चरणसिद्धये ॥
सङ्ख्यापूर्वैर्निजद्रव्यैर्जपसङ्ख्या दशांशतः ।
यथोक्तकुण्डे जुहुयाद्यथाविधि समाहितः ॥
अथवा प्रत्यहं जप्त्वा जुहुयात्तद्दशांशतः ।

* * * *

इत्थं पुरश्चरणतः प्रसन्ना देवता भवेत् ॥

Foll. 23*b*—27*a* contain the Puraścaraṇavidhi, Ṛṣilakṣaṇa, Mantraśabdārtha, Daśāṅgādi, Mantradōṣa, Mantrapallava, Mantracaitanya and Sādhanatrayalakṣaṇa. Fol. 27*b* is left blank.

R. No. **3980.**

Paper. 8½ × 7 inches. Foll. 57. Lines, 23 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. A. V. Jagga Rao Bahadur, Zamindar Shermuhammadpur, Chicacole, Ganjam district.

(*a*) श्रीसूक्तम्.

ŚRĪSŪKTAM.

Foll. 1*a*—3*a*.

Same work as that described under No. 17 of the D.C.S. MSS., Vol. I, Part I.

Complete.

Foll. 3*a*—4*a* give the Sadāśivamālāmantra.

(*b*) मन्युसूक्तम्, पूजाविधानसहितम्.

MANYUSŪKTAM WITH PŪJĀVIDHĀNA.

Foll. 4*a*—19*a*.

Slightly different from the works described under Nos. 228 and 231 of the D.C.S. MSS., Vol. I, Part II.

Complete.

Beginning :

यस्ते मन्युरित्यस्य मन्त्रस्य मन्युस्तापस ऋषिः, जगती छन्दः, इन्द्रो देवता; यस्ते मन्यव इति बीजं, त्वया मन्यो इति शक्तिः, भियं दधाना इति कीलकं, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं ह्रीं यस्ते मन्योऽविधद्वज्रसायक सह ओजः पुष्यति विश्वमानुषक् । साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वत ॥

End:

उदीच्यानारभ्य ओं वज्राय नमः, शक्त्यै नमः, दण्डाय नमः, खड्गाय नमः, पाशाय नमः, अङ्कुशाय नमः, गदायै नमः, त्रिशूलाय नमः, पद्माय नमः, चक्राय नमः । पुनस्तापसमन्युं पञ्चोपचारैस्सम्पूज्य चतुर्दशवारं सूक्तं नित्यं जपेत् ॥

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिरा ॥

अनेन सूक्तेन जपं निवेदयामि ॥

इति नित्यसूक्तजपविधिः ॥

Foll. 19*b*—20*b* contain a portion of Viniyōgadīpikā.

(c) पञ्चशतीनामावलिनुतिः.

PAÑCAŚATĪNĀMĀVALINUTIḤ.

Foll. 21a—23a. Fol. 23b is left blank.

A eulogy on Lalitā or Pārvatī by the repetition of 500 select names of that goddess.

Incomplete.

Beginning :

शिवमानन्दसम्पूर्णं चन्द्रार्धकृतशेखरम् ।
दक्षिणाभिमुखं देवं दक्षिणामूर्तिमाश्रये ॥
कदाचित्कमलानाथं कमलायतलोचनम् ।
पप्रच्छ करुणाराशिं प्रणम्य शिरसा मुहुः ॥
मन्नाथ किं त्वया नित्यं जप्यते दृढभक्तितः ।
तन्मे ब्रूहि मयि प्रीतिर्यद्यस्ति मधुसूदन ॥

* * * *

ललितानामधेयेषु सारमादाय शक्तिभिः ।
रचितेयं पञ्चशती ललिताप्रीतिवृद्धये ॥
तमेव कथयाम्यद्य नामसारोद्भवं प्रिये ।
श्रवणात्सर्वपापघ्नं चेतस्स्वस्तिकरं परम् ॥

End :

प्रादात्तदा दयासिन्धुर्नाम्नां पञ्चशतीमिमाम् ।
तदारभ्याहमनिशं जपन् निश्चलमानसः ॥

* * * *

अश्वमेधसहस्राणां फलमाप्नोति साधकः ।
एतद्रहस्यं परमं चक्रेशप्रीतिदायकम् ॥

Fol. 24 gives the Pīṭhapūjāviṣaya. Foll. 25b and 26a contain the Pañcākṣarīmālāmantra. Fol. 25a gives the name of the Pañcākṣarīmālāmantra.

(d) दत्तात्रेयकल्पः.

DATTĀTRĒYAKALPAḤ.

Foll. 26a—31b. Foll. 25b, 33a and 36—57 are left blank.

Similar to the work described under No. 7868 of the D.C.S. MSS., Vol. XV.

Incomplete.

Beginning :

अहं ब्रह्मास्मि ब्रह्मैवाहमस्मि—

किरातरूपी भगवान् कदाचिद्गिरिजापतिः ।

कदाचिदिष्टालापेषु पार्वत्या दृष्ट ईश्वरः ॥

त्वत्तः श्रुतानि सर्वाणि मन्त्रजालानि कृत्स्नशः ।

* * * *

अपेक्षा वर्तते श्रोतुं दत्तात्रेयस्य योगिनः ।

मन्त्रान् फलप्रदान् शीघ्रं नियमैर्बहुलं विना ॥

शङ्कर उवाच—

शृणु वक्ष्यामि शबरि कबरीभारशोभिते ।

समाहितमना भूत्वा समाकर्णय तान्मनून् ॥

End :

सप्तावरणसंयुक्तं दत्तात्रेयं प्रपूजयेत् ।

सप्तावरणमाद्यं स्यादङ्गैष्षड्भिर्यथाक्रमम् ॥

वह्नीशरक्षोवायव्यमध्ये दिक्ष्वङ्गपूजनम् ।

ऋग्यजुस्सामकाथर्वैरितिहासपुराणकैः ॥ मीमांसया च.

Foll. 32, 33*b*—35*b* contain the Tāntrikāhnika.

R. No. **3981.**

Palm-leaf. 13 × 1 inches. Foll. 16. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam.

सप्ततिरत्नमालिकास्तोत्रम्.

SAPTATIRATNAMĀLIKĀSTŌTRAM.

Same work as that described under No. 10633 of the D.C.S. MSS., Vol. XIX. By Prativādibhayaṅkarācārya alias Aṇṇan of Vatsagōtra and with the colophon given below.

Complete.

Colophon :

इत्याचार्यसप्ततिरत्नमालिका सम्पूर्णा ॥

R. No. **3982.**

Palm-leaf. 14½ × 1 inches. Foll. 19. Lines, 5 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam.

रामस्तोत्रम्.
RĀMASTŌTRAM.

A eulogy addressed to god Śrī-Rāma.

Breaks off in the 73rd stanza.

Beginning:

दशरथनृपपुत्रं जानकीसत्कलत्रं
दशमुखहत(ति)दक्षं पद्मपत्रायताक्षम् ।
करतलधृत(चापं कान्त)मुक्ताकलापं
रविकुल(जवरे)ण्यं राममीडे शरण्यम् ॥

विद्युत्कोटिदिवाकरद्युति . . . .
. . . जनकादिभिः परिवृतं कैलासनाथप्रियम् ।
मुक्तारत्नकिरीटकुण्डलधरं . . . .
. . . . . सन्निबासमनिशं सीतासमेतं भजे ॥

End:

संसारसागरसमुद्धरणैकमन्त्रं ब्रह्मादियोगिमुनिपूजितसिद्धमन्त्रम् ।
दारिद्य . . . . . रोगविनाशमन्त्रं वन्दे महाभयहरं रघुराममन्त्रम् ॥
सेव्यं श्रीराममन्त्रं . . . . सुखकरं श्रेष्ठसुज्ञानमन्त्रम् ।
दिव्यं श्रीराममन्त्रं नरकदुरितनिर्धूतनिर्वाणमन्त्रम् ॥
(दिव्य) श्रीराममन्त्रं भज भज तु संसारसंहारमन्त्रं दिव्यश्रीराममन्त्रं दिवि भुवि लसमो.

R. No. **3983.**

Palm-leaf. 14⅜ × 1⅛ inches. Foll. 30. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam, Trichinopoly district.

जातकपारिजातः.
JĀTAKAPĀRIJĀTAḤ.

Same work as that described under R. No. 1592 ante. By Vaidyanātha.

Contains the Adhyāyas 11—14 (wants the beginning in the 11th Adhyāya and the end in the 14th Adhyāya).

R. No. **3984**.

Palm-leaf. 14 × $\frac{7}{8}$ inches. Foll. 70. Lines, 5 in a page. Grantha and Tamil. Very much injured and many leaves are broken.

Presented in 1921-22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam, Trichinopoly district.

कालविधानपद्धतिः, द्राविडटीकासहिता.
KĀLAVIDHĀNAPADDHATIḤ WITH TAMIL MEANING.

Same work as that described under R. No. 1594(*a*) ante.

Wants the beginning and end; the leaves are in disorder.

R. No. **3985**.

Palm-leaf. 15 × $1\frac{1}{8}$ inches. Foll. 56. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam, Trichinopoly district.

(*a*) प्रातस्स्मरणीयस्तोत्रम्.
PRĀTASSMARAṆĪYASTŌTRAM.

Fol. 1.

Same work as that described under No. 10165 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*b*) सीतारामस्तोत्रम्.
SĪTĀRĀMASTŌTRAM.

Foll. 1*b*—2*b*.

Same work as that described under No. 10418 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*c*) हर्यष्टकम्.
HARYAṢṬAKAM.

Fol. 3.

Same work as that described under R. No. 673(*n*) ante.

Complete.

(*d*) दानप्रकरणम्.

DĀNAPRAKARAṆAM.

Foll. 4*a*—15*b*.

Similar to the work described under R. No. 1422(*b*) ante.

Complete.

Beginning:

श्रुतिः—दानमिति सर्वाणि भूतानि प्रशंसन्ति दानान्नातिदुष्करं तस्माद्दानं परममिति । तथा वाक्यान्तरमपि—

दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्तीति । आदिपुराणेऽपि—

न दानादधिकं किंचिद्दृश्यते भुवनत्रये ।
दानेन प्राप्यते स्वर्गं श्रीर्दानेनैव लभ्यते ॥

End:

कुरुक्षेत्रे गयातीर्थे तथा चामरकण्टके ।
एवमादिषु तीर्थेषु दत्तमक्षयतामिति ॥

Colophon:

दानप्रकरणं समाप्तम् ॥

(*e*) धर्मशास्त्रविषयः.

DHARMAŚĀSTRAVIṢAYAḤ.

Foll. 16*a*—40*b*.

Similar to the work described under No. 2765 of the D.C.S. MSS., Vol. V.

Wants the beginning and the end.

Beginning:

पात्रे त्यागी गुणे रागी भोगी परिजनैस्सह ।
भावे बोद्धा रणे योद्धा प्रभुः पञ्चगुणान्वितः ॥
धर्माय यशसेऽर्थाय भोगाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥
कस्य दोषः कुले नास्ति व्याधिना को न पीडितः ।
व्यसनं केन सम्प्राप्तं कस्य सौख्यं निरन्तरम् ॥

क्रीतान्नम्—

विप्रः कण्ठगतप्राणः क्रीतान्नं यदि भुञ्जते ।
ग्रामे वा नगरे तीर्थे महादेवालयेऽपि वा ॥
स गत्वा नरकं घोरं नानायोनिषु जायते ।

*　　*　　*　　*

तथा च पितृमेधसारप्रश्नव्याख्याने सुधीविलोचने द्वितीयपटले प्रथमपरिच्छेदे गार्ग्यवचनमुदाहृतम्—

कृष्णपक्षे तु पञ्चम्यामष्टम्यां दर्श एव च ।
एकादश्यां तु कर्तव्यं स्वकालाकरणे सति ॥

वत्सरान्तघटाम्बुप्रदानस्य निरवकाशत्वात् न कालान्तरे कर्तव्यम् ।

End:

बन्दने तर्पणे श्राद्धे देवदेवस्य दर्शने ।
प्रदक्षिणे स्नानकाले कव्यामेव तु धारयेत् ॥

प्रातस्स्नानं पापजालं निहन्यात्प्रज्ञादृष्टिं चाङ्गपुष्टिं करोति ।
रूपं तेजो जाठराग्निं प्रकल्प्यं नित्यं स्नानं चायुरारोग्यवृद्धिम् ॥

कलौ—

अट्टशूला जनपदाश्शिवशूलाश्चतुष्पथाः ।
केशशूलास्त्रियस्सर्वा भविष्यन्ति कलौ युगे ॥

(*f*) ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Foll. 41*a*—56*b*.

Similar to the work described under No. 13650 of the D.C.S. MSS., Vol. XXIV.

Wants the beginning and the end.

Beginning:

. . . . दा भवेत् ।
कार्याणि सर्वविघ्नं च क्रोधं राहौ द्वितीयगे ॥
सौभाग्यमतिशूरत्वं सर्वसङ्कटनाशनम् ।
. . . . नरक्षिण्यमिष्टं राहौ तृतीयगे ॥

* * * *

इति नवग्रहगोचारफलं सम्पूर्णम् ॥

End:

पुनर्वस्वहिरेवत्यो हस्तार्यम्णाप्यविश्वभम् ।
त्वाष्ट्रं च मन्दवारेण मृत्युयोगाः प्रकीर्तिताः ॥

R. No. **3986.**

Palm-leaf. $14\frac{1}{8} \times 1$ inches. Foll. 18. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam, Trichinopoly district.

(*a*) नदीस्तोत्रम्.

NADĪSTŌTRAM.

Foll. 1*a*—3*a*.

Same work as that described under No. 9524 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*b*) गङ्गाष्टकम्.

GAṄGĀṢṬAKAM.

Foll. 3*b*—4*b*.

Same work as that described under No. 9370 of the D.C.S. MSS., Vol. XVIII.

Complete.

Colophon:

गङ्गाष्टकं सम्पूर्णम्.

(*c*) मणिकर्णिकास्तोत्रम्.

MAṆIKARṆIKĀSTŌTRAM.

Fol. 5.

Similar to the work described under R. No. 226(*b*) ante.

Complete.

Beginning:

वेदवेदान्तनिलये विश्वेशप्रियवल्लभे ।
विष्णुब्रह्मेन्द्रसंसेव्ये मध्याह्ने मणिकर्णिके ॥
अनन्तवनसंसेव्ये नित्यानन्दस्वरूपेणे(णि) ।
अन्नमोक्षप्रदे देवि मध्याह्ने (मणिकर्णिके) ॥

End :

माणिकर्णिकमिदं स्तोत्रं महापुण्यफलप्रदम् ।
पठ्यते श्रूयते भक्त्या शिवरूपेण भास्व(स)ते ॥

(*d*) अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Fol. 6.

Same work as that described under R. No. 488(*f*) ante.

Complete.

(*e*) मीनाक्षीस्तोत्रम्.
MĪNĀKṢĪSTŌTRAM.

Fol. 7.

A eulogy addressed to the goddess Mīnākṣī in the Śaiva shrine at Madura.

Complete.

Beginning :

गौरीं काञ्चनपद्मिनीतटगृहां श्रीसुन्दरेशप्रियां
नीपारण्यसुवर्णकन्तुकपरिक्रीडाविलोलामिमाम् ।
श्रीमत्पाण्ड्यकुलाचलाग्रविलसद्रत्नप्रदीपायितां
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥

End :

गौरीं चम्पकमल्लिकासुकुसुमैः पुन्नागसौगन्धिका-
द्रोणेन्दीवरकुन्दजातिवकुलैराबद्धचूडीयुताम् ।
मन्दारारुणपद्मकेतकदलश्रेणीलसद्वेणिकां
मीनाक्षीं . . . . बालां भजे ॥

(*f*) त्रिपुरसुन्दरीस्तोत्रम्.
TRIPURASUNDARĪSTŌTRAM.

Foll. 7*b* and 8*a*.

Similar to the work described under No. 10757 of the D.C.S. MSS., Vol. XIX.

Complete.

Beginning :

श्वेतपद्मासनारूढां शुद्धस्फटिकसन्निभाम् ।
बन्दे वाग्देवतां ध्यात्वा देवीं त्रिपुरसुन्दरीम् ॥

End:

काञ्चीवासमनोरम्यां काञ्चीदामविभूषिताम् ।
काञ्चीपुरीश्वरीं वन्दे देवीं त्रिपुरसुन्दरीम् ॥

(*g*) मीनाक्षीस्त्रोत्रम्.
MÎNÂKṢÎSTÔTRAM.

Fol. 18.

Similar to the work described under subdivision (*e*) of this number.

Complete.

Beginning:

या देवी जगतां कर्त्री शङ्करस्यापि शङ्करी ।
नमस्तस्यै सुमीनाक्ष्यै देव्यै मङ्गलमूर्तये ॥

End:

यया देव्या विरहितःशिवोऽपि हि निरर्थकः ।
नमस्तस्यै . . . . . . मङ्गलमूर्तये ॥
चराचरं जगत् सर्वं यस्याः पादसमुद्भवम् ।
नमस्तस्यै . . . . . . मङ्गलमूर्तये ॥

Foll. 8*b* and 9*a* contain the Śivadvādaśanāma and Lakṣmīdvādaśanāma.

(*h*) मातङ्गीस्तोत्रम्.
MĀTAṄGĪSTÔTRAM.

Foll. 9*b*—11*a*.

A eulogy addressed to the goddess Mātaṅgī, a manifestation of Śakti.

Complete.

Beginning:

चेटीभवन्निखिलखेटीकदम्बवनवाटीषु नाकिपटली-
कोटीरचारुतरकोटीमणीकिरणकोटीकरञ्जितपदा ।
पाटीरगन्धिकुचशाटीकवित्वपरिपाटीमगाधिपसुता
घोटीकुलादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥

End :

नीरागदेवकरनीरादिमौलिमणिनीराजिताङ्घ्रिरखिला-
धारा वचस्यमृतधारा वपुष्यसितधाराधरालिसुषुमा ।
पारातिलङ्घनकृपाराजिदुग्धद(भृ)गुमारायितामरजनैः
माराहितप्रियतमा राजतु त्वरितमाराध(द)सौ मम शिवा ॥

(*i*) नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTÔTRAM.

Foll. 11*b* and 12*a*.

Same work as that described under No. 9603 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*j*) मीनाक्ष्यष्टकम्.
MĪNĀKṢYAṢṬAKAM.

Foll. 12*a*—13*a*.

Same work as that described under No. 9620 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*k*) बालास्तवः.
BĀLĀSTAVAḤ.

Fol. 13.

Same work as that described under No. 10796 of the D.C.S. MSS., Vol. XVIII.

Complete, but wants one stanza in the beginning.

(*l*) उमाष्टोत्तरशतनामस्तोत्रम्.
UMĀṢṬÔTTARAŚATANĀMASTÔTRAM.

Fol. 14.

Same work as that described under No. 8851 of the D.C.S. MSS., Vol. XVIII (without Phalaśruti).

Complete.

Fol. 15 contains the Vaidyanāthāṣṭaka. Foll. 15*b* and 16 contain the Aparādhāṣṭaka and Mārkaṇḍēyāṣṭaka. Fol. 17 contains the Dakṣiṇāmūrtyaṣṭaka. Fol. 18*a* contains the Śūlinīstava (wants the beginning and the end). Fol. 18*b* is left blank.

R. No. **3987.**

Palm-leaf. $14\frac{1}{8} \times 1$ inches. Foll. 21. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyar, Srirangam, Trichinopoly district.

(*a*) पुष्पवीराञ्जलिस्तोत्रम्.
PUṢPAVĪRĀÑJALISTŌTRAM.

Fol. 1.

Same work as that described under No. 10779 of the D.C.S. MSS., Vol. XIX.

Incomplete.

(*b*) शिवपञ्चचामरस्तोत्रम्.
ŚIVAPAÑCACĀMARASTŌTRAM.

Fol. 2.

Similar to the work described under No. 11003 of the D.C.S. MSS., Vol. XIX.

Complete.

Beginning:

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुवर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रधारिणे
सदा नमश्शिवाय ते सदाशिवाय शम्भवे ॥

End:

मृकण्डुसूनुरक्षणावधूतदण्डपाणये
सुखण्डमण्डलस्फुरत्प्रभाजितामृतांशवे ।
अखण्डभोगसम्पदर्थलोकभावितात्मने
सदा नमश्शिवाय ते सदाशिवाय शम्भवे ॥
मधुरिपुविधुशक्रमुख्यदेवैरपि नियमार्चितपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं रजतसभापतये नमश्शिवाय ॥

(*c*) शिवभुजङ्गः.
ŚIVABHUJAṄGAḤ.

Foll. 3*a*—5*a*.

Same work as that described under R. No. 61(*o*) ante. By Śaṅkarācārya.

Fol. 5*b* gives the Pārvatīśivapañcacāmarastōtra.

(*d*) नमस्कारदशकस्तोत्रम्.

NAMASKĀRADAŚAKASTŌTRAM.

Foll. 6*a*—7*a*. Fol. 7 contains the Śivaṣaḍakṣarastōtra.

Same work as that described under No. 11028 of the D.C.S. MSS, Vol. XIX.

Complete.

(*e*) लक्ष्मीनृसिंहकरावलम्बनस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBANASTŌTRAM.

Fol. 8. Foll. 9 and 10 contain the Lakṣmīpūjāvidhi.

Same work as that described under R. No. 324(*p*) ante.

Complete.

(*f*) सरस्वतीकल्पः.

SARASVATĪKALPAḤ.

Foll. 11*a*—15*a*. Fol. 15*b* is left blank.

Same work as that described under No. 8562 of the D.C.S. MSS., Vol. XVI, wherein see for the beginning.

Wants the beginning; otherwise complete.

End:

हंसवाहिन्यै नमः, सौभाग्यदेव्यै, नमः, वाग्विलासिन्यै नमः, ब्रह्मप्रियायै नमः, ब्रह्मस्वरूपायै नमः, ब्रह्ममहिष्यै नमः, सर्वाभीष्टफलप्रदायै नमः, श्रीसरस्वत्यै नमः, महादेव्यै नमः, नानापत्रपुष्पाणि पूजयामि.

Colophon:

सरस्वतीकल्पस्समाप्तः ॥

Fol. 16 contains the Kēśavādidvādaśanāmapūjā. Foll. 17*a*—19*b* contain some Vedic passages. Foll. 20*a*—21 contain the Lakṣmīpūjā. Fol. 21*b* is left blank.

R. No. 3988.

Palm-leaf. 13¼ × 1 inches. Foll. 64. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam, Trichinopoly district.

(*a*) चाटुधारा.

CĀṬUDHĀRĀ.

Foll. 1*a*—19*b*.

Similar to the work described under No. 12012 of the D.C.S. MSS., Vol. XX.

Complete.

Beginning:

सुमुखस्सुखुरादित्यस्संभाषेण सरस्वती ।
पादशौचेन पितर आसनेन शतक्रतुः ॥ १ ॥
हरिप्रीतिकरी पूजा ह्यन्नाद्येन प्रजापतिः ।
ताम्बूलं चन्द्रमाः प्रीतिश्शयने सर्वदेवताः ॥ २ ॥

* * * *

स्व(सु)जनं व्यजनं मन्ये महावंशसमुद्भवम् ।
स्वपरिभ्रमणेनैव तापं हरति देहिनाम् ॥ २५ ॥

End:

रे रे भद्र कलेश्वरोऽहमिह किं घोरे वने स्फीयसे
सिंहव्याघ्रमृगादिभिर्मृगगणैः का(खा)द्योऽहमित्था(त्या)शया ।
आत्मानं त्यजसे किमर्थमधुना मद्देहमांसाशनः
प्रत्युत्पन्ननृमांसभक्षणधिया खादन्तु सर्वानपि ॥

(*b*) भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Foll. 20*a*—42*b*.

Same work as that described under No. 12080 of the D.C.S. MSS., Vol. XX.

Contains the Śṛṅgāraśataka complete and Nītiśataka incomplete.

Foll. 43*a*—44*a* contain the Śrīrāmasāmudrikālakṣaṇa. Fol. 44*b* is left blank.

(*c*) मङ्गलश्लोकरामायणम्.

MAṄGALAŚLOKARĀMĀYAṆAM.

Foll. 45*a*—47*b*.

Similar to the work described under R. No. 3576 ante.

Complete.

Beginning :

सर्वलोकशरण्याय साकेतपुरवासिने ।
सत्सेविताय रामाय ससीतायास्तु मङ्गलम् ॥
कौसल्यायां दशरथाज्जाताय परमात्मने ।

End :

प्राप्यायोध्यां च भरतं गङ्गातोयसुगन्धिभिः ॥
अभिषिक्ताय रामाय ससीतायास्तु मङ्गलम् ॥

* * * *

एवं वाल्मीकिना प्रोक्तं रामायणकथामृतम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥
अपुत्राः पुत्रिणस्सन्तु पुत्रिणस्सन्तु पौत्रिणः ।
अधनास्सधनास्सन्तु जीवन्तु शरदां शतम् ॥

Colophon :

श्रीराममङ्गलश्लोकास्सम्पूर्णाः ॥

Name of the scribe—Śrīnivāsācārya.

(*d*) चिरञ्जीविरामायणम्.

CIRAÑJĪVIRĀMĀYAṆAM.

Foll. 48*a*—49*a*. Fol. 49*b* is left blank.
A short treatise narrating the story of the Rāmāyaṇa.
Complete.

Beginning :

पायात् क्षीराब्धिशायी कमलभवनुतः कोसलेन्द्रस्य पुत्रः
रामस्सौमित्रियुक्तः कुशिकसुतगिरा ताटकाप्राणहारी ।
यज्ञं निर्वर्त्य गङ्गासुचरितमुदतिः(दितः) पावयन् तामहल्यां
सीतामुद्वाह्य जित्वा पथि भृगुतनयं प्राप्य(प)हर्षाम(द)योध्याम् ॥

End :

सेतुं बद्ध्वा समुद्रे सकलबलयुतं रावणं कुम्भकर्णं
हत्वा तत्पुत्रवर्गं तदनुजमभिषिच्याति(पि) लङ्काधिनाथम् ।

सीतां लब्ध्वाग्निशुद्धां सकलसुरनुतां पुष्पयानाधिरूढं
सुग्रीवाद्यैरुपेतं रघुपतिमनिशं प्राप्तराज्यं नमामि ॥
सकृदपि यदि रामेत्युच्चरन् यस्तु मर्त्यः
सकलदुरितसङ्घैः संयुतो वापि नूनम् ।
न निवसति स मातुर्गर्भवासी कदाचित्
निवसति हरिलोके नास्ति सन्देहलेशः ॥

Colophon:

चिरञ्जीविरामायणं सम्पूर्णम् ॥

Date of transcription—The 7th day of the solar month Aippaśi in the year Rākṣasa. Name of the scribe—Śrīnivāsācārya.

(e) सप्तर्षिरामायणम्.

SAPTARṢIRĀMĀYAṆAM.

Foll. 50a—51b. Fol. 52b gives the colophon and the name of the scribe of the MS. Fol. 52b is left blank.

Narrates the story of the Rāmāyaṇa in seven stanzas, each stanza being attributed to a sage and representing a Kāṇḍa of the Rāmāyaṇa.

Complete.

Beginning:

काश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैते मुनिपुङ्गवाः ॥

काश्यपः—

जातः श्रीरघुनायको दशरथान्मुन्याज्ञया ताटकां
हत्वा रक्षितकौशिकक्रतुवरं कृत्वा ह्यहल्यां शुभाम् ।
भक्त्वा रुद्रशरासनं जनकजामुद्वाह्य रामस्ततो
जित्वा चाध्वनि भार्गवं पुनरगात् सीतासमेतः पुरम् ॥

अत्रिः—

दास्या मन्थरया दयारहितया दुर्बोधिता केकयी
श्रीरामप्रथमाभिषेकसमये माताप्ययाचद्वरौ ।
भर्तारं भरतः प्रशास्तु धरणीं रामो वनं गच्छता-
मित्याकर्ण्य वचः स्वयं दशरथो मौनीव तूष्णीं स्थितः ॥

End:

श्रीरामस्य कथासुधातिमधुरं(रान्) श्लोकानिमानुत्तमान्
ये शृण्वन्ति पठन्ति च प्रतिदिनं पापौघविध्वंसनं(नान् ।)

श्रीमन्तो बहुपुत्रपौत्रसहितो(ता) भुङ्क्ते च(विन्दन्ति) भोगं स्थिरं
भोगान्ते च सबान्धवैश्च सुचिरं विष्णोर्लभन्ते पदम् ॥

Colophon:

इति सप्तर्षिरामायणं सम्पूर्णम् ॥

Date of the transcription—8th day of the solar month Aippasi in the year Rākṣasa. Name of the scribe—Śrīnivāsarāghavācārya.

(*f*) गायत्त्रीरामायणम्.
GĀYATTRĪRĀMĀYAṆAM.

Foll. 53*a*—56*a*. Fol. 57*a* gives the Māsapravēśanakṣatraphala. Foll. 56*b* and 57*b* are left blank.

Similar to the work described under No. 14559 of the D.C.S. MSS., Vol. XXV.

Complete.

Beginning:

शुक्लाम्बरधरं (. . . . . . .) शान्तये ॥
तपस्स्वाध्यायनिरतं (. . . . . . .) मुनिपुङ्गवम् ॥
स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः ।
ऋषिभिः पूजितस्तत्र यथेन्द्रो विजयी पुरा ॥

End:

इति रामायणं कृत्स्नं गायत्रीबीजसंयुतम् ।
त्रिसन्ध्यं यः पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥

* * * *

Colophon:

इदं गायत्रीरामायणं सम्पूर्णम् ॥

Foll. 58*a*—63*b* contain the Raṅganāthastōtra. Fol. 64*b* is left blank.

R. No. 3989.

Palm-leaf. 16⅝ × 1⅝ inches. **Foll.** 83. **Lines,** 8 in a page. **Grantha.** Much injured.

Presented in 1921–22 by M.R.Ry. Tiruvēṅkaṭattayyaṅgār, Sāmavādhyār, Srirangam, Trichinopoly district.

(*a*) छान्दोग्योपनिषद्.

CHĀNDŌGYŌPANIṢAD.

Foll. 1*a*—33*b*.

Same work as that described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Wants the beginning; otherwise complete, but the leaves are in disorder.

(*b*) सामवेदब्राह्मणम्.

SĀMAVĒDABRĀHMAṆAM.

Same work as that described under No. 58 of the D.C.S. MSS., Vol. I, Part II.

Contains the Ṣaḍviṁśabrāhmaṇa, Sāmavidhānabrāhmaṇa, Vaṁśabrāhmaṇa, Ārṣēyabrāhmaṇa, Dēvatādhyāna and Saṁhitōpaniṣad.

The scribe adds:

भारद्वाजकुलाब्धीन्दोर्वेङ्कटार्यस्य सूनुना ।
वीरराघवकविना[लेखि] सप्तब्राह्मणपुस्तकम् ॥
रक्ताक्षिवत्सरे मासि ज्येष्ठे सौम्यस्य वासरे ।
लिखितं शुक्लपञ्चम्यां श्रीरामः प्रीयतामिति ॥

R. No. **3990.**

Palm-leaf. 15 × 1¼ inches. Foll. 24. Lines, 10 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. N. Gōpālācāriyar, West Citra street, Srirangam, Trichinopoly district.

(*a*) श्रीभाष्याधिकरणसङ्ग्रहः.

ŚRĪBHĀṢYĀDHIKARAṆASAṄGRAHAḤ.

Foll. 1*a*—18*b*.

Slightly different from the work described under No. 4853 of the D.C.S. MSS., Vol. X.

Complete.

Beginning:

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥

श्रियः पतिर्भगवान् परमकारुणिकस्सर्वेषां पुरुषाणामुपादित्सितजिहासितेष्टानिष्टप्राप्तिनिवृत्तितत्साधनानां त्याज्योपादेयप्रमाणवेदनार्थं हर्तुं तमस्स-

दसती च विवेकुमीशो मानं प्रदीपमिव कारुणिको ददातीत्युक्तप्रकारेण वेदाख्यं प्रमाणं प्रदायावतारादिमुखेन तदर्थविषयं चापादयत् ।

* * * *

Colophon:

इति श्रीभाष्याधिकरणसङ्ग्रहे प्रथमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

End:

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् । अत्र भगवतः स्वतन्त्रत्वात् कदाचित् मुक्तस्यापि पुनरावृत्तिस्सम्भवतीत्याशङ्क्य इदं मानवमावर्तं नावर्तन्त इत्यनावृत्तिश्रवणादाश्रितव्यामुग्धस्य भगवतस्तन्निवर्तनसङ्कल्पासम्भवाच्च मुक्तस्य न पुनरावृत्तिरित्युपसंहृतम् ॥

अस्मिन्नध्याये अधिकरणानि द्वात्रिंशत् ॥

Colophon:

इति श्रीभाष्याधिकरणसङ्ग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ॥

(*b*) प्रयोगरत्नमालिका.

PRAYŌGARATNAMĀLIKĀ.

Foll. 19*a*—21*a*. Fol. 21*b* is left blank.

Similar to the work described under No. 3527 of the D.C.S. MSS., Vol. VII.

Breaks off in the fourth Paṭala.

Beginning:

स्वधर्मैर्यं समाराध्य श्रुतिस्मृत्युदितैस्सदा ।
यमेव यान्ति विद्वांसस्तं वन्दे देवकीसुतम् ॥
अभिवाद्य मुनिं का . . . . यते ।
प्रयोगरत्नमालेयं पितृमेधाख्यसूत्रगा ॥
प्राचीनावीतिना कार्यं प्रेतकर्मसु सर्वदा ।
निवीतिनो वहेयु . . . . वाहुकाः ॥

* * * *

Colophon:

इति प्रयोगरत्नमालिकायां प्रथमः पटलः ॥

End:

पाषण्डिनोऽभिशस्तस्य महापातकिनस्तथा ।
गर्भपुत्रपतिघ्नानां . . . . ॥

Colophon:

इति तृतीयः पटलः ॥

आत्महन्ता त्वमेध्येन लिप्ता कष्टव्यपेव हि (?) ।
त्रिपक्षादिषु कालेषु सपिण्डीकरणं यदि ॥

* * * *

आशौचमध्ये विधुसंक्षयश्चेत् दद्युर्दशाहात्तिलवारिपिण्डम् ।
पुत्रीसुतो दत्रिम औरसश्च शेषास्सुतास्तत्र समाप(येयुः) ॥

(*c*) षष्टिपूर्तिशान्तिः.
ṢAṢṬIPŪRTIŚĀNTIḤ.

Foll. 22*a*—24*b*.
Similar to the work described under R. No. 65(*m*) ante.
Complete.

R. No. **3991**.

Palm-leaf. $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 19. Lines, 6 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. Gōpālācāriyar, West Citra street, Srirangam, Trichinopoly district.

वेदान्तविषयः.
VĒDĀNTAVIṢAYAḤ.

On certain matters pertaining to Vēdānta.
Incomplete.

Beginning:

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥

विचित्रा देहसंपत्तिरीश्वराय निवेदितुम् ।
पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता ॥

गर्भजन्मबाल्ययौवनवार्धकमरणनरकरूपाद्यवस्थासप्तकम् ।

एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः ।
जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते ॥
जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकस्स तु विज्ञेयस्स वै मोक्षार्थचिन्तकः ॥

* * * *

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥

पूर्वपक्षः ।

End :

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनम् । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥

* * * *

विष्णुरात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः ॥

R. No. **3992.**

Śrītāla. 5 × 2⅛ inches. Foll. 76. Lines, 16 in a page. Grantha. Very much injured and in disorder.

Presented in 1921–22 by M.R.Ry. N. Gōpālācāriyar, West Citra street, Srirangam, Trichinopoly district.

होराशास्त्रम्.
HŌRĀŚĀSTRAM.

Same work as that described under No. 13832 of the D.C.S. MSS., Vol. XXIV.

Wants the beginning in the 1st Adhyāya and the end in the 21st Adhyāya.

R. No. **3993.**

Palm-leaf. 14⅝ × 1¼ inches. Foll. 110. Lines, 9 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

विष्णुसहस्रनामविवरणम्—भगवद्गुणदर्पणम्.

VIṢṆUSAHASRANĀMAVIVARAṆAM : BHAGAVADGUṆA-DARPAṆAM.

Same work as that described under No. 9073 of the D.C.S. MSS., Vol. XVII. By Śrīraṅganātha alias Parāśarabhaṭṭa, son of Śrīvatsāṅka-miśra of Hārītagōtra.

Complete.

R. No. **3994.**

Palm-leaf. 14⅝ × 1⅝ inches. Foll. 9. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

(*a*) श्रीचूर्णपरिपालनकारिका.

ŚRĪCŪRṆAPARIPĀLANAKĀRIKĀ.

Foll. 1*a*–4*a*.

Deals in verse with certain preliminary ceremonies connected with the funeral rites of Śrī-Vaiṣṇava ascetics.

Complete.

Beginning:

भगवच्छास्त्रसंप्रोक्तं श्रीचूर्णपरिपालनम् ।
प्रवर्तितं यामुनार्यैः यतीनामत्र लिख्यते ॥
यतीनां मरणे प्राप्ते कर्तव्यं शृणु तत्त्वतः ।
वागिन्द्रियेऽप्युपरते ब्रह्मवल्लीं जपेत् पुरा ॥
सुतस्तु भृगुवल्लीं च श्रावयेदर्चिरादि च ।
वाद्यैश्च घोषयेद्विद्वान् ब्राह्मणैस्सह बन्धुभिः ॥

End:

यतिसंस्कारविधिना स्थापयेदवटे यतिम् ।
जप्त्वा होतॄन् सप्त पश्चाद्विप्रैरवभृथं चरेत् ॥

एवं हि ब्रह्मनिष्ठानां यतीनां ब्रह्मवादिनाम् ।
कार्यं चरमकालश्चेत् श्रीचूर्णपरिपालनम् ॥

(*b*) श्रीचूर्णपरिपालनप्रयोगः.
ŚRĪCŪRṆAPARIPĀLANAPRAYŌGAḤ.

Foll. 4*a*—9*a*. Fol. 9*b* is left blank.

Similar to the work described under No. 3830 of the D.C.S. MSS, Vol. VII.

Complete.

Beginning:

भगवच्छास्त्रसंप्रोक्तं श्रीचूर्णपरिपालनम् ।
प्रवर्तितं यामुनार्यैः यतीनामत्र लिख्यते ॥

यती(नां)मरणे प्राप्ते भगवच्छास्त्रोक्तः यामुनाचार्यप्रवर्तितः श्रीचूर्णपरिपालनप्रयोगोऽत्र लिख्यते—यतीनां चरमदशासमये वागिन्द्रिये चोपरते ।

* * * *

श्रीचूर्णकलशाद्यैश्च पुरुषसूक्तेन स्नापयित्वा अहतवस्त्रेण यतिदेहं शोधयित्वा ।

End:

अथ सर्वांश्च स्वामिनः यथाशक्ति तोषयित्वा तैस्सहावभृथं चरेत् ॥

Colophon:

इति ब्रह्मनिष्ठपरमहंसविषयविहितयामुनाचार्यसन्दृष्टश्रीचूर्णपरिपालनप्रयोगः समाप्तः ॥

R. No. **3995.**

Palm-leaf. $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 26. Lines, 7 in a page. Grantha. Fair.

Presented in 1921-22 by M.R.Ry. Saṭhakōpācāriyar, Piḷḷailōkācārya-sannidhi, Srirangam, Trichinopoly district.

दिव्यसूरिचरितम्.
DIVYASŪRICARITAM.

Same work as that described under No. 12150 of the D.C.S. MSS., Vol. XXI, wherein see for the beginning.

Contains the Sargas 12—16 only; but wants the 35th stanza in the 12th Sarga and the end in the 15th Sarga.

End:

स्वामीत्यादि सर्वं पूर्ववत् ॥

Colophon:

इति पञ्चदशस्सर्गः ॥

अस्ति प्रशस्ता(स्तः) कनकाभिधायाः कश्चित्तटीसीम्नि कवेरजायाः ।
श्रीबीरनारायणनामधेयो ग्रामश्श्रुतिग्रामवतां निवासः ॥
श्रीवीरनारायणनामकृष्णो देवो दयापूरितदृष्टिपातः ।
अर्चाकृती(तिः) यत्र करोति वासं तपःफलं चोळव(न)राधिपस्य ॥

* * * *

अथेश्वराख्यो मुनिराविरासीद्यः पृश्निगर्भाङ्गभवस्स तस्मात् ।
अष्टाङ्गयोगानुगतान्तरात्मदृष्टांशिजानिर्द्र.

R. No. 3996.

Palm-leaf. 16¼ × 1⅜ inches. Foll. 53. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācariyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

वैकुण्ठस्तवव्याख्या.
VAIKUṆṬHASTAVAVYĀKHYĀ.

A commentary on the Vaikuṇṭhastava, which work has been described under R. No. 174(*p*) ante.

Complete.

Beginning:

यो नित्यं(. . .)प्रपद्ये । यो भगवान् रामानुजः नित्यमच्युतपदाम्बुज-युग्मरुक्मं स्वर्णं भोग्यमिति यावत् । तत्र व्यामो(ह)तः अभिनिवेशादित्यर्थः । तदितराणि वस्तूनीति शेषः । प्रयोजनान्तराणीति यावत् । तृणाय मेने तृणवदमि(मं)स्त ; मन्यकर्मण्यनादर इत्यादिना चतुर्थी ।

* * * *

त्रैविद्यवृद्धजनेत्यादि । यत् ऋग्यजुस्सामभेदवत्यस्तिस्रो विद्या एव त्रैविद्यम् ।

स्वार्थिकोऽण् प्रत्ययः । तत्र वृद्धा बहुशस्तदर्थपरिशीलनशीला इत्यर्थः । तेषां जनानां मूर्ध्नो भूषणम् । भवतीति शेषः ।

End:

अङ्गोपाङ्गशक्तिरूपमन्यत् सर्वं च विधेहि । अत्र सुदुष्करेण शौचे येन येनेष्टहेतुना तस्याहमेवेति चरमश्लोकसङ्ग्रह इत्यभियुक्तोक्तिरनुसन्धेया ॥

R. No. 3997.

Palm-leaf. 13⅞ × 1¼ inches. Foll. 9. Lines, 6 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Pillalōkācārya-sannidhi, Srirangam, Trichinopoly district.

प्रबोधचन्द्रिका.

PRABŌDHACANDRIKĀ.

Same work as that described under No. 1493 of the D.C.S. MSS., Vol. III.

Complete.

R. No. 3998.

Palm-leaf. 15⅞ × 1⅜ inches. Foll. 43. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Pillailōkācārya-sannidhi, Srirangam, Trichinopoly district.

Foll. 18*b*, 25*b*, 35*b* and 36*b* are left blank. Fol. 36*a* contains a small portion of the 11th Khaṇḍa of the Gṛhyapariśiṣṭa. Fol. 1 gives the Rambhāvivāhavidhi.

गृह्यपरिशिष्टम्.

GṚHYAPARIŚIṢṬAM.

Similar to the work described under R. Nos. 639(*b*) and 743(*d*) ante.

Contains the Khaṇḍas 1—10 complete, but wants the beginning of the first Khaṇḍa.

Beginning:

अथा(तोऽग्निविभागं व्याख्यास्या)मः—गोमयेन गोचर्ममात्रमुपलिप्य तत्र गृह्याग्निं प्रणीय

* * * *

लक्षसङ्ग्रहे—

भार्याद्वयं यस्य संसृष्टवह्नि संसृष्टवह्नौ सवनं च कुर्यात् ।
तथापि सीमन्तमपि प्रसिद्धं वदन्ति वह्नेर्न विभाग इष्टः ॥

Colophon :

प्रथमः खण्डः ॥

End :

देशं जातिं विना गोत्रं होमं यत् कुरुते द्विजः ॥
स होमो निष्फलं याति होमी तु नरकं व्रजेत् ।
नाशिष्याय प्रदातव्यं गौतमस्य मतं त्विदम् ॥
सर्वलोकहितार्थाय . . प्रीतिकरं शुभम् ।
भगवता गौतमेन प्रोक्तं स्वस्तिक(रं) परम् ॥

Colophon :

गृह्यपरिशिष्टे दशमः खण्डः ॥

R. No. **3999.**

Palm-leaf. 16 × 1½ inches. Foll. 39. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Śaṭhakōpācāriyar, Piḷḷalōkācārya-sannidhi, Srirangam, Trichinopoly district.

रुक्मिणीपरिणयः

RUKMIṆĪPARIṆAYAḤ.

Same work as that described under No. 11715 of the D.C.S. MSS., Vol. XX. By Cakrakavi, younger brother of Patañjali and Rāmacandra, who were the sons of Amba and Lōkanātha.

Complete.

Colophon :

रुक्मिणीपरिणयस्समाप्तः.

Name of the scribe—Śrīnivāsayyaṅgār, son of Śrīnivāsayyaṅgār of Anaṅgānūr.

R. No. **4000.**

Palm-leaf. 14½ × 1¼ inches. Foll. 28. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Śaṭhakōpācāriyar, Piḷḷalōkācārya-sannidhi, Srirangam, Trichinopoly district.

नक्षत्रमालिकाव्याख्या.

NAKṢATRAMĀLIKĀVYĀKHYĀ.

Same commentary as that described under R. No. 568 ante. By Vīrarāghava of Vādhūlagōtra.

Complete.

R. No. 4001.

Palm-leaf. 18⅜ × 1½ inches. Foll. 79. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

धर्मशास्त्रविषयः.

DHARMAŚĀSTRAVIṢAYAḤ.

A collection of authoritative passages dealing with the Ācamana, Sandhyāvandana, etc., taken from various sources.

Incomplete.

Beginning :

. . . यतं दक्षिणं कृत्वा गोकर्णाकृतिवत् करम् ।
माषमज्जनमात्रास्तु सङ्गृह्य त्रिः पिबेदपः ॥

देवलः—

अप्स्वाशितासु हृदयं प्राप्तासु ब्राह्मणश्शुचिः ।
राजन्यः कर्णमास्यं वै वैश्यः श्मश्रु . . . . ॥

स्पर्शनाच्चाल्वनेति शेषः । शूद्रग्रहणं स्त्रीणामपि प्रदर्शनार्थम् ।

तथा च याज्ञवल्क्यः—

हृत्कण्ठताल्वगाभिस्तु यथासङ्ख्यं द्विजादयः ॥

* * * *

स्मृतिरत्ने—

महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ।
ब्राह्मणान् केशवं चापि प्रातरुत्थाय कीर्तयेत् ॥

End :

तुरीयपादस्वरूपमुक्तं चन्द्रिकायाम्—तुरीयपदं परो रजसि सावदोमित्यष्टाक्षरम् । तस्य विमल ऋषिः, तुरीयं छन्दः, परमात्मा देवता, मोक्षे विनियोगः । अथ गा(यत्रीमहिमा) । तत्र मनुः—

अकारं चाप्युकारं च मकारं च प्रजापतिः ।
वेदत्रयान्निरवबृहत् भूर्भुवस्सुवरितीति च निरवबृहत् ॥

R. No. **4002.**

Palm-leaf. 13 × 1¼ inches. Foll. 13. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

अष्टादशभेदनिर्णयः.

AṢṬĀDAŚABHĒDANIRṆAYAḤ.

Same work as that described under No. 5195 of the D.C.S. MSS., Vol. XI. By Raṅganāthasūri of Vatsagōtra.

Breaks off in the course of the 18th Bhēda.

R. No. **4003.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 104. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

तत्त्वसारः, रत्नसारिणीसहितः.

TATTVASĀRAḤ WITH RATNASĀRIṆĪ.

Same work as that described under No. 4095 of the D.C.S. MSS., Vol. X. The text is by Varadaguru alias Naḍādūrammāḷ. The commentary is by Vīrarāghavadāsa of Vādhūlagōtra.

Incomplete.

R. No. **4004.**

Palm-leaf. 13¾ × 1 inches. Foll. 90. Lines, 5 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

(*a*) भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Foll. 1*a*—80*a*. Foll. 63, 74*b* and 80*b* are left blank.

Same work as that described under No. 12080 of the D.C.S. MSS., Vol. XX.

Incomplete.

(b) अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 81*a*—88*b*. Fol. 89*a* gives one anthological stanza. Foll. 89*b*—90*b* are left blank.

Same work as that described under No. 12465 of the D.C.S. MSS. Vol. XXI.

Contains a small portion in the fourth Act.

R. No. 4005.

Palm-leaf. $18\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 75. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḷḷailōkācārya-sannidhi, Srirangam, Trichinopoly district.

(a) तत्त्वसारः.

TATTVASĀRAḤ.

Foll. 2*a*—9*a*. Fol. 1 gives the Caramaślōka of Vēṅkaṭādrimuni. Fol. 9*b* is left blank.

Same work as that described under No. 4902 of the D.C.S. MSS., Vol. X.

Complete.

(b) प्रपन्नपारिजातः.

PRAPANNAPĀRIJĀTAḤ.

Foll. 10*a*—26*b*.

Same work as that described under No. 5310 of the D.C.S. MSS. Vol. XI. By Varadadēśika.

Complete.

(c) गीतार्थसङ्ग्रहः.

GĪTĀRTHASAṄGRAHAḤ.

Foll. 26*b*—27*b*.

Same work as that described under No. 4876 of the D.C.S. MSS. Vol. X By Yāmunācārya.

Complete.

(*d*) वेदार्थसङ्ग्रहः.

VĒDĀRTHASAṄGRAHAḤ.

Foll. 28*a*—75*b*.

Same work as that described under No. 5029 of the D.C.S. MSS, Vol. X. By Rāmānujācārya.

Complete.

R. No. **4006**.

Palm-leaf. 19¾ × 1⅜ inches. Foll. 80. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

(*a*) श्रीस्तवः, सव्याख्यः.

ŚRĪSTAVAḤ WITH COMMENTARY.

Foll. 1*a*—4*a*. Fol. 4*b* is left blank.

Same work as that described under R. Nos. 97(*c*) and 173(*p*) (of the Tamil part) ante.

Complete.

Beginning:

श्रीवत्सचिह्नमिश्रेभ्यः (. . .) सूत्रताम् ॥

लक्ष्मीकटाक्षविक्षेपा रक्षणैककृतक्षणाः ।

रक्षन्तूत्कलत(का)रुण्यसन्धुक्षितजगत्रयाः ॥

अथ सर्वैरभिमतस्वरूपरूपगुणविभवां सकलचेतनानां सकलपुरुषार्थप्राप्तौ पुरुषकारभूतां सर्वेश्वरवत् स्वयमपि प्राप्यप्रापकभूतां लक्ष्मीं स्तोतुकामा-श्रीवत्साङ्कमिश्राः सकलजगदुज्जीवनार्थमाशीर्वादमेव प्रबन्धमुखेन निबध्नन्ति :

स्वस्ति श्रीर्दिशतामशेषजगतः (. . .) स्यादैकरस्यात्तया ॥

End:

श्रीरङ्गराजमहिषी सा मामभिवीक्षतां लक्ष्मीः ॥

सुलभत्वान्न व्याख्यायते.

(*b*) अतिमानुषस्तवः, सव्याख्यः.

ATIMĀNUṢASTAVAḤ WITH COMMENTARY.

Foll. 5*a*—29*b*.

A commentary on the Atimānuṣastava, which work has been described under No. 9820 of the D.C.S. MSS., Vol. XVIII.

Complete.

Beginning :

एवं श्रीवैकुण्ठनाथविषयं श्रीवैकुण्ठस्तवं परिसमाप्य व्यूहावतारस्याचित्समानयोगक्षेमतया तमुपेक्ष्यानन्तरं विभवावतारं तुष्टूषन्तः श्रीवत्साङ्कमिश्रा अतिमानुषचरित्रासक्तभगवद्वाल्मीकिपराशरपाराशर्यशुकप्रभृतिभिर्भट्टनाथपराङ्कुशपरकालप्रभृतिभिश्च परमाचार्यैरा(वि)ष्कृतमतिमानुषचरित्रवैचित्र्यमेव मादृशां प्रकाशयितुं प्रथमतो नमस्क्रियारूपमङ्गलं निबध्नाति—

अतिमानुषशीलवृत्तवेषैरतिवृत्तामरविक्रमप्रतापैः ।
अतिलङ्घितसर्वलोकसाम्यं वरये वैष्णववैभवावतारम् ॥

विक्रमः निर्विशङ्कं शत्रुसैन्यप्रवेशः, प्रतापः परैरनभिभवनीयत्वमविषह्यत्वं चामराणां विक्रमप्रतापौ अतिवृत्तावतिक्रान्तौ यैस्तैरतिमानुषैः मानुषानतिक्रान्तैश्च तैः ।

End :

पापीयसोऽपि शरणागतिशब्दभाजो नोपेक्षणं मम तवोचितमीश्वरस्य ।
त्वज्ज्ञानशक्तिकरुणासु सतीषु नेह पापं पराक्रमितुमर्हति मामकीनम् ॥

हे दयैकसिन्धो पापीयसोऽपि अत्यन्तपापिनोऽपि शरणागतिशब्दभाजः त्वदीयचरणौ शरणं प्रपद्य इत्युक्तिमात्रं प्राप्तस्य मम उपेक्षणमुपेक्षा ईश्वरस्य शक्तिमतस्तव

* * * *

त्वज्ज्ञानशक्तिकरुणास्वित्यत्र दयायाः पात्रं दययैवेति प्रकरणानुगुणेन दयायाः प्रधानसाधनत्वं ज्ञानशक्त्योस्तदङ्गत्वमिति सम्प्रदायः ॥

(c) सुन्दरबाहुस्तवः, सव्याख्यः.
SUNDARABĀHUSTAVAḤ WITH COMMENTARY.

Foll. 50a—72b. Foll. 52b, 62b, and 73—80 are left blank.

Same work as that described under No. 10427 of the D.C.S. MSS., Vol. XVIII.

R. No. 4007.

Palm-leaf. 16 × 1¼ inches. Foll. 48. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḷḷailōkācārya-sannidhi, Srirangam, Trichinopoly district.

श्रीगुणरत्नकोशः, सव्याख्यः.

ŚRĪGUṆARATNAKŌŚAḤ WITH COMMENTARY.

Foll. 1*a*—43*b*.

Same work as that described under No. 9763 of the D.C.S. MSS., Vol. XVIII, and with the additional portion in the introduction which is given below.

Complete.

अवतारिका—

श्रीमत्कूरकुलपयःपारावारसुधाकरश्रीमद्रामानुजमुनीन्द्रकृपालब्धश्रीभाष्यादिप्रबन्धपरिचयमहिमोल्लासितबुद्धिः द्रमिडोपनिषद्गभीराशयविवरणचणः श्रीरङ्गराजकमलापदलालितः श्रीरङ्गनाथदिव्याज्ञालब्धपराशरभट्टारकनामधेयः

* * * *

मङ्गलमाचरंस्तामेव स्तौति—प्रतिज्ञा ।

श्रीगुरुपङ्क्तिपादसरसीरुहसंविनुतः श्रीगुणरत्नकोशविवृतिं वसुराश्यभिधाम् ॥

Foll. 6 and 44 are left blank. Foll. 45—48 contain some Dharmaśāstravacanas and Prāyaścittasaṅkalpa.

R. No. 4008.

Palm-leaf. 18 × 1½ inches. Foll. 69. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḷḷailōkācārya-sannidhi, Srirangam, Trichinopoly district.

न्यायपरिशुद्धिः.

NYĀYAPARIŚUDDHIḤ.

Same work as that described under No. 4911 of the D.C.S. MSS., Vol. X.

Breaks off in the Nigrahasthāna.

R. No. 4009.

Palm-leaf. 13⅝ × 1¼ inches. Foll. 83. Lines, 10 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḷḷailōkācārya-sannidhi, Srirangam, Trichinopoly district.

(a) कूरेशविजयः, सव्याख्यः.
KŪRĒŚAVIJAYAḤ WITH COMMENTARY.

Foll. 6a—24b.

Same text as that described under No. 5221 and the commentary is similar to that described under No. 5227 of the D.C.S. MSS., Vol. XI.

Complete.

Beginning :

सिद्धान्तश्लोका द्वात्रिंशत् ।

एवं चोलभूपसभायां कूरेशस्य चानेकमायावादिनां च परस्परं जयेच्छया विवादं कुर्वाणेषु कूरेशोऽपि अनेकवेदशास्त्रपुराणेतिहासोपनिषद्वाक्यैरुपन्यासं कृत्वा तान् मायावादिनो जितवान् । तस्मात् कूरेशविजय इति प्रसिद्धम् । गायत्रीत्यादि । गायन्तं त्रायते यस्मात् गायत्री तेन कथ्यते । न गायत्र्याः परो मन्त्रः, ब्रह्मवर्चसकामस्तु गायत्रीं वेदमातरम् , इत्यादिप्रमाणप्रसिद्धिमत्यां गायत्र्यां, तत्पूर्वा या कृत्या क्रिया सन्ध्यारूपा तस्यां च ।

End:

परमरहस्यमाकूप्याह भगवतस्तावदुभयथापि शक्तेर्नापवर्गो युक्तत्वादेव न पशुपतिः विष्णुरेव प्रकृष्ट इति निश्चयः ॥

Colophon:

इति कूरेशविजयव्याख्या समाप्ता ॥

The scribe adds—

आत्रेयनृसिंहार्यतनयेन रामानुजेन लिखितं कूरेशविजयं सव्याख्यानं समाप्तम् ॥

Foll 1—5 and 25—32 are left blank.

(b) மணவாளமாமுனிகண்ணிநுண்சிறுத்தாம்பு.
MAṆAVĀḶAMĀMUNIKAṆṆINUṆSIṞUTTĀMBU.

Foll. 33a—34b.

R. No. 4010.

Palm-leaf. 16 × 1½ inches. Foll. 221. Lines, 8 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Śaṭhakōpācāriyar, Piḻḻailōkācārya-sannidhi, Srirangam, Trichinopoly district.

सामवेदगानम् (ऊहः).
SĀMAVĒDAGĀNAM (ŪHAḤ).

Foll. 6*a*—215*b*.

Same work as that described under Nos. 47—52 of the D.C.S. MSS., Vol. I, Part II.

Contains the Ūha portion (from दशरात्र to श्रातिकक्ष).

Foll. 1—5 are left blank. Foll. 216*a*, 218 and 219 contain the Sāmalakṣaṇa. Foll. 216*b*, 217, 220 and 221 are left blank.

R. No. 4011.

Palm-leaf. 16¼ × 1⅛ inches. Foll. 107. Lines, 7 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Yajñasvāmidīkṣitar, Kiliyanūr, Trichinopoly district

तर्कभाषाप्रकाशिका—चेन्नुभट्टीया.
TARKABHĀṢĀPRAKĀŚIKĀ : CENNUBHAṬṬĪYĀ.

Same work as that described under No. 4126 of the D.C.S. MSS., Vol. VIII. By Cennubhaṭṭa.

Wants the beginning in the Pramāṇaparicchēda and the end in the Pramēyādiparicchēda.

R. No. 4012.

Palm-leaf. 15 × 1¼ inches. Foll. 47. Lines, 7 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Yajñasvāmidīkṣitar, Kiliyanūr, Trichinopoly district.

(*a*) हंससन्देशः.
HAṀSASANDĒŚAḤ.

Foll. 3*a*—16*a*.

Same work as that described under No. 11904 of the D.C.S. MSS., Vol. XX. By Vēṅkaṭanātha.

Complete.

Foll. 1*a* and 2*a* contain some private accounts and the name of the work. Foll. 1*b*, 2*b*, 16*b* and 17*b* are left blank.

The scribe adds—

ईश्वरवर्षकार्त्तिकद्वितीया(यां), श्रीनिवासताताचार्यपुत्रेण श्रीरङ्गाचार्येण, श्रीमद्वेदान्तदेशिकेन कृतः हंससन्देशो लिखितः ॥

(*b*) विदग्धमुखमण्डनम्.

VIDAGDHAMUKHAMAṆḌANAM.

Foll. 18*a*—3 *a*. Fol. 17*a* gives the name of this work.

Same work as that described under No. 12116 of the D.C.S. MSS., Vol. XX. By Dharmadāsa.

Complete.

(*c*) विदग्धमुखमण्डनदीपिका.

VIDAGDHAMUKHAMAṆḌANADĪPIKĀ.

Foll. 37*a*—47*a*. Foll. 33*b*—36*b* contain the two Paricchēdas of the Vidagdhamukhamaṇḍanaṭīkā. Fol. 47*b* is left blank.

Same work as that described under No. 12117 of the D.C.S. MSS., Vol. XX.

Paricchēdas 1—3 complete and the 4th incomplete.

R. No. **4013.**

Palm-leaf. 14¾ × 1¼ inches. Foll. 22. Lines, 7 in a page. Grantha. Good.

Presented in 1921-22 by M.R.Ry. Śrīraṅgācāriyar, Aḻagiyamaṇavāḻapuram, Trichinopoly district.

स्तोत्ररत्नव्याख्या.

STŌTRARATNAVYĀKHYĀ.

Foll. 1*a*—21*a*. Fol. 22 gives the Ēkādaśīviṣayavacanas. Fol. 21*b* is left blank.

Similar to the work described under R. No. 2155 ante.

Incomplete.

Beginning :

स्वादयन् (. . .) यामुनाय नमो नमः ॥

अत्र च—मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ।
देवताया गुरोश्चैव मन्त्रस्यापि प्रकीर्तनात् ॥
ऐहिकामुष्मिकी सिद्धिः द्विजस्यास्ति न संशयः ।

इति ब्रह्मविद्याश्रवणस्याचार्यवन्दनपूर्वकत्वात्, सर्वाभीष्टसिद्धिकरत्वाच्च । "भग(व)द्वन्दनं स्याद्यं गुरुवन्दनपूर्वक"मिति करिष्यमाणस्तोत्रात्मकभगवद्वन्दनस्य गुरुवन्दनपूर्वकत्वावश्यम्भावात् । आचार्यवान् पुरुषो वेद स चा-(चा)र्यवंश्यो ज्ञेय इति तत्तदभिधानस्य तद्दासत्वाभिधानपुरस्कृतत्वाच्च गुरुवन्दनमावश्यकम् । तत्र चाचार्यप्राचार्यसन्निपाते प्राचार्यं सङ्गृह्याचार्यमुपसञ्जिघृक्षेत् प्रतिषेधेदित्यर्थः । इति प्राचार्यभजनमाचार्यस्यापि प्रीणनमपि कर्तव्यमतो गुरोरपि गुरुं नाथमुनिं प्रणमति—नमोऽचिन्त्येति ।

End:

इदानीं मद्दत्तान् भोगान् भुङ्क्ष्व पश्चान्मोक्षमपि दास्यामीति भगवतोऽभिप्रायमुत्प्रेक्ष्य विलम्बक्षममप्राप्यतया हातुमशक्य . . विवृणोति—तवामृतेति ।

R. No. 4014.

Palm-leaf. $15\frac{1}{8} \times 1$ inches. Foll. 60. Lines, 7 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Śrīraṅgācāriyar, A̱lagiyamaṇavāḻapuram, Trichinopoly district.

(*a*) कृष्णाष्टोत्तरशतनामस्तोत्रम्.
KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 1*a*—2*b*. Fol. 3 gives a portion of Rāmāṣṭaprāsa.

Same work as that described under No. 8891 of the D.C.S. MSS., Vol. XVII.

Complete.

(*b*) श्रीनिवासस्तोत्रम्.
ŚRĪNIVĀSASTŌTRAM.

Foll. 4*a*—5*b*.

A eulogy addressed to god Śrīnivāsa or Viṣṇu.

Complete.

Beginning

अथ विबुधविलासिनीषु त्रिषुङ्मुनिमभितः परिवार्य तस्थुषीषु ।
मदविहतिविकल्पनप्रलापास्ववमतिनिर्मितनैजचापलासु ॥

त्रिभुवनमुदमुद्यतासु कर्तुं मधु सहसा गतिसर्वनिर्वहासु ।
मधुरसभरिताखिलात्मभावाखगणितभीतिषु शापतश्शुकस्य ॥

अतिविमलमतिर्महानुभावो मुनिरपि शान्तमना निजात्मगुप्त्यै ।
अखिलभुवनरक्षकस्य विष्णोः स्तुतिमथ कर्तुमना मनाग्बभूव ॥

श्रियः श्रियं षड्गुणपूरपूर्णं श्रीवत्सचिह्नं पुरुषं पुराणम् ।
श्रीकण्ठपूर्वामरबृन्दवन्द्यं श्रियः पतिं तं शरणं प्रपद्ये ॥

End:

स्रष्टा च नित्यं जगतामधीशस्त्राता च हन्ता विभुरप्रमेयः ।
एकस्त्वमेव त्रिविधा विभिन्नः त्वां सिंहमूर्तिं सततं नतोऽस्मि ॥

(c) रङ्गनाथस्तोत्रम्.
RAṄGANĀTHASTŌTRAM.

Foll. 6*a*—7*b*.
A eulogy addressed to god Raṅganātha.
Complete.

Beginning:

नमो नमस्तेऽस्तु सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनामन् शतसप्ततन्तवे सहस्रकोट्यण्डशताधिवाससे ॥

* * * *

प्रसीद देवेश जगन्निवास प्रसीद लक्ष्मीनिलयादिदेव ।
प्रसीद नारायण रङ्गनाथ प्रसीद विश्वाधिक विश्वमूर्ते ॥

End:

अनन्तानन्तशयन पुराणपुरुषोत्तम ।
रङ्गनाथ जगन्नाथ नाथ तु ' नमो नमः ॥

Fol. 8 contains the Bhagavannāmavaibhava. **Fol. 9 contains the Catuśślōkī.**

(*d*) रामानुजसुप्रभातम्.

RĀMĀNUJASUPRABHĀTAM.

Foll. 10*a*—11*b*.

Same work as that described under Nos. 9701 and 9704 of the D.C.S. MSS., Vol. XVIII.

Complete.

Foll. 12*a*—13*a* contain the Anantadhyānaślōkas. Fol. 13*b* is left blank.

(*e*) लक्ष्मीनारायणाष्टकम्.

LAKṢMĪNĀRĀYAṆĀṢṬAKAM.

Fol. 14.

A eulogy in eight stanzas addressed to Lord Viṣṇu

Complete.

Beginning:

आर्तानां दुःखशमने दीक्षितं प्रभुमव्ययम् ।
अशेषजगदाधारं लक्ष्मीनारायणं भजे ॥

End:

यः पठेत्प्रातरुत्थाय लक्ष्मीनारायणाष्टकम् ।
विमुक्तस्सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Fol. 15 gives the Śrīnivāsaprapatti. Fol. 16*a* contains the Yatirājastava. Foll. 16*b*—17*a* contain the Śrīnivāsastuti. Fol. 17*b* contains the Ghaṇṭānādaviṣayavacanas. Fol. 18 gives the Dvādaśōrdhvapuṇḍramantraślōkas. Fol. 18*b* contains the Ācāryadhyānaślōkas.

(*f*) देवराजाष्टकम्.

DĒVARĀJĀṢṬAKAM.

Fol. 19.

Same work as that described under R. No. 174(*j*) ante.

Complete.

(*g*) जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Foll. 20*a*—21*a*.

Same work as that described under R. No. 174 (*i*) ante.

Fol. 21 gives the Pūrvācāryadhyānaślōkas. Fol. 22 gives the Viṣṇudvādaśapañjarastōtra.

(*h*) वरवरमुनिदिनचर्या.
VARAVARAMUNIDINACARYĀ.

Foll. 23*a*—25*a*.

Same work as that described under R. No. 173(*e*) ante.

Contains the Pūrvadinacaryā only.

Fol. 25*b* gives the Prātassmaraṇīyastōtra.

(*i*) यतिराजविंशतिः.
YATIRĀJAVIṀŚATIḤ.

Foll. 26*a*—28*b*.

Same work as that described under R. No. 173(*f*) ante.

(*j*) वरवरमुनिदिनचर्या.
VARAVARAMUNIDINACARYĀ.

Foll. 28*b*—30*b*.

Same work as that described under R. No. 173(*e*) ante.

Contains the Uttaradinacaryā only.

(*k*) यमकिङ्करसंवादः.
YAMAKIṄKARASAṀVĀDAḤ.

Foll. 31*a*—32*b*.

Herein Yama, the god of death, secretly advises his servants not to do any harm to Śrī-Vaiṣṇavas who are devotees of god Viṣṇu. Extracted from the Viṣṇupurāṇa.

Beginning :

स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥
अहममरगणार्चितेन धात्रा सम इति लोकहिताहिते नियुक्तः ।
हरिगुरुवशगोऽस्मि न स्वतन्त्रः प्रभवति संयमने ममापि विष्णुः ॥

End :

वसति मनसि यस्य सोऽव्ययात्मा पुरुषवरस्य न तस्य दृष्टिपाते ।
तव गतिरथवा ममास्ति चक्रप्रतिहतवीर्यबलस्य सोऽन्यलोक्यः ॥

(*l*) पराङ्कुशपञ्चविंशतिः.

PARĀṄKUŚAPAÑCAVIṀŚATIḤ.

Foll. 33*a*—35*b*.

Same work as that described under R. No. 173(*m*) ante.

Complete.

(*m*) स्तोत्ररत्नम्.

STŌTRARATNAM.

Foll. 36*a*—42*b*.

Same work as that described under R. No. 160(*t*) ante.

Complete.

Fol. 43*a* gives the Prātassmaraṇīyastōtra. Fol. 43*b* gives the Ūrdhvapuṇḍravastradhāraṇaviṣaya. Fol. 44 contains some Bhōja-caritraślōkas. Fol. 45 contains the Vātsyaguruparamparāślōkas.

(*n*) वरदराजस्तवः.

VARADARĀJASTAVAḤ.

Foll. 46*a*—56*b*.

Same work as that described under R. No. 175(*h*) ante. By Śrī-vatsāṅkamiśra.

Complete.

Foll. 57*a*—60*b* contain the Utkṛṣṭajanmaprabhāva.

Date of transcription—26th day of the solar month Kārttika in the year Sādhāraṇa. Name of the scribe—Aḻaśiṅgan, son of Aḻaśiṅga-varadācārya of Māmaṇḍūr.

R. No. **4015**.

Palm-leaf. 14 × 1⅝ inches. Foll. 43. Lines, 10 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsācāriyar, Mōhanūr, Salem district.

जातकपारिजातः.

JĀTAKAPĀRIJĀTAḤ.

Same work as that described under R. No. 1592 ante. By Vaidya-nātha, son of Vēṅkaṭādri.

Contains the Adhyāyas 11—15 only (Dvādaśabhāvaphala).

R. No. **4016.**

Palm-leaf. 15⅛ × 1⅓ inches. Foll. 56. Lines, 6 in a page. **Grantha** Very badly injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsācāriyar, Mōhanūr, Salem district.

कृष्णाभ्युदयः.

KṚṢṆĀBHYUDAYAḤ.

A poem describing the story of Lord Kṛṣṇa : by Śrīnivāsarāghavasūri, who lived in Srirangam and who was the son of Vēṅkaṭācārya of Kauśikagōtra and of Eḷayavilli (Bāladhanvi) family.

Contains the Sargas 1 to 4.

As the MS. is in a very bad condition, it is not possible to give extracts.

Contains the following Sargas :—

१. कौमारलीलानाम प्रथमस्सर्गः.	३. कैशोरलीलानाम तृतीयस्सर्गः.
२. पौगण्डलीलानाम द्वितीयस्सर्गः.	४. यौवनलीलानाम चतुर्थस्सर्गः.

वर्षे पिङ्गलनामके शरदतौ मासे तुलाख्ये सिते
पक्षे सौम्यदिने . . . . . . तिथ्यां चतुर्थ्यामिदम् ।
श्रीवासोत्तरराघवाख्यविदुषा काव्यं कृतं . . . . .
. . . . विदुषामनेन भगवान् मां पातु कृष्णस्सदा ॥

R. No. **4017.**

Palm-leaf. 19⅛ × 1⅓ inches. Foll. 43. Lines, 8 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇa Ghanapāṭhigaḷ, Sirukamūr, Trichinopoly district.

(*a*) योहिप्राप्तिः, सभाष्या.

YŌHIPRĀPTIḤ WITH COMMENTARY.

Foll. 1*a*—3*b*.

Same work as that described under No. 947 of the D.C.S. MSS., Vol. II.

Incomplete.

(*b*) शमानव्याख्यानम्.

ŚAMĀNAVYĀKHYĀNAM.

Foll. 4*a*—13*b*.

Similar to the work described under No. 977 of the D.C.S. MSS., Vol. II.

Wants the beginning and the end.

Beginning:

चन्द्रपूर्वश्च—चन्द्रपूर्वो दक्षिणाशब्दो विसृजते प्रेत चन्द्रदक्षिणा यज्ञस्य । चन्द्रेति किम्? धेनुर्दक्षिणा ये प्रत्यश्चः ।

End:

वल्शा इत्यादि । वल्शा इत्यादिषु विसर्जनीयो विद्यते । सहस्र-वल्शा वि वयम् । मा संविवत्था मा त्वा । विप्रा विप्रस्य बृहतः । विश्ववेदा भि(दि)प्सर(न्त) इत् । बृहद्दया विश्वजित् । सुवीरा ज्योग्जीवेम । सर्वे व्राता वरुणस्याभूवन्.

Fol. 14 contains the last portion and the colophon of the Vilaṅghya-bhāṣya.

(c) नपरव्याख्यानम्.

NAPARAVYĀKHYĀNAM.

Foll. 14*a*—17*b*.

Similar to the work described under No. 918 of the D.C.S. MSS., Vol. II.

Complete.

Beginning:

चछजेषु तवर्गा ये थकारेण विवर्जिते ।
चतुष्टये मकारे च लकारे च परे स्थिते ॥
विकारी नः पदान्तो यस्तकारे नपरश्च यः ।
दृश्यते येषु तौ ज्ञातुं प्रवक्ष्यामि पदान्यहम् ॥

अस्यार्थः—चकारछकारजकारेषु थकारविवर्जिततकारदकारधकारनकार-चतुष्टये मकारे लकारे च । एषु परतो वर्तमानेषु संहितासमये विकार-वान् नकारस्तकारश्च पदान्ते येषु पदेषु दृश्यते तानि पदानि प्रवक्ष्या-मीति समुदायार्थः ।

End:

स एनं तृप्त आयुषा एतानि पदानि नकारान्तानि न भवन्ति ॥

Colophon:

इति नपरव्याख्यानं समाप्तम् ॥

Foll. 17*b* and 18 contain the Taparavyākhyānam.

(*d*) शमानम्, सव्याख्यानम्.

ŚAMĀNAM WITH COMMENTARY.

Foll. 19*a*—29*b*.

Similar to the work described under No. 983 of the D.C.S. MSS., Vol. II.

Incomplete.

Beginning:

आविरस्तु परं ज्योतिः पद्मपत्रनिभेक्षणम् ।
अपृथक्सिद्धलक्ष्मीकं हयवक्त्रं ममाग्रतः ॥

अथ संहितायामाकारप्लुतपूर्वो घोषवद्व्यञ्जनोत्तरशसकारपरो विसर्जनीयो येषु पदेषु लुप्यते, तानि पदानि प्रवक्ष्यामि । अथेत्ययमधिकारः । संहितायां विषये आकारश्च प्लुतपूर्वश्च घोषवद्वर्णपरो व्यञ्जनोत्तरशाकारसकारपरश्च विसर्जनीयो येषु पदेष्वग्निया इत्यादिषु पदकाले दृष्टस्संहितायां लुप्यते तानि पदानि प्रवक्ष्यामि अकारादिवर्णक्रमेण वक्ष्यामीत्यर्थः ।

End:

हर्ते हस्ते तु नेङ्ग्यान्तं हरते ह्वयते हुते । यजमानोऽपहत इन्द्रो वृत्रम् । हस्त अधाय.

Foll. 30 and 31 contain a portion of the Tribhāṣyaratna.

(*e*) सप्तलक्षणम्, सव्याख्यानम्.

SAPTALAKṢAṆAM WITH COMMENTARY.

Foll. 32*a*—37*b*.

Same work as that described under No. 1002 of the D.C.S. MSS., Vol. II.

Incomplete.

(*f*) योहिप्राप्तिः, सभाष्या.

YŌHIPRĀPTIḤ WITH COMMENTARY.

Foll. 38*a*—43*a*. Fol. 43*b* is left blank.

Same work as that described under No. 947 of the D.C.S. MSS., Vol. II.

Incomplete.

R. No. **4018**.

Paper. $16\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 85. Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇamācāriyar, Tirumaṇmēḍu, Trichinopoly district.

याज्ञवल्क्यस्मृतिः, ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Same work as that described under No. 2682 of the D.C.S. MSS., Vol. V.

Wants the beginning and the end in the Vyavahārakāṇḍa.

R. No. **4019.**

Palm-leaf. 12 × 1½ inches. Foll. 24. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇamācāriyar, Tirumaṇmēḍu, Trichinopoly district.

फुल्लारण्यमाहात्म्यम्.

PHULLĀRAṆYAMĀHĀTMYAM.

Same work as that described under R. No. 3122 ante.

Contains the Adhyāyas 67—76 only; as found in the Agnipurāṇa.

R. No. **4020.**

Palm-leaf. 15¾ × 1½ inches. Foll. 105. Lines, 5 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇamācāriyar, Tirumaṇmēḍu, Trichinopoly district.

Fol. 56*b* is left blank.

धर्मशास्त्रविषयः.

DHARMAŚĀSTRAVIṢAYAḤ.

Extracts taken from various Smṛtis and Nibandhana-granthas in connexion with the performances of the funeral ceremonies of those who follow the Kṛṣṇa-Yajurvēda.

Wants the beginning and the end.

Beginning:

मुमूर्षोर्ब्रह्मविदो दक्षिणे कर्णे "ब्रह्मविदाप्नोति परम्" "भृगुर्वै वारुणिः" इत्येतदनुवाकद्वयम् इतरस्मिन् कर्णे "आयुषः प्राणं सन्तनु" इत्यनुवाकं सन्निहितः पुत्रादिः कश्चिज्जपेदित्यर्थः ॥

End:

तथा च स्मृत्यर्थसारे—

स्त्रीमृताहे स्त्रियो भोज्याः पितरस्त्रीसपिण्डने ।

पित्रादेरेव होमः स्यात् पिण्डदान . . . . ॥

R. No. **4021.**

Palm-leaf. 16 × $1\frac{1}{8}$ inches. Foll. 119 Lines, 6 in a page. Grantha and Tamil. Good.

Presented in 1921–22 by M.R.Ry. Paṭṭu Ayyaṅgār, Vakil, East Citra street, Srirangam, Trichinopoly district.

विश्वगुणादर्शव्याख्यानम् (द्राविडम्).

VIŚVAGUṆĀDARŚAVYĀKHYĀNAM (TAMIL).

Foll. 1*a*—117*b*. Fol. 118*a* contains one horoscope of Paṅkajammāḷ's son. Fol. 18*b*, 118*b* and 119 are left blank.

Contains annotation in Tamil (word by word) of the Viśvaguṇādarśa, which work has been described under R. No. 1067 ante.

Contains up to the Ghūrjaradēśavarṇana.

R. No. **4022.**

Palm-leaf. 16 × $1\frac{1}{8}$ inches. Foll. 100. Lines, 5 in a page. Grantha and Tamil. Fair.

Presented in 1921–22 by M.R.Ry. Paṭṭu Ayyaṅgār, Vakil, East Citra street, Srirangam, Trichinopoly district.

विश्वगुणादर्शव्याख्यानम् (द्राविडम्).

VIŚVAGUṆĀDARŚAVYĀKHYĀNAM (TAMIL).

Same work as the abeve.

Contains from the Ēkāmrēśvaravarṇana to the end of the Cōladēśavarṇana.

Date of transcription—31st day of the solar month Āvaṇi in the year Svabhānu.

R. No. **4023.**

Palm-leaf. $16\frac{5}{8}$ × $1\frac{1}{4}$ inches. Foll. 102. Lines, 5 in a page. Grantha and Tamil. Fair.

Presented in 1921–22 by M.R.Ry. Paṭṭu Ayyaṅgār, Vakil, East Citra street, Srirangam, Trichinopoly district.

विश्वगुणादर्शव्याख्यानम् (द्राविडम्).
VIŚVAGUṆĀDARŚAVYĀKHYĀNAM (TAMIL).

Same work as that described above.

Fol. 1 is left blank.

Contains from the Rāmānujācāryavarṇana to the beginning of the Kāmāsikānagaravarṇana.

R. No. 4024.

Palm-leaf. 16⅝ × 1½ inches. Foll. 110. Lines, 5 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921-22 by M.R.Ry. Paṭṭu Ayyaṅgār, Vakil, East Citra street, Srirangam, Trichinopoly district.

विश्वगुणादर्शव्याख्यानम् (द्राविडम्).
VIŚVAGUṆĀDARŚAVYĀKHYĀNAM (TAMIL).

Foll. 2*a*—102*a*.

Same work as that described above.

Contains from the beginning of the Kāmāsikānagaravarṇana to the and of the Kāvērīnadīvarṇana.

Fol. 103*a* contains the horoscope of Śrīraṅganāyakiyammāḷ. Foll. 106—110 give the meaning of Sanskrit words in the Tamil language.

Date of transcription—7th day of the solar month Tai in the year Tāraṇa.

R. No. 4025.

Palm-leaf. 16⅝ × 1¼ inches. Foll. 101. Lines, 5 in a page. Grantha and Tamil. Fair.

Presented in 1921-22 by M.R.Ry. Paṭṭu Ayyaṅgār, Vakil, East Citra street, Srirangam, Trichinopoly district.

Fol. 101 is left blank.

विश्वगुणादर्शव्याख्यानम् (द्राविडम्).
VIŚVAGUṆĀDARŚAVYĀKHYĀNAM (TAMIL).

Same work as that described above.

Contains from the beginning of the Yamunānadīvarṇana to the end of the Vīkṣāraṇyavarṇana.

R. No. **4026.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 105. Lines, 5 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. Paṭṭu Ayyaṅgār, Vakil, East Citra street, Srirangam, Trichinopoly district.

Foll. 1 and 103*b*—105*b* are left blank.

विश्वगुणादर्शव्याख्यानम् (द्राविडम्).
VIŚVAGUṆĀDARŚAVYĀKHYĀNAM (TAMIL).

Same work as the above.

Contains from the beginning of the Campakāraṇyavarṇana up to the end of the work.

Date of transcription—Thursday, the 4th day of the solar month Āḍi, in the year Tāraṇa.

R. No. **4027.**

Palm-leaf. 10 × 1 inches. Foll. 40. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Rāmanātha Śāstrigaḷ alias Rājā Śāstrigaḷ, Kṛṣṇarājapuram, Trichinopoly district.

रुक्मिणीकल्याणव्याख्या—योजना.
RUKMIṆĪKALYĀṆAVYĀKHYĀ: YŌJANĀ.

A commentary called Yōjanā on the Rukmiṇīpariṇaya of Rājacūḍāmaṇidīkṣita, which work has been described under No. 11713 of the D.C.S. MSS., Vol. XX: by Bālayajñēśvara.

Breaks off in the 95th stanza of the first Sarga.

Beginning:

तटातकाया विजयेन लब्धमदस्तृतीयं किल वामभागे ।
पयोधरं यः प्रकटीकरोति तनोतु मे मङ्गलमेष देवः ॥
श्रीराजचूडामणियायजूकवाक्छुक्तिकोदित्वरमौक्तिकानि[1] ।
[2]श्रीबालयज्ञेश्वरनामधेयो ग्रथ्नात्ययं योजनया गुणेन ॥

अत्र तावदखण्डानन्दसान्द्रश्रीवासुदेवात्मकपरमपुरुषविचित्रवर्णनानन्दसागरविहारकौतुकी श्रीमान् राजचूडामणिदीक्षितो नाम कविः प्रारिप्सित-

---

[1] प्रसिद्धकाव्योक्तिमणिप्रकाण्डान्—इति पाठान्तरम्.

[2] श्रीयज्ञसोमेश्वरनामधेयः—इति पाठान्तरम्.

प्रबन्धप्रत्यूहप्रत्याख्यानाय स्वेष्टदेवतात्मकमर्धनारीश्वरमधिकृत्याशीर्वादरूपं म-ङ्गलमाचरन् आत्मविद्यागुरुमग्रजमर्धनारीश्वरमपि व्यञ्जयति — वामेति । यस्य प्रस्तूयमानस्य स्त्रीपुरुषात्मकदेहवतो महादेवस्य मध्ये वलग्ने, मध्यमं च वलग्नं च मध्योऽस्त्रीत्यमरः । रोमावली रोमराजिः ।

End :

तथा चोक्तम्—अन्यत्र चोराणामाजानुपादमामणिबन्धं बाहुच्छेदना-दिति भावः । इति शङ्के मन्य इत्यर्थः । अहमिति शेषः ॥ ९४ ॥ प्रसूनेति । यत्र उद्याने रसालसालः आम्रतरुः । प्रसूनलावी जनानाम्.

R. No. **4028.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 28. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Raṅganātha Śāstrigaḷ alias Rājā Śāstrigaḷ, Kṛṣṇarājapuram, Trichinopoly district.

(*a*) महिम्नस्स्तोत्रम्.

MAHIMNASSTŌTRAM.

Foll. 1*a*—8*b*.

Same work as that described under No. 9576 of the D.C.S. MSS., Vol. XVIII.

Contains 60 stanzas only.

Fol. 9*b* contains some Vyavahāraviṣayavacanas. Fol. 10 contains some Maṅgalāśāsanaślōkas. Fol. 11 contains the Gaṇēśastōtra.

(*b*) अम्बास्तोत्रम्.

AMBĀSTŌTRAM.

Foll. 12*a*—14*b*.

Same work as that described under No. 9571 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*c*) चर्चास्तोत्रम्.

CARCĀSTŌTRAM.

Foll 15*a*—16*b*.

Same work as that described under No. 9588 of the D.C.S. MSS., Vol. XVIII.

Incomplete.

(*d*) मातृकापुष्पमालिकास्तोत्रम्.

MĀTṚKĀPUṢPAMĀLIKĀSTŌTRAM.

Foll. 17*a*—21*b*.

Same work as that described under No. 9616 of the D.C.S. MSS., Vol. XVIII.

Wants the beginning and end.

(*e*) शिवस्तुतिः.

ŚIVASTUTIḤ.

Foll. 22*a*—26*a*. Foll. 26*b*—28*b* are left blank.

A eulogy addressed to god Śiva

Contains 31 stanzas.

Beginning:

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्दुनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम् ॥
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालङ्कृतं
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥

End:

तया सङ्क्षिप्योक्तां तव दहरविद्यां विदधती विशेषैरन्यैरप्युपनिषद्गुमाकान्त महतीम् ।
अनुध्यानार्थं ते हृदि मुररिपोरान्तरतया प्रसज्यैनं मध्ये प्रबलयति मोहं हतधियाम् ॥

R. No. **4029**.

Palm-leaf. 15 × 1 inches. Foll. 32. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇayyaṅgār, Pudukkuḍi, Trichinopoly district.

(*a*) सीताविजयः.

SĪTĀVIJAYAḤ.

Foll. 1*a*—6*b*.

Same work as that described under R. No. 994 ante.

Complete; as found in the Vāsiṣṭhōttararāmāyaṇa.

(*b*) कामाक्षीपञ्चशती.

KĀMĀKṢĪPAÑCAŚATĪ.

Foll. 7*a*—13*a*. Fol. 13*b* is left blank.

Same work as that described under No. 9576 of the D.C.S. MSS., Vol. XVIII.

Contains the Kaṭākṣaśataka incomplete.

(c) उत्तरचम्पूः.

UTTARACAMPŪḤ.

Foll. 14*a*—32*b*.

Same work as that described under No. 12222 of the D.C.S. MSS., Vol. XXI. By Vēṅkaṭakṛṣṇakavi, son of Vēṅkaṭādri and Maṅgā.

Fragmentary and in disorder and wants also the beginning and end.

Beginning:

दूषणत्रिशिरोभ्यां च स्थापिता दण्डका वनस्थाने जनस्थाने ।
पुरोपकण्ठोपवनान्तरे पुनर्निविश्य कालीवस(तिं निकुम्भिलाम्) ।
समेघनादं सुरसम्मतात्सवादवाप्तमायाशतमाक्षिपत्सुतम् ॥

* * * *

कुत्रचिद्धराधरप्रान्ते वेशन्तदेशे विरचितजटाभरं विधृतहरिणाजिनमाजिन-पत्रोपममधोमुखलम्बनं कमपि तपस्वि(नं कौस)ल्यो विलोक्य को भवानिति क्रमादपृच्छत् ।

तदानीं किल—

शम्बूको नाम शूद्रोऽहं सशरीरस्सुरालयम् ।
इच्छामीत्यस्य वदतश्चिच्छेद(दासिधरः शिरः) ॥

End:

राघवस्तदनु लवणासुरवधेन लिप्सते यशः क इति रचितानुयोगो-नियुङ्क्ष्व मामिहेति निपुणं . . . . लब्धश्रेयसोपघ्नं शत्रुघ्नं मुदितस्तदैवं मधु(रा)राज्येऽभिषिच्य शूरमेनं जहि शूलगृहात् प्रागिति सम्यगुपदिश्य शत्रुघ्नम्.

R. No. 4030.

Palm-leaf. 13½ × 1⅜ inches. Foll. 38. Lines, 9 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇayyaṅgār, Pudukkuḍi, Trichinopoly district.

(a) शरभोजिराजप्रशंसा.

ŚARABHŌJIRĀJAPRAŚAṀSĀ.

Foll. 4*a*—7*a*. Foll. 1*a*—3*b* contain the Śrautakarmavidhivacanas.

Eulogistic stanzas addressed to Śarabhōji, king of Tanjore.

Wants the beginning and the end.

Beginning:

निर्णिद्रासीः कथ त्वं जलनिधितनये किं ब्रुवे राज्ञि दत्ता
पित्राहं भोसलेन्द्रे सखि बहुवनितावल्लभे स क्षमाभृत् ।
भारत्या सर्वकालं विहरति परया शम्भुभक्त्या धरित्र्या
सेवालाभप्रतीक्षा शरभनरपतेर्नैव निद्रामलब्धा ॥

End:

जृम्भत्तुङ्गार्वधाटीखुरपुटदलितक्ष्मातलोद्धूतधूली
पालीसम्पातनिर्यज्जललवकलुषीभूतसुत्रामनेत्रः ।
देव त्वज्जैत्रयात्रापटुपटहघनध्वानसम्भ्रान्तकाष्ठा-
दन्तीन्द्रस्सैनिकानामहमहमिकया सम्भ्रमः प्रादुरासीत् ॥

Foll. 7*b*—12*a* contain the Anyāpadēśaślōkas.

(*b*) गङ्गास्तवः.

GAṄGĀSTAVAḤ.

Foll. 12*b*—14*b*.

Similar to the work described under No. 9368 of the D.C.S. MSS., Vol. XVIII.

Beginning:

भागीरथि त्वमसि शङ्करमौलिभूषामुक्तामणिर्जगदघौघनिषद्वरस्य ।
रिक्तीकरः कतकरेणुरथापि मातः सन्मार्गलङ्घनकृते जनितत्वरासीः ॥

End:

कर्णाटीस्तनमण्डलीपरिगतश्रीतारहारावलि-
प्रेङ्खद्रत्नमयूखचुम्बिसलिलक्रीडाविहङ्गावलिः ।
चोलीपीननितम्बमज्जनदशासाटोपवेगाहति-
व्यानम्राधिकवेतसाग्रचटुलस्पन्दा वहत्यापगा ॥

Foll. 15*b*—18*b* contain the Jambūnadīvarṇana. Foll 19*a*—24*b* contain some anthological stanzas. Foll. 25*a*—38*a* contain a portion of Rāghavayādavapāṇḍavīya with commentary. Fol. 38*b* is left blank.

R. No. **4031.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 15. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kṛṣṇayyaṅgār, Pudukkuḍ, Trichinopoly district.

अभिनववृत्तरत्नाकरः.

ABHINAVAVṚTTARATNĀKARAḤ.

Similar to the work described under No. 1782 of the D.C.S. MSS., Vol. III.

Deals with the following subjects :—

१. उपोद्घातः.
२. छन्दोविभागः.
३. समजातिनिरूपणम्.
४. अर्धसममात्राजातिनिरूपणम्.
५. विषमजातिनिरूपणम्.
६. गाथानिरूपणम्.

Contains the Taraṅgas one to five complete and two stanzas only in the sixth Taraṅga; but wants the first leaf.

Beginning:

स पूर्वाङ्गे ततः पूजास्सा देव्याश्शेषशोषिणः ।
स्वस्वशेषानुसारेण शेषे लाघवगौरवे ॥
तथा साङ्गा निरागाश्च स्वरा अक्षरसंज्ञिताः ।
मात्राछन्दस्सु तु लघुः . . . कमक्षरम् ॥
ईदृशाक्षरसङ्ख्यावच्छेदकश्छन्द उच्यते ।
स स्वरो द्विविधो ज्ञेयो गुरुर्लघुरिति क्रमात् ॥

* * * *

Colophon:

इत्यभिनववृत्तरत्नाकरे उपोद्घातो नाम प्रथमस्तरङ्गः ॥

End:

रगणश्चैकस्तामिह जातिं बुधजनविनुतः पन्नगनायकः ॥ इति मात्राविषमच्छन्दांसि विषमजातयः कतिचित्कथिताः । अन्या बहुशः प्रस्तारेभ्योऽवगन्तव्याः ॥

Colophon:

इत्यभिनववृत्तरत्नाकरे विषमजातिनिरूपणं नाम पञ्चमस्तरङ्गः ॥

अथ गाथा निरूप्यन्ते मात्रा न्दस्सु काश्चन ।
त्रयोदशाधिकशतद्वयात्मानोऽपि सङ्ग्रहात् ॥
यतमद्यतमच्छन्दस्ततमद्द्विगुणावधि ।
पादा भवन्ति मात्रासु गाथानां चतुरुज्झिताः ॥

R. No. **4032.**

Palm-leaf. 15 × 1⅛ inches. Foll. 18. Lines, 8 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Vaidyanātha Ayyar, Karuppattūr, Trichinopoly district.

रसतरङ्गिणी.

RASATARAṄGIṆĪ.

Same work as that described under R. No. 820(*b*) ante.

Wants the beginning in the 7th Taraṅga and the end in the 8th Taraṅga.

R. No. **4033.**

Palm-leaf. 13⅕ × 1¼ inches. Foll. 35. Lines, 7 in a page. Telugu. Much injured.

Presented in 1921-22 by M.R.Ry. Vaidyanātha Ayyar, Karuppattūr, Trichinopoly district.

हरिभक्तिसुधोदयः.

HARIBHAKTISUDHŌDAYAḤ.

Same work as that described under R. No. 1429(*f*) ante.

Breaks off in the 11th Adhyāya.

R. No. **4034.**

Palm-leaf. 14⅗ × ⅘ inches. Foll. 15. Lines, 5 in a page. Grantha. Injured.

Presented in 1921-22 by M.R.Ry. Vaidyanātha Ayyar, Karuppattūr, Trichinopoly district.

ताललक्षणम्.

TĀLALAKṢAṆAM.

Similar to the work described under No. 12991 of the D.C.S. MSS., Vol. XXII.

Wants the beginning and end.

Beginning:

विनि—

. . . . चक्रे प्रोक्तस्सम्पुटहस्तकः ।
वस्त्वाच्छादे सम्पुटस्य सम्पुटे विनियुज्यते ॥

पाशहस्तः—

सूच्या निकुञ्चिते श्लिष्टे तर्जन्यौ पाशहस्तकः ।

विनि—

अन्योन्यकुञ्चिते श्लिष्टे मृगशीर्षे तु कीलकः ।
स्नेहे नाम्यनुलापे च कीलके विनियुज्यते ॥

End:

तकारात्ताण्डवं प्रोक्तं लकाराल्लास्यमित्यतः ।
शिवशक्त्यात्मकः . . . . ॥
(शक्तिताल): करे वामे शिवतालस्तु दक्षिणे ।
ग्रहीतव्यो भवेत्तस्य भेदाश्चत्वार ईरिताः ॥
तालं दृष्ट्वा प्रणम्यास . . . . ।

R. No. **4035.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 27. Lines, 9 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Vaidyanātha Ayyar, Karuppattūr, Trichinopoly district.

(*a*) वृत्तरत्नाकरव्याख्या—मतिमञ्जरी.

VṚTTARATNĀKARAVYĀKHYĀ: MATIMAÑJARĪ.

Same work as that described under No. 1792 of the D.C.S. MSS., Vol. III. By Nārāyaṇabhaṭṭa, son of Nṛsiṁhayajvan.

Breaks off in the second Adhyāya.

(*b*) मुक्तावलीव्याख्यानम्—दिनकरीयम्.

MUKTĀVALĪVYĀKHYĀNAM: DINAKARĪYAM.

Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and the end in the Pratyakṣakhaṇḍa.

R. No. **4036.**

Palm-leaf. $18\frac{1}{8} \times 1\frac{1}{8}$ inches. Lines, 6 in a page. Nandināgarī. Slightly injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar, Cintalavāḍi, Trichinopoly district.

कार्त्तिकमाहात्म्यम्.

KĀRTTIKAMĀHĀTMYAM.

Same work as that described under R. No. 1450(*a*) ante, wherein see for the beginning.

Contains the Adhyāyas 1—31 complete.

Colophon:

इति श्रीपाञ्चरात्रागमे भारद्वाजसंहितायां कार्त्तिकमाहात्म्ये त्रिंशोऽध्यायः॥

End:

श्रीसूतः—

इति तस्य वचः श्रुत्वा ब्रह्मा विस्मितमानसः ।
संपूज्य हंसं भक्त्यैव विससर्ज तदा प्रियम् ॥

* * * *

आत्मनो वा परस्यापि यदिष्टं तत् समाचरेत् ॥
इत्थं . . दत्तान्यपि पुण्यपापान्यायान्ति जन्मान्तरसंचितानि ।
शृणुष्व तस्मादितिहासमद्भुतं पुत्रादिदं श्रोतृगतिप्रदं च ॥

Colophon:

इति श्रीपाञ्चरात्रागमे भारद्वाजसंहितायां कार्त्तिकमाहात्म्ये एकात्रिंशोऽध्यायः ॥

R. No. **4037.**

Palm-leaf. 14¾ × 1½ inches. Foll. 95. Lines, 7 in a page. Nandināgarī. Much injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar, Cintalavāḍi, Trichinopoly district.

(*a*) ब्रह्मसूत्रानुव्याख्यानम्.

BRAHMASŪTRĀNUVYĀKHYĀNAM.

Foll. 1*a*—88*b*. Foll. 4*b*, 16*b* and 19*b* are left blank.

Same work as that described under No. 4819 of the D.C.S. MSS., Vol. X. By Ānandatīrtha.

Complete.

(*b*) अनुव्याख्यानन्यायविवरणम्.

ANUVYĀKHYĀNANYĀYAVIVARAṆAM.

Foll. 89*a*—95*b*.

Same work as that described under No. 4822 of the D.C.S. MSS., Vol. X. By Ānandatīrtha.

R. No. **4038.**

Palm-leaf. 16⅝ × 1¼ inches. Foll. 13. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar of Cintalavāḍi, Trichinopoly district.

भैमीपरिणयम्.

BHAIMĪPARIṆAYAM.

Same work as that described under No. 12574 of the D.C.S. MSS., Vol. XXI. By Cakravarti Śaṭhakōpācāriyar.

Breaks off in the third Act.

R. No. **4039.**

Palm-leaf. 14¾ × 1 inches. Foll. 38. Lines, 6 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar, Cintalavāḍi, Trichinopoly district

(*a*) मनीषापञ्चकम्.

MANĪṢĀPAÑCAKAM.

Fol. 1.

Same work as that described under No. 4705 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Complete.

(*b*) मनीषापञ्चकम्, मधुमञ्जरीसहितम्.

MANĪṢĀPAÑCAKAM WITH MADHUMAÑJARĪ.

Foll. 2*a*—11*a*. Foll. 11*b* contains a few stanzas on the greatness of Brahmavidyā.

Same work as that described under No. 4706 of the D.C.S. MSS., Vol. IX.

Complete.

(*c*) स्वात्मप्रकाशिका.

SVĀTMAPRAKĀŚIKĀ.

Foll. 12*a*—15*b*.

Similar to the work described under No. 4774 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Complete.

Beginning:

अप्रतर्क्यस्य बुद्धस्य अव्ययस्य परात्मनः ।
गोपालकृष्णदेवस्य पदाब्जं प्रणतोऽस्म्यहम् ॥
यस्य प्रसादमात्रेण मायातीतो भवेन्नरः ।
तस्याङ्घ्रिपद्मं वन्देऽहं तापसानां वरं परम् ॥

स्वात्मप्रकाशिकाग्रन्थः स्वाचार्येण कृतः पुरा ।
अज्ञानावृतलोकस्य ज्ञानार्क इव भासते ॥
जगत्कारणमज्ञानमेकमेव चिदन्वितम् ।
एकमेव मनस्साक्षी जानात्येव जगत्रयम् ॥
विवेकयुक्तबुद्ध्याहं जानाम्यात्मानमद्वयम् ।
तथापि बन्धमोक्षादिव्यवहारः प्रतीयते ॥
विवर्तोऽपि प्रपञ्चो मे सत्यवद्भाति सर्वदा ।
इति संशयपाशेन बद्धोऽहं छिन्धि संशयम् ॥
इति शिष्यवचः श्रुत्वा गुरुराहोत्तरं स्फुटम् ।
नाज्ञानं न च बुद्धिश्च न जगन्न च साक्षिता ॥
बन्धमोक्षादयस्सर्वे कृतास्सत्याद्वये त्वयि ।

End:

योषित्क्रीडासुखं सान्तं गर्वाढ्यं यौवनं किल ।
आत्मानन्दे परे पूर्णे मयि नास्ति हि यौवनम् ॥
मूढबुद्धिपरिव्याप्तं स्तन्यपानरतं सदा ।
बाल्यं रोदनशीलं तन्न मे सुखमहाम्बुधेः ॥
इत्येवं त्व विचार्याथ विचारे यत्नवानिव ।
साधु तिष्ठन् कृतैर्यत्नैर्लिप्यसे शुद्धरूपतः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्करभगवत्पादविरचितं स्वात्मप्रकाशिकाप्रकरणं सम्पूर्णम् ॥

(*d*) बोधार्या.
BŌDHĀRYĀ.

Foll. 16*a*—24*b*.

Same work as that described under No. 4645 of the D.C.S. MSS., Vol. IX; with slight difference in the beginning. By Śaṅkarācārya.

This work is also called Svātmanirūpaṇa or Svātmānandaprakāśikā.

Complete.

The stanza in the end as given in the extract is apparently unconnected with the work.

Beginning:

श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुस्सहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्तिं पांसुमयं यस्य भसितमातनुते ॥
देशिकवरं दयालुं वन्देऽहं निहतसकलसन्देहम् ।
यच्चरणद्वयमद्वयमनुभवमुपदिशति तत्त्वमस्यर्थे ॥

End:

अज्ञानान्धनवि(सुषि)हितं विरचितविज्ञानपङ्कजोल्लासः ।
मानसगगनतलं भो भासयते श्रीनिवासगुरुभानुः ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्करभगवत्पादकृता स्वात्मानन्दप्रकाशिका आर्या समाप्ता ॥

(*e*) दृग्दृश्यविवेकः.

DṚGDṚŚYAVIVĒKAḤ.

Foll. 25*a*—27*a*. Fol. 24*b* contains a few Advaitaviṣayakaślōkas.

Same work as that described under No. 4605 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya. (At the end of the work some Ślōkas of the Ātmānandaprakāśikā are written.)

Complete.

(*f*) अपरोक्षानुभूतिः.

APARŌKṢĀNUBHŪTIḤ.

Foll. 27*a*—33*b*.

Same work as that described under No. 4550 of the D.C.S. MSS., Vol. IX; with some additional stanzas at the end.

Complete.

Foll. 34*a*—36*a* contain a few stanzas on palmistry with commentary. Foll. 36*b*—38*b* are left blank.

R. No. **4040.**

Palm-leaf. 17 × 1⅝ inches. Foll. 13. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar, Cintalavāḍi, Trichinopoly district.

तत्त्वसङ्ख्यानटीकाविवरणम्.
TATTVASAṄKHYĀNAṬĪKĀVIVARAṆAM.

A commentary on Jayatīrtha's Tattvasaṅkhyānaṭīkā, which work has been described under No. 4749 of the D.C.S. MSS., Vol. X.

Incomplete.

Beginning:

प्रणम्य श्रीमदाचार्यहृत्पद्मस्थं रमापतिम् ।
करिष्ये तत्त्वसङ्ख्यानव्याख्याटीकां यथामति ॥

श्रीमज्जयतीर्थमुनिः अविगीतशिष्टाचारपरम्पराप्राप्तं प्रारिप्सितग्रन्थपरिसमाप्त्यादिप्रयोजनमिष्टदेवताचरणारविन्दयुगप्रणतिरूपमङ्गलं शिष्यशिक्षायै ग्रन्थादौ निवेशयन् चिकीर्षितं प्रतिजानीते— लक्ष्मीपतेरिति । विद्यारम्भसमये सकलविद्याभिमानिन्या रमया युतस्य हरेश्चरणारविन्दयुगलप्रणतिभूता भवतीत्यतो रमापतित्वेन हरेः कीर्तनं कृतत् । विद्यारम्भसमये देवतावन्दनवद्गुरुवन्दनस्यापि कर्तव्यत्वादाह— गुरोरपीति । सकलतत्त्वोपदेष्टुः पूर्णबोधस्यापीत्यर्थः ।

End:

अत्यन्ताभावः स्वदेशसंसृष्टघटविरोधी न तु देशान्तरसंसृष्टघटविरोधीति नोक्तदोष इति चेत्तर्हि सिद्धमेव तद्देशस्थघटात्यन्ताभावस्य स्वविरुद्धैतद्देशसंसृष्टघटप्रतियोगिकत्वम् । तथा चैतद्देशसंयुक्त . . . . घटः प्रमितस्तर्हि तस्य त्रैकालिकनिषेधरूपात्यन्ताभावो न युक्त एवेत्यप्रमित एवैतद्देशसंयुक्तो घटस्तत्प्रतियोगीत्यवश्यमभ्युपेयमिति सिद्धमप्रामाणिकस्यैवात्यन्ताभावप्रतियोगित्वम्.

R. No. **4041**.

Palm-leaf. 14 × 1¼ inches. Foll. 40. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar, Cintalavāḍi, Trichinopoly district.

रामायणमाहात्म्यम्.
RĀMĀYAṆAMĀHĀTMYAM.

Brings out the greatness of Rāmāyaṇa and briefly narrates the story of the Rāmāyaṇa.

Complete ; as found in the Umāsaṁhitā.

Beginning :

भवसंचितपापौघविध्वंसनविचक्षण(म्) ।
विघ्नान्धकारभास्वन्तं विघ्नराजं नमाम्यहम् ॥
पुरा कैलासशिखरे पार्वत्या सह शङ्करः ।
विचकार महायोगी स्वरूपमनुचिन्तयन् ॥

* * * *

रघुनाथावतारेषु तत्र तत्र मया स्फुटम् ।
मदंशजत्वं मर्त्यानामाविष्कृतमनेकशः ॥

Colophon :

इति श्रीमदुमासंहितायां श्रीरामायणकथाफलप्रस्तावो नाम प्रथमोऽध्यायः ॥

End :

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥

* * * *

वाचि ब्रह्मा महेशस्तु हृदये निवसाम्यहम् ।
तस्याक्षिणी रविश्चन्द्रो रोमकूपेषु देवताः ॥

Colophon :

इति श्रीमदुमासंहितायां श्रीमद्रामायणमाहात्म्ये युद्धकाण्डो नाम द्वादशोऽध्यायः ॥

The scribe adds—

ऋक्छाखाध्यायिना नागेश्वरेण लिखितेयमुमासंहिता ॥

R. No. **4042.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 53. Lines, 6 in a page. Telugu and Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Raṅgācāriyar, Cintalavāḍi, Trichinopoly district.

Fol. 1*a* gives the name of the owner of this work. Fol. 1*b* contains three stanzas on Sapiṇḍīkaraṇa.

(*a*) ईशावास्योपनिषद्भाष्यम्.
ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 2*a*—5*b*.

Same work as that described under No. 317 of the D.C.S. MSS., Vol. I, Part III. By Ānandatīrtha.

Complete.

(*b*) प्रश्नोपनिषद्भाष्यम्.
PRAŚNŌPANIṢADBHĀṢYAM.

Foll. 6*a*—9*b*.

Same work as that described under No. 622 of the D.C.S. MSS., Vol. I, Part III. By Ānandatīrtha.

Complete.

(*c*) मायावादखण्डनव्याख्या.
MĀYĀVĀDAKHAṆḌANAVYĀKHYĀ.

Foll. 10*a*—19*b*.

Same work as that described under No. 4836 of the D.C.S. MSS., Vol. X. By Jayatīrtha.

Complete.

(*d*) उपाधिखण्डनटीका.
UPĀDHIKHAṆḌANAṬĪKĀ.

Foll. 20*a*—23*a*.

Same work as that described under No. 4782 of the D.C.S. MSS., Vol. X. By Jayatīrtha.

Incomplete.

Fol. 24*a* contains a small portion of the Mithyātvānumānakhaṇḍana. Foll. 24*b* and 25 are left blank.

(*e*) तत्त्वसङ्ख्यानम्.
TATTVASAṄKHYĀNAM.

Fol. 26.

Same work as that described under No. 4788 of the D.C.S. MSS., Vol. X. By Ānandatīrtha.

Complete.

(*f*) तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

Foll. 26*b*—27*a*.

Same work as that described under No. 4785 of the D.C.S. MSS., Vol. X. By Ānandatīrtha.

Complete.

(*g*) मायावादखण्डनम्.

MĀYĀVADAKHAṆḌANAM.

Foll. 27*a*—29*a*.

Same work as that described under No. 4835 of the D.C.S. MSS., Vol. X. By Ānandatīrtha.

Complete.

(*h*) उपाधिखण्डनम्.

UPĀDHIKHAṆḌANAM.

Foll. 29*a*—30*b*.

Same work as that described under No. 4781 of the D.C.S. MSS., Vol. X. By Ānandatīrtha. This work is also called Tattvaprakāśikā.

Fol. 31 gives the Madhvācāryaguruparampará. Fol. 32 is left blank.

(*i*) प्रपञ्चमिथ्यात्वानुमानखण्डनव्याख्या—पञ्जिका.

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAVYĀKHYĀ: PAÑJIKĀ.

Foll. 33*a*—47*b*.

Same work as that described under No. 4800 of the D.C.S. MSS., Vol. X. By Jayatīrtha.

Complete.

(*j*) ईशावास्योपनिषद्.

ĪŚĀVĀSYŌPANIṢAD.

Foll. 48*a*—49*a*.

Same work as that described under No. 300 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*k*) प्रश्नोपनिषद्.

PRAŚNŌPANIṢAD.

Foll. 49*a*—51*b*.

Same work as that described under No. 610 of the D.C.S. MSS., Vol. I, Part III.

Contains the Praśnas 1 and 2 only.

Foll. 52 and 53 are left blank.

R. No. **4043.**

Palm-leaf. 15 × 1½ inches. Foll. 28. Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigal, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

ब्रह्मसूत्रभाष्यव्याख्या—भामती.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀMATĪ.

Same work as that described under No. 4672 of the D.C.S. MSS., Vol. IX. By Vācaspatimiśra.

Breaks off in the Śāstrayōnitvādhikaraṇa.

R. No. **4044.**

Palm-leaf. 15⅓ × 1½ inches. Foll. 145. Lines, 10 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigal, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Same work as that described under No. 4659 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Contains the Pādas 1 to 3 in the II Adhyāya.

R. No. **4045.**

Palm-leaf. 15⅓ × 1⅜ inches. Foll. 111. Lines, 7 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigal, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀṢYARATNA-PRABHĀ.

Same work as that described under No. 4679 of the D.C.S. MSS., Vol. IX. By Gōvindānanda.

Contains from the beginning of the third Adhyāya to the end of the fourth Adhyāya.

R. No. 4046.

Palm-leaf. 15¾ × 1½ inches. Foll. 237. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigaḷ, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

Foll. 74*b*, 123*b* and 237 are left blank.

ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀṢYARATNA-PRABHĀ.

Same work as that described under No. 4679 of the D.C.S. MSS., Vol. IX. By Gōvindānanda.

Contains the fourth Pāda only in the second Adhyāya.

R. No. 4047.

Śrītāla. 19½ × 2¼ inches. Foll. 97. Lines, 18 in a page. Grantha. Slightly injured; but almost all the leaves are broken in the middle.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigaḷ, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

विष्णुपुराणम्, आत्मप्रकाशव्याख्यासहितम्.

VIṢṆUPURĀṆAM WITH THE COMMENTARY ĀTMA-PRAKĀŚA.

Same work as that described under No. 2286 of the D.C.S. MSS., Vol. IV, Part I. By Śrīdharasvāmin.

Wants the beginning in the first and second Aṁśas; otherwise complete.

Foll. 42, 43, 44*b*, 46*b* and 94—97 are left blank.

R. No. 4048.

Palm-leaf. 15¾ × 1⅜ inches. Foll. 220. Lines, 7 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigaḷ, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

तन्त्रशिखामणिः.

TANTRAŚIKHĀMAṆIḤ.

Same work as that described under Nos. 4417 and 4418 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita, son of Vēṅkaṭa-śrīnivāsadīkṣita.

Wants the beginning and end in the tenth Adhyāya.

R. No. 4049.

Śrītāla. 5½ × 2 inches. Foll. 102. Lines, 14 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsa Śāstrigaḷ, Head clerk, Office of the Inspectress of Schools, Trichinopoly district.

(*a*) विष्णुसहस्रनामस्तोत्रम्.
VIṢṆUSAHASRANĀMASTŌTRAM.

Foll. 1*a*—11*a*. Foll. 11*b* and 12 contain the Phalaśruti of Śiva-sahasranāma and Viṣṇusahasranāma.

Same work as that described under No. 9008 of the D.C.S. MSS., Vol. XVII.

Complete.

(*b*) वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्.
VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 13*a*—15*b*.

Same work as that described under No. 9084 of the D.C.S. MSS., Vol. XVII.

Complete.

(*c*) गोपालाष्टोत्तरशतनामस्तोत्रम्.
GŌPĀLĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 16*a*—17*b*.

Same work as that described under R. No. 1447(*o*) ante, with different colophon given below :—

Colophon :

गोपालाष्टोत्तरशतं सम्पूर्णम्.

(*d*) नवग्रहपूजाजपादिः.
NAVAGRAHAPŪJĀJAPĀDIḤ.

Foll. 18*a*—20*b*.

Slightly different from the work described under No. 3644 of the D.C.S. MSS., Vol. VII.

Complete.

(h) शतरुद्रीयस्तुतिः.
ŚATARUDRĪYASTUTIḤ.

Fol. 39.

A eulogy by Brahman addressed to Śiva; as found in the Śivapurāṇa.

Complete.

Beginning:

ब्रह्मोवाच—
नमस्ते त्रिगुणातीत नमस्ते करुणाकर ।
नमस्ते पार्वतीनाथ नमस्तेऽव्यय शाश्वत ॥
नमस्ते सर्वलोकेश नमस्ते भवमोचन ।
नमस्ते दक्षिणामूर्ते नमस्ते त्रिगुणाकर ॥

End:

संवत्सराय मासाय कालरूपाय ते नमः ।
निराख्याताय वीराय गूढरूपाय ते नमः ॥

Colophon:

इति श्रीशैवमहापुराणे एकादशरुद्रसंहितायामुपरिभागे मरकताद्रिमाहात्म्ये द्विसप्ततितमाध्याये ब्रह्मकृतशतरुद्रीयस्तुतिः सम्पूर्णा ॥

Foll. 40 and 41 contain the Viṣṇustōtra and Namaśśivāyāṣṭaka. Fol. 42 contains the Śaktimantra.

(i) अरुणाचलेशस्तोत्रम्.
ARUṆĀCALĒŚASTŌTRAM.

Foll. 43a—44b.

Same work as that described under No. 10922 of the D.C.S. MSS., Vol. XIX.

Complete.

(j) वेदसारशिवसहस्रनामस्तोत्रम्.
VĒDASĀRAŚIVASAHASRANĀMASTŌTRAM.

Foll. 45a—59b.

Same work as that described under R. No. 142(c) ante.

Complete

Date of transcription—Fifth day of the lunar month Mārgaśira in the year Vijaya. Name of the scribe—Bālayajñavēdīśvara

(*k*) देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Foll. 59*b*—63*a*.

Same work as that described under No. 9114 of the D.C.S. MSS., Vol. XVII; without the Pūrvapīṭhikā and Uttarapīṭhikā.

(*l*) देवीपञ्चदशाक्षरीस्तोत्रम्.

DĒVĪPAÑCADAŚĀKṢARĪSTŌTRAM.

Foll. 63*a*—64*b*.

Same work as that described under No. 10769 of the D.C.S. MSS., Vol. XIX.

Complete.

Fol. 65 gives the Viṣṇustuti by Indradyumna. Foll. 66*a*—67*a* contain the Brahmastuti. Fol. 67*b* is left blank.

(*m*) देवीसहस्रनामस्तोत्रम्.

DĒVĪSAHASRANĀMASTŌTRAM.

Foll. 68*a*—76*a*.

Similar to the work described under No. 9140 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning:

लब्धां च पुत्रीं शर्वाणीं तपस्तप्त्वा सुदुश्चरम् ।
सभार्यश्शरणं यातः पार्वतीं पर्वतेश्वरः ॥
तां दृष्ट्वा जायमानां च स्वेच्छयैव वराननाम् ।
मेना हिमवतः पत्नी प्राहेदं पर्वतेश्वरम् ॥

* * * *

आत्मन्याधाय चात्मानमोङ्कारं समनुस्मरन् ।
नाम्नामपि सहस्रेण तुष्टाव परमेश्वरीम् ॥

हिमवानुवाच—

शिवा माया परा शक्तिरनन्ता निष्कलामला ।
शान्ता माहेश्वरी नित्या शाश्वती परमाक्षरा ॥

End:

जपेदहरहर्नित्यं संवत्सरमतन्द्रितः ।
लभेत महतीं लक्ष्मीं महादेव्याः प्रसादतः ॥

तस्मात् सर्वप्रयत्नेन जप्तव्यं हि द्विजातिभिः ।
सर्वपापप्रणाशार्थं देव्या नामसहस्रकम् ॥

Colophon:

इति श्रीकूर्मपुराणे देवीसहस्रनामस्तुतिर्नाम द्वादशोऽध्यायः ।

Foll. 76*a*—78*a* contain the Śivastōtra. Fol. 78*b* is left blank. Fol. 79 contains the Sūryahṛdaya as found in the Kūrmapurāṇa.

(*n*) विघ्नेश्वराष्टोत्तरशतनामस्तोत्रम्.

VIGHNĒŚVARĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 80*a*—81*a*.

Similar to the work described under No. 8789 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning:

विघ्नेशाष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य शिव ऋषिः, अनुष्टुप् छन्दः, विघ्नराजो देवता । विघ्नराजप्रसादसिद्ध्यर्थे जपे विनियोगः । गामित्यादिषडङ्गन्यासः.

* * * *

विघ्नेशो विश्ववदनो विश्वचक्षुर्जगत्पतिः ।
हिरण्यरूपस्सर्वात्मा ज्ञानरूपो जगन्मयः ॥
ऊर्ध्वरेता महाबाहुरमेयोऽमितविक्रमः ।

End:

नैवेद्यं कल्पयेदिष्टं गणेशाय शुभावहम् ।
अन्नैश्च परमान्नाद्यैर्भक्ष्यभोज्यैर्मनोहरैः ॥
तोषणीयः प्रयत्नेन वक्रतुण्डो महाबलः ।
प्रदक्षिणनमस्कारदिव्यनामस्तवादिभिः ॥
कर्तव्या नियतं शुद्धैर्मौनव्रतपरायणैः ।

Colophon:

इति श्रीविघ्नेश्वराष्टोत्तरशतं सम्पूर्णम् ॥

Fol. 81 gives the Gaṇēśanāmāvali.

(*o*) विघ्नेश्वरकवचः.

VIGHNĒŚVARAKAVACAḤ.

Foll. 82*a*—84*a*.

Same work as that described under No. 7216 of the D.C.S. MSS., Vol. XIV.

Complete.

(p) गणपतिमन्त्राक्षरावलिस्तोत्रम्.

GAṆAPATIMANTRĀKṢARĀVALISTŌTRAM.

Foll. 84*a*—86*a*.

Same work as that described under No. 9402 of the D.C.S. MSS., Vol. XVIII; but additional stanzas are given in the beginning and the end of the work as given below.

Complete.

Beginning:

गण्डस्थलप्रविलसन्मदवारिधारागन्धभ्रमद्भ्रमरविभ्रमलोलकर्णम् ।
गन्धर्वयक्षसुरकिन्नरगीयमानं गङ्गाधरस्य तनयं शरणं व्रजामि ॥

End:

सकलविघ्ननिवर्तक शङ्करप्रियसुत प्रणतार्तिहर प्रभो ।
मम हृदम्बुजमध्यलसन्मणीखचितमण्डपवासरतो भव ॥

Colophon:

इति श्रीपार्वतीपरमेश्वरसंवादे मन्त्राक्षरावलीस्तोत्रं सम्पूर्णम् ॥

Foll. 86*a*—88*a* contain the Vighnēśvarastōtra. Fol. 88*b* is left blank.

(q) गणेशशतकम्.

GAṆĒŚAŚATAKAM.

Foll. 89*a*—102*a*. Fol. 102*b* is left blank.

A eulogy in 100 stanzas addressed to Gaṇēśa. The work is divided into 10 Paddhatis, the names of which are given in the last stanza at the end. By Yajñavēdēśvara, who lived in Kumbakonam and who was the son of Bālacandrārya of Ratnakhēṭa Śrīnivāsadīkṣita family and of Viśvāmitragōtra. The author refers to a prior work of the same name by Dhurasvāmin.

Complete.

Beginning:

कल्याणं कलयन्तु मे गणपतेः पादारविन्दोद्गताः
पुण्याः पांसुकणास्सुरेन्द्रमकुटीकोटीरकोटीतटे ।
काश्मीरन्ति कठोरपापपटलीकान्तारसंशोषणे
दावीयन्ति च येऽन्तरायशिखरिव्राते पवीयन्ति च ॥

* * * *

Colophon:

इति मङ्गलाशंसनपद्धतिः ॥

End:

प्रातः पद्यशतं पठेद्यदि पुमान् जातस्पृहः प्रत्यहं
ख्यातः पुत्रकलत्रमित्रविभवोपेतश्चिरं मोदते ।
चेतस्येष यदीहते पदमदो यातश्च नातः परे-
ह्वीतस्सिद्धगणैर्गणाधिपपदं नीतस्सुखं विन्दते ॥
शम्भावाहितचेतसो मुनिमणेः कुम्भादुदीताकृतेः
कुम्भादुद्गतया कवेरसुतया सम्भावितश्रेयसि ।
कुम्भाधीर(श)पुरे वसन् मधुरवाग्गुम्भातिमान्यस्सुधी-
जम्भारातिरचीकरच्छतमिदं श्रीयज्ञवेदेश्वरः ॥
श्रीमत्कुम्भपुरे सता गणपतेर्धाम स्वयं ध्यायता
प्रेम ख्यापयता कृतं सुकविना धीमद्गुरुस्वामिना ।
क्षेमस्थेमकरं गणेशशतकं नाम प्रसिद्धिं भज-
त्वामन्वन्तरमार्णवं च तदिदं कामप्रदं देहिनाम् ॥
आदौ मङ्गलशंसनं विनयवाग्गुम्भो मनोनिग्रहो
निर्वेदो विरतिः स्वरूपगुणचारित्रे नतिः प्रार्थना ।
चेतस्तुष्टिफलाभिधानकविनामानीतिभिन्नक्रमं रम्यं
पद्यशतं दशाधिकमिदं भूयाद्बुधानां मुदे ॥

Colophon:

इति श्रीविश्वामित्रकुलकलशपारावारराकासुधाकरश्रीमद्गलखेटश्रीनिवासमखिवरसन्तानपल्लवेन श्रीबालचन्द्रार्यतनूजेन यज्ञवेदेश्वरेण कृतं गणेशाष्टोत्तरशतं सम्पूर्णम् ॥

R. No. **4050.**

Palm-leaf. $17\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 53. Lines, 7 in a page. Telugu. Injured.

Presented in 1921–22 by M.R.Ry. T. Pārthasārathi Ayyangār, Srirangam, Trichinopoly district.

भागवतम्, सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Same work as that described under No. 2199 of the D.C.S. MSS, Vol. IV, Part I. The commentary by Srīdharasvāmin is called Bhāvārthadīpikā.

Contains the ninth Skandha incomplete.

R. No. 4051.

Palm-leaf. 17⅜ × 1 inches. Foll. 38. Lines, 5 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. T. Pārthasārathi Ayyangār, Srirangam, Trichinopoly district.

Foll. 1*a*, 2*a* and 3*a* give the name of the scribe. Foll. 1*b*, 2*b* and 3*b* are left blank.

भागवतम्, सव्याख्यानम्.
BHĀGAVATAM WITH COMMENTARY.

Same work as that described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I. The commentary by Śrīdharasvāmin is called Bhāvārthadīpikā.

Contains the Adhyāyas one to five complete and the sixth incomplete in the third Skandha.

Date of transcription—Monday, the 16th day of the bright fortnight of the solar month Māśi in the year Jaya. Name of the scribe—Nāgōttama, son of Vēṅkaṭapati Śāstrin, a resident of Vijayaraghunāthapura.

R. No. 4052.

Palm-leaf. 13¾ × 1⅝ inches. Foll. 17. Lines, 12 in a page. Grantha. Injured and in disorder.

Presented in 1921–22 by M.R.Ry. N. Rāghavayyaṅgār, Srirangam, Trichinopoly district.

मीमांसाविषयः.
MĪMĀṀSĀVIṢAYAḤ.

A fragmentary portion of a treatise in Mīmāṁsā.

Wants the beginning and end.

Beginning :

किं च धात्वर्थस्य फलं प्रधानसम्भवे विप्रकृष्टगुणं विधानं न युज्यते। धात्वर्थविधिसम्भवे धातोरन्तपारार्थ्यस्य . . . . कर्तव्यकर्मणः प्राप्तत्वात् तदनुवादेन गुणफलसम्बन्धविधौ वाक्यभेदापत्तिः। अत एव च पौर्णमास्यधिकरणे य एवं विद्वानमावास्यां यजत इति वाक्ययोर्विधायकत्वमेव। न च रूपलाभः आग्नेयादिवाक्यैर्द्रव्यदेवताविधानसम्भवादिति प्राप्ते . . . . . कपा-

लस्य च विधौ वाक्यभेदापत्तेः अनुवादकत्वमेवेति सिद्धान्तितम्—इति चेन्न ।

End:

अतः पशुगणे विकल्प इति सिद्धान्त इति । अत्राधारतानियमं प्रतीव करणतानियमं प्रत्यार्थिकमुद्देश्यत्व . . . . पत्तौ प्रतिप्रधानवृत्तिन्यायेन सर्वजाघि(घनी)नामविप्रतिपत्त्यर्थं समुच्चयापत्तेरेतदधिकरणसिद्धान्तविरोधो दु.

R. No. **4053.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 83. Lines, 6 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. N. Rāghavayyaṅgār, Srirangam, Trichinopoly district.

प्रातिशाख्यविवरणम्—त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVIVARAṆAM: TRIBHĀṢYARATNAM.

Same work as that described under R. No. 931 of the D.C.S. MSS., Vol. II.

Contains the first Praśna (wants the beginning) and a small portion in the second Praśna.

R. No. **4054.**

Palm-leaf. $8\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 30. Lines, 9 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. A. Kṛṣṇayyaṅgār, Srirangam, Trichinopoly district.

(*a*) समासमञ्जरी.

SAMĀSAMAÑJARĪ.

Foll. 1—22*b*.

Similar to the work described under No. 85(*a*) ante. By Gurusvāmin.

Complete.

Beginning:

षोढा समासास्सङ्क्षेपादष्टाविंशतिधा पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिः द्विगुराभाषितो द्विधा ॥

End :

खलु किल सुष्ठु स्म अहम् यथा तथा अङ्ग हे है भोः अये तसि-लादयः स्मारं स्मारम् कृत्वा—इत्यादि । अधिहरि इत्याद्यव्ययीभावाः—इत्यादीन्यव्ययानि ऊहनीयानि ॥

अनायासेन बालानां सहसा शब्दबुद्धये ।
समासमञ्जरीं हर्षात् गुरुस्वाम्यतनोदिमाम् ॥

The scribe adds—

श्रीवेङ्कटाचार्यस्य कनिष्ठपुत्रेण तिरुमलाचार्येणेयं स्वहस्तलिखिता ॥

Colophon :

समासमञ्जरी समाप्ता ॥

(*b*) समासमञ्जरी.
SAMĀSAMAÑJARĪ.

Foll. 23*a*—30*a*. Fol. 30*b* is left blank.
Same work as the above. By Gurusvāmin.
Incomplete.

R. No. **4055.**

Palm-leaf. $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 75. Lines, 6 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Vēdam Subrahmaṇyasōmayājigāru, Allūr, Nellore district.

आपस्तम्बश्रौतप्रयोगवृत्तिः.
ĀPASTAṀBAŚRAUTAPRAYŌGAVṚTTIḤ.

Similar to the work described under No. 1064 of the D.C.S. MSS., Vol. II.

Breaks off in the 9th Paṭala.

Beginning :

उक्तः साग्निचित्यः क्रतुः । तत्र चोपदिष्टमग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्या चामिक्षयेति । तत्र सौत्रामण्युच्यते (त्र्यहे) पुरस्ता-(दि)त्यनेन। क्लीबाच्छष्पाणि क्रीत्वा । त्रीण्यहानि त्र्यहः तस्मिन् त्र्यहे पुरस्तात्सुरेष्टिः । लोहं हीनमित्युच्यते । तेन लोहेन क्लीबाच्छष्पाणि तोक्मानि तरुणयवाः तोक्मानि व्रीहय इति केचित् ।

* * * *

सविता सवायेति सावित्रस्य, यत्किं चेदं कितवास इति वरुणस्य, आ नो मित्रावरुणा प्र बाहवा इति मैत्रावरुणस्य प्रकृतिवदन्यदिति ।

Colophon:

प्रथमः पटलः ॥

End:

अनपोब्धो जायेत वृत्रान् घ्नंश्चरेदिति काम्ये मा भूदुपदेशः । तेन राजन्यस्य पुत्रजन्मनि . . . . सुवर्णं दाम चात्र दक्षिणा द्विरुक्तिरुक्तप्रयोजना ॥

Colophon:

अष्टमः पटलः ॥

अन्यदप्यनु . . . . नुक्रमिष्यामः---यदेतमेव सन्तमिति । एतमेव भूतिफलं सन्तं वायवे नियुत्वत आलभेतेति

* * * *

उभयोरेनमेव सूक्तमित्युपदेशः । तत्र त्रयाणां सवानामन्यतमानां नैव द्वाविति वाक्यशेषात्संहि.

R. No. **4056.**

Palm-leaf. 13½ × 1½ inches. Foll. 139. Lines, 11 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. Veṅkudīkṣitar Avargaḷ, Naṅgavaram, Kulittalai taluk, Madura district.

देवकेरलम्.

DĒVAKĒRALAM.

Foll. 8*a*—133*a*.

Same work as that described under R. No. 853(*a*) ante. By Acyuta. Almost complete.

Foll. 2*b*—4*a* contain some medical names in the Tamil language. Foll. 5*b*—7*a* contain the Śukraśānti as found in the Jyautiṣārṇava. Fol. 133*b* contains the Dōṣaparihāradānaślōkas. Foll. 134*a*—139*a* contain several horoscopes. Foll. 1 and 2*a*, 5*a*, 7*b* and 139*b* are left blank.

R. No. **4057.**

Palm-leaf. 16⅝ × 1⅝ inches. Foll. 19. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Veṅkudīkṣitar, Naṅgavaram, Kulittalai taluk, Madura district.

(*a*) जैमिनिसूत्रवृत्तिः—ज्योतिःप्रदीपिका.

JAIMINISŪTRAVṚTTIḤ : JYŌTIḤPRADĪPIKĀ.

Foll. 1*a*—15*a*.

Same work as that described under R. No. 1840(*b*) ante.

Contains the first Adhyāya complete.

(*b*) जैमिनिसूत्रवृत्तिः.

JAIMINISŪTRAVṚTTIḤ.

Foll. 15*b*—19*a*. Fol. 19*b* is left blank.

Same work as that described under No. 13739 of the D.C.S. MSS., Vol. XXIV (but this work does not contain the Telugu meaning).

Contains the Āyurdāyanirṇaya incomplete.

R. No. **4058.**

Palm-leaf. 12 × 1¼ inches. Foll. 63. Lines, 7 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921-22 by M.R.Ry. Veṅkudīkṣitar, Naṅgavaram, Kulittalai taluk, Trichinopoly district.

(*a*) जैमिनिसूत्रम्, सवृत्ति.

JAIMINISŪTRAM WITH COMMENTARY.

Foll. 1*a*—36*a*.

The commentary is similar to that described under No. 13737 of the D.C.S. MSS., Vol. XXIV.

Breaks off in the second Adhyāya.

Beginning:

शुक्लाम्बरधरं (. . .) शान्तये ॥

नमस्कृत्य परां वाणीं देवीं गुरुगजाननौ ।

अनुग्रहार्थं लोकानां सूत्रवृत्तिं करोम्यहम् ॥

इह खलु भगवान् जैमिनिः जातस्कन्धं चतुर्भिरध्यायैस्सूत्रयामास । तदिदं शास्त्रं यथामति विवृण्महे—उपदेशं व्याख्यास्यामः ।

सुवर्णगर्भमारभ्याष्टादशमुनिपर्यन्तं गुरुपरम्परया कर्णात् कर्णान्तरं गत्वा उपदिश्यत इत्युपदेशः रहस्यशास्त्रार्थः तं विशेषेण सङ्क्षेपेण व्याख्यास्याम इति शास्त्रप्रयोजनमाह श्रोतृंश्चानभिमुखीचकार । तथा चोक्तम् ।

ज्योतिश्शास्त्रं समस्तं प्रथमपुरुषतः स्वर्णगर्भाद्विदित्वा
पूर्वं ब्रह्मा ततो(दो)पर्यखिलमुनिगणैः प्रार्थनाद्यश्चकार ।
तस्यैवं सुप्रसन्नं मृदुपदनिकरैर्गुह्यमध्यात्मदीपं
शश्वद्विश्वप्रकाशं ग्रहचरितविदां निर्मलज्ञानचक्षुः ॥

* * * *

Colophon :

इत्युपदेशसूत्रे प्रथमाध्याये उपयोगो नाम चतुर्थः पादः ॥

अथेदानीमायुर्दशानिर्णयार्थं द्वितीयाध्याय आरभ्यते । अत्राप्यायुषस्सर्वकारणत्वात् प्रथममायुःप्रामाण्यं निरूप्यते—आयुः पितृदिनेशाभ्याम् ।

End :

यस्मिन् वारे जायते, तद्वाराधीशो यस्मिन्नंशे स्थितः, तदंशराशिमारभ्य पञ्च पञ्च घटिकादिभी राशीन् विभज्य यस्मिन् राशौ जन्मघटिका सम्भवति । तद्घटिकां होराद्रेक्काणादिषड्वर्गेण विभज्य चरस्थिरोभयभेदेन भावलग्नांशद्रेक्काणनवांशद्वादशांशानां संवादेन दीर्घमध्याल्पायुर्योगमवधारयेत् ।

Foll. 36*a*—37*b* contain the Strījātakaphala.

(*b*) ग्रहचेष्टाविधानम्.

GRAHACEṢṬĀVIDHĀNAM.

Foll. 37*b*—47*b*.

A treatise on astrology describing the fortunes of a person by noting the position and movements of the planets : by the son of Appaya.

Breaks off in the 11th Adhyāya.

Beginning :

अत्युच्चभागे तु रविर्नृपालतुल्यो भवेदुच्चगृहे धनेशः ।
आरोहतुङ्गे प्रथितस्तु भानुर्वनादिनिम्नोन्नतदेशचारी ॥
तुङ्गावरोहे चतुरोऽधनस्स्यात् राज्ञां कुले सम्मत एव भानुः ।
मूलत्रिकोणे स्वगृहे गृहेशः क्षितीश्वरः स्यादथ मण्डलेश्वरः ॥

* * * *

ग्रहचेष्टाविधौ सम्यक् श्रीमदप्पयसूनुना ।
भानोर्निजस्वभावादिचारादुक्तफलं नृणाम् ॥

Colophon:

इति ग्रहचेष्टाविधाने चतुर्थोऽध्यायः ॥

End:

निम्ने खिन्नस्सदा खेटो मूढे मूढमतिर्भवेत् ।
राश्यन्ते विघ्नकारी स्यात् राश्यादौ फलदायकः ॥
चेष्टया च शनेः प्रोक्तं ग्रहचेष्टाविधौ सदा ।
श्रीमत्काश्यपिना सम्यग्दशमाध्यायवर्णनम् ॥

Colophon:

इति ग्रहचेष्टाविधाने दशमोऽध्यायः ॥
कुजरविजगुरुज्ञशुक्रभागाः पवनसमीरणकूविजूकलेयाः ।
अयुजि युजि तु ते विपर्ययस्थाश्शशिभवनादिझषान्तमृक्षसन्धिः ॥

* * * *

गोजाश्विकर्किमिथुनास्समृगा निशाख्याः
पृष्ठोदया विमिथुनाः कथितास्त एव ।
शीर्षोदयादनबलाश्च भवन्ति शेषा
लग्नं समेत्युभयतः प्रथमं नृयुग्मम् ॥

Foll. 48*a*—63*b* contain several stanzas relating to horoscopy with meaning in Tamil. Foll. 48*b*, 54*b* and 60*b* are left blank.

R. No. **4059.**

Palm-leaf. 14⅞ × 1 inches. Foll. 11. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Veṅkudīkṣitar, Naṅgavaram, Kulittalai taluk, Madura district.

शृङ्गारसप्तशती.

ŚṚṄGĀRASAPTAŚATĪ.

Same work as that described under No. 11989 of the D.C.S. MSS., Vol. XX.

Contains the first Śataka complete and the second Śataka incomplete; but wants 15 stanzas in the beginning of the first Śataka.

Beginning:

अध्येतुं मदनागमानधिकरोत्याकारमक्षिद्वयी
सन्नद्धे स्तनकुड्मले रचयते सीमां मिथो लेखया ।
मध्य(:)क्षामतरो व्य . . . . रोमावली-
मित्यङ्गान्यपराण्यपि प्रतिनवामापादयन्ति श्रियम् ॥
असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साथ वयः प्रपेदे ॥

*   *   *   *

कान्तातारुण्यदशा तत्सर्वाङ्गोपवर्णना श्लोकैः ।
शृङ्गाररसप्रशस्त्याः प्रथमं शतकं परिस्फुटं कथितम् ॥

Colophon:

उत्कण्ठितावर्णनम् ॥

R. No. **4060.**

Palm-leaf. Foll. 159. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kēsari Veṅkaṭasubbayyagāru, Brāhmaṇakrāka Agrahāram, Kavali taluk, Nellore district.

Foll. 3*a*—6*b* contain the Padaratnaparibhāṣā and Rāvaṇabhēt with Telugu meaning. Foll. 1 and 2 are left blank.

आपस्तम्बश्रौतसूत्रवृत्तिः—सूत्रदीपिका.

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ: SŪTRADĪPIKĀ.

Foll. 7*a*—158*b*. Fol. 159 is left blank.

Same work as that described under R. No. 375(*b*) ante. By Bhaṭṭarudradatta.

Contains the Praśnas 1—9 complete.

R. No. **4061.**

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 18. Lines, 6 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Kēsari Subbayyagāru, Brāhmaṇakrāka Agrahāram, Kavali taluk, Nellore district.

यागकालनिर्णयः.

YĀGAKĀLANIRṆAYAḤ.

Same work as that described under R. No. 3529 ante. By Cauṇḍapācārya.

Complete.

R. No. **4062.**

Śrītāla. $15\frac{5}{8} \times 2$ inches. Foll. 36. Lines, 10 in a page. Telugu. Fair.

Presented in 1921–22 by M.R.Ry. Kandanūri Yajñayyagāru, Lēbūru, Indukurupeta post, Nellore district.

(*a*) छान्दोग्योपनिषद्.

CHĀNDŌGYŌPANIṢAD.

Foll. 1*a*—8*a*. Fol. 8*b* is left blank.

Same work as that described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*b*) भागवतम्, सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Foll. 9*a*—34*a*. Foll. 34*b*—36*b* are left blank.

Same work as that described under R. No. 1719(*a*) ante. By Brahmānandabhāratī, disciple of Kṛṣṇānandabhāratī.

The commentary is also called Sārasaṅgraha. Contains the 11th Skandha complete, but additional stanzas are given in the beginning.

Name of the scribe—Gōvindasōmayājin of Kandanūr.

Beginning:

श्रीमद्भागवते एकादशस्कन्धे भगवता श्रीकृष्णेन मुमुक्षूणां मुक्तिमार्गमुपदेष्टुकामेन मुक्तेः प्रथमसाधनमिदमिति निरूप्यते—

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा ॥

अस्यार्थः—

नृदेहं मनुष्यशरीरं मोक्षस्य मनुष्याधिकारित्वात् तत्सम्पादनानियतसा-

वनम् । मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये इति मनुष्यस्यैव मोक्ष-साधकत्वस्मरणात् ॥

End:

ब्रह्मैव सन् ब्रह्माप्येतीति तस्य प्राणोत्क्रमणश्रवणात् प्राणे ब्रह्मणि लीने सति स्वयं केवलात्मनाकाशवत्तिष्ठतीत्यर्थः । एवं विदेहकैवल्यासि-द्धिर्नातः प्रतिपाद्यमस्ति (इति) सर्वमनवद्यम् ॥

कालकूटसमो दोषो यस्य कण्ठे लवायते ।
तमहं पुरुषं वन्देऽविद्यादोषहरं हरम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानन्दभारतीमुनिवर्यशिष्य-ब्रह्मानन्दभारतीकृतः एकादशस्कन्धसारसङ्ग्रहः सव्याख्यस्समाप्तः ॥

R. No. **4063**

Palm-leaf. 20 × $1\frac{3}{8}$ inches. Foll. 200. Lines, 7 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Kandanūri Yajñayyagāru, Lēbūru, Indukurupeta post, Nellore district.

(*a*) सन्ध्यावन्दनव्याख्या.
SANDHYĀVANDANAVYĀKHYĀ.

Foll. 7*a*—43*a*. Foll. 1—6 are left blank.

Similar to the commentary described under R. No. 1925 ante. By Lakṣmīnṛsiṁhayajvan of Kandanūri family and disciple of Rāma-kṛṣṇa. The author says that he consulted the prior commentaries of Kṛṣṇapaṇḍita, Tirumalayajvan, Śaṅkara, Lakṣmaṇa and others.

Complete.

Beginning:

वागर्थाविव (. .) परमेश्वरौ ॥

वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि ॥
यत्सर्वलोकपरिभावितभावगम्यं बुद्ध्यादितत्त्वपरिलक्षितलक्षणाढ्यम् ।

यद् दृश्यते च परिद(प)श्यति भानमेकं यद्भानुभानसदृशं सततं नतोऽस्मि ॥

श्रीकन्दनूरिवरवंशपयोधिचन्द्रः
श्रीरामकृष्णपदपद्मपरागपूतः ।
लक्ष्मीनृसिंहवरसोमपनामधेयः साङ्क्षिप्य
भाष्यमतुलं सुखबोधनार्थम् ॥

* * * *

लक्ष्मीनृसिंहसोमयाजिना(मा) अत्यन्तलोकोपकारार्थं ब्राह्मणक्षत्रियवैश्योपासनार्थं सन्ध्यावन्दनविधिं क्रमेण प्रतिपादितपरब्रह्मतत्त्वं पण्डितपामररञ्जकटीकारूपेण प्रपञ्चयिष्यन् दुरितप्रतिबन्धनिवारणायादाविष्टदेवतास्मरणं कुर्वन् कृष्णपण्डितग्रथितवल्लीं च शङ्करकृतभाष्यं च तिरुमलयज्वकृतव्याख्यादि नामालोड्य सन्ध्यावन्दनटीकाव्याख्यामुपक्रमते--आदौ ब्राह्मे मुहूर्तकाले गुरुध्यानादिकं प्रवक्ष्यामः ।

ब्राह्मे मुहूर्ते चोत्थाय पादौ प्रक्षाल्य वारिणा ।
आचम्य प्रयतो भूत्वा सुखासनपरिग्रहः ॥

* * * *

Colophon:

इति सन्ध्यावन्दनटीकायां ब्राह्ममुहूर्तादिस्नानपर्यन्तकर्म(विधिः) समाप्तः ॥

End:

सन्ध्यादेवताभिवादनस्यानुक्तत्वाद्यभिवादनस्यैवोक्तत्वाच्च तदभिवादनं प्रस्तुतिवाक्यार्थः । सन्ध्यायाति(श्र)गरीयस्याः पुनर्वादनमस्त्विति ॥

Colophon:

इति सन्ध्यावन्दनटीकाव्याख्याने श्रीमच्छङ्कराचार्यविरचितभाष्यं च लक्ष्मणपण्डितवल्लीचतुष्टयं च तिरुमलयज्वकृतव्याख्यादि नामालोड्य शास्त्राधिकारासमर्थपामरजनसौलभ्याय लक्ष्मीनृसिंहयज्वना विरचितसन्ध्यावन्दनटीकाव्याख्यायां ब्राह्म मुहूर्ते चोत्थायेत्यारभ्य स्नानार्घ्यप्रदानगायत्रीजपसायंप्रातर्मध्याह्नोपस्थानादिग्देवतानमस्कारादि गायत्र्युद्वासनाभिवादनान्तक्रियाकर्म यथाविधि कृतस्समाप्तः ॥

The scribe adds—

युवाब्दे माघशुक्के च द्वितीयासौम्यवासरे ।
कन्दनूरिकुलोत्पन्नगोविन्दाख्येन यज्वना ॥
टीकाव्याख्याकृतामिमं सन्तो मन्तुं क्षमन्तु ते ॥

Foll. 43*b*—47*b* contain the Gāyattrīnyāsaslōkārtha.

(*c*) कैवल्योपनिषद्दीपिका.

KAIVALYŌPANIṢADDĪPIKĀ.

Foll. 48*a*—55*b*.

Same work as that described under No. 411 of the D.C.S. MSS., Vol. I, Part III. By Śaṅkarānanda, pupil of Ānandāśrama.

Complete.

(*c*) अध्यात्मरामायणसारसङ्ग्रहः.

ADHYĀTMARĀMĀYAṆASĀRASAṄGRAHAḤ.

Foll. 56*a*—57*a*.

A short treatise narrating briefly the essence of the Adhyātmarāmāyaṇa, which work has been described under No. 2153 of the D.C.S. MSS., Vol. IV, Part I: by Lakṣmīnṛsiṁha.

Complete.

Beginning:

श्रीशुक्क . . . . ख्यदेहवर्णानुधारिणम् ।
सर्गस्थितिविनाशाख्यगुणकार्यविभागिनम् ॥

*   *   *   *

श्रीकन्दनूरिवरवंशपयोधिचन्द्रश्श्रीरामकृष्णपदपद्मपरागपूतः ।
लक्ष्मीनृसिंहवरसोमपनामधेयः संक्षिप्य रामचरितं विदधे सुतत्त्वम् ॥

आदौ गणाधिपं वन्दे आखुवाहनमुत्तमम् ।
द्वैमातुरं गजमुखं भक्ताभीष्टफलप्रदम् ॥

पुरा शङ्करेण पार्वत्यै कथितमध्यात्मरामायणं चतुस्सहस्रग्रन्थसङ्ख्यापठनासमर्थपामरजनसुलभोपायेन तत्सारं सङ्गृह्याध्यात्मरामायणसारसङ्ग्रह इति लोके विख्यातस्सन् पठनमात्रेण भक्तिज्ञानवैराग्यैश्वर्यादिकफलप्रद इत्ययं ग्रन्थ उपक्रम्यते ।

बालायोध्यारण्यकाण्डाः किष्किन्धा सुन्दरस्तथा ।
युद्धकाण्डोत्तरौ सप्त काण्डानां तु प्रकीर्तिताः ॥
सर्गाश्चतूत्तरा षष्टिः पार्वत्या ईश्वरेण च ।
तद्ग्रन्थस्सङ्ग्रहेणोक्तस्तत्त्वं सर्वं मयाधुना ॥
मूर्तामूर्तात्मकं रामं सच्च त्यच्चेति सर्वगम् ।
नेतीतीदं यदवचि तदहं भावये सदा ॥

*　　*　　*　　*

ततस्सुज्ञानसम्पन्नस्सद्गुरुस्तस्य लभ्यते ।
वाक्यज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते ॥

Colophon:

इत्यध्यात्मरामायणसारसङ्ग्रहे बालकाण्डे ब्रह्मप्रतिपादकश्लोकार्थः समाप्तः॥

*　　*　　*　　*

इमं स्तवं नित्यमनन्यभक्त्या शृण्वन्ति गायन्ति लिखन्ति ये वै ।
ते सर्वसौख्यं परमं च लब्ध्वा भवत्पदं यान्ति भवत्प्रसादात् ॥

Colophon:

इत्यध्यात्मरामायणे युद्धकाण्डे ब्रह्मोपदेशस्थलानि विविच्य तत्तच्छ्लोकान्मयाध्यात्मरामायणसारसङ्ग्रहमिति प्रपञ्चीकृतग्रन्थस्समाप्तः ॥

End:

अन्ते हि भक्ता मयि चानुरक्ता यान्तं दिवं मामनुयान्ति सर्वे ।
तिर्यक्छरीरा अपि पुण्ययुक्ता वैकुण्ठसाम्यं परमं प्रयान्तु ॥

Colophon:

इति श्रीमदध्यात्मरामायणसारसङ्ग्रहं उत्तरकाण्डे ब्रह्मप्रतिपादकस्थलानि बहुशो विविच्य तत्तच्छ्लोकान् लक्ष्मीनृसिंहसोमपेन विरचितग्रन्थस्समाप्तः ॥

Fol. 67 gives the Yōgasārōpaniṣad and Mahāvakyōpaniṣad.

(*d*) उत्तरगीता.
UTTARAGĪTĀ.

Foll. 68*a*—71*b*.

Same work as that described under No. 2372 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

The scribe adds—

कन्दनूरिलक्ष्मीनृसिंहसोमयाजिना लिखिता समाप्तोत्तरगीता.

(*e*) कृष्णस्तवराजः.

KṚṢṆASTAVARĀJAḤ.

Foll. 72*a*--76*b*.

Same work as that described under R. No 71(*d*) ante.

Complete.

This work is also called Bhīṣmastavarāja.

(*f*) कृष्णानुस्मृतिः.

KṚṢṆĀNUSMṚTIḤ.

Foll. 76*b*—80*a*. Fol. 80*b* contains the Bhikṣukōpaniṣad.

Same work as that described under R. No. 71(*c*) ante.

Complete.

(*g*) अमृतबिन्दूपनिषद्.

AMṚTABINDŪPANIṢAD

Fol. 81.

Same work as that described under No. 273 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Fol. 81*b* contains a portion of the Skandōpaniṣad.

(*h*) ब्रह्मोपनिषद्.

BRAHMŌPANIṢAD.

Fol. 82.

Same work as that described under No. 655 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*i*) जाबालोपनिषद्.

JĀBÂLŌPANIṢAD.

Foll. 82*b*—84*a*.

Same work as that described under No. 470 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(j) गर्भोपनिषद्.

GARBHŌPANIṢAD.

Foll. 84a—85a. Fol. 85 gives the Rudrākṣadhāraṇōpaniṣad.

Same work as that described under No. 436 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(k) अष्टावक्रगीता.

AṢṬĀVAKRAGĪTĀ.

Foll. 86a—91a.

Same work as that described under No. 4545 of the D.C.S. MSS., Vol. IX.

Complete.

(l) अवधूतगीता.

AVADHŪTAGĪTĀ.

Foll. 91a—93a.

Same work as that described under No. 4543 of the D.C.S. MSS., Vol. IX.

Incomplete.

(m) मैत्रेयोपनिषद्.

MAITRĒYŌPANIṢAD.

Foll. 93b and 94a.

An Upaniṣad bearing on the Advaita-Vēdānta. It is said to have been told by Śiva to Maitrēya.

Contains the second Adhyāya only.

Beginning:

अथ भगवान् मैत्रेयः कैलासं जगाम तं गत्वोवाच—भो भगवन् परमतत्त्वरहस्यमनुब्रूहीति । स होवाच महादेवः—

देहो देवालयः प्रोक्तो (स)जीवः केवलशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥
अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः ।
स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः ॥
ब्रह्मामृतं पिबेद्भैक्षमाचरेद्देहरक्षणे ।

End:

भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव ॥

द्रष्टृदर्शनदृश्यादि त्यक्त्वा वा वासनासह ।
दर्शनप्रथमाभासमात्मानं केवलं भज ॥
स शान्तस्सर्वसङ्कल्पया शीला यदवस्थितः ।
जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परा ॥

Colophon :

इति मैत्रेयोपनिषद् समाप्ता ॥

(*n*) निरालम्बोपनिषद्.

NIRĀLAMBŌPANIṢAD.

Foll. 94*b*—95*b*.

Same work as that described under No. 570 of the D.C S. MSS., Vol. I, Part III.

Complete

(*o*) त्रिपुराप्रकरणम्.

TRIPURĀPRAKARAṆAM.

Foll. 96*a*—97*b*.

Same work as that described under R. No. 3637(*e*) ante. By Śaṅkarācārya.

Complete.

(*p*) एकादशोत्तरशतवाक्यग्रन्थः.

ĒKĀDAŚŌTTARAŚATAVĀKYAGRANTHAḤ.

Foll. 98*a*—104*a*. Fol. 140*b* is left blank.

Same work as that described under No. 4571 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Incomplete.

(*q*) शिवगीता.

ŚIVAGĪTĀ.

Foll. 105*a*—131*a*. Fol. 131*b* is left blank.

Same work as that described under No. 2546 of the D.C S. MSS., Vol. IV, Part II.

Complete.

(r) ब्रह्मगीता.

BRAHMAGĪTĀ.

Foll. 132a—167b.

Same work as that described under No. 2481 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

Date of transcription—Friday, the 12th day of the bright fortnight of the lunar month Śrāvaṇa in the year Āṅgirasa. Name of the scribe—Kandanūri Lakṣmīnṛsiṁhasōmayājin.

(s) ब्रह्मानन्दविलासः.

BRAHMĀNANDAVILĀSAḤ.

Foll. 168a—174b.

Deals with the following subjects—

By Sāmin, son of Virūpākṣa of Dharaṇakōṭa family.

१. ब्रह्मानन्दविलासविद्यास्वरूपकथनम्.
२. पञ्चीकरणप्रकरणम्.
३. तारकलक्षणकथनम्.
४. गुरुसेवाप्रकरणम्.
५. अमनस्कविधिः.
६. Do.
७. शमादिनिर्णयः.
८. पञ्चभूतलक्षणम्.
९. अष्टदेहनिर्णयः.
१०. योगनिरासनम्.
११. स्वरूपनिरोधः.
१२. फलसिद्धिः.

The date of the work is given as Monday, the 1st day of the dark fortnight of the month of Phālguna in the year Śrīmukha, Śaka 1736, corresponding to 1813–1814 A.D.

Beginning:

ब्रह्मानन्दसुधाम्बुवारिधिसुधासूतिप्रभाभासुरं
सत्यं ज्ञानमनन्तभावममलं नादान्तसंस्थं परम् ।
आधारादिसमस्तचक्रविलसत्सौधाममध्यस्थितं
ब्रह्मानन्दगुरुं भजामि सततं चित्ते मदीये शुभे ॥

* * * *

श्रीमत्पूर्णगिरौ तस्मिन् सुब्रह्मण्येन सादरम् ।
ब्रह्मानन्दविलासाख्यविद्या सम्बोधिता मया ॥
तां वक्ष्ये तव देवर्षे श्रुतिवाणीं मनोरमाम् ।
इत्युक्त्वा नारदं ब्रह्मा गुहं स्तोतुं प्रचक्रमे ॥

* * * *

Colophon :

इति श्रीब्रह्मानन्दविलासे प्रथमोऽध्यायः ॥

End :

उन्मनीभावमासाद्य नारायणपरायणः ।
वीणामादाय महतीं सप्तभिस्तन्तुभिर्युताम् ॥
सम्बोधयन्तीं सर्वेषां भावं तत्त्वनिरूपकम् ।
ब्रह्मानन्देन भरितः परिपूर्णमनोरथः ॥
सत्यप्रभृतिकान् लोकान् चकार निरपत्रपः ।
सर्वं ब्रह्ममयं ध्यात्वा परं प्राप सनातनम् ॥

Colophon :

इति श्रीब्रह्मानन्दविलासे द्वादशोऽध्यायः ॥

श्रीमच्छ्रीमुखवत्सरे शुभकरेशानान्विते शोभने
तद्वर्ण्ये रसरामशैलशशिगे हस्तर्क्षके कर्कटे । (१७३६)
लग्ने फाल्गुनकृष्णपक्षप्रतिपद्वारे तथेन्दोर्दिने
ब्रह्मानन्दविलासमेतदखिलं दास्ये गुरोर्मण्डले ॥
धरणकोटकुलाम्भोधिराकापूर्णसुधानिधेः ।
विरूपाक्षस्य विदुषः सूनुना स्वामिना मया ॥
ब्रह्मानन्दविलासाख्या रचिता कृतिरुत्तमा ।

* * * *

The scribe adds—

तस्य शिष्यस्तु श्रीकन्दनूरिवंशसमुद्भवः ।
लक्ष्मीनृसिंहसोमाख्ययज्वना लिखितं मया ॥

(*t*) शिवोत्तरगीता.

ŚIVŌTTARAGĪTĀ.

Foll. 175*a*—183*b*.

This forms the further portion of the work described under sub-division (*q*) of this number.

Complete in three Paṭalas.

Beginning :

व्यास उवाच—

द्वारवत्यां सुखासीनं वासुदेवं महाद्युतिम् ।
प्रणम्य शिरसा भूमावर्जुनः परिपृच्छति ॥
को देवः सर्वदेवानां ध्येयः पूज्यश्च केशव ।
एतत्कथय मे देव प्रसादं कुरु मे प्रभो ॥

श्रीकृष्ण उवाच—

यो देवस्सर्वदेवानां ध्येयः पूज्यश्च हेऽर्जुन ।
स शिवस्स महादेवस्स शान्तः स निरञ्जनः ॥

* * * *

Colophon :

ओं तत्सदिति श्रीमहाभारते हरिवंशे योगशास्त्रे शिवोत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां श्रीकृष्णार्जुनसंवादे शिवमाहात्म्यं नाम प्रथमः पटलः ॥

End :

ये भक्ताश्च शिवे देवे प्रभुं रुद्रमुमापतिम् ।
ते नराः पुण्यकर्माणस्ते यान्ति परमं पदम् ॥

Colophon :

ओं तत्सदिति श्रीमहाभारते हरिवंशे शतसहस्रिकायां संहितायां योगशास्त्रे श्रीमच्छिवोत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां श्रीकृष्णार्जुनसंवादे शिवमाहात्म्यं नाम तृतीयः पटलः ॥

(*u*) पतिव्रतामाहात्म्यम्.

PATIVRATĀMĀHĀTMYAM.

Foll. 184*a*—200*b*.

Explains by narrating the story of Sāvitrī, the greatness of chastity as found in the Āraṇyaparvan of the Mahābhārata.

This is also called Sāvitryupākhyāna.

Complete in seven Adhyāyas.

Beginning :

युधिष्ठिर उवाच—

नात्मानमनुशोचामि नेमान् भ्रातॄन् महामुने ।
हरणं चापि राज्यस्य यथेमां द्रुपदात्मजाम् ॥

द्यूते दुरात्मभिः क्लिष्टा कृष्णया तारिता वयम् ।
जयद्रथेन च पुनर्वनाच्चापि हृता बलात् ॥
अस्ति सीमन्तिनी काचिद् दृष्टपूर्वापि वा श्रुता ।
पतिव्रता महाभागा यथेयं द्रुपदात्मजा ॥

मार्कण्डेयः—

शृणु राजन् कुलस्त्रीणां महाभाग्यं युधिष्ठिर ।
सर्वमेतद्यथाप्राप्तं सावित्र्या राजकन्यया ॥
आसीन्मद्रेषु धर्मात्मा राजा परमधार्मिकः ।
ब्रह्मण्यश्च महात्मा च सत्यसन्धो जितेन्द्रियः ॥
यज्वा दानपतिर्दक्षः पौरजानपदप्रियः ।
पार्थिवोऽश्वपतिर्नाम सर्वभूतहिते रतः ॥

* * * *

Colophon:

इति श्रीमहाभारते आरण्यपर्वणि पतिव्रतामाहात्म्ये सावित्रीस्वयंवरे प्रथमोऽध्यायः ॥

End:

यश्चैवं शृणुयाद्भक्त्या सावित्र्याख्यानमुत्तमम् ।
स सुखी सर्वसिद्धार्थः न दुःखं प्राप्नुयान्नरः ॥

Colophon:

इति श्रीमहाभारते आरण्यपर्वणि पतिव्रतामाहात्म्ये द्युमत्सेनराज्यलाभे सप्तमोऽध्यायः ॥

सावित्र्युपाख्यानं समाप्तम् ॥

Date of transcription—Tuesday, the 10th day of the bright fortnight of the lunar month Bhādrapada in the year Dhātu. Name of the scribe—Kandanūri Lakṣminṛsiṁhasōmayājin.

R. No. 4064.

Palm-leaf. 16¾ × ¼ inches. Foll. 169. Lines, 7 in a page. Telugu. Very much injured.

Presented in 1921–22 by M.R.Ry. Yajñayyagāru, Lēbūru, Indukurpeta post, Nellore district.

श्रीकृष्णलीलातरङ्गिणीव्याख्या.
ŚRĪKṚṢṆALĪLĀTARAṄGIṆĪVYĀKHYĀ.

A cammentary on Nārāyaṇatīrtha's Kṛṣṇalīlātaraṅgiṇī, which work has been described under R. No. 389 ante: by Veṅkaṭēsa, assisted by Gōvindadīkṣita.

Contains the Taraṅgas 5—12 complete.

Beginning:

विद्यानाथमहं भजामि सततं वेदान्त . . . .
भ्राजत्पल्लवपादसक्तमुनिवर्या . . . . बम्भरम् ।
वामाङ्कस्थलसन्नगेशतनयावक्त्राब्जवीक्षापरं
वाक्यैर्लौकिकवैदिकैस्सुविनुतं वादैरवेद्यं गुरुम् ॥
नारायणार्ययतिना रचितस्य सुधीमता ।
पञ्चमस्य तरङ्गस्य व्याख्यानं क्रियतेऽधुना ॥

आदौ पञ्चमतरङ्गे वक्ष्यमाणाः कथाः कविरवतारयति —गोपीवस्त्रापहाराख्यमिति । गोपीनां गोपस्त्रीणां वस्त्राणि तेषामपहारस्याख्या यस्य . . . . कृतं गोवर्धनाद्रेरुद्धारचरितं च पुनः गर्तप्रवेशस्तु अद्रेरुद्धरणेन यो गर्तस्समजनि तस्मिन् प्रवेशश्चोपगीयते वर्ण्यते ।

* * * *

Colophon:

इति श्रीनारायण . . . सम्भूतश्रीकृष्णलीलातरङ्गिण्यां गोपीवस्त्रापहारादिगोवर्धनोद्धरणवर्णनं नाम पञ्चमस्तरङ्गः ॥

End:

कृष्णलीलातरङ्गिणी कृष्णस्य लीला यस्यां सा तरङ्गिणी

* * * *

स्वाभिमतमोक्षसिद्ध्यर्थमिति भावः ॥

गोविन्ददीक्षितसहायकवेङ्कटेशनाम्ना कृतेयमधुना रचिता च व्याख्या ।
नारायणाख्ययतिवर्यसुनिर्मितस्य सद्द्वादशाख्यसुचरित्रतरङ्गकस्य ॥

Colophon:

इति श्रीनारायणाख्ययतिविरचितायां कृष्णलीलातरङ्गिण्यां कल्याणमहोत्सववर्णनं नाम द्वादशस्तरङ्गः ॥

R. No. **4065.**

Palm-leaf. 19 × 1½ inches. Foll. 246. Lines, 7 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Yajñayyagāru, Lēbūru, Indukurupeta post.

Foll. 241*b*—246*b* are left blank.

ब्रह्मगीतातात्पर्यबोधिनी.

BRAHMAGĪTĀTĀTPARYABŌDHINĪ.

A commentary on the Brahmagītā, which work has been described under No. 2481 of the D.C.S. MSS., Vol. IV, Part II. This commentary, called Tātparyabōdhinī, is by Vēṅkaṭēśvara Śāstrin who derived help from Kandanūri Lakṣmīnṛsiṁhasōmayājin.

Complete.

Beginning:

वन्देऽहं जगतां देवमध्यात्म . . . मद्वयम् ।
निमित्तोपादानभूतब्रह्मविष्ण्वीश्वरात्मकम् ॥

* * * *

. . . . हितौ
वेदान्तार्थपयोधिलङ्घनपटुर्व्याख्यात्मिका नौः पुरा ।
व्याख्येयं छवरूपिणी तदखिलग्रन्थैकदेशात्मभू-
गीता . . . . ॥

. . . वेङ्कटेश्वरसमाख्यसत्कृता हृदि वेदवेद्यपरतत्त्वबोधिका ।
अधिकां मुदं सततमावहेन्न कामतिकाम . . . . : . ॥

. . . . म्याक्षेपसन्देहस-
ङ्क्षोभक्ष्योणिधरोरुपक्षविदलद्दम्भोलिधारायताम् ।
वेदान्ताब्धिविचारनिर्मथनसम्भूतामृता . . .
. . . . ॥

इह खलु भगवान् वेदव्यासः सर्वोपनिषद्वाक्यविचारजन्यब्रह्मात्मैक्यज्ञानस्य सर्वशाखासम्मतमोक्षप्राप्ति . . . . सम

स्तोपनिषदर्थस्य साकल्येन प्रतिपादिकां ब्रह्मगीतां वक्तुमारभमाणः तदुपयुक्तत्वेन सूतं प्रति मुनिप्रश्नमवतारयति---मुनय ऊचुरिति ।

* * * *

Colophon:

इति श्रीमत्सच्चिदानन्दात्मकपरतत्त्वबोधकसर्ववेदवचरणारविन्दसमर्पितचेतोमिलिन्देन समधिष्ठितवेङ्कटेश्वरनाम्ना कन्दनूरिलक्ष्मीनृसिंहसोमयाजिसहायेन विरचितायां यज्ञवैभवखण्डस्योपरिभागब्रह्मगीतोपनिषत्तात्पर्यबोधिकायां प्रथमोऽध्यायः ॥

End:

परतत्त्वतयैव परशिवात्मकं तत्त्वं यथार्थरूपं यस्य स देवस्तस्य भावः तत्ता तया यथार्थपरशिवात्मकरूपेणेत्यर्थः । विदुः ज्ञास्य(जान)न्ति स्मेत्यर्थः । प्रत्यगात्मपरात्मैक्यानन्दानुभवं प्रापुरिति भावः ॥

अधिवेदार्थसिद्धान्तवेङ्कटेश्वरशास्त्रिणा ।
व्याख्येयं रचिता ब्रह्मगीतातत्त्वार्थबोधिका ॥

सद्वेदान्तवचश्चतुष्टयनिगूढार्थप्रबोधोदयः
सच्छास्त्रार्थसमन्वितस्सुरवरेण्येभ्यः स्वयम्भूदितः ।
व्याख्यातोऽपरवेदशास्त्रविदुषा सद्वेङ्कटाधीश्वर-
ख्यातेनाद्य समाप्तिमाप विधिगीताद्वादशाध्यायकः ॥

वक्रातङ्ककुतर्कपक्षनगभिच्छक्रास्त्रधारायिता
विक्रान्ताद्यगजान्यनक्रमतजिच्छक्रास्त्रचक्रायिता ।
दुष्क्रोधोक्तदुरुक्तिपक्षकतमोनिष्कारहंसोदया
निष्क्रोधान्तरसंस्तुता मुदमहन्नित्यात्मभूगीतिका ॥

सद्वेदान्तपयोनिधिप्रमथनप्रोद्भूतसारांशवा(ः)
निस्तार्योरुभवाब्धितारतरणिर्निश्श्रेयसावाप्तिका ।
निष्कामान्तरहृद्यवेद्यमहिमा निष्कृष्टतत्त्वाद्वया
सव्याख्या मुदमातनोतु विदुषां सद्द्वादशाध्यायिका ॥

Colophon:

इति श्रीमत्सर्वदेवदेवचरणारविन्दसमर्पितचेतोमिलिन्देन समधिष्ठित-कन्दनूरिलक्ष्मीनृसिंहसोमयाजिसहायकेन वेङ्कटेश्वराख्यशास्त्रविदा विरचितायां सूतगीतोपरिभागब्रह्मगीतोपनिषत्तात्पर्यबोधकायां सर्वोपनिषत्सर्वशास्त्रार्थरह-स्यार्थनिश्चिताद्वितीयसिद्धान्तसाक्षान्मोक्षयोगो नाम द्वादशोऽध्यायः ॥

* * * *

शुक्लसंवत्सरमाघशुद्धपञ्चमीप्रभृत्याङ्गिरससंवत्सरनभोमासपञ्चमीभार्गववासरे ब्रह्मगीताध्यायद्वादशकस्समाप्तः ॥

R. No. **4066.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 63. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Vēdam Venkatācalayyagāru, B.A., B.L., Nellore.

तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀNAM : SIDDHĀÑJANAM.

Same work as that described under R. Nos. 1536—1538 ante. By Annambhaṭṭa, son of Tirumalācārya of Rāghavasōmayāji family.

Contains up to the Prāmāṇyavāda incomplete.

Foll. 35—39, 56 and 61*b*—63*b* are left blank

R. No. **4067.**

Palm-leaf. 13¾ × 1¼ inches. Foll. 84. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Vēdam Vēṅkaṭācalayyagāru, B.A., B.L., Nellore.

(*a*) लयकाण्डः.

LAYAKĀṆḌAḤ.

Foll. 1*a*—2*b*.

A treatise on the Layayōga.

Complete.

Beginning:

परं ज्ञानमयं वक्ष्ये येन तत्त्वं प्रकाशते ।
येन वै कथ्य(कृत्य)ते सर्वं मलपाशादिबन्धनम् ॥

आधारादिषु चक्रेषु सुषुम्नादिषु नाडिषु ।
प्राणादिषु शरीरेषु परं तत्त्वं न तिष्ठति ॥

*   *   *   *

परतत्त्वं मयाख्यातं जन्मबन्धविनाशनम् ।
तस्याभ्यासं प्रवक्ष्यामि येन संजायते लयः ॥
सुखासने समासीनः तत्त्वाभ्यासं समाचरेत् ।

End:

इति कामविवृद्धेन लयाभ्यासेन योगिनः ।
भुञ्जते परमानन्दं ब्रह्माण्डादिमहत्पदात् ॥
ब्रह्मेशादिसुरेशानां प्रलयेष्वपि योगिनः ।
अखण्डितलयानन्दे मग्नाः कालं न जानते ॥

Colophon:

इति (ल)यकाण्डस्समाप्तः ॥

(*b*) अमनस्कयोगः.
AMANASKAYŌGAḤ.

Foll. 3*a*—6*a*.
A treatise on Yōga philosophy.
Complete.

Beginning:

नमोऽस्तु गुरवे तस्मै सहजानन्दमूर्तये ।
यस्य वाक्यामृतं हन्ति सं(सारवि)षमोहनम् ॥
अमृतोद्दीपिनी विद्या निरपाया निरञ्जना ।
अमनस्ककला काचित् जगत्यानन्दरूपिणी ॥
प्रणष्टोच्छ्वासनिश्वासः प्रध्वस्तविषयग्रहः ।
निश्चेष्टो निर्विकारश्च लयो जयति योगिनाम् ॥

End:

अस्य धारणमात्रेण स्वयं तत्त्वं प्रकाशते ।
तस्मात्सर्वप्रयत्नेन अभक्तानां न पूर्यते ॥

Colophon:

इत्यमनस्कयोगस्समाप्तः ॥

(*c*) तत्त्वसारः.

TATTVASĀRAḤ.

Foll. 6*a* - 9*a*. Fol. 9*b* is left blank.

Purports to give the essence of the true reality as related by god Śiva to Skanda.

Complete.

Beginning:

मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुम् ।
प्रणम्य शिरसा भूमौ स्कन्दो(वचनम)ब्रवीत् ॥

स्कन्दः—

भ्रामितोऽहं त्वया देव शास्त्रजालैरनेकधा ।
मन्त्रविद्यार्णवे मग्नो भ्रान्तोऽस्मि व्याकुलीकृतः ॥
तत्त्वसारं न जानामि वञ्चितोऽहं त्वया प्रभो ।
सारात्सारतरं शुद्धं हेतुदृष्टान्तवर्जितम् ॥
कथयस्व प्रसादेन यदि चास्ति कृपा मयि ।
श्रुत्वा वाक्यं कुमारस्य प्रहस्य भगवान् शिवः ॥
प्रत्युवाच महादेवस्तत्त्वसारस्य निश्चयम् ।

End:

श्रुतं देव त्वयाख्यातं तत्त्वसारं सुनिर्मलम् ।
अद्याहं मृत्युहीनश्च जीवन्मुक्तिपदे स्थितः ॥

Colophon:

इति शिवषण्मुखसंवादे तत्त्वसारस्सम्पूर्णः ॥

Foll. 10*a*—13*b* contain the Naiśrēyasavidhi in the Mānavadharmaśāstra (12th Adhyāya). Foll. 14*a*—17*a* give the Śrīrudramantrarṣidēvatācchandas. Foll. 18*a*—19*b* contain the Dēvamātṛkāyantrarāja.

(*d*) श्रीसूक्तभाष्यम्.

ŚRĪSŪKTABHĀṢYAM.

Foll. 20*a*—22*b*.

Similar to the commentary described under R. No. 2299(*c*) ante.

Complete.

Beginning:

हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य आनन्दकर्दमचिक्लीतेन्दिरा ऋषयः, श्रीर्देवता, आद्यास्तिस्रोऽनुष्टुभः, चतुर्थी प्रस्तारपङ्क्तिः, श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

*　　*　　*　　*

व्याख्यानमाह—हिरण्यवर्णां—ममावह । हे जातवेदः अग्ने ! हिरण्यवर्णां स्वर्णकान्तिं, हरिणीं हरितवर्णां हरिद्राभां सुवर्णरजतस्रजां हेमरौप्यमयकमलक्लृप्तमालिकां चन्द्रां सकलजनसन्तोषकरीं हिरण्मयीं हिरण्यस्वरूपामेतादृशीं लक्ष्मीं मम सर्वाभीष्टसाधनाय आवह प्रेषय ।

End:

व्याख्यामेतां तु यो भक्त्या पठेद्वा शृणुयाद्बुधः ।
साक्षान्नारायणवधूरिष्टं तस्मै प्रयच्छति ॥
स्नायात्पिबेज्जपेदर्चेदश्नीयादभिमन्त्रितम् ।
एवं तरति दारिद्र्यं हुनेदाज्यैः पुमान् स्वयम् ॥

Colophon:

इति श्रीसूक्तभाष्यं सम्पूर्णम् ॥

(*e*) शिवयोगचिन्तारत्नसङ्ग्रहः.

ŚIVAYŌGACINTĀRATNASAṄGRAHAḤ.

Foll. 23*a*—44*b*.

Similar to the work described under No. 4370 of the D.C.S. MSS., Vol. IX. By Cennavīra.

Complete.

Beginning:

सूतसंहितायामीश्वरः—

अथातस्सम्प्रवक्ष्यामि नाडीचक्रमनुत्तमम् ।
श्रद्धया गुरुणा चैव विद्धि वाचस्पतेऽधुना ॥
शरीरं तावदेव स्यात् षण्णवत्यङ्गुलात्मकम् ।
मनुष्याणां मुनिश्रेष्ठ स्वाङ्गुलीभिरिति श्रुतिः ॥

End:

शिवदन्मन्यते यस्तु आचार्यं तत्त्वपारगम् ।
शिवाद्गुरुतरा भक्तिर्यस्य नित्यं गुणैस्सदा ॥
तस्य देयमिदं ज्ञानमन्यथा न कदाचन ।

Colophon:

इति वेदवेदशिरश्शिवागमपुराणप्रकरणप्रवीणेन चेन्नवीराख्यगुरुणा प्रणीतश्शिवयोगचिन्तारत्नसङ्ग्रहः संपूर्णश्च ॥

(*f*) योगाभ्यासक्रमः.

YŌGĀBHYĀSAKRAMAḤ.

Foll. 40*a*—44*b*.

On certain details connected with the practice of Yōga.

Beginning:

निश्शब्दे केवले कुम्भे प्राप्तो विष्णुपदं मरुत् ।
तदा खलु तयोरैक्यं जीवात्मपरमात्मनोः ॥

केवलकुम्भकाभ्यासक्रमः—

मूलोड्डीयनजालभेदनविधावभ्यासतो योगिनां
वायोरुद्गसनं निरङ्कुशविधेस्तद्व्योम्नि संरोधनात् ।
भूतानीन्द्रियवर्गतद्गुणमनोऽहश्चित्तबुद्ध्यादयः
सर्वं लीनमुपैति वृत्तिरहितं सौख्यं तदा कस्य न ॥
देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम् ।
त्रिकोणमध्यमानां तु सत्यमुक्तं बृहस्पते ॥

End:

बोधको वेधकश्चैव निषिद्धः काम्यसूचकः ।
वाचकः कारकश्चेति विहितो गुरुरष्टधा ॥

तत्र शास्त्रार्थोपदेष्टा बोधकः, तत्त्वदर्शको वेधकः, वश्याकर्षणबोधको निषिद्धः, पुण्यकर्मोपदेष्टा काम्यः, शमादिसाधनसम्पच्युपदेष्टा सूचकः, देहाद्यनित्यत्वदर्शनादात्मानुरागप्रदो वाचकः, जीवेश्वरैक्यानुसन्धानोपदेष्टा कारकः, संशयविरसजीवन्मुक्तिप्रदो विहितश्चेति ।

मृता मोहमयी माता जातो बोधमयस्सुतः ।
सूतकद्वयसम्प्राप्तौ कथं सन्ध्यामुपास्महे ।
हृदाकाशे चिदादित्यस्सदा भाति निरन्तरम् ।
नास्तमेति नचोदेति कथं सन्ध्यामुपास्महे ॥

(*g*) महार्णवः (कर्मविपाकः).
MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Foll. 45*a*—65*b*.

Same work as that described under Nos. 3495—3551 of the D.C.S. MSS., Vol. VII. By Viśvēśvarabhaṭṭa, son of Peddibhaṭṭa.

Wants the beginning and the end in the sixth Taraṅga.

(*h*) अघविवेचनम्.
AGHAVIVĒCANAM.

Foll. 66*a*—69*a*. Fol. 69*b* is left blank.

Same work as that described under No. 3006 of the D.C.S .MSS., Vol. V. By Rāmacandrādhvarin, son of Anantasōmayājin.

Complete.

(*i*) तैत्तिरीयोपनिषद्.
TAITTIRĪYŌPANIṢAD.

Foll. 70*a*—84*b*.

Same work as that described under No. 486 of the D.C.S MSS, Vol. I, Part III.

Contains the V Praśna only complete.

R. No. **4068**.

Palm leaf. Foll. 157. Lines, 7 in a page. Slightly injured.

Presented in 1921–22 by M.R.Ry. Vēdam Vēṅkaṭācalayyagāru, B.A., B.L., Nellore.

श्रीविद्यापूजाविधानम्.
ŚRĪVIDYĀPŪJĀVIDHĀNAM.

Foll. 1*a*—151*b*.

On the mode of worshipping the Śrīcakra, also known as Śrīvidyā-cakra.

Complete.

Beginning:

ब्राह्मे मुहूर्ते चोत्थाय भस्मधारणं श्रोत्राचमनं कृत्वा ब्रह्मरन्ध्रे निजगुरुं शक्तियुक्तं स्मरेत् ।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि हंसगं तदभिधानपूर्वं गुरुम् ॥

इति शिरसि पादुकामुद्रां कृत्वामुकानन्दनाथगुर्वमुकशक्तचम्बाश्रीपादुकां पूजयामीति गुरुमन्त्रं स्मृत्वा तत्पादगलितामृतधारयाप्लुतमात्मानं निर्मलानन्दमयं विभाव्य स्तम्भनचतुरश्रमत्स्यगोखुरयोनिमुद्राभिर्नत्वा स्तुवीत ।

* * * *

Colophon:

इति सकलागमतन्त्रे पार्वतीशिवसंवादे महाशक्तिन्यासः सम्पूर्णः ॥

* * * *

Colophon:

इति श्रीपरानन्दकाण्डे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे द्वात्रिंशद्दीक्षाक्रमो नाम पञ्चमोपदेशः ॥

* * * *

Colophon:

इति सकलागमतन्त्रे पार्वतीशिवसंवादे श्रीचक्रार्चनपद्धतिस्समाप्ता ॥

End:

क ए ई ल ह्रीं, ह स क ह ल ह्रीं, सकलह्रीं इयमपि दूर्वासोपासितविद्या ॥

इति सौभाग्यविद्यास्त्रयस्त्रिंशद्भेदाः मन्त्रमहोदध्युक्ताः ॥

Fol. 152 contains the Śrīvidyāmudrāviṣaya. Fol. 153 contains the Vairināśakavaca. Fol. 154 contains the Aṅgārakakalpa. Foll. 155 and 156 contain the Śyāmalācakrapūjāvidhi and Mālinīmantra. Fol. 157 is left blank.

R. No. **4069.**

Palm-leaf. 16⅛ × 1¼ inches. Foll. 38. Lines, 7 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol IV, Part I.

Contains the seventh Skandha complete.

R. No. **4070.**

Palm-leaf 15¾ × 1½ inches. Foll. 113. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasimhācāriyar, High Court Vakil, Karur, Trichinopoly district.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I

Contains the tenth Skandha only.

Foll. 1—3 and 112—113 are left blank.

R. No. **4071.**

Palm-leaf. 16¼ × 1¼ inches. Foll. 161. Lines, 10 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I

Contains the Skandhas 6—9, 11 and 12 complete.

Foll. 1 and 161 are left blank.

R. No. **4072.**

Palm-leaf. 16¾ × 1¼ inches. Foll. 43. Lines, 7 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. N. C. Narasimhāchāriyar, High Court Vakil, Karur, Trichinopoly district.

(*a*) पञ्चगव्यविधिक्रमः.

PAÑCAGAVYAVIDHIKRAMAḤ.

Foll. 1*a*—3*a*.

Similar to the work described under Nos. 3664 and 3739 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

पराशरादिभिः प्रोक्तः पञ्चगव्यविधिक्रमः ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
सम्पाद्याग्निं समाधाय यत्र क च विधानतः ।
तदुत्तरे समास्तीर्य तण्डुलान्नवधा लिखेत् ॥

End:

यत् त्वगस्थिकृ(ग)तं पापं देहे तिष्ठति मामके ।
प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥
इति मन्त्रेण प्राशयित्वा सर्वपापैः प्रमुच्यते मुक्तो भवति मुक्तो भवति ॥

(*b*) गोत्रप्रवरखण्डः.

GŌTRAPRAVARAKHAṆḌAḤ.

Foll. 3*a*—6*b*.

Same work as that described under No. 2912 of the D.C.S. MSS., Vol. V.

Complete.

(*c*) अघविवेचनम्.

AGHAVIVĒCANAM.

Foll. 6*b*—10*b*.

Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V.

Complete.

(*d*) अघनिर्णयः, सव्याख्यः.

AGHANIRṆAYAḤ WITH COMMENTARY.

Foll. 10*b*—36*b*.

Similar to the commentary described under Nos. 2994 and 2995 of the D.C.S. MSS., Vol. V. The text is by Vēṅkaṭacārya of Hārītagōtra and the commentary is by Rāmānujayajvan.

Complete.

This commentary is also called Aghanirṇayadīpikā.

Beginning:

वन्देऽहं जानकीजानिचरणाम्बुरुहद्वयम् ।
मद्गुरो रामचन्द्रस्य पादकोटिमनुस्मरन् ॥
सुरासुरशिरोरत्नं (. . .) वक्ष्याम्याशौचानिर्णयम् ॥

अनेन प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च सर्वस्मात्परसर्वनमस्कार्यपुण्डरीकाक्षरूपेष्टदेवताप्रणामरूपं मङ्गलं कृत्वा स्वकृतिनाम च कीर्तयति । द्वितीयश्लोकेनाशौचशब्दार्थं वदति—

निमित्तं पिण्डदानादेः पुरुषस्थमशुद्धिकृत् ।
कालस्नानापनोद्यं यत्तदाशौचमितीरितम् ॥

End:

अथ स्वस्य लोके प्रसिद्ध्यर्थं स्वगोत्रनामविद्यां च कीर्तयन् स्वकृतिमुपसंहरति—

हारीतो वेङ्कटाचार्यः (. . .) अकरोदघानिर्णयम् ॥
श्रुतिस्मृतिसदाचारनिरतेन च यज्वना ।
कृता रामानुजेनेत्थमघानिर्णयदीपिका ॥

Colophon:

अघनिर्णयस्समाप्तः ॥

(*e*) अघनिर्णयः.

AGHANIRṆAYAḤ.

Foll. 37*a*—43*b*.

Same work as that described under No. 2985 of the D.C.S. MSS., Vol. V. By Hārīta Vēṅkaṭacārya.

Incomplete.

R. No. 4073.

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 75. Lines, 7 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriya, B.A., B.L., High Court Vakil, Karur, Trichinopoly district.

(*a*) कैशिकमाहात्म्यम्.

KAIŚIKAMĀHĀTMYAM.

Foll. 1*a*—5*a*. Fol. 5*b* is left blank.

Same work as that described under No. 2394 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

(*b*) प्रसन्नराघवम्.

PRASANNARĀGHAVAM.

Foll. 6*a*—61*b*.

Same work as that described under No. 12562 of the D.C.S. MSS., Vol. XXI.

Complete, but the leaves are in disorder.

The scribe adds—

श्रीनिवासस्य पौत्रेण चक्रवर्तितनूभुवा ।
वीरराघवदासेन लिख्यन्ते ग्रन्थविस्तराः ॥

श्रीवत्सान्वयवार्धिकौस्तुभनिभश्रीनिवासाचार्यपौत्रेण चक्रवर्तिकृष्णमाचार्यतनूभुवा वेङ्कटवीरराघवदासेन लिखितं प्रसन्नराघवं नाम नाटकम् ॥

(*c*) क्षमाषोडशी, सव्याख्या.

KṢAMĀṢOḌAŚĪ WITH COMMENTARY.

Foll. 62*a*—74*a*.

Same work as that described under R. No. 88*b* of the Tamil Part.

Complete.

Fol. 75 gives the Dvayaprakaraṇa portion in the Tamil language. Fol. 74*b* is left blank.

R. No. 4074.

Palm-leaf. $18\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 39. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar Avargal, Nerur, Karur taluk, Trichinopoly district.

Foll. 1—4, 35 and 38*a*—39*b* are left blank.

(*a*) ऐतरेयोपनिषद्भाष्यटीका.

AITARĒYŌPANIṢADBHĀṢYAṬĪKĀ.

Foll. 5*a*—34*b*.

Same work as that described under R. No 1475 ante. By Abhinava-nārāyaṇēndrasarasvatī, disciple of Jñānēndrasarasvatī.

Complete.

(*b*) पञ्चीकरणविवरणम्.

PAÑCĪKARAṆAVIVARAṆAM.

Foll. 36*a*—37*b*.

A metrical exposition of the Pañcīkaraṇa of Śaṅkarācārya, which work is described under No. 4635 of the D.C.S. MSS., Vol. IX. The work is called Ātmānusandhāna and its author is not given.

Complete.

Beginning:

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

शब्दाद्व्योम स्पर्शतस्तेन वायुस्ताभ्यां रूपाद्वह्निरेतैं रसाच्च ।
अम्भांस्येभिर्गन्धतो भूधराद्या भूतानि स्युः पञ्चधैव क्रमेण ॥

एवं जातेषु भूतेषु प्रत्येकं विभजेद् द्विधा ।
चतुर्धा भिन्नमेकैकमर्धमर्धं तथा स्थितम् ॥

End:

सत्त्वेन चित्तं क्षेत्रज्ञं गुणैर्वैकारिकं परे ।
अप्सु क्षितिमपो ज्योतिःतच्च(व्यदो) वायौ नभस्यमुम् ॥

इत्यक्षरमथात्मानं चिन्मात्रमवशेषतः ।
जा . . . . . च विरमेद्दग्धयोनिरिवानलः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्करभगवत्पादविरचितपञ्चीकरणविवरणमात्मानुसन्धानं समाप्तम् ॥

Foll. 35, 38 and 39 are left blank.

R. No. **4075**.

Palm-leaf. $8\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 63. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

हरिमीडेस्तोत्रम्, सव्याख्यानम्.

HARIMĪḌĒSTŌTRAM WITH COMMENTARY.

Same work as that described under No. 10476 of the D.C.S. MSS., Vol. XVIII. By Svayaṁprakāśa, disciple of Kaivalyānandayōgīndra.

Fol. 10*a* contains notes on this commentary. Fol 10*b* is left blank.

Complete.

R. No. **4076**.

Palm-leaf. $12 \times 1\frac{5}{8}$ inches. Foll 81. Lines, 10 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

शङ्करविजयविलासः.

ŚAṄKARAVIJAYAVILĀSAḤ.

Same work as that described under No. 12173 of the D.C.S. MSS., Vol. XX.

Complete in 32 Adhyāyas.

Beginning:

अज्ञानतिमिरान्धस्य (. . .) तस्मै श्रीगुरवे नमः ॥
अस्तु स्वस्तिकृते वस्तु निस्तुलानन्दनिर्भरम् ।
वस्तु वा शाङ्करं नः स्यादीप्सितार्थसमृद्धये ॥

* * * *

विज्ञानकन्दः—

श्रीमन् गुरो देशिकेन्द्र परिज्ञाताखिलागम ।
ब्रह्मसूत्रार्थविज्ञानविच्छिन्नद्वैतभावन ॥
श्रीमद्गुरुकृपाप्राप्तपारम्पर्यमहोदधे ।
शङ्कराचार्यचरितं भक्तितः पठ्यते त्वया ॥
पवित्रं तच्चरित्रं तु श्रोतुं मेऽस्ति कुतूहलम् ।
अन्तेवासिनि मय्यीष(यीष)दनुकम्पा तवास्ति चेत् ॥

* * * *

श्रीचिद्विलासः—

साधु पृष्टं त्वया प्राज्ञ गुरुभक्तिकृतादर ।
सहस्रास्योऽपि तद्वक्तुं लिखितुं वा दिवाकरः ॥
न शक्नोति किमेकास्यो ब्रूयां विस्तरतः कथम् ? ।
प्रश्नेनानेन तुष्टोऽस्मि यज्ज्ञातं मद्गुरोर्मुखात् ॥
तत्ते प्रियाय शिष्याय वक्ष्यामि शृणु सादरम् ।
भगवत्पादपूज्यानामाविर्भावं सतां हितम् ॥

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्द-तपोधनेन्द्रसंवाद शङ्करविजयविलासे प्रथमोऽध्यायः ॥

End:

शङ्कराचार्यचरितमिदमस्तु शुभावहम् ।
आचन्द्रतारकस्थायि भवताज्जगतीतले ॥
दत्तादनिशमिष्टं नः श्रीमच्छङ्करदेशिकः ।
पठनाच्छ्रवणाद्वापि लिखनाद्दानतोऽपि वा ॥
सत्पात्रेभ्यो द्विजातिभ्यः (परां च) श्रियमश्नुते ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपो-धनेन्द्रसंवादे शङ्करविजयविलासे द्वात्रिंशोऽध्यायः ॥

समाप्तोऽयं ग्रन्थः ॥

The scribe adds—

श्रीमुखाब्दे ज्येष्ठशुक्लपौर्णम्यां भौमवासरे ।
देशिकेन्द्रस्य चरितं लिखितं सुब्बसूरिणा ॥

श्रीमुखज्येष्ठशुक्लपूर्णिमायां भौमवासरे काश्यपगोत्रशङ्करशास्त्रिसुतेन सुब्बायशास्त्रिणा लिखितम् ॥

R. No. **4077.**

Palm-leaf. 16 × 1½ inches. Foll. 101. Lines, 9 in a page. Telugu.

Very much injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

शङ्करविजयः.

ŚAṄKARAVIJAYAḤ.

Same work as that described under R. No. 1161 ante. By Ānandagiri.

This work is also called Gurudigvijaya.

Complete.

Foll. 1, 2, 39*b* and 100*a*—101*b* are left blank.

R. No. **4078.**

Palm-leaf. 14½ × 1¼ inches. Foll. 24. Lines, 6 in a page. Telugu

Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

Foll. 22*a*—23*b* contain the Phalaśruti of the Garbhapurīmāhātmya.

गर्भपुरीमाहात्म्यम्.

GARBHAPURĪMĀHĀTMYAM.

Foll. 1*a*—20*b*.

On the greatness and religious importance of the holy place Karur, a town in the Trichinopoly district.

Breaks off in the seventh Adhyāya

Beginning:

शुक्लाम्बरधरं (. . .) शान्तये ॥
सत्रान्ते नैमिशारण्ये शौनकाद्यास्तपोधनाः ।
सूतमभ्यागतं दृष्ट्वा पप्रच्छुरिदमादरात् ॥

* * * *

तदा सनत्कुमारस्तु नत्वा स्तुत्वा महेश्वरम् ।
भगवन् पार्वतीनाथ लोकानुग्रहकाम्यया ॥
गर्भपुर्याश्च माहात्म्यं कृपया वद मे प्रभो ।

* * * *

Colophon :

इति श्रीब्रह्मकैवर्ते महापुराणे उपरिभागे क्षेत्रखण्डे आम्रवतीमाहात्म्यं नाम अष्टाधिकशततमोऽध्यायः ॥

प्रथमोऽध्याय ॥

End :

तच्च स्थानं परममलं वेदवेदान्तवेद्यं
शुद्धं शैवं सकलमुनिभिस्सेवितं पूजितं च ।
आद्यं लोकत्रयगुरुतरं सर्वसौभाग्यमूलं
पश्यन्मुक्तो भवति स सुखी धन्यतां याति नित्यम् ॥

Colophon :

इति ब्रह्मकैवर्तके महापुराणे शिवक्षेत्रखण्डे उपरिभागे गर्भपुरीमाहात्म्ये पशुनाथप्रशंसा नाम त्रयोदशाधिकशततमोऽध्यायः ॥

षष्ठोऽध्यायः ॥

श्रीसूतः—

अथैतत्संप्रवक्ष्यामि स्थानमाहात्म्यमुत्तमम् ।
शिवसायुज्यदं पुंसां सर्वपापविमोचकम् ॥

* * * *

निवसन् क्षणमात्रेण मुक्तो भवति नित्यशः ॥

Foll. 21 and 24 are left blank.

R. No. **4079.**

Palm-leaf. 14½ × 1⅜ inches. Foll. 155. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Saṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

(*a*) द्वादशमञ्जरिका, सव्याख्या.

DVĀDAŚAMAÑJARIKĀ WITH COMMENTARY.

Foll. 1*a*—20*b*.

Same commentary as that described under No. 10067 of the D.C.S. MSS., Vol. XVIII. The commentary is by Svayaṁprakāśayōgin, disciple of Gōpālayōgīndra.

Complete ; but wants the first stanza in the beginning and contains an additional stanza in the end.

This commentary is called Makaranda.

मञ्जरीभिर्द्वादशाभिर्मकरन्दविभूतिभिः ।
पूजितो भगवानस्तु हरिस्सर्वजगद्गुरुः ॥
यत्कृपासिन्धुमग्नेषु(न) लब्धो ज्ञानविधिर्मया ।
तं वन्दे भगवत्पादशङ्करं लोकशङ्करम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालयोगिसरस्वतीशिष्यश्रीमत्स्वयम्प्रकाशयोगिविरचिता मकरन्दाख्या द्वादशमञ्जरीव्याख्या समाप्ता ॥

(*b*) श्वेताश्वतरोपनिषद्दीपिका.

ŚVĒTAŚVATARŌPANIṢADDĪPIKĀ.

Foll. 22*a*—90*a*. Foll. 76 and 79 give several footnotes on this work. Fol. 90*b* contains the Dvāsuparṇāśrutyartha. Fol. 21 is left blank.

Same work as that described under No. 810 of the D.C.S. MSS., Vol. I, Part III. By Vijñānōttama, pupil of Jñānōttama.

Complete.

(*c*) ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Foll. 91*a*—109*b*.

Same work as that described under Nos. 4659 and 4660 of the D.C S. MSS., Vol. IX. By Śaṅkarācārya.

Contains the first Pāda incomplete.

(*d*) गोविन्दाष्टकम्, सव्याख्यानम्.

GŌVINDĀṢṬAKAM WITH COMMENTARY.

Foll. 110*a*—119*b*.

Same work as that described under No. 9973 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*e*) भागवतसारसङ्ग्रहः.

BHĀGAVATASĀRASAṄGRAHAḤ.

Foll. 121*a*—147*b*. Foll. 120, 148 and 149 are left blank.

Similar to the work described under R. No. 1642 ante.

Complete.

Beginning:

कृष्ण कृष्ण महाभाग भक्तानामभयङ्कर ।
त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥

संसृतेर्हेतोर्दह्यमानानामिति । तस्या अपवर्गः अपवर्जयिता नाशकृदित्यर्थः ।

त्वमाद्यः पुरुषः साक्षात् ईश्वरः प्रकृतेः परः ।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥

यतस्त्वमीश्वरस्साक्षात्कृतः प्रकृतेः परः पुरुषः ।

* * * *

Colophon:

इति प्रथमस्कन्धे ।

End:

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ।
य इदं कृपया तस्मै व्याचचक्षे मुमुक्षवे ॥

व्याचचक्षे — व्याख्यातवान् ।

योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ।
संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥

यच्छौचनिस्सृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्नि विधृतेन शिवश्शिवोऽभूत् ।
ध्यातुर्मनश्शमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥
सञ्चिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।
उत्तुङ्गरत्नविलसन्नखचक्रवालज्योत्स्नाभिराहतमहीध्र(हृद्)दयान्धकारम् ॥

Colophon:

इति श्रीमद्भागवते महापुराणे सारसङ्ग्रहस्समाप्तः ॥

(*j*) अपरोक्षानुभवामृतम्.

APARŌKṢĀNUBHAVĀMṚTAM.

Foll 150*a*—155*b*.

Same work as that described under No. 4540 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Complete.

This is also called Aparōkṣānubhūti.

Colophon:

इति शङ्कराचार्यविरचितमपरोक्षानुभवामृताख्यप्रकरणं सम्पूर्णम् ॥

R. No. **4080.**

Paper. 17 × 1½ inches. Foll. 52. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

Fol. 1*a* gives a small portion of the Padapāṭha of the first Anuvāka of the first Praśna in the third Kāṇḍa of the Kṛṣṇayajurvēda. Foll. 2 and 3 are left blank.

अभिज्ञानशाकुन्तलव्याख्यानम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

Foll. 4*a*—50*a*. Fol. 50*b* is left blank.

Same commentary as that described under No. 12489 of the D.C.S. MSS., Vol. XXI, wherein see for the biginning. By Nīlakaṇṭha Dīkṣita.

Wants the introductory stanza of the commentary; otherwise complete.

End:

परिगतशक्तिः परिगता प्राप्ता शक्तिर्यस्य तथोक्तः । वामाङ्गीकृतसर्वमङ्गलः आत्मभूः नीललोहितः मम पुनर्भवं पुनर्जननं क्षपयतु प्रशमयतु नीललोहितेति श्रुतिः ॥

Colophon:

इति सकलकविसार्वभौमस्य श्रीकालिदासस्य कृतेः शाकुन्तलनाटकस्य नीलकण्ठदीक्षितेन कृता शाकुन्तलव्याख्या परिसमाप्ता ॥

निष्क्रान्तास्सर्वे सप्तमोऽङ्कः ॥ शाकुन्तलव्याख्यानं सम्पूर्णम् ॥

The scribe adds—

दुर्मुखिनामसंवत्सरे श्रावणमासे कृष्णाष्टम्यां श्रीवत्सगोत्रजलधिपारिजातस्य श्रीमद्विश्वनाथमखिनः नप्त्रा शेषाचलमखिपौत्रेण रामचन्द्रमखिनः पुत्रेण सुब्रह्मण्याख्येन सुधिया लिखिता शाकुन्तलव्याख्या ॥

Fol. 51 contains some stanzas of Amaruśataka. Fol. 52 is left blank.

R. No. 4081.

Palm-leaf. $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 121. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

(a) कठवल्ल्युपनिषद्भाष्यम्.
KAṬHAVALLYUPANIṢADBHĀṢYAM.

Foll. 1*a*—20*b*.

Same work as that described under Nos. 342 and 343 of the D.C.S. MSS., Vol. I, Part III. By Śaṅkarācārya.

Complete.

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छ-ङ्करभगवत्पूज्यपादकृतौ काठकोपनिषद्विवरणं समाप्तम् ॥

(b) अद्वैतपञ्चरत्नव्याख्या—किरणावली.
ADVAITAPAÑCARATNAVYĀKHYĀ : KIRAṆĀVALĪ.

Foll. 21*a*—33*b*.

Same work as that described under R. No. 1613(*b*) ante. By Kṛṣṇānandasarasvatī, disciple of Saccidānanda.

Complete.

The text is also called Sōpānapañcaka.

(c) बृहदारण्यकोपनिषद्भाष्यम्.
BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAM.

Foll. 34*a*—109*a*. Fol. 109*b* is left blank.

Same work as that described under No. 644 of the D.C.S. MSS., Vol. I, Part III. By Śaṅkarācārya.

Contains the sixth Adhyāya only.

(d) शेषार्या, सव्याख्या.
ŚEṢĀRYĀ WITH COMMENTARY.

Foll. 110*a*—121*b*.

Same work as that described under R. No. 3619(*a*) ante. By Rāghavānandamuni.

The text is also called Paramārthasāra and the commentary Śēṣāryādīpikā.

Almost complete.

R. No. 4082.

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 85. Lines, 7 in a page. Telugu and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

Fol. 1 contains the house account of Subbarāma Śāstrigaḷ. Foll. 3*b* and 4*a* are left blank.

(*a*) सङ्क्षेपशङ्करविजयः.
SAṄKṢĒPAŚAṄKARAVIJAYAḤ.

Foll. 2*a*—27*a*. Foll. 15*b* and 27*b* are left blank.

Same work as that described under No. 12174 of the D.C.S. MSS., Vol. XXI. By Vidyāraṇya.

Contains the Sargas 1 and 2 complete, 3 and 5 incomplete.

(*b*) नामलिङ्गानुशासनम्, आन्ध्रटीकासाहितम्.
NĀMALIṄGĀNUŚĀSANAM WITH TELUGU MEANING.

Foll. 28*a*—66*b*.

Same work as that described under No. 1620 of the D.C.S. MSS., Vol. III.

Contains the third Kāṇḍa complete.

Date of transcription—Wednesday, the 14th day of the bright fortnight of the lunar month Āśvayuja in the year Kīlaka.

Foll. 67 and 68 contain a portion of the sixth Sarga of Vidyāraṇya's Saṅkṣēpaśaṅkaravijaya.

(*c*) पाणिनीयशिक्षा.
PĀṆINĪYAŚIKṢĀ.

Foll. 69*a*—71*a*.

Same work as that described under No. 989 of the D.C.S. MSS., Vol. II.

Complete.

(*d*) वेदाङ्गज्यौतिषम्.

VĒDĀṄGAJYAUTIṢAM.

Foll. 71*a*—74*b*.

Same work as that described under No. 1027 of the D.C.S. MSS., Vol. II.

Complete.

(*e*) छन्दः.

CHANDAḤ.

Foll. 74*b*—78*b*. Fol. 79 contains a small portion of Nirukta. Foll. 80*a*—83*b* contain the Agnisandhānaprayōga.

Same work as that described under No. 901 of the D.C.S. MSS., Vol. II.

Complete.

R. No. **4083.**

Palm-leaf. 13⅛ × 1⅛ inches. Foll. 105. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

(*a*) श्यामलादण्डकः.

ŚYĀMALĀDAṆḌAKAḤ.

Foll. 1*a*—3*b*.

Same work as that described under No. 10837 of the D.C.S. MSS., Vol. XIX.

Complete.

Foll. 4*a*—6*a* contain Jyautiṣaviṣaya. Fol. 6 gives the Viṣṇustuti. Fol. 7 contains some Telugu sentences.

(*b*) विक्रमराघवम्.

VIKRAMARĀGHAVAM.

Foll. 8*a*—105*a*.

Same work as that described under R. No. 3898(*c*) ante, wherein see for the beginning.

Contains the Sargas 1—16 complete.

End :

शिरोभिः श्रीरामं समुचितमहारत्नमकुटैः
प्रणम्य क्ष्मापालेष्वधिगततदीयानुमतिषु ।

चलत्सु स्वान् देशान् प्रति पथि चिरादागममुदा
ननर्त क्ष्मावल्गत्कुचशिखरिणी सैन्यसराणिः ॥
रामो जाम्बवदाञ्जनेयनलसुग्रीवाङ्गदादीन् कपीन्
सोत्कण्ठं विससर्ज तान् कथमपि प्रायः पुनः प्राप्तये ।
येषां विक्रमपद्धतिं व्यजयत प्रत्यर्थिसङ्घे पुरा
शृङ्गोच्छृङ्खलकृष्णसारसमितौ शार्दूलविक्रीडितम् ॥
रामः श्यामस्तनाग्रां रहसि जनकजां लज्जमानां कृशाङ्गी-
मारोप्य स्वाङ्कपालीमसकृदनुनयन् काममापृच्छमानः ।
रम्ये माणिक्यहर्म्ये सरसमरमत स्वानुकूलानुजन्मा
भारं विन्यस्य मन्त्रिप्रवितिनिबिडयशास्स्रग्धराया धरायाः ॥

पूर्वार्धं तदेव.

Colophon:

इति सप्तद(षोड)शः सर्गः ॥

सा स्निग्धमुग्धाश्रमकन्यकासु सञ्चारिहंसावलिसैकतासु ।
पत्यानुयुक्ता पुनरिच्छतिस्म मन्दाकिनीतीरमहीषु वस्तुम् ॥

R. No. **4084.**

Palm leaf. $17\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 39. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. P. Śaṅkara Ayyar, Nerur, Karur taluk, Trichinopoly district.

(*a*) रामान्वयभूषणव्याख्या—दीप्तिः.

RĀMĀNVAYABHŪṢAṆAVYĀKHYĀ : DĪPTIḤ.

Foll. 1*a*—9*b*

A commentary on Vilinātha's Rāmānvayabhūṣaṇa, a poem describing the story relating to the ancestors of Śrī-Rāma : by Kanakasabhāvallabha, son of Vilinātha, author of the text. This commentary is called Dīpti.

Contains the commentary on 37 stanzas in the first Sarga.

Beginning:

स(श)मीधरो यस्य करो रमण्याश्लेषं धरण्या जलकेलिषु द्रात्(क्)।
आहृत्य दत्ते मुहुरद्य सोऽयं पुरातनो मे पुरतोऽस्तु हस्ती ॥

स्थाणुः पिता यस्य जनन्यपर्णा स्वयं विशाखः सुमुख(स्सहोदरः) ।
. . . . सोऽवतु मां कुमारः ॥

* * * *

स्वस्याङ्घ्रिमाप्तम(चिरे)ण विभीषणं य(ः)
सूर्यात्मजातमपि राज्यपदेऽभिषिच्य ।
पश्चात्स्वयं भरतदत्तमवाप राज्यं
स्याद्भूतये मम स कोऽपि दयाविशेषः ॥
रचितं पितृचरणैः स्वैः रामान्वयभूषणं महाकाव्यम् ।
कृतधीर्व्याचिख्या(स)ति कनकसभावल्लभो मुदे विदुषाम् ॥
काव्यं रामकथामृतोर्मिलमिदं कर्ता कवीन्द्रस्सुधी-
श्लाघोदञ्चितसूक्तिवञ्चितबुधः श्रीवीलिनाथो बुधः ।
(वैदु)ष्यैकफलं तदस्य तनयो व्याख्यामतिख्यामार्तिं
दीप्ता(प्त्या)ख्यां वितनोति भाग्यविभवाड्यीरः सभावल्लभः ॥
प्रायोऽन्वयमुखेनैव प्रणीतेऽस्मिन् रसोत्तरे ।
काव्ये व्याख्याति सङ्क्षिप्य कठिनानि स्थलान्ययम् ॥

ननु काव्येषु कथं प्रवर्तन्ते प्रेक्षावन्तः प्रयोजनाभवात् । न च काव्यं यशसेऽर्थकृत इत्यादिरेव प्रयोजनमि(ति) वाच्यम् ।

* * * *

मन्यमानस्तत्र भवानयं वीलिनाथो नाम विबुधावतंसो रामान्वयभूषणाख्यं महाकाव्यं चिकीर्षन् स्वग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं सम्प्रदायाविच्छेदसिद्ध्यर्थं च प्रत्यूहपरिपन्थिनो गणाधिपतेः प्रणामं मनसि निधाय ग्रन्थकृतावैकाग्र्यस्यैश्वर्यहेतुकतया प्रथममैश्वर्यमभ्यर्थयते—क्रीडास्विति । अत्र क्रीडा विहार इति वि[र]हारार्थक्रीडाशब्दस्य मुक्तामाणिक्यशब्दयोः

* * * *

अथ रामचरित्रमुपवर्णयन् कथामुपक्षिपति—उदग्रेति । उदग्रेषु उन्नतेषु भोगेषु स्रक्चन्दनवनितादिविषयेषु ; भोगस्सुखे स्त्र्यादिभुक्तावहेश्च फणकाययोः—इत्यमरः ।

End:

वृक्षाणां गुल्मानां लतावल्यानां च जाले समूहे नाम्नां धवखदिरपला-शादिनामधेयानां प्रभेदस्यावगमाय ज्ञानाय नव्यानि नवीनानि प्रवालानि किसलयान्येव चीट्यः चीटिकाः ता बालकिसलयरूपचीटिकाः परितस्समन्ततः न्यबध्नात् निबध्नातिस्म यथा पुस्तकसमूहेषु विशेषपरिज्ञानाय चीटिका बध्नन्ति, त . . . . ज्ञानाय चीटिका बबन्धेत्यर्थः । ३७.

(*b*) श्रीविद्याम्नायोपनिषद्.

ŚRĪVIDYĀMNĀYŌPANIṢAD.

Foll. 10*a*—15*b*.

Same work as that described under No. 5736 of the D.C.S. MSS., Vol. XII.

Incomplete.

(*c*) भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Foll. 16*a*—39*b*. Foll. 23*b* and 24 are left blank.

Same work as that described under No. 12080 of the D.C.S. MSS., Vol. XX.

Contains the Nīti, Śṛṅgāra and Vairāgya-śatakas complete, but the leaves are in disorder

---

R. No. **4085.**

Palm-leaf. 12½ × 1½ inches. Foll. 53. Lines, 7 in a page. Grantha. Much injured.

Presented in 1921-22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur taluk, Trichinopoly district.

Fol. 1*a* gives the first stanza of this work. Fol. 1*b* is left blank.

अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Foll. 2*a*—40*a*. Foll. 40*b*—53*b* are left blank.

Same work as that described under No. 3588 of the D.C.S. MSS., Vol. VIII.

Breaks off in the ninth Sthala.

R. No. 4086.

Palm-leaf. $12\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 83. Lines, 10 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Same work as that described under No. 13519 of the D.C.S. MSS., Vol. XXIV ; without the introductory stanzas in the beginning and without the additional stanzas in the end. By Narasiṁha.

Complete.

R. No. 4087.

Palm-leaf. $14\frac{5}{8} \times \frac{7}{8}$ inches. Foll. 78. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

Fol. 1 contains some benedictive stanzas and some stanzas determining the time of the Rāmāvatāra.

महानाटकसुधानिधिः.

MAHĀNĀṬAKASUDHĀNIDHIḤ.

Foll. *2a—77a*.

Same work as that describedunder R. No. 1504(*a*) ante. By Immaḍi Dēvarāja.

Complete.

Fol. 78*a* contains some anthological stanzas. Foll. 16*b*, 77*b* and 78*b* are left blank.

Date of transcription—Sunday, the 10th day of the bright fortnight of the solar month Kanyā in the year Īśvara.

R. No. 4088.

Palm-leaf. $16 \times 1\frac{1}{4}$ inches. Foll. 105. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

विष्णुसहस्रनामभाष्यम्.

VIṢṆUSAHASRANĀMABHĀṢYAM.

Same work as that described under No. 9073 of the D.C.S. MSS., Vol. XVIII. By Śrīraṅganātha, also known as Parāśarabhaṭṭa, son of Śrīvatsāṅkamiśra of Hārītagōtra.

Complete, but without the Phalaśruti portion.

Foll. 17*b* and 105*b* are left blank.

R. No. **4089.**

Palm-leaf. 13¾ × 1⅛ inches. Foll. 16. Lines, 7 in a page. Grantha and Tamil. Good.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

अन्योक्तिमाला.

ANYOKTIMĀLĀ.

Foll. 1*a*—16*a*.

Same work as that described under No. 11995 of the D.C.S. MSS., Vol. XX. By Accādīkṣita of Appayadīkṣita family.

Contains the second Āśvāsa complete.

R. No. **4090.**

Palm-leaf. 15 × 1⅛ inches. Foll. 167. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

Fol. 1 contains some notes on this work.

वेदान्तदीपः.

VĒDĀNTADĪPAḤ.

Same work as that described under No. 5011 of the D.C.S. MSS., Vol. X. By Rāmānujācārya.

Complete.

Fol. 2 contains a small portion of this work. Fol. 3*a* contains the Ābdikādiśrāddhānnabhōjanaprāyaścittavacanas. Foll. 3*b*—5*b* and 167 are left blank.

Date of transcription—The 32nd day of the solar month Āni in the year Kīlaka. Name of the scribe—Vīrarāghavācārya, son of Śēṣācārya of Iccampāḍi.

R. No. **4091**.

Palm-leaf. 14¼ × 1 inches. Foll. 88. Lines, 6 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

(*a*) रामायणव्याख्यानम्—विवेकतिलकम्.

RĀMĀYAṆAVYĀKHYĀNAM : VIVĒKATILAKAM.

Foll. 1*a*—82*a*.

Same work as that described under R. No. 3409 ante. By Varadarāja alias Cōlapaṇḍita Brahmarāja.

Contains the Ayōdhyākāṇḍa complete, but wants the beginning.

(*b*) श्रुतबोधः.

ŚRUTABŌDHAḤ.

Foll. 83*a*—88*a*. Fol. 88*b* is left blank.

Same work as that described under No. 1800 of the D.C.S. MSS., Vol. III. By Kālidāsa.

Incomplete.

The scribe adds—

लिखितो वीररामेण श्रुतबोधस्सुखप्रदः ।
राक्षसे वत्सरे कर्किमासे कृष्णतृतीयके ॥

R. No. **4092**.

Palm-leaf. 14½ × 1 inches. Foll. 218. Lines, 4 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

(*a*) कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Foll. 3*a*—162*b*. Foll. 1 and 2, 59*b* and 112 are left blank.

Same work as that described under R. No. 4086 ante. By Nṛsiṁha.

Complete.

(*b*) जातकालङ्कारः.

JĀTAKĀLAṄKĀRAḤ.

Foll. 163*a*—174*b*.

Same work as that described under Nos. 13722 and 13723 of the D.C.S. MSS., Vol. XXIV.

Complete.

Foll. 174*b*—185*b* contain the Ariṣṭaviṣaya, Lagnanighaṇṭu, Rājayōga and Praśnaviṣaya.

(*c*) प्रश्नमहोदधिः.

PRAŚNAMAHŌDADHIḤ.

Foll. 185*b*—192*a*.

Same work as that described under Nos. 13953 and 13954 of the D.C.S. MSS., Vol. XXIIV. By Pṛthuyaśas, son of Varāhamihira.

Complete.

(*d*) कृष्णीयम्.

KṚṢṆĪYAM.

Foll. 192*a*—194*a*.

Same work as that described under No. 13924 of the D.C.S. MSS., Vol. XXIV.

Contains the sixth Adhyāya only.

Foll. 194*a*—197*b* contain a portion of the Hōrāśāstra. Foll. 197*b*—218*a* contain the Utpātaśataka. Fol. 218*b* is left blank.

R. No. **4093**.

Palm-leaf. 13¾ × 1¼ inches. Foll. 102. Lines, 7 in a page. Grantha and Tamil. Good.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

(*a*) यज्ञोपवीतप्रतिष्ठाविधिः.

YAJÑŌPAVĪTAPRATIṢṬHĀVIDHIḤ.

Foll. 1*a*—2*b*.

Same work as that described under No. 2850 of the D.C.S. MSS., Vol. V. By Vēdāntadēśika.

Complete.

(*b*) न्यासदशकम्.

NYĀSADAŚAKAM.

Foll. 2*b*—3*a*.

Same work as that described under R. No. 175(*d*) ante. By Vēdāntadēśika.

Complete.

(*c*) प्रातरनुसन्धेयश्लोकाः.

PRĀTARANUSANDHĒYAŚLŌKĀḤ.

Foll. 3*b*—7*b*.

Similar to the work described under R. No. 673(*k*) ante.

Complete.

Beginning:

ब्राह्मे मुहूर्ते उत्थाय हरिर्हरिर्हरिरिति सप्तकृत्व उच्चार्य
ग्राहग्रस्ते गजेन्द्रे रुवति . . . संहृतेर्नः ॥

End:

प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः ।
श्लोकद्वयेन सङ्क्षिप्तं सुव्यक्तं वरदोऽब्रवीत् ॥

Colophon:

प्रातःकालानुसन्धानश्लोकास्सम्पूर्णाः ॥

(*d*) पञ्चकालानुष्ठानक्रमः.

PAÑCAKĀLĀNUṢṬHĀNAKRAMAḤ.

Foll. 8*a*—20*b*.

Similar to the work described under No. 5278 of the D.C.S. MSS., Vol. XI.

Complete.

Beginning:

विगाहे निगमान्तार्यदयादिव्यतरङ्गिणीम् ।
संसारधर्मसन्तप्तसञ्जीवनविचक्षणाम् ॥
अभिगमनादिपञ्चकालक्रमः श्रीपाञ्चरात्ररक्षायां प्रपञ्चितः ।
तत्सारार्थसङ्ग्रहेण लिख्यते । अथोपक्रम्यते नित्यकर्तव्यक्रमः ।
नाथयामुनपूर्णादिसम्प्रदायसरित्पथे ।
निजकर्मादिभक्त्यन्तं कुर्यात्प्रीत्यैव कारितः ॥
उपायतां परित्यज्य न्यसेद्देवे कृतामभीः ।

अथ परमैकान्ती ब्राह्मे मुहूर्त उत्थाय हरिर्हरिरिति सप्तकृत्व उच्चै-रुच्चरेत्

* * * *

अतिक्रान्तमनन्तं कालं निरर्थमवलोक्य निर्वेदं परमं गच्छेत् ।

End:

परमैकान्तिभिरनवधिकपरमपुरुषचरणपरिचर्याकिरणरूपापवर्गैश्वर्यं(परमैश्वर्यं) यथारोग्यं यथायोग्यं चात्रैव भोक्तव्यम् इति सिद्धम् ॥

Colophon:

इति पञ्चकालानुष्ठानक्रमः ॥

देशिको निगमान्तार्यात्तद्भक्तात् सात्त्विको जनः ।
तत्सूक्तेश्च प्रबन्धोऽन्यो नास्ति नास्ति महीतले ॥

योगः समाप्तः ॥

Foll. 21*a*—22*b* contain the Ūrdhvapuṇḍravidhi. Foll. 22*b*—24*b* contain the Sandhyāvandanavidhi. Foll. 24*b*—26*b* contain the Aṣṭākṣaranyāsa. Foll. 27*a*—28*a* contain the Ādhāraśaktiprakaraṇa. Foll. 28*b*—30*b* contain the Praśnacakravidhi. Foll. 31*a*—32*a* contain the Brahmakūrcapañcagavyavidhi. Foll. 32*a*—35*a* contain the Samprōkṣaṇavidhi. Foll 35*a*—39*b* contain the Gṛhārcanavidhi.

(*e*) सन्ध्यावन्दनमन्त्रार्थनिर्णयः.

SANDHYĀVANDANAMANTRĀRTHANIRṆAYAḤ.

Foll. 39*b*—54*a*.

An investigation of the meaning of Sandhyāvandanamantra. The Mantra is explained as referring to god Viṣṇu

Complete.

Beginning:

पुण्डरीकासनासीनं पाण्डुराभ्रेन्दुसन्निभम् ।
अखण्डबोधजनकं हयग्रीवमुपास्महे ॥

नमामि शठजिद्योगिचरणाम्बुरुहं हि मे ।
यत्प्रसादेन वेदार्थो हस्तामलकतां गतः ॥

आपो हि ष्ठादिमन्त्राणां व्याख्यास्सन्ति सहस्रशः ।
त्रय्यन्तार्थानुसारेण व्याख्येयं क्रियते मया ॥

आपो हि ष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः, गायत्री छन्दः; आपो देवता; शिरःप्रोक्षणे विनियोगः । आपो हि ष्ठादिमन्त्राणां श्रीपाञ्चरात्रादिसच्छास्त्रेषु परमात्मा देवतेत्यभिधानात् अत्रत्या देवताशब्दाः परमात्मनारायणवाचकाः। अतोऽन्य[त्र]परतया प्रतीयमानानामपि आबादिशब्दानां नामरूपव्याकरणश्रुत्या परमात्मपरत्वं हि वेदान्ते निर्णीतम् ।

End:

उत्तरोत्तरं तव प्रीतिवर्धकास्त्वदिच्छानुविधायिनस्त्वत्स्वरूपरूपगुणगणविभूत्यनुभवैकरसा भवेमेत्यर्थः ॥

षष्टिप्रबन्धनिर्माता शठकोपमुनीशितुः ।
शिष्यो नारायणमुनिर्नित्यमन्त्रानुदञ्चयत् ॥

Colophon:

सन्ध्याशब्दार्थनिर्णयः सम्पूर्णः ॥

Foll. 54*a*—56*b* contain the Prapatyanuṣṭhānaprakāra, 56*b* and 57*a* give the Prāṇāgnihōtravidhi.

(*f*) ताताचार्यदिनचर्या.
TĀTĀCĀRYADINACARYĀ.

Foll. 57*b*—60*b*.

On the daily life of Tātācārya or Tātadēśikācārya of Conjeeveram, the maternal uncle of Appayaguru, who was the grandfather of Vēṅkaṭādhvari, author of Viśvaguṇādarśa.

Complete.

Beginning:

कविवादिशिरोरत्नं कल्याणगुणभूषणम् ।
विश्वामित्रान्वयाब्धीन्दुवेदान्तगुरुमाश्रये ॥

श्रीशैलपूर्णश्रीवंशकलशोदधिकौस्तुभम् ।
श्रीतातदेशिकगुरुं सेवे रम्यगुणाकरम् ॥

श्रीतातदेशिकगुरोर्दिनचर्यां शुभावहाम् ।
तत्कृपाप्रेरितो वक्ष्ये सन्तः स्वीकुर्वतामिमाम् ॥
ब्राह्मे मुहूर्ते तु विहाय शय्यां प्रक्षाल्य पादावुपविश्य सम्यक् ।
श्रीवेङ्कटेशं हृदि भावयन्तं श्रीतातयार्यं शरणं प्रपद्ये ॥

End :

इति श्रीतातयार्याणां दिनचर्यां शुभावहाम् ।
पठन्ति ये नरा लोके तरन्ति दुरितानि ते ॥
अच्छं चामरयुग्ममद्भुतमहाभिख्यं वरान्दोलिका-
दण्डे सिंहललाटचिह्नममलं वादित्रमप्यादरात् ।
वीरश्रीनरसिंहरायनृपतिः प्रादत्त यस्मै मुदा
सार्धं रङ्गनिकेतनेन तमिमं श्रीतातयार्यं नुमः ॥

Foll. 60*b* and 61*a* give the Mantrasnānavidhi. Fol. 61*b* contains a small portion of Tātācāryadinacaryāstōtra. Foll. 62*a*—64*b* contain the Mantrācamanavidhi. Foll. 65*a*—68*b* contain the Bhaktādipratiṣṭhāvidhi. Foll. 68*b*—70*b* contain the Aṣṭākṣaramantrādinyāsa. Foll. 70*b*—76*b* give the Sudarśanapañcagavyahōmādi. Fol. 76*b* and 77 contain the Bhagavadārādhanaviṣaya. Foll. 78*a*—92*b* contain the Āhnika portion. Foll. 92*b*—93*b* contain the Pādukāpratiṣṭhāvidhi. Fol. 94 gives the Bhaktapratiṣṭhāvidhi.

(*g*) वेदान्तदेशिकगद्यम्.
VĒDĀNTADĒŚIKAGADYAM.

Foll. 95*a*—97*b*.
Same work as that described under R. No. 673(*p*) ante.
Complete.
Foll. 98*a*—102*b* contain the Navagrahajapādi.

R. No. 4094.

Palm-leaf. 15¼ × 1⅝ inches. Foll. 109. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. N. C. Narasiṁhācāriyar, High Court Vakil, Karur, Trichinopoly district.

स्मृतिरत्नाकरः.
SMṚTIRATNĀKARAḤ.

Same work as that described under No. 2805 of the D.C.S. MSS., Vol. V. By Vēṅkaṭavarada alias Sarasvatī-Vallabha or Vaidikasārvabhauma, also known as Mitratāta or Tōḻappar.

Wants the beginning of the Saṁjñāprakaraṇa; otherwise complete.

R. No. **4095.**

Palm-leaf. $14\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 10. Lines, 9 or 10 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. R. Vīrarāghava Ayyaṅgār, Melappalaiyam, Karur taluk, Trichinopoly district.

(*a*) राघवयादवीयम्.
RĀGHAVAYADAVĪYAM.

Foll. 1*a*—2*b*.

Same work as that described under No. 1189 of the D.C.S. MSS., Vol. XX; without the introductory stanza.

Contains 1—46 stanzas only.

(*b*) राघवयादवीयम्, सव्याख्यानम्.
RĀGHAVAYĀDAVĪYAM WITH COMMENTARY.

Foll. 3*a*—10*b*.

Same work as that described under R. No. 135 ante.

The author of the text as well as the commentary was Vēṅkaṭādhvarin, son of Raghunāthadīkṣita and grandson of Appaguru alias Śrīnivāsadīkṣita of Araśāṇipālai.

Contains 32 stanzas only.

R. No. **4096.**

Palm-leaf. $16 \times 1\frac{1}{8}$ inches. Foll. 51. Lines, 8 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Vēṅkaṭarāghava Ayyaṅgār, Melappalaiyam, Karur taluk, Trichinopoly district.

Fol. 51 is left blank.

वरदराजस्तवः, सव्याख्यः.

VARADARĀJASTAVAḤ WITH COMMENTARY.

Same text as that described under No. 10339 and same commentary as that described under No. 10532 of the D.C.S. MSS., XVIII The commentator is Vēṅkaṭēśanivāsadāsa, son of Rāmānujaguru and grandson of Śēṣācārya of Ātrēyagōtra.

Date of transcription—The lunar month Mārgaśira in the year Bahudhānya.

Name of the scribe—Vīrāsāmi Ayyaṅgār of Kaṇṇapirān who copied this MS. from the original MS. belonging to Bhāvanācārya, North street, Srirangam.

Complete.

Beginning:

शेषाचलार्यतनुजो राजा(मा)नुजगुरुजवेङ्कटानिवासः ।
श्रीमन्त्ररत्नरीत्या श्री(सु)वरदराजस्तवं हि विवृणोति ॥

श्रीमद्भाष्यकारसकाशानिशसंवासप्रकाशितसमस्तश्रुत्यन्ततत्त्वार्थाः श्रीवत्साचिह्नमिश्रा आनृशंस्य(शान्त)मनसस्सकलसुमनस्सञ्चयसञ्जीवनाय पञ्चस्तवव्याजेनार्थपञ्चकं प्रकाशयितुकामाः प्रथमतो हि भगवतो वैकुण्ठनाथस्याकुण्ठमहिम्नः

* * * *

आशीर्विचनरूपं मङ्गलं निबध्नन्ति——

स्वस्ति हस्तिगिरिमस्तशेखरः सन्तनोतु मयि सन्ततं हरिः ।
निस्समाभ्यधिकमभ्यधत्त यं देवमौपनिषदं (दी)सरस्वती ॥

उपनिषत्सम्बन्धिनी औपनिषदी सरस्वती वाणी "न तत्समश्चा(भ्य)धिकश्च दृश्यते" इत्यादिवेदान्तवाक्यमित्यर्थः । देवं दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु — इत्युक्तसकलकल्याणगुणगणं यं निस्समाभ्यधिकमाह ।

End:

रामानुजाङ्घ्रिशरणोऽस्मि कुलप्रदीपस्त्वासीत्स यामुनमुनेस्स च नाथवंश्यः ।
वंश्यः पराङ्कुशमुनेस्स च सोऽपि देव्या दासस्तवेति वरदास्मि तवेक्षणीयः ॥

हे वरद ! रामानुजाङ्घ्रिशरणोऽस्मि न तु रामाङ्घ्रिशरणोऽस्मीत्यर्थः । "सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम् । न संशयोऽत्र तद्भक्तपरि-

चर्यारतात्मना"मिति भावः । स्वाचार्यस्यापि सम्प्रदायशुद्धिमाह स रामानुजस्तु यामुनमुनेः कुलप्रदीप आसीत् । विद्यावंशप्रकाशकोऽभवदित्यर्थः ।

* * * *

देव्याः परम्परासम्बन्धवद्रामानुजार्य(ङ्घ्रि)शरणोऽस्मि ततो हेतोः कटाक्षणीयोऽस्मि(इति)निष्कृष्टोऽर्थः ॥

Colophon :

इत्यात्रेयगोत्रभूषायमाणशेषाचार्यपौत्रेण श्रीरामानुजगुरुसूनुना श्रीवेङ्कटनिवासदासेन विरचिता श्रीवरदराजस्तवव्याख्या परिसमाप्ता ॥

R. No. **4097.**

Palm-leaf. 16⅛ × 1¼ inches. Foll. 123. Lines, 7 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Vīrarāghava Ayyaṅgār, Melappalaiyam, Karur taluk, Trichinopoly district.

Foll. 1 and 106*b*—123*b* are left blank.

विश्वप्रकाशः.

VIŚVAPRAKĀŚAḤ.

Foll. 2*a*—106*a*.

Same work as that described under Nos. 1745 and 1746 of the D.C.S. MSS., Vol. III. By Mahēśvara.

Contains up to Bānta.

For other particulars see the extracts on page 44 of the Report on Search for Tamil and Sanskrit Manuscripts, Vol. I, No. 2.

R. No. **4098.**

Palm-leaf. 16 × 1⅛ inches. Foll. 16. Lines, 6 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Kuṇḍalam Raṅgayyaṅgār, Vangal, Karur taluk, Trichinopoly district.

हंससन्देशव्याख्या.

HAṀSASANDĒŚAVYĀKHYĀ.

Same work as that described under No. 11914 of the D.C.S. MSS., Vol. XX; without the introductory stanzas.

Wants the beginning and the end.

R. No. **4099.**

Palm-leaf. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 71. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kuṇḍalam Raṅgayyaṅgār, Vangal, Karur taluk, Trichinopoly district.

Fol. 71*b* is left blank.

वेणीसंहारम्.

VĒṆĪSAṀHĀRAM.

Same work as that described under No. 12691 of the D.C.S. MSS., Vol. XXI. By Bhaṭṭanārāyaṇa.

Complete.

R. No. **4100.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 24. Lines, 8 in a page. Grantha and Tamil. Slightly injured.

Presented in 1921–22 by M.R.Ry. Kuṇḍalam Raṅgayyaṅgār, Vangal, Karur taluk, Trichinopoly district.

(*a*) न्यासरीतिः.

NYĀSARĪTIḤ.

Foll. 1*a*—7*b*.

On the five essential characteristics to be found in a person who wishes to attain salvation by self-surrender to God: by Raṅganāthayati, pupil of Raṅganāthayōgīndra.

Complete.

Beginning:

श्रीरङ्गनाथयोगीन्द्रपदपङ्कजतल्लजम् ।
कुलदैवतमस्माकं कलये कलिहानये ॥
येनाकिंचनशिष्याणां न्यासो गतिरुदाहृता ।
शरणं तं प्रपद्येऽहं रङ्गनाथयतिश्वरम् ॥

(व्यसनं), भीतिः, विश्वासः, शेषत्वज्ञानं, देवतान्तरवैमुख्यं, प्रयोजनान्तरवैमुख्यं, आकिञ्चन्यं and मोक्षार्थित्वम् *என்கிற ஷட்டதிகாரத்தைப் பூர்வன் ஸமாச்ரயணாதியிலதிகாரீ.*

End:

ஸாஸ்த்ரஸம்ப்ரதாயாலே திவி-ஸூக்ஷ்மார்த்தங்களிக்கத்தக்கன.

Colophon:

इति श्रीरङ्गनाथाख्ययोगीन्द्रकृतबुद्धिना ।
श्रीरङ्गनाथयमिना न्यासरीतिः प्रकाशिता ॥
इत्थं वण् स्रठकोपरङ्गकमिता तादृग्यतीन्द्रोर्गुरो-
रङ्घ्रिद्वन्द्वमुपाश्रितो यतिरिदं न्यासैकलक्ष्यं शुभम् ।
उच्चे ग्रन्थमबाधमानमभितस्सन्न्यायमिष्टार्थदं
कृष्णद्वन्द्वसनाथितो भुवि जनस्संवीक्ष्य संहृष्यतु ॥

Foll. *7b*—*9a* contain the Guruparamparāviṣaya in Tamil. Fol. *9b* is left blank. Foll. *10a*—*12a* contain the Rāmacandrārādhanaprayōga. Foll. *12b* and 13 are left blank. Foll. *14a*—*15b* contain the Prapattiviṣaya in Tamil.

(*b*) जयादिहोमः.

JAYĀDIHŌMAḤ.

Foll. *16a*—*18b*.

Same work as that described under Nos. 3623 and 3624 of the D.C.S. MSS., Vol. VII.

Incomplete.

Foll. *19a*—*20b* contain the Ghṛtasūkta and Āśīrvāda. Foll. 21 and 22 give the Viṣṇupāramyaviṣaya in Tamil. Fol. *23a* contains the Prōkṣaṇamantra. Fol. *23b* is left blank. Fol. *24a* contains the Anugrahagadya. Fol. *24b* is left blank.

R. No. 4101.

Palm-leaf. $14\frac{3}{8} \times 1$ inches. Foll. 30. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Kṛṣṇasvāmi Ayyaṅgār, Puliyur, Karur taluk, Trichinopoly district.

(*a*) मुमुक्षुधर्मसङ्ग्रहः.

MUMUKṢUDHARMASAṄGRAHAḤ.

Foll. 1*a*—15*b*.

On the religious duties and observances of a Prapanna belonging to the Vaḍakalai sect of Śrī-Vaiṣṇavas.

Incomplete.

Beginning:

अच्युतादेशतोऽवाचि मुमुक्षोर्धर्मसङ्ग्रहः ।
येन तेनैव तं नत्वा यद्याख्यार्येण तन्यते ॥

वेदोक्ते(न मुमुक्षु) धर्मनिवहेनाराध्यते यः स्वयं
नानादेवतनुः प्रवृत्तिसुकृतव्रातेन वर्णादिभिः ।
स्वाचारोक्तिसदुक्तिभिस्तदुभया(न्) धर्मान् सदा पालयन्
तत्तद्धर्मकृते तदर्हफलतः पायात्स मां माधवः ॥

येषां पादरजो भवाब्धितरणिः श्रीम(माध)वैकान्तिन-
स्तान् भक्तानथ नाथयामुनमुखान् सर्वान् गुरूंश्चानमन् ।
धर्मज्ञश्रुतिमोक्षधर्मनिवहोद्बोधाय त . महं
कुर्वे दर्पणवत्स धर्मनिवहो वीक्ष्यो मुमुक्षोर्यतः ॥

* * * *

ब्राह्मे पद्माक्षचिन्तास्तुतिरथ विधिवद्दर्भपुण्ड्रौ च सन्ध्या
होमश्च ब्रह्मयज्ञोऽभिगमनभगवन्मन्त्रमुख्यानुसन्धे ।
शक्त्योपादानमर्हत्फलसुमहविषां मूलमन्त्रक्रमेण
स्नानं सन्ध्यानतिः स्यादथ नियतजपो ब्रह्मयज्ञोऽत्र वा स्यात् ॥

तन्त्रोक्ताधारशक्तिप्रभृतिहरिपरीवारदेवर्षिमुख्यान्
सन्तर्प्य श्रीशमर्चेत् परिजनसहितं वैश्वदेवादयो वा ।
भुक्तिस्वाध्यायसन्ध्याप्रणतिहुतिहरीज्याथ योगोऽशनं स्यात्
आब्रह्मध्याननिद्रेत्यनुदिनमुदिताच्छिद्रवृत्तिस्सतां सा ॥

End:

एकादश्यां जयन्त्यां नरहरिरघुवर्यावतारेषु शुक्ल-
द्वादश्यां वेतरस्यां श्रवणभसहितायां सदोपोषणं स्यात् ।
प्रादुर्भावेष्वतोऽन्येषु तु भवतु हरेस्तत्समर्चाविशेषः
श्रोणायां पञ्चदश्योरसितवसुतिथौ चैकभुक्तं तु वा स्यात् ॥

सङ्क्रान्तौ.

(b) उत्तरऋग्धारिमाला.

UTTARAṚGDHĀRIMĀLĀ.

Foll. 16a—24b.

Gives a list of the Dhārin-syllables in the Uttarā-ṛks of the Sāma-vēda, i.e., the long unaccented syllables following the Svarita and corresponding to Pracaya, in the second and third Ṛks of the Tṛcas forming the Uttarā-collection of the Sāma-vēda.

Complete.

Beginning:

उत्तरऋग्धारिणां दीर्घस्थानीयत्वादादौ धारिमाला प्रकाश्यते—स्मै गायत नमा इ योदे पवङ्गजम । १४ ॥ द्युतत्याज्याङ्गत्वा आवान्तो म . . . . . १२ ॥ मानस्य ते कर्मवशन्तसमि हि गृहो सत्सिरङ्गिरोऽग्ने । ९ ।

* * * *

इन्द्रसाधन्द्रगिर्वसांनन्ति शूवृश्चिदद्रिवो इरगेन्द्र । १७ ।

प्रथमः ॥

End:

प्रयोरमणिणाच्छादयार्व वस्ते कृणोमित्राभवताशीवोऽन्वाहस्तं सत्पमामा । २९ । नगन्द्रविशन्ताग्र अभिशृणुयाम देवाश्येरंरतु शेमहिदावारिष्टनेमि । १६।

एकविंशः.

Colophon:

इत्युत्तरऋग्धारिमाला ॥

(c) उत्तरऋगुदात्तमाला.

UTTARAṚGUDĀTTAMĀLĀ.

Foll. 25a—29a.

Gives a list of Udātta syllables in the Uttarā-ṛks of the Sāma-vēda.

Complete.

Beginning:

अथोत्तरऋगुदात्तमाला प्रकाश्यते—

उपास्मा एकम्, शङ्गवो दविद्युतानुदात्तं, पवमानस्यैकम्, द्रमिन्द्र १ । अग्न आयानुदात्तम्, आनोमित्रानुदात्तम् ।

End:

अमीषां द्वे अभिप्रेहि मामीषां कं का अनुदात्तम् । विरक्षो द्वे विरक्षो मी योग मर्माणि तेऽनुदात्तं मृगोनैकं गोनहीं ॥

एकविंशः ॥

Colophon :

इत्युत्तरऋगुदात्तमाला ॥

(*d*) उत्तरऋक्स्वरितमाला.

UTTARARKSVARITAMĀLĀ.

Foll. 29*b*—30*b*.

Gives a list of the Svarita syllables in the Uttarā-ṛks of the Sāmavēda.

Complete.

Beginning :

अथोत्तरऋक्स्वरितमाला प्रकाश्यते—

यथ नावोंज्यं ताप्यूक्षम ल चामण्डरिश्वासानिधधुज्यद्वजन्दुनार ।

End :

त्वाथाषक्तनाकैसनुमि । २ । यो विसुरी वैंन्तन्त त्र इधोर्णोगैर्वयुः ॥

एकविंशः ।

Colophon :

इत्युत्तरऋक्स्वरितमाला ॥

R. No. 4102.

Palm-leaf. 13 × 1 and 12 × 1½ inches. Foll. 108. Lines, 8 in a page. Nandināgarī and Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Pūrṇayyar, Tirukāmbuliyūr, Kulittalai taluk, Trichinopoly district.

(*a*) सङ्ग्रहरामायणव्याख्या—भावार्थदीपिका.

SAṄGRAHARĀMĀYAṆAVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Foll. 1*a*—59*b*. Foll. 60 and 61 are left blank.

A commentary on Nārāyaṇapaṇḍita's Saṅgraharāmāyaṇa, which work has been described under R. No. 448 ante : by Viśvapatitīrtha.

Wants the beginning in the Āraṇyakāṇḍa and the end of the 6th Sarga in the same Kāṇḍa.

For the end vide R. No. 4103.

Beginning :

वैलक्षण्य उत्पन्न इति प्रतिपादनात्तद्विरोध इति चेन्न । अस्य ग्रन्थस्य वाल्मीकीयरामायणानुसारेण प्रवृत्तत्वेन वक्तुमुचितत्वादेव कल्पभेदादिकमनुसृत्य विरोधः परिहरणीयः ।

* * * *

विचित्रनर्तनेति । रुचिव्युत्पादनार्थं पूर्वरङ्गः क्रियते । तद्द्रावणादिवधे कारणभूतं खरादिसंहारं कर्तुं दण्डकारण्यं प्रति जगामेति भावः ॥

Colophon :

नारायणपण्डिताचार्यकृतसङ्ग्रहरामायणव्याख्यायां विश्वपतिकर्तृकायां भावार्थदीपिकायामारण्यकाण्डे प्रथमस्सर्गः ॥

(*b*) मणिमञ्जरीव्याख्यानम्.

MAṆIMAÑJARĪVYĀKHYĀNAM.

Foll. 62*a*—108*b*.

Same work as that described under R. No. 1451(*a*) ante. By Viṭṭhalabhaṭṭa.

Complete.

The scribe adds—

दुर्मतिवत्सर आषाढशुद्धप्रतिपदि मङ्गलवारे मणिमञ्जरीव्याख्या परिसमाप्ता ॥

R. No. 4103.

Palm-leaf. 17 × 1½ inches. Foll. 202. Lines, 8 in a page. Telugu and Nandināgarī. Slightly injured.

Presented in 1921–22 by M.R.Ry. R. Pūrṇayyar, Tirukāmbuliyūr, Kulittalai taluk, Trichinopoly district.

सङ्ग्रहरामायणव्याख्या—भावार्थदीपिका.

SAṄGRAHARĀMĀYAṆAVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Same work as that described under R. No. 4102 ante. By Viśvapatitīrtha.

Contains from the Kiṣkindhākāṇḍa to Yuddhakāṇḍa complete, and breaks off from the sixth Sarga in the Uttarakāṇḍa.

Beginning :

श्रीरामभक्ताग्रेसरस्य हनुमतोऽवतारादिकं वक्तुं पीठिकामाचरति—प्लवङ्गमानामित्यादिना । प्लवङ्गमाः कपयः तेषामधिकश्चासौ राजा च इत्यर्थः । तत्त्वगतः ।

* * * *

Colophon :

इति श्रीमत्सङ्ग्रहरामायणे(णव्याख्याने) किष्किन्धाकाण्डे प्रथमस्सर्गः ॥

End :

स्वयं परिपूर्णानन्ददेहोऽपि श्रीमहालक्ष्मीस्वरूपसीतायां परमानुग्रहं कर्तुं लीलया सीतया सहारमतेति भावः ॥

Colophon :

इति विश्वपतितीर्थकृतायां भावार्थदीपिकायां युद्धकाण्डे षोडशस्सर्गः ॥

* * * *

देशानुवादमात्रं क्रियत इति भावः ॥

Colophon:

श्रीमत्सङ्ग्रहरामायणव्याख्याने उत्तरकाण्डे पञ्चमः सर्गः ॥

श्रीरामान्तिकं प्रति रुद्रागमनादिकं वक्तुमुपोद्घातमुपक्रमते—भूलोकमिति । देवा इन्द्रादयः श्रीरामेण पालितं भूलोकम् ।

* * * *

दयाश्रयः सः श्रीरामं सूदयन्नपि स्वकृतपूर्वप्रतिज्ञानुसारेण मा संहरन्नपि मारणं कुर्यात् कृञो लिङ्.

R. No. **4104.**

Śrītāla. 12 × 2¼ inches. Foll. 30. Lines, 11 in a page. Nandināgarī. Good.

Presented in 1921–22 by M.R.Ry. V. Nārāyaṇacāriyar, Tirukāmbuliyūr, Kulittalai taluk, Trichinopoly district.

(*a*) ब्रह्मसूत्रदीपिका.

BRAHMASŪTRADĪPIKĀ.

Foll. 1*a*—2*a*. Fol. 2*b* is left blank.

A commentary on the Brahmasūtras of Vyāsa in accordance with the Dvaita-Vēdānta: by Jagannāthayati.

Breaks off in the 19th Sūtra of the first Pāda of the first Adhyāya.

Beginning :

कृष्णं रामं नारसिंहं व्यासं नत्वा गुरूनपि ।
जगन्नाथाख्ययतिना तन्यते सूत्रदीपिका ॥

ओं अथातो ब्रह्मजिज्ञासा ओं । अथ अध्ययनशमदमादिरूपाधिकारानन्तरम् । अतः मोक्षाख्यप्रयोजनसत्वात् विष्णोः प्रसादाद्वा ओंगुणपूर्णस्य ब्रह्मणः विष्णोर्जिज्ञासा कर्तव्येत्यर्थः । ओं जन्माद्यस्य यतः ओं । अस्य प्रमितजीवजडात्मकप्रपञ्चस्य यतः यस्मात् जन्मादि सृष्टताद्यष्टकं भवतीति शुभम् । तदेव ब्रह्म नान्यदित्यर्थः ।

End:

ओं अस्मिन्नस्य च तद्योगं शास्ति ओं । युक्तिसमुच्चये च शब्दः । यत आनन्दमयप्रकरणे मोक्षेऽपि अस्य जीवस्य तद्योगं तेन आनन्दमयादिना योगं सम्बन्धं शास्ति इति.

(*b*) दशावतारचरितम्.

DAŚĀVATĀRACARITAM.

Foll. 3*b*—6*b*.

A short poem in praise of the ten incarnations of god Viṣṇu: by Vādirāja.

Contains 34 stanzas.

Beginning:

प्रोष्ठीशविग्रह सुनिष्ठीवनोद्धटविशिष्टाम्बुचारुजलधे
कोष्ठान्तराहितविचेष्टागमौघपरमेष्ठीडित त्वमव माम् ।
प्रेष्ठार्कसूनुमनुचेष्टार्थमात्मविदभीष्टो युगान्तसमये
स्थेष्ठात्मशृङ्गधृतकाष्ठाम्बुवाहनवराष्टापदप्रभतनो ॥ १ ॥
खण्डीभवद्बहुलडिण्डीरजृम्भणसुचण्डीकृतोदधिमहा-
काण्डातिचित्रगतिशौण्डास हैमरदभाण्डाप्रमेयचरित ।
चण्डाश्वतुण्डमदिशुण्डालदुर्हृदयगण्डाभिखण्डकरदो-
श्चण्डामरेश हयतुण्डाकृते दृशमखण्डामलं प्रदिश मे ॥ २ ॥
कूर्माकृते त्ववतु नर्मात्मपृष्ठधृतभर्मात्ममन्दरगिरे
धर्मावलम्बनसुधर्मासदां कलितशर्मा सुधावितरणात् ।
दुर्मानराहुमुखदुर्मायिदानवसुदा(म)र्माभिभेदनपटो
घर्मार्ककान्तिवरवर्मा भवान् भुवननिर्माणधूतविकृतिः ॥ ३ ॥

End:

श्रीवाश्ववाहतनुदेवाण्डजादिदशभावाभिरामचरितं
भावातिभाव्यशुभधीवादिराजयतिभूवाग्विलासनिलयम् ।

श्रीवागधीशमुखदेवाभिनम्यहरिसेवार्चनेषु पठता-
मावास एव भविता वाग्भवेतरसुरावासलोकनिकरे ॥ ३४ ॥

(c) दशावतारचरितव्याख्या.
DAŚĀVATĀRACARITAVYĀKHYĀ.

Foll. 8*a*—26*a*. Foll. 7 and 26*b* are left blank.

A commentary on the Daśāvatāracarita described under subdivision (*b*) of this number.

Complete.

Beginning:

श्रीमदानन्दतीर्थार्यहृदयाम्भोजमन्दिरम् ।
अमन्दानन्दसन्दोहमिन्दिरारमणं भजे ॥
श्रीमध्ववादिराजाख्यर(ग)जपुङ्गवपूजितौ ।
वन्दे विज्ञानदातारौ वेदव्यासहयाननौ ॥
श्रीमद्बृन्दावनाचार्यस्वाप्रश्लोकैः स्वसंस्थिता ।
. . . प्रकाशिता येन तस्मै सद्गुरवे नमः ॥

अवतारान् हरेर्ज्ञात्वा सम्यङ्मुक्तिर्न चान्यथेत्याचार्यैश्श्रीहर्यवतारज्ञानस्य मोक्षसाधनत्वोक्तेः श्रीमद्वादिराजश्रीपादाः कविकुलाग्रण्यः श्रीहर्यवतारचरितानुवर्णनेन मुमुक्षूनुद्दिधीर्षवो दण्ड्यादिकविवर्गगर्वपर्वतविदारणभिदुरायितां शब्दालङ्कारादिना लसन्तीं स्तुतिमारचयन्ति— प्रोष्ठीशेत्यादिना । हे प्रोष्ठीशविग्रह प्रोष्ठीशः मत्स्यश्रेष्ठः तस्य विग्रह इव विग्रहो यस्य स तथा तत्सम्बुद्धिः; प्रोष्ठी तु शफरीत्यादिकोशात् । आत्मविदां ब्रह्मज्ञानिनामभीष्टः त्वं मामव रक्षेत्यन्वयः ।

End:

आत्मस्तोत्रं न कर्तव्यमहङ्कारेण धीमता ।
अज्ञानां बोधनार्थाय कर्तव्यं नात्र संशयः ॥

इति वचनानुसारेणात्युत्तमाधिकारकृताहङ्कारवैधुर्यापादितात्मस्वरूपप्रख्यापनकृताज्ञजनोद्धारप्रयोजनकात्मस्तुतेर्दोषानापादकत्वात्प्रकृतस्तुतिकर्तुः स्तोतुरात्मनस्तादृशाधिकारित्वात्प्रकृतात्मस्तुतेस्तादृशात्मस्तुतित्वात्तया दोषाभावादिति रहस्यं ज्ञेयं पण्डितैः इत्यशेषमतिमङ्गलम् ॥

Foll. 27*a*—30*a* contain five Ṛks of the XXI Adhyāya in the I Maṇḍala of the Ṛg-vēda with commentary. Fol. 30*b* is left blank.

R. No. 4105.

Palm-leaf. $16\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 129. Lines, 9 in a page. Nandi-nāgarī. Slightly injured.

Presented in 1921–22 by M.R.Ry. V. Nārāyaṇācāriyar, Tirukāmbu-liyūr, Kulittalai taluk, Trichinopoly district.

Foll. 1 and 2 are left blank.

(*a*) तैत्तिरीयोपनिषद्भाष्यव्याख्या—पदार्थदीपिका.

TAITTIRĪYŌPANIṢADBHĀṢYAVYĀKHYĀ : PADĀRTHA-DĪPIKĀ.

Foll. 3*a*—74*b*.

A commentary on Ānandatīrtha's Taittirīyōpaniṣadbhāṣya, which work has been described under No. 517 of the D.C.S. MSS., Vol. I, Part III: by Śrīnivāsa, disciple of Yadupatyācārya. The author salutes Vēdēśa Vidyādhīśa, Vyāsatīrtha, Jayatīrtha and Ānandatīrtha.

Complete.

Beginning :

ज्ञानानन्दसुखैस्सर्वैर्गुणैः पूर्णमभीष्टदम् ।
गुर्वाराधितपादाब्जं भजेऽहं बादरायणम् ॥
श्रीमदानन्दतीर्थार्यचरणौ प्रणमाम्यहम् ।
रुद्रादिसर्वविबुधैस्संसेव्याविष्टदौ सताम् ॥
श्रुतिक्षीराब्धिमामथ्य धीमन्दरमहीभृता ।
प्राप्ता न्यायसुधा येन तं जयेन्द्रमहं भजे ॥
येन वेदान्तभाष्याणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थाख्य जयराजनिषेवकम् ॥
विद्याधिराजादिमुनींस्तथा वेदेशयोगिनः ।
छान्दोग्यभाष्यसट्टीकाकर्तॄन् वन्दे निरन्तरम् ॥
श्रीमध्वशास्त्रं समुदीर्य मेऽस्मिन् विश्वासहेतोस्समदर्शयन् ये ।
प्रधानसूत्रप्रतिपाद्यभावं वन्दे गुरून् तान् यदुवर्यसंज्ञान् ॥
अथैतत्कृपया श्रीनिवासाख्यायुतसूरिणा ।
तैत्तिरीयोपनिषदो भाष्यं व्याक्रियते मया ॥
विबुधैरपि [सु]दुर्बोधग्रन्थे यन्मम साहसम् ।
तत्पारयन्तु निपुणाः गुरुपादरजःकणाः ॥

इह विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणः आत्यन्तिकानिष्टनिवृत्तीष्टप्राप्तिहेतुभूतभगवत्स्वरूपज्ञापनाय प्रवृत्तापीयं तैत्तिरीयोपनिषदन्यथाव्याख्यानिरुद्धत्वेन न तज्ज्ञापनसमर्थेति मन्यमानो भगवानानन्दतीर्थमुनिः तां यथावद्व्याचिख्यासुः स्वयमन्तरायविधुरोऽपि, अनवरतमीश्वरश्रवणकायकरणप्रवृत्तिरपि निरन्तरायप्रारिप्सितपरिसमाप्तेः प्रचयस्य च हेतुतयाप्यविगीतशिष्टाचारपरम्परयावगतमेतदुपनिषत्प्रतिपाद्यगुणविशिष्टभगवत्स्तुतिरूपं मङ्गलं शिष्यशिक्षार्थं कुर्वन्नेव तच्छरणागतिं प्रार्थयते—सत्यं ज्ञानमित्याद्यपद्येन । एमीत्युत्तमपुरुषपदप्रयोगादेवाहमिति कर्ता लभ्यते । एमि गतोऽस्मि इण् गताविति धातोर्लट् । शरणमिति शेषः । तथा चाहं सत्यत्वादिगुणोपेतं ब्रह्म शरणमेमीति क्रियाकारकसम्बन्धः ।

End:

पूर्णेति । पूर्णाः प्रत्येकं निरवधिकाः, तेजस्स्वरूपं च गृहं प्राज्ञैर्धामेति गधित इति वचनात् । पूर्णागण्यगुणैरुदारमुत्कृष्टं धाम स्वरूपं यस्यासौ तथोक्तः । तस्मै वेधसे सर्वज्ञायेत्यशेषमतिमङ्गलम् ॥

यस्सर्ववेदान् सम्प्रेर्य कारयामास सत्कृतिम् ।
श्रीपतिं तं गुरूपास्यं भजेऽहं बादरायणम् ॥

* * * *

तैत्तिरीयोपनिषदो यद्भाष्यं विवृतं मया ।
तज्जन्यं पुण्यमखिलमवाप्नोतु गुरुर्मम ॥

यादवार्यगुरोश्शिष्यश्रीनिवासाख्यसूरिणा ।
कृतेयं भाष्यविवृतिः भूयाद्व्याख्योपकारिणी ॥

तैत्तिरीयोपनिषदो भाष्यस्य विवृतिस्त्वियम् ।
पदार्थदीपिकाख्या स्यात्संप्रीत्यै कृष्णपादयोः ॥

वेदेशतीर्थार्यसुपादभक्तश्रीयादवाचार्यगुरूपदिष्टः ।
अर्थो निबद्धोऽत्र विचार्य सद्भिः आर्यैरुपेयो न भवेदतोऽयम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमत्तैत्तिरीयोपनिषद्भाष्यस्य टीकायां श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां पदार्थदीपिकाख्यायां भृगुवल्ली समाप्ता ॥

Foll. 75—77 are left blank.

(*b*) तीर्थप्रबन्धव्याख्या—गुरुभावप्रकाशिका.

TĪRTHAPRABANDHAVYĀKHYĀ: GURUBHĀVA-PRAKĀŚIKĀ.

Foll. 78—116*b*.

Same work as that described under No. 12148 of the D.C.S. MSS., Vol. XXI. By Nārāyaṇācārya, son of Lakṣmīpatibhaṭṭōpādhyāya.

Breaks off in the Uttaraprabandha.

(*c*) सङ्ग्रहरामायणम्.

SAṄGRAHARĀMĀYAṆAM.

Foll. 117*a*—129*b*.

Same work as that described under R. No. 448 ante. By Nārāyaṇa-paṇḍita, son of Trivikramapaṇḍita.

Breaks off from the sixth Sarga in the Bālakāṇḍa.

R. No. 4106.

Palm-leaf. 15½ × 1¼ inches. Foll. 100. Lines, 8 in a page. Nandi-nāgarī. Good.

Presented in 1921–22 by M.R.Ry. V. Nārāyaṇa Acchan, Tiru-kāmbuliyūr, Kulittalai taluk, Trichinopoly district.

Fol. 1 contains a small portion of Yamakabhārata.

ब्रह्मसूत्राणुभाष्यविवृत्तिः—तत्त्वमञ्जरी.

BRAHMASŪTRĀṆUBHĀṢYĀVIVṚTIḤ: TATTVAMAÑJARĪ.

Foll. 2*a*—92*a*.

A commentary on Ānandatīrtha's Brahmasūtrāṇubhāṣya, which work has been described under No. 4816 of the D.C.S. MSS., Vol. X: by Rāghavēndrayati, disciple of Sudhīndraguru.

Complete with the text.

Beginning:

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् ।
लक्ष्मीनारायणं वन्दे भक्ताभीष्टप्रदायिनम् ॥

संसारक्लेशसंशान्तसज्जनावनतत्पराः ।
दयालवो महान्तो ये गुरून् नत्वा हरिं भजे ॥
ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम् ।
इत्युक्तिसाम्यात्सङ्क्षेपभाष्यं चात्यर्थविस्तरम् ।
अनन्तार्थः प्रकटितस्त्वयाणौ भाष्यसङ्ग्रहे ।
इत्याहुः श्रीमदानन्दतीर्थार्योपसदा अपि ॥
अतोऽनेकार्थगुम्भस्य नैतद्भाष्यस्य विस्तृतौ ।
शक्तोऽस्म्यथापि लेशेन व्याख्यां कुर्यां यथामति ॥
सूत्रार्थं हृदि कृत्वैव भाष्यार्थं सम्प्रकाशयेत् ।
अविक्षेपेण बोधार्थं बुध्यन्तां तद्विवेकिनः ॥

इह खल्वविकारिणामखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तिनिदानभगवज्ज्ञानाय प्रवृत्तानामनन्तामाणा(नां प्रमाणाना)मितिकर्तव्यतारूपाणि नारायणावतारबादरायणकृतानि ब्रह्मसूत्राण्यन्यैरन्यथाव्याख्यातान्यकृतप्रायाणि मन्वानो भगवानानन्दतीर्थमुनिर्यथा(व)द्व्याचिख्यासुर्भाष्यानुभाष्ये विधाय सङ्क्षेपभाष्यमपि विवित्सुरध्यायचतुष्टयोक्तगुणविशिष्टेष्टदेवतागुरुनतिपूर्वकं चिकीर्षितं प्रतिजानीते—

नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥

सर्वैः आनन्दज्ञानस्तुतिबलौदार्यवीर्यादिभिः ।

* * * *

Colophon :

इति श्रीमद्ब्रह्मसूत्र(णु)भाष्यविवृतौ तत्त्वमञ्जर्यां राघवेन्द्रयतिकृतायां प्रथमाध्यायस्य प्रथमः पादः ॥

End :

नमो नमोऽशेषदोषदूरपूर्णगुणात्मने ।
विरिञ्चिशर्वपूर्वेभ्यो वन्द्याय श्रीवराय ते ॥

इति पूर्वार्धेन पूर्वाध्यायद्वयार्थः उत्तरार्धेन वन्द्यत्वोक्त्या सर्वाभीष्टदातृत्वस्यापि लाभेनोत्तराध्यायद्वयार्थोऽयमुपात्त इति भावः ॥

पूर्णचित्सुखरूपाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्तमुक्तिप्रदायिने ॥

सङ्क्षेपभाष्यविवृतिर्या कृता तत्त्वमञ्जरी ।
तया दयालुर्लक्ष्मीशः प्रीयतां मध्ववल्लभः ॥

Colophon:

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्यविवृतौ तत्त्वमञ्जर्यां राघवेन्द्रयतिकृतायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

सुधीन्द्रगुरुशिष्येण राघवेन्द्रेण भिक्षुणा ।
कृतायां तत्त्वमञ्जर्यामन्तिमोऽध्याय ईरितः ॥

चतुर्थोऽध्यायस्सम्पूर्णः ॥

Foll. 93*a*—97*a* contain the Padaprayōjanā of this work, Bṛhaspatikavaca, Viṣṇustōtra, a small portion of the fourth Paricchēda of Smṛtimuktāvalī and Āśīrvāda. Foll. 92*b* and 97*b*—100*b* are left blank.

R. No. 4107.

Palm-leaf. $15\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 55. Lines, 7 in a page. Nandināgarī. Good.

Presented in 1921-22 by M.R.Ry. V. Nārāyaṇācāriyar, Tirukambuliyūr, Kulittalai taluk, Trichinopoly district.

तत्त्वोद्द्योतः, सटीकः.

TATTVŌDDYŌTAḤ WITH COMMENTARY.

Same work as that described under No. 4792 of the D.C.S. MSS., Vol. X. The text is by Ānandatīrtha and the commentary by Jayatīrtha.

Incomplete.

R. No. 4108.

Palm-leaf. $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Foll. 121. Lines, 7 in a page. Nandināgarī. Fair.

Presented in 1921-22 by M.R.Ry. V. Nārāyaṇācāriyar, Tirukambuliyūr, Kulittalai taluk, Trichinopoly district.

Fol. 1 contains the name of this work and the name of its owner. Fol. 1*b* is left blank.

रुक्मिणीशविजयः.

RUKMIṆĪŚAVIJAYAḤ.

Foll. 2a—120a. Foll. 120b and 121a contain the names of the work and the owner of this MS. and Gōpālakṛṣṇanāmastōtra. Fol. 121b is left blank.

Same text as that described under Nos. 11717 and 11718 of the D.C.S. MSS., Vol. XX. By Vādirāja.

Complete.

Beginning:

श्रीवेदान्तमहाचलं हि परितस्संयोज्य सूत्राहिपं
सद्वातागमपोषितात्महृदयं तत्पूर्वपक्षासुरैः ।
सिद्धान्तोक्तिसुरेश्वरैश्च मथितो यःकृष्णदुग्धाम्बुधिः
स्तीयानाममृतं प्रय(च्छ)ति स मां पायाद्गुणोद्यन्मणिः ॥

* * * *

हयास्यनासापुठजातवाताविघातधूताघपलालजातः ।
मुनीशवागीशसुतस्सुरम्यां हरेः कथां शंसति वादिराजः ॥

* * * *

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जातस्सुरमण्डलीषु महितस्सर्गोऽयमाद्यो मुदा ॥

End:

हंसानां हृदयङ्गमं कविलसद्भृङ्गादृतं मौक्तिक-
प्रख्याव्योक्तिनवं प्रबन्धजलजं पादेऽर्पितं स्याद्धरेः ।
लक्ष्मीरम्यकरे वरामरततेः सन्मानसे शारदा-
नन्दं तत्पवनः स्वहृत्कृतगुणं विस्तारयत्वञ्जसा ॥
रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
संजाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सर्गोऽभूत्सुरमण्डलीषु सुतरामेकोनविंशो मुदा ॥

Colophon:

रुक्मिणीशाविजयस्सम्पूर्णः ॥

R. No. 4109.

Palm-leaf. $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Foll. 82. Lines, 9 in a page. Nandināgarī. Slightly injured.

Presented in 1921-22 by M.R.Ry. V. Nārāyaṇācāriyar, Tirukambuliyūr, Kulittalai taluk, Trichinopoly district.

Foll. 78—82 are left blank.

तत्त्वप्रकाशिकाव्याख्या—वाक्यार्थमञ्जरी.

TATTVAPRAKĀŚIKĀVYĀKHYĀ : VĀKYĀRTHAMAÑJARĪ.

Same work as that described under R. No. 1432(*b*) ante, wherein see for the beginning. By Śarkarā Śrīnivāsatīrthācārya.

Contains the Pādas 1 and 2 in the first Adhyāya.

End:

अन्तरङ्गानुपपत्तिं चाह—श्रुतेति । तत्तद्द्वितीयविद्याज्ञानेन ब्रह्मप्रासेरुक्तत्वाद्ब्रह्मणः । ओं आमनन्ति चैनमस्मिन् ओं । एनं विष्णुमस्मिन्नग्नौ योऽग्नौ तिष्ठन्नित्यादि श्रुतयः आमनन्ति आपादयन्तीत्यर्थः । व्यावर्तकः व्यावृत्ति समुच्चायक इत्यर्थः । एतदाशङ्कानिराससमुच्चितस्यैवोक्तहेतोः स्वार्थसाधकत्वादिति भावः ॥

Colophon:

इति श्रीमत्तत्त्वप्रकाशिकावाक्यार्थतत्त्वमञ्जर्यां शर्करा श्रीनिवासतीर्थाचार्यविरचितायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

R. No. 4110.

Palm-leaf. $16\frac{1}{2} \times 1\frac{3}{4}$ inches. Foll. 193. Lines, 7 in a page. Nandināgarī. Slightly injured.

Presented in 1921-22 by M.R.Ry. V. Nārāyaṇācāriyar, Tirukambuliyūr, Kulittalai taluk, Trichinopoly district.

(*a*) ब्रह्मसूत्रभाष्यव्याख्या—तन्त्रदीपिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TANTRADĪPIKĀ.

Foll. 1*a*—111*a*. Foll. 67 and 111*b*—113*b* are left blank.

Colophon :

इति श्रीराघवेन्द्रयतिकृतायां तन्त्रदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

(*b*) तत्त्वप्रकाशिकाव्याख्या—तात्पर्यचन्द्रिका.

TATTVAPRAKĀŚIKĀVYĀKHYĀ : TĀTPARYACANDRIKĀ.

Foll. 114*a*—188*b*.

A commentary on Jayatīrtha's Tattvaprakāśikā, which work has been described under No. 4810 of the D.C.S. MSS., Vol. X : by Vyāsatīrtha.

Breaks off in the 8th Sūtra of the 1st Pāda of the 1st Adhyāya.

This work has been printed at the Nirnaya Sagar Press, Bombay, and published by the proprietor, Madhva Vilas Book Depot, Kumbakonam.

Beginning :

अस्पृष्टदोषगन्धाय कल्याणगुणसिन्धवे ।
नमो नमो भक्तमुक्तिदायिने शेषशायिने ॥
शमयन् भवसन्तापं रमयन् साधुचातकान् ।
कृष्णमेघः कृपादृष्टिवृष्ट्या पुष्णातु मामपि ॥
श्रीमदानन्दतीर्थार्यपादपङ्कजरेणवः ।
पवित्रयन्तु मां नित्यं पापपाटनपण्डिताः ॥
शारदावासवदनशारदाम्बुरुहान् मुहुः ।
पद्मनाभमुनीन् वन्दे सर्वशास्त्रविशारदान् ॥
मिथ्यासिद्धान्तदुर्ध्वान्तविध्वंसनविचक्षणः ।
जयतीर्थाख्यतरणिः भासतां नो हृदम्बुजे ॥
कंसध्वंसिपदाम्भोजसंसक्तो हंसपुङ्गवः ।
ब्रह्मण्यगुरुराजाख्यो वर्ततां मम मानसे ॥
पदवाक्यप्रमाणाब्धिविक्रीडनविशारदान् ।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागुरून् मम ॥
श्रीमद्भाष्यस्य टीका या जयतीर्थार्यनिर्मिता ।
गम्भीरा निर्मला चेमां व्याकरिष्ये यथामति ॥
सूत्रे भाष्येऽनुभाष्ये च सन्न्यायविवृतौ तथा ।
टीकासु च यदस्पष्टं तच्च स्पष्टीकरिष्यते ॥

प्रतिसूत्रं प्रकाश्येते घटनाघटने मया ।
स्वीयान्यपक्षयोः सम्यग्विदांकुर्वन्तु सूरयः ॥

ग्रन्थादौ मङ्गलमाचरति—शुद्धेति । इदं च पद्यं भाष्यस्थाद्यश्लोकविवरणरूपत्वात् तद्वदेव वक्ष्यमाणादिसूचकत्वेन व्याख्येयम् । आनन्दादेश्शुद्धत्वं सान्तत्वसातिशयत्वादिराहित्यम् । लेप पुण्यपापसम्बन्धः । श्रुतिमती श्रवणमनने ।

End:

यद्यान्तस्थस्याविष्णुतयानन्दमयस्यापि विष्णुत्वाक्षेपो युक्तः । तद्धर्मस्यादृश्यत्वस्यान्तस्थे साक्षाच्छ्रवणात् । नत्विन्द्रादेरविष्णुत्वेन । तत्रादृश्यत्वाश्रवणात् । ततश्च पूर्वाधिकरणसङ्गत्यर्थं लिङ्गग्रहणमित्यर्थः । ओं आकाश स्तल्लिङ्गात् ओं ।

Fol. 189 contains a small portion of the same work. Foll. 190 and 191*a* contain the Bhṛguvallī. Fol. 191*b* is left blank. Fol. 192 contains some anthological stanzas. Fol. 193 is left blank.

R. No. **4111.**

Palm-leaf. 15½ × 1⅝ inches. Foll. 132. Lines, 8 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

तन्त्रसिद्धान्तसङ्ग्रहः.

TANTRASIDDHĀNTASAṄGRAHAḤ.

Foll. 1*a*—131*a*.

Similar to the work described under R. No. 1803(*b*) ante. By Garuḍadhvaja, son of Alamēlmaṅgāmbā and Śrīnivāsa (commentator of Tattvamukura) and grandson of Sūryanārāyaṇa (of Vādhūlagōtra) who was the commentator of Śāstradīpikā of Pārthasārathimiśra.

Contains the Adyāyas VII and VIII complete, and a portion of the first Sūtra of the first Pāda in the IX Adhyāya.

Beginning:

मदवारिलसद्भृङ्गमणिकुण्डलशोभितम् ।
गिरिजातनुजं वन्दे गिरि जातमनोरथः ॥
सर्वतन्त्रस्वतन्त्रेण येन सा शास्त्रदीपिका ।
सूर्यनारायणाख्येन व्याकृता विदुषां मुदे ॥

तस्य श्रीतातपादस्य करुणामृतवारिधेः ।
प्रसादादुदितात्पादभजनादनिशं भृशम् ॥
निष्कामकर्मानुष्ठानाद्विमलीकृतचेतसा ।
व्याकृतस्तत्त्वमुकुरः श्रीनिवासविपश्चिता ॥
वादिकेसरिणस्तस्य पादसंसेवनादहम् ।
करोमि विदुषां प्रीत्यै तन्त्रसिद्धान्तसङ्ग्रहम् ॥

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् । उपदेशविचारानन्तरं तदधीनातिदेशविचार इदानीमारभ्यते । अतः पूर्वोत्तरषट्कयोर्हेतुहेतुमद्भावसङ्गतिः । ननु षट्कद्वयस्यानुगतार्थद्वयसम्भवे तयोस्सङ्गतिकथनं युक्तम्; अन्यथा चतुष्कस्य चतुष्कस्य किमिति सङ्गतिर्नोच्यते? न च षट्कद्वयस्यानुगतमर्थद्वयं पश्यामः ।

* * * *

Colophon:

इति श्रीमदद्वैतविद्याचार्यश्रीनिवासविपश्चित्सूनुना अलर्मेलमङ्गागर्भसम्भवेन वाधूलकुलतिलकेन गरुडध्वजेन कृते तन्त्रसिद्धान्तसङ्ग्रहे सप्तमस्य प्रथमः पादः ॥

End:

ससंक्षेपविस्तारकस्सापवादः सदुक्त्वानुमानात्तथा नामधेयात् ।
अधीताच्च वाक्यात्प्रसिद्धोऽतिदेशः करिष्यामहेऽतः परं तूहचिन्ताम् ॥

सदृक्त्वेन द्रव्यदेवतादिसादृश्येनानुमीयत इति यद्वाक्यमाग्नेयवत्सौघ(र्य) इति तस्मादानुमानिकवचनादग्निहोत्रादिनामधेयात्समानमितरच्छयेनेनेति प्रत्यक्षवचनाच्च प्रसिद्धोऽतिदेश इति श्लोकार्थः ॥

Colophon:

इति गरुडध्वजेन कृते तन्त्रसिद्धान्तसङ्ग्रहे अष्टमस्य चतुर्थः पादः ॥ समाप्तश्चाध्यायः ॥

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् । सिद्धेऽतिदेशेऽधुनातिदिष्टानां पदार्थानां मन्त्रसामसंस्काराणां द्वारान्त(र)सम्बन्धनिमित्तकोऽन्यथाभावात्मक ऊहश्चिन्त्यते । तत्र मन्त्रोहस्तु अग्नये जुष्टं निर्वपामीत्यादयः । प्रकृतौ समवेतार्था मन्त्राः पठिता विकृतौ

तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ : TARKACŪḌĀMAṆIḤ.

Same work as that described under No. 4102 of the D.C.S. MSS., Vol VIII. By Dharmarājādhvarin of Kaṇḍramāṇikkam village.

Contains the Anumānakhaṇḍa complete, but wants the beginning.

R. No. **4114.**

Palm-leaf. 15 × 1¼ inches. Foll. 47. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periykulam taluk, Madura district.

प्रायश्चित्तप्रदीपिका.

PRĀYAŚCITTAPRADĪPIKĀ.

A treatise briefly laying down the expiatory ceremonies to be performed for defaults in connexion with Śrauta sacrifices: by Varadayajvan of Vatsagōtra.

Complete.

Beginning :

यस्य प्रसादान्मूकोऽपि भवत्यागमपारगः ।
तं वन्दे वेङ्कटाधीशं सर्वाभीष्टप्रदं गुरुम् ॥
वत्सवंशावतंसेन वरदाधीशयज्वना ।
उच्यते सोमपेनैका प्रायश्चित्तप्रदीपिका ॥
बालानां सुखबोधाय क्रियते दीपिका यतः ।
तस्मात्तस्यां न दोषोऽस्ति सर्वत्र पुनरुक्तिजः ॥

दर्शपूर्णमासादि(क)न्त्वादित आरभ्य कर्म कुर्वतामृत्विजां दैवादज्ञानाद्वा ज्ञानेऽपि प्रमादाद्वा पुरुषाशक्त्या वा श्रेषः प्रायेण भवेत् । तस्मात्तद्भ्रेष-निर्हरणार्थं प्रायश्चित्तानि सम्यगवबुध्य कर्तव्यान्येव । तस्माद्दर्शपूर्णमासादीनां प्रयोगानुष्ठानक्रमेणैव यथासारं सङ्गृह्य प्रायश्चित्तान्युच्यन्ते । प्रायश्चित्तसूत्र-क्रमेण प्रायश्चित्त उच्यमानेऽपि प्रकीर्णतया ज्ञातुमशक्यमिति दर्शपूर्णमासा-दीनां प्रयोगानुष्ठानक्रमेणैव प्रायश्चित्तान्युच्यन्ते । भाष्यादौ विप्रकीर्णतया ज्ञातुमशक्यानां प्रायश्चित्तानां प्रयोगक्रमेणैकत्र सङ्गृह्य प्रतिपादने सर्वेषां सुखाव-

बोधो भवतीति तदर्थोऽयमारम्भः । इदानीं श्रुतिलक्षणं प्रायश्चित्तमित्यादि परिभाषासूत्रार्थं तावद्दर्शयति ।

End :

अत्रायं भावः—यद्यप्येषा प्रायश्चित्तप्रदीपिका दुरुक्तादिदोषयुक्ता, तथापि विदुषां यथार्थोऽ . . . . नुग्रहेण सर्वदोषहानिर्युक्ता भवेत् । ततश्च विदुषामनुग्रहादेव अनया प्रायश्चित्तप्रदीपिकयैव ममापि यथार्थं प्रायश्चित्तानुष्ठानं सिध्यति ॥

वत्सवंशावतंसेन वरदाधीशयज्वना ।
सोमपेन कृता वृत्तिः प्रायश्चित्तप्रदीपिका ॥

R. No. **4115**.

Palm-leaf. 18 × $1\frac{1}{2}$ inches. Foll. 100. Lines, 7 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

Fol. 68*b* is left balnk. Foll. 1—4 contain the introduction of this work.

अवधूतगीता, सव्याख्या.

AVADHŪTAGĪTĀ WITH COMMENTARY.

Same text as that described under No. 4543 of the D.C.S. MSS., Vol. IX; it is followed by a commentary.

Contains the first Prakaraṇa complete.

Beginning :

गोरक्षकस्य माहात्म्यं दत्तात्रेयस्य वैभवम् ।
स . . . . याश्चैवमद्भुतं ब्रह्मनिर्णयम् ॥
पट्टाभिषेकं . . . चाखण्डरससाधने ।
प्रश्नोत्तराभ्यां प्रथमं वर्णानां सप्तमे . . ॥

* * * *

अयं च गोरक्षकः सद्ब्राह्मण एव पूर्वजन्मनि गुरुवाक्यातिलङ्घनेन गोरक्षकत्वं प्राप्तः । गोप्रचारणे युक्तो गोक्षीरपानमननुज्ञया कृतवान् । तेन दोषेण गोरक्षकत्वं प्राप्तः । अत एव पूर्वजन्मन्यभ्यस्ताद्वैतवासना विद्यते । इदानीमपि ममार्धरात्रौ क्षीरान्नदानेन प्रथमसाधनं सूचितम् । द्वितीयं क्षीर-

प्रदानेन साधितमस्मदवलोकनेन तृतीयमपि समभ्यस्तम् । अस्मत्सम्भाषण-मात्रेण चतुर्थमपि सम्पादितम् । एवमस्यैव भाग्यमाहिमा अहो इति श्लाघते कृतार्थ इति । दत्तात्रेयः प्रसन्नचित्तस्सन् ततो मौनं विसृज्य तस्मिन् कृपादृष्टिं निवेश्य हे एकरस इति सम्बोध्याहमेकरसमात्रत्वान्मम दर्शन-मात्रेण त्वमप्येकरस एव । द्रष्टव्यान्तराभावात् प्रथममद्वैतवासनातिदुर्लभेति-श्लाघते—

अवधूतः—

ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
महाभयपरित्राणात् द्वित्राणामेव जायते ॥

अस्यार्थः—

ईश्वरानुग्रहात् ईश्वरो गुरुः गुरुर्ब्रह्मेति वचनात् स च ज्ञानप्रदगुरुरेव गुरुः । तथा चोक्तं सूतसंहितायाम्—

दृश्यरूपमिदं सर्वं दृग्रूपेण विलाप्यते । दृग्रूपं ब्रह्म यो वेत्ति स गुरु-र्नापरः पुमान् ॥

तस्य परमगुरोरनुग्रहादेव । एवकारेण अन्यत्र गतिर्नास्तीति द्रढयति । पुंसामद्वैतभावना भवति न पुंसाम् ।

* * * *

Colophon:

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे प्रथमप्रकरणे नित्यरूपदर्शनं नाम प्रथमप्रकरणं समाप्तम् ॥

End:

विन्दति विन्दति नहि नहि मन्त्रं नहि नहि छन्दोलक्षणमन्त्रम् ।
समरसमग्नो भावितपूतः प्रलपितमेतत् कथमवधूतः ॥

एतादृशज्ञानानुभवेनात्याश्चर्येण प्रोक्तत्वादयमवधूतः सर्वमन्त्रतन्त्रादिकं जानातीति न मन्यस्व कदाचिदपि । नहि नहि मन्त्रं विन्दति मन्त्रमित्युप-लक्षणम् ।

* * * *

आत्मनोऽन्यस्याभावात् एतत्क्षणमारभ्य तन्त्रमपि त्यज सुखीभवे . . . . ॥

Colophon:

इत्यवधूतग्रन्थे प्रथमप्रकरणं समाप्तम् ॥

R. No. **4116.**

Palm-leaf. $15\frac{1}{2} \times 1$ inches. Foll. 183. Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

Fol. 108*b* is left blank.

तत्त्वचिन्तामणिप्रकाशः.

TATTVACINTĀMAṆIPRAKĀŚAḤ.

Same work as that described under No. 4013 of the D.C.S. MSS., Vol. VIII. By Rucidatta.

Contains the Pratyakṣaparicchēda complete and the Anumānaparicchēda incomplete; but the leaves are not in order.

R. No. **4117.**

Palm-leaf. $17\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 88. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

शिखरिणीमाला, शिवतत्त्वविवेकसहिता.

ŚIKHARIṆĪMĀLĀ WITH ŚIVATATTVAVIVĒKA.

Same work as that described under No. 5106 of the D.C.S. MSS., Vol. X. The commentary is by Appayadīkṣita, son of Raṅgarājādhvarin.

Contains the first Paricchēda complete and the second Paricchēda incomplete.

Colophon:

इति श्रीमदद्वैतविद्याचार्यश्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीविश्व-जिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ शिवतत्त्वविवेकाख्यायां श्रीसदाशिवस्य विश्वाधिकत्वव्यवस्थापनं नाम प्रथमः परिच्छेदः ।

R. No. **4118.**

Palm-leaf. $18\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 52. Lines, 7 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

सूर्यशतकम्, सव्याख्यानम्.

SŪRYAŚATAKAM WITH COMMENTARY.

Foll. 1*a*—41*b*.

Same work as that described under No. 11321 of the D.C.S. MSS., Vol. XIX; with two additional stanzas in the end.

Complete.

Foll. 42*a*—48*b* contain a portion of this work. Fol. 49 is left blank. Fol. 50 contains notes on this commentary. Foll. 51 and 52 contain the first Anuvāka of the second Aśvamēdha.

R. No. **4119.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 115. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

(*a*) सत्याषाढगृह्यप्रयोगः.

SATYĀṢĀḌHAGṚHYAPRAYŌGAḤ.

Foll. 1*a*—27*a*.

On the procedure connected with the performance of the household rites and duties by the Brahmans who follow the Satyāṣāḍhasūtra.

Complete.

Beginning:

श्रीसत्याषाढसूत्रोपनयनस्य व्याख्यानरूपेण प्रयोगं वक्ष्यामः—वसु . . . . त्रे श्रवणप्रोष्ठपदेष्वाश्वयुजि पुनर्वस्वोस्तिष्ये हस्तेऽनूराधे शताभिषाजि वा कर्तव्यमुपनयनम् । एतेषामलाभेऽन्येषु व्यतीपातदोषरहितेषु . . . . . . अत्र केचित्— पूर्वेद्युस्सद्य एव वा नान्दीमुखश्राद्धं कुर्वन्ति । तदस्माकमप्यविरोधात् कार्यं तत्रोक्तेन विधानेन । अपरे वचनाभावात् नात्र कुर्वन्ति । तद्यथाविहितं . . . . . . त्वा ततो ब्राह्मणान् चतुष्प्रभृतीन् समसङ्ख्याकानन्नेन परिविष्य पुण्याहादीनि वाचयित्वोपनेयम् । भोजयित्वा भुक्तवतः केशान् वापयित्वा तं स्नातं मङ्गल्यानुलेपनादिभिरलंकृत्य तमहतं धौतवस्त्रं परिधाप्य प्राचीनप्रवणादीनामन्यस्मिन् देश उद्धृत्य

End:

प्ररोहन्तीति या शतेनेति द्वाभ्यामुदकसमीपे दशमातमितोः दीर्घतरणं कृत्वा ततः प्रत्येत्य ग्रामं प्रविश्यान्नहोमं कृत्वा पूर्वैस्सक्तुभिरोदनैश्च ब्राह्मणांश्च तर्पयन्ति ॥

समाप्तोऽध्यायोत्सर्गः ॥

Colophon:

श्रीसत्याषाढसूत्रगृह्यप्रश्ने द्वितीयगृह्यप्रयोगः समाप्तः ॥

Fol. 27 contains some Satyāṣāḍhagṛhyaprayōgakārikās.

(*b*) सत्याषाढगृह्यसूत्रवृत्तिः.

SATYĀṢĀḌHAGṚHYASŪTRAVṚTTIḤ.

Foll. 28*a*—115*a*. Fol. 115*b* is left blank.

A commentary on the Satyāṣāḍhagṛhyasūtra by Mātṛdatta.

Complete.

Beginning:

उपनयनं व्याख्यास्यामः । यज्ञं व्याख्यास्याम इति प्रतिज्ञाय दर्श-पूर्णमासादयस्सहस्रसंवत्सरान्ता व्याख्याताः श्रौताः यज्ञा वैतानिकाः स्मार्ताः । इदानीमेकाग्नौ कर्तव्या वक्तव्याः । तेषामुपनयनं प्रधानम्, श्रौतत्वाद्वेदा-ध्ययनत्वात् । तत आरभ्य शास्त्रैरधिकारार्थं पृथगुत्पत्तेश्च । तत्प्रथमं व्याख्यातुकामः प्रतिजानीते—उपनयनं व्याख्यास्याम इति । ननु च कात्स्र्न्येन परिसमाप्तेषु श्रौतेष्वेवोपनयनादयो वक्तव्याः ।

* * * *

एकस्यां शालायां द्वयोर्वा क्रियायामेतेन विधानेन कारयित्वा तत्रैव देशं श-मयित्वा प्रवेशनमेवेत्येकैरुक्तं प्रयोजनमभ्यासस्य ॥

Colophon:

इति श्रीसत्याषाढसूत्रस्य मातृदत्तीय(।) गृह्ये प्रथमप्रश्नस्याष्टम[:]-पटलस्य व्याख्या परिसमाप्ता ॥

अथ (सीमन्तो)न्नयनम्—भ्रुवोर्मध्यादारभ्य सीम्नः केशस्यान्तस्सीमन्तः।

End:

अत्रोत्सर्गस्याभावः । उपकारस्याप्युत्पत्तिरित्युक्तम् । नित्यं . . . यन्ति । ब्रह्मयज्ञानन्तरमेवा(ता)नेव देवानृषीन् पितॄंश्च [तर्पयन्ति] उदकेन तर्पयन्ति उद(ए)कवेद्यान्तानामपि ऋषित्वात् ऋषिष्ठवान् दर्हे(ष्वेवान्तर्भा)वात् नास्त्येव तर्पणम् ॥

Colophon:

समाप्त उपाकरणोत्सर्गः ॥

इति श्रीसत्याषाढसूत्रगृह्यस्य द्वितीयप्रश्नस्य मातृदत्तीया वृत्तिः परि-समाप्ता ॥

R. No. 4120.

Palm-leaf. 16 × 1¼ inches. Foll. 127. Lines, 7 in a page. Grantha. Much injured.

Presented in 1921-22 by M.R.Ry. Śaṅkara Śāstrigaḷ, son of Subbarāma Śāstrigaḷ, Mēlmangalam, Periyakulam taluk, Madura district.

शिवपारम्यस्तुतिः, सव्याख्या.

ŚIVAPĀRAMYASTUTIḤ WITH COMMENTARY.

Foll. 1*a*—119*a*. Foll. 119*b* and 120 are left blank.

A commentary on the Śivapāramyastuti, which is a eulogy on Śiva as the Supreme Being.

Contains the stanzas 1—35 with commentary; but wants the beginning.

Foll. 121*a*—127*b* contain the commentary on stanzas 136—144; but the leaves are very much injured.

Beginning:

. . . . पात्रमेकः ।

तत्प्रायशः श्रुतिषु दुर्लभमेव वाक्यमुक्त्वा नमो भवति यत्र तव प्रसङ्गम् ॥

हे भूतनाथ! अग्र्यं श्रेष्ठमनुपा(धिनिबन्धनं) देवतान्तरैश्वर्यवन्न धर्माद्युपाधिनिबन्धनम्; किं तु स्वतस्सिद्धम् । तथा च श्रुतिः— . . . . . अस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय । ब्रह्मादिदेवतान्तराणि तु त्वदाराधनजनितधर्मोपाधिनिबन्धनम् । तथा च श्रुतिः श्रूयते—तव श्रिये(मरुतोऽमा)र्जयन्त रुद्रा यत्ते जनिम चारु चित्रम् । पदं यद्विष्णो रूपमभिधायि तेन पासि गुह्यम् ।

End:

ईश्वरस्य श्रुतिपुराणोक्तान्यद्भुतकर्माणि दर्शयति—यद्ब्रह्म पञ्चमशिर इति ।

यद्ब्रह्मपञ्चमशिरोलवनापदानं यद्ब्रह्मणा च हरिणा च विमार्गणं ते ।
यद्वा तयोर्जनयितारमधीमहे त्वां तत्सर्वमीश्वर विमूढधियामसह्यम् ॥

यद्ब्रह्मपञ्चमशिरोलवनापदानं ब्रह्मणः पञ्चमशिरोलवनापदानं <u>ब्रह्माण्डपुराणे</u>ऽपि श्रूयते—पुरा पितामहं देवं मेरुशृङ्गे महर्षयः ।

प्रोचुः प्रणम्य देवादिं कमेकं त्र्यक्षमव्ययम् ॥
समाययुर्महेशस्य मोहितो विश्वसम्भवः ।

* * * *

जनयितारं ब्रह्मविष्ण्वोर्जनयितारमधीमहे । एतत्सर्वं मूढधियामसह्यं सोढुमशक्यम् । १३५ ॥

R. No. 4121.

Palm-leaf. 15¼ × 1⅝ inches. Foll. 54. Lines, 9 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Ramanātha Śāstrigal, Perumāl-Kōyil street, Periyakulam, Madura district.

Foll. 1 and 54 are left blank.

वराहनदीमाहात्म्यम्.

VARĀHANADĪMĀHĀTMYAM.

On the greatness and religious sanctity of the river Varāha which flows to the north of the river Vaihai and about 24 miles to the west of Hālāsyakṣētra (Madura).

This forms the Adhyāyas 1—32 of the Caitramāhātmya in the Skāndapurāṇa.

Complete.

Beginning:

वामाङ्करूढगिरिजाकुचकुम्भकर्णं वामेन पाणिजलजेन परिस्पृशन्तम् ।
सव्येतरेण विमलं परमार्थतत्त्वं सद्भ्यः प्रबोधयितुकाममहं भजामि ॥

अगजाजानिमगजामङ्घिजाजानिमङ्घिजाम् ।
वाणीं वाणीशमनिशं वारणास्यमहं भजे ॥

* * * *

ईश्वरः—

शृणु देवि प्रवक्ष्यामि रामस्याक्लिष्टकारिणः ।
चरित्रं सर्वपापघ्नं सर्वाभीष्टप्रदं नृणाम् ॥
तीर्थयात्रापरो रामः स सुयज्ञो विनिर्गतः ।
ततस्स गत्वा तीर्थानि दृष्ट्वा स्नात्वा ददन् वसु ॥
तस्य तस्य च माहात्म्यं भक्त्या श्रुत्वा समाहितः ।
सुयज्ञेनैव कथितं सञ्चचार ततस्ततः ॥

स कदाचिद्वराहाख्यां नदीं गत्वा सुविस्मितः ।
हालास्यक्षेत्रनिकटे प्रत्यग्भागे त्रियोजनात् ॥
कृतमालोत्तरे तीरे मृकण्डाश्रमसन्निधौ ।
दक्षिणायामाश्रमस्य प्रवहन्तीं ददर्श सः ॥

* * * *

Colophon:

इति स्कान्दे पुराणे चैत्रमाहात्म्ये उमामहेश्वरसंवादे वराहनदीप्रशंसनं नाम प्रथमोऽध्यायः ॥

End:

एतदाख्यानमायुष्यं पुत्रपौत्रप्रदं नृणाम् ।
सर्वव्याधिप्रशमनं सर्वमङ्गलदायकम् ॥
इदं पवित्रं परमार्थसारं माहात्म्यमेतत्कलुषघ्नमार्षम् ।
शृण्वन्ति भक्त्या भुवि ये मनुष्याः पठन्ति कामानखिलान् लभन्ते ॥

Colophon:

इति श्रीस्कान्दे महापुराणे उमामहेश्वरसंवादे चैत्रमाहात्म्ये प्रह्वा(वराह)-नदीप्रशंसनं नाम द्वात्रिंशोऽध्यायः ॥

R. No. **4122.**

Palm-leaf. $16\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 79. Lines, 8 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Rāmanātha Śāstrigal, Perumal-kōyil street, Periyakulam, Madura district.

Foll. 1 and 2 contain a portion of this work, which is again found on Foll. 44 and 45 of this work.

भागवतचम्पुः.

BHĀGAVATACAMPUḤ.

Foll. 3*a*—77*b*. Fol. 78 contains a portion of Cidambaranāthavaibhava. Foll. 40*b* and 79 are left blank.

A work in prose and verse describing the story of the Śrībhāgavata: by Vīrarāghavācārya, son of Nāmagiryambā and Kṛṣṇamācārya, grandson of Vēṅkaṭaraṅgācārya and great grandson of Vīrarāghavācārya of Ātrēyagōtra.

Contains the Stabakas 1—12 complete.

Beginning:

स्वभक्तपक्षपातेन तद्विपक्षविदारिणम् ।
नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥

श्रीमान् नस्सारसाक्षः कलयतु कुशलं यत्पदाम्भोजधूलिः
श्वश्रूर्जाता महर्षेस्त्रिभुवनभरणं पादुके यत्प्रसादात् ।
सम्राड्भूत्वा ततान प्रतिभटदलने यद्धनुर्बद्धदीक्ष
यद्दीक्षा राज्यदाभूद्धरिनिशिचरयोर्यत्पदं योगिसेव्यम् ॥

* * * *

मातर्भारति ते पदाम्बुजयुगं सेवे मदीयाधुना
जिह्वा कृष्णकथासुधाब्धिलहरीपानाय संनह्यति ।
यैरासन् कवयः प्रतीतयशसः श्रीकालिदासादयो
हृद्यास्ते विलसन्तु मय्यविरतं दासे कटाक्षाङ्कुराः ॥
ददतु सततं सन्तोषं नः पराङ्कुशभाष्यकृ-
न्निगममकुटाचार्याद्या ये जयन्ति गुरूत्तमाः ।
निगममकुटश्रीनिर्वाहप्रसाधनजीविका
भणितिनिवहापास्तश्रेयःकुदृष्टिमताध्वगाः ॥
यस्माद्दुर्वादिमत्तद्विपदलनविधौ जातपञ्चास्यवृत्ते-
र्वेदान्ताचार्यसूक्तिप्रचयपरिचयस्फीतविज्ञानसिन्धोः ।
सम्यग्विद्यामवाप स जयति कविताविाहिनीजन्मशैलः
श्रीमानात्रेयगोत्रामृतजलधिविधुः कृष्णमाचार्यनामा ॥
तस्यैतस्य सुतः कलासु निपुणो रामानुजत्वं (?) कला-
जन्मभ्यामपि वीरराघवसुधीश्चम्पूप्रबन्धं स्फुटम् ।
दासः श्रीसखसेविनां वितनुते गद्यैश्च पद्यै रसा-
लङ्कारार्थचमत्क्रियोज्ज्वलपदैराक्लृप्तविद्वन्मुदम् ॥
यद्योगिप्रवरेण वर्णितमभूच्चित्रं चरित्रं हरे
राज्ञः प्रार्थयतोऽमृतं बुधजनस्तद्वस्तुयुक्तां गिरम् ।
श्रुत्वा मोदमुपैतु दोषघटितामप्यस्मदीयां न किं
सर्वज्ञेन हि मानिता शशिकला मूर्ध्ना कलङ्कान्विता ॥
या लीला मुनिना शुकेन मधुरा गीता हरेः पावनी
तल्लेशैरिह वर्णितुं गतत्रपो मन्दोऽपि भूयां विधुम् (भुः)।
मेदिन्यामनपायभक्तिभरितप्रह्लादलब्धस्वभू-
सेवां किं न तनोति हर्षभरितस्सर्वो जनः श्रेयसे ॥

अस्ति प्रशस्ता यदुभूपतीनामन्वर्थनामा मधुरेति काचित् ।
पुरी सुराणाममरावतीव श्रियोल्लसन्ती रिपुदुर्निरीक्ष्या(क्षा) ॥

यस्यामुज्ज्वलरत्नसौधकलिते वातायने चन्द्रमा
गत्वा खिन्नमना निरीक्ष्य रमणीवक्त्राम्बुजं क्षीणताम् ।
प्राप्तः केचन मेनिरे बुधजनाः स्वाचार्यशापादयं
क्षीणोऽभूदिति तन्मृषैव भुवने दक्षस्य शापात्परे ॥

* * * *

इत्युदीर्य तस्मिन्मुनिवरे त्रिविष्टपपन्थानमलङ्कुर्वाणे स भोजराजसुतोऽपि निखिलमपि यादवकुलं त्रिदशांशसम्भूतमात्मानं च पुरा दैत्यान्तकविनिहतं कालनेमिनामानं महासुरं मन्वानो रोषातिपानकलुषीकृतलोचनस्तावपि देवकी-वसुदेवौ निजजनकेन सह कारागृहवाससमुपनतशोकातिरेकदुर्मनायमानमानसौ विरचय्य कीर्तिमत्प्रमुखस्य तदीयतनूजषट्कस्यापि क्रमेण पञ्चतां दत्वा निखिलमपि भुवनतलं निजशासनवशंवदमकरोत् ।

चाणूरधेनुकबकप्रमुखैर्युतोऽसौ हन्तुं समारभत यादववंशजातान् ।
ते पीडिताः प्रविविशुः कुरुकोसलादिदेशान् विसृज्य मधुरामथ कान्दिशीकाः ॥

Colophon:

श्रीमदात्रेयवंशमौक्तिकीभवद्वीरराघवाचार्यपौत्रस्य वेङ्कटरङ्गाचार्यतनूजस्य विद्वज्जनश्लाघितचरितस्य श्रीकृष्णमाचार्यस्य तनूभवेन नामगिर्यम्बागर्भसुधाब्धिकौस्तुभेन तातपुरवास्तव्येन वीरराघवाचार्येण विरचिते चम्पूभागवत प्रथमः स्तबकः ॥

End:

श्रीमान् कृत्वावतारं यदुकुलजलधौ दुर्हृदश्शिक्षयित्वा
जित्वा रामेण साकं निखिलमपि जगद्वाजिमेधैरनेकैः ।
इष्ट्वा ब्रह्मेन्द्रमुख्यामरमकुटतटीरत्ननीराजिताङ्घ्रिः
विश्वं विश्वम्भरोऽलंकुरु(त्वकु)त चिरमसौ कृष्णरूपी स देवः ॥

भैष्मीमुख्यैरथाष्टोत्तरशतघटितद्व्यष्टसाहस्रसङ्ख्या-
वद्भिश्शुद्धान्तनारीमणिभिरधिगतान्योन्यमैत्रैस्समेतः ।

उर्वीं दुर्वृत्तराजन्यकुलविघटितामुग्रसेनस्य हस्ते
कुर्वन् मस्तानि राज्ञां पदि च चिरमसौ पालयामास लोकान् ॥
जीयाद्धर्मो जगत्यामविरतममला लक्षणज्ञा गुणाढ्या
मोदन्तां दोषयुक्तास्वपि भणितिषु नः प्राज्ञवर्या महान्तः ।
सर्वे श्रीकृष्णलीलापरिकलनलसद्गद्यपद्यान्वितामु
श्रीमान् देवः कृपाब्धिः सततमिह कवौ प्रीयतां वासुदेवः ॥

Colophon:

श्रीमदात्रेयवंशमौक्तिकीभवद्वीरराघवाचार्यपौत्रस्य वेङ्कटरङ्गाचार्यपुत्रस्य विद्वज्जनश्लाघितचरितस्य श्रीकृष्णमाचार्यस्य तनूभवेन नामगिर्यम्बागर्भसुधाब्धिकौस्तुभेन तातपुरवास्तव्येन वीरराघवाचार्येण विरचिते चम्पूभागवते द्वादशस्तबकः ॥

The scribe adds—

वत्सवंशाब्धिविधुना वैद्यनाथतनूभुवा ।
लक्ष्मीनारायणेनेदं लिखितं स्वीयपाणिना ॥

R. No. 4123.

Palm-leaf. 18 × 1½ inches. Foll. 66. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Mīnākṣisundara Śāstrigal, Kīḻmaṅgalam, Periyakulam taluk, Madura district.

(*a*) अष्टोत्तरशतदिव्यदेशनामानि.

AṢṬŌTTARAŚATADIVYADĒŚANĀMĀNI.

Foll. 1*a*—2*a*.

Same work as that described under No. 5200 of the D.C.S. MSS., Vol. XI.

Wants the beginning; otherwise complete.

(*b*) ज्ञानार्णवः.

JÑĀNĀRṆAVAḤ.

Foll. 2*a*—40*a*. Fol. 40*b* is left blank.

Same work as that described under R. No. 13 ante.

Contains the Paṭalas 1—109 complete (but wants the beginning of the first Paṭala) and a small portion in the 110th Paṭala.

Foll. 41*a*—51*a* contain the त्रिपाद्विभूतिमहानारायणोपनिषद्, which is complete in eight Adhyāyas—vide Descriptive Catalogue, No. 518.

Fol. 51*a* contains the नारायणोपनिषद् complete—vide Descriptive Catalogue, No. 561.

Fol. 51 contains the वासुदेवोपनिषद् complete—vide Descriptive Catalogue, No. 787.

Fol. 52 contains the गरुडोपनिषद् complete—vide Descriptive Catalogue, No. 428.

Foll. 53*a*—56*a* contain रामतापिन्युपनिषद् complete—vide Descriptive Catalogue, No. 753.

Foll. 56*a*—57*a* contain सीतोपनिषद् complete—vide Descriptive Catalogue, No. 824.

Fol. 57 contains रामरहस्योपनिषद् complete—vide Descriptive Catalogue, No. 766.

Foll. 57*b*—61*a* contain गोपालतापिन्युपनिषद् complete—vide Descriptive Catalogue, No. 447.

Fol. 61 contains दत्तात्रेयोपनिषद् complete—vide Descriptive Catalogue, No. 539.

Foll. 62*a*—63*b* contain the दत्तात्रेयवज्रकवचषोडशाक्षरमन्त्रयन्त्राणि.

Foll. 64*a*—65*a* contain the भीष्मस्तवराज.

Foll. 65*a*—66*a* contain the अनुस्मृति.

Fol. 66*b* is left blank.

R. No. 4124.

Palm-leaf. 13¾ × 1¼ inches. Foll. 41. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1921-22 by M.R.Ry. Mīnākṣisundara Śāstrigal, Kilmaṅgalam, Periyakulam taluk, Madura district.

(*a*) सन्ध्यावन्दनभाष्यम्.

SANDHYĀVANDANABHĀṢYAM.

Foll. 1*a*—7*a*.

Same work as that described under No. 2883 of the D.C.S. MSS., Vol. V. By Tirumalayajvan.

Complete.

Foll. 7*b* and 8 contain the Gāyattrīdhyānaślōkārtha and Manīṣāpañcaka.

Fol. 9*b* is left blank.

Fol. 10 contains the ईशावास्योपनिषद् complete—vide Descriptive Catalogue, No. 300.

Foll. 10*b*—12*a* contain the केनोपनिषद् complete—vide Descriptive Catalogue, No. 376.

Fol. 12*b* is left blank.

Foll. 13*a*—15*b* contain the महावाक्यविवरण complete—vide Descriptive Catalogue, No 4710.

Fol. 16 contains पञ्चीकरण complete—vide Descriptive Catalogue, No. 4635.

Fol. 17 contains प्राणाग्निहोत्रविधि complete, similar to Descriptive Catalogue, No. 1113.

Foll. 18*a*—20*b* contain श्रीचक्रोद्धार. Fol. 18*b* is left blank. Foll. 21*a*—24*b* contain the भैरवमन्त्रविषय.

(*b*) सन्ध्याविषयवचनानि, प्रयोगसहितानि.

SANDHYĀVIṢAYAVACANĀNI WITH PRAYŌGA.

Foll. 25—39b.

Authoritative passages in connexion with the performance of Sandhyāvandana during pollutions, etc.

Wants the beginning and the end.

Beginning:

स्मृतिरत्नाकरकृतः जपार्घ्यदानयोरपि सूतकी सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणीकृत्य सूर्यं ध्यायन्नमस्कुर्यात् । "प्रक्षिपेत् सूतकी त्वर्घ्यं गायत्रीं च समुच्चरन् ।" इत्यादिभिस्सर्वकर्मपर्युदासे द्विविधाशौचेऽप्यवश्यकार्यत्व - विधानादकरणे "त्यजन् गच्छेदधोगतिम्" इति प्रत्यवायस्मरणाच्चार्घ्यदानं जप उपस्थानमिति त्रयमपि प्रधानम् ।

End:

पूर्ववदृषिश्छन्दः अङ्गन्यासध्यानादिकम् ।

करयोः पादयोर्जान्वोः कट्योर्नाभौ हृदि क्रमात् ।
कण्ठे बाह्वोर्मुखे नेत्रे कर्णयोर्मूर्ध्नि विन्यसेत् ॥

इति वामादिसंहारन्यासः.

* * * *

ततः एकावृत्त्या पुरुषसूक्तेन हृदयं स्पृष्ट्वा जपेत् । एवं पश्चाद्यात्तिन्यासः.

Fol. 40 contains the Sandhyānuṣṭhānavidhi. Fol. 41 is left blank.

R. No. 4125.

Palm-leaf. 15¾ × 1½ inches. Foll. 65. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1921-22 by M.R.Ry. Kṛṣṇa Śāstrīgal, Sṛṅgēri Maṭham, Sennamanūr, Periyakulam taluk, Madura district.

Fol. 15*b* is left blank.

भागवतचम्पूः.

BHĀGAVATACAMPŪḤ.

Same work as that described under R. No. 4122 ante. By Vīrarāghavācārya, son of Kṛṣṇācārya and Nāmagiriaṁbā, grandson of Vēṅkaṭaraṅgācārya and great grandson of Vīrarāghavācārya of Ātrēyagōtra.

Breaks off in the 8th Stabaka.

R. No. 4126.

Palm-leaf. 15×1½ inches. Foll. 134. Lines, 6 in a page. Nandināgarī. Very much injured.

Presented in 1921-22 by M.R.Ry. Narasiṁhācārya, Viriñcimaṅgalam.

भगवद्गीतातात्पर्यनिर्णयटीका—न्यायदीपिका.

BHAGAVADGĪTĀTĀTPARYANIRṆAYAṬĪKĀ : NYĀYADĪPIKĀ.

A commentary on Ānandatīrtha's Bhagavadgītātātparyanirṇaya, which work has been described under No. 4823 of the D.C.S. MSS., Vol X: by Jayatīrtha.

Wants the beginning; otherwise complete.

Beginning:

(इन्दिरावदनाम्भोजराजहंसाय विष्णवे ।
अमन्दानन्दसन्दोहसुन्दराकृतये नमः ॥)

(धर्मवि)ज्ञानवैराग्यपारमैश्वर्यशालिनः ।
आनन्दतीर्थभगवत्पादान् वन्दे निरन्तरम् ॥
(सपद्मनाभतीर्थार्कगोगणोऽस्तु दृशे मम ।
न तत्त्वमार्गे नमनं विना यदुपजीवनम् ॥
प्रणम्य चरणद्वन्द्वं गुरूणां) तत्कृपाबलात् ।
व्याकरिष्ये यथाबोधं गीतातात्पर्यनिर्णयम् ॥

* * * *

न च ब्रह्मनिर्वाणं चेति योजना, ब्रह्मप्राप्त्यतिरिक्तमोक्षानिरूपणादित्यत आह—बाणमिति । बाणशब्दस्य शरीरवाचित्वान्निर्वाणपदेन कार्यब्रह्मव्यावृत्त्यर्थं ब्रह्मणोऽशरीरत्वमेवोच्यते न मोक्ष इति भावः । ननु कथमशरीरत्वं ब्रह्मणः सहस्रशीर्षेत्यादिविरोधादित्याशङ्कां स्मृत्यैव परिहरति—अभावादिति ।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्गीतातात्पर्यनिर्णयस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां न्यायदीपिकायां द्वितीयोऽध्यायः ॥

End:

तमेव हरिमादरविशेषात्पुनः स्तौति—निश्शेषेति । (भूतिर्महालक्ष्मीः) ॥
श्रीमदानन्दतीर्थार्यहृदयामलमन्दिरः ।
इन्दिरारमणः प्रीतिं यातु दीनदयापरः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्गीतातात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायामष्टादशोऽध्यायः ॥

R. No. **4127.**

Palm leaf. 18 × 1¾ inches. Foll. 112. Lines, 8 in a page. Nandināgarī. Much injured.

Presented in 1921–22 by M.R.Ry. Narasimhācāriyar, Viriñcimangalam.

ब्रह्मसूत्रभाष्यानुव्याख्यानटीका—न्यायसुधा.

BRAHMASŪTRABHĀṢYĀNUVYĀKHYĀNAṬĪKĀ : NYĀYASUDHĀ.

Same work as that described under No. 4820 of the D.C.S. MSS., Vol. X. By Jayatīrthayati.

Contains the second Adhyāya complete, but wants the beginning of the first Pāda of the second Adhyāya.

Foll. 45*b* and 110—112 are left blank.

R. No. **4128**.

Palm-leaf. $13\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 152. Lines, 10 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Narasiṁhācāriyar, Viriñcimaṅgalam.

महाभारतम्.

MAHĀBHĀRATAM.

Same work as that described under No. 1915 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 3—28 in the Āśvamēdhikaparvan.

R. No. **4129**.

Palm-leaf. 16 × 1 inches. Foll. 96. Lines, 5 in a page. Nandināgarī. Much injured.

Presented in 1921–22 by M.R.Ry. Narasiṁhācāriyar, Viriñcimaṅgalam.

तीर्थप्रबन्धव्याख्या — गुरुभावप्रकाशिका.

TĪRTHAPRABANDHAVYĀKHYĀ : GURUBHĀVAPRAKĀŚIKĀ.

Foll. 3*a*—96*a*. Fol. 96*b* is left blank.

Same work as that described under Nos. 12148 and 12149 of the D.C.S. MSS., Vol. XXI.

Complete.

Foll. 1 and 2 are left blank. Fol. 94 contains a portion of this work.

Date of transcription—8th day of the bright fortnight of the lunar month Mārgaśira in the year Viṣu.

Name of the scribe—Vēṅkaṭarāman.

R. No. **4130.**

Palm-leaf. $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 45. Lines, 8 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Śrīnivāsācāriyar, Śuṇḍapāḷaiyam, Coimbatore district.

(*a*) वैकुण्ठस्तवव्याख्या.

VAIKUṆṬHASTAVAVYĀKHYĀ.

Foll. 1*a*—42*b*.

Similar to the commentary described under No. 10399 of the D.C.S. MSS., Vol. XVIII. By Vēṅkaṭanivāsadāsa, son of Rāmānuja and grandson of Śēṣācalārya of Ātrēyagōtra.

Complete.

Date of transcription—19th day of the solar month Puraṭṭāsi in the year Saumya.

Name of the scribe—Vēṅkaṭācārya.

Beginning:

यो भगवान् रामानुजः नित्यमच्युतपदाम्बुजयुग्ममेव रुक्मं स्वर्णं भोग्यमिति यावत् । तत्र व्यामोहतः अङ्गिना . . . . दित्यर्थः । तादि तराणि वस्तूनि इति शेषः; प्रयोजनान्तराणीति यावत् । तृणाय मेने तृणवदमंस्त ; मन्यकर्मण्यनादर इत्यादिना चतुर्थी ।

* * * *

अनन्तरं भगवद्भाष्यकारप्राचार्ययामुनमुनिभिः मातापितेत्यादिश्लोकेन सङ्गृहीत निरङ्कुशवैभवं पराङ्कुशमुनिं समाश्रयणीयतया समाभ्यधिकरहिततया चाह श्लोकद्वयेन । ऋग्यजुस्सामभेदवत्यास्तिस्रो विद्यास्त्रैविद्यं स्वार्थिकोऽण् प्रत्ययः । तत्र वृद्धा बहुशास्तदर्थपरिशीलनशीला इत्यर्थः ।

End:

तर्हि तदा त्वमेव मयि शक्त्यधिकारवाञ्छाः वाञ्छाशक्तिभ्यां तत्-कार्ये उद्योगानुष्ठाने लक्ष्येते । प्रत्यूहशान्तिः विघ्नशमनमितरद्विश्वं चाङ्गोपाङ्गपूर्तिरूपमन्यत्सर्वं च विधेहि "अत्रास्ति दुष्करेणेशे चेद्यो येनेष्टहेतुना । स स तस्याहमेवेति चरमश्लोकसङ्ग्रहः" ॥ इत्यभियुक्तोक्तिरनुसन्धेया ॥

Same work as that described under No. 10685 of the D.C.S. MSS., Vol. XIX. By Dēvarāja alias Varavaramunidāsa also called Vīrarāghava of Vādhūlagōtra and disciple of Varadārya.

Complete.

This commentary is called Sadācāradīpikā.

R. No. **4132.**

Śrītāla. $10\frac{1}{4} \times 2$ inches. Foll. 74. Lines, 10 in a page. Grantha. Much injured.

Presented in 1921–22 by M.R.Ry. Śrīnivāsācāriyar, Śuṇḍapālaiyam, Coimbatore district.

(*a*) दयाशतकम्, दीपिकाव्याख्यासहितम्.

DAYĀŚATAKAM WITH THE COMMENTARY DĪPIKĀ.

Foll. 1*a*—44*b*.

Same text and commentary as that described under No. 10009 of the D.C.S. MSS., Vol. XVIII; the text is by Vēdāntadēśika and the commentary by Śrīnivāsa of Vādhūlagōtra.

Wants the beginning; otherwise complete.

(*b*) यतिराजसप्ततिः, सव्याख्या.

YATIRĀJASAPTATIḤ WITH COMMENTARY.

Foll. 45*a*—74*b*.

Text is the same as that and the commentary similar to that described under R. No. 595 ante. By Rāmānujācārya.

Complete.

Wants the introductory stanzas in the beginning and contains two additional stanzas in the end.

सत्पुरुषदेशिकदयाप्राप्तत्रय्यन्तभाषि(व)तत्त्वेन ।
रामानुजेन विदुषा व्याख्या यतिराजसप्ततेर्विहिता ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य, वेदान्ताचार्यस्य कृतिषु यतिराजसप्ततिः समाप्ता ॥

R. No. **4133.**

Palm-leaf. 17 × 1⅜ inches. Foll. 152. Lines, 10 in a page. Grantha. **Fair.**

Presented in 1921–22 by M.R.Ry. Vēṅkaṭrāmadīkṣitar, Mannādimaṅgalam, Solavandan post, Madura district.

Foll. 14—20 are wanting.

(*a*) क्षुद्रकल्पभाष्यम्.

KṢUDRAKALPABHĀṢYAM.

Foll. 1*a*—91*b*.

A commentary on the work described under the next subdivision: by Śrīnivāsācāryayajvan, pupil of Tātācārya.

Contains the Adhyāyas one to six complete.

Beginning:

श्रियं श्रीशं श्रीनिवासं श्रीकामं श्रीनिधं सदा ।
श्रीदं श्रीपतिमृक्सामयजूरूपं श्रियै श्रये ॥
श्रियं पत्नीश्रियः(?) श्रीशां (श्रीनुतां श्रीस्वरूपिणीम्) ।
व्याप्तां सह श्रिया श्रीदां श्रीवत्सस्थां श्रये श्रिया ॥
राणायनिमुखाचार्यान् सूत्रभाष्यकृतो मुनीन् ।
वेदव्यासं भजे वाचं ब्रह्माणं च स्वयम्भुवम् ॥
शब्दार्थरूपिणौ तार्क्ष्यशेषौ तदधिपं भजे ।
विष्वक्सेने वेदयज्ञौ श्रीनारायणरूपिणौ ॥
श्रीकल्पसूत्रोपग्रन्थकृतो गुरुवरान् भजे ।
श्रीगार्ग्यमङ्क(शक)द्राह्यायणकात्यायनाह्वयान् ॥
शतक्रतुं तातगुरुं वेदवेदान्तपारगम् ।
वेदान्तानां गुरून् वन्दे वेदान्ताचार्यलक्ष्मणान् ॥
श्रीश्रीनिवासगुरुणा शतक्रतुतनूभुवा ।
चतुराम्नायषट्सूत्रीपारगेण हरेर्मुदे ॥
पूर्वाचार्यानुग्रहेण सूत्रब्राह्मणदर्शनात् ।
क्षुद्रकल्पाख्यसूत्रस्य भाष्यं सन्तन्यतेऽधुना ॥

आर्षेयकल्पस्सप्तदशाध्यायः । तत्रैकादशभिरध्यायैः ज्योतिष्टोमादिविश्वसृजामयनपर्यन्तानि एकाहाहीनसत्राणि ब्राह्मणक्रमेणोक्तानि । उत्तर(क्षुद्र)कल्पे तु षड्भिरध्यायैर्ब्राह्मणे ज्योतिष्टोमप्रकरणोक्तानां शाखान्तरोक्तानां षडहर्विचारादीनामूहरहस्ययोः प्रायश्चित्ताधीतानां साम्नां यज्ञेषु कल्प

उच्यते । तत्र प्रतिपद्भिश्चतुर्दश । ब्रह्मसामभिः नव । अग्निष्टोमसाम्नैकः । उक्थ्यास्सप्त—एते प्रथमाध्याये प्रोक्ताः ।

* * * *

आहुतिकल्पाश्चेति । आहुतिः प्रायश्चित्तं तत्कल्पः तद्विषय इत्यर्थः । द्विरुक्तिरध्यायसमाप्तिद्योतनार्था ॥

शतक्रतुचतुर्वेदिश्रीनिवासा[चा]र्ययज्वना ।
उत्तरद्वै(क्षुद्रे द्वि)तीयकोऽध्यायो व्याख्यायि प्रीतये हरेः ॥

Colophon:

इति श्रीमद्रामानुजसिद्धान्तस्थापनाचार्यतनयचतुर्वेदिश्रीनिवासाचार्यविरचिते उक्त(क्षुद्र)कल्पसूत्रभाष्ये द्वितीयोऽध्यायः ॥

End:

वाग्वै द्वादशाहः । वाग्वा एष(।) वि[र]तता य(द्) द्वादशाहः । प्रजापतिर्हि वाक् । श्रीवाग्रूपत्वं वाग्वै यज्ञः । वाग्वै क्रतुः । यज्ञमुखं वाक् । प्रजापतिमात्वा(प्त्वा) श्रियं गच्छन्तीत्यादि चेति सर्वं समञ्जसम् ॥

सहस्रधारास्सहस्रस्सहस्रार्चिस्सहस्रगः ।
सहस्रशाखसामन् मा सहस्रार्चिस्सहस्रकः ॥
शिष्टो लक्ष्या च साहस्रया सहस्राक्षरया श्रिया ।
सहस्रदौ(गो)दक्षिणया प्रीयतां वेङ्कटाधिपः ॥
सामगाचार्यकृपया ताताचार्यप्रसादतः ।
अनुग्रहाद्गुरूणां च ब्राह्मणानां कटाक्षतः ॥
शतक्रतुचतुर्वेदिश्रीनिवासार्ययज्वना ।
षष्ठोऽध्यायः उत्तर(क्षुद्रकल्पो(ल्पे)व्याख्यायि प्रीयतां हरे(रि)ः ॥

Colophon:

उत्तर(क्षुद्र)कल्पसूत्रभाष्ये षष्ठोऽध्यायः ॥

(*b*) क्षुद्रकल्पसूत्रम्, सप्रायश्चित्तम्.

KṢUDRAKALPASŪTRAM WITH PRĀYAŚCITTA.

Foll. 92*a*—104*b*.

On the details of procedure laid down in the Kṣudrakalpa in connexion with the performance of sacrificial rites by the followers of the Sāma-Vēda.

Complete in six Adhyāyas.

Beginning:

ग्रामकामस्य क्लृप्तो ज्योतिष्टोमः । प्रजाकामस्योपोषु जातमप्तु(ध्व)रमिति । स्तोत्रीयो नौधसस्यर्क्षु जनित्रं ब्रह्म साम न हि वश्चरमं च नेत्येतयोः । पूर्वं मध्यमा सप्तदशस्य विष्टुतिः । ऊर्ध्वं होतुः पृष्ठात् । समानमितरज्योतिष्टोमेन । यां स मां महादेवः पशून् हन्यात् । स नः पवस्व शं गव इति स्तोत्रीयावृत्तस्तृचः ।

* * * *

कालेयाभ्यां लुप्यन्ते तत्सम्पन्नं तत्सम्पन्नम् ॥

Colophon:

प्रथमोऽध्यायः ॥

End:

तत एव सोऽन्यः कल्पो भवत्येतेऽनुप्रभेदेनापार एव द्वादशाहानां विद्यते न पार इति न पार इति ॥

Colophon:

षष्ठोऽध्यायः ॥ समाप्तः क्षुद्रकल्पस्सप्रायश्चित्तः ॥

क्षुद्रकल्पसूत्रम् ॥

(*c*) क्षुद्रकल्पोपग्रन्थः.

KṢUDRAKALPŌPAGRANTHAḤ.

Foll. 105*a*—116*b*.

Similar to the above.

Contains the Paṭalas one to nine complete.

Beginning:

अथ सम्पत्सिद्धिरनादेशे स्तोत्रीयातश्शते विहिते संमोस्समस्ताख्ये प्रत्येकमर्थाद्विनियमज्योतिष्टोमे नवतमुक्थ्ये त्रिपञ्चाशे द्वाचत्वारिंशानि चत्वार्यतिरात्रे सवनानां भक्तीनां वादः छन्दस्स्तोभक्षस्थानदैवतैर्यानि सप्त चतुरक्षराणीति ।

* * * *

त्रिवृतं स्तोमं सम्पद्यते बृहती छन्द इति ॥

Colophon :

प्रथमः पटलः ॥

End :

एतेनावच्छिन्नस्य बृहद्रथन्तरपृष्ठस्य षडहस्य षोडशस्तोत्रीयो याख्या-तः । यश्चैव षडहविचारेषु यश्च संसत्स्विति यश्च संसत्स्विति ॥

Colophon :

नवमः पटलः ॥

उपग्रन्थस्समाप्तः ॥

(*d*) सामवेदमन्त्रभाष्यम्.

SĀMAVĒDAMANTRABHĀṢYAM.

Foll. 117*a*—151*b*.

Same work as that described under Nos. 68 and 70 of the D.C.S. MSS., Vol. I, Part II. By Śayaṇācārya.

Wants the beginning in the introductory stanzas.

Contains the two Praśnas complete.

Fol. 152 is left blank.

R. No. **4134.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 115. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Śaṅkara Śāstrigaḷ, Sholavandan, Madura district.

Fol. 1*a* contains the name of this work. Foll. 1*b* and 2 are left blank.

आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM : GṚHYA-TĀTPARYADARŚANAM.

Foll. 3*a*—112*b*. Foll. 113—115 are left blank.

Same work as that described under No. 1188 of the D.C.S. MSS., Vol. II. By Sudarśanācārya.

Contains up to the Aṣṭakaśrāddha.

R. No. 4135.

Palm-leaf. 12 × 1 inches. Foll. 175. Lines, 8 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Vāsudēvācāriyar and Lakṣmaṇaiyar, Surayyanellur, Dharapuram taluk, Coimbatore district.

Foll. 1, 156*b* and 174*b*—175*b* are left blank.

स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Same work as that described under No. 2798 of the D.C.S. MSS., Vol. V. By Vaidyanāthadīkṣita.

Contains the Prāyaścittakāṇḍa incomplete.

R. No. 4136.

Palm-leaf. 13¾ × 1 inches. Foll. 132. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry Vāsudēvācāriyar and Lakṣmaṇaiyar, Surayyanellur, Dharapuram taluk, Coimbatore district.

(*a*) भट्टिकाव्यव्याख्या—सर्वपथीना.

BHAṬṬIKĀVYAVYĀKHYĀ: SARVAPATHĪNĀ.

Foll. 3*a*—50*a*. Foll. 1, 2 and 50*b*—54*b* are left blank.

Same work as that described under R. No. 1220 ante. By Mallinātha.

Contains the Sarga VI complete and Sarga VII incomplete.

(*b*) चम्पूरामायणव्याख्या—पदयोजना.

CAMPŪRĀMĀYAṆAVYĀKHYĀ: PADAYŌJANĀ.

Foll. 55*a*—130*a*. Foll. 130*b*—132*b* are left blank.

Same work as that described under No. 12281 of the D.C.S. MSS., Vol. XXI. By Nārāyaṇa, son of Nāgēśvarayajvan and Narasakka of Kōlacala family.

Contains the Kiṣkindhākāṇḍa and Sundarakāṇḍa complete.

R. No. 4137.

Palm-leaf. 13¾ × 1 and 6¾ × 1⅛ inches. Foll. 31. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. K. Rāmēśvara Ayyar, Schoolmaster, Periyakulam, Madura district.

(*a*) भार्गवसूत्रम्.

BHĀRGAVASŪTRAM.

Foll. 1*a*—14*a*.

Aphorisms on horoscopy in astrology: by Bhṛgu.

Apparently complete.

Beginning:

लग्ने रविः—आरोग्यं भवति । पित्तप्रकृतिः, नेत्ररोगः, मेधावी, सदाचारवान्, उष्णदेहवान्, मूर्खवान्, पुत्रहीनः, तीक्ष्णबुद्धिः, अल्पभाषी, प्राणदानशीलः, सुखी

* * * *

Colophon:

इत्युपदेशे भार्गवसूत्रे भावाध्याये प्रथमः पादः ॥

End:

एकादशे राहुः पुत्रसमृद्धिमान्, धनधन्यसमृद्धिः । द्वादशे राहुः—अल्पपुत्रकः पुत्ररोगी ॥

इति राहुकेत्वो(र)त्यन्तफलं समाप्तम् ॥

Colophon:

इत्युपदेशे भार्गवसूत्रे भावयोगाध्याये नवमः पादः ॥

द्वादशे भार्गवसूत्रे तृतीयोऽध्यायस्समाप्तः ॥

Foll. 15*a*—16*a* contain the Kēraladvādaśabhāva. Foll. 14*b* and 16*b* are left blank.

(*b*) द्वादशभावफलम्.

DVĀDAŚABHĀVAPHALAM.

Foll. 17*a*—29*a*. Foll. 29*b*—31*b* are left blank.

Similar to the work described under R. No. 374(*h*) ante.

Incomplete.

Beginning:

देहस्थे सूर्यगे जातो मानी चोष्णचतुर्गुणी ।
कोपशीलो राजपूज्यो सिंहस्थे तु महाधनी ॥
द्वितीयस्थानगे सूर्ये धनहानिर्भवेद्ध्रुवम् ।
विशालाक्षोऽसत्यवादी पण्डितः प्रभुसेवकः ॥
तृतीयस्थानगे सूर्ये बुद्धिमान् प्रियदर्शनः ।
शौर्यवान् भ्रातृविगुणः बलवान् प्रभुसेवकः ॥

End :

व्ययस्थानगते राहुः(हौ)शय्याखट्वादिवर्जितः ।
लोभी स्प(भ्र)ष्टः कर्महीनः किञ्चिद्राज्यपरिग्रहः ॥
ध्वजे लग्नगते जातो.

R. No. **4138.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 11. Lines, 8 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Kastūri Subbayyar, South Agraharam, Periyakulam, Madura district.

Foll. 10*b* and 11 are left blank.

मद्रकन्यापरिणयचम्पुः.
MADRAKANYĀPARIṆAYACAMPUḤ.

Same text as that described under No. 12334 of the D.C.S. MSS., Vol. XXI. By Gaṅgādharakavi.

Contains the first Ullāsa incomplete.

R. No. **4139.**

Palm-leaf. 15 × 1 inches. Foll. 89. Lines, 6 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Kastūri Subbayyar, South Agraharam, Periyakulam, Madura district.

Foll. 1—3 give the contents of this work.

(*a*) अघविवेचनम्.
AGHAVIVECANAM.

Foll. 4*a*—11*b*.

Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V. By Rāmacandrādhvarin, son of Anantasōmayājin.

Complete.

The scribe adds—

काशीविश्वनाथेन लिखितम्.

(*b*) अघपञ्चषष्टिः, सव्याख्या.
AGHAPAÑCAṢAṢṬIḤ WITH COMMENTARY.

Foll. 12*b*—37*b*.

Same work as that described under R. No. 672(*d*) ante. By Rāmacandra.

Complete.

The commentary is called Smṛtisiddhāntasudhā.

The scribe adds—

काशीविश्वनाथेन लिखितम्.

(*c*) अघनिर्णयः, सव्याख्यः.

AGHANIRṆAYAḤ WITH COMMENTARY.

Foll. 38*a*—84*b*.

Same work as that described under No. 2994 of the D.C.S. MSS., Vol. V. The text is by Hārīta Vēṅkaṭācārya and the commentary by Vaidikasārvabhauma alias Mitratāta, also called Tōḻappar.

Complete.

The scribe adds—

काशीविश्वनाथेन लिखितम्.

Fol. 85*a* contains a few stanzas on Āśauca. Fol. 85*b* is left blank. Foll. 86*a*—87*b* contain the Jayantīkalpa. Foll. 88*a*—89*b* give the Brahmacārinārāyaṇabaliprayōga.

R. No. **4140**.

Palm-leaf. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 160. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1921–22 by M.R.Ry. Cennakēśava Śāstrigaḷ, Tenkarai, Periyakulam, Madura district.

स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

Similar to the work described under R. No. 1751 ante. By Vidyāraṇya.

Incomplete.

Beginning:

प्रणम्य प्रणताशेषबन्धानन्दैककारणम् ।
चरणं गणनाथस्य भारत्याश्च गुरोरपि ॥
मन्वादि(ना)नास्मृतिषु वच . . . . . . ।

. . . . (मु)द्धृत्य वक्ष्यते स्मृतिसङ्ग्रहः ॥

आद्यं पौर्वाह्णिकं कृत्यं माध्याह्निकमतः परम् ।

आपराह्णिकं तथा मासपक्षादेः कालनिर्णयम् ॥

श्राद्धाशौचनिषेकादिसंस्काराश्शान्तिकं तथा ।

प्रायश्चित्तं च दानादि यथावदनुपूर्वशः ॥

तत्रादौ धर्मदेशेनाह मनुः—

सरस्वतीदृषद्वत्योर्देवनद्या (य)दन्तरम् ।

तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

* * * *

श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ ।

श्रुत्योर्विरोधो यत्र स्यान्मनुवाक्यस्य सम्मतम् ॥

आचारस्य विरोधस्य स्वदेशात्तु व्यवस्थितिः ।

अथ ब्रह्माण्डपुराणे—

विद्वद्भिः प्रातरुत्थाय प्रणम्य मनसा हरिम् ।

सत्कृत्य तदहःकृत्यं सन्ध्यावन्दनमाचरेत् ॥

End:

अत्र व्यासः—

सूतकान्ते नरः कुर्यादेकोद्दिष्टद्वयं सुधीः ।

सूतके पतिते चापि स्वतन्त्रं नातिलङ्घयेत् ॥

स्वतन्त्रं नवश्राद्धनवमिश्राद्न्यत् । सूतके पतिते चापि—इत्यनेन मातर्य . . . . यां तदाशौचमध्ये पिता यदि म्रियते तदा मातुर्महैकोद्दिष्टं कार्यम् ।

* * * *

तत् स्वतन्त्रैकोद्दिष्ट . . . . . .

Fol. 160 is left blank.

R. No 4141.

Palm-leaf. 13⅜ × 1 inches. Foll. 22. Lines, 7 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. Pārthasārathipāṭrācāriyar, Kāvēripuram, Bhavani taluk, Coimbatore district.

वल्लीपरिणयम्.

VALLĪPARIṆAYAM.

Same work as that described under No. 12773 of the D.C.S. MSS., Vol. XXI. By Bhāskarayajvan, son of Śivasūryayajvan of Śrīvatsa-gōtra.

Complete with additional stanzas in the end.

शरवणभव महाकृपाशेवधे

भारतीशोऽपि तेन विदितमहिमा कृतः ।

* * * *

ऋक्सामाद्यखिलागमार्थविकृतिख्यातस्य सत्साहिती-

मार्गैतिह्यगुरोः पतञ्जलिगुरु व्या(सादिसू)क्तेष्वपि ।

व्याख्यातुश्शिवसूर्यदीक्षितमणेः पुत्रेण वल्लीपतेः

प्रीत्यै भास्करयज्वना विरचितं जीयाच्चिरं नाटकम् ॥

Colophon :

वल्लीपरिणयनाटकं समाप्तम् ॥

R. No. **4142.**

Palm-leaf. $14\frac{5}{8} \times 1$ inches. Foll. 253. Lines, 8 in a page. Grantha. Very much injured.

Presented in 1921–22 by M.R.Ry. Pārthasārathipātrācāriyar, Kāvēripuram, Bhavani taluk, Coimbatore district.

भगवद्गीताभाष्यविवेचनम्.

BHAGAVADGĪTĀBHĀṢYAVIVĒCANAM.

Same work as that described under No. 2055 of the D.C.S. MSS., Vol. IV, Part I. By Ānandajñāna, pupil of Śuddhānandapūjyapāda.

Complete, but wants the beginning in the first Adhyāya.

Foll. 19, 28, 29, 33*a*, 58*g*, 218*b*, and 253 are left blank.

R. No. **4143.**

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 50. Lines, 9 in a page, Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Āñjanēyaghanapāṭhigaḻ, Sholavandan, Nilakkottai taluk, Madura district.

Fol. 2*a* contains a small portion of Brahmasūtra-Śaṅkarabhāṣya. Foll. 3*a*—5*a* contain a portion of Āpōdēvīya. Foll. 1, 2*b*, 5*b* and 50*b* are left blank.

वेदान्तकौस्तुभः.

VĒDĀNTAKAUSTUBHAḤ.

Foll. 6*a*—50*a*.

An exposition of the Brahmasūtras in accordance with the Advaita-Vēdānta: by Sītārāma of Kauṇḍinyagōtra.

Contains the Catussūtrī complete.

Beginning:

जन्मस्थितिलयहेतुं जगतामीशं विशुद्धमखिलज्ञम् ।
सत्सुखबोधशरीरं परिगतमसुभृद्गुहाशयं वन्दे ॥
ध्येयं योगिवरैरहीन्द्रशयनं सर्वात्मभूतं विभुं
सर्वज्ञेशमचिन्त्यशक्तिमखिलश्रुत्यन्तगीतं परम् ।
नित्यं भूषणभूषिताङ्गमतसीगुच्छप्रभं मापतिं
लीलास्वीकृतमूर्तिमादिरहितं विष्णुं नमाम्यन्वहम् ॥

* * * *

श्रुत्यन्तदुग्धपाथोधिमथनादुद्धृतं पुरा ।
ब्रह्मसूत्रामृतं येन तं वन्दे बादरायणम् ॥
सर्वत्श्रुयन्तसारार्थतदन्यक्षीरनीरयोः ।
विवेकी यः परो हंसस्तं वन्दे शङ्कराभिधम् ॥
श्रुत्यन्तवनसञ्चारिद्वैतिकुञ्जरभीतिदम् ।
गुरुरूपमहं वन्दे हरिं सर्वगुहाशयम् ॥
द्विजेन्द्रं कश्चिदात्रेयगोत्रदुग्धाब्धिसम्भवम् ।
तापत्रयापहं वन्दे गुरुरूपमहं मुहुः ॥
श्रीमदुत्तरमीमांसादुग्धाब्धिमथनोद्भवम् ।
अर्पयामि हरौ शेषतल्पशायिनि कौस्तुभम् ॥

अथातो ब्रह्मजिज्ञासा । स्वाध्यायोऽध्येतव्य इति नित्याध्ययनविधिनाधीतसाङ्गस्वाध्याये तद्विजिज्ञासस्य, सोऽन्वेष्टव्यस्स विजिज्ञासितव्य आत्मा वारे द्रष्टव्यश्श्रोतव्य इत्यादिवाक्यैरात्मदर्शनरूपं फलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते । श्रवणं नाम नित्यशुद्धबुद्धमुक्तसत्यनिरतिशयानन्दा-

नन्तात्मकाद्वितीयब्रह्मात्मैकत्वदर्शनानुकूलो न्यायमात्र(विचा)रः । स च साधनचतुष्टयसम्पन्नैर्द्विजमुख्यैर्वेदान्तवाक्यैः कर्तव्य इति पर्यवसितोऽर्थः ।

End:

तदा विद्वान् सुरर्षभः पुण्यपापे विधूय यद्यास्तिकस्सर्वहेतुभिस्सर्वाकारतया साध्यं परमाद्वैतलक्षणमुपैति नात्र सन्देहः कर्तव्यश्च मनीषिभिरिति । तस्मात् सर्वेषां वेदान्तानां निष्प्रपञ्चे प्रत्यगभिन्ने ब्रह्मणि समन्वय इति सिद्धम् ॥

Colophon:

इति श्रीमत्कौण्डिन्यान्वयसम्भूतनिगमान्तार्थनिषेविसीतारामाख्यसूरिविरचितकौस्तुभे चतुस्सूत्री समाप्ता ॥

R. No. **4144.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 80. Lines, 8 in a page. Grantha. Fair.

Presented in 1921–22 by M.R.Ry. Nārāyaṇa Śāstrigaḷ, Tenkarai, Sholavandan, Nilakkottai taluk, Madura district.

सामवेदभाष्यम्.

SĀMAVĒDABHĀṢYAM.

Same work as that described under No. 57 of the D.C.S. MSS., Vol. I, Part II. By Bhairavasvāmin.

Incomplete.

R. No. **4145.**

Palm-leaf. $14\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 152. Lines, 9 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Nārāyaṇa Śāstrigaḷ, Tenkarai, Sholavandan, Nilakkottai taluk, Madura district.

(*a*) भावप्रकाशनम्.

BHĀVAPRAKĀŚANAM.

Foll. 2*a*—154*a*. Foll. 1 and 154*b* are left blank.

Same work as that described under R. No. 3636 ante. By Śāradātanaya, son of Bhaṭṭagōpāla and pupil of Divākara.

Complete.

(b) कुवलयानन्दव्याख्या — अलङ्कारचन्द्रिका.
KUVALAYĀNANDAVYĀKHYĀ : ALAṄKĀRACANDRIKĀ.

Foll. 155*a*—158*b*. Fol. 159 is left blank.

Same work as that described under Nos. 12862 and 12863 of the D.C.S. MSS., Vol. XXII. By Vaidyanātha.

Wants the beginning in the Upamā-prakaraṇa and the end in the Upamēyōpamā-prakaraṇa.

R. No. **4146.**

Palm-leaf. $13\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. *101*. *Lines, 8 in a page*. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Nārāyaṇa Śāstrigal, Tenkarai, Nilakkottai taluk, Madura district.

भगवन्नामचिन्तामणिः.
BHAGAVANNĀMACINTĀMAṆIḤ.

Same work as that described under R. No. 25 ante, wherein see for the beginning. By Vēṅkaṭakṛṣṇasūri, son of Appādīkṣita.

Breaks off in the fourth Prakaraṇa.

Colophon:

इति सर्वतन्त्रस्वतन्त्रस्याप्पादीक्षितस्य पुत्रेण वेङ्कटकृष्णसूरिणा विरचिते भगवन्नामचिन्तमणौ प्रमाणसङ्ग्रहात्मकं प्रथमं प्रकरणम् ॥

End:

आवृत्तिस्तु वासनानिवृत्तौ वा भक्त्यभिवृद्धौ वा तत्तन्मनोरथसिद्धौ वोपयुज्यत इत्यास्तिकानां पन्थाः । किं चोत्तरपूर्वाघाश्लेषविनाशपूर्वकभगवत्साम्यसम्पत्तिरूपामतिदुर्लभां मुक्तिमपि प्रयच्छतो भगवन्नामकीर्तनस्य पूर्वाघमात्रं कियदित्यलं विस्तरेण ॥

Colophon:

इति सर्वतन्त्रस्वतन्त्रस्याप्पादीक्षितस्य पुत्रेण वेङ्कटकृष्णसूरिणा विरचिते भगवन्नामचिन्तामणौ पापनिवृत्तिनिरूपणाख्यं तृतीयं प्रकरणम् ॥

ननु कथं कीर्तनस्य मुक्तिफलकत्वं ? मुक्तिफलकत्ववचनानां नान्यः पन्था इति ज्ञानव्यतिरिक्तोपायान्तरनिषेधपरश्रुतिविरोधात् । अष्टाङ्गयोगध्यानात्मकभक्तिकीर्तनयोर्मेरुसर्षपन्यायेनात्यन्तगुरुलघुभूतयोस्तुल्यवाद्विकल्पासम्भवात् ।

* * * *

. . . सिध्यन्ति पुण्यमामोत्यनुत्तमम् । हरिर्ददाति भग(वान्) . .

R. No. **4147.**

Palm-leaf. 14¾ × 1 inches. Foll. 63. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Nārāyaṇa Śāstrigaḷ, Tenkarai, Sholavandan, Nilakkottai taluk, Madura district.

(*a*) उत्तररामायणचम्पूः.

UTTARARĀMĀYAṆACAMPŪḤ.

Foll. 1*a*—49*b*.

Same work as that described under No. 12222 of the D.C.S. MSS., Vol. XXI. By Vēṅkaṭakṛṣṇa, son of Vēṅkaṭādri and Maṅgāmbā.

Wants the beginning; otherwise complete.

Foll. 49*b* and 50*a* contain Prahēlikāślōkas.

(*b*) शिवचरित्रचम्पुः.

ŚIVACARITRACAMPUḤ.

Foll. 51*a*—62*b*.

Same work as that described under No. 12378 of the D.C.S. MSS., Vol. XXI. By Kaviśēkhara.

Contains the first Āśvāsa incomplete.

R. No. **4148.**

Palm-leaf. 17⅛ × 1¼ inches. Foll. 73. Lines, 9 in a page. Grantha Good.

Presented in 1921–22 by M.R.Ry. Nārāyaṇa Śāstrigaḷ, Tenkarai, Sholavandan, Nilakkottai taluk, Madura district.

पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ : MĀDHAVĪYĀ.

Same work as that described under No. 2646 of the D.C.S. MSS, Vol. V. By Mādhavācārya.

Wants the introductory stanzas in the beginning; otherwise complete.

R. No. 4149.

Palm-leaf. 13¾ × 1¼ inches. Foll. 155. Lines, 9 in page. Grantha. Slightly injured.

Presented in 1921–22 by M.R.Ry. Gōpālakṛṣṇayyar, Sholavandan, Nilakkottai taluk, Madura district.

(*a*) गीतासारः.

GĪTĀSĀRAḤ.

Foll. 2*a*—6*a*. Fol. 1 contains some stanzas from the Vāsiṣṭharāmāyaṇa. Fol. 6*b* is left blank.

Slightly different from the work described under No. 14272 of the D.C.S. MSS., Vol. XXV (Supplemental).

Complete.

Beginning:

श्रीभगवानुवाच—

इदमप्यपरं भूयः शृणु गुह्यं सनातनम् ।
सर्वेष्वपि च वेदेषु पुराणेषु च कृत्स्नशः ॥

यदग्रकथितं पार्थ सर्वैर्मुनिवरैस्सदा ।
वर्णत्रयसमायुक्तमृग्यजुस्सामलक्षितम् ॥

प्रणवाद्यं महाबाहो बुद्धिमान् जगतीपते ।
इदं जपन् महाबाहो मां नमस्कुरु यत्नतः ॥
ततो मां वेत्स्यसे सम्यक् सत्यमेव वदामि ते ।
अन्यदेव परं श्रेयो नात्र कार्या विचारणा ॥
तस्मात् सर्वप्रयत्नेन योगयुक्तो भवार्जुन ॥

अर्जुन उवाच—

ओङ्कारस्य तु माहात्म्यं रूपं ज्ञानं च केशव ।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥

End:

गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ।
गायतां शृण्वतां नित्यं विष्णोर्माहात्म्यमुत्तमम् ॥

श्रीविष्णोर्माहात्म्यमुत्तममिति ॥

Colophon:

श्रीगीतासारस्समाप्तः ॥

(b) उपदेशसाहस्री.

UPADĒŚASĀHASRĪ.

Foll. 7a—32b.

Same text as that described under No. 4565 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Breaks off in the Tattvamasi-prakaraṇa.

(c) परमार्थसारः, सव्याख्यः.

PARAMĀRTHASĀRAḤ WITH COMMENTARY.

Foll. 33a—80a. Fol. 80b is left blank.

Text is the same and the commentary similar to that described under R. No. 832 ante. This commentary by Vāsudēvayati, disciple of Rāma-kṛṣṇayati, is called Paramārthasāraprakāśikā.

Complete.

निगमान्तवचोवेद्यं सच्चिदानन्दलक्षणम् ।
नौमि वेङ्कटकृष्णाख्यदेशिकं विश्वसाक्षिणम् ॥
यदानन्दसत्यावबोधस्वरूपं यदज्ञानमेवाखिलानर्थहेतुः ।
तदेवाहमस्मीति साक्षात्कृतं यद्विमुक्त्यै तदस्माकमत्राविरस्तु ॥
निरस्तनिखिलानर्थपरमानन्दरूपिणे ।
नृसिंहाय नमस्कुर्मस्सर्वधीवृत्तिसाक्षिणे ॥
वन्देऽहं वसुधाधारं वचसामादिकारणम् ।
वासुदेवप्रियं शेषमशेषसुखदं गुरुम् ॥
श्रीगुरुमादौ नत्वा तत्कृपया लब्धबोध आचार्यात् ।
आर्यापश्चाशीतिं व्याख्यास्येऽहं मुमुक्षुजनसेव्यम् ॥
यदशेषशेषगीतं तद्व्याख्यामारभेऽहमतिमौढ्यात् ।
तत् क्षम्यतां दयालो मम दौरात्म्यं महीधरानन्त ॥

इह खलु परमकारुणिकः फणिपतिर्भगवान् परमकरुणयेदं जगत् दुःखसागरमग्नं दुःखसागरादुद्दिधीर्षुस्तमेव विदित्वातिमृत्युमेति, तमेव विद्वा-

नमृत इह भवतीत्यादिश्रुतिभ्यस्तत्त्वज्ञानं मोक्षसाधनमतस्तत्त्वज्ञानमस्माकमुप-दिशेति कैश्चित्कावषेयैः शिष्यैः प्रार्थित(ः) तदनुग्रहार्थमार्याणां पञ्चोत्तराशीत्यां परमार्थसाराख्यं शास्त्रं प्रणिनाय ।

End :

इत्येवमुक्तं परमं रहस्यं वेदान्तसारं तव मुख्यभूतम् ।
पञ्चाशीत्योपनिषद्भिस्तु सिद्धं वक्ष्यत्यन्ये मुनयश्चैतदेव ॥ इति ।
इति फणिपतिना रहस्यमुक्तं मुनिवरसङ्घपरम्परागतं यत् ।
बहुतरकरुणार्द्रभावबुध्या मुनिभिरमीभिरसङ्गिभिः प्रणीतमिति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यशेषभगवतः कृतौ परमार्थसाराख्यं शास्त्रं समाप्तम् ॥

इति श्रीब्राह्मे पुराणे दूर्वासकावषेयसंवादे सनत्कुमारव्यासससंवादे च काव-षेयगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे तृतीयोऽध्यायः ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तानहं वन्दे रामकृष्णयतीन् गुरून् ॥
येनाहमवहितरसन् कृतवान् व्याख्यां गुरूक्तमार्गेण ।
भवतु स तुष्टो भगवान् परमार्थसारप्रकाशिकया ॥
श्रीवासुदेवयतिना परमार्थसारप्रकाशिकाकारि ।
अनया तुष्यतु विष्णुर्योऽन्तस्तिष्ठन्नबोधयत् स्वगुणम् ॥

Foll. 81*a*—82*a* contain a small portion of Paramārthasāra with commentary. Fol. 83*a* contains some Prātassmaraṇīyaślōkas. Foll. 82*b* and 83*b* are left blank.

(*d*) अष्टावक्रगीता, सव्याख्या.

ASṬĀVAKRAGĪTĀ WITH COMMENTARY.

Foll. 84*a*—152*b*.

Same work as that described under R. No. 1909 ante. By Viśvēśvara.

Complete.

Fol. 153 contains some Advaita-Vēdāntaviṣayakaślōkas.

(*e*) वेदान्तडिण्डिमः.

VĒDĀNTAḌIṆḌIMAḤ.

Foll. 154*a*—155*b*.

Same work as that described under No. 4726 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. **4150**.

Palm-leaf. $17\frac{5}{8}$ and $15\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 113. Lines, 8 in a page. Grantha. Good.

Presented in 1921–22 by M.R.Ry. Rāmayyaṅgār, Terati-grāmam, Sattangudi post, Tirumangalam taluk, Madura district.

Foll. 36*b* and 47*b* are left blank.

युधिष्ठिराश्वमेधचम्पुः.

YUDHIṢṬHIRĀŚVAMĒDHACAMPUḤ.

A treatise in prose and verse narrating the story of the performance of the Aśvamēdha sacrifice by Yudhiṣṭhira: by Gōpāla, son of Vēṅkaṭa-lakṣmī and Subbaya of Kauśikagōtra. The story narrated in this work is said to have been taken from the Jaimini-bhārata.

Contains the Āśvāsas 1 to 11 complete.

Beginning:

श्रीहालास्यवसुन्धरानिवसतेरीशस्य मोदप्रदा
मीनाक्षीकरुणाकटाक्षसरणिर्मां पातु सा सन्नतम् ।
या श्वश्रूरभवद्रतेर्गजमुखक्रौञ्चाद्रिभेत्त्रोस्सुधा-
धाराभृद्वरवासभूमिरभवच्छृङ्गारपूरस्य या ॥

*　　　*　　　*　　　*

श्रीरामायणकाव्यकल्पनचणो वाल्मीकिराद्यः कविः
व्यासो भारततत्त्ववित् गुणनिधिः श्रीकालिदासस्सुधीः ।
बाणो भारविरादिभास्करकविर्माघो मयूरः कविः
सानन्दाः कवयश्च सादरममी सर्वेऽनुगृह्णन्तु माम् ॥
एवं महापद्यचतुष्टयेन स्तुत्वेष्टदैवानि महाकवींश्च ।
एकेन पद्येन मम स्थितस्य समीपमागत्य(?) बुधाग्रगण्याः ॥
मीनाक्षीवरलब्धदिव्यकविताधारासुधाराशिस-
म्भूतागण्यमहाप्रचण्डरचनापाण्डित्यसर्वङ्कषम् ।

विद्वत्सञ्चयडोलिकावरशिशुं विख्यातवाग्धोरणी-
धाटीनिर्जितघोटिकाकुलममुं संप्रेक्ष्य मामब्रुवन् ॥
श्रीगोपालकवे त्वया विरचितास्सारान्ध्रगीर्वाणस-
द्भाषाभ्यां बहुशः प्रबन्धनिवहाः पूर्वं त्विदानीं मुदा ।
श्रेष्ठे जैमिनिभारते सुरुचिरं पर्वाश्वमेधं महाकाव्यं
त्वं कुरु गद्यपद्यमयमित्येते प्रहृष्टा धिया ॥
तेषामनुग्रहं प्राप्य प्रारभे चम्पुनामकम् ।
युधिष्ठिराश्वमेधीयं काव्यं रसगुणैर्युतम् ॥
अस्ति श्रीभरतान्ववायजनुषां राज्ञां ज्वलत्तेजसां
सम्पज्जालविनिर्जितामरपुरी श्रीहस्तिनाख्या पुरी ।
चञ्चत्कान्तिकलिन्दभूधरमहाशुण्डालगण्डस्थली-
निर्गच्छन्मदवारिसंशयकृतो भास्वत्सुतायास्तटे ॥

* * * *

या खलु निखिलबृन्दारकसन्दोहनन्दनीयनिजवैभवनिर्जितानीतपरिपन्थिनृपतिराज्यलक्ष्मीविरचितनिश्वासधूमैरेव किञ्चिदुत्पतद्गृहकपोतिकानिकरैर्लक्ष्यमाणविटङ्कवाटिका ।

* * * *

Colophon :

श्रीगोपालकविना विरचिते युधिष्ठिराश्वमेधीये चम्पुकाव्ये प्रथमाश्वासः ॥

End :

तदनु तावन्मखपरिपूर्तिमवलोक्य सन्तुष्टास्सर्वेऽपि तापसराजन्यवर्गाः कौतुकेन कृताभ्यवहारा धर्मनन्दनं बहुधा श्लाघयन्तस्तेन वितीर्णानि तानि तानि सम्मानान्यूरीकुर्वन्तस्तदनुज्ञया शनैश्शनैः स्वं स्वं पदं प्रति प्रचलिता बभूवुः ।

ततः—

मौलौ रत्नमयं किरीटममलं पार्श्वेऽनुजातान् सदा
चित्ते भूतदयां करे वितरणं बाहौ प्रतापश्रियम् ।
जिह्वाग्रे हरिकीर्तनं विरचयन् धर्मात्मजातो मुहुः
सामोदेन सहाच्युतेन सकलां गोपायतिस्म क्षितिम् ॥

श्रीमत्कौशिकगोत्रपावनमहायेलेश्वराख्यान्वया-
म्भोजाहस्करतेजसा कविसुतश्रीसुब्बयाब्धीन्दुना ।
श्रीमद्वेङ्कटशब्दपूर्वविलसल्लक्ष्म्यम्बिकागर्भस-
द्रत्नेनेदमकारि चम्पुकविना गोपालनाम्ना मुदा ॥

Colophon :

(श्रीगोपालकविना विरचिते युधिष्ठिराश्वमेधीये) एकादशाश्वास-
स्समाप्तः ॥

R. No. **4151.**

Palm-leaf. $14\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 107. Lines, 6 in a page. Telugu. Very much injured.

Presented in 1921–22 by M.R.Ry. Mulugu Kumārasvāmigāru, Machavaram, Kandukur post.

Fol. 93*b* is left blank.

नामलिङ्गानुशासनम्, आन्ध्रटीकासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH TELUGU MEANING.

Same work as that described under Nos. 1620 and 1673 of the D.C.S. MSS., Vol. III. By Nāgadēvabhaṭṭōpādhyāya.

Wants the beginning in the Svargavarga and the end in the first Kāṇḍa.

R. No. **4152.**

Palm-leaf. $14\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 100. Lines, 9 in a page. Telugu. Very much injured.

Presented in 1921–22 by M.R.Ry. Mulugu Kumārasvāmigāru, Machavaram, Kandukur post

Foll. 1*a*—2*a* contain a portion of Śivamahimnasstava. Fol. 2*b* is left blank. Foll. 3*a*—8*b* contain the Vēdapādastava of Jaimini. Foll. 9 and 10 are left blank.

(*a*) विश्वगुणादर्शचम्पुः.

VIŚVAGUṆĀDARŚACAMPUḤ.

Foll. 11*a*—58*a*.

Same work as that described under R. No. 1067 ante. By Vēṅkaṭādhvarin.

Date of transcription—Thursday, the 7th day of the dark fortnight of the lunar month Āśvayuja in the year Tāraṇa.

Name of the scribe—Sālvīpati, son of Ānvanārādhya of Mulugu.

Fol. 59 gives some Prahēlikāślōkas. Foll. 58*b* and 60 are left blank. Fol. 61*a* contains the Vīrabhadramālāmantra. Foll. 61*b* and 62 are left blank. Foll. 63*a*—67*b* contain the Jvarabhairavādyauṣadhayōga.

(*b*) वीरभद्रविजयचम्पुः.

VĪRABHADRAVIJAYACAMPUḤ.

Foll. 68*a*—100*b*.

Same work as that described under R. No. 418 ante. By Ēkāmradīkṣita, son of Muktīsvaradīkṣita.

Breaks off in the fifth Ullāsa.

R. No. 4153.

Paper. $8\frac{3}{4} \times 6\frac{7}{8}$ inches. Foll. 40. Lines, 22 in a page. Telugu. Much injured.

Presented in 1921–22 by M.R.Ry. Durgam Subrahmaṇya Śāstrigaḷ, Kavali, Nellore district.

नारायणपदभूषणम्.

NĀRĀYAṆAPADABHŪṢAṆAM.

Similar to the work described under R. Nos. 405 and 1830(*a*) ante.

Wants the beginning and the end and the pages are in disorder.

Beginning:

इति च प्रागुपपादितम् । तथा च पृथिव्युद्धरणार्थवाराहरूपपरिग्रहस्य वैष्णवत्वप्रसिद्धेः द्दष्ट्वा दंष्ट्राग्रेत्यादिसमनन्तरग्रन्थसन्दर्भस्य तोयान्तां स महीमित्यादिविष्णुपुराणोपबृंहणस्य उद्धृतासि वराहेणेति श्रुत्यन्तरस्य तत्त्वे भवेनेति वाराहवचनस्य न विरोधः । सर्वस्याप्यस्य व्यूहव्यूहवतोरभेदोपचारमभिप्रेत्य विरिञ्चाधिष्ठितवैष्णवरूपमभिप्रेत्य वा प्रवृत्तत्वात् ।

* * * *

तथा च प्रकृते पूर्वपदादिति सूत्रस्य विध्यर्थत्वमेव पाणिनेरभिप्रेतं न तु नियमार्थत्वम् । नियमार्थत्वे अग इति सूत्रविशेषणस्य विध्यर्थत्वपक्षे ऋगयनादिशब्देषु णत्वव्यापकत्वे(वर्तक)त्वेनाभिमतत्वेन नियमांशवादत्वमेव स्यात् । तथा नारायणशब्दे णत्वं सिध्यति ।

End:

इजादेश्च सनुम इति सूत्रं नियमार्थमित्यप्यविशिष्टम् । न किंचिदपि सूत्रं व्यर्थम् । नन्वेवमप्याग्निमारुतमित्यादौ देवताद्वन्द्वे चेत्युभयपदवृद्धिर्न स्यात् तत्रोत्तरपदत्वे चेति वार्तिकप्रवृत्त्योत्तर.

R. No. **4154.**

Palm-leaf. $13\frac{1}{8}$ × 2 inches. Foll. 210. Lines, 11 in a page. Grantha. Injured.

Presented in 1921–22 by M.R.Ry. R. Rāghavayyaṅgār, Ramnad. Foll. 1 and 198—210 are left blank.

मानवधर्मशास्त्रम्, सव्याख्यानम्.

MĀNAVADHARMAŚĀSTRAM WITH COMMENTARY.

Same text and commentary as that described under Nos. 2663 and 2671, respectively, of the D.C.S. MSS., Vol. V, wherein see for the beginning. The commentary is by Nandapaṇḍita of Bhāradvājagōtra, friend of Vīramalla and younger brother of Lsksmaṇa.

Complete.

End:

अथ शास्त्राध्ययनस्य फलमाह —

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठेद् द्विजः ।
भवत्याचारवान्नित्यं यथेष्टेनाप्नुयाद्गतिम् ॥

यथेष्टेन यथेष्टमाप्नुयात् गतिं यथेष्टं फलमाप्नोति ॥

Colophon:

इति श्रीभारद्वाजकुलतिलकेन श्रीवीरमल्लप्रियसखेन लक्ष्मणानुजेन श्रीनन्दनाचार्य(र्येण)विरचिते श्रीमानवधर्मशास्त्रव्याख्याने द्वादशोऽध्यायः ॥

R. No. 4155.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 60. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1921–22 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, via Ernakulam.

Fol. 60 is left blank.

प्रयोगसारव्याख्या—सर्वाङ्गसुन्दरी.
PRAYŌGASĀRAVYĀKHYA : SARVĀṄGASUNDARĪ.

A commentary on the Prayōgasāra which is a treatise on medicine. The commentary was written by Vāsudēva of Svarṇagrāma also called Svarṇāttūr-mana, known as Ponnūrkōṭṭa-manā and disciple of Dēvarājagiripūjyapāda.

Contains the Paṭalas 1 to 54 complete.

Foll. 53*a*—60*a* contain the meaning of some of the technical words of this work in Malayalam language.

Beginning :

अनवच्छिन्नचिन्मात्रपरमानन्दसुन्दरीम् ।
ध्यानहानक्रियाबाहुकन्दस्पन्दां न(नु)मो गिरम् ॥

श्रीमन्नाथपदाम्भोजं यत्र सम्यग्विराजते ।
तेभ्यो दिक्कालदेशेभ्यो रचये सन्ततं नतिः(म्) ॥

अन्तरायमहाघर्मभिदुरां सर्वमङ्गलाम् ।
हेरम्बमेघस्तनुतात् दृष्टिवृष्टिमभीष्टदाम् ॥

प्रयोगसारवाणीं तां प्रणम्यानन्ददायिनीम् ।
यथामति करिष्ये तद्व्याख्यां सर्वाङ्गसुन्दरीम् ॥

इह हि ग्रन्थमारभमाण आचार्यस्सुजनपरिपालितशिष्टाचारप्रचयगमनाभ्यामाशीर्वादलक्षणं मङ्गलाचरणं मुखतस्सम्पादयंस्तदीयं विषयादि सूचयति—मायेति । भारती वः पुनात्वित्यन्वयः । कीदृश्यत आह—मायेति—माया जगत्कारणभुवनाधिपतिः सैव मौलिप्रबन्धः कपर्दो यस्याः सा तथा प्रबद्धेति पाठे मौलौ प्रबद्धा मौलिप्रबद्धा सा चाश्चर्यकरणलक्षणमाया यस्यास्सा तथा स्यात् । प्रणवनवमुखीति । प्रणव एव(नवं)नूतनं मुखं यस्यास्सा ।

* * * *

एवमत्र मया सृष्टिविलेकोऽकारि सादरम् ।
देवपातालशैलश्रीपादाब्जाङ्कितमौलिना ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यकवितार्किकचक्रवर्तिश्रीमद्देवराजगिरिपूज्यपादशिष्यस्य श्रीवासुदेवविदुषः कृतौ प्रयोगसारव्याख्यायां सर्वाङ्गसुन्दर्यां प्रथमः पटलः ॥

End:

क्षेमादियोगरक्षणप्राप्तिः वाचकः शब्दः मातङ्गसङ्गतिः । शिवारुतज्ञा गोमायुरवेण फलज्ञाः रुतशब्दं शुभोऽयमशुभोऽयमिति मार्गं विविच्य विवेचनं कृत्वोक्तफलदान्येतानि नान्यानीति विविच्य निरूप्य शकुनानि कीर्तितानीत्यन्वयः स्यात् ॥

प्रयोगसारव्याख्याभूत् कृता सर्वाङ्गसुन्दरी ।
स्वर्णग्रामाधिपेनेयं वासुदेवविपश्चिता ॥
केषांचिदधिकमुक्तं नैवोक्तमपेक्षितं च केषां चित् ।
इति यदि बुद्धिरिह स्यात् कुर्युर्मतमात्मनो यथाकामम् ॥
व्याख्यागुणं वा दोषं वा वदन्ति यदि सज्जनाः ।
तद्दृष्टिपातपूतत्वाच्चरितार्था वयं तदा ॥
यच्चिन्तासन्ततिलता तनुते मुक्तितत्फलम् ।
अखण्डं तन्महो वन्दे शब्दमाकाशसुन्दरम् ॥
त्रिपञ्चसप्तनिष्यन्दस्पन्दसारमनश्वरम् ।
ध्यानभानचयं वन्दे वैष्णं तत्परमं वपुः ॥
नमो महीयसे मह्यं गुरवे वरवेधसे ।
महसे महसे नित्यदायिने मायिनेऽणवे ॥
ग्रसद्ग्रन्थित्वि(न्ध्याद्रि)भिदुरबुद्धिसम्पत्तिभूभयः ।
सन्तस्ते मेऽनुगृह्णन्तु(कृतिं)सन्तो यथा तथा ॥

Colophon:

इति श्रीमत्प्रयोगसारव्याख्यायां सर्वाङ्गसुन्दर्यां चतुष्पञ्चाशत्प(ः प)टलः ॥

GENERAL INDEX.

[*Note.*—The names printed in *italics* are those of the works described.]